अध्वर्यवम् य आत्मनोऽध्वरमिच्छति तम् (पुरुषम्) प्र०—अत्र 'वाच्छन्दसि' इत्यम्याऽपि गुणावादेशौ, (पुरुषम्) २८ १९ **अध्वर्यवः**=आत्मनोऽध्वरमहिंसा कामयमाना (विद्वज्जना) ३ ४६ ५ युद्धयज्ञसिद्धिकरा (सज्जना) २ १४ ६ सर्वस्य प्रियाचरणा (विद्वास) २ १४ ४ राजसम्बन्धिन (विद्वज्जना) २ १४ ११ महौषधि-निष्पादका (महावैद्या जना) २ १४ १० पुरुषार्थिन (जना) २ १४ ९ यज्ञसम्पादका (सज्जना) २ १४ ३ आत्मनोऽध्वर कामयमाना (सज्जना) २ १४ १ आत्मनोऽहिंसाख्ययज्ञमिच्छन्त , (भा०—अध्यापकोपदेशका-ऽनिथय) २३ ४२ अध्वरमहिंसाधर्मकाममिच्छव (विद्वास) १ १५३ १ विद्यायज्ञसम्पादका (विद्वास) ५ ३१ १२ सर्वस्य प्रियाचरणा (सत्पुरुषा) २ १४ ४ **अध्वर्युभिः**=आत्मनो हिंसामनिच्छुभि (जनै) २ ३७ २ अध्वर यज्ञमिच्छद्भि (सत्पुरुषै) १ १३५ ६ हिंसाऽन्याय-वर्जितै सह (प्रजाजनै सह) ३३ ७० य आत्मानमध्वर-मिच्छन्ति तै (प्रजाजनै) १ १३५ ३ अध्वर निष्पादकै (होत्रध्वर्यूद्गातृब्रह्मसभ्यैर्ऋत्विग्भि) ३ ७ ७ **अध्वर्युः**= आत्मनोऽध्वरमहिंसाव्यवहार कामयमान (सज्जन) ६ ४१ २ अध्वर शिल्पविद्या कामयमान (विद्वान् शिल्पी) ५ ३७ २. अहिंसायज्ञमिच्छु (विद्वान्) २५ २८ अध्वरस्य योजको नेता कामयिता वा (परमेश्वर) प्र०— अत्राऽध्वरशब्दोपपदाद् युज्धातोर्बाहुलकात् क्यु प्रत्यय टिलोपश्च 'अध्वर्युरध्वरयु=अध्वर युनक्ति० नि० १ ८, १ ९४ ६ आत्मनोऽध्वरमहिंसाधर्ममिच्छु (मित्र = सुहृज्जन) ३ ५ ४ य आत्मनोऽध्वरमहिंसनीय व्यवहार कर्त्तुमिच्छु (अग्नि =सूर्य) ४ ६ ४ यज्ञकर्त्ता (सज्जन) २ ५ ६ आत्मनोऽध्वरमहिंसनमिच्छु (सत्पुरुष) १ १६२ ५ **अध्वर्यू**=आत्मनोऽध्वरमहिंसामिच्छन्तौ (विद्वज्जनौ) ३३ ७३ आत्मनोऽध्वरमहिंसनीय गृहाश्रमादिक यज्ञमिच्छू (अश्विना=अध्यापकोपदेशकौ) १४ ७ **अध्वर्यो**!= योऽध्वरमिवाचरति तत्सम्बुद्धौ (राजन्) २३ २३ अहिंसक (राजप्रजाजन) ३ ५३ ३ योऽध्वर यज्ञ युनक्ति तत्सम्बुद्धौ (वैद्यराज) २० ३१ [अध्वर्यु =अध्वरयु । अध्वर युनक्ति अध्वरस्य नेता अध्वर कामयते वा । अपि वा-ऽधीयाने युरुपबन्ध नि० १ ७ पूर्वार्धो वै यज्ञस्याध्वर्यु र्जघनार्ध पत्नी श० १ ९ २ ३ प्रतिष्ठा वा एषा यज्ञस्य यदध्वर्यु तै० ३ ३ ८ १० वायुर्वा अध्वर्युर् अधिदैव प्राणोऽध्यात्मम् गो० १ ४.५ वह्निरध्वर्यु तै० १ १ ६ १० राज्य वा अध्वर्यु तै० ३ ८ ५ १ मनो-

ऽध्वर्यु श० १५१२१ प्राणो यज्ञस्याध्वर्यु जै० १८५ प्राणापानावेवाध्वर्यू गो० १२१० श० ५५१११ द्यौरध्वर्यु मै० १६.१ चक्षुरध्वर्यु कौ० १७७ आश्विनौ वाऽध्वर्यू काठ० २८५ आदित्यो मे ऽध्वर्यु ष० २५ अपानो मेऽध्वर्यु ष० २७ अश्विनौ हि देवानामध्वर्यू तै० ३२२१ अध्वर्युरेव मह गो० पू० ५१५ तमेतमग्निरित्यध्वर्यव उपासते श० १०५२२० प्रतीच्यध्वर्यो श० १३५४२४ पर्णमयेनाध्वर्युरभिपिञ्चति तै० १७८७]

अध्वरीयसि आत्मनोऽध्वरमहिसामिच्छसि २१२ [अध्वरसुवन्ताद् आत्मनेच्छाया क्यच् । 'क्यचि चे' तीत्वम् । 'वा छन्दसि सर्वे विधयो विकल्प्यन्ते' इति वचनाद् 'न छन्दस्य०' इतीत्वप्रतिषेधो न भवति क्यजन्ताद्धातोर्लट्]

अध्वस्मभिः अपतनशीलैर्गुणकर्मस्वभावै २३५१४ अध्वस्तै (पथिभि =मार्गै) २३४५ **अध्वस्मानः**= ये नाऽध पतन्ति ते (जना), प्र०—'ध्वसु अध पतने, ११३६४ [नञ्+ध्वसु अवस्र सने (भ्वा०) धातोर्मनिन् प्रत्यय । छान्दसो नकारलोप]

अध्वानयत् धुनयति ६१८१० [ध्वन शब्दे धातोर्णिजन्ताल् लङ्]

अनक्ति कामयते ४६३ **अनक्तु**=सयुनक्तु ३७११. कामयताम् ७४३३ प्रकट करे २३२ सिञ्चतु ६२ [अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधादि०) धातोर्लट्]

अनग्नाः सर्वतो वस्त्रभूषणादिभिराच्छादिता (युवतय =प्राप्तयौवना स्त्रिय ३१६ [नञ्+नग्न-पदयो समास]

अनक् प्रकटीकरोति २१५७ **अनक्ति**=कामयते ११५३२ **अनक्तु**=कामयताम् ७४३३ प्रकट करे २३२ सिञ्चतु ६२ सयुनक्तु ३७११ [अञ्जू व्यक्ति-म्रक्षणकान्तिगतिषु (रुधा०) धातोर्लडि लोटि लटि च रूपाणि]

अनग्नित्राः अविद्यमानज्वरेण रक्षका (रोगा) ११८६३ [नञ्+अग्नि+त्रैङ् पालने धातो क प्रत्यय]

अनग्निष्वात्ताः अविद्यमानाऽग्निविद्याग्रहणा ज्ञान-निष्ठा पितर १६६० वायुजलभूगर्भादिविद्यानिष्ठा (पितर) ऋ० भू० २६२, १६६० [नञ्+अग्निष्वात्ता । अग्निष्वात्ता=अग्नि+सु+आ+दाञ् दाने (जु०) धातो क्त]

अनज उच्चरतोपदिशत, प्र०—अत्र व्यत्ययेनैकवच-नम् ५५४१ **अनजन्**=कामयेरन् ३१६५

अनकुत्सु गवादिषु ३५३१८ **अनड्वान्**= वृषभ (पशु) २६५६ हलशकटादिवहनसमर्थ (वृषभ) १८२७ **अनड्वाहः**=शकटवहनसमर्था (पशव = (वृषभा २४१३ **अनड्वाहम्**=योऽनासि शकटानि वहति तद्वद्वर्त्तमानम् (वह्नि कृषीवल वा) ३५१३ शकटवाहकम् (गाम्=वृषभम्) २८३० [अनडुह् प्राति-पदिकस्य रूपाणि । सप्तम्या 'वसुस्र सु०' अ० ८२७२ सूत्रेण दकारादेश । प्रथमाया चामागमे नुमि सयोगान्त-लोपे च रूपम् । अग्निरेष यदनड्वान् श० ७३२१ आग्नेयो वा ऽनड्वान् । श० ७३२१६, १३८४६ वह्निर्वा अनड्वान् तै० ११६१०, १८२५ वोढा ऽनड्वान् तै० स० ७५१८१ अनड्वान् वै सर्वाणि वयासि पशूनाम् मै० ३७४ अनड्वान् वय पङ्क्त-श्छन्द तै० स० ४३५१]

अनत् प्राणत् ११६४३० [अन प्राणने धातोर्लेट् । अनिति गतिकर्मा निघ० २१४]

अनदतीः अविद्यमाना अतीव सूक्ष्मा दन्ता यासान्ता (युवतय =प्राप्तयौवना स्त्रिय) ३१६ [नञ्+दन्त-पदयोर्बहुव्रीहौ 'छन्दसि चे' ति सूत्रेण दतृ-आदेशे ङीपि च रूपम् । अनजादावपि छान्दसत्वान्नुट्]

अननुदः योऽनुगत न ददाति तस्य १५३८. अप्रेरित (इन्द्र =विद्वान्) २२१४. येऽनुददति तेऽनुदा, न विद्यन्तेऽनुदा यस्य स (विद्वज्जन) २२३११ [अनु+दा+क, ततो नञ्समास । अथवा णुदप्रेरणे धातोर् इगुपधलक्षण क प्रत्यय, ततो नञ्समास]

अननुभूतीः अनुभवरहितान् (जनान्) ६४७१७ [अनु+भू सत्तायाम्+क्तिन् भावे स्त्रियाम् । ततो नञ् बहुव्रीहि]

अनन्तम् देशकालवस्तुपरिच्छेदशून्यम् (ब्रह्म) १११५५ अविद्यमानोऽन्तो यस्य तत् (भा०—ब्रह्म) ३३३८ **अनन्तः**=अविद्यमानाऽन्त आकाश १११३३ नि सीम (त्वेष =प्रकाश) ६६१८ **अनन्ते**= देशकालवस्त्वपरिच्छिन्ने (अश्मनि=मेघे) ११३०३. परमात्मन्याकाशे वा ४१७ **अनन्तैः**=अविद्यमान-सीमभि (वर्षै) ११२१६ [अनन्तमिति बहुव्रीहिसमास अनन्ते द्यावापृथिव्यो कौ० नि० ६०]

अनन्तासः अविद्यमानोऽन्तो येषान्ते (परमाणव)

५ ४७ २ (नञ्+अन्तयोर्बहुव्रीहि]

अनन्तशुष्माः अनन्त शुष्म बल येषान्ते (नर) १ ६४ १० [शुष्मम् बलनाम निघ० २ ९ अनन्तशुष्मयोर्बहुव्रीहि]

अनपच्युतम् ह्रासरहितम् (सहा=बलम्) ५ ४४ ६. अपचयरहितम् (पुरुषम्) ४ १७ ४ **अनपच्युतः**= अपचयरहित (रथ =) विमानादियानविशेष) ४ ३१ १४ [अप+च्युङ् गतौ (भ्वा०) क्त । नञ्समास]

अनपत्यानि अविद्यमानान्यपत्यानि येषु तानि (अधर्म्यकर्माणि) ३ ५४ १८ [अपत्य कस्मात् । अपतत भवति । नानेन पततीति वा नि० ३ २ ततो नञ्बहुव्रीहि]

अनपवृज्यान् अपवर्जितुमनर्हान् (मार्गान्) १ १४६ ३ [अप+वृजी वर्जने (अदा०) धातोर् ण्यत् प्रत्यय । नञ्समास]

अनपवृत् यो नाऽपवृणोति ६ ३२ ५ [अप+वृञ् वरणे (स्वा०) धातो क्विप् । नञ्समास]

अनपव्ययन्तः अपव्ययमप्राप्नुवन्त (अश्वा = तुरङ्गा वह्वादयो वा) ६ ७५ ७ अपव्ययमाप्रापयन्त (योद्धृजना) २९ ४४ [अप+व्यय गतौ (भ्वा०) धातो शतृप्रत्यय नञ्समासश्च]

अनपस्फुरन्तीम् दृढा निश्चला प्रज्ञा सम्पादयन्तीम् (धेनु=वाचम्) ४ ४२ १० विज्ञापयित्रीमिव योगविद्याजन्या वाचम् ७ १० [अप+स्फुर सचलने (तुदा०) धातो शतृङीप्प्रत्ययौ । नञ्समासश्च]

अनपस्फुराम् निश्चला दृढाम् (धेनु=वाचम्) ६ ४८ ११ [अप+स्फुर सचलने (तुदा०) धातोरिगुपधलक्षण क प्रत्यय । नञ्समासश्च]

अनपावृत् यो नाऽपवृणोति (इन्द्र =राजा) ६ ३२ ५ [अप+वृञ् वरणे (स्वा०) धातो क्विप् । तुगागम । 'नहिवृति०' अ० ६ ३ ११६ सूत्रेणोत्तरपदे दीर्घ । नञ्समासश्च]

अनपिनद्धम् अनाच्छादितम् (जलप्रवाहम्) ६ ७२ ४ [अपि+णह बन्धने (दिवा०) धातो क्त प्रत्यय । 'नहो ध' इति हकारस्य धकार । नञ्समासश्च]

अनपेताः नाऽपेता पृथग्भूता (धारा =प्रवाहा) १८ ६५ [अप+इण् गतौ (अदा०) धातो क्त प्रत्यय । नञ्समासश्च]

अनप्नस. अविद्यमानमप्न कर्म यासान्ता क्रिया २ २३ ९ [निघण्टौ अप्न कर्मनामसु, अपत्यनामसु, रूपनामसु, पदनामसु च पठित तेन नञ्बहुव्रीहि । अनप्नस अप्न इति रूप नाम आप्नोतीति सत नि० ३ ११]

अनभिद्रुहा द्रोहकर्मरहितौ (मित्रावरुणा=राजप्रधानपुरुषौ) २ ४१ ५ [अभि+द्रुह जिघासायाम् धातो कर्त्तरि इगुपधलक्षण क । नञ्समास]

अनभिम्लातवर्णः न विद्यतेऽभितो म्लातो हर्षक्षीणो वर्णो यस्य स) (नपात्=अपत्यम्) २ ३५ १३ [अभि+म्लै हर्षक्षये (भ्वा०) धातो क्त प्रत्यय । नञ्बहुव्रीहिश्च समास]

अनभिशस्ति यन्नाभिशस्यतेऽभिहिस्यते तत् (सत्य=यथार्थम्) ५ ५ [अनभिशस्ति प्रशस्यनाम निघ० ३ ८. [अभि+शसु हिंसायाम् (भ्वा०) धातोस्स्त्रिया क्तिन् । नञ्समासश्च]

अनभिशस्तेन्यम् यदनभिशस्तेऽविद्यमानहिंसने नयति तत् (सत्य=यथार्थम्) ५ ५

अनभीशुः अविद्यमानावभीशू बलयुक्तौ बाहू यस्य स (वीरजन), प्र०—अभीशू इति बाहुनाम निघ० २ ४, ६ ६६ ७ नियामकरश्मिरहित (सूर्य) १.१५२.५ अप्रतिग्रह (रथ =यानविशेष) ४ ३६ १ [अभि+अशूङ् व्याप्तौ+उ प्रत्यय, बाहु० अकारस्येकार । अभीशवोऽभ्यश्नुवते कर्माणि नि० ३ ९ ततो नञ्बहुव्रीहि]

अनमत् नमति ६ १७ ९ नमतु २ २४ २ **अनमम्**= नमामि १ १६५ ६ **अनमन्त**=नमन्ते, प्र०—अत्र लडर्थे लुङ् ८ ४६ नमन्तु १७ २४ [णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लङ् । अनमन्त प्रयोगे व्यत्ययेनात्मनेपदम्]

अनमयत् दुष्टान्नम्रान् कारयेत् ७ ६ ५ [णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्णिजन्ताल् लङ्]

अनमस्यन् प्रह्वीभूता भवन्ति ६ ९ ७ [नमस्करोतीति विग्रहे नमस् शब्दात् 'नमोवरिवश्चित्रङ क्यच्' अ० ३ १ १९ सूत्रेण क्यच् । तत शतृ । नञ्समास]

अनमित्रम् अविद्यमानशत्रु १८ ६ [डुमिञ् प्रक्षेपणे (स्वा०) अनेकार्थत्वादत्र मानार्थे, धातो 'अमिचिमि०' उणा० ४ १६४ सूत्रेण त्र । नञ्बहुव्रीहि]

अनमीवस्य रोगरहितस्य सुखकरस्य, भा०—आरोग्यकारकस्य (अन्नस्य) ११ ८३ **अनमीवः**=अरोग (जन) ३३ ८६ अविद्यमानरोग (जन) ७ ४६ २ **अनमीवाः**=अमीवो व्याधिर्न विद्यते यासु ता. (अघ्न्या =गाव) (१ १ अविद्यमानोऽमीवा ज्वरादिरोग-

समूहो याभ्यस्ता, भा०—रोगविच्छेदका (आप = जलानि) ४ १२ नीरोगा (इष =अन्नादीनोपधिगणान्) ३ ६२ १४ प्र०—अमरोगे, इत्यस्माद्वाहुलकादौणादिक ईवन् प्रत्यय [अमीवा पदनाम निघ० ४ ३ (अमीवा= अभ्यमनेन व्याख्यात नि० ६ १२. नञ्समास) अनमीवस्य शुष्मिण इत्याहायक्ष्मस्येति वावैतदाह तै० स० ५ २ २]

अनमीवासः शरीरात्मरोगरहिता (ब्रह्मचारिणो जना) ३ ५६ ३ [पूर्वपदे व्याख्यातम्]

अनम्नत नम्रता को धारण करे १ १३१ १

अनयत् नयति ६ ५७.४ प्राप्त करावे ६ ४५ १ **अनयन्**=नयन्ति ६ १५ १७ प्राप्नुवन्ति १० १ **अनयन्त**= नयन्ति ४ ३३ ७. प्राप्नुयु ३ ७ ६ **अनयम्**=प्रापयेयम् ४ २६ २ **अनयः**=उन्नेय २ १३ १२ नयसि ६ १.७ [णीञ् प्रापणे (भ्वा०) धातोर्लङ्]

अनर्वन् अनर्वणेऽविद्यमानज्ञानाय (अविदुषे), प्र०—अत्र 'सुपा सुलुग्०' इति विभक्ति-लुक् १ ११६ १६. **अनर्वम्**=प्राकृताऽश्वयोजनरहितम् (चक्रम्) १ १६४ २ अविद्यमानाऽश्वम् (दात्र=दानम्) १ १८५ ३ **अनर्वा**= अश्वहीन (विद्वज्जन) ६ १२ अविद्यमाना अश्वा यस्या सा (अदिति =माता) २ ४० ६ अविद्यमानाऽश्वगमनेव (मैत्री) ७ ४० ४ अविद्यमानाऽश्वो रथ इव (अग्नि +विद्वान्) १ ६४ २ **अनर्वाणम्**=अविद्यमानाऽश्व पदातिम् (अतिथिम्) १ १६० १ अग्न्याद्यश्वसहित पश्वाद्यश्वरहितम् (रथम्) १ ५१ १२ द्वेषादिदोषरहितम् (मर्त्त=मनुष्यम्) १ १३६ ५ अविद्यमानोऽर्वाणोऽश्वा यस्मिँस्तम् ( ) प्र०—अर्वेत्यश्वनामसु पठितम् निघ० १ १४, १ ३७ **अनर्वाणः**=अविद्यमानाऽर्वधर्मादन्यत्र गमन येषान्ते (विद्वज्जना) १ १६० ६ अनर्वण =अनश्वस्य (रथस्य) [अर्व हिंसायाम् (भ्वा०) धातो बाहुलकात् कनिन्। अथवा ऋ गतिप्रापणयो (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' अ० ३ २ ७५ सूत्रेण वनिप् प्रत्यय। अर्वा हिंसको ज्ञानी वा। नञ्समासेऽनर्वा अनर्वा पदनाम निघ० ४ ३ अनर्वम्= अप्रत्यृतमन्यस्मिन् नि० ६.२३ अनर्वम्=अप्रत्यृतमन्यस्मिन् नि० ४ २७ अनर्वा प्रेहीति। असपत्नेन प्रेहीत्येवैतदाह॥ श० ३ ८ २ ३]

अनर्विशे अनस्सु शकटेषु विट् प्रवेशस्तस्मै (पश्विषे= पशूनामिषे वृद्धीच्छायै) प्र०—अत्र 'वाछन्दसि, इति षत्वाऽभाव १ १२१ ७. [अन शकटवाची निरुक्ते, विश प्रवेशे धातो क्विपि विश्। एनयो समास]

अनवद्य प्रशसित (विद्वज्जन), प्रशसितगुणयुक्त (विद्वत्) १ १२६ १ न विद्यतेऽवद्यं निन्द्यं कर्म यस्मिँस्तत्सम्बुद्धौ (विद्वज्जन), प्र०—'अवद्यपण्यवर्या०, अ० ३ १ १०१ अनेन गर्ह्येऽवद्यशब्दो निपातित १.३१ ६ **अनवद्यम्**= अनिन्दितम् (युवानम्) १ ७१ ८ सर्वदोषरहितम् (रेत.) ३३ ११ **अनवद्या**=विद्यासौन्दर्यादिशुभगुणयुक्ता (नारी) १ ७३ ३ अत्यन्तउत्तमगुणयुक्त (नारी) आर्याभि० १ ४६ **अनवद्याभिः**=प्रशसनीयाभि (ऊतिभि =रक्षादिभि.) ४ ३२ ५ **अनवद्याः**=अनिन्द्या (गिर =विविधविद्यायुक्ता वाण्य) ३ ३१ १३ अनिन्दिता (जना) १ १२३.८ प्रशसनीया (आप्ता पुरुषा) ६ १६ ४ **अनवद्यैः**=निर्दोषैः (गणै =किरणैर्मरुद्भिर्वा) १ ६ ८ [नञ्+वद व्यक्तायां वाचि (भ्वा०) धातोर् 'अवद्यपण्य०' अ० ३ १ १०१ सूत्रेण गर्ह्यार्थे निपातनात् साधु। तद्विपरीतमनवद्यम् अनवद्य = प्रशस्यनाम निघ० ३ ८]

अनवद्यासः अनिन्द्या धर्माचारा (मरुत =मनुष्या) ७ ५७.५ [इष्ट० अनवद्य]

अनवन्त स्तुवन्तु ५ ३० १०. [णु स्तुतौ (अदा०) धातोर्लङ्। बहुल छन्दसीति शपो लुक् न। व्यत्ययेनात्मनेपदञ्च]

अनवपृग्णा सम्पर्करहितानि (तेजासि) १ १५२ ४ [अव+पृची सम्पर्चने (अदादि०) धातो क्त। नञ्समासश्च]

अनवभ्रराधसः न विद्यतेऽवभ्रो धननाशो येषान्ते (विद्वज्जना) ५ ५७ ५ अनवभ्रमविनाशि राधो येषान्ते (गन्तार =वायव) ३ २६ ६ अनवभ्रोऽपतित राधो येषान्ते (प्राज्ञा राजजना) २ ३४ ४. अविनष्टधना १ १६६ ७ [वभ्र गत्यर्थे (भ्वा०) धातोरच्। न वभ्रोऽवभ्र। राधो धननामसु निघ० २ १० ततो नञ्बहुव्रीहि]

अनवसः अविद्यमानमवोऽन्न यस्य स (वीरजन), प्र०—अव इत्यन्ननाम निघ० २ ७

अनवस्यन्तः अपरिचरन्त कुर्वन्त (जना) ४ १३ ३

अनवह्वरम् सरल (मार्गम्) २ ४१ ६ अव+ह्वृ कौटिल्ये (भ्वा०) धातो ['ऋदोरप्' सूत्रेणाप् प्रत्यय। तद्विपरीतम्]

अनवः मनुष्या, प्र०—अनव इति मनुष्यनाम निघ० २ ३,७ १८ १४

अनशनम् अविद्यमानमशन भोजन यस्मिँस्तत् पृथिव्यादिक च यज्जड जीवसम्बन्धरहित जगत् ऋ० भू० १२२ [अश भोजने (क्रया०) धातोर्ल्युट् भावे। नञ्बहुव्रीहिश्च।

तपो नाऽनशनात् परम् तै० आ० १० ६२]

अनश्नन् उक्तभोगमकुर्वन् (परमेश्वर) १ १६४ २० कर्मो के फलो को न भोगता हुआ (परमात्मा) स० प्र० २८३, १ १६४ २० [नञ्+अश भोजने+शतृप्रत्यय]

अनश्नू अव्यापिनौ (धूर्षाहौ=सूर्यविद्वांसौ) ४ ३३ [अशू व्याप्तौ (स्वा०) धातोर् डुन्प्रत्ययो रुडागमो नञ्-समासश्च]

अनश्वदाम् अविद्यमाना अश्वा यस्या ता गतिम् ५ ५४ ५ [अश्व+दा+क । स्त्रिया टाप् । नञ्बहुव्रीहि]

अनश्वम् अविद्यमाना अश्वास्तुरङ्गादयो यस्मिन् त (रथम्) १ ११२ १२ **अनश्वः**=अविद्यमानतुरङ्ग (सूर्य) १ १५२ ५ अविद्यमाना अश्वा यस्मिन् स (रथ=यान-विशेष) ४ ३६ १ अविद्यमाना अश्वा यस्य स (जन) ६ ६६ ७ [अशू व्याप्तौ (स्वा०) धातो 'अशूप्रुषि०' इत्युणादिना क्वन् प्रत्यय । नञ्बहुव्रीहि]

अनश्वासः अविद्यमाना अश्वा येषु ते (पवय=चक्राणि) ५ ३१ ५ [नञ् अश्वपदयोर्बहुव्रीहि]

अनष्टवेदसम् अनष्टविज्ञानधनम् (परीक्षक जनम्) ६ ५४ ८ [वेद धननामसु निघ० २ १० नष्टवेदस्-पदयोर्नञ्बहुव्रीहि]

अनष्टाम् प्रसिद्धाम् (वीर-भुजाम्) ७ ४५ २ [णश अदर्शने (दिवा०) धातो क्त । नञ्तत्पुरुष]

अनसः शकटस्य ४ ३० १० **अनसा**=शकटेन ३ ३३ ६ [अन प्राणने धातो ऽसुन् प्रत्ययो बाहुलकात् । अनो वा वायुरनिते, अपि वोपमार्थे स्याद्, अनस इव शकटादिव, अन शकटम् आनद्धमस्मिँश्चीवरम्, अनितेर्वा स्याज्जीवनकर्मण उपजीवन्त्येनन मेघोऽप्यन एतस्मादेव नि० ११ ४७ भूमा वा अन श० ११ २ ६ यज्ञो वा अन श० ११ २ ७ ३ ६ ३ ३ अन्तरिक्षरूपमिव वा एतद् यदन श० ४ ३ ४ १ यज्ञो वाऽअन श० ११ २ ७]

अनस्था अस्थिरहित (देही) १ १६४ ४ [नञ्युपपदे अस्थिप्राति० सु प्रत्यय । 'सुपा सुलुगि०' ति सुस्थाने डादेशे टिलोपे रूपम्]

अनस्वन्तः बहून्यनांसि शकटानि विद्यन्ते येषान्ते (वणिग्जना) १ १२६ ५ **अनस्वन्ता**=उक्तशकटादियुक्त (विद्वान्) ५ २७ १ [अन शकटम् नि० ११ ४७ अनस् प्राति० अतिशायने मतुप् । 'मादुपधायाश्च०' अ० ८ २ ६० सूत्रेण मकारस्य वकारादेश]

अनः शकटम् २ १५ ६ शकटमिव ४ ३० ११.

अना प्राणाऽऽत्मकानि (अहा=दिनानि) ४ ३० ३ [अन प्राणने (अदा०) धातो 'घञर्थे कविधानम्' इति वार्ति० भावे क]

अनाकृतः न आकृतो न निवारित (विद्वान्) १ १४१ ७ [नञ्+आ+कृ+क्त । धातूनामनेकार्थत्वान् निवारणेऽपि कृ धातु]

अनागसम् अविद्यमानाऽपराधाम् (नावम्) २१ ५ निर्माणदोषरहिताम्, भा०—सुपरीक्षिताम् (सुनावम्) २१ ७ अनपराधम् (मनुष्यम्) ४ ३६ ३ **अनागसः**=न विद्यतेऽग पाप दोषो यासु ता निर्दोषा, भा०—सुपरीक्षिता शोधिता सस्कृता (आप=प्राणा जलानि वा) ४ १२ अनपराधिन (जनान्) १ १२३ ३ **अनागाः**=न विद्यते आगोऽपराधो यस्मिन् स (राजपुरुष) ५ ८३ २ अनपराधिन (जना), प्र०—अत्र 'सुपा सुलुग्०' इति जस स्थाने सु ३३ १७ अधर्माचरणरहित (सविता=राजा) ३३ २० अनपराध (सूर्य=जगदीश्वर) ७ ६० १ [इण् गतौ (अदादि०) धातो 'इण आगोऽपराधे च' उणादि ४ २१२ सूत्रेण असुन् प्रत्ययो धातो स्थाने चागादेश । नञ्समास । अनागा अनपराध नि० १० ११]

अनागान् अनपराधिन (प्रजाजनान्) ३ ५४ १६ अनपराधान् (प्रजाजनान्) ४ १२ ४ [आग पूर्वपदे व्यास्यातम् । सकारलोपश्छान्दस । नञ्समास]

अनागास्त्वम् अनपराधत्वम् २५ ४५ निष्पापस्य भावम् १ १६२ २२ निष्पापत्वम्, प्र०—इण आग अपराधे च उ० ४ २१६ अत्र नञ्पूर्वादाग शब्दात्त्वे प्रत्यये 'अन्येषामपि दृश्यते' इत्युपधाया दीर्घत्वम् १ ६४ १५ **अनागास्त्वे**=निष्पापभावे प्र०—अत्र वर्णव्यत्ययेनाऽकारस्य स्थाने आकार १ १०४ ६ अनपराधित्वे ६ ५० २ [आग पापम्, तस्माद्भावे त्वप्रत्यय । नञ्समास । अनागास्त्वनमपराधत्वम् नि० ११ २१]

अनाततायः अविद्यमान आततो विस्तारो यस्य तस्मै (सभेशाय) १६ १४ [नञ्+आङ्+तनु विस्तारे (तना०) धातो क्त । अनुनासिकलोपश्च]

अनातुरम् दुःखवर्जितम् (विश्व=सम्पूर्ण जीवादिकम्) १ ११४ १ रोगेणाऽऽतुरतारहितम्, भा०—रोगकष्टमप्राप्तम् (सर्वप्राणिसमूहम्) १२ ६५ अदुःखितम्, भा०—रोगरहितम् (जगत्) १६ ४८ [अत सातत्यगमने (भ्वा०) धातोर्बाहुलकाद् उरच । धातोरादौ दीर्घ । नञ्समासश्च]

अनाधृष्टम् यन्न धृष्यते तेजस्तत् ५ ५. प्रौढम् (तेज) ५ ६ यन्न समन्ताद् धृष्यत इत्यनाधृष्टम् (ब्रह्मयज्ञो वा) १ ३१ धार्ष्ट्यम् (छन्द =बलम्) १४ ६. यत्समन्तान्न धृष्यते तत्तेज, प्रगल्भगुणसहित (भौतिकाग्निम्) ५ ६ **अनाधृष्टः** =केनाऽप्याधर्षितुमयोग्य (पति =राजा) ७ १५ १४ **अनाधृष्टा**=परैर्धर्षणरहिता (स्त्री) ३७ १२ अधर्षणीया निर्भया (प्रजा) ७ १७ समन्ताद् धर्षितुमनर्हा (योगिनो वीरता) ७ १२ **अनाधृष्टाभिः**=शत्रुभिर्धर्षितुमयोग्याभि (ऊतिभि =रक्षादिभि) ४ ३२ ५ **अनाधृष्टाः**=धर्षितु निवारयितुमनर्हा (वायव) १ १६ ४ शत्रुभिरधर्षिता (मधुमती =ओषध्य) १० ४ [आङ्युपपदे ञिधृषा प्रागल्भ्ये (स्वा०) धातो क्त । 'धृषिशसी वैयात्ये' अ० ७ २ १६ सूत्रेणेण्निपेध । नञ्समास । अथ वा अग्निरनाधृष्ट कौ० २७ ५ विराड् वा ऽनाधृष्ट छन्द, श० ८ २ ४ ४]

अनाधृष्यम् प्रगल्भम् (वृषभम्) ४ १८.१० न केनाऽपि धर्षितु योग्यम् ५ ५ **अनाधृष्यः**=अन्यैर्धर्षितुमयोग्य, भा०—न्यायप्रिय (अग्नि =राजा) २७ ७ **अनाधृष्याय**=भयधर्षणराहित्याय (वाताय=औषधिस्थवायुविज्ञानाय ३७ ७ **अनाधृष्या**=शत्रुभिर्धर्षितुमयोग्या (नर + नायका सेनास्था जना) १७ ४६ [आङ्युपपदे ञिधृषा प्रागल्भ्ये (स्वा०) धातो 'ऋदुपधाच्च०' अ० ३ १ ११० सूत्रेण क्यप् प्रत्यय । नञ्समासश्च । अनाधृष्या तदग्नि ऐ० ५ २५ असावादित्योऽनाधृष्य । कौ० २७ ५]

अनानत ! नम्रतारहित (शत्रूणा समीपे प्रजास्वामिन् राजन्) ६ ४५ ६ अनानतम्=नम्रीभूतम् (राजानम्) ७ ६ ४. **अनानताः**=शत्रूणामभिमुखे खल्वनम्रा (नृतमास =नायका जना) १ ८७ १ [नञ्युपपदे णम प्रह्वत्वे शब्दे (भ्वा०) धातो क्त ।]

अनानुदः अप्रेरित (इन्द्र =विद्याप्रकाशको जन) २ २१ ४ येऽनुददति तेऽनुदा, न विद्यन्तेऽनुदा यस्य स (विद्वान्राजा) २ २३ ११ [आङ्+णुद प्रेरणे (तुदादि०) धातोर् इगुपधलक्षण क । नञ्समासश्च]

अनानुभूतीः अनुभवरहितान् (अनभिज्ञान् सखीन्), प्र०—अत्र 'अन्येषामपि दृश्यते' इति दीर्घ ६ ४७ १७ [अनु+भू+क्तिन् भावे । नञ्बहुव्रीहि]

अनाप्तः मूर्खै शत्रुभिरप्राप्त (परमेश्वर सभाध्यक्षो वा) १ १०० २ [नञ्+आप्लृ व्याप्तौ (स्वा०) धातो क्त । अनाप्ता तत्पृथिवी । ऐ० ५ २५]

अनाभुवः ये समन्ताद्धर्माचरणे भवन्ति त आभुव, नाऽऽभुवोऽनाभुवस्तान् (पापिजनान्) १ ५१ ६. [नञ्+आङ्+भू सत्तायाम् (भ्वा०) धातो क्विप् प्रत्यय]

अनामयत् रोगादिरहितम् (आयु) १८ ६ [आङ्+अम रोगे (चुरा०) धातोर्बाहुलकात् कयन् प्रत्यय । नञ्समास । नपुसकेऽदडादेशश्छान्दस]

अनामि नम्येत ६ ८ ६ नम्यते ३ ६२ ५. [णम प्रह्वत्वे शब्दे (भ्वा०) धातो कर्मणि लुड् सामान्ये]

अनामृणः अविद्यमाना समन्तान्मृणा हिंसका यस्य स (परमेश्वर) १.३३ १ [आङ्+मृण हिंसायाम् (तुदा०) धातोर् इगुपधलक्षण क । नञ् बहुव्रीहि]

अनायतः इतस्ततोऽगच्छन्त्सन्निहित (सूर्य) ४ १३ ५ अदूरभवः (जीवात्मा) ४ १४ ५ [आङ्+इण् गतौ (अदा०) धातो शतृ। नञ्समासश्च]

अनायुधासः अविद्यमानाऽऽयुधा (योद्धृजना) ४ ५ १४ (आङ्+युध सम्प्रहारे (दिवा०) धातोर् इगुपधलक्षण क । नञ्बहुव्रीहि । जसोऽसुगागम]

अनारम्भणे आलम्बनरहिते (समुद्रे) ऋ० भू० १६३ अविद्यमानमारम्भण यस्य तस्मिन् (तमसि=अन्धकारे) १ १८२ ६ अविद्यमानमारम्भण यस्मिँस्तस्मिन् (अन्तरिक्षे सागरे वा) १ ११६ ५ [आङ्+रभ राभस्ये (भ्वा०) धातोर्भावे ल्युट्। 'रभेरशब्लिटोरि' ति नुमि परसवर्णे च रूपम्]

अनाविद्धया अप्राप्तक्षतया (तन्वा=शरीरेण) २६ ३८ शस्त्राऽस्त्ररहितया (तन्वा=शरीरेण) ६ ७५ १ [आङ्+व्यध ताडने (दिवा०) धातो क्त । सम्प्रसारणे पररूपे स्त्रिया टाप्। नञ्समासश्च]

अनाशवाः अव्याप्ता (वीरजना) १ १३५ ६ [अशू व्याप्तौ (स्वा०) धातो 'कृवापाजिमि०' उणा० १ १ सूत्रेण उण् प्रत्यय । नञ्समास]

अनाशस्ता इव अप्रशस्तगुणसामर्थ्या इव (मनुष्या) १ २६.१. [शसु हिंसायाम् (भ्वा०) धातो क्त.। 'धृषिशसी वैयात्ये' इतीड्निपेध । न शस्तोऽशस्त =प्रशस्त । नञ्समास]

अनाशुना अनश्वेनाऽचिरेण गन्त्रा (अर्वता=अश्वेन) ६ ४५ २ [अशू व्याप्तौ (स्वा०) धातो 'कृवापाजि०' इत्युणादिना उण् प्रत्यय । न आशुना=अनाशुना]

अनासः अविद्यमानाऽऽस्यान् (दस्यून्) ५ २९ १. [असु क्षेपणे (दिवा०) धातो 'अकर्त्तरि च कारके०' सूत्रेण करणे घञ । नञ्बहुव्रीहि]

अनास्थाने अविद्यमान स्थित्यधिकरण यस्मिन् [समुद्रे=अन्तरिक्षे सागरे वा) १ ११६ ५. स्थातुमशक्ये (समुद्रे) ऋ० भू० १९३, १ ११६ ५ [आङ्+ष्ठा गतिनिवृत्तौ धातोर्ल्युट् अधिकरणे । नञ्बहुव्रीहि]

अनिःशस्ताः निर्गत शस्त प्रशसन येभ्यस्तद्विरुद्धा (ऋभव =मेधाविन) ४ ३४ ११ [निर्+शसु स्तुतौ (भ्वा०) धातो क्त । 'यस्य विभाषा' सूत्रेणेण्निषेध । नञ्समास]

अनितभा अप्राप्तदीप्ति. (रसा=पृथिवी) ५.५३ ९ [अनित=नञ्+इण्गतौ धातो क्त । भा दीप्तौ (अदा०) धातो घञर्थे क प्रत्यय, स्त्रिया टाप् । तत समास]

अनिध्मः अदीप्यमान (विद्वज्जन) २ ३५ ४ बाहर अप्रकाशमान और भीतर सुप्रकाशित रहता हुआ स्त्री-पुरुष के हृदय मे प्रेम स० वि० १०४, २ ३५ ४ [निइन्धी दीप्तौ (रुधा०) धातो 'इषियुधीन्धि०' उणा० १ १४५ सूत्रेण मक् प्रत्यय । नञ्समास]

अनिनस्य यत् प्रशस्त प्राणनिमित्त तस्य (धनिनो जनस्य) १ १५० २ [अन प्राणने धातोर्भावे 'घञर्थे कविधानमि' ति क प्रत्यय) तत मत्वर्थे इनच् प्रत्यय]

अनिन्दिषुः निन्देयु १ १६१ ५ [णिदि कुत्सायाम् (भ्वा०) धातो सामान्ये लुङ्]

अनिन्द्या निन्दितुमनर्हौ (अश्विनौ=स्त्रीपुरुषौ) १ १८० ७ [नञ्+णिदि कुत्सायाम् (भ्वा०) धातोर्ण्यत् प्रत्यय]

अनिन्द्रम् अनैश्वर्यम् ७ १८ १६ **अनिन्द्राम्**= अनीश्वरी गतिम् ४ २३ ७ **अनिन्द्राः**=अविद्यमाना इन्द्रा राजानो यासु ता (मही =पृथिवी) १ १३३ १. अनैश्वर्या (दरिद्रा जना) ५ २ ३ [इदि परमैश्वर्ये (भ्वा०) धातो 'ऋज्रेन्द्राग्रवज्र०' उणा० २ २८ सूत्रेण 'इन्द्र' शब्दो रन् प्रत्ययान्तो निपातित । नञ्समास । य इन्द्र न विविदु, इन्द्रो ह्यहमस्मि, अनिन्द्रा इतर इति वा । नि० ३ १०]

अनिपद्यमानम् यो मन आदीनीन्द्रियाणि न निपद्यते प्राप्नोति तम् (परमेश्वरम्) १ १६४ ३ अपदनशीलमचलम् (गोपाम्=परमेश्वरम् ३७ १७ [नि+पद गतौ (दिवा०) धातो शानच् । नञ्समासश्च]

अनिबद्धः न कस्याऽप्यावर्पेण निबद्ध (सूर्य) ४ १३ ५ परवदेकत्र न स्थितः (जीवात्मा) ४ १४ ५ [नि+बन्ध बन्धने (क्रया०) धातो क्त । नञ्समास]

अनिवाधे निर्विघ्ने मनि (कार्ये) ५.४२ १७ व्यवहारे ५ ४३ १६ बाधारहिते (उरौ=बाहौ) ३ १ ११ [नि+ बाधृ लोडने (भ्वा०) धातोर्भावे घञ् प्रत्यय । तत्प्रतिषेध]

अनिभृष्टम् नित्य भृष्ट पतिरहितमाचरितवान् (तत्प्रतिषेध) (सभेशो राजा) १० ६ [नि+भ्रस्ज पाके (तुदा०) धातो क्त । तत्प्रतिषेध]

अनिभृष्टतविषिः न निभृष्टा प्रदग्धा तविषी सेना यस्य स (मेधावी राजा) ५ ७ ७ न नितरा भृष्टा तविषी सेना यस्य स (ब्रह्मणस्पति =अन्नस्य पालको राजा) २ २५ ४ [नञ्+नि+भ्रस्ज पाके+क्त=अनिभृष्ट । [तव इति सौत्रो धातुस्तत 'तवेरिणद्वा' उणा० १ ४८ सूत्रेण टिषच् प्रत्यये तविषी । तविषी बलनाम निघ० ३ ३ एनयो समास]

अनिमानः अपरिमाण (इन्द्र =परमैश्वर्यवान् जगदीश्वर) ६ २२ ७ अविद्यमान निमान परिमाण यस्य स (भौतिकाग्नि) १ २७ ११ [नि+माङ् माने (दिवा०) धातोर्ल्युट् । नञ्बहुव्रीहि]

अनिमिषम् अहर्निशम् ५ १९ २ निरन्तरम् १ २४ ६ **अनिमिषः**=अहर्निश प्रयतमान (इन्द्र =सेनेश) १७ ३३ **अनिमिषा**=अहर्निशजन्यया क्रियया ३ ५९ १ नैरन्तर्येण ७ ६० ७ **अनिमिषाः**=निमेषालस्यवर्जिता (जगत्कल्याणकरा जना) २ २७ ९ [अनिमिषा अनिमिषन् नि० ३ २२]

अनिमिषद्भिः नैरन्तर्येणालस्यरहितै (सज्जनै) १ १४३ ८ [नञ्+नि+मिष स्पर्द्धायाम्+शतृ]

अनिमिष्येण निरन्तर प्रयतमानेन (इन्द्रेण=सेनापतिना) १७ ३४ [निमिष प्राति० भवार्थे यत् । तत्प्रतिषेध]

अनिमेषम् निरन्तरम् ३४ १३ प्रतिक्षणम् १ ३१ १२ [अनिमेषम्=अनिमिषन्त नि० ३ १२ नञ्+नि+मिष स्पर्द्धायाम्+घञ्]

अनिराम् अविद्यमाना इराऽन्नभुक्तिर्यस्या ताम् (अमीवाम्=पीडाम्) १२ १०५ **अनिराः**=नितरा दातुमयोग्या (अमीवा =रोगपीडा) ११ ४७ [इरा अन्ननाम निघ० २ ७ ततो नञ्बहुव्रीहि । अथवा नि+रा दाने (अदा०) भावे घञ् । तत्प्रतिषेध]

अनिरेण रमणीयेन (वचसा=वचनेन) ४ ५ १४ **अनिलम्** कारणरूप वायुम् ४० १५ [अन प्राणने धातो 'सलिकल्यनि०' उणा० १ ५४ सूत्रेण इलच्]

अनिविशमानाः या कुत्रचिन्न निविशन्ते ता (आप=जलानि) ७ ४६ १ [नञ्+नि+विश प्रवेशे (तुदा०) धातो शानच् । 'नेर्विश' इत्यात्मनेपदम्]

अनिवृतः निरन्तर (अग्नि) ३ २६ ६ [नि+वृञ् वरणे (स्वा०)+क्त । तत्प्रतिषेध]

अनिवेशनानाम् अविद्यमान निवेशनमेकत्र स्थानं यासा तासाम् (काष्ठाना=जलानाम्) १ ३२.१० [नि+विश प्रवेशे (तुदा०) धातोरधिकरणे ल्युट् । नञ्बहुव्रीहि । अनिवेशनानाम्=अनिविशमानानाम् नि० २ २६]

अनिशितम् अतीक्ष्णम् (योनि=कारण वह्निम्) २ ३८.८ **अनिशितः**=न विद्यते नितरा शिता तीव्रा क्रिया यस्मिन् स सङ्ग्रामो यज्ञपात्र वा १ २६ **अनिशिता**=अतिविरतीर्णा सेना कार्या वेदिर्वा १ २६. [नि+शिञ् निशाने (स्वा०) धातो क्त । तत्प्रतिषेध]

अनिषङ्गाय अविद्यमानो नितरा सङ्ग पक्षपातो यस्य तस्मै (यज्यवे=शिल्पविद्याविदे) १ ३१ १३ [नि+पञ्ज सङ्गे (भ्वा०) धातोर्घञ् । घित्वात् कुत्वम् । तत्प्रतिषेध]

अनिष्टृतः दु खात्पृथग्भूत (अग्नि=राजा) २७ ७ अनुपर्हिसित, भा०—विघ्नविरह (अग्नि=विनयप्रकाशितो राजा) २७ ४

अनिःशस्ताः निर्गत शस्त प्रशसन येभ्यस्तद्विरुद्धा (ऋभव=मेधाविनो जना) ४ ३४.११ [निर्+शसु स्तुतौ+क्त तत्प्रतिषेध]

अनीकम् वल सैन्यम् ५ २ १ सैन्यम् २६ ५४ सर्वदु खनाशार्थ कामक्रोधादिशत्रुविनाशार्थ वलम् (ब्रह्म) प० वि० ॥ सैन्यमिव ४ ५ ६ सैन्यमिव ज्वालासमूहम् ८ २४ सैन्यमिव कार्यसिद्धिप्रापक (यानम्) ६ ५१ १ सैन्यमिव समूहम् १ १२४ ११ सेनेव किरणसमूहम् १३ ४६ सैन्यमिव तेज २ ३५ ११ चक्षुरादीन्द्रियैरप्राप्तम् (चक्षु=वलम्) १ ११५ १ सैन्यवद्रक्षयित्री (स्त्री) १ ११३ १६ विजयमान सैन्यम् ४ १२ २ वलवत्तर सैन्यमिव प्रसिद्धम् अनिति जीवयति सर्वान् प्राणिन स (सूर्य=परमेश्वर), प्र०—अनिहृपिभ्या किच्च उ० ४ १६. अनेन सूत्रेण ईकन् प्रत्यय ७ ४२ **अनीका**=शत्रुभि प्राप्तुमनर्हाणि सैन्यानि ४ २३ ७ **अनीके**=सैन्ये ४ ५८ ११ **अनीकेन**=सेनासमूहेन सह २.६.६ सैन्येन ५ ३४ **अनीकैः**=शत्रुभिर्दुष्टैर्दस्युभिर्नेतुमशक्यै सैन्यै ४ १० ३. भा०—सुशिक्षितैर्वलाढ्यै सैन्यैरिव १५ ४६ [अन प्राणने धातो 'अनिहृपिभ्या किच्च' उणा० ४ १७ सूत्रेण ईकन् प्रत्यय । सेनाया वै सेनानीरनीकम् श० ५ ३ १ १ णीञ् प्रापणे धातो 'अजियुधुनीभ्यो दीर्घश्च' उ० ३ ४७ सूत्रेण कन् प्रत्यये नीक । तत्प्रतिषेध]

अनीकवते प्रशस्तसेनायुक्ताय (अग्नये=सेनापतये) २६ ५६. प्रशसितसेनाय (अग्नये=सेनापतये) २४ १६ [अनीक प्राति० मतुप् प्रशसार्थे]

अनीताम् प्रापयेताम् १ १२१ ५ [णीञ् प्रापणे (भ्वा०) धातो सामान्ये लङ् । 'बहुल छन्दसी' नि शपो लुक्]

अनु पश्चाद् भावे ५ २६ सद्य ३ ५५ ४ पश्चादर्थे १ ६.५ आनुकूल्ये १ ५२ ११ क्रियाऽर्थे १ १० १२ वीप्सायाम् १ ६ ४ अनुगमाऽर्थे १ २५ १६ अर्वागर्थे १ ८२ ३ अनुक्रमे १ ३७ ६ आनुपूर्त्ये १ ५२ ४ अनुयोगे १ ५२ १४ अनुलक्ष्ये १ १६१ १५ [अन्विति सादृश्यापरभावम् नि० १ ३]

अनुकामम् काम काममनु १ १७ ३ इच्छा के अनुकूल स्वतन्त्र स० वि० १६७, ६ ११३ ६ **अनुकामः**=धर्माऽनुकूला कामना १८.८ [कमु कान्तौ धातोर्घञ् । ततोऽनुना सहाव्ययीभाव]

अनुक्थाः अविद्वास (जना) ५ २ ३ (वच परिभाषणे (अदा०) धातो । 'पातृतुदिवचि०' उ० २ ७ सूत्रेण थक्प्रत्यये सम्प्रसारणे चोक्थरूपम् । तत्प्रतिषेध]

अनुक्रामाम अनुक्रमेण गच्छेम ३८.१६ **अनुक्रामेम**=उल्लङ्घेम ५ ५३ ११ [अनु+क्रमु पादविक्षेपे (भ्वा०) धातोर्लोट् । 'क्रम परस्मैपदेषु' अ० ७ ३ ७६ सूत्रेण दीर्घत्वम्]

अनुक्रोशन्ति रुदन्ति ४ ३८ ५ [अनु+क्रुश आह्वाने रोदने च (भ्वा०) धातोर्लट्]

अनुक्षत्तारम् सारथ्यनुकूलम् ३० ११. धर्मात्मा के अनुकूलवर्त्ती (जन) को ३० १३ [क्षद सवृताविति सौत्रो धातु, तत 'तृन्तृचौ शसिक्षदादिभ्य०' उ० २ ६४ सूत्रेण तृचि क्षत्ता । ततोऽनुना समास]

अनुगमन्तु अनुगच्छन्तु ४ ३५ १ **अनुगमाणि**=अनुगच्छेयम् ४ १८ ३ [अनु गम्लृ गतौ (भ्वा०) धातोर्लोट् । 'बहुल छन्दसीति शपो लुक् ।]

अनुगानि अनुगच्छेयम् ४ १८ ३ [अनु+गम्लृ गतौ

धातोर्लोट्। छान्दसो वर्णलोप इति मकारलोप [बहुल छन्दसी' ति शपो लुक्]

अनुगुः पश्चाद् गच्छन्ति १६५२ अनुगच्छेयु ३७७ [अनु+गम्लृ गतौ धातोर्लिङ्। छान्दसत्वाद् रूपसिद्धि]

अनुगमन् अनुगच्छन्ति ६१२ पश्चात्प्राप्नुवन्ति १६५१ [अनु+गम्लृ गतौ धातोर् लङ्, शपो लुक् उपधालोप, अड्अभावश्च छान्दस]

अनुगमन् अनुकूल गच्छन् (इन्द्र =विद्युत्) ३३९.५. [अनु+गम्लृ गतौ+शतृ। शपो लुग् उपधालोपश्च छान्दस]

अनुगृणाति पश्चात् स्तौति ११४७२ पश्चात् स्तुयात् १२४२ [अनु+गृ शब्दे (क्रया०) धातोर्लट्]

अनुगृभाय अनुगृह्णीया २२८.६ [अनु+ग्रह उपादाने (क्रया०) धातोर् लोट्। 'छन्दसि शायजपि' अ० ३१८५ सूत्रेण श्न शायजादेश]

अनुग्रः अतेजस्वी (जन) ७३८६ [न उग्र इति नञ्समास। उग्रशब्द 'ऋज्रेन्द्र०' उणादिसूत्रे निपातित]

अनुघुष्य आनुकूल्येन घोषयित्वा २५४१. आनुकूल्येन शब्दयित्वा ११६२१८ [अनु+घुषिर् विशब्दने (चुरा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

अनुचरेम अनुगच्छेम ५५११५. [अनु+चर गतौ (भ्वा०) धातोर्लिङ्]

अनुचरम् सेवक को ३०१३. [अनु+चर गतौ+अच् कर्त्तरि]

अनुचस्कन्द प्राप्नोति १३५ [अनु+स्कन्दिर् गतिशोषणयो (भ्वा०) धातोर्लिट् सामान्ये]

अनुचेतथः ज्ञापयथ ४४५६ [अनु+चिती सज्ञाने (भ्वा०) धातोर्लट्]

अनुचेति विज्ञायते ४३७४ [अनु+चिती सज्ञाने (भ्वा०) धातोर्लट। छान्दसस्तकारलोप शप्लुक् च]

अनुजिहाताम् प्राप्नुत ७३४२४ [अनु+ओहाङ् गतौ (जु०) धातोर्लोट्]

अनुजुहोमि अनुगृह्णामि १३५ [अनु+हुदानादानयो (जु०) धातोर्लट्]

अनुतस्थुः आनुपूर्व्येण वर्त्तन्ते १५२४

अनुतिष्ठाति=अनुतिष्ठेत् ४२०२ [अनु+ष्ठा गतिनिवृत्तौ+लिट्। अपरत्र च लेट्]

अनुतृन्धि हिन्धि ५१२२ [अनु+उतृदिर् हिंसानादरयो (रुधा०) धातोर्लोट्]

अनुत्तम् अप्रेरितम् (वस्तु) ११६५९ अप्रेरित स्वाभाविक (वीर्यम्) १८०७ अप्रेरितम् (स्वरूपम्), प्र०—'नमत्तनिपत्तानुत्त०' अ० ८२६१ इति निपातनम् ३३७९ अनुकूल शत्रुभिरबाधितम् (क्षत्र=धन राज्य वा) ७३४११. **अनुत्ताः**=आनुकूल्येन धृता (गिर = विविधविद्यायुक्ता वाण्य) ३३११३. [नञ्+णुद् प्रेरणे (तुदा०) धातो. क्त। अथवा अनु+दा+क्त। 'अच उपसर्गात्त' इति दकारस्य तकार]

अनुत्तमन्युम् न नुत्त प्रेरितो मन्यु क्रोधो यस्य तम् जितेन्द्रिय राजानम्) ७३११२ [अनुत्त =नञ्+णुद प्रेरणे+क्त। [मन्यु =मन ज्ञाने (दिवा०) धातो 'यजिमनि०' उ० ३२० सूत्रेण युच् प्रत्यय। एनयो समास]

अनुदकाः जलरहिता (नद्य) ७५०४ [नञ्उदकपदयोर्बहुव्रीहि]

अनुदक्षि अनुदहसि, प्र०—अत्र 'बहुल छन्दसि, इति शपो लुक् २११० [अनु+दह भस्मीकरणे (भ्वा०) धातोर्लट् शप्लुक् च]

अनुददन्ते भा०—अनुमोदन्ते २७१९ [अनु+दद दाने (भ्वा०) धातोर्लट्]

अनुददाति अनुकूलता से देता है २१२१० [अनु+डुदाञ् दाने (जु०) धातोर्लट्]

अनुददिरे अनुकूलतया धरन्ति १८५.३ [अनु+दध धारणे (भ्वा०) धातोर्लिट्]

अनुदायि अनुदीयते ६२५८ अनुदीयते २२०८ [अनु+डुदाञ् दाने (जु०) धातो कर्मणि लुड्। अडभावश्च छान्दस]

अनुदिताम् ईश्वरोक्ताम् (वेदवाणीम्) ऋ० भू० २०३ अथर्व० ५.११२ [णुद प्रेरणे धातो क्त। छान्दस इडागम। नञ्समासे टापि च रूपम्। अप्रेरितामित्यर्थ, सा च वेदवाणी]

अनुदिशामि उपदिशामि १३४८ [अनु+दिश अतिसर्जने (तुदा०) धातोर्लट्]

अनुदिश्य प्राप्तु शोधयितुमनुलक्ष्य १२८ [अनु+दिश अतिसर्जने (तुदा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

अनुदुदुह्रे पश्चात् प्रपूरयन्ति, प्र०—अत्र वर्त्तमाने लिट् 'इरयो रे' अ० ६४७६ अनेनेरेजित्यस्य स्थाने रे

आदेश ३ १६ [अनु+दुह प्रपूरणे (अदा०) धातोर्लिट्। इरेच् स्थाने रे आदेश]

अनुदुः अनुदद्यु, प्र०—अत्र लुङ्यडभाव १ १२७ ४ [अनु+डुदाञ् दाने (जु०) धातोर्लुङ्। अडभावश्छान्दस 'गातिस्था०' सूत्रेण सिचो लुक्]

अनुदृश्य आनुकूल्येन दृष्ट्वा ३४ ४६ [अनु+दृशिर् प्रेक्षणे (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

अनुदेथाम् प्रेरयेथाम् १ ११६ ६ [णुद प्रेरणे (तुदा०) धातोर्लङ्]

अनुदेयम् अनुदातु योग्य (नववास्त्व=नवीन निवासम्) ६ २० ११ [अनु+डुदाञ् दाने (जु०) धातो 'अचो यत्' सूत्रेण यत्। 'ईदयती' ति ईकारादेश]

अनुद्यून् दिनान्यनु ५ ८६ ५ दिवसान् १ १२१ ७ वीप्सया दिवसान् १ ७१ ६. प्रतिदिनम् २ १४ १२. अनुकूलान् दिवसान् ३.२३ २ [द्युरित्यहर्नाम निघ० १ ६ द्युरित्यह्नो नामधेय द्योतत इति सत। नि० १ ६ तस्यानुना अव्ययीभावसमास]

अनुद्यावापृथिवी सूर्यपृथिव्योर्मध्ये ऋ० भू० १३८ [पृथिव्यामुत्तरपदे दिव स्थाने 'दिवसश्च पृथिव्याम्' अ० ६ ३ ३० सूत्रेण द्यावादेश। ततो अनुना समास]

अनुधूपितासः अनुकूलं सुगन्धै सम्कृता (पदार्था) २ ३० १०

अनुनेषथ अनुनयथ ५ ५४ ६ **अनुनेषि**=प्रापयसि, प्र०—अत्र नी धातोर्लटि 'बहुल छन्दसि' इति शपो लुक्, अत्राऽन्तर्गतो ण्यर्थ १ ६१ १. [अनु+णीञ् प्रापणे (भ्वा०)धातोर्लट्। 'सिव् बहुल लेटीति' सिप्। अपरत्र शपो लुक्]

अनुपक्षितम् यद् व्ययेनाऽपि नोपक्षीयते तत् (वसु=विद्यासुवर्णादिधनम्) ३ १३ ७ [उप+क्षि क्षये (भ्वा०) धातो. क्त· नञ्समासश्च]

अनुपत् अनु पश्चात् प्राप्यते या सा (शोभा) १५ ८ [अनु+पद गतौ (दिवा०) धातो स्त्रिया 'सपदादिभ्य क्विप्' इति क्विप्]

अनुपथाः अनुकूल पन्या येषान्ते (मनुष्या) ५ ५२ १० ['अनु+पथिन्' पदयो समासे 'ऋक्पूरब्धू पथाम्०' सूत्रेणाकारप्रत्यये टिलोपे च रूपम्]

अनुपदे पश्चात् प्राप्तव्याय (शोभायै) १५ ८ [अनु+पद गतौ (दिवा०) धातो क्विप्]

अनुपश्यतः अनुकूलेन योगाऽभ्यासेन साक्षाद् द्रष्टु (सन्यासिन), अनुकूल देखने वाले सन्यासी को स० वि० २१५, ४० ७. [अनु+दृशिर् प्रेक्षणे (भ्वा०) धातो. शतृ। शिति पश्यादेशश्च]

अनुपश्यति विद्याधर्मयोगाऽभ्यासाऽनन्तर समीक्षते, अनुकूलता से देखता है स० वि० २१४, ४० ६ **अनुपश्यसि**=पश्चात् सम्प्रेक्षसे १ ५० ६ [अनु+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लट्। शिति धातो पश्यादेश]

अनुपूर्वम् अनुकूला पूर्वे वेदोक्ता आप्तसिद्धान्ता यस्य तम् (ऋषि=वेदपारगाऽध्यापकम्) १ ११७ ३ आनुकूल्यमनतिक्रम्य २३ ३८ क्रमग १० ३२ अनुकूल प्रथमम् १६ ६

अनुप्रथन्ताम् अनुप्रख्यान्तु ८ ३० [अनु+प्रथ प्रख्याने (भ्वा० उ०) धातोर्लोट्]

अनुप्रमुचः अनुप्रमोचय ४ २२ ७ [अनु+प्र+मुच्लृ मोचने (तुदा०) धातोर्लोट्। छान्दसो नुमो नकारलोप]

अनुप्रयन्ति प्राप्नुवन्ति ५ ५३ १० [अनु+प्र+इण् गतौ (अदा०) धातोर्लट्। 'इणो यण्' इति यणादेश]

अनुप्राणन्तु आयुर्भुञ्जताम् ४ २५ **अनुप्राणिहि**=जीवितोऽनुजीवन धर धरति वा ४ २५ [अनु+प्र+अन प्राणने (अदा०) धातोर्लोट्]

अनुप्रेत आनुकूल्येन प्राप्नुत १८ ५८ **अनुप्रेहि**=प्राप्नुहि १७ ६६ [अनु+प्र+इण् गतौ (अदा०) धातोर्लोट्]

अनुब्रुवाणः पठित्वाऽनूपदिशन् (विद्वज्जन) ५ ४४.१३ [अनु+ब्रूञ् व्यक्तायां वाचि (अदा०) धातो शानच्]

अनुभक्षयामि पश्चात् पालयामि ८ ३७ [अनु+भक्ष अदने (चुरा०) धातोर्लट्। धातूनामनेकार्थत्वात् पालनेऽपि]

अनुभरामि पश्चाद् धारयामि, प्र०—अन्विति साङ्ख्यापरभाव प्राह निरु० १ ३, २ १७ [अनु+भृञ् भरणे (भ्वा०) धातोर्लट्]

अनुभर्त्री अनुगतसुखधारणस्वभावा (वाणी) १ ८८ ६ [अनु+भृञ् भरणे (भ्वा०) धातो कर्त्तरि तृच्। स्त्रिया ङीप्]

अनुभासि आनुकूल्येन प्रकाशयसि ३ ६ ७ [अनु+भा दीप्तौ (अदा०) धातोर्लट्]

अनुभुवन् अनुभवन्ति ७ ३१ ६ [अनु+भू+शतृ प्रत्यय। विकरणव्यत्ययेन शप स्थाने शे उवङादेशे च रूपम्]

अनुभ्राजन्तः पश्चात् प्रकाशमाना (रश्मय) १ ५० ३ [अनु+भ्राजृ दीप्तौ (भ्वा०) धातो शतृप्रत्यय । व्यत्ययेन परस्मैपदम्]

अनुमता अनुज्ञापिता (सीता=काष्ठपट्टिका) १२ ७० [अनु+मन ज्ञाने (दिवा०) धातो क्त । अनुनासिकलोपश्च]

अनुमतिः अनुकूल विज्ञानम् ३४ ६ **अनुमते**=हे अनुमन्त परमेश्वर ! ऋ० भू० २०२, १० ५६ ६ अनुकूला मतिर्यस्य तत्सम्बुद्धौ (अन्व०—सभापते विद्वन्वा) ३४.८ **अनुमत्यै**=याऽनुमन्यते तस्यै (विष्णुपत्न्यै=अन्तरिक्षरूपायै) २६ ६० अनुमति के लिए २४ ३२ [अनु+मन ज्ञाने (दिवा०) धातो 'मन्त्रे वृषेषपचमन०' अ० ३ ३ ६६ सूत्रेण भावे स्त्रिया क्तिन् उदात्तश्च अनुमती राकेति देवपत्न्याविति नैरुक्ता, पौर्णमास्याविति याज्ञिका, या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राकेति विज्ञायते । अनुमतिरनुमननात् नि० ११ ३०]

अनुमदन्ति आनुकूल्येनाऽऽनन्दयन्ति ३ ४७ ४ आनुकूल्येन हृष्यन्ति ३३ ८० अनुकूल हर्षन्ति १ ८४ १० **अनुमदन्तु**=पश्चादानन्दन्तु २७ ८ अनुहर्षन्तु ६ २० उत्साहयन्तु, भा०— प्रोत्साहयन्तु, अनुमोदयन्तु च १७ ४६ **अनुमदाम**=अनुहृष्येम, प्र०—अत्र विकरणव्यत्ययेन शप् १ १०२ ३ **अनुमदेम**=आनन्दिता भवेम, प्र०—अत्रापि विकरणव्यत्ययेन श्यन स्थाने शप् १ ६१ २१ [अनु+मदी हर्षे (दिवा०) धातोर्लट् । विकरणव्यत्ययेन शप स्थाने श्यन् न भवति]

अनुमन्यत अनुमन्यसे ४ १७ १ **अनुमन्यताम्**=पश्चाद् विज्ञापयतु स्वीकुरुता वा ४ २० पश्चात् स्वीकरोतु स्वीकारयति वा ५ ६ **अनुमन्यासै**=अनुमन्यस्व ३४ ८ [अनु+मन ज्ञाने (दिवा०) धातो सामान्ये लङ् । अड् अभावश्च अन्यत्र लोट्]

अनुममिरे निर्मिमते १ १६३ ८ [अनु+मा माने (अदा०) धातोर्लिट्]

अनुमम्नाते अन्वभ्यासाते ७ ३१ ७ [अनु+म्ना अभ्यासे (भ्वा०) धातोर्लिट्]

अनुमंसते अनुमन्यताम् ५ ४६ ४ [अनु+मन ज्ञाने (दिवा०) धातोर्लेट् । 'सिब्बहुल लेटी' ति सिप्]

अनुमाद्यस्य अनुहर्षितुं योग्यस्य (पुस=पुरुषस्य) ७ ६१ **अनुमाद्यः**=अनुहर्षितु योग्य (इन्द्र=परमैश्वर्यदाता राजा) ६ ३४ २ **अनुमाद्यासः**=अनुमोदकारकगुणेन प्रशसनीया (विद्वज्जना) १ ११५ ३ [अनु+मदी हर्षे (दिवा०) धातोर्ण्यत्]

अनुमार्ष्टु पुन पुन शुन्धतु, भा०—सम्पूरयन्तु ८ १४ [अनु+मृजूप् शुद्धौ (अदा०) धातोर्लोट् 'मृजेर्वृद्धिरिति वृद्धि]

अनुमृक्षीष्ट अनुशोधयतु १ १४७ ४ [अनु+मृजूप् शुद्धौ (अदा०) धातोर्लिङ् । व्यत्ययेनात्मनेपदम्]

अनुम्लोचन्ती अनुम्लोचयन्ती दीप्तिं १५ १७ [अनु म्लुचु गत्यर्थे (भ्वा०) धातो शतृ, स्त्रिया ङीप् च]

अनुयच्छतु अनुगृह्णातु ४ ५७ ७ **अनुयच्छन्ति**=निगृह्णन्तु ६ ७५ ६. [अनु+यम उपरमे (भ्वा०) धातोर्लोट् । 'उपुगमियमाम्' सूत्रेण छकारादेश शिति]

अनुयच्छमाना अनुकूलतया प्राप्ता (पत्नी) १ १२३ १३. **अनुयच्छमानाः**=आनुकूल्येन नियन्तार (मनुष्या) प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ १०६ ३ [अनु+यम उपरमे (भ्वा०) धातो शानच्+टाप् । व्यत्ययेनात्मनेपदम्]

अनुयतम् आनुकूल्येन यतन्तम् (मर्त्त=मनुष्यम्) ५ ४१ १३ [अनु+यती प्रयत्ने (भ्वा०) धातो क्विप्]

अनुया याऽनुयाति तया (रात्र्या=रात्रिविद्यया) १ ५ ६ [अनु+या प्रापणे (अदा०) धातोरच् स्त्रिया टाप्]

अनुयाजान् अनुकूलान् यज्ञपदार्थान् १६ १६ [अनु+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्घञ् प्रत्यय । 'प्रयाजानुयाजौ यज्ञाङ्गे' अ० ७ ३ ६२ सूत्रेण निपातनात् कुत्व न भवति । अपाना अनुयाजा काठ० १२ २ श० ११ २ ७ २७ कौ० ७ १ १० ३ अशनिरेव प्रथमोऽनुयाज श० ११ २ ७ २१ एकादश अनुयाजा । मै० १ १० ८ छन्दासि वाऽनुयाजा श० १ ८ २ ८ तद्यत्तासु सर्वाष्वष्टासु (देवतासु) अथैतत् पश्चेवानुयजति तस्मादनुयाजा नाम श० १ ८.२ ७ त्रयोऽनुयाजा । इमा ऽएवास्य ते ऽवाञ्चस्त्रय प्राणा श० ११ २ ६ ६ प्रजाऽनुयाजा तै० स० २ ६ १ ६. रेतोधेयम् अनुयाजा श० ३ ८ ४ ८ आत्मा वै प्राणानामेकादश ·····अथ यदेकादशानुयाजा, प्राणानस्मिन् दधाति । मै० ३ ६ ८ पशवो वा ऽनुयाजा । श० ३ ८ ४ ८ अथ किन्देवता प्रयाजानुयाजा ? आग्नेया इत्येके । छन्दोदेवता इत्यपरम् । ऋतदेवता इत्यपरम् । पशुदेवता इत्यपरम् । प्राणदेवता इत्यपरम् । आत्मदेवता इत्यपरम् । आग्नेया इति स्थिति । भक्तिमात्रमितरत् नि० ८ २१]

अनुयाति अनुगच्छति ६ ६ २ **अनुयासि**=प्राप्नोषि ३ १ १७ [अनु+या प्रापणे (प्रापणमिह गति) अदा० धातोर्लट्]

अनुयेमाते नियमेन गच्छत ४४८ ३ **अनुयेमुः**=नियच्छन्ति ६२१ ६. [अनु+यम उपरमे (भ्वा०) धातोर्लिट्]

अनुयोज अर्वाग् योजय १८२ ३. पश्चाद् योजय युङ्क्ते वा ३५२ [अनु+युजिर् योगे (रुधा०) धातोर्लोट्। विकरणव्यत्ययेन शप श्नम् न भवति]

अनुरुत् योऽनुरौति उपदिशति (परमात्मा) ३५५ ५. [अनु+रु शब्दे (अदा०) धातो क्विप्]

अनुरुधम् योऽनुरुणद्धि तम् ३० ६ [अनु+रुधिर् आवरणे (रुधा०) धातो क्विप्]

अनुरूपः अनुकूल (यज्ञ) १६ २४ [रूपम् रोचते नि० ३ १३ स योऽय (पुरुष) चक्षुष्येषो ऽनुरूपो नाम। अन्वड् ह्येष सर्वाणि रूपाणि। जै० उ० १ २७ ४ पूर्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्व रूपमपरेण रूपेणापनुवदति तदनुरूपस्यानुरूपत्वमनुरूप एन पुत्रो जायते य एव वेद। ता० १२ १ ५, १२ ७ ७, १३ १ ६, १३ ७ ७ प्रजा अनुरूप। गो० उ० ३ २१ प्रजा वा अनुरूप। ऐ० ३ २४ अग्निरनुरूप जै० उ० ३ ४ २]

अनुरोहते अनुवर्द्धते २५ ४ [अनु+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लट्। व्यत्ययेनात्रात्मनेपदम्]

अनुवक्षः प्राप्नुहि ५ ३३ २ **अनुववक्ष**=अनुवहति, प्र०—अत्र वर्तमाने लिटि 'वाच्छन्दसि' इति सुडागम ३७ ६ [अनु+वह प्रापणे (भ्वा०) धातोर्लिट्। सुडागम पूर्वत्र द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्' (अ० ६ १ ८) वा० सूत्रेण द्वित्व न भवति]

अनुवनथ. पश्चात् सम्भजेयाम् १४६ १४ [अनु+वन सभक्तौ (भ्वा०) धातोर्लट्]

अनुवर्त्मानः अनुकूलाऽऽचरणा, अनुकूलो वर्त्मा मार्गो येषान्ते (विश, मरुत=प्रजा, ऋत्विजो विद्वास) १७ ८६

अनुवर्द्धसे शमादिषु स्वात्मानमुन्नयसि ७ १२ **अनुवावृधे**=अनुवर्द्धयन्ति २८५ [अनु+वृधु वृद्धौ (भ्वा०) धातोर्लट् लिट् च। तुजादीनामित्यभ्यासदीर्घ]

अनुवव्ने पश्चाद् याचते १६१ १५ [अनु+वनु याचने (तना०) धातोर्लिट्। अकारलोपश्छान्दस। 'न शसददवादिगुणानामि' ति एत्वाभ्यासलोपौ न भवत]

अनुवष्टि प्रकाशते १५ ४७ कामयेत १ १२७ १ [अनु+वश कान्तौ (अदा०) धातोर्लट्। वष्टि वष्मि-कान्तिकर्मा निघ० २ ६]

अनुवस्ताम् अनुच्छादयतु ६७५ १८ पश्चादाच्छादयताम् १७ ४६ [अनु+वस आच्छादने (अदा०) धातोर्लोट्]

अनुवाति अनुगच्छति ४४० ३ पीछे चलता हैं ४७ १०. [अनु+वा गतौ (अदा०) धातोर्लट्]

अनुवावृतुः अनुवर्त्तेरन्, प्र०—अत्र 'तुजादीनाम्०' इत्यभ्यासदैर्घ्यम् ४३० २ [अनु+वृत्तु वर्त्तने (भ्वा०) धातोर्लिट्। अभ्यासस्य दीर्घत्व तुजादित्वात्]

अनुविक्रमते अनुकूलता मे क्रिया करता है स० वि० २१० अथर्व० ६ ६ २ २ **अनुविक्रमस्व**=अनुव्यवहर, प्रयतस्व १२५ [अनु+वि+क्रमु पादविक्षेपे (भ्वा०) धातोर्लट् 'वे पादविहरणे' अ० १ ३ ४१ सूत्रेणात्मनेपदम्]

अनुवित्तः अनुलब्ध (पन्था=मार्ग) ४१८ १ [अनु+विद्लृ लाभे, (तुदा०) धातो क्त। 'वित्तो भोगप्रत्यययो' इति सूत्रेण निष्ठानत्वनिषेध]

अनुविदधौ अनुकूल विदधाति १६५ ३ [अनु+वि+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट्]

अनुविदे अनुवेद्मि, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् **अनुविदेत्**=अनुकूल प्राप्नुयात् ५६ **अनुवेद**=विद्यापठनाऽनन्तर जानाति १६४ १८ [अनु+विद ज्ञाने (अदा०) धातोर्लट्। व्यत्ययेनात्मनेपदम्। अन्यत्र 'विदो लटो वे' ति तिपो णलादेश]

अनुविध्य ताडय १३ ६ [अनु+व्यध ताडने (भ्वा०) धातोर्लोट्]

अनुविराजति प्रकाशते १२ ३ [अनु+वि+राजृ दीप्तौ (भ्वा० उ०) धातोर्लट्]

अनुवीक्षस्व आनुकूल्येन विशेषत सम्प्रेक्षस्व १३ ३० [अनु+वि+ईक्ष दर्शने (भ्वा०) धातोर्लोट्]

अनुवीरयध्वम् पश्चाद् विक्रमयध्वम् १७ ३८ [अनु+वीर विक्रान्तौ (चुरा०) धातोर्लोट्]

अनुवोचत् पुनरुपदिशेत् २५ ३ [अनु+वच परिभाषणे (अदा०) धातोर्लुङ्। अडभाव। 'अस्यतिवक्ति०' सूत्रेणाङ्। 'वच उम' इत्युम्]

अनुव्यचः अनुयोगेन व्याप्ते १५२ १४ [अनु+व्यच व्याजीकरणे (तुदा०) धातोर्लोट्। विकरणव्यत्ययेन शप्। हेरभावश्छान्दस]

अनुव्यस्थिरन् आनुकूल्येन विशेषेण तिष्ठन्ति १ ८० ८

[अनु+वि+ष्ठा गतिनिवृत्तौ धातोश्छान्दसं रूपम्। 'समवप्रविभ्य स्थ' इत्यात्मनेपदम्]

अनुव्यायन् अनुकूलतयोत्पादिता १४ ३० [अनु+वि+इण् गतौ (अदा०) धातोर्लङ्]

अनुव्रतः अनुकूल आचरणयुक्त (पुत्र) स० वि० १४१. अथ० ३ ३० २ **अनुव्रताय**=अनुगतानि धर्म्याणि व्रतानि यस्य तस्मै (सज्जनाय) १ ५१.६ [व्रतमिति कर्म नाम वृणोतीति सत। इदमपीतरद् व्रतमेतस्मादेव निवृत्तिकर्म वारयतीति सत। अन्नमपि व्रतमुच्यते यदावृणोति शरीरम्। नि० २ १३ व्रतस्यानुना समास.]

अनुशसे अनुशासनाय ५ ५० २ [अनु+शासु अनुशिष्टौ भावे क्विप्। आकारलोपश्च छान्दस]

अनुशासता अनुशासितारौ (अध्यापकोपदेशकौ) १ १३६ ४ [अनु+शासु अनुशिष्टौ (अदा०) धातो रूपम्]

अनुशासति अनुशासन करोति, प्र०—अत्र 'बहुलं छन्दसि' इति शपो लुङ् न ६ ५४ १ [अनु+शासु अनुशिष्टौ (अदा०) धातोर्लट् शपो लुङ् न]

अनुशिश्रथः अनुश्रथ्नाति, भा०—आलस्य करोति ४ ३२ २२

अनुशिष्टः प्राप्तशिक्ष. (जन) ५ २ २८. [अनु+शासु अनुशिष्टौ (अदा०) धातो क्त। 'शास इदङ्हलोरिति' इत्वम्। 'शासिवसि०' इति षत्वञ्च]

अनुषत्यम् सत्यस्याऽनुकूलम् ३ २६ १ [सत्य कस्मात्? सत्सु तायते सत्प्रभव भवतीति वा। नि० ३ १३ सत्यस्यानुना सह समास]

अनुषु प्राणप्रदेषु (पूरुषु=मनुष्येषु) १ १०८ ८ [अन प्राणने (अदा०) धातोर्बाहुलकाद् उ प्रत्यय]

अनुष्टवे अनुस्तौमि ५ ७३ ४ [अनु+ष्टु स्तुतौ (अदा०) धातोर्लट्। व्यत्ययेनात्मनेपदम्]

अनुष्टु अनुतिष्ठन्ति यस्मिँस्तत् १ ६५ ३

अनुष्टुप् ययानुष्टोभते सा (छन्दोऽर्थविज्ञानम्) २३.३३ यया पठित्वा पुन सर्वा विद्या अन्येभ्य स्तुवन्ति सा (छन्द) १० १३ अनुष्टोभते स्तभ्नात्यज्ञान य (अध्यापक) ८ ४७ सुखानामनुष्टम्भनम् १४ १८ अनुस्तौति यया सा (छन्द=सुखसाधकम्) १४ १० श्रुत्वा पश्चात् स्तुभ्नाति जानाति शास्त्राणि यया मननक्रियया सा १५ ५ अनुस्तौति यया सा (छन्द) १४ १० अनुष्टुप् छन्द २१ १४ **अनुष्टुभम्**=अनुस्तुम्भकम् छन्द=(स्वातन्त्र्यम्) २८ २६ **अनुष्टुभा**=भा०—प्रीत्या, व्यवस्थया, धर्मव्यवस्थया २८ ३७ अनुष्टुप् मन्त्र द्वारा सिद्ध हुई विद्या से १३ ३४ **अनुष्टुभे**=अनुस्तम्भाय २४ १२ **अनुष्टुभेन**=अनुष्टुब्विहितार्थयुक्तेन (छन्दसा) ११ ११ [अनुष्टुप् वाङ्नाम निघ० १ ११ अनुष्टुवनुष्टोभनात् नि० ७ १२ अन्वस्तौदिति हि ब्राह्मणम् दे० ३ ८ अनुष्टुवनुष्टोभनात् दे० ३ ७ यस्याष्टौ ता अनुष्टुभम् कौ० ६ २. गायत्री वै सा यानुष्टुप् कौ० १० ५ वागेवासौ प्रथमानुष्टुप् कौ० १५ ३ अनुष्टुप् सोमस्य छन्द कौ० १५ २ आपो वा अनुष्टुप् कौ० २४.४ आनुष्टभ वै चतुर्थमह कौ० २२ ७ द्वात्रिंदशक्षरानुष्टुप् कौ० २६.१. तै० १ ७ ५५ ता० १० ३ १३ वागनुष्टुप् सर्वाणि छन्दासि तै० १ ७ ५ ५ आनुष्टुभ प्रजापति तै० ३.३ २ १ आनुष्टुभो राजन्य तै० १ ८.८ ता० १८ ८ १४ वागनुष्टुप् ता० ५ ७ १ श० १० ३ १ १ ज्यैष्ठ्य वा अनुष्टुप् ता० ८ १० १० आनुष्टुब्भि छन्दसा योनि ता० ११ ५ १७ अन्तो वा अनुष्टुप् छन्दसाम् ता० १६ १२ ८. इय (पृथिवी) वा ऽनुष्टुप् ता० ८ ७ २ श० १ ३ २ १६ प्रजापतिर्वा अनुष्टुप् ता० ४ ८.६. आनुष्टुभो वै प्रजापति. ता० ४ ५ ७ आनुष्टभी वै वृष्टि ता० १२ ८ ८ पादावनुष्टुप् ष० २.३ अनुष्टुबेव सर्वम् गो पू० ५१ ५ अनुष्टुब् वै परमा परावत ऐ० ३ १५ या कुहू साऽनुष्टुप्) ऐ० ३ ४७ यस्य ते (प्रजापते) ऽह (अनुष्टुप्) स्व छन्दोऽस्मि ऐ० ३ १३ वाग्वा अनुष्टुप् ऐ० १ २८ वास्त्वनुष्टुप् श० १ ७ ३ १८ सक्थ्यावनुष्टुभ श० ८.६ २ ६ आनुष्टुभैषा (उत्तरा) दिक् श० १३.२ २ १६ अनुष्टुबुदीची (दिक्) श० ८.३ १ १२ आनुष्टुभो वाऽश्व श० १३ २ २ १६ परम वा ऽएतच्छन्दो यदनुष्टुप् १३ ३ ३ १. एषा वै प्रत्यक्षमनुष्टुब् यद् यज्ञायज्ञीयम् (साम) ता० १५.६ १५ सत्यानृते वा अनुष्टुप् तै० १ ७.१० ४ वृषा वै त्रिष्टुब् योषानुष्टुप् ऐ० आ० १ ३ ५ विश्वेदेवा अनुष्टुभ समभरन् जै उ० १ ४ ४ ७]

अनुष्ठाः या अनुतिष्ठन्ति (नद्य) १ ५४ १० [अनु+ष्ठा गतिनिवृत्तौ धातो क प्रत्यय। स्त्रिया टाप्]

अनुष्ठु अनुतिष्ठन्ति यस्मिँस्तत् (अहोरात्र) ६ ५ ३

अनुष्ठया आनुकूल्येन ४ ४ १४

अनुष्यदे आनुकूल्येन किञ्चित् प्रस्रवणाय २ १३ २ [अनु+स्यन्दू प्रस्रवणे धातो क्विप्]

अनुष्याम अनुभवेम १ १८५ ४ (अनु+अस भुवि (अदा०) धातोर्लिङ्]

अनुष्वधम् अनुकूल स्वधा अन्न विद्यते यस्मिँस्तम् (सोम=महौषधिरसम्) ३ ४७ १ स्वधाऽन्नस्याऽनुकूलम् (अग्निम्) १७ ८८ अन्वन्नम् ३ ६ ६ स्वधाऽनुगत द्रव्यम् २ ३ ११ स्वधामन्नमनुकूलम् १ ८१.४ स्वधामन्नमनुवर्त्तमानम् (श्रव=श्रवणम्) ५ ५२ १ सर्वेषु पक्वाऽन्नेष्वनुकूलम्, प्र०—अत्र विभक्त्यर्थेऽव्ययीभाव समास ७ ३८ अनुकूल स्वधाऽन्न विद्यते यस्मिँस्तम् (सोमम्) ३ ४७ १ [अनुष्वधम् अन्वन्नम् नि० ४ ८ स्वधा अन्ननाम निघ० २ ७]

अनुसस्रुः प्राप्नुवन्ति ५ ५३ २ [अनु+सृ गतौ धातोर्लिट्]

अनुसंरमध्वम् युद्धाऽऽरम्भ कुरुत ऋ० भू० २२४ आनुकूल्येन सम्यग् युद्धारम्भ कुरुत १७ ३८ [अनु+सम्+रमु क्रीडायाम् (भ्वा०) धातोर्लोट्]

अनुसृष्टान् अनुपश्चिण (पशून्) २४ १६ [अनु+सृज विसर्गे (तुदा०) धातो क्त प्रत्यय]

अनुसेषिधत् पुन पुनरनुकूलान् प्रापयेत्, अन्व—पुन पुनरनुगत प्रापयेत्, प्र०—अत्र यङ्लुगन्ताल्लेट् 'सेधते गतौ, अ० ८ ३ ११३ इत्यभ्यासस्य षत्वप्रतिषेध 'उपसर्गादिति वक्तव्य, किं प्रयोजनम् ? उपसर्गाद् या प्राप्तिस्तस्या प्रतिषेधो यथा स्याद्, अनभ्यासाद् या प्राप्तिस्तस्या प्रतिषेधो मा भूदिति 'स्तम्भुसिवु०' अ० ८ ३ ११६ इत्यत्र महाभाष्यकारेणोक्तम् । सायणाऽऽचार्येणेदमज्ञानान्न बुद्धमिति १ २३ १५ [अनु+षिधू गत्याम् (भ्वा०) धातोर्यङ्लुक् । ततो लेटि रूपम्]

अनुस्तवन्त अनुस्तुवन्ति ४ २२ ७ प्रशसन्ति ३३ ९७ [अनु+ष्टुञ् स्तुतौ (अदा०) धातो शतृ प्रत्यय]

अनुस्थाति अनुतिष्ठति २.३१ ३ [अनु+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लट् । 'बहुल छन्दसी' ति शपो लुक्]

अनुस्पृश अनुगतो भव १३ १० [अनु+स्पृश सस्पर्शने (तुदा०) धातोर्लोट्]

अनुस्वयाम्णे योऽनुस्व शीत देश याति तस्मै (जनाय) ४ ३२ २४ [अनुस्व+या प्रापणे (अदा०) धातोर्मनिन् प्रत्यय]

अनुहर्षध्वम् अनुमोदध्वम् ऋ० भू० २२४ [अनु+हृष तुष्टौ (दिवा०) धातोर्लोट् व्यत्ययेन शप् आत्मनेपद च]

अनुहृषितम् जातहर्ष (सेनाऽध्यक्षम् १ १०३ ७ [अनु+हृष तुष्टौ (दिवा०) धातो. क्त]

अनुह्वय निमन्त्रय ५ ५३ १६ [अनु+ह्वेञ् स्पर्द्धाया शब्दे च (भ्वा०) धातोर्लोट्]

अनूकाशेन अनुप्रकाशेन (अङ्गेन) २५ २ [अनु+काशृ दीप्तौ (भ्वा०) धातोर्भावे घञ् । 'इक काशे' अ० ६ ३ १२३. सूत्रेण पूर्वपदस्य दीर्घत्वम्]

अनूक्यम् अनुकूलता से कहने के योग्य (वचन) स० वि० २०८ अथर्व० ९ ६ १ [अनु+वच् परिभाषणे (अदा०) धातो 'अचो यत्' उ० ४.११२ सूत्रेण यक् । किति सम्प्रसारणे पूर्वरूपे च 'व्यङ्वादीना चे' ति कुत्वम्]

अनूचः कपटेनाऽनुकूलान् (शत्रून्) ३ ३० ६ [अनु+अञ्चुगतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृक्०' अ० ३ २.५९ सूत्रेण क्विन् 'अनिदिताम्' इति नलोपे शसि भसज्ञायाम् 'अच.' इत्यकारलोपे 'चौ' इति दीर्घत्वे रूपम्]

अनूची अन्योऽन्यवर्त्तमाने (राज्युषसौ) १ ११३ २ [अनूच्वत् सिद्धि द्विवचने 'नपुसकाच्च' अ० ७ १ १९ सूत्रेण शीभावे रूपम् अनूची अनूच्यौ इतरेतरमभिप्रेत्य नि० २ २०]

अनूचीना यान्यनुचरन्ति तानि (जीविता=जीवनानि) ४ ५४ २. यैरन्वञ्चन्ति जानन्ति तानि (जीविता=कर्माणि) ३३ ५४ [अनूच् प्राति० 'विभाषाञ्चेर्०' अ० ५ ४ ८ सूत्रेण स्वार्थे ख । खस्येनादेश]

अनूज्जेषम् पश्चादुत्कृष्टतया जय कुर्याम्, प्र०—अत्र लिङर्थे लुङडभावो वृद्धचभावश्च, अनुगतमुत्कर्षं प्राप्नुयाम् २ १५ [अनु+उत्+जि जये (भ्वा०) धातोर्लुङ् अड्वृद्धचभावौ छान्दसौ]

अनूती अरक्षया ६ २९ ६ [अव रक्षणादिषु (भ्वा०) धातो, 'ऊतियूति०' अ० ३ ३ ९७ सूत्रेण क्तिया क्तिन् 'ज्वरत्वर०' सूत्रेण ऊठ् वकारस्योपधायाश्च स्थाने नञ्समास ऊति पदनाम निघ० ४ २]

अनूनम् हीनतारहितम् (अग्नि=विद्वासम्) १ १४६ १. पुष्कलम् (सुश्चन्द्र=ब्रह्मचर्यम्) ४ २ १९ ऊनतारहितम् (सज्जनम्) ६ १७ ४ **अनूना**=पूर्णा (दक्षिणा) ७ २७ ४ **अनूनाः**=न विद्यते ऊनमूनता यासु ता (श्रिय.=शोभा धनानि वा) ३ १ ५ **अनूनेन**=न्यूनतारहितेन रोषेण ४ ५ १. [अव रक्षणादिषु (भ्वा०) धातो 'इण्सिञ्जि०' उ० ३ २ सूत्रेण नक् प्रत्यय. । 'ज्वरत्वर०'

सूत्रेण वकारस्योपधायाश्च स्थाने उट् । नञ्समासस्य]

अनूनवर्चाः न विद्यते ऊन न्यून वर्चो यस्य स (पत्र) १२ १०७ [ऊन-वर्चस् पदयोर्नञ्बहुव्रीहि]

अनूनोत् प्रेरयेत् ५ ४५ ७ [णू स्तुतौ (अदा०) धातोर्णिचि लुटि रूपम् । रुत्वेर्लुट् न छान्दस]

अनूरुत् सोऽनुरौत्सुपदिशति (ईश्वर) ३ ५५ ५ [अनु+ऊ-रुशब्दे (गदा०) धातो क्विप् कर्त्तरि । पृषोदरस्य च दीर्घत्वम्]

अनूर्ध्वभासः न ऊर्ध्वो भासो दीप्तियस्य (शिल्पिनो जनस्य) ५ ७७ ४

अनूषत यथावत् स्तुवन्तु, प्र०—अत्र लोडर्थे लुट् 'सञ्ज्ञापूर्वको विधिरनित्य, इति गुणाऽऽदेशाऽभाव १ ७ १ स्तुवत १ ५१ ६ स्तुवन्तु प्र०—अत्र लोडर्थे लुट् ४ ३३.६ प्रशस्ता कुर्वन्ति, अन्व०—प्रशस्ते कुर्वन्ति प्र०—अत्र 'ऊ स्तवने' इत्यस्य लुट् प्रयोग 'सञ्ज्ञापूर्वको विधिरनित्य' इति गुणाऽभाव, लडर्थे लुट् च १ ६ ६ स्तुवन्ति, प्र०—अत्र 'अन्येषाम्०,' इति दैर्घ व्यत्ययेनाऽऽत्मनेपदञ्च १ १४४ २ प्रशसन्ति ६ ६० ७ प्रशसेयु ३ ५१ १ प्रशसत २० ६६ प्रशसा कीजिए ५ ५४ **अनूषि**=स्तौमि ६ ३८ ३. [ऊ स्तवने (तुदा०) धातोर्लुट् । गुणाऽभावो व्यत्ययेनात्मनेपदञ्च । अनूषत=अस्तोषत निघ० ४ १६]

अनूहिरे अनुप्रापयन्ति ऋ० भू० २६०, १६.५१ अनुवहन्ति पुन पुन प्राप्नुवन्ति च १६.५१ [अनु+ऊह प्रापणे (भ्वा०) धातोर्लिट् 'अभ्यासोगालिट् किन्' इति किरादेश यजादित्वात्सम्प्रसारणम्]

अनृक्षरः निष्कण्टक (पन्था=वेदोक्तो मार्ग.) २ २७ ६ कण्टक-गर्त्तादिदोषरहित, सेतुमार्जनादिभि सदा वर्त्तमान सरल, चोरदस्युकुशिक्षाऽविद्याऽधर्माचरणरहित. (पन्था) १ ४१.४ **अनृक्षरा**=अविद्यमाना ऋक्षरा दुःखप्रदा कण्टकादयो यस्या सा (पृथिवि=भूमि) १ २२ १५ कण्टकगर्त्तादिरहिता (पृथिवी=भूमि) ३६ १३ निष्कण्टका, भा०—क्रूरतादिदोषरहिता (भूमिर्गृहिणी वा) ३५.२१ [न ऋक्षर इति नञ्समास अनृक्षरा ऋक्षर कण्टक ऋच्छते । निघ० ६ ३० [ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु (तुदा०) धातो 'ऋच्छेररर' उ० ३ १३१ सूत्रेण अर प्रत्यय । छकारस्य क्षकारश्छान्दस]

अनृजोः कुटिलस्य (दुर्जनस्य) ४ ३ १३ [अर्ज प्रतियत्ने (चु०) धातो 'अर्जिदृशि०' उ० १ २७ सूत्रेण उ प्रत्यय, 'ऋजि' आदेशश्च नञ्समास अथवा ऋज गतिस्थानार्जनोपार्जनेषु (भ्वा०) धातोर्डु प्रत्यय नञ्समास]

अनृणः अविद्यमानमृण धन यस्य स, भा०—ऋणादानमुक्त (जा.) १६ ११ (क्व गतिप्रापणयो (भ्वा०) धातो मत । 'ऋणमाधमर्ण्ये' स० ८ ३ ६० सूत्रेण णत्वस्य नकारो निपात्यते । नञो नञ्समासेऽपि]

अनृतम् मिथ्याभाषणम् ३ ३८ ४ मिथ्याचारम् १ १३६ २. मिथ्याभाषणादिरूप धर्म १.१५२ ३ असत्यभाषणम् १ १३.३० असत्य वाक्यम् १ १०४.५ असत्यम् ६ १७ **अनृतस्य** मिथ्याभाषणस्य ७.६० ४ असत्यभाषणस्य ५ १३ ४ **अनृता** असत्यभाषणम् २ २४ ७. मिथ्याभाषणादिरूपा २ २८ ६ **अनृतात्** न विद्यते ऋतं सत्यभाषणादिरूप यस्मिन्नसत्यभाषणादिरूपे व्यवहारे तस्मात् (पृथक्कृता) १ ५ असत्य वेदादि शास्त्रों से पृथक् होने वाला ऋ०भा० १ ४७ १ ५. असत्याचरणात् असत्यभाषणात् ऋ०भू० ६६ **अनृतानि**=मिथ्याकर्माणि २.३५ ६ मिथ्याभाषणादीनि कर्माणि १.१५२ १ मिथ्याभाषणादि दुष्ट दुष्टकर्मों को स० वि० १०४, २ ३५ ६ **अनृताः** असत्यवादिन (वणिजो जना) ४ ५ ५ **अनृते**=असत्यभाषणादौ ऋ० भू० ६२ यविद्यमानमृत यस्मिन्तस्मिन् धर्मे १६ ७२ मिथ्याभाषणादि धर्मों में स० वि० १८८,१६ ७२ [ऋ गतिप्रापणयो (भ्वा०) धातो रक्त । ऋतमित्युदकनाम प्रत्यृतं भवति । नि० ७ २५ ऋतस्य यज्ञस्य नि० ६ २० ऋतमिति यज्ञनामसु सत्यनामसु, उदकनामसु च निघण्टौ पठितम् तत्प्रतिषेध अनेकधा वै पुरुष यदनृत वदति तेन पुनिस्तस्य स० ११ ११. सत्यमेव देवा अनृत मनुष्या स० ११ १४ एतद् वाचश्चित्र यदनृतम् ता० ८ ६ १३ अनृत (वा एतत्) यज्ञमनुष्य वदति तै० १.७ ५ ३ अनृतं स्त्री शूद्र ब्राह्मण गामुच्छिन्नानि न प्रेक्षेत स० १४ १ १ ३१ अनृतादात्मान गुरुप्लोषेत् तै० अ० १०.६ १ ओ३मिति सत्य, नेत्यनृतम् ऐ आ० २ ३ ६ ते देवा सत्यमभवन् अनृतममुरा मै० १.६ ३ भ्रातृव्यायानृत वदेत् काठ० २७.८ शमल वा एतद् वाचो यदनृतम् काठ० सक० १२ सुवति ह वा अनृत वदतो यज्ञोऽथो ह पूयति जै० १ २५६ आमन्त्रणे नानृत वदेत् काठ० ८ ७ अश्रद्धामनृतेऽधाच्छ्रद्धा सत्ये प्रजापति मै० ३ ११ ६ अनृतेनैव भ्रातृव्यानभिभूय वाच सत्यमवरुन्धे तै० १ ८ ३ ४.]

अनृतुपाः य ऋतून् पाति स ऋतुपा, न ऋतुपा अनृतुपा (तत्त्वस्वरूपविद् विद्वान्) ३ ५३ ८ [ऋ गतिप्रापणयो (भ्वा०) धातो 'अर्त्तेश्च तु' ३० १ ७२ सूत्रेण उ प्रत्यय किच्च ऋतूपपदे+पा रक्षणे धातोरच् नञ्समासश्च]

अनेजत् न एजते कम्पते तदचलत् स्वाऽवस्थायाश्च्युति कम्पन तद्रहितम् (ब्रह्म=परमेश्वर) ४० ४ [एजृ कम्पने (भ्वा०) धातोर्लेट्। तत्प्रतिषेध। एजति गतिकर्मा निघं० २ १४]

अनेद्यः अनिन्दनीय (मनुष्याणा गण) ५ ६१ १३ प्रशस्य (श्रव=शास्त्रम्, प्र०—अनेद्य इति प्रशस्यनाम निघ ३ ८, १ १६५ १२ प्रशस्य (सेनापति) १ ८७ ४ **अनेद्याः**=अनिन्दनीया (आप्ता पुरुषा) ६ १६ ४ [णिदि कुत्सायाम् (भ्वा०) धातोर्ण्यत् छान्दसो नकारलोप नञ्समासश्च अनेद्य प्रशस्यनाम निघ० ३ ८]

अनेनः अविद्यमानमेन पाप यस्मिँस्तत् (कर्म) ६ ६६ ७ **अनेनाः**=अविद्यमानमेन पाप यस्य स. (विद्वज्जन) १ १२६ ५ निष्पाप (इन्द्र=सज्जन) ७ २८ ४ [इण् गतौ (अदा०) धातो 'इण आगसि' उ० ४ १६८ सूत्रेण असुन् नुडागमश्च नञ्बहुव्रीहि एन एते नि० ११ २४]

अनेशन् नश्ययेयु, प्र०—अत्र 'णश' अदर्शने इत्यस्य धातोर्लुङि रूप 'नशिमन्योरलिट्येत्व वक्तव्यम्, अनेन वार्त्तिकेनाऽत्रैत्वम् १६ १० [णश् अदर्शने (दिवा०) धातोर्लुङ् पुषादित्वाद् अङ्। 'नशिमन्योरलिट्येत्व वक्तव्यम्' (वा० ६ ४ १२०) वा० सूत्रेणोकारादेशश्छान्दसि]

अनेषत् स्वीकार करो ३५ १८ [णीञ् प्रापणे (भ्वा०) धातोरात्मनेपदे लेट्]

अनेहसम् अविद्यमानानि एहासि हननानि यस्मिँस्त (पन्था=मार्गम्) ४ २६ अहन्तव्याम् (नावम्), प्र०—अत्र 'नञि हन एह च, उ० ४ २२४ इति नञ्पूर्वस्य हन्धातो प्रयोग २१ ६ अहन्तव्यम् (पन्था=मार्गम्) ६ ५१ १६ निष्पाप निरुपद्रव स्थिर दृढ सुख रूप भद्र को आर्याभि० १ २६ अहन्तारम् (देव=विद्वासमुपदेशकम्) ३ ६ १ अहिंसनीय सर्वदा रक्षणीय निर्दोषम् (मन्त्रम्=श्रुतिसमूहम्) १ ४० ६ **अनेहसः**=अहिंसका सन्त (मनुष्या) ५ ६५ ५ अहन्तव्यस्य (वसो=धनस्य) ३ ५१ ३ **अनेहसा**=अहिंसामयेन धर्मेण १ १२६ ६ अहिंसके (द्यावापृथिवी=सूर्यभूमी) ६ ७५ १० अविनाशिनौ (द्यावापृथिवी=प्रकाशभूमी) २६ ४७ **अनेहः**=अहन्तव्य (दात्र=दानम्) १ १८५ ३ अहन्तव्य सनत रक्षणीय व्यवहारम् ६ ५० ३ [नञ्युपपदे हन् हिंसागत्यो (अदा०) धातो 'नञि हन एह च' उ० ४ २२४ सूत्रेण असुन् प्रत्यय धातोश्च स्थाने एहादेश]

अनोनवुः स्तुवत १ ८० ६ [णु स्तुतौ (अदा०) धातोर्यङ्लुक् तत सामान्ये लङ्]

अन्तकम् दु खनाशकर्त्तारम् (भुज्यु=पालक जनम्) १ ११२ ६ **अन्तकाय**=योऽन्त करोति तस्मै (मृगयवे=व्याधाय) ३० ७. नाशाय ३० १८ नाशकाय कालाय ३६ १३ [एप (सवत्सर) हि मर्त्यानामहोरात्राभ्यामायुषोऽन्त गच्छत्यथ म्रियन्ते तस्मादेष एवान्तक श० १० ४ ३ २]

अन्तम् सीमानम् १ १०० १५ अवसानस्थम् (उत्तमौषधिरसम्) ६ ४३ २ व्याप्ति का परिच्छेद, इयत्ता, परिमाण आदि अन्त को आर्याभि० १ १५ प्रान्तम् १.३७ ६ नाशम् ७ २१ ६ [अम गत्यादिषु (भ्वा०) धातो 'हसिमृगि०' उ० ३ ८६ सूत्रेण तन् प्रत्यय अन्तो वै क्षय ऐ० आ० १ ५ ३]

अन्तमस्य समीपस्थस्य (योद्धृजनस्य) ३ ५५ ८ सर्वेषा दु खानामन्त मिमीते येन युद्धेन तस्य १ २७ ५ **अन्तम्**=समीपस्थ (पावक=विद्वज्जन) ३ १० ८ निकटस्थ (स्तोम=प्रशसामयो व्यवहार) ६ ४५ ३०. अतिशयेनाऽन्तिक (विद्वज्जन), प्र०—अन्तमानामित्यन्तिक नाम० निघ० २ १६, १५ ४८ य आत्माऽन्तस्थाऽनिति जीवयति सोऽतिशयित (अग्नि=सर्वाऽभिरक्षकेश्वर) प्र०—स उ प्राणस्य प्राण केनोप० ख० १ म० २ अनेनाऽऽत्माऽन्तस्थोऽन्तर्यामी गृह्यते ३ २५ **अन्तमा**=समीपस्थानि (दुर्वासि=परिचरणानि) ७.२२ ४ **अन्तमानाम्**=अन्त सामीप्यमेषामस्ति तेऽन्तिका, अतिशयेनाऽन्तिका अन्तमास्तेषा समागमेन, अन्व०—अर्थात् त्वा ज्ञात्वा त्वन्निकटे त्वदाज्ञाया च स्थितानाम् (सुमतीनाम्=आप्तविद्वज्जनानाम्), प्र०—अत्रान्तिकशब्दात्तमपि कृते पृषोदरादित्वात्तकार लोप १ ४ ३ **अन्तमाः**=समीपस्था (मनुष्या) ६ ५२ १४ **अन्तमेभि**=समीपस्थै. (विद्वज्जनै) १ १६५ ५ [अन्तप्राप्ति० अतिशयिकस् तमप्। पृषोदरादित्वात् तकार-अकारयोर्लोप अन्तमानाम् अन्तिकनाम निघ० २ १६]

अन्तरम् यदन्ते समीपे रमते तत् (ब्रह्म=परमेश्वरम्) ६ ७५ १६. [अन्तोपपदे रमु क्रीडायाम् (भ्वा०) धातोर्ड; प्रत्यय]

अन्तरम् अन्त शोधनमाभ्यन्तर वा, अन्व०—शुद्ध-मन्त करणम् (स्तोम=स्तुतिसमूहम्) १ १० ६ मध्यस्थम् (पेशसादिकम्) १६ ८२ मध्ये स्थितमपि दूरस्थमिव (ब्रह्म) १७ ३१. मध्यस्थमाभ्यन्तरम् २५ २ जीव ब्रह्म के भेद को आर्याभि० २.४४, १७ ३१ **अन्तरः**=भिन्न (जन) ६ ५ ४ मध्यस्थ (मर्त्य=मनुष्य) २० ८२ योऽनिति प्राणिति स (भिषक्=वैद्य) १६ १६ **अन्तरा**=मध्ये १४ १६ द्वयोर्मध्ये १७ ५६ व्यवधाने ३ ४०.६ आभ्यन्तरे १४ २७ सबमे भिन्न १६ ४१. भिन्न-भिन्न स० वि० २०३, अथर्व० ६ ३ १५ अन्तरौ २६ ६ **अन्तरान्**=भिन्नान् (अमित्रान्=शत्रून्) ३ १८.२. **अन्तराम्**=मध्ये पृथग्वा १ १०४ ६ [अन्तरम्=सर्वनाम अन्तरा इति स्वरादिगणे पाठादव्ययम्]

अन्तरिक्ष अन्तरिक्षम्थो यज्ञ ४ ७ **अन्तरिक्षम्**=द्वयोर्लोकयोर्मध्यमाकाशम् प० वि०, १० १६० ३ अनेकेषा लोकाना मध्येऽवकाशरूप वर्त्तमानमाकाशम् १ ५२.१३ पुष्कल अवकाश को स० वि० १६७, अथर्व० ६ २ ३.१५ अन्तरक्षय कारणाख्यम् ६ ४७ ४. अक्षयमाकाशकम् (आकाशम्) १८ १८ मध्यवर्त्याकाशम्३ १ १३ मध्यस्थ लोक और उसमे स्थित वायु आदि पदार्थ को आर्याभि० २ २५, ३२.१७ सब के अधिष्ठाता (ईश्वर) को आर्याभि० १.१७, ऋ० १ ६ १६ १० अवकाशम् २८ २०. आकाश तत्रस्थप्राणिवर्ग च, अत्र तात्स्थ्योपाधिना प्राणिनामपि ग्रहणम् ५ २७ भूमि-सूर्ययोर्मध्यस्थमाकाशम् ६ ६६ ५ उदकम्, प्र०—अन्तरिक्ष-मित्युदकनाम निघ० १ १२, ३ ३४ १० अवकाश सुखेन निवासार्थम् १ ११ सुखसाधनार्थमवकाशम् १ ७ आकाश-स्थान् पदार्थान्, अन्तरात्मस्थमक्षय ज्ञान वा भा०—वेद-विद्याम्, प्र०—अन्तरिक्ष कस्मादन्तरा क्षान्त भवत्यन्तरेमे इति वा शरीरेष्वन्तरक्षयमिति वा निरु० २ १०, १ १८. उभयोर्लोकयोर्मध्यस्थमाकाशम् ३६ १७ जलम् १४ १२ प्रशस्त शोधितमुदकम्, मधुरादिगुणयुक्त रोगनाशकमुदकम् १४ १२ अक्षयप्रेमयुक्ता (स्त्री) ११ ५८ जलमाकाश वा ३४ २२ अन्तरक्षयमाकाशम् ४ ५३ ५ अन्तर क्षयमन्त करणे क्षयरहित विज्ञानम् ८ ६ मेघमण्डलम् ८ ६० आकाश इवाऽक्षयोऽक्षोभ ११ २० अन्तरालम्बकाशम् ७ ५ आकाशमिवाऽक्षोभता ३ ५४ १६ आकाशस्थ पदार्थसमूहम् ५ १३. धर्मप्रचारस्याऽवकाशम् ६ २ सर्वनिर्गतमनन्त-माकाशम् ७ ४२ क्षयरहितमन्तर्यामिस्वाभाविक ब्रह्म-विज्ञानम् ७ ५ **अन्तरिक्षस्य**=अन्तरक्षयविज्ञानस्य १४ ५ आकाशस्य १४ १२ जलस्य १४ १४ **अन्तरिक्षा**=अन्तरि-क्षेण सहचरणि (वस्तूनि) ६ २२ ८ **अन्तरिक्षाणि**=अन्तरिक्षस्थानि सर्वाणि भुवनानि १ ३५ ७ **अन्तरिक्षात्**=उपरिष्टात् १.४८ १२ सूक्ष्मादाकाशात् १ ६१ ६ सूर्य-पृथिव्योर्मध्ये वर्त्तमानादाकाशात् ४ ६ मध्यस्थादवकाशात् ३ ३०.११ **अन्तरिक्षाय**=आकाशे गमनाय ५ २६ आका-शाय २२ २६ **अन्तरिक्षे**=अवकाशे २ २५ मध्यवर्त्तिन्या-काशे ३२.६ अन्तरिक्षय आकाशे १६ ५५ आकाशे १५ ११ सूर्यपृथिव्योर्मध्ये १८ ३७ आकाश मे म० वि० ६, ३२ ६ स्वव्याप्तिरूपे ब्रह्माण्डे १ ३५ ११ अन्तराल आकाशे ६ ३३ [अन्तरिक्ष अन्तरिक्षनाम निघ० १ ३ अन्तरिक्ष कस्मात्? अन्तरा क्षान्त भवति, अन्तरा इमे इति वा, शरीरेष्वन्त. अक्षयमिति वा नि० २ १० अन्तरिक्ष वै नभासि तस्य रुद्रा अधिपतय तै० ३.८ १८ १ अन्तरिक्ष वै मध्यमा चिति श० ८ ७ २ १८ अन्तरिक्ष वै मातरिश्वनो घर्म मै० ४ १ ३ तै० ३ २ ३ २ अन्तरिक्ष वै माध्यन्दिन सवनम् श० १२ ८.२ ६. अन्तरिक्ष वै यजुषामायतनम् गो० १.२ २४. अन्तरिक्ष वै यज्ञ (पशव) मै० ३ ६ ८ अन्तरिक्ष वै सर्वेषा देवानामायतनम् श० १४ ३ २ ६ अन्तरिक्ष समित् मै० ४.६ २३ अन्तरिक्ष सावित्री गो० १ १ ३३. अन्तरिक्ष एव मह गो० १ ५ १५ अन्तरिक्ष गौ (गार्हपत्य) काठ० ८ ६ अन्तरिक्ष त्रिष्टुप् मै० ३ १ २ काठ० १६ १. तद्यदस्मिन्निद सर्वमन्तस्तस्मा-दन्तर्यक्षम् अन्तर्यक्ष ह वै नामैतत् तदन्तरिक्षमिति। परोक्षमाचक्षते जै० उ० १ २० ४ अन्तरेव वा इदमिति तदन्तरिक्षस्यान्तरिक्षत्वम् ता० २० १४ २. अन्तरिक्षा-यतना हि प्रजा ता० ४.८ १३ छिद्रमिवेदमन्तरिक्षम् ता० ३ १० २. अन्तरिक्षेणेद सर्व पूर्णम् ता० १५ १२ ५ अय मध्यमो लोक अन्तरिक्षम् ता० ७ ३.६. अन्तरिक्षम् वै वामदेव्य (साम) ता० १५.१२ ५ सह हैवेमावग्रे लोका-वासतुर्तयोर्वियतोर्योऽन्तरेणाकाश आसीत्तदन्तरिक्षमभवद ईक्ष हैनन्नाम तत पुरान्तरा वा इदमीक्षमभूदिति तस्मादन्त-रिक्षम् श० ७.१ २ २३ मध्य वा ऽन्तरिक्षम् श० ७ ५ १ २६ अन्तरिक्ष वा ऽग्रवर सधस्थम् श० ६ २ ३ ३६ अन्तरिक्ष वा ऽग्रपा सधस्थम् श० ७ ५ २ ५७. यान्येव वभ्रूणीव हरीणि (लोमानि) तान्यन्तरिक्षस्य रूपम् श० ३ २ १ ३ अय यत् कपालमासीत्तदन्तरिक्षमभवत् श० ६ १ २ २ वृत्तमन्तरिक्षस्य (रूपम्) श० ७ ५ १ ३ अन्तरिक्षलोको वै प्रमा अन्तरिक्षलोको ह्यस्माल्लोका-त्प्रमित इव श० ८ ३ ३ ५ अन्तरिक्षमेव विश्व वायुर्नर श० ६ ३ १ ३ अन्तरिक्ष नाराशस श०

१८.२.१२ अन्तरिक्ष वा आग्नीध्रम् श० ६२३१५ अन्तरिक्ष वा उलूखलम् श० ७५.१.२६ अन्तरिक्ष ह्येष उद्धि श० ६५२४. अथ यया विद्ध शयित्वा जीवति वा म्रियते वा सा द्वितीया (इषु) तदिदमन्तरिक्षꣳ सैषा रुजा नाम (इषु) श० ५३५२६ अन्तरिक्षमेवोपाꣳशुसवन श० ४१२२७ अयमन्तरिक्ष लोको निरुक्त सन्ननिरुक्त श० ४६७१७. मनोऽन्तरिक्षलोक श० १४४३११ अन्तरिक्ष वै वरिवश्छन्द श० ८५२३ अन्तरिक्ष वै विवधश्छन्द श० ८५२.५ अन्तरिक्षलोक मह श० १२३४७. अन्तरिक्ष महाव्रतम् श० १०१२२ अन्तरिक्ष वै तृतीया चिति श० ८४११ ये वधकास्तेऽन्तरिक्षस्य रूपम् श० ५४५१४ अन्तरिक्षमु वै त्रिष्टप् श० १८२१२ भुव इत्यन्तरिक्षलोक श० ८७४५ अन्तरिक्षलोको वै मारुतो मरुता गण श० ६४२६ अन्तरिक्षदेवत्या खलु वै पशव तै० ३२१३. अवरिष्ट इव वा अयम् मध्यमो लोक ता० ७३१८ तस्मादेषा लोकानामन्तरिक्षलोकस्तनिष्ठ श० ७१२२० महद् ह्येदमन्तरिक्षम् कौ० २६११ रजता (पुरी) अन्तरिक्षम् गो० उ० २७ अन्तरिक्ष पृथिव्याम् ऐ० ३६ गो० उ० ३२ अन्तरिक्षमस्यग्नौ श्रितम् वायो प्रतिष्ठा तै० ३१११८ य एवायम्पवते (वायु) एतदेवान्तरिक्षम् जै० उ० १२०२ तद् (ब्रह्म) इदमन्तरिक्षम् जै० उ० २६६ अन्तरिक्ष वै प्र, अन्तरिक्ष हीमानि सर्वाणि भूतान्यनुपयन्ति तै० २४१ इय (पृथिवी) अन्तरिक्षम् ऐ० ३३१ अन्तरिक्ष विश्वव्यचा तै० ३२.३७ अन्तरिक्ष सावित्री गो० पू० १३३ अन्तरिक्ष पुरोधाता ऐ० ८२७ अन्तरिक्षमाग्नीध्रम् तै० २१५१ अन्तरिक्षमुपभृत् तै० ३३१२ ३३६११ वागित्यन्तरिक्षम् जै० उ० ४२२११ महद्वा अन्तरिक्षम् ऐ० ५१८१६ अन्तरिक्षलोको माध्यन्दिन सवनम् गो० उ० ४४ अन्तरिक्षम्प्रगाथ जै० उ० ३.४२ अन्तरिक्षदेवत्यो हि सोम गो० उ० २४ वसुरन्तरिक्षसत् श० ५४३२२ अन्तरिक्षलोको यजुर्वेद प० १५ अन्तरिक्ष वै यजुषामायतनम् गो० पू० २२४ अन्तरिक्ष त्रिष्टुप् जै० उ० १५५३ त्रैष्टुभन्तरिक्षम् श० ८३४११. त्रैष्टुभोऽन्तरिक्षलोक कौ० ८६ (प्रजापति) भुव इत्येव यजुर्वेदस्य रसमादत्त तदिदमन्तरिक्षमभवत् तस्य यो रस प्राणेदत् स वायुरभवद्रसस्य रस जै० उ० ११४ भुवरिति यजुर्भ्यो ऽक्षरत्। मो ऽन्तरिक्षलोकोऽभवत् प० १५ स भुव इति व्याहरत् सो ऽन्तरिक्षमसृजत। चातुर्मास्यानि सामानि तै० २२४.२ अन्तरिक्ष दक्षिणाग्नि का० ७६ अन्तरिक्ष मरीचय श० १०१२२ अन्तरेव वा इदमिति तदन्तरिक्षस्यान्तरिक्षत्वम् ता० २०१४२. अथ वाव समुद्रो ऽनारम्भणो यदिदमन्तरिक्षम् जै० ११६५ आत्माऽन्तरिक्षम् काठ० १६२ इन्द्रोऽन्तरिक्षम् काठ० २६.७ ऊधर्वा अन्तरिक्षम् ता० २४१६ सन्धिरित्यन्तरिक्षम् तै स० ५३६१]

अन्तरिक्षप्राम् स्वतेजसाऽन्तरिक्ष प्राप्य प्राति पिपर्त्ति तम् (इन्द्रम्=सेनापतिम्) १५१२ **अन्तरिक्षप्राः**= योऽन्तरिक्ष प्राति व्याप्नोति स (सूर्य) ७४५१ [अन्तरिक्षोपपदात् प्रा पूरणे (अदा०) धातो क प्रत्यय स्त्रिया टाप्]

अन्तरिक्षप्रुद्भिः अवकाशे गच्छन्तीभि (नौभि) १११६३ अन्तरिक्ष प्रति गन्तृभिर्विमानाख्ययानै ऋ० भू० १६०, १११६३ [अन्तरिक्षोपपदात् प्रुड् गतौ (भ्वा०) धातो क्विप्। तुगागम]

अन्तरिक्षसत् योऽन्तरिक्ष आकाशे वा सीदति (जीवात्मा) ४४०५ यो धर्माऽवकाशे सीदति (ब्रह्म जीवो वा) १२१४ योऽन्तरिक्षेऽवकाशे सीदति (परमेश्वर) १०२४ **अन्तरिक्षसदम्**=अवकाशे गमकम् (इन्द्र=सम्राजम्) ६२ [अन्तरिक्षोपपदात् सदॢ विशरणगत्यवसादनेषु (भ्वा०) धातो 'सत्सूद्विषद्रुहदुह' अ० ३२६१ सूत्रेण क्विप्]

अन्तरिक्ष्याः अन्तरिक्षे भवा (पर्वता=मेघा) ५.५४६ [अन्तरिक्षप्राति० 'भवे छन्दसि' अ० ४४११० सूत्रेण यत् प्रत्यय]

अन्तरेति अन्तर्गच्छति ३४१ [अन्तर् उपपदे इण् गतौ (अदा०) धातो लट्]

अन्तर्यामः योऽन्तर्मध्ये याति स वायु १८१६ अन्तर्मध्ये यामा प्रहरा यस्मिन् समये स १३५५ **अन्तर्यामे**=यमनामय याम, अन्तश्चाऽसौ यामश्च तस्मिन् ७५ [अन्तरोपपदे या प्रापणे (अदा०) धातो 'अर्त्तिस्तुसु०' उ० ११४० सूत्रेण मन् प्रत्यय]

अन्तर्वतीः अन्तर्मध्ये कारण विद्यते यासु ता (प्रजा) ३.५५५ [अन्तर् प्राति० मतुप् अन्तर् शब्दोऽधिकरणप्रधान प्रथमासमर्थता न सम्भवति अत 'अन्तर्वत्पतिवतोर्नुक्' अ० ४१३२ सूत्रेण निपातनात् मतुप् ङीप् च 'वा छन्दसि तु नुग्विधि' इति नुड् न भवति]

अन्तर्वावत् योऽन्तर्भूय वाति गच्छति (वैश्वानर = सूर्य) ६८३ [अन्तरोपपदे वा गतौ (अदा०) धातोर्यङ्लुगन्तात् क्विप्]

अन्तर्विद्वान् योऽन्तर्वेत्ति स (परमेश्वर) १७२७ [अन्तरोपपदे विद् ज्ञाने (अदा०) धातो शतृ 'विदे शतु वसु' रिति वसु 'वसो, सम्प्रसारणम्' इति सम्प्रसारणे नुमि दीर्घे च रूपम्]

अन्तस्पथा अन्तराभ्यन्तरे पन्था येषान्ते (विद्याधर्ममार्गा) ५५२.१० [अन्तर्पथिन्शब्दयोर्बहुव्रीहौ समासे 'ऋक्पूरब्धूपथाम्०' अ० ५.४७४ सूत्रेण समासान्तोऽकार । टिलोपे च रूपम्]

अन्तः पारम् १५४१ हृदि ३१ १९ मध्ये ५६२५ आभ्यन्तरे १ १६३४ समीपे १०७ शरीराऽभ्यन्तरे ७५ आकाशाऽभ्यन्तर इव ७५ आभ्यन्तरस्थान् प्राणादीन् ७४ भीतर आर्याभि० २ १२, ४०५ सर्वस्य मध्ये १९६५ बीच मे स० वि० १६८, अथर्व० ९२३२२ अन्तःकरणम् ८२५ शरीराऽन्तर्व्यवस्थितेन, भा०—शरीरस्थेन (मनसा) १७९४ सीमा ६२९५ ब्रह्माण्डशरीरयोर्मध्ये ३७ सभामध्ये १२ ११ अभ्यन्तराकाश ७५ [अम गत्यादिषु (भ्वा०) धातो 'अमेस्तुट् च' उ० ५६० सूत्रेण अरन् प्रत्ययस्तुडागमश्च स्वरादित्वाद् अव्ययम् अन्तर्=अभ्यन्तरम् नि० १० १९]

अन्तःपर्शव्येन अन्त पार्श्वाऽवयवभावेन ३९८ [अन्तर् उपपदे पर्शुप्राति० अवयवार्थे यत् प्रत्यय पर्शु = स्पृश धातो 'स्पृशे ऽवष्णुनौ पृ च' उ०५२७ सूत्रेण शुन् प्रत्यय धातोश्च पृ आदेश]

अन्तःपार्श्व्यम् अन्त पार्श्वे भवम् (शरीराङ्गविशेषम्) ३९९. [अन्तरोपपदे पार्श्व प्राति० भवार्थे 'शरीरावयवाच्च' अ ४.३.५५ सूत्रेण यत् प्रत्यय]

अन्तःश्लेषः मध्यस्पर्श १४१६ मध्ये स्पर्शो यस्य (श्रावणो भाद्रपदो वा मास.) १४१५. मध्य आलिङ्गनम् १४.६ मध्यप्रवेश (ईश्वर) १५५७ आभ्यन्तरे सम्बन्ध १३२५ [श्लिष आलिङ्गने धातोर्घञ्प्रत्यये श्लेष ततोऽन्तर् शब्देन बहुव्रीहि]

अन्तःहृदा अन्त स्थितेनाऽऽत्मना ४५८.६ [अन्त स्थितेन हृदयेनेति विग्रहे शाकपार्थिवत्वादुत्तरपदलोपे शस्प्रभृतिषु परत 'पद्दन्नोमास्०' अ० ६१६३ सूत्रेण हृदयस्य स्थाने हृदादेश]

अन्ता अन्ते समीपे ४१.११ **अन्तात्**=समीपात् ३६१४ **अन्तान्**=समीपस्थान् (पदार्थान्) १९२११. समीपान् (भूगोलान्) ४५०१ **अन्ताय**=समीपाय ससीमाय वा (जनाय) ३०१९ **अन्ताः**=अन्ताऽवयवा. १७२५ **अन्ते**=समीपे ४१९.२. **अन्तेभ्यः**=समीपेभ्योऽहोरात्रेभ्य १४९३

अन्ति अन्तिके, प्र० अत्र परस्य लोप २२७३ समीपे, प्र० अत्र 'सुपा सुलुग्०' इति ङिविभक्तेर्लुक् 'छान्दसो वर्णलोपो वा' इति कलोपश्च १७९११ निकटे १३११ अन्तिके १.९४९ अनन्ति जीवन्ति विद्यादिसुखसाधनैर्येतेऽन्त्य प्र० अत्रान धातोरौणादिकस्तिन् प्रत्यय. सुपा सुलुगिति जसो लुक् च १८९९ **अन्तौ**=समीपे ५४७३ बन्धने १७६०

अन्तिके अत्यन्त निकट आर्याभि० २२२, ४०५ [अन्तिक कस्मात्? आनीत भवति निघ० ३९]

अन्तितः समीपात् ३५९२ समीपत २२७१३ [अन प्राणने (अदा०) धातोरौणादिकस्तिन् प्रत्यय तत सार्वविभक्तिकस्तसि प्रत्यय]

अन्तिदेवम् अन्तिषु विद्वत्सु विद्वासम् ११८०७ [अन प्राणने (अदा) धातो रौणादिके तिन् प्रत्यये अन्ति अनन्ति जीवन्ति विद्यादिसुखसाधनैर्ये तेऽन्त्यो देवा = विद्वास तेषु देवम्]

अन्तिमित्रः अन्तौ समीपे मित्रा सहायकारिणो यस्य स, भा०—मित्रसेवी (गण=गणनीयो विद्वज्जन) १७८३

अन्त्याय अन्तेभवाय (जीवाय) ९२० [अन्तप्राति० भवार्थे 'दिगादिभ्यो यत्' (अ० ४३५४) सूत्रेण यत्]

अन्त्यूतिम् अन्ति निकट ऊती रक्षणाद्या क्रिया यस्य तम् (विद्वज्जनम्) ११३८१ [अन्ति ऊति व्यारयातौ, तयोर्बहुव्रीहि]

अन्धसः अन्नस्य रसान् ५५१५ अन्नानि पृथिव्यादीनि, अन्व०—अन्नाना पृथिव्यादीना प्रकाशेन, प्र०—अन्व इत्यन्ननामसु पठितम् निघ० २७, १९१ अन्नादेर्मध्ये २६२४ शुद्धाऽन्नस्येच्छाहेतुम् ऋ० भू० ३०६ अन्नस्य १.८०.६ अन्नानि १८५६. अन्नादे सकाशात् ३६५ द्रवीभूतस्याऽन्नादे ११५५१ सस्कृतस्याऽन्नादे १९७९ अन्नादियोगात् १९७३ सुसस्कृतस्याऽन्नस्य १९७४ अन्नात् २७.४० अन्नादे ३३२३ **अन्धसा**=अन्नाद्येन

४२०४ अन्नादिनोदकादिना वा १.५२५ **अन्धः**=अन्नम् २१४१ अन्नम् भा०—वीर्यवान् वृक्षौषध्यादिः पदार्थ, प्र०—अन्ध इत्यन्ननामसु पठितम् निघ० २७ 'अदेर्नुम् धौ च' उ० ४२०६ अनेनाऽदेरमुन्प्रत्ययो नुमागमो धकाराऽऽदेशश्च 'वा शर्प्रकरणे खर्परे लोपो वक्तव्य इति' विसर्जनीयलोप ३२० प्राप्तु योग्यो रस, भा०—वीर्यकरमन्नम्, प्र०—अन्ध इति पदनामसु पठितम् निघ० ४२ अनेन प्राप्तव्यो रसो गृह्यते ३२० अद्यते यत्तदन्धोऽन्नम् प्र०—अदेर्नुम् धौ च उ० ४२०६ अनेनाद्धातोरसुनि नुम् धश्च 'अन्ध' इत्यन्ननाम निघ० २७ उपलक्षणेन चाऽन्येषा पदार्थानाम् ८५४ सुसस्कृतमन्नम् ३३५१ अन्नादिकम् ५.४५.६ रसम् ६६३२ **अन्धांसि**=अन्नपानादीनि ७५६५ **अन्धांसीव**=यथाऽन्नादीनि ५५१३ [अद भक्षणे (अदा०) धातो 'अदेर्नुम् धौ च' उणादि० ४२०६ सूत्रेण असुन् प्रत्ययो नुमागमो धकारादेशश्च अन्ध अन्ननाम निघ० २७ अन्धासि अन्नानि नि० ६३४ अन्धसोऽन्नस्य नि० ११६ अन्धस =मन्त्रपूतस्य वाचा स्तुतस्य नि० १३६ अन्धस्पत इति सोमस्य पते इत्येतत् श० ६११२४ अहर्व्वा अन्ध ता० १२३३ अन्धो रात्रि ता० ६१७ अन्न वा अन्ध जै० १३३]

अन्धा अन्धकाररूपाणि (तमासि=रात्री) ४१६४ **अन्धे**=अन्धकारके (तमसि) ११००८ **अन्धेन**=आवरकेण (तमसा=रात्र्यन्धकारेण) १७४४ **अन्धाय**=दृष्टिनिरुद्धायेवाऽज्ञानिने (जनाय) ११११७ चक्षुर्हीनाय (पुरुषाय) ११११८ **अन्धाः**=ज्ञानदृष्टिहीना (दुर्जना) ११४३५ **अन्धः**=ज्ञानशून्य (जीवात्मा) ११६४.१६ नेत्रहीन (जन) १६४७ अन्धकारकृत् (सूर्य) ४१६६ **अन्धम्**=अविद्यान्धकारयुक्तम् (पुरुषम्) १११२८ अविद्यायुक्तम् (अपत्यम्) ११४७३ चक्षुर्विहीनम् (जनम्) १११६१६ चक्षुर्विज्ञानविकलम् (जनम्) ४३०१६ आवरकम् (अविद्यान्धकारम्) ४०१६ दृष्ट्यावरकम् (अन्धकारम्) ४०१२ नेत्ररहितमिव (जनमिव) ४४.१३ **अन्धस्य**=अन्धकाररूपस्याऽन्यायस्य १६७५ अधर्माचरणस्य, आवरणस्य १६७६ [अन्ध पदनाम निघ० ४२ तमोऽप्यन्ध उच्यते, नाऽस्मिन् ध्यान भवति, न दर्शनम्, अयमपीतरोऽन्ध एतस्मादेव निघ० ५२]

अन्धाऽहीन् अन्धान् सर्पान् २५.७

अन्नपते अन्नाना पालक अन्न०—यजमान पुरोहित वा सज्जन) ११८३ [वर्णोऽन्नपति श० १२७२२०]

अन्नभाग. खान-पान स० वि० १४२,अथर्व० ३३०६

अन्नम् उत्तम चावलादि अन्न उसका उत्तम सस्कार स० वि० १४५ अथर्व० १२५१० अन्नादि उत्तम पदार्थ कौ सं० वि० १०४, २३५५ अत्तु योग्यमत्तुमर्ह वा (वस्तु) २३५७ भोज्यम् (वस्तु) १६५ सुशोधित भोक्तुमर्हम् (वस्तु) २३५११ अत्तव्यम् (वस्तु) ४११ १ अत्तु योग्यम् (वस्तु) ३४८.३ तण्डुलादिकमत्तव्यमिव १६६६ **अन्नस्य**=अत्तुमर्हस्योदनादे ३६४. प्राणधारणस्य निरन्तरसुखस्य च हेतो (पदार्थस्य) प्र०—'कृवृ०' उ० ३१० इत्यनधातोर्न प्रत्यय 'धापृवस्यज्य०' उ० ३६ इत्यतधातोर्न प्रत्यय ३४३ अन्नादि पदार्थो के स० वि० १४७, ३४३ सर्वरोगनाशक ओषधि के आर्याभि० २.४६, ३४३ **अन्ना**=अत्तुमर्हाण्यन्नानि ११२७४ सुसस्कृतान्यन्नानि ११२२१३ अन्नानि १६१७ अत्तव्यानि (अन्नानि)४७१० अन्नादीनि ४७११ **अन्नात्**=यवाऽऽदे. १६७५ अत्तु योग्यात् २२५ **अन्नानाम्**=गोधूमादीनाम् १६१८ **अन्नेन**=पृथिव्यादिना जगता सह ऋ० भू० १२० पृथिव्यादि जड से म० प्र० २८२, ३१२ पृथिव्यादिना ३१२ **अन्नेषु**=अत्तव्येषु पदार्थेषु १६६२ **अन्नैः**=सुसस्कृतैरन्नादिभि २३५१२ पृथिव्यादिभि २१०४ यवादिभि ११२३ [अन प्राणने (अदा०) धातो 'कृवृ०' उ० ३१० सूत्रेण न प्रत्यय । अद भक्षणे धातोर्वा क्त 'अन्नाण्ण' इति निपातनात् सज्ञाया न जश्त्वादेश । अन्नम् उदकनाम निघ० ११२ अन्न कस्मात् ? आनतम्भूतेभ्य, अत्तेर्वा नि० ३६ अर्को वै देवानामन्नम् श० १२८१२ तै० ११८.५ अन्न वै देवा अर्क इति वदन्ति ता० १५३२३ अन्न वा अर्क ता० ५१.६, १४११६, १५३३४. गो० उ० ४२ अन्नमर्क श० ६११४ अन्न वै वाज ता० १३६, १३२१ १५११ १२१८६८ त्रेधा विहितꣳ ह्यन्नम् श० ८५३३ त्रिवृद्धचन्नम् श० ३२११२, ३७१२० त्रिवृद्धाऽअन्न कृषिर्वृष्टिर्वीजम् श० ८६२२ विरूप (नानारूपम्) अन्नम् ता० १४६८ पाङ्क्त ह्यन्नम् । ता० ५२७ सप्त वा अन्नानि तै० १.३८१ सर्व वैतदन्न यदधिमधुघृतम् श० ६२११११ एतदुपरममन्न यद्दधिमधुघृतम् श० ६२११२ शान्तिर्वा अन्नम् ऐ० ५२७७३ अन्न वै सर्वेषा भूतानामात्मा गो० उ० १३ वैश्वदेव वा अन्नम् तै० १६११० अन्न वा आयतनम् श० ६२.११४ अन्नजीवनꣳ हीदꣳ सर्वम् श० ७५१२० अन्न प्राणमन्नमपानमाहु अन्न मृत्यु नमु जीवानुमाहु अन्न ब्राह्मणो जरस वदन्ति अन्नमाहु

प्रजननं प्रजानाम् तै० २८८३ अन्नमेव ग्रह.। अन्नेन हीद ँ सर्व गृहीतम् श० ४६५४ तस्मात्प्राणोऽन्नेन गृहीतो यो ह्येवान्नमत्ति स प्राणिति श० ७५११६ तस्मात् प्राणेनान्न गृहीत यो ह्येव प्राणिति सोऽन्नमत्ति श० ७५.११७ अन्न प्राण तै० ३२३४ अन्नँ हि प्राण श० ३८४८, ४३४२५ ता० (प्रजा) अन्नादेव सम्भवन्ति तस्मादन्नमेव प्रजा श० २५१६ अन्न पशव ऐ० ५१६ रेतो वा अन्नम् गो० पू० ३.२३ अन्नमु श्री श० ८६२१ अन्न वै ब्रह्मण पुरोधा ता० १२८६, १३६२७, १४६३८. अन्नमशीतय श० ६११२१ अन्नमशीति श० ८५२१७ अन्न वै चन्द्रमा तै० ३२३४ अन्न वा अपा पाथ श० ७५२६० अन्न वै प्रजापति श० ५१३७ अन्न वाऽअय प्रजापति श० ७१२४ यत्तदन्नमेष स विष्णुर्देवता श० ७५१२१ अन्न वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि श० १४८.१३३ अन्न वै पूषा कौ० १२८ तै० १७३६, ३८३३२ अन्न वाज श० ५१११६, ८११६ अन्न वै वाज तै० १३६ २६,१३८५ श० ५.१४३, ६३२४ अन्न वै वाजा श० १४१६ अन्न वै वाजपेय तै० १३.२४ अन्न नम श० ६३११७ अन्नँ हि स्वाहाकार श० ६६३१७ अन्न वै स्वाहाकार श० ६११११३. अन्नँ श्रुष्टि श० ७२२५ अन्नँ रश्मि श० ८५३३ अन्न वै नृम्णम् कौ० २७४. भर्गो देवस्य कवयोऽन्नमाहु गो० पू० १३२ अन्न वै भद्रम् तै० १३३६. (मेध) मेधाय इत्यन्नाये येतत् श० ७५२३२. अन्न प्रेति श० ८५३३. अन्न वै पितु श० १६२. २०, ७२११५ अथर्वपितु मे गोपायेत्याह अन्नमेवैतेन स्पृणोति तै० १.१.१०४ अन्न वै पितु ऐ० ११३ अन्न वै देवा पृश्नीति वदन्ति ता० १२१०२४. नअन्न वै पृश्नि तै० २२६१ श० ८७३.२१. अन्न वै रूपम् श० ६२११२ अन्न वै सुरूपम् कौ० १६३ अथ यत् कृष्ण तदपा रूपमन्नस्य मनसो यजुष जै० उ० १२५६ अन्न वै वयश्छन्द श० ८५२.६ अन्न वै गिरश्छन्द श० ८५२५ अन्न प्रच्छच्छन्द श० ८५२४ अन्न केत. श० ६३११६ अन्न पुरीषम् श० ८१४५, ८७३२ अन्न वै पुरीषम् श० ८५४४, ८६.१.२१, १४३१२३. अन्न वै कम् ऐ० ६२१ गो० उ० ६३ तदन्न वै विश्वम्प्राणो मित्रम् जै० उ० ३३६ अन्न व्रतम् ता० २३२७२ अन्नँ हि व्रतम् श० ६६४५ अन्न वै व्रतम् ता० २२४५ श० ७५१२५ अन्न भुजिष्या श० ७५१२१ अन्न हि गौ श० ४३४२५ जै० उ० ३३१३ अन्न वै गौ तै० ३६८३ अन्न पशव श० ६२.११५, ७५२४२ आपो वै सूदोऽन्न दोह श० ८७३२१ अन्न सोम कौ० ६६ ता० ६६१. अन्नँ सोम. श० ३३४३८ अन्न वै सोम श० ३६.१८, ७२२११ एष वै सोमो राजा देवानामन्न यच्चन्द्रमा श० १६४५ २४२७, १११४४ अन्नँ सुरा तै० १३३५ अन्न विश श० २१३८ अन्न वै विश. श० ४३३१२, ५१३३, ६७३७ अन्न वै श्रीर्विराट् गो० पू० ५४ गो० उ० ११६ अन्न विराट् कौ० ६६१२२ तै० १६३४, १८२.२ ता० ४.८४. अन्न विराट् तस्माद् यस्यैवेह भूयिष्ठमन्न भवति स एव भूयिष्ठ लोके विराजति तद्विराजो विराट्त्वम् ऐ० १५ अन्न वै विराट् ऐ० १५, ४११, ५१६, ६२० श० ७५२१६ अन्न वै पङ्क्ति गो० उ० ६२ पङ्क्तिर्वा अन्नम् ऐ० ६२० पाङ्क्तमन्नम् ता० १२१६ पाङ्क्तँ (पञ्चविधम्) ह्यन्नम् (अश्य खाद्य चोष्य लेह्य पेयमिति सायण) ता० ५.२७ अन्न वा इडा ऐ० ८२६ कौ० ३७ अन्न वा आप श० २११३, ७४२३७, ८.२३६ तै० ३८२१, ३८१७५ अन्न वृष्टि गो० पू० ४४५ सप्तदशँ ह्यन्नम् श० ८४४७ अन्न वै सप्तदश ता० २७७, १७६२, १६ ११४, २०.१०१, २५६३ अन्न सावित्री गो० पू० १३३ अन्न वै० स्वयमातृण्णा (इष्टका) श० ७४२१ अन्नँ समिष्टयजु श० ११२.७३० अन्न वै यजुष्मत्य इष्टका श० ८७२८ अन्नमेव यजु श० १०३५६. अन्न याज्या कौ० १५३१६.४. गो० उ० ३२१ अन्न वै याज्या गो० उ० ३२२६८. अथो अन्न निविद इत्याहु कौ० १५३४. अन्नमुक्थानि कौ० ११८,१७७ अन्न वा उक्थ्यम् गो० पू० ४२०. अन्न वा ऽउक्थ्य श० १२२२७ अन्न वै स्तोमा श० ६३३६ अन्न पृष्ठानि ता० १६६४ अन्न न्यूङ्ख कौ० २२६८, २५१३, ३०५ अन्न वै न्यूङ्ख ऐ० ५३, ६२६, ३०३६. गो० उ० ६८१२ तस्मादाहु सामैवान्नमिति सा० सा० १.१३. साम देवानामन्नम् ता० ६४१३ एतद्वै साक्षादन्न यद्राजन (साम) पञ्चविध भवति पाङ्क्त ह्यन्नम् ता० ५२७ अन्न वै रथन्तरम् ऐ० ८१ अन्न वै मरुत तै० १७३५, १७५२, १७७३ अन्न वै गार्हपत्य श० ८६३५ एते हि साक्षादन्न यदूपा तै०

१३७६ अन्न वा ऊर्गुदुम्बर । श० ३ २.१ ३३, ३ ३ ४ २७. अन्नर्षि सम्मार्जनानि तै० ३ ३ १ ५ वरुणोऽन्नपतिः । श० १२७.२.२० अन्न ब्रह्मेति व्यजानात् तै० आ० ९ २ तै० उ० ३ २ अन्न वै पूपा तै० म० २ १ ६ १ श० ८ ५ ४ ४ अन्न वै पावकम् तै० सं० ५ ४ ४ ४ अन्न वा आदित्या तै० स० ५ ३ ४ ३ अन्न वा आप श० ६ २ १ १४

अन्नादम् योऽन्न यवादिक सर्वमत्ति तम् (अग्नि= भौतिकम् ३ ५ [अन्नोपपदे अद भक्षणे (अदा०) धातोर् अण् प्रत्यय.। अन्नादो अग्नि श० २ १ ४ २८ प्रजापतिर्वै देवानामन्नादो वीर्यवान् तै० ३ ८ ७ १ स यो हैवमेत वृत्रमन्नाद वेदान्नादो हैव भवति श० १ ६ ३.१७ ऋग्भिरन्नाद (इन्द्र) ज्योतिश्च वायुश्चान्नादमेताभ्या हीद सर्वमन्नमत्ति ऐ० आ० २ ३ १]

अन्नाद्यम् खाने के योग्य पदार्थ स० वि० १४५, अथर्व० १२ ५ १० **अन्नाद्याय**=अत्तु योग्यमाद्य, अन्नञ्च तदाद्यञ्च तस्मै यद्वाऽन्नमोदनादिक भोज्य यस्मिँस्तस्मै (सुप्रजास्त्वाय) ३ ६३ अत्तु योग्यायाऽन्नाद्याय २० ३. अत्तु योग्यमद्य, अन्नञ्च तदद्यञ्चाऽन्नाद्य तस्मै (अन्नाय) ३ ५ **अन्नाद्येन**=अन्नादिराज्यैश्वर्येण ऋ० भू० १६१, अथर्व० १३ ४ ५ ६ [अन्नोपपदे अद भक्षणे (अदा०) धातोर्ण्यत् प्रत्यय । एतद्वै परममन्नाद्य यत्सोम । कौ० १३ ७ यश उ वै सोमो राजान्नाद्यम् कौ० ९ ६ श्रीर्विराडन्नाद्यम् कौ० ११ २ ३ श्रीर्वै विराड् यशोऽन्नाद्यम् गो० पू० ५ २० गो उ० ६ १५ विराडन्नाद्यम् ऐ० ४ १६ ८ ४ एतद्वै कृत्स्नमन्नाद्य यद्विराट् कौ० १४ २ सो- (प्रजापति) ऽन्नवीदेक वावेदमन्नाद्यमसृक्षि सामैव जै० उ० ३ १ ११ अन्नाद्य वा अमृतम् काठ० सक० ४९ ६ ५० १ आपो वा अन्नाद्यम् काठ० सक० ४९ ७ ऊर्वा अन्नाद्य- मुदुम्बर ऐ० ५ २४ ८ ८ एतद्धि देवाना प्रत्यक्षमन्नाद्य यच्चन्द्रमा जै० १ २४६ वाग्वा अन्नाद्यम् ऐ० ४ १६ ८ ४ हिङ्कारेण ह्येव देवेभ्योऽन्ततोऽन्नाद्य प्रदीयते जै० १ २४६]

अन्नियते अदता नियते निश्चिते समये ४ २ ७.

अन्यकृतम् अन्येन कृतम् (एन =अपराधम्) ६ ५१ ७ **अन्यकृतेभ्यः**=यथाऽन्यैर्यानि क्रियन्ते तेभ्य (पापिभ्यो जनेभ्य) ४ ३५ [अन्योपपदे डुकृञ् करणे धातो क्त]

अन्यःजातम् अन्येनाऽन्यस्माद्वा समुत्पन्नम् (रेक्ण = धनम्) ७ ४.७ अन्यस्मादुत्पन्नम् (एन =पापम्) ७ ५२ २ [अन्योपपदे जनी प्रादुर्भावे धातो क्त. नकारस्याकारादेश]

अन्यत् द्वितीय भिन्नम् १ ५२ १४. द्वितीयम् १ ३० १९. भिन्नम् १ ११५ ५ अन्य ५ ३१.२ अपने से भिन्न आर्याभि० १ १५ कार्यकारणाजीवेभ्यो भिन्नं ब्रह्म १७ ३१ अस्मद्भिन्नम् (ब्रह्म) ३३ ३८ वेद और युक्ति से कभी सिद्ध न हो सकने वाली ब्रह्म से एकता आर्याभि० २ ४४, १७ ३१ **अन्यदन्यत्**=पृथक्-पृथक् ३ ३८ ७ [अन्यो नानेय नि० १ ६ अन्ये सपत्ना नि० १० २६]

अन्यतः भिन्नात् (देशात्) १ ४ ५ [अन्यप्राति० सार्वविभक्तिकस्तसि]

अन्यतः एन्यः या अन्यतो यन्ति प्राप्नुवन्ति ता (मैत्र्य =पशवो गाव) २४ ८ [अन्यतस् उपपदे इण् गतौ (अदा०) धातो केन्य. कृत् प्रत्यय । स च कृत्यार्थेऽपि सन् कर्त्तरि छान्दसत्वाद् भवति]

अन्यतः शितिबाहुः अन्यत शितयो बाह्वोर्यस्य स (पशु) २४ २ [अन्यतस् उपपदे शिति-बाहो बहुव्रीहि । शिति कृष्ण शुक्लवर्णो वा]

अन्यतःशितिरन्ध्रः अन्यतोऽन्यस्मिन् रन्ध्राणीव शितयो यस्य स (पशु), समन्ततो रन्ध्राणीव शितय श्वेत- चिह्नानि यस्य स (पशु) २४ २ [अन्यतस् उपपदे शिति- रन्ध्रयो समास । रन्ध्रशब्दस्य परनिपात]

अन्यतोऽरण्याय अन्यतोऽरण्यानि यस्मिन् देशे तद्विनाशाय ३०.१९ [अन्यतस् व्याख्यात, अरण्यम्= ऋ गतौ धातो 'अर्त्तेर्निच्च' उ० ३ १०२. सूत्रेण अन्य. प्रत्यय । तयोर्बहुव्रीहि]

अन्यत्र अन्य स्थान मे ७ ५९ ५ [अन्यप्राति० 'सप्तम्यास्त्रल्' अ० ५ ३ १० सूत्रेण त्रल् । 'तद्धितश्चासर्व०' इत्यव्ययत्वम्]

अन्यथा उल्टा पापरूप स० वि० १४५, ४ २ [अन्यप्राति० 'प्रकारवचने थाल्' इति थाल् प्रत्यय । तद्धितश्चासर्व०' इत्यव्ययसज्ञा]

अन्यवापः कोकिलाख्य पक्षिविशेष २४ ३७. [अन्यै काकादिभिर् उप्यन्ते सन्तानानि क्रियन्ते यस्येति बहुव्रीहि]

अन्यव्रतस्य धर्मविरुद्धाऽऽचरणस्य ५ २० २. अन्येषा पालने व्रत शील यस्य तस्य (विद्वज्जनस्येश्वरस्य वा) ३८ २० ईश्वर और उसकी आज्ञा से भिन्न को लेशमात्र भी ईश्वर न मानने रूप व्रत का आर्याभि० २ ४१, ३८ २०

[अन्यत् व्रत कर्म यस्य, अन्येषां पालने व्रत यस्येति वा बहुव्रीहि । व्रतमिति कर्मनाम । नि० २ १३.]

अन्यान् शत्रून् ३ ४६ २.

अन्याऽन्या भिन्ना भिन्ना पृथक्-पृथक् सयुक्ते च (अहोरात्रे) प्र०—अत्र वीप्साया द्विर्वचनम् १ ६२ ८ भिन्ना भिन्ना एकैका कालभेदेन ३३ ५ परस्पर वर्त्तमाना (अहोरात्रे) १ ६५ १

अन्याद्दृङ् अन्येन समान (पुरुष) १७ ८१ [अन्यो-पपदे दृशिर् प्रेक्षणे धातो 'समानान्ययोश्चेति वक्तव्यम्' (अ० ३ २ ६०) वार्त्तिकेन क्विन्। 'क्विन्प्रत्ययस्य कु' रिति कुत्वम्। 'आ सर्वनाम्न' इत्याकारादेश']

अन्योदर्य्यः अन्योदराज्जात (अन्यगोत्रजोऽनौरसौ वा पुत्र) ७ ४ ८ [उदरप्राति० जातार्थे यत् प्रत्ययश्छान्दस । ततोऽन्येन सह समास]

अन्योऽन्यम् एक दूसरे से स० वि० १४१, अथर्व० ३ ३० १ ['कर्मव्यतिहारे सर्वनाम्नो द्वे भवत, समासवच्च बहुलम्' अ० ८ १ १२ वा० द्वित्वम्। बहुलवचनात् समासवन्न । उत्तरपदस्य चाम्]

अन्वचष्ट अनुख्यापयेत् ४ १८ ३ [अनु+चक्षिङ् व्यक्तायां वाचि (अदा०) धातो सामान्ये लङ्। 'स्को सयोगाद्यो' रिति सकारलोप]

अन्वचारिषम् धरेयम् २० २२ पश्चादनुतिष्ठामि, अन्व०—कर्माऽनुचरामि, प्र०—अत्र लडर्थे लुङ् १.२३ २३. [अनु+चर गतौ (भ्वा०) धातो. सामान्ये लुङ्]

अन्वजायथाः अनुजायेथा १ १४१ ६ [अनु+जनी प्रादुर्भावे धातो सामान्ये लङ्। 'ज्ञाजनोर्जा' इति धातो-र्जादेश]

अन्वतक्षत् पश्चादतिसूक्ष्मा धिय कुर्वन्ति १.८६ ३ [अनु+तक्षू तनूकरणे (भ्वा०) धातो सामान्ये लङ्। 'तनूकरणे तक्ष' इति विकल्पेन श्नुविधानात् पक्षे शप्]

अन्वदंदुः अनुददति ५ २६ ५ [अनु+डुदाञ् दाने (जु०) धातो सामान्ये लङ्। 'आत' इति नित्य झेर्जुस्]

अन्वनयन्त प्राप्नुयु ३ ७ ६ [अनु+णीञ् प्रापणे (भ्वा०) धातोर्लङ् सामान्ये]

अन्वनोनवुः अनुवूर्लतया स्तुवत १ ८० ६ [अनु+णु स्तुतौ (अदा०) धातोर्यङ्लुगन्तात् लङ्]

अन्वपश्यत अनुपश्यति १ १६४.६. [अनु+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लट्। शिति पश्यादेश.]

अन्वमदन् अनुमदन्ति अनुहर्षन्ति ७ १८ १२ आनुकूल्येन हर्षन्ति १ ५२ ६ अनुहर्षयन्ति १ १०३ ७ अनुहृष्येयुरनुहर्षयेयुर्वा १ १०२ १. आनुकूल्येनाऽऽनन्देयु भा०—सत्यानुकूला सन्त स्वयमानन्दिता भूत्वाऽन्याना-नन्दयन्ति ३३ २६ [अनु+मदी हर्षे (दिवा०) धातो सामान्ये लङ्। विकरणव्यत्ययेन शप्]

अन्वमन्यन्त पश्चाद् मन्यन्ताम् १ ११६ १७ (अनु+मन ज्ञाने (दिवा०) धातो सामान्ये लङ्]

अन्वमंसाताम् अनुकूल मन्येताम् ३८ १३

अन्वमंस्त=पश्चात् मन्यते ५ ४०. [अनु+मन ज्ञाने (दिवा०) धातो सामान्ये लुङ्]

अन्वरुहत् अनुवर्धयति १ १४१ ५ [अनु+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लङ्। विकरणव्यत्य-येन श प्रत्यय]

अन्वर्चन् आनुकूल्येन सत्कुर्वन् (इन्द्र=सभाध्यक्ष) १ ८० ४ पश्चात् पूजयन् (सभापति) १ ८० १ [अनु+अर्च पूजायाम् (भ्वा०) धातो. शतृप्रत्यय]

अन्वविन्दत् अनुलभते २ १२.११. **अन्वविन्दन्**=अनुलभेरन् ५ ४० ६ अनुलभन्ते १७ ६२ प्राप्नुयु, भा०—सेवन्ताम् १५ २८ [अनु+विद्लृ लाभे (तुदा०) धातोर्लङ्। 'शे मुचादीनामि' ति नुमागम.]

अन्वविष्टन् व्याप्नुत ७ १८ २५ [अनु+विष्लृ व्याप्तौ (जु०) धातो रूपम्। 'बहुल छन्दसी' ति श्लुर्न। छान्दसत्वात्साधु]

अन्ववृत्सत अनुवर्त्तन्ते ५ ५५ १. [अनु+वृत्तु वर्त्तने (भ्वा०) धातोर् लुङ्। छन्दसि सर्वविधीना विकल्पेन इड् न भवति]

अन्ववेदम् पश्चाद्विजानामि ४ २७ १ [अनु+विद ज्ञाने (अदा०) धातो सामान्ये लङ्]

अन्वश्नोति पश्चाद् व्याप्नोति २ १६ ३ [अनु+अशू व्याप्तौ (स्वा०) धातोर्लट्। व्यत्ययेन परस्मैपदम्]

अन्वसत् अनुयोगेन भवेत् १ ५७ २ [अनु+अस भुवि (अदा०) धातोर्लङ्। 'बहुलं छन्दसी' ति शपो लुङ् न। आडभावश्च]

अन्वागन्ता धर्ममन्वागच्छति य स (विद्वज्जन) १८ ५६ [अनु+आङ्+गम्लृ गतौ (भ्वा०) धातो कर्त्तरि तृच्]

अन्वागात् अन्वागच्छेत् १ १२६ ३ [अनु+आङ्+इण् गतौ (अदा०) धातोर्लुङ् सामान्ये। 'इणो गा लुङी' ति गादेश। 'गातिस्था०' इति सिचो लुक् च]

अन्वाततान आच्छाद्य विस्तारयति ८ ६२. [अनु+आङ्+तनु विस्तारे (तना०) धातोर्लिट् सामान्ये]

अन्वातांसीत् पश्चात् समन्तात्तनुताम्, प्र०—अत्र वचनव्यत्ययेन द्विर्वचनस्थाने एकवचनम् १५ ५३ [अनु+तनु विस्तारे (तना०) धातो सामान्ये लुङ्। छन्दसि सर्वविधीना विकल्पेन इडागमो न भवति। हलन्तलक्षणा वृद्धि]

अन्वानशे आनुकूल्येन व्याप्नोति १ ८४ ६ [अनु+अशू व्याप्तौ (स्वा०) धातो सामान्ये लिट्। 'अत आदे'रित्यभ्यासस्य दीर्घत्वे 'अश्नोतेश्चे' ति नुडागम]

अन्वापनीफणत् पश्चादत्यन्त गच्छति ४ ४० ४ [अनु+आङ्+फण+गतौ (भ्वा०) धातोर्णिचि लुडि च रूपम्। छान्दसोऽभ्यासस्य नीगागम]

अन्वापनीफणत् पश्चादतिशयेन गच्छन् (दधिक्रा = अश्व) ६ १४ [अनु+आङ्+फण गतौ (भ्वा०) धातो. यङन्तात् शतृ। नीगभ्यासस्य]

अन्वाभज अनुकूल समन्तात् स्थापय ४ २८ [अनु+आङ्+भज सेवायाम् (भ्वा०) धातो लोट्]

अन्वायन् प्राप्नुवन्ति ४ २६ २ **अन्वायम्**=प्राप्नुयाम् ५.३० २ **अन्वायातु**=आनुकूल्येन प्राप्नोतु २० ४६ [अनु+इण् गतौ (अदा०) धातोर्लङि लोटि च रूपाणि]

अन्वारभामहे हम आरम्भ करें, भा०—वर्द्धयामहे ६ २६ यानानि रचयित्वा तत्र स्थापयेम ३५ १३ [अनु+आङ्+रभ राभस्ये (भ्वा०) धातोर्लट्। धातूनामनेकार्थत्वादत्र वर्धनेऽपि]

अन्वालेभिरे अनुलभन्ते ३४ ४६ [अनु+आङ्+डुलभस् प्राप्तौ (भ्वा०) धातोर्लिट् 'अत एकहल्मध्ये०' इत्येत्वाभ्यासलोपौ]

अन्वावर्त्ते अनुगतेन समन्ताद्वर्त्तमानो भवेयम्. २ २७ पश्चादाभिमुख्येन वर्त्तमानो भवेयम् २ २६ [अनु+आङ्+वृतु वर्त्तने (भ्वा०) धातोर्लिङर्थे लट्]

अन्वित्या अन्वेषणेन १५ ६. [अनु+इण् गतौ (अदा०) धातोर्भावे स्त्रियां क्तिन्। धातूनामनेकार्थत्वादत्रान्वेषणार्थेऽपि। अन्नमन्विति श० ८ ५ ३ ३.]

अन्वियाय अनुप्राप्नोतु ४ ४ ११ [अनु+इण् गतौ (अदा०) धातोर्लिट्। 'अभ्यासस्यासवर्णे' इत्यभ्यासस्य इयङ्]

अन्विहि अनुगच्छ १२ ६२ [अनु+इण् गतौ (अदा०) धातोर्लोट्]

अन्वीयतुः अनुगच्छत ३३.६७ **अन्वीयुः**=प्राप्नुयु १.१६३ ८. [अनु+इण् गतौ)अदा०) धातोर्लिटि द्विवचनबहुवचनयो रूपाणि]

अन्वूह्यते देशान्तर गम्येते १ १२० ११ [अनु+ऊह वितर्के (भ्वा०) धातो कर्मणि लट्। छान्दसत्वाद् 'आतो डित' इत्येत्व न]

अन्वेति आनुकूल्येन प्राप्नोति १ ११३ १० पुन प्राप्नोति १ ११३ ८ **अन्वेमि**=अनुगच्छामि ७ २. [अनु+इण् गतौ (अदा०) धातोर्लट्]

अन्वेतवे अन्वेतु विज्ञातुं प्राप्तु गन्तु वा ७.३३.८. [अनु+इण् गतौ (अदा०) धातोस्तुमर्थे तवेन् प्रत्यय]

अन्वेतवै अनुक्रमेण गन्तुम् ८.२३ अन्वेतुमनुगन्तुम् ७ ४४ ५; [अनु+इण् गतौ (अदा०) धातोस्तुमर्थे 'तुमर्थे सेसेनसेअसेन्०' अ० ३ ४ ६ सूत्रेण तवै प्रत्यय.]

अप क्रियायोगे १ ११.५ धात्वर्थे १.१०.७ दूरीकरणे ३४ २५. निवारणे ६ ३.१३६. दूरीकरणे वर्जने निषेधार्थे वा २ १५ दूरार्थे ३ २१ पृथग्भावे १ ५०.२. विरुद्धार्थे १ ८५ ३ अपरावे १ ४८ ८ [समित्येकीभावम् अपेत्येतस्य प्रातिलोम्यम् (पृथग्भावम्) नि० १ ३]

अपकामम् अपगतश्चाऽसौ कामश्च तम् (शत्रुम्=अरिम्) २६ ३६ काममविनाशनम् ६ ७५ २ [अप+कमु कान्तौ (भ्वा०) धातोर्घञ्]

अपगमत दूर गच्छेति ६ ४५ २४ [अप+गम्लृ गतौ (भ्वा०) धातोर्लुङ्। 'पुषादिद्युताद्यृलृदित ०' इति च्ले स्थाने अङ् प्रत्यय। मध्यमबहुवचने]

अपगल्भम् प्रगल्भतारहितम् (जनम्) ३० १७ अपगतं दूरीकृत गल्भ धाष्टर्यं येन तस्मै (पुरुषाय) १६.३२. [अप+गल्भ धाष्टर्ये (भ्वा०) धातोर्भावे घञ्]

अपगात् दूर गच्छन्तु, भा०—दूरे भवत, प्र०—अत्र लोडर्थे लङ्, पुरुषव्यत्ययश्च ३ २१ [अप+इण् गतौ (अदा०) धातोर्लुङ्। 'इणो गा लुङी' ति गादेश। 'गातिस्था०' इति सिचो लुक्]

अपगूहळम् गुप्तम् (पद=पादचिह्नम्) ४ ५.३. [अप+गुहू सवरणे (भ्वा०) धातो क्त प्रत्यय.। छान्दसं रूपम्]

अपगूढम् अपगतश्चाऽसौ गूढश्च तम् (राजान=प्राण जीव वा) १ २३.१४ अपगत सवरणमाच्छादनं यस्मात्तत् (कर्म) १.११६ ११ **अपगूढा**=आच्छादितानि (द्रव्याणि) १.१२३.६ **अपगोहम्**=आच्छादकम् (अन्धकारम्) २ १५ ७ [अप+गुहू सवरणे (भ्वा०) धातोर्भूते क्त।

'हो ढ' इति ढत्वे धत्वे ष्टुत्वे च 'ढो ढे लोप' इति पूर्व-ढकारलोपे 'ढ्रलोपे पूर्वस्य दीर्घ०' इति उकारस्य दीर्घत्वम्]

अपगूर्यम् उद्यम्य ५ ३२ ६ [अप+गुरी उद्यमने (तुदा०) धातो क्त्वा। समासे क्त्वो त्यप्]

अपचत पचति ५ २९ ७ **अपचन्त**=पचन्ति १ १६४.४३. [डुपचष् पाके (भ्वा०) धातो सामान्ये लङ्। पच धातुरुभयपदी]

अपचितिम् सत्कृतिम् २१ ५८. सत्कारम् ४ २८ ४. **अपचितिः**=प्रजाजनकम् (भसत्=भगेन्द्रियम्) २० ८ [चायृ पूजानिशामनयो (भ्वा०) धातो स्त्रिया क्तिन्। 'क्तिनि नित्यमिति वक्तव्यम्' (वा० ७ २.३०) अनेन धातोरनिट्त्व चिभावश्च निपात्यते। अपपूर्वाद्वा चिञ् चयने (स्वा०) धातो क्तिन्]

अपचेतयातै दूर चेतयेत्, प्र०—'चिती सञ्ज्ञाने' इति ण्यन्तस्य लेट प्रथमपुरुषस्यैकवचने प्रयोगोऽयम् २ १७ [अप+चिती सज्ञाने (भ्वा०) धातोर् णिजन्ताल्लेट्। 'लेटोऽडाटौ' इत्याट् 'एत ऐ' इत्यैकारादेशश्च]

अपच्यवम् त्यागम् १ २८ ३. [अप+च्युङ् (भ्वा०) धातो 'ऋदोरप्' इत्यप् प्रत्यय]

अपजर्गुराणः आच्छादनात् पृथक् कुर्वन् (राजा) ५ २९ ४ [अप+गुरी उद्यमने (तुदा०) धातोर्यङ्लुगन्तात् शानच्]

अपजहि दूर नाशय, अ०—दूरीकुरु १२ ४७ हिंसय १ १७ [अप+हन हिंसागत्यो (अदा०) धातोर्लोट्। 'हन्तेर्ज' इति जादेश]

अपतिघ्नि ! विवाहितपतिसेविके (स्त्रि) ऋ० भू० २१४ **अपतिघ्नी**=पति को दुःख न देने वाली (स्त्री) स० प्र० १५२, अथर्व० १४ २ १८ [पत्युपपदे हन् हिंसागत्यो (अदा०) धातो। 'कृत्यल्युटो बहुलम्' इति बहुलवचनाट् टक् प्रत्यय.। स्त्रिया टिड्ढाण्०' इति ङीप्। नञ् समासश्च]

अपत्यम् सन्तानम् १ १७४ ६ **अपत्याय**=सन्तानाय १३ ३५ **अपत्ये**=सन्ताने=१ ६८ ४ [अपत्य कस्मात्? अपतत भवति नानेन पततीति वा नि० ३ १ अपत्यम्=अपत्यनाम निघ० २.२]

अपत्यसाचम् यदपत्ये सचति व्याप्नोति तत् (शरीरात्मबलम्) ६ ७२ ५ पुत्रपौत्रादिसमेतम् (पुरुषम्) १ ११७ २३. उत्तमाऽपत्यसंयुक्तम् (रयिं=धनम्) २ ३० ११ [अपत्योपपदे पच समवाये (भ्वा०) धातोरण् प्रत्यय]

अपदी अविद्यमानपादे (द्यावापृथिवी) १ १८५ २ [नञ्-पादपदयोर्बहुव्रीहौ 'कुम्भपदीषु च' सूत्रेण समासान्त-लोप। 'पादोऽन्यतरस्याम्' इति ङीप्। 'पाद पत्' इति पदादेश]

अपदे न विद्यन्ते पदानि चिह्नानि यस्मिँस्तस्मिन्नन्तरिक्षे १ २४ ८. चौरादिनिष्पादितेऽप्रसिद्धे व्यवहारे ८ २३ [पद गतौ (दिवा०) धातोरधिकरणे घ प्रत्यय। ततो नञ्-बहुव्रीहि]

अपद्महि प्राप्नुयाम् ४ २९ **अपद्यन्त**=प्राप्त होते हैं स० वि० १७०, १४ २ ३२ [पद गतौ (दिवा०) धातोर्लङ्। 'बहुल छन्दसी' ति श्यनो लुक्। द्वितीयप्रयोगे लुक् न]

अपद्रन् अपद्रवन्ति ६ २० ४ [अप+द्रु गतौ (भ्वा०) धातोर्लङ्। छान्दसो वकारलोप]

अपद्वेषः दूरीकर्त्तुं द्विषन्ति ये शत्रवस्ते १ ४८ ८ द्वेषरहित (ईश्वर) आर्याभि० २ ४१, ३८ २० [अप+द्विष अप्रीतौ (अदा०) धातो कर्त्तरि भावेऽपि विहितो घञ् बहुलवचनात् कर्त्तरि]

अपधमन्तः दूरीकुर्वन्त (मरुत=विद्वज्जना) २.३४ १ [अप+धम+शतृप्रत्यय। धमतिर्गतिकर्मा निघ० २ १४]

अपधा योऽपदधाति स (इन्द्र=सूर्यलोक) प्र०—अत्र 'सुपा सुलुग्० इति विभक्तेर्डादेश २ १२ ३ [अप+डुधाञ् धारणपोषणयो (जु०) धातो 'आतश्चोपसर्गे' अ० ३ १ १३६ सूत्रेण क प्रत्यय। विभक्तेश्च स्थाने डादेश]

अपनुदताम् दूर प्रेरयत, प्र०—अत्र लडर्थे लोट् न प्रेरयत प्र०—अत्रापि लडर्थे लोट् २ १५ **अपनुदन्ताम्**=अपप्रेरयन्तु २८ १३ **अपनुदस्व**=दूरीकुरु ६ २१ ७ [अप+णुद प्रेरणे (तुदा०) धातोर्लोट्]

अपन्नगृहस्य अप्राप्तगृहस्य कुमारब्रह्मचारिण ६ २४. [पदगतौ धातो क्तप्रत्यये पन्न। न पन्नोऽपन्न=अप्राप्त। ग्रह उपादाने धातो 'गेहे क' इति कप्रत्यये गृहम्। ततस्तयो. समास]

अपपादि अपपाद्येत ६ २०.५ [अप+पद गतौ (दिवा०) धातो कर्मणि लुङ्। अडभावश्च]

अपपित्वम् अपचयम् ३ ५३ २४ [अपोपपदे पि गतौ (तुदा०) धातो कृत्यार्थे त्वन् प्रत्यय। अथवा अप+पद गतौ धातोर्वाहु० इत्वन् प्रत्ययो डिच्च]

अपप्तत् उदय होता है १ १९१ ३. **अपप्तन्**=उड्डी-

यन्ते ६ ६४ ६ पतन्ति गच्छन्ति ६ ६४ २ पतन्ति ७ ५९ ७ गच्छन्ति ६ ६४ २ [पत्लृ गतौ (भ्वा०) धातोर्लुङ्। 'पुषादि-द्युताद्यृलृदित परस्मैपदेषु' इति च्लेर् अङ्। 'पत पुम्' इत्यडि पुमागम]

अपप्रोथ जेतु पर्याप्तो भव, शत्रूनसमर्थान् कुरु ६ ४७ ३०. [अप+प्रोथृ पर्याप्तौ (भ्वा०) धातोर्लोट्]

अपबाधताम् निवारयतु ७ ५० २ **अपबाधते**=दूरीकरोति ३४ २५ **अपबाधन्ते**=विरुद्धतया बाधन्ते १ ८५ ३ [अप+बाधृ लोडने (भ्वा०) धातोर्लोट् लट् च]

अपबाधमान अपबाधते स (बृहस्पति =सेनापति) १७ ३६ **अपबाधमाना**=निवारयन्ती (उषा) ५ ८० ५ **अपबाधमानाः**=निवर्त्तयन्त (विद्वज्जना) १९ ८४ [अप+बाधृ लोडने (प्रतिघाते) (भ्वा०) धातो शानच्]

अपभर्त्ता अपबिभर्त्ति दूरीकरोतीति (भेषज = भिषग्जन) २ ३३ ७ [अप+डुभृञ् धारणपोषणयो (जु०) धातो कर्त्तरि तृच्]

अपभवन्तु दूरीभवन्तु ३४ ४६ **अपभूत**=अपमान-युक्ता भवत ४ ३५ १ **अपभूतु**=अपभवतु १ १३१ ७ [अप+भू सत्तायाम् (भ्वा०) धातोर्लोट्। 'अपभूत' 'अपभूतु' इत्येनयो 'बहुल छन्दसी' ति शपो लुक्। 'भूसुवोस्तिङी' ति गुणप्रतिषेध]

अपभूतन विरुद्धा भवत ७ ५९.१० [अप+भू सत्तायाम् (भ्वा०) धातोर्लोट्। शपो लुक्। 'तप्तनप्त-नथनाश्च' इति तस्य तनादेश]

अपमृष्टः अपमृज्यते दूरीक्रियतेऽविद्यादिक्लेशै य स शुद्ध (योगिजन) ७ १२ दूरीकृत (मर्क =अनीति) ७ १७ [अप+मृजूष् शुद्धौ (अदा०) धातो क्त। 'क्ङिति चे' ति मृजेर्वृद्धिर्न भवति]

अपयन्ति पृथक्त्वेन यन्ति १ ५० २ **अपयन्तु**=दूर गच्छन्तु ३५ १ [अप+इण् गतौ (अदा०) धातोर्लट् लोट् च]

अपयुयोति निवारयितु मिश्रयति १ ९२ ११. [अप+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्यङ्लुक्। ततो लट्। गुणाऽभावश्च छान्दस]

अपरजाय अपरे जाताय ज्येष्ठाऽनुजायाऽन्त्यजाय वा १६ ३२ [अपरोपपदे जनी प्रादुर्भावे धातोर्ड प्रत्यय]

अपरम् भविष्यति काले ३३ ९४ अन्यम् (भयम्) १ १८९ ४ पश्चात् १ १८४ १. पश्चिमम् (दुष्टजनम्) ६ ४७ १५ द्वितीयम् २ २८ ८ श्वो दिन प्रति १ ३६ ६

अपरः=अन्यो (देशो) अन्य (शिल्पी वा) १.७४ ८. अन्य ३५ १५ अपरा=अपरौ १ १८५ १ अन्य कोई पीछे उत्पन्न हुई (छोटी बहिन) १ १२४ ९ अपरा =या जनिष्यन्ते (प्रजा) ३ ५५ ५ अन्या (अप =जलानि) ५.४८ २.

अपरासः पश्चाद् भूता (विद्वज्जना.) ५ ४२.६

अपराजितम् यो न केनाऽपि पराजेतु शक्यते तम् (इन्द्रम्=ईश्वर सभाऽध्यक्ष वा) १ ११.२ अन्यै पराजेतु-मशक्यम् (इन्द्र=परमैश्वर्यकारक राजानम्) २८ २ **अपराजिता**=शत्रुभि पराजेतुमशक्यौ (इन्द्राग्नी= सभासेनेशौ) ३ १२ ४ [परा+जि जये (भ्वा०) धातो. क्त। नञ्समास]

अपरितासः अन्यैरव्याप्ता (क्रतव.=यज्ञा प्रज्ञा वा) २५ १४

अपरिविष्टम् परिवेषरहितम् (कर्म्म) २ १३ ८. [परि+विष्लृ व्याप्तौ (जु०) धातो क्त. । नञ्समास]

अपरिह्वृतः परित सर्वतोऽनावृत. (अग्नि =विद्युत्) २ १०.३ [परि+वृञ् वरणे (स्वा०) धातो क्त। नञ्समास]

अपरिह्वृताः सर्वतोऽकुटिला ऋजवो भूत्वा (मनुष्या) प्र०—अत्र 'अपरिहवृताश्च' अ० ७ २.२३ इत्यनेन निपातना-च्छन्दसि प्राप्तो ह्वृभावो निषिध्यते १ १०० १९. अपरिवर्जिता (मनुष्या) १ १०२ ११ [परि+ह्वृ कौटिल्ये (भ्वा०) धातो क्त प्रत्यय। 'अपरिह्वृताश्च' (अ० ७ २ ३२) सूत्रेण 'हृ' आदेशाभावो निपात्यते। नञ्-समास]

अपरीतः अवर्जित (राजा) ५.२९ ४. **अपरीताः**=अवर्जिता (पन्थास) १ १०० ३ [परि+इण् गतौ धातो क्त। नञ्समास ।]

अपरीतासः अवर्जनीया (देवा) १ ८९.१ अन्यैर-व्याप्ता (क्रतव =यज्ञा प्रज्ञा वा) २५ १४. [नञ्+परि+इण् गतौ (अदा०)+क्त]

अपरीभ्यः अपूर्णाभ्य सेनाक्रियाभ्य, प्र०—अत्र पृधातो 'अच इ' उ० ४ १४४ अनेन सूत्रेण इ प्रत्यय 'कृदिकारादक्तिन' अ० ४ १ ४५ इत्यनेन वार्तिकेन ङीप् प्रत्यय १ ३२ १३ **अपरीषु**=आगामिनीषूपस्सु १ ११३ ११ (पृ पालनपूरणयो) (जु०) धातो 'अच इ.' उ० ४ १४४ सूत्रेण इ प्रत्यय। स्त्रिया ङीप् नञ्-समास]

अपर्वन् अपर्वणि पर्वरहिते समये ४.१९.३.

[पॄ पालनपूरणयो (जु०) धातो 'स्नामदि०' उ० ४ ११३. सूत्रेण वनिप् । नञ्समास । 'सुपा सुलुक्' इति डेर्लुक्]

अपवक्ता मिथ्यावादी (प्रजापुरुष) ८ २३ [अप+वच परिभाषणे (अदा०) धातो कर्त्तरि तृच्]

अपवध्यासम् हन्याम् १ २६ [अप+हन हिंसागत्यो (अदा०) धातोर्लिङ् 'हनो वध लिङि' (अ० २ ४ ४२) सूत्रेण वधादेश]

अपवर्त्तय दूरीकुरु २ २३ ७ [अप+वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल्लोट्]

अपववर्थ अपवर्त्तते ३ ४३ ७ [वृञ् वरणे (स्वा०) धातोर्लिट् । 'बभूथाततन्थजगृम्भववर्थेति निगमे' इतीडभावो निपात्यते]

अपवः अपवृणुयात् १ १२१ ४ अपवृणोति २ १४ ३. [अप+वृञ् वरणे (स्वा०) वृङ् धातोर्वा लुङ् । 'मन्त्रे घसह्वरणश०' इति सूत्रेण लेर्लुक् । अडभावश्च]

अपवन् अपवृण्वन्ति ५ २९.१२ अपवृणोति ४ ५ ८. अपवृणुयु ४ २ १६ दूरीकुर्वन्तु १९ ६९ अपवृण्वन्ति ४ ५५ ६ [अप+वृञ् वरणे धातोर्लुङ् प्रथमा बहुवचने 'मन्त्रे घसह्वरणश०' सूत्रेण लेर्लुक् अडभावश्च]

अपवर्त्ता अपवारयिता (इन्द्र =राजा), प्र०—अत्र तृन् प्रत्यय ४ २० ८ [अप+वृञ् वरणे (स्वा०) धातोर्णिजन्तात् तृन् तच्छीलादिषु । णेर्लुक् च]

अपवाति अपगत वाति गच्छति १ १६२.१० अपगच्छति २५ ३३ [अप+वा गतिगन्धनयो (अदा०) धातोर्लट्]

अपवृधि अपवृणु, अपवृणोति वा, प्र०—अत्र पक्षान्तरे सूर्यस्य प्रत्यक्षत्वात् प्रथमार्थे मध्यम 'श्रुशृणुपॄकृवृभ्यश्छन्दसि' अ० ६ ४ १०२ अनेन सूत्रेण हेर्धि १ १० ७ दूरीकुरु ७ २७ २ [अप+वृञ् वरणे (स्वा०) धातोर्लोट् । 'श्रुशृणु०' इत्यादिना छन्दसि हेर्धिरादेश]

अपवेत्ति नश्यति ५ ६१ ८ [अप+विद ज्ञाने (अदा०) धातोर्लट् । धातूनामनेकार्थत्वादत्र विनाशे]

अपव्रतान ब्रह्मचर्यसत्यभाषणादिव्रताऽऽचरणरहितान् (अविद्वज्जनान्) ५ ४२ ९ अपगतानि दुष्टानि मिथ्याभाषणादीनि व्रतानि कर्माणि येषां तान् दस्यून् १ ५१ ९. **अपव्रतेन**=अन्यथा वर्त्तमानेन (ब्रह्मणा=धनेन) ५ ४० ६ अनियमेन परुषकर्मणा १७ ४७ [अप-व्रतयोर्बहुव्रीहि । व्रतमिति कर्मनाम निघ० २ १]

अपशोशुचत् दूरीकुर्यात् १ ९७ १ दूरीकर्त्तुं शोशुच्यात् १ ९७ ५. भृश शोषयतु, भा०—पृथक् कारयति ३५ ६ सब नष्ट हो जाये आर्याभि० १.३९, ऋ० १ ७ ५.६ [अप+शुच शोके (भ्वा०) ईशुचिर् पूतीभावे (दिवा०) धातोर्वा यङ्लुकि रूपम् । शोचतिर्ज्वलतिकर्मा निघ० १.१६]

अपश्चाद्ध्वने उत्तमेषु व्यवहारेष्वग्रगामिने (विदुषे=आप्ताय विपश्चिते) ६ ४२ १ [दघ पालने (स्वा०) धातोर्बाहुलकात् वनिप् । दघ्नोति गतिकर्मा नि० २ १४ 'पश्चात्' अ० ५ ३ ३२ सूत्रेणापरस्य पश्च भावो निपात्यते । पश्चात्=अपरम् । तद्विपरीतोऽग्रगामी]

अपश्यत् पश्यति ३२ १२ पश्येत् ३ २६ ८ **अपश्यताम्**=पश्यत. ७ ३३.१०. **अपश्यन्**=पश्येयु १ ११३.११ **अपश्यन्त**=पश्यन्ति १.१४६ ४ **अपश्यम्**=पश्यामि प्र०—अत्र लडर्थे लङ् १ १८ ९ पश्येयम् ३७ १७. **अपश्याम**=सम्प्रेक्षेमहि १ १३९ २ (दृशिर् प्रेक्षणे (भ्वा०) धातोर्लङि रूपाणि शिति पश्यादेश । 'अपश्यन्त' प्रयोगे व्यत्ययेनात्मनेपदम्]

अपश्याः ये न पश्यन्ति ते (अन्धा जना) १.१४८ ५ [दृशिर् प्रेक्षणे (भ्वा०) धातो 'पाघ्राध्माधेट्दृश श' अ० ३ १ १३७ सूत्रेण कर्तरि श प्रत्यय । शिति पश्यादेश । तत्प्रतिषेध]

अपश्रितम् आसेवितम् (शिर =उत्तमाङ्गम्) १ ८४.१४ **अपश्रितः**=योऽपश्रयति स (सूर्य) ५.६१ १९ [अप+श्रिञ् सेवायाम् (भ्वा०) धातो क्त । 'आदिकर्मणि क्त कर्तरि चे' ति कर्त्तर्यपि क्त]

अपसम् कर्म, प्र०—अप इति कर्मनामसु पठितम् निघ० २.१. 'व्यत्ययो बहुलम्', इति लिङ्गव्यत्यय, इदमपि सायणाचार्येण न बुद्धम् १ २ ९. **अपसः**=कर्माणि, भा०—अनेकविधानि कर्माणि ३३ ७५ अप कर्म तद्वन्त सदा कर्मनिष्ठा (धीरा जना) ३४ २ उत्तमानि कर्माणि १ ९२ ३ सुकर्म्माण (वरा जना) ५ ४२ १२ कर्म करने वाले लोग स० प्र० २४६,३४२ कर्मवन्त, भा०—कर्मसाधनानि (त्रिधातव.=जीवा), अत्र विन् प्रत्ययलुक् २१ ३७ कर्मठा (त्रय =अध्यापकोपदेशकवैद्या.) २८ ८. **अपसा**=कर्मणा ४ २ १४ **अपसाम्**=जलानाम् १ ९५ ४ कर्म्मणाम् १ १६ ४४ कर्मकर्त्तृणाम् (सज्जनानाम्) ६ ६१ १३ **अपसि**=कर्म्मणि ३ १ ३ **अपः**=अन्तरिक्ष प्रति ३ ३२ ५ कर्माणि कर्त्तुम् १ १० ८ जलानीव व्याप्तविद्या (विद्वज्जना) ३ ३१ १६ व्याप्तान् प्रकाशान्

२३ १७. सुकर्म ७ ४० ४ जलानि प्राणान्वा १०.१. कर्म १.११० १. प्राणान् कर्म्माणि वा १ ६४.१ प्राणान् जलान्यन्तरिक्षाऽवयववान् १ ६४ ६ बलानि जलानि वा १ ६१ २२ कर्माणि जलानि वा १ १०३ ५ जलानि प्राणवती प्रजा वा १ १०५ १ प्राणान् वायून्वा ४.२६ २. विमानादिनिर्माणसाधक कर्म्म ४.३३.६ जलान्यन्तरिक्ष वा ४ ४२ ४. कर्म्माणि ४ १६ ६ अन्तरिक्षलोक और जल आर्याभि० १ १३, ऋ० १ ४.१४ १२ सुसस्कृतानि जलानि अन्व०—प्राणान् ४ १३ या आप्नुवन्ति सर्वान् पदार्थान् ता (जलानि) १ २३ १८ जलानि वायून्वा १२ १०२ जलानीव कर्माणि ५ ३१ ८ जलानीव शत्रुप्राणान् ५.३१ ६ प्राणा इव वर्त्तमाना (प्रजा) १ १३१ ४ अन्तरिक्षम् ५ १४ ४ अपासि कर्माणि ५ ४१.१४ प्राणान् १४ ८ जलानि १ ५६ ६ उदकानि ६ ६० २ **अप इव**=जलानीव प्राणान् १ ५१ १ [अप इत्युदकनाम निघ० १ १२. कर्मनाम निघ० २ १ अपो यत्कर्म नि० ७.२७. अप प्रजननकर्म नि० ११ ३१ आप्यते सुखे येन तद् अप =अपत्य सुकर्म वा (उ० द० भा०) आप्लृ व्याप्तौ (स्वा०) धातो 'आप कर्मण्याया ह्रस्वो नुट् च वा' उ० ४ २०८ सूत्रेण असुन् प्रत्यय]

अपसश्चिम दूरे प्राप्नुयाम गमयेम वा ३८ २०. [अप+सश्चति गतिकर्मा निघ० २ १४ धातोर्लोट् लिङर्थे]

अपसुव दूर प्रापय, दूरीकृत्य प्रेरय ३३ ११ [अप+षु प्रसवैश्वर्ययो (भ्वा०) धातोर्लोट् विकरणव्यत्ययेन श प्रत्यय]

अपसेध अपनय ६ ४७ २९ [अप+षिधु गत्याम् (भ्वा०) धातोर्लोट्]

अपसेधन् दूरीकुर्वन्, भा०—तिरस्कुर्वन् (देव = सूर्य) ३४ २६. निवारयन् (सभापति) १ ३५ १० [अप+षिधु गत्याम् (भ्वा०) धातो शतृ]

अपस्तमः अतिशयेन क्रियावान् (ईश्वर) १.१६०.४ **अपस्तमा**=अतिशयेन कर्मकर्त्री (सरस्वती=वाक्) ६ ६१ १३ [अपस् इति कर्मनाम निघं० २ १. तत आतिशयिकस्तमप् प्रत्यय । स्त्रिया टाप्]

अपस्पृधेथाम् स्पर्द्धेथाम् ६ ६९ ९ [स्पर्द्ध सघर्षे (भ्वा०) धातोर् लडि आथामि द्विवचन रेफस्य सम्प्रसारणमकारलोपश्च 'अपस्पृधेथामानृचु०' अ० ६ १ ३६ सूत्रेण निपात्यते । अथवा—अप+स्पर्धेर्लडि आथामि सम्प्रसारणमकारलोपश्च निपात्यते छन्दसि]

अपस्फरीः अवृद्ध मा कुर्या ६.६१.१४.

अपस्यया आत्मन कर्मेच्छया ५ ४४.८ **अपस्यः**=अपस्सु कर्मसु साध्व्य (विदुष्य स्त्रिय) प्र०—अत्र 'सुपा सुलुग्०' इति शस स्थाने सु १० ७ **अपस्याम्**=आत्मन कर्मेच्छाम् ७ ४५ २. [कर्मवाचिनोऽपस्सुवन्तादात्मन इच्छायामर्थे क्यच् । 'अ प्रत्ययादि' ति क्यजन्तात् स्त्रियाम् 'अ' प्रत्यय. । ततष्टाप्]

अपस्यात् आत्मनोऽपासि कर्माणीच्छेत् १ १२१ ७ [अपस्+क्यच् । 'सनाद्यन्ता धातव' इति धातुसज्ञाया लिङ्]

अपस्युवः आत्मनोऽपासि कर्माणीच्छन्त (कन्या.) १ ७९ १ [अपस्+क्यच् आत्मन इच्छायाम् । 'क्याच्छन्दसि' (अ० ३ २ १७०) सूत्रेण तच्छीलादिष्वर्थेषु 'उ' प्रत्यय । तत प्रथमाबहुवचने रूपम्]

अपहतम् नाशयतम् १ १३२ ६ [अप+हन हिंसागत्यो (अदा०) धातोर्लोट्]

अपहतम् विनाशितम् (रक्ष =दुर्गन्धादिदुःखजातम्) १ ९ अपहन्यते यत्तत् (रक्ष =दस्युस्वभाव) १.१६. **अपहताः**=अपहिंसिता (असुरा =दुष्टस्वभावा प्राणिन) २ २९. [अप+हन हिंसागत्यो (अदा०) धातो क्त प्रत्यय]

अपहंसि दूरे प्रक्षिपसि १८ ५२ [अप+हन हिंसागत्यो (अदा०) धातोर्लट् । अत्र गत्यर्थे प्रयोग]

अपह्नुवे आच्छादयेयम् १.१३८ ४. [अप+ह्नुङ् अपनयने (अदा०) धातोर्लटि रूपम्]

अपह्वरः चलन कम्पन रहित हो आर्याभि० २.४१. ३८.२० [अप+ह्वृ कौटिल्ये (भ्वा०) धातोर्लडि मध्यमैकवचने रूपम् । अडभावश्छान्दस.]

अपाक् प्रश्चिमत. ३ ५३.११ पश्चिमाया ६.३६ [अपाची+अस्ताति । 'अञ्चेर्लुक्' इति अस्तातेर्लुक् । 'लुक्तद्धितलुकी' ति स्त्रीप्रत्ययस्यापि लुक्]

अपाकषन् प्रादुर्भूतोऽस्ति ऋ० भू० ९. प्रकाशित हुए है स० प्र० २७३, अथर्व० १० २३ ४ २० [अप+कष हिंसार्थे (भ्वा०) धातोर्लङ् । धातूनामनेकार्थत्वादत्र प्रादुर्भावेऽपि]

अपाकः अपरिपक्व (जन) ६ ११ ४ अप्रशस्य. (त्वष्टा=विद्युत्) प्र०—पाक इति प्रशस्यनाम निघं० ३ ८, २० ४४. **अपाकाः**=अपगतमविद्याजन्य दुःखं यस्य

तम् (विद्वज्जनम्) १ १२६ १ **अपाकाः**=वर्जितपाकयज्ञा यतय १ ११० २ **अपाके**=अपरिपक्वे (राजनि) ६.१२ २. [पाक प्रशस्यनाम निघ० ३ ८ पाक पक्तव्यो भवति 'विपक्व प्राज्ञ आदित्य' इत्युपनिपद्वर्णो भवतीत्यधिदैवतम्। पाक पक्तव्यो भवति विपक्वप्रज्ञ आत्मेत्यात्मगतिमाचष्टे नि० ३ १२.]

अपाका अपगतमविद्याजन्य दुख यस्य तम् १ १२६ १. [अप+अकयोर्बहुव्रीहि । कम् इति सुखनाम निघ० ३ ६ तत्प्रतिपेधम् अकम्=दु खम्]

अपाऽघुक्षत् अपशब्दयेत् ५ ४० ८. [अप+घुषिर् अविशब्दने (भ्वा०) धातोर्लुङ् अनित्यमागमशासनमितीटोऽभावे 'शल इगुपधात्०' इति क्सादेशे रूपम्]

अपाङ् अपाऽञ्चतीति (जीव) १ १६४ ३८ [अपोपपदे 'अञ्चु' धातो 'ऋत्विग्दधृक्०' अ० ३ २ ५९ सूत्रेण क्विन्। 'अनिदिताम्०' इत्यादिना नलोपे नुमागमे हल्ङ्यादिसयोगान्तलोपयो ' 'क्विन् प्रत्ययस्य कु ' इति कुत्वे डकारे रूपम्]

अपाचीने योऽधोऽञ्चति तस्मिन् (तमसि=अन्धकारे) ७ ६ ४ [अपाच्प्राति० 'विभाषाञ्चेर्०' अ० ५ ४ ८. सूत्रेण ख प्रत्यय खस्येनादेश]

अपाचीः या अधोऽञ्चन्ति (अप) ५ ४८ २. [अप+अञ्चु गतिपूजनयो धातो क्विन् 'अञ्चतेश्चो'पसख्यानम्' इति ङीप्। अनिदितामिति नकारलोपे भसज्ञायाम् 'अच' इत्यकारलोपे 'चौ' इति पूर्वपदस्य दीर्घत्वे रूपम्]

अपात् पिवेत् २ ३७ ४ [पा पाने (भ्वा०) धातोर्लुङ् 'गातिस्थाघुपा०' इति सिचो लुक्]

अपात् अविद्यमाना पादा यस्या सा विद्या १ १५२ ३. पादरहिता (विद्युत्) ६ ५९ ६ अविद्यमानौ पादौ यस्या सा, भा०—वेगवती, पादशिर आद्यवयवरहिता (उषा) ३३ ९३ अविद्यमानौ पादौ यस्य स (वृत्र =मेघ) १ ३२ ७ पादरहित (अग्नि =परमात्मा) ४ १ ११ **अपादम्**=अविद्यमानपादम् (मेघम्) ५ ३२ ८ पादेन्द्रियरहितम् (वृत्र=मेघम्) १८ ६९ पादरहितम् (वृत्र=मेघम्) ३ ३० ८ (नञ्-पादयोर्बहुव्रीहौ छान्दसत्वात् समासान्तलोपे रूपम्]

अपातक्षन् उत्पन्नोऽस्ति ऋ० भू० ९ प्रकाशित हुए है स० प्र० २७३, अथर्व० २३ ४ २० [अप+आङ्+तक्षू तनूकरणे (भ्वा०) धातोर्लङ्]

अपाताम् रक्षेतम् ३८ १३ [पा रक्षणे (अदा०) धातोर्लङि प्रथमद्विवचने रूपम्]

अपादयत् विनाशयेत् २ ११ १० [पद गतौ (दिवा०) धातोर्णिचि लङि रूपम्। धातूनामनेकार्थत्वादत्र विनाशार्थे पदधातु]

अपाधमत् दूर धमति ३३ ९५ **अपाधमः**=दूरं धम कम्पय १ ५१ ५ [अप+ध्मा शब्दाग्निसयोगयो (भ्वा०) धातोर्लङ्। 'पाघ्रा०' इत्यादिना धमादेश शिति। धमति-र्गतिकर्मा। निघ० २ १४]

अपानती अपानमधोगमनशील वायु निष्पादयन्ती विद्युत् ३.७ [अप+अन प्राणने (अदा०) धातो शतृप्रत्यय स्त्रिया ङीप्]

अपानदाः या अपान दु खदूरीकरणसाधन प्रयच्छन्ति ता (हेतय =शस्त्राऽस्त्रोन्नतय) १७ १५ [अपानोपपदे डुदाञ् दाने धातो क प्रत्यय]

अपानपाः योऽपान पाति (विद्वज्जन) २० ३४ [अपानोपपदे पा रक्षणे (अदा०) क प्रत्यय वचनव्यत्ययेन वहुवचनम्]

अपानम् यो नाभेरर्वाग्गच्छति तम् (प्राणवायुम्) १४ ८ **अपानश्च**=सब दु ख दूर करने का उपाय और उसकी सामग्री स० वि० १४५, अथर्व० १२ ५ ९ **अपानः**=नाभेरधोगामी वात १८ २ अपानयति दु ख येन स (वायु) २२ ३३ वाह्याद् देशाच्छरीर प्रविशति स वायुरपान ऋ० भू० १०४, अथर्व० १२ ५ ९ **अपानाय**=अपानिति दु ख येन तस्मै (दु खनिवृत्तिहेतवे) १३ २४ दु खनिवारणाय १३ १९ यो वहिर्देशादाभ्यन्तर गच्छति तस्मै (वायवे) २२ २३ दु खनिवृत्तये १५ ६४ [अप+अन प्राणने (अदा०) धातो 'हलश्चे' ति करणे घञ्। भुव इत्यपान तै० ब्रा० ७.५ ३ तै उ० १ ५ ३ अपानो वा एतवान् श० १ ४ ३ ३. अपाना अनुयाजा श० ११ २ ७ २७ अन्तर्ह्यपान। ता० ७ ६ १४ अन्तर्यामौ अपान एव कौ० १२ ४ अग्निरपान जै० ३ ४ २२ ९ अपानो वरुण श० ८ ४ २ ६ वरुणस्य साय (काल) आसवोऽपान तै० १ ५ ३ १ अपान प्रस्तोता कौ० १७ ७ गो० उ० ५ ४ अपानस्त्रिष्टुप् ता० ७ ३ ८ अपानो रथन्तरम् ता० ७ ६ १४ अपानो याज्या श० १४ ६ १ १२ अपानो वै यन्ताऽपानेन ह्यय यत प्राणो न पराङ् भवति ऐ० २.४० अर्वाडपान तै० स० ६ ३ १ ५ अहरेव प्राणो रात्रिरपान ऐ० आ० २ १ १५ उपरिष्टाद् अपान तै० स० ३ ४ १ ४ एत्यपानस्त्वदसौ लोक जे० उ० २ ३ ३.९

ऐन्द्रोऽपान तै० स० ६ ३.११ २ घोषीव ह्ययमपान ष० २ २ नाभ्या अपान, अपानान्मृत्यु ऐ० आ० २ ४ १ ऐ० उ० १ १ ४ मनसा ह्यपानो धृत काठ० २७ २]

अपापकाशिनी अपापान् सत्यधर्मान् काशितु शीलमस्या सा (तनू =विस्तृतोपदेशनीति) १६ २ [अपापोपपदे काशृ दीप्तौ (भ्वा०) धातोस्ताच्छील्ये णिनि स्त्रिया ङीप्

अपापदीत् अपहन्ति ५ ८ [अपपूर्वाद् हन्तेर्लुङ् । 'लुङि च' इति वधादेश]

अपापविद्धम् यत् पापयुक्त पापकारि पापप्रिय कदाचिन्न भवति तद् (ब्रह्म) ४० ८ नैव तद् ब्रह्म पापयुक्त पापकारि च कदाचिद् भवति ऋ० भू० ३६, ४० ८ जिसमे पापाचरण का अभाव होने से क्लेश, दुःख, अज्ञान कभी नही होता वह (ब्रह्म=परमेश्वर) स० प्र० २४४, ४० ८ परमात्मा कभी अन्याय नही करता क्योकि वह न्यायकारी ही है आर्याभि० २ २, ४० ८ [अपाप+व्यध ताडने (दिवा०) धातो क्त । किति 'ग्रहिज्या०' इत्यादिना सम्प्रसारणम्]

अपापोहति दूरीकर्त्तुं वितर्कयति ५ ३४ ३ [अप+ऊह वितर्के (भ्वा०) धातोर्लट् 'उपसर्गादस्यत्यूहोर्वा वचनम्' इति वा परस्मैपदम् । अप शब्दस्य द्वित्वम्]

अपाऽभरत् अपभरति १ १६१ १० [अप+भृञ् भरणे (भ्वा०) धातोर्लङ्]

अपाऽभिच्युवत् अपाभिच्यावयति २ ४१ १० (अप+अभि+च्युङ् गतौ (भ्वा०) धातोर्णिचि लुङि रूपम् । अडभावश्च]

अपाऽभूत तिरस्कृता भवत ४ ३४ ११ [अप+भू सत्तायाम् (भ्वा०) धातोर्लुङि मध्यमबहुवचने रूपम् 'गातिस्थाघुपाभूभ्य ०' इति सिचो लुक्]

अपाम आप्नुयाम १० २१ [पा पाने (भ्वा०) धातोर्लुङि रूपम् 'गातिस्था०' इति सिचो लुक् । अनेकार्थत्वाद् धातूनामत्राप्नोत्यर्थे]

अपाम् प्राणिना जलानामिव ५ ४१ १० प्राणाना जलाना वा १ ६७ ५ व्यापकाना प्राणाना जलाना वा १३ २ प्राप्ताना मित्रशत्रूदासीनाना पुरुषाणाम् १ १०० ११. प्राणाना जलाना वा प्र०—आप इति पदनामसु पठितम् निघ० ५ ३ अनेन चेष्टादिव्यवहारप्रापका प्राणा गृह्यन्ते 'आप इत्युदकनामसु पठितम् निघ० १ २, ३ १२ ये व्याप्नुवन्ति सर्वान् पदार्थानन्तरिक्षादयस्तेषाम् १ २२ १६ अन्तरिक्षस्य जलस्य प्राणाना वा २ ४ २ आप्नुवन्ति याभिस्तासामुदकानाम् ८ २४ अन्तरिक्षस्य, प्र०—आप इत्यन्तरिक्षनाम निघ० १ ३, १ १६४ ५२ विद्याविज्ञानयोगव्यापिनाम् (सन्यासिनाम्) १ १५८ ६ व्याप्नुवता विद्युदादीनाम् १३ ५३. प्राप्तव्याना पदार्थानाम् १३ ५३. उदकानाम् १ ८५ ९ जलानाम् ७ १६ [आप =अन्तरिक्षनाम नि० १ ३ उदकनाम निघ० १.१२ पदनाम निघ० ५.३. आप्लृ व्याप्तौ (स्वा०) धातो 'आप्नोतेर्ह्रस्वश्च' उ० २ ५८ सूत्रेण रूपसिद्धि] तद्यथा एतादृग्वान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता नि० ५ ४२ आप आयना (आयनानि वा) नि० १२ ३५ आप तद्यदब्रवीत् (ब्रह्म) आभिर्वा अहमिद सर्वमप्स्यामि यदिद किं चेति तस्मादापोऽभवन्तदपामप्त्वमाप्नोति वै स सर्वान् कामान् यान् कामयते गो० पू० १ २ सेद सर्वमाप्नोद् यदिद कि च यदाप्नोत्तस्मादाप श० ६ १ १ ९ अद्भिर्वा इद सर्वमाप्तम् श० १ १ १ १४ आपो ह वा इदमग्रे सलिलमेवास ता अकामयन्त कथ नु प्रजायेमहीति श० ११ १ ६ १. प्राणा वा ऽआप तै० ३ २ ५ २ ता० ९ ९ ४ आपो वै प्राणा श० ३ ८ २ ४ प्राणो ह्याप जै० उ० ३ १० ९ अमृत वा आप श० १ ९ ३ ७, ४ ४ ३ १५ अमृतत्व वा आप कौ० १२.१ शान्तिरापः श० १ २ २ ११ शान्तिर्वा आप ऐ० ७ ५ आपो हि शान्ति ता० ८ ७ ८ शान्तिर्वै भेषजमाप कौ० ३ ६ ७ ८ ९ गो० उ० १ २५ आपो ह वा ऽओषधीना रस श० ३ ६ १ ७ रसो वाऽआप. श० ३.३ ३ १८, ३ ९ ४ ७ आपो वै सर्वस्य शान्ति प्रतिष्ठा ष० ३ १ आपो वाऽअस्य सर्वस्य प्रतिष्ठा श० ४ ५ २ १४ आप सत्ये (प्रतिष्ठिता) ऐ० ३ ६ गो० उ० ३ २ श्रद्धा वा आप. तै० ३ २ ४ १ मेध्या वा आप श० १ १.१ १, ३.१ २ १० आपो वै क्षीररसा आसन् ता० १३ ४.८ ऊर्वा आपो रस कौ० १२ १. अन्न वा ऽआप श० २ १ १ ३, ७ ४ २ ३७ अन्नमाप कौ० १२ ३ ८. आपोऽन्नम् ऐ० ६ ३० आपो वै रक्षोघ्नी तै० ३ २ ३ १२ वज्रो वाऽआप श० १ १ १ १७ वीर्य वाऽआप श० ५ ३ ४ १ आपो वा ऽअर्क श० १० ६ ५ २ आपो वा ऽअवका श० ७ ५ १ १ १ देव्यो ह्याप श० ११ ३ ७ यज्ञो वा आप कौ० १२ १ श० ११ १.१२. आपो वै यज्ञ ऐ० २ २० आपो रेत श० ३ ८ ४ ११. पशवो वा एते यदाप ऐ० १ ८ आपो वै सर्वा देवता ऐ० २.१६ आपो वै सर्वे कामा श० १०.५ ४ १५ आपो वै सर्वे देवा श०१० ५ ४ १४ आपो वै देवाना प्रिय धाम तै० ३ २ ४ २. सौम्या ह्याप ऐ० १ ७ आपो वरुणस्य पत्न्य आसन् तै० १ १ ३ ८ अग्निना वाऽआप सुपत्न्य श० ६ ८ २.३.

अस्ति वै चतुर्थो देवलोक आप कौ० १८ २ अप्सु पृथिवी (प्रतिष्ठिता) जै० उ० १ १० २ आप स्थ समुद्रे श्रिता'। पृथिव्या प्रतिष्ठा तै० ३ ११ १ ५ प्रात सवनरूपा न्वाप. कौ० १२ ३. अथ यद्यप शूद्राणा स भक्ष ऐ० ७ २६ योगा वा ऽआपो वृषाग्नि. श० १ १ १ १८, २ १ १ ४ आपो वै सरिरम् श० ७ ५ २ १८ आपो वा इदमग्रे सलिलमासीत् तै० १ १ ३ ५ आपो वा इदमग्रे महत्सलिलमासीत् जै० उ० १.५६ १ आप एप वै ₂रयिर्वैश्वानर श० १० ६ १ ५ आपो व्यान जै० उ० ४ २२ ६ शुक्रा ह्याप तै० १ ७ ६ ३ चन्द्रा ह्याप तै० १ ७ ६ ३ आपस्सावित्री जै० उ० ४ २७ ३ आपो वै पुष्करम् श० ६ ४.२ २, ७ ४ १ ८ आपो वै पुष्करपर्णम् श० ७ ३ १ ६ आपो वै प्रजापति परमेष्ठी यजु० १४ ६ आपो हि पय कौ० ५ ४ गो० उ० १ २२ अपामेप ओपधीना रसो यत्पय श० १२ ८.२ १३ आपो ह्येतस्य (सोमस्य) लोक श० ४ ४ ५ २१. आपो हि रेत ता० ८ ७ ६ आपो रेत प्रजननम् तै० ३ ३ १० ३. धर्मे ह्याप श० ११ १ ६ २४ आप प्रोक्षण्य ऐ० ५ २८ आपो वै सूदोऽन्न दोह. श० ८ ७ ३१ आप स्वरसमान कौ० २४.४ रेवत्य आप श० १ २ २ २ आपो वै रेवती तै० ३.२ ८ २ वज्रो वाऽआप. श० १ ७ १.२० आप इति तत् प्रथम वज्ररूपम् कौ० १२ २. आप वै विधा श० ८.२.२ ८. आपो वै द्यौ श० ६ ४ १ ६ आपो दिव ऊध श० ६ ७ ४ ५ आपो वै दिव्य नभ. श० ३.८.५ ३ आपो वै वरेण्यम् जै० उ० ४ २८ आपो वै सव. श० ६ १.३.११ आप एव सर्वम् गो० पू० ५ १५ आपो वै मरुत ऐ० ६ ३०. कौ० १२.८ अन्न वाऽआपा पाय श० ७ ५ २.६० आपो वै सहस्रियो वाज श० ७ १.१ २२ गिरिवुध्ना उ वा आप. श० ७ ५ २ १८ वै राजीर्वा आप कौ० १२ ३]

अपामतिम् अज्ञानम् १७.५४. [अप+आङ्+मन ज्ञाने (अदा०) धातो स्त्रिया भावे क्तिन् 'मन्त्रे वृषेप०' अ० ३ ३.९६ सूत्रेण निपात्यते]

अपामार्ग रोगनिवारकोऽपामार्ग औपधिरिव पापदूरीकर्त्ता (सत्पुरुष !) ३५ ११ [अप+मृजूप् शुद्धौ (अदा०) धातो. 'हलश्चे' ति सज्ञाया घञ् 'उपसर्गस्य घञ्यमनुष्ये०' इत्युपसर्गस्य दीर्घत्वम्। प्रतीचीनफलो वा अपामार्ग श० ५ २ ४.२०]

अपायि पाति ६ ४४ ८ पिवति ६ ४४ १६. पान किया २ १९ १ [पा पाने (भ्वा०) पा रक्षणे वा (अदा०) धातो कर्मणि लुडि चिणि रूपम्]

अपारम् अपारविद्यम्, गम्भीराऽऽशयम् (इन्द्र=राजानम्) ४ १७ ८ **अपारः**=पाररहित (महिमा) ५ ८७.६. **अपाराम्**=पाररहिताम् (भूमिम) ३.३०.९. **अपारे**=पाररहितेऽपरिमिते (रजनी=द्यावापृथिव्यौ) ४.४२ ६ अगाधे द्यावापृथिव्यौ, प्र०—अपारे इति द्यावापृथिवीनाम निघ० ३ ३०, ३.१.१४ अविद्यमानाऽवधी (रोदसी=द्यावापृथिव्यौ) ३.३० ५. [अपारे द्यावापृथिवी नाम निघ० ३ ३० दूरपारे नि० ६ १]

अपारयत् दुग्धात् पारयेत ४ ३० १७ [पारकर्मसमाप्तौ (चु०) धातोर्लङ्]

अपाऽवधीत् अपहन्ति, प्र०—अत्र नित्यापदे लङर्थे लुङ् 'व्यपेत्येतस्य प्रातिलोम्य प्राह नि० १ ३, ५ ८ पृथक्करणतया हन्ति ५ ८ [अप+हन हिंसागत्यो (अदा०) धातोर्लुङ् 'लुङि चे' ति हन्तेर्वधादेश]

अपावपत् अधो वपति २ १४ ६ **अपाऽवपः**=दूरे प्रक्षिप १ १३३ ४ [अप+डुवप् बीजसन्ताने (भ्वा०) धातोर्लङ्]

अपाऽऽवः आवृणोति ३ ५ १. दूरीकरोत्युद्घाटयति, प्र०—अत्र पुरुषव्यत्यय लडर्थे लुङ् 'बहुल छन्दसि' इत्याडभावश्च १ ११ ५. निवारयति १.११३ १४ **अपावृणोत्**=दूरीकरोति ३ ४४ ५ अपवृणोति १ १३० ३ आच्छादयति ४.२८ १ **अपावृणोः**=दूरीकर्त्तुं वृणु १ ५१.३ अपवृणुया १ १३२ ४. दूर वृणुया १ ५१ ४ **अपावृत**=दूरीकुर्वन्ति ५ ४५ १ [अप+वृञ् वरणे (स्वा०) धातो सामान्ये लुङ्। 'मन्त्रे घसह्वरणशवृ०' सूत्रेण लेर्लुक् छान्दस आटागम अपावृणोत्=अप+वृञ् वरणे+लङ् अपावृत अप+वृञ् वरणे+लुङ्]

अपावृतम् दानाय भोगाय वा प्रसिद्धम् (राध =धनम्) १.५७ १ [अप+आङ्+वृञ् वरणे धातो क्त प्रत्यय]

अपाऽसेधत् अपसेधते ६ ४७ २१ **अपाऽसेधः**=निवारयतु ५ ३१ ७ [अप+षिधु गत्याम् (भ्वा०) धातोर्लुङ्]

अपाऽस्य दूरीकुरु ३ २४ १ [अप+अस् क्षेपणे (दिवा०) धातोर्लोटि मध्यमैकवचने रूपम्]

अपांसि न्याय्यानि कर्माणि १.६८ ३ [अपस् इति कर्मनाम, तस्य प्रथमाद्वितीययोर्बहुवचने रूपम्]

अपाः पिव ३ ५३ ६ **अपिवत्**=पिवति, प्र०—अत्र लडर्थे लङ् १ ३२ ३. पिवेत् ३ ४८.४ गृह्णीयात् १९ ७५. **अपिप्रः**=पिबे ५ २९.११ पिव ४ ३५ ७ पिबसि ३ ३२ १० पिबति ३ ३२ ९ पी चुके हो ७ ३५

अपुः=पिबन्ति १ १६४ ७. पिबन्तु २१.६०. [पा पाने (भ्वा०) धातोर्लुङ् । सिचो लुक् 'गातिस्थाघु०' इत्यादिसूत्रेण । 'अपिबत्, अपिब.' इत्येनयोर्लङ्]

अपाः पाहि ६ ६६ १ [पा रक्षणे (अदा०) धातोर्लुङ् छान्दसत्वात् सिचो लुक्]

अपि निश्चयार्थे १ १४०.७ पदार्थसम्भावनायाम् ७ ३८ ३ निश्चय करके स० वि० ११०, १.१७६.१ भी स० वि० १६८, १४ २ २६, १ १२१ १३ कुछ भी प० वि० [अपीति ससर्गम् नि० १ ३]

अपिकक्षे पार्श्वे ४ ४० ४ निश्रितपार्श्वाऽवयवे ६ १४ [अपि+कप हिसार्थे (भ्वा०) धातो 'वृतृ-कपिभ्य' उ० ३.६२ सूत्रेण स प्रत्यये रूपम् । कक्षो गाहते क्स इति नामकरण । स्यातेर्वाऽनर्थकोऽभ्याम । किमस्मिन् स्यानमिति वा । कषतेर्वा तत्सामान्यान्मनुष्य कक्षो वाहुमूलसामान्यादश्वस्य नि० २ २]

अपिकक्ष्यम् कक्षासु विद्याप्रदेशेषु भवा बोधा कक्ष्यास्तान् प्रति वर्त्तते तत् (त्वाष्ट्रम्=विज्ञानम्) १ ११७ २२. [कक्ष्या रज्जुरश्वस्य नि० २ २ कक्ष्या प्रकाशयन्ति कर्माणि नि० ३ ६ अपि+कक्षाप्राप्ति० भवार्थे यत्]

अपिकर्णे आच्छादितश्रोत्रे ६ ४८ १६. [अपिहितौ कर्णौ यस्येति वहुव्रीहौ 'प्रादिभ्यो धातुजस्य०' अ० २ २.२४ वार्त्तिकेनोत्तरपदलोप]

अपिजाय निश्चयेन जायमानाय (विजयाय) ६ २० स्वीकाराय १८ २८ उत्पन्नाय (गृहाय) २२ ३२ [अपि+जनी प्रादुर्भावे (दिवा०) धातोर्ड. प्रत्यय]

अपिजुवा प्रेरके (उपासानक्ता=अहोरात्रे) २.३१ ५ [अपि+जु गतौ (सौत्रो धातु) धातो. 'क्विप् वचिप्रच्छिश्रि०' उ० २ ५७ सूत्रेण क्विप्]

अपिदधामि प्रक्षिपामि ११.७७ [अपि+डुधाञ् धारणपोषणयो (जु०) धातोर्लट्]

अपिधानवन्तम् आच्छादनयुक्तम् (विद्यैश्वर्यवन्त विद्वज्जनम्) ५ २६ १२ [अपि+डुधाञ् धारणपोषणयोर्धातोर्ल्युट् । ततो मतुप्]

अपिधाना अपिधानानि मुखाच्छादनानि १ १६२ १३ आवरणानि १.५१ ४ आच्छादनानि (पात्राणि) २५ ३६. [अपि+डुधाञ् धारणपोषणयो (जु०) धातो करणे ल्युट्]

अपिधीन् सद्गुणधारकान् दु.खाऽऽच्छादकान् (विद्वज्जनान्) १ १२७ ७ [अपि+डुधाञ् धारणपोषणयो (जु०) धातो 'उपसर्गे घो किरि' ति कि प्रत्यये आल्लोपे रूपम्]

अपिन्वत् सेवते १ ६२ ६ सेवेत सिञ्चेत वा ४.१६ ७ **अपिन्वतम्** जलादिभि. सिञ्चतम् १ ११७ २० सेवन करो १ ११८ ८. **अपिन्वम्** सेवे ४ ४२ ४ **अपिन्वः** पिन्व २ ११ २. [पिवि सेवने (भ्वा०) धातोर्लङ्]

अपिन्वत् सिञ्चति सेवते वा ३ ५५ १३ विद्या और उपदेश से सयुक्त किया करो स० वि० १६८, १० ७२ ७ [पिवि सेवने (भ्वा०) धातोर्लङ् । व्यत्ययेनात्मनेपदम्]

अपिप्रत पूरयेत् ५ ३४ २ [पॄ पालनपूरणयो (जु०) धातोर्णिचि लुडि रूपम्]

अपिप्राणी निश्चितप्राणवलप्रदा (वेदविद्या) १ १८६. ११ [अपि+प्र+अन प्राणने (अदा०) धातो 'हलश्च' इति करणे घञ् ततो मत्वर्थे 'छन्दसीवनिपावि' ति ईकारप्रत्यय]

अपिप्रियम् प्रीणामि प्र०—ण्यन्ताल्लुङ् प्रयोगोऽयम् २६ ७ [प्रीञ् तर्पणे कान्तौ (क्रया०) धातोर्णिचि लुडि च्लेश्चडि रूपम्]

अपिमृष्ठाः अपिसहे, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् ३ ३३.८. [अपि+मृष तितिक्षायाम् (दिवा०) धातोर्लङ् विकरणव्यत्ययेन श्यनो लुक् अडभावश्च]

अपियन्तम् म्रियमाणम् (विद्वज्जनम्) १ १६२ २०. योऽप्येतितम् (आत्मानम्=स्वस्वरूपम्) २५ ४३. [पि गतौ (तुदा०) धातो शतृ तत्प्रतिपेधेऽगतिशीलम् अथवा अपि+इण् गतौ धातो शतृ]

अपियन्ति प्राप्नुवन्ति ३४ ११ [अपि+इण् गतौ (अदा०) धातोर्लटि प्रथमबहुवचने रूपम्]

अपिरिप्ताय सकलविद्योपचयनाय (कण्वाय=मेधाविने), प्र०—अत्र लिपधातोर्निष्ठा, कपिलकादित्वाल्लत्वविकल्प १ ११८ ७ [अपि+लिप उपदेहे (तुदा०) धातो क्त प्रत्यय लकारस्य रेफ]

अपिवातयन्तः शीघ्र गमयन्त (विद्वज्जना) १.१६५.१३. [अपि+वात करोतीति विग्रहे 'तत्करोति०' वार्त्तिकेन णिच् ततश्शतृप्रत्यय]

अपिवृतम् सुखवलैर्युक्तम् (अनीक=सैन्यम्) १ १२१ ४. आच्छादितम् २ ११ ५ [अपि+वृञ् आवरणे (चु०) धातोः क्त णेर्लुक् च]

अपिशर्वरे निश्चिते रात्रावन्धकारे ३ ६ ७ [अपि+शॄ हिंसायाम् (क्रया०) धातो. 'कॄगॄशॄवृञ्०' उ० २ १२१.

सूत्रेण ष्वरच् प्रत्यय शृणाति हिनस्ति प्रकाशमिति विग्रह द्वादशस्तोत्राण्यपि शर्वराणि ऐ० ४ ६ अपि शर्वराणि खलु वा एतानि छन्दासि ऐ० ४ ५ तद्यदपि शर्वर्या अपि स्मसीत्यब्रुवस्तदपि शर्वराणामपि शर्वरत्वम् गो० २ ५ १ शर्वरी वै नाम रात्रि जै० १ २०६]

अपिस्थितम् स्थिर हुए (विद्वान्) को १ १४५ ४ [अपि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त 'द्यतिस्यति०' इतीकारादेश]

अपिहितम् आच्छादितम् (विल=गर्त्तम्) १ ३२ ११ **अपिहितानि**=आच्छादितानि (अश्वा=भोक्तव्यानि वस्तूनि) ४ २८ ५ **अपिहितेव**=आच्छादितानीव (खानि=इन्द्रियाणीव) ४ २८ १ [अपि+डुधाञ् धारणपोषणयो (जु०) धातो क्त 'दधातेर्हिरि' ति धातोर्हिरादेश]

अपिंशत् अवयवयति २६ ३४ **अपिंशत**=अवयवीकुरुत १ ११० ८ विभक्तान् कुरुत १ १६१ ६ अवयवयन्ति, प्र०—अत्र 'बहुल छन्दसि' इति शब्विकरणोऽपि ३.६० २ **अपिंशन्**=साऽवयवान् कुर्वन्ति ४ ३३ ४ [पिश अवयवे (तुदा०) धातोर्लङ् मुचादित्वान् नुमागम अपिंशत् अकरोत् नि० ८ १४]

अपीच्यम् येऽप्यञ्चन्ति प्राप्नुवन्ति तेषु साधुम् (प्रकाशरूप व्यवहारम्) १ ८४ १५ स्वगुणैर्निश्चितम् (नाम=आख्या), प्र०—अपीच्यमिति निर्णयाऽन्तर्हितनाम निघ० ३ २५, २ ३५ ११ **अपीच्येन**=येनाऽयमञ्चति तत्र भवेन (सहसा=बलेन) ७ ६० १० [अपीच्यमिति निर्णीतान्तर्हितनाम निघ० ३ २५ अपीच्यमपचित, अपगतम्, अपहितम् अन्तर्हित वा नि० ४ २४]

अपीजुवा प्रेरके (उपासानक्ता=प्रत्यूपरात्र्यौ) २.३१.५ [अपि+जु गतौ (सौत्रो धातु) धातो क्विप् दीर्घश्च 'क्विप् वचिप्रच्छया०' वार्त्तिकेन]

अपीतम् अपि सयोगे इत प्राप्तम् (पाथ=अन्नम्), प्र०—अपीति ससर्ग प्राह निरु० १ ३, २ १७ [अपि+इण् गतौ+क्त]

अपीतेः विनाशनात् १ १२१ १० [अपि+इण् गतौ (अदा०) धातो स्त्रिया क्तिन्]

अपीत्य निश्चयेन प्राप्य २ ४३ २ निश्चय से प्राप्त होके आर्याभि० १ ५२ [अपि+इण् गतौ धातो क्त्वा। क्त्वो ल्यप् समासे]

अपीपयन्त प्याययन्ति ७ ३६ ३ [ओप्यायी वृद्धौ (भ्वा०) धातोर्यङ् 'लिङ्यङोश्च' अ० ६ १ २६ सूत्रेण पी आदेशे लङि रूपम्]

अपीव समुच्चिता इव ३ ३८ ८ अतीव ७ १८.६ [अपि+इव]

अपीवृतम् आच्छादितम् (अहिं=मेघम्) २ ११ ५ [अपि+वृञ् आवरणे (चु०) धातो क्विप् 'नहिवृतिवृषि०' अ० ६ ३.११६ सूत्रेण दीर्घ]

अपीवृताः ये निश्चयेन वर्त्तन्ते (विद्वज्जना) १ १६० ६ [अपि+वृञ् वरणे (स्वा०) धातो क्त प्रत्यय 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घ]

अपीहि निश्चयेन प्राप्नुहि जानीहि वा ८ ५० [अपि+इण् गतौ (अदा०) धातोर्लोट् 'सेर्ह्यपिच्चे' ति हिरादेश]

अपुपोत् पवित्र कुर्यात् ३ २६ ८ [पूञ् पवने (क्रया०) धातोर्यङ्लुकि, अभ्यासस्यागुणत्वे रूपम्]

अपुनन् पवित्र करती है ३ २ ६ [पूञ् पवने (स्वा०) धातोर्लङ् 'प्वादीना ह्रस्व' इति ह्रस्व]

अपुरुषघ्नः य पुरुषान् न हन्ति स (शूरो जन.) १.१३३ ६ [पुरुष+हन हिंसागत्यो (अदा०) धातो 'कृत्यल्युटो बहुलम्' इति बहुलवचनाट् टक् नञ्समास]

अपुष्पाम् कर्मोपासनाऽनुष्ठानाऽऽचार-विद्यारहिताम् (वाचम्) ऋ० भू० ३१७, १० ७१ ५ साधनरूप पुष्पो से रहित (वाणी) प० वि०। **अपुष्पा**=पुष्परहिता (ओषधय.) १२ ८६ [अपुष्पाम्=अपुष्पा वाग् भवतीति वा, किञ्चित् पुष्पफलेति वा अर्थ वाच पुष्पफलमाह याज्ञदैवते पुष्पफले देवताध्यात्मे वा नि० १ २०]

अपूपम् पुआ ३.५२ ७. [नञ्उपपदे पूञ् पवने (क्रया०) धातोर्बाहुलकात् प प्रत्यय इन्द्रियमपूप ऐ० २ २४]

अपूपवन्तम् प्रशस्ता अपूपा विद्यन्ते यस्य तम् (आप्त विद्वासम्) ३ ५२ १ सुष्ठु सम्पादिताऽपूपसहितम् (अन्नरसादिकम्) २० २६. [अपूपप्राति० प्रशसार्थे मतुप्]

अपूर्वम् अनुत्तमगुणकर्मस्वभावम् (मन) ३४ २. अपूर्वसामर्थ्ययुक्त (मन) स० प्र० २४६, ३४ २

अपूर्व्यम् अपूर्वेषु दिव्येषु गुणेषु कुशलम् (राजानम्) ३ १३ ५ अपूर्वे भवम् (उदकम्) ५ ५६ ५ **अपूर्व्यः**=पूर्वैः कृत पूर्व्यो न पूर्व्योऽपूर्व्य (सभेश) १ १३४ ६ **अपूर्व्या**=न पूर्वैः कृता (उपा), प्र०—अत्र 'पूर्वैः कृतमिनियौ च, अ० ४ ४ १३४ अनेनाऽय सिद्ध १ ४६ १ न विद्यते पूर्वो यस्मात् सोऽपूर्वस्तत्र भवानि (वचासि=वचनानि) ६ ३२ १ [पूर्व-

प्राति० कृतार्थे 'पूर्वैः कृतमिनियौ च' अ० ४ ४ १३४ सूत्रेण य प्रत्यय नञ्समास]

अपृच्छत पृच्छन्तु १ १६१ ४ **अपृच्छम्**=पृच्छेयम् ५ ३० २ [प्रच्छ ज्ञीप्सायाम् (तुदा०) धातोर्लङ्]

अपृच्यन्त पृच्यन्ति १ ११० ४ पृची सम्पर्चने (अदा०) धातोर्लङ्, विकरणव्यत्ययेन श्यन्]

अपृणक् तर्पयेत् ४ १६ ७ **अपृणत्**=तर्पयति २ २२ २ पृणाति व्याप्नोति ३३ ७५ पूरयति ३ २ ७ प्रपूरयेत् ३ ३४ १ [पृची सम्पर्के (रुधा०) धातोर्लङ् धातूनामनेकार्थत्वात् तर्पणपूरणयोरपि]

अपृणः पुप्णीया ३ ३ १० **अपृणाः**=पिपर्त्ति ३.६ २ पूरय ७ १३ २ **अपृणात्**=पृणाति पालयति ४ १८ ५ [पॄ पालनपूरणयो (क्रया०) धातोर्लङ् 'प्वादीना ह्रस्व' इति ह्रस्व]

अपृणतः अपालयत (दुष्टान् जनान्) ५ ७ १० दु खदातुर्दुर्जनात् ६ ४४ ११ [नञ्युपपदे पॄ पालनपूरणयो (क्रया०) धातो शतरि द्वितीयाबहुवचने]

अपृणन्तम् धर्मेणाऽपुष्यन्तमन्यानपोपयन्तम् (जनम्) १ १२५ ७ **अपृणन्तः**=अपूर्णा अपालयन्तो वा (अविद्वज्जना) ५ ४२ ६ [नञ्युपपदे पॄ पालनपूरणयो (क्रया०) धातो शतृप्रत्यय]

अपृतन्यत् आत्मन पृतना युद्धमिच्छतीति (मेघ), प्र०—अत्र 'कव्यध्वरपृतनस्य०' अ० ७ ४ ३६. इत्याकारलोप १.३२ ७ [पृतना मनुष्यनाम निघ० २ ३ सग्रामनाम-निघ० २ १७ तत आत्मन इच्छाया क्यच् । 'कव्यध्वर पृतनस्य०' अ० ७ ४ ३६ सूत्रेणाकारलोप ततो लङ्]

अपेक्षन्ते समालोकन्ते १७ ६८ [अप+ईक्ष दर्शने (भ्वा०) धातोर्लट्]

अपेजते कम्पते ५ ४८ २ [अप+एजृ कम्पने (भ्वा०) धातोर्लट् एजति गतिकर्मा निघ० २ १४]

अपेत त्यजत १२ ४५ [अप+इण् गतौ (अदा०) धातोर्लोटि मध्यमबहुवचने]

अपेशसे अविद्यमान पेश सुवर्ण यस्य तस्मै नराय २६ ३७. दारिद्र्यविनाशाय ऋ० भू० ३०८ निर्धनता-दारिद्र्यादिदोषविनाशाय १ ६ ३ [पिश अवयवे (तुदा०) धातोरसुन् प्रत्यय । पेश हिरण्यनाम निघ० १ २ पेश रूपनाम निघ० ३ ७ पेश इति रूपनाम, पिशतेर्विपिशित भवति निघ० ८ ११ ततो नञ्बहुव्रीहि]

अपैति दूर गच्छति १ १२४ ८. प्राप्नोति १ १२३ ७ [अप+इण् गतौ (अदा०) धातोर्लट्]

अपो दूरीकरणे ३५ ११.

अपोच्छत् अपराद्धु विवासयति १ ४८ ८ [अप+उच्छी विवासे (भ्वा०) धातोर्लेट्]

अपोदकाभिः अपगत उदकप्रवेशो यासु ताभि (नौभि) १ ११६ ३ अपगत दूरीकृतं जललेपो यासा ताभि. सचिवक-णाभि (नौभि) ऋ० भू० १६० [अप-उदकपदयोर्बहु-व्रीहि 'प्रादिभ्यो धातुजस्य०' वार्त्तिकेनोत्तरपदलोपश्च]

अपोर्णु दूरमाच्छादय १६ ५३ **अपोतेर्णु**=दूरीकर्त्तु-माच्छादयति १ ६२ ४ उद्घाटयति, प्रकाशयति, आच्छादक-मन्धकार निवारयति १ १५६ ४ आच्छादयति २ ३४ १२. [अप+ऊर्णुञ् आच्छादने (अदा०) धातोर्लोटि लटि च रूपाणि हेर्लोपश्छान्दस]

अपोर्णुवन्तः निवारयन्त (सूर्यकिरणा) ४ ४५ २. अविद्यादिदोषैरनावरन्त (विद्वज्जना) १ १६० ६ [अप+ ऊर्णुञ् आच्छादने (अदा०) धातो शतृप्रत्यय]

अपोवसानाः जलपात्राच्छादिता. (हरय =अग्न्या-दयोऽश्वा) ऋ० भू० १६८ [अप जलनाम निघ० १ १२ वस आच्छादने (अदा०) धातो शानचि वसान तत समास]

अपोसुव दूर प्रेरय ३५ ११ [अपो=दूरीकरणे पुप्रसवैश्वर्ययो (भ्वा०) धातोर्लोट् व्यत्ययेन श प्रत्यय]

अपोहते अपसा सुवर्णेन प्राप्ते, भा०—सुवर्णादियुक्ते गृहे, प्र०—आप इति हिरण्यनाम निघ० १ २, २६ २६ [आप =हिरण्यम् हन हिंसागत्यो (अदा०) धातोर्गत्यर्थात् क्त-प्रत्यये हतम् तत समास]

अपोहामि दूर विविधतर्केण क्षिपामि २ १५ वर्जन-तया विविधा शिक्षा करोमि २ १५ [अप+ऊह वितर्के धातोर्लट् 'उपसर्गादस्यत्यूह्योर्वा वचनम्' इति वा परस्मैपदम्]

अप्तुरम् योऽप प्राणान् जलानि वा तोरयति प्रेरयति तम् (अग्निं=विद्वज्जनम्) ३ २७ ११ प्राणप्रेरकम् (इन्द्र=राजानम्) ३ ५१ २. **अप्तुरः**=मनुष्याणामप प्राणान् तुतुरति विद्यादिबलानि प्राप्नुवन्ति प्रापयन्ति च ते (विश्वेदेवा =समस्ता विद्वज्जना), प्र०—अय शीघ्रार्थस्य तुरे क्विबन्त प्रयोग १ ३ ८ अप्स्वन्तरिक्षे त्वरन्ति ते (आशव =अश्वा) १ ११८ ४ प्राप्नुवन्त (मनीषिणो-जना) २ २१ १५ [अप इति निघण्टौ कर्मनाम, उदकनाम च, तस्मिन्नुपपदे तुर त्वरणे (जु०) धातोर्णिजन्तात् क्विप् णेर्लोप पर्णशुपिवत्]

अप्तुः व्यापक (मनुष्य) ५ ३५. [आप्नोति व्याप्नोति

सर्वान् पदार्थान् इति विग्रहे आप्लृ व्याप्तौ धातो 'आप्नोतेर्ह्रस्वश्च' उ० १ ७५ सूत्रेण तु प्रत्ययो धातोर् ह्रस्वश्च प्रजा वा अप्तुरित्याहु गो० उ० ५ ६]

आप्तूर्यम् कर्माऽनुष्ठानाय त्वरितव्यम् (अविरोधनम्) ३ १२ ८ [अप इति कर्मनाम । निघ० २ १. तुर त्वरणे (जु०) धातोर् ण्यत् 'हलि चे' ति दीर्घ]

आप्तूर्ये अपोभि कर्मभि प्रेरयितव्ये (व्यवहारे) ३ ५१ ६ ['आप्तूर्यम्' पदवत्]

अप्त्यस्य आप्तौ विस्तीर्णे ससारे भवस्य (किरणसमूहस्य) १.१२४ ५ [आप्लृ व्याप्तौ धातो 'आप्नोतेर्ह्रस्वश्च' उ० १ ७५ सूत्रेण तु प्रत्ययो ह्रस्वश्च । ततो भवार्थे यत् उकारलोपश्छान्दस]

अप्नवानः येऽप्नान् विद्यासन्तानान् कुर्वन्ति ते (अन्व०—विद्वांस) प्र०—अत्र अप्न इत्यस्मात् 'तत्करोति तदाचष्टे' अ० ३.१ २६ इत्यनेन वार्तिकेन करोत्यर्थे णिच्, ततो 'अन्येभ्योऽपि दृश्यन्ते, इति वनिप् 'अप्न' इति अपत्यनामसु पठितम् निघ० २ २, ३ १५ रूपवन्त (विद्वज्जना), प्र०—अत्र 'छान्दसो वर्णलोप' इति मतोस्तलोपः 'अप्न इति रूपनाम' निघ० ३ ५, १५ २६ पुत्रपौत्रादियुक्ता (भृगव = मनुष्या) ४ ७ १ सुसन्तानयुक्ता सुशिष्या ३३ ६ [आप्लृ-व्याप्तौ धातो' 'आप कर्माख्यायां ह्रस्वो नुट् च वा' उ० ४ २०८ सूत्रेणासुन् प्रत्यये 'अप्न.' रूपम् आप्यते सुख येनेति विग्रह ।अप्न कर्मनाम निघ० २.१ अपत्यनाम निघ० २ २ रूप नाम निघ० ३ ७ अप्न प्राति० 'तत्करोति' वार्तिकेन णिच् ततो वनिप् प्रत्यये प्रथमावहुवचने रूपम् अथवा अप्नप्राति० मतुप् तकारलोपश्च अप्नवाना वाहुनाम निघ० २.४]

अप्नःस्थः अपत्यस्य (विद्याशिक्षासुबोध) ६.६७ ३. [अप्न इत्यपत्यनाम निघ० २ २. तस्मिन्नुपपदे 'सुपि स्थ.' इति क. प्रत्यय]

अप्नस्वतिषु प्रशस्तमप्नोऽपत्य विद्यते यासा तासु (वाणीषु) १ १२७ ६ **अप्नस्वतीम्**=प्रशस्ताऽपत्ययुक्ताम् (वाचम्=वाणीम्) १ ११२.२४ प्रशस्तान्यपासि कर्माणि विद्यन्ते यस्यास्ताम् (वाणी प्रज्ञा वा) ३४ २६ [अपत्यार्थक-अप्नस् प्राति० मतुप् 'मादुपधायाश्च०' अ० ८ २ ६ सूत्रेण मकारस्य वकार 'तसौ मत्वर्थे' इति भसज्ञाया पदसज्ञावाचनाद् रुत्व न स्त्रिया डीप् ह्रस्वश्च]

अप्नः अपत्यम् १ ११३ २० [अप्न पदनाम निघ० ४ ३ अप्न इति रूपनाम आप्नोतीति मत निघ० ३ ११. अपत्यनाम निघ० २ २]

अप्यम् अप्सु प्राणेषु भवाम् [भागम्=अशम्) २ ३८.७

अप्यः अप्सु सत्कर्मसु भव (सत्पुत्र) ६ ६७ ६. योऽपोऽर्हति (विद्यार्थी) १ १४५ ५ **अप्यानि**=अप्सु भवानि (पुरीषाणि=उदकानि) ६ ४६ ६ **अप्याः**=अप्सु भवा नौयायिनो मुक्ताद्या पदार्था वा ७ ३५ ११ अप्सु अन्तरिक्षे भवा (दिव=ज्योतीषि) ३ ५६ ५ अप्सु भवा. (पदार्था) ६.५०.११ **अप्येभिः**=अप्सु भवै (मेघजलै) ४ ५५.६ [आप्लृ व्याप्तौ धातो 'आप कर्मा०' उ० ४ २०८ सूत्रेणासुनि 'अप.' । ततो भवार्थे यत् प्रत्यय । अप्सु शृतम् अद्भि सस्कृतमिति वा नि० ११ ३६ अप्या उदकानि निघ० ११.३६]

अप्येतु निश्चयेनैतु ८ ६१ [अपि+इण् गतौ (अदा०) धातोर्लोट्]

अप्रकेतम् रात्रिरूप मे जानने के अयोग्य (जगत्) स० प्र० २०७, १०.१२६ ३ [प्र+कि ज्ञाने धातोर्बाहुलकात् तन् । केत इति प्रज्ञानाम निघ० ३ ६ नञ्समास]

अप्रक्षितम् यन्न प्रक्षीयते तत् (वसु=धर्म) १ ५५ ८ [प्र+क्षि क्षये (भ्वा०) धातो क्त नञ् समास]

अप्रचेताः विद्याविज्ञानरहित (शत्रुजन.) १ १२० १. [चेत इति प्रज्ञानाम निघ० ३ ६ चिती सज्ञाने धातोरसुन् तत्प्रतिषेध.]

अप्रच्युतानि अविनश्वराणि (व्रतानि=सत्यभाषणादीनि) २.२८ ८ [प्र+च्युङ् गतौ (भ्वा०) धातो क्त. नञ्समास]

अप्रजाः अविद्यमाना प्रजा येषान्ते (अत्रिण = शत्रव] १.२१ ५ [प्रोपपदे जनी प्रादुर्भावे (दिवा०) धातो 'उपसर्गे च सज्ञायाम्' अ० ३ ३ ६६ सूत्रेण ड प्रत्यय नञ्बहुव्रीहि]

अप्रति अप्रतीतानि यथा स्यात्तथा १ ५३ ६ अप्रत्यक्षेऽपि ७ २३ ३ **अप्रतीनि**=अप्रतीतानि (वृत्रा=मेघावयवान्) ४.१७ १६ अप्रतीतान्यपि (पुराणि=दुर्गुणानि) ६.३१ ४ अविद्यमाना प्रतीति. परिमाण येषान्तानि (घनानि) २.१६ ४]

अप्रतिधृष्टशवसम् न प्रतिधृष्यते शवो वल यस्य तम् (इन्द्र=प्रजासेनापतिम्) १ ८४ २ धृष्ट प्रगल्भ शवो वल येन तम्प्रतीति (इन्द्र=सेनारक्षकम्) ८ ३५. [प्रतिधृष्ट= प्रति+ञिधृषा प्रागल्भ्ये धातो क्त. शव इति वल-

नाम निघ० २ ९ ततो नञ्बहुव्रीहि]

अप्रतिधृष्याय अधर्षितु योग्यान् प्रति वर्त्तमानाय (वाताय=वायुवेगगतिविज्ञानाय) ३८ ७. [प्रति+निधृषा प्रागल्भ्ये धातो 'ऋदुपधाच्चा०' अ० ३ १ ११० सूत्रेण क्यप् नञ्समास]

अप्रतिपदम् अनिश्चितबुद्धिम् (दुष्टजनम्) ३० ८. [पद पद प्रतीति वीप्सायामव्ययीभाव । ततो नञ्समास]

अप्रतिष्कुतम् इतस्ततो लोकान्तरस्याऽभितो भ्रमणरहितम् (अग्नि=वह्निम्) ३ २ १४ **अप्रतिष्कुतः**=सत्यभाव-निश्चयाभ्या याचितोऽनुगृहीता स्वकक्षा विहायेतस्ततो ह्यचलितो वा (इन्द्र =ईश्वर सूर्यो वा) १ ७ ८ असञ्चलितो ऽविस्मृतो वा (इन्द्र =परमेश्वर सूर्यो वा) प्र०—यास्काऽऽचार्योऽस्यार्थमेवमाह—अप्रतिष्कुतो अप्रतिकृतोऽप्रतिस्खलितो वेति, निरु० ६ १६, १ ७ ६ अकम्पितो दृढ (मनुष्यगण) ५ ६ १३ इतस्तत कम्परहित (राजा) ७.३२ ६ असञ्चलित (इन्द्र.=सभाद्यध्यक्ष) १ ८४ ७ [नञ्+प्रति+कृञ् हिंसाया (स्वा०) धातो क्त सुडागमश्च स्खल सञ्चलने (भ्वा०) धातोर्वा क्त प्रत्यये धातो 'स्कु' आदेश अप्रतिष्कुतो ऽप्रतिष्कृतो ऽप्रतिस्खलितो वा । नि० ६ १६]

अप्रतिः अविद्यमाना प्रति प्रतीतिर्यस्य स (विद्वज्जन) ५ ३२ ३ [नञ्+प्रति+इण् गतौ+क्तिन् । पृषोदरादित्वात् तिलोप]

अप्रती अप्रतीतानि (वर्पांसि=सुन्दराणि रूपाणि) ६.४४ १४ [नञ्+प्रति+इण् गतौ+क्तिन् । पृषोदरादित्वात् 'ति' शब्दस्य लोप]

अप्रतीत ! यो न प्रतीयते तत्सम्बुद्धौ (शूर जन) १.१३३ ६ **अप्रतीतम्**=अदृश्यम् (अश्व=विद्युदग्निम्) १ ११७.९ अप्रज्ञातम् (सह =बलम्) ४ ४२ ६ यश्चक्षुरादीन्द्रियैर्न प्रतीयते तमगोचरम् १ ३३ २ अधर्मिभिरप्राप्तम् (बलम्) ५.३३ ७ **अप्रतीतस्य**=प्रतीत्यविषयस्य (राज्ञ) ५ ४२ ६ **अप्रतीतः**=य शत्रुभिरप्रतीयमान (महान् राजा) ६ ७३ ३ अप्रत्यक्ष (विद्युदग्नि) ५ ३२.८. शत्रुभिरपराजित (राजा=नृपति) ४ ५० ९ शत्रुभिरज्ञात (इन्द्र =राजा) ६ २०.९. प्रसिद्धिमप्राप्त. (इन्द्र =विद्युद्रूपोऽग्नि) ३.४६ ३ **अप्रतीता**=अप्रतीतगुणी (होतृयजमानौ) ८.५९ [नञ्+प्रति+इण् गतौ (अदा०) धातो क्त]

अप्रथतम् प्रख्यापयतम् ६ ६९ ५ प्रथेयाथाम् ६ ७२.२ **अप्रथन्त**=प्रथयन्ति ७ ३३ ६. **अप्रथयः**=प्रथय १ ६२.५. **अप्रथिष्ट**=प्रथताम् २ ११ ७ = **अप्रथेताम्**=प्रख्याते भवेताम् १७ २५ [प्रथ प्रख्याने (भ्वा०) धातोर्लङ्]

अप्रदुग्धाः न केनाऽपि प्रकर्षतया दुग्धा (धेनव = वाच) ३ ५५ १६ जो किसी ने दुही न हो वे (धेनव = गौवे) स० प्र० ११०, ३ ५५ १६ [नञ्+प्र+दुह प्रपूरणे (अदा०) धातो क्त]

अप्रहृषितः न प्रमोहित (विद्वज्जन) १ १४५ २. [नञ्+प्र+दृप हर्षणमोहनयो (दिवा०) धातो क्त]

अप्रमादम् प्रमादरहितम् ३४ ५५ [नञ्+प्र+मदी हर्षे (दिवा०) धातोर्भावे घञ् 'प्रमदसम्मदौ हर्षे' निपातनाद् हर्षादन्यत्र घञ् । अप्रमादम्=अप्रमाद्यन्त नि० १२.३७]

अप्रमूराः मूढत्वरहिता धार्मिका (सज्जना), प्र०—अत्र वर्णव्यत्ययेन टस्य स्थाने रेफादेश १ ९० २ [नञ्+प्र+मुह वैचित्ये, वैचित्यमविवेक तत क्त, हस्य ढत्वे धत्वे ष्टुत्वे ढलोपे पूर्वस्य दीर्घे रूपम्]

अप्रमृष्यम् अविचारणीयम् (अर्थं=द्रव्यम्) ६ ३२ ५ सोढुमनर्हम् (शत्रुम्) २ ३५ ६ अप्रसह्यम् (दात्र=दानम्) ६ २० ७ शत्रुओं को सहने के अयोग्य (ब्रह्मचर्य से प्राप्त हुए शरीरात्मबलयुक्त देह को) स० वि० १०४, २ ३५ ६ **अप्रमृष्यः**=परैर्न प्रमर्षणीय (अग्नि =विद्वान्) ४ २ ५ [नञ्+प्र+मृष तितिक्षायाम् (दिवा०) धातो 'ऋदुपधाच्चा०' सूत्रेण क्यप्]

अप्रयावम् प्रयुवन्त्यन्याय यस्मिन् स प्रयावो, न विद्यते प्रयावो यस्मिन् गृहाश्रमे तम् ११ ७५ [प्र+यु मिश्रणे (अदा०) धातोरधिकरणे 'हलश्चे' ति घञ् । नञ्समास]

अप्रयुच्छद्भिः प्रमादरहितैर्विद्वद्भि (जनै) १ १४३ ८

अप्रयुच्छन्=प्रमादमकुर्वन् (सज्जन) ५ ८२ ८ अप्रमाद्यम्, अन्व०—प्रमाद विहाय (अग्नि =पावक इव सेनापति) १५ ५२ अप्रविवासयन् (अग्नि = विद्वज्जन) ५.४ प्रमादमकुर्वन् अप्रमाद्यन् वा (अग्नि = पावक) ४ १४ [प्र+युच्छ प्रमादे (भ्वा०) धातो शतृप्रत्यय]

अप्रयुत्वभिः अविभक्तै (शुभगुणै) ६ ४८ १० [प्र+युतृ भासने (भ्वा०) धातो क्वनिप् । नञ्समास धातूनामनेकार्थत्वादत्र विभागेऽपि]

अप्रवीता अगच्छन्ती (स्त्री) ४ ७ ९ **अप्रवीताः**=अव्याप्ता परिच्छिन्ना (प्रजा) ३ ५५ ५ [प्र+वी गतिप्रजनकान्त्यसनखादनेषु (अदा०) धातो क्त । नञ्समास]

अप्रशस्ता इव यथा न प्रशस्ता अप्रशस्तास्तथा वर्त्तमाना वयम् (ब्रह्मचारिण्य कुमार्य) २४१.१६ **अप्रशस्ताः**=प्रशस्तसुखरहिता (विशः=प्रजा) ४२८४ **अप्रशस्तान्**=निन्द्यकर्माऽऽचारिण (दुर्जनान्) १ १६७ ८ [प्र+शसु स्तुतौ (भ्वा०) धातो क्त । नञ् समास । शसति अर्चतिकर्मा निघ० ३ १४]

अप्रहणम् योऽन्यायेन कञ्चिन्न प्रहन्ति (इन्द्र=दुष्टाचारि-शत्रुविनाशक नृपम्) ६४४४ [प्र+हनहिंसागत्यो. (अदा०) धातो कर्त्तरि क्विप् नञ्समास । 'हन्तेरत्पूर्वस्य' अ० ८४२२ सूत्रेण णत्वम्]

अप्रायि पूर्यन्ते ३४३२ [प्रा पूरणे (अदा०) धातो कर्मणि लुङ् अप्रायि आपूपुर नि० ६ २७]

अप्रायु यन्न प्रैति नश्यति तत् (रयिं=धनम्) ५८० ३ **अप्रायुवः**=न विद्यते प्रगत प्रणष्ट आयुर्बोधो येषान्ते (देवा =विद्वज्जना) प्र०—'जसादिषु छन्दसि वा वचनम्' इति गुणविकल्पात् 'यडादिप्रकरणे तन्वादीना छन्दसि बहुलमुपसङ्ख्यानम्' इति वार्त्तिकेनोवङादेश १८६ १. अनष्टाऽऽयुष (देवा =विद्वज्जना) २५ १४ [प्र+इण् गतौ (अदा०) धातो 'छन्दसीण' उ० १ २. सूत्रेण उण् प्रत्यय नञ्समास । अप्रायुवो ऽप्रमाद्यन्त नि० ४ १६]

अप्रायुषे य प्रैति स प्रायुट् न प्रायुड् अप्रायुट् तस्मै (प्रजाजनाय) ११२७५ [प्रोपपदे इण् गतौ धातो 'एतेर्णिच्च' ० २११८ सूत्रेण 'उसि' प्रत्यय नञ्समास]

अप्राः प्रपूर्द्धि १५२१३ व्याप्नोति १२१३ पूरितवान् १११५१ प्राति व्याप्नोति ४५२५ पिपृहि ६२ प्राति पिपर्त्ति, प्र०—अत्र लडर्थे लुङ् ७४२ [प्रा पूरणे (अदा०) धातोर्लुङ् 'मन्त्रे घसह्वरणश०' अ० २४८० सूत्रेण लेर्लुक्]

अप्रियायत प्रिय इवाऽऽचरति ३५३९ ['प्रिय' इति सुबन्तात् 'कर्त्तुः क्यङ् सलोपश्च' अ० ३१११ सूत्रेण क्यङ् आचारेऽर्थे]

अप्वे याऽपवाति शत्रुप्राणान् हिनस्ति तत्सम्बुद्धौ (अन्व०—शूरवीरे राजस्त्रि क्षत्रिये !), प्र०—अत्र अपपूर्वाद्वाते 'अन्येभ्योऽपि दृश्यते' इति क्विप्, अकारलोपश्छान्दस १७४४ [अप+वा गतिगन्धनयो (अदा०) धातो क्विप् अपोऽकारलोपश्च छान्दस अप्वे अप्वा यदेनया विद्धोऽपवीयते व्याधिर्वा भय वा नि० ६ १२]

अप्सन्त प्राप्नुवन्तु, प्र०—अत्र प्साधातोर्लडि 'छन्दसयुभयथा, इत्यार्धधातुकत्वाद् 'आतोलोप इटि च' इत्याकारलोपश्च 'प्सानीति गतिकर्मा' निघ० २१४, ११००८ [प्सा भक्षणे (अदा०) धातोर् लट् व्यत्ययेनात्मनेपदम् धातूनामनेकार्थत्वादत्र गत्यर्थ आकारलोपश्चार्धधातुकत्वाद्]

अप्सरसः या अन्तरिक्षे जलादौ च सरन्ति गच्छन्ति ता, भा०—चेष्टाना जनका (आप =प्राणरूपा) १८४१ गन्धर्वाणा स्त्रिय ऋ० भू० १३६ या अप्सु व्याप्येषु प्राणादिपदार्थेषु सरन्ति गच्छन्ति ता (क्रिया) १८४३ या अप्सु प्राणेषु सरन्ति प्राप्नुवन्ति ता (दक्षिणा) १८४२ या अप्सवन्तरिक्षे सरन्ति गच्छन्ति ता (मरीचय.=किरणा) १८३९ या अप्सु सरन्ति ता (ओषधय) १८३८ आकाशगता किरणा १८४० अन्तरिक्षचराद्यायो ७३३१२ **अप्सरसाम्**=किरणादीनाम् २४३७. **अप्सरसौ**=येऽप्सु प्राणेषु सरन्त्यौ गच्छन्त्यौ ते (प्रधान दिशोपदिशे) १५१५ [अप+सृ गतौ धातो 'गत्तेरप्पूर्वादसि' उ० ४२३७ सूत्रेण असि प्रत्यय.। उपसर्गान्त्यलोपश्छान्दस अथवा 'अपम्' इति जलनाम, तेषु सरन्तीति विग्रहे=अप+सृ+असि अपोऽकारलोप अथवा न प्सान्ति भक्षयन्ति रक्षा कुर्वन्तीति विग्रहे=नञ्+प्सा भक्षणे (अदा०) धातोर् असि प्रत्यय प्रत्ययस्य रुडागमश्च, स्त्रीलिङ्गश्च अप्सरा अप्सारिणी, अपि वाऽप्स इति रूपनामाप्सातेरप्सानीय भवत्यादर्शनीय व्यापनीय वा स्पष्ट दर्शनायेति शाकपूणि 'यदप्स' इत्यभक्षस्य 'अप्सो नाम' इति व्यापिन तद्वा भवति रूपवती, तदनयात्तम् इति वा तदस्यै दत्तमिति वा नि० ५१३ गन्ध इत्यप्सरस (उपासते) श० १०५२२० तस्य (वातस्य) आपोऽप्सरस श० ६४.१ १०. तस्य (यज्ञस्य) दक्षिणा अप्सरस श० ६४१११ तस्य (चन्द्रमस) नक्षत्राण्यप्सरस श० ६४१६ तस्य (सूर्यस्य) मरीचयोऽप्सरस श० ६४१८ तस्य (मनस) ऋक्सामान्यप्सरस श० ६४११२ तस्य (अग्ने) ओषधयोऽप्सरस श० ६४१७ गन्धेन च वै रूपेण च गन्धर्वाप्सरसश्चरन्ति श० ६४१४ कि नु तेऽस्मासु (अप्सरस्सु) इति जै० उ० ३.२५८ सोमो वैष्णवो राजेत्याह तस्याप्सरसो विशस्ता इमा आसत इति युवतय शोभना उपसमेता भवन्ति श० १३.४३८]

अप्सवः कुरूपा (कृतघ्ना पुरुषा) ७४६ [अप्स इति रूपनाम निघ० ३७ ततो मत्वर्थे निन्दाया 'व प्रकरणेऽन्येभ्योऽपि दृश्यते' अ० ५२१९. वार्तिकेन व प्रत्यय]

अप्सः रूपम् प्र०—'अप्स इति रूपनाम' निघ०

३७, ११२४७ सुरूपम् ५८०७ न विद्यते परपदार्थ-स्याऽप्सो भक्षण यस्य स (सज्जन) १५३ [अप्स रूपनाम निघ० ३७ अप्स रूपाणि नि० ३५ अप्स इति रूप नामाप्सातेरप्सानीय भवत्यादर्शनीय, व्यापनीय वा, स्पष्ट दर्शनायेनि शाकपूणि 'यदप्स' इत्यभक्षम्य 'अप्सो नाम' इति व्यापिन नि० ५१३]

अप्साम् योऽप्सो जलानि सनुते तम् (सेनाद्यध्यक्षम्) १९१२१ योऽप्सो जलानि प्राणान् सनोति ददाति तम् (राजान सेनापतिं वा) ३४२० सत्कर्मणा विभक्तारम् (वीर=शूरपुरुषम्) ६१४४ [अप् उपपदे पण् सम्भक्तौ धातो 'जनसनखन०' अ० ३२६७ सूत्रेण विट् 'विड्वनोर-नुनासिक०' अ० ६४४१ सूत्रेणाकारादेश]

अप्सु विद्याव्यापकेषु वेदादिषु ११११७४ [आप्लृ-व्याप्तौ धातोर् 'अप्' इति तस्या सप्तमीबहुवचने]

अप्सुक्षितः येऽप्सु क्षियन्ति निवसन्ति ते (एकादश = दशेन्द्रियाणि मनश्च) ११३९११ प्राणेषु क्षियन्ति निवसन्ति ते (एकादश =दशप्राणादयो जीवश्च) ७१९ [अधिति सप्तम्युपपदे क्षि निवासगत्यो (तुदा०) धातो क्विपि तुकि प्रथमबहुवचने रूपम् 'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् च]

अप्सुजाः प्राणेषु जायमान (ब्रह्मा=महान् योगी विद्वज्जन) २३१४ ['अप्सु' उपपदे जनी प्रादुर्भावे धातो 'जनसन०' इति विट् । 'विड्वनो' इत्याकारादेश । सप्तम्याश्चालुक्]

अप्सुसदम् योऽप्सु प्राणेषु जलेषु वा सीदति तम् ३३५ जलेषु गच्छन्तम् (चक्रवर्त्तिन राजानम्) ९२

अप्सुसदे=यो जलेषु नौकादिषु सीदति तस्मै (नौयायिने विद्वज्जनाय) १७१२ ['अप्सु' उपपदे 'सदॢ विशरण-गत्यवसादनेषु' धातो क्विपि द्वितीयैकवचने रूपम् सप्त म्याश्चाऽलुक्]

अफलाम् धर्म्येश्वरविज्ञानाऽऽचारविरहाम् (वाचम्) ऋ० भू० ३१७, १०७१५ अर्थ, काम और मोक्ष फलों से रहित (वाणी) प० वि०। **अफलाः**=अविद्यमानफला (ओषधय) १२८९ [फलतीति फलमिति विग्रहे 'फल निष्पत्तौ' (भ्वा०) धातोरच् प्रत्यय । नञ्बहुव्रीहि अफलाम् अफलाऽस्मै वाग्भवतीति नि० १ १०८]

अवधीत् हन्ति ११८ [हन हिंसागत्यो (अदा०) धातोर्लुङ् । 'लुङि चे' ति हनो वधादेश]

अवध्नन्तो अत्यन्त दुःखयन्ती (ओषधी) ११९१२ [बन्ध बन्धने (क्र्या०) धातो शतृप्रत्यय । स्त्रिया ङीप्]

अवध्नन् वध्नन्ति ३११५ व्यानेन बध्नन्ति ऋ० भू० १२८ वध्नीयु ३४५२ [बन्ध बन्धने (क्र्या०) धातोर्लङ् 'अनिदितामि' ति नकारलोप]

अवन्धनः यो बध्नाति तद्भिन्न. (वरुण =परमात्मा) ३५५६ [बन्ध बन्धने (क्र्या०) धातोर्बहुलवचनात् कर्त्तर्यपि ल्युट् । नञ्समास नन्द्यादित्वाद्वा ल्यु.]

अबन्धुना अविद्यमाना बन्धवो मित्रा यस्य तेनाऽर्येण सह १५३९ [नञ्-बन्धुपदयोर्बहुव्रीहि.]

अबलाः अविद्यमान बल यासान्ता (सेना) ५३०९. [नञ्-बलपदयोर्बहुव्रीहि]

अबाधेथाम् बाधेथाम् ४२८.४ [बाधृ विलोडने (भ्वा०) धातोर्लङ्]

अबिभ्यत् बिभेति ६२३२ [ञिभी भये (जु०) धातोर्लङि रूपम्]

अबिभ्युषः बिभेति यस्मात् स बिभीवान्, न बिभीवान् अबिभीवान् तस्य (बलस्य=मेघस्य) १११५ भयरहितस्य १११५. **अबिभ्युषा**=भयनिवारणहेतुना किरणसमूहेन वायुगणेन सह वा (इन्द्रेण=परमेश्वरेण सूर्येण) वा १६७ [ञिभी भये (जु०) धातो 'क्वसुश्च' अ० ३२१०७ सूत्रेण छन्दसि क्वसु । 'एरनेकाच०' इति यण् इति 'वसो सम्प्र-सारणम्' इति सम्प्रसारणम् 'शासिवसि०' इति षत्वम् नञ्-समास]

अबीभयन्त भीषयन्ते, प्र०—अत्र लङर्थे लुङ् १३९.६ [ञिभी भये (जु०) धातोर्णिजन्ताल्लुङ् 'णिश्रीद्रु०' इति च्लेश्चङि द्वित्वे रूपम्]

अबुध्ने अन्तरिक्षसाहचर्ये स्थूलपदार्थे, प्र०—बुध्नमन्त-रिक्ष बद्धा अस्मिन् धृता आप इति निरु० १०४२ १.२४७ [बन्ध बन्धने धातो. 'बन्धेर्ब्रुविबुधी च' उ० ३५ सूत्रेण नक् धातोर्बुधादेशश्च]

अबुध्यम् बुद्धिरहितम् (अधार्मिक जनम्) ४१९३ [बुध अवगमने (भ्वा०) धातोरिगुपधलक्षणे क-प्रत्यये बुध = विद्वान् ततो भवार्थे यत् । नञ्समास]

अबुध्यमानम् उपदेशेनाऽपि अजानन्तम् (अधार्मिक-ञ्जनम्) ४१९३ **अबुध्यमानाः**=बोधरहिता (स्त्रिय) ४५१३ **अबुध्यमाने**=बोधनिवारके शरीरमनसी आत्मन्ये कर्मणि ये १२९.३ [बुध अवगमने धातो कर्मणि शानच् नञ्समास]

अबुभोजीः आकर्षणेन न्यायेन वा पालयसि पालयति

इनीटभाव ३ ३३ ४ [सर्ग-नक्तपदयो समास । सर्ग उदकनाम निघ० १ १२ निक्त =तञ्चू सङ्कोचने (स्वा०) धातो क्त । अथवा नक्त हसने (भ्वा०) धातो क्त]

सर्गप्रतक्तः य सर्गमुदक प्रतनक्ति सङ्कोचयति स (सिन्धु) १ ६५ ३ [सर्ग-प्रतक्तपदयो समास । प्रतक्त = प्र+तञ्चू सङ्कोचने (स्वा०) धातो क्त]

सर्गम् उदकम् ७ १८ ११ **सर्ग.**=उत्पत्ति २ ३०.१ सृष्टि १ १६० २ **सर्गा.**=उत्पद्यमाना (उषस =प्रातर्वेला) ४ ५१ ८ सृष्टु योग्या (पदार्था) १ १५२ १ सृष्टय ४ २३ ६ **सर्गे**=सञ्जातुमर्हे (पथि) ६ ४६ १३. **सर्गेण**=समर्जनीयेन (शवसा बलेन) ६ ३२ ५ **सर्गेषु**=सृष्टेषु कार्येषु ८ ३ १२ **सर्गैः**=सृष्टै (विषयै) १ १६६ ७ [सर्ग उदकनाम निघ० १ १२ सृज विसर्गे (दिवा०) धातोर्घञ्]

सर्गमिव उदकमिव ५ ५६ ५ [सर्गम्-इवपदयो समास । सर्ग उदकनाम निघ० १ १२]

सर्त्तवे सर्तुं गन्तुम, प्र०—अत्र 'तुमर्थे सेसेन०' इति तुमर्थे तवेन् प्रत्यय १.३२ १२ [सृ गतौ (भ्वा०) धातोस्तुमर्थे तवेन्]

सर्त्तवै सर्त्तुं ज्ञातुं गन्तुं वा १ ५५ ६ सर्तवे गन्तवे ३ ३२ ६ [सृ गतौ (भ्वा०) धातोस्तुमर्थे तवै.]

सर्पत गच्छत १२ ४५ **सर्पति**=गच्छति २३.५६. **सर्पानि**=चलामि १० ३० [सृप्लृ गतौ (भ्वा०) धातोर्लोट् । अन्यत्र लट् । सर्पति गतिकर्मा निघ० २ १४]

सर्पदेवजनेभ्यः सर्पाश्च देवजनाश्च तेभ्य ३० ८. [सर्प-देवजनपदयो समास]

सर्पाः ये सर्पन्ति तेभ्य १५ १७ **सर्पेभ्य.**=ये सर्पन्ति गच्छन्ति ते सेवकास्तेभ्य, भा०—दस्युभ्यो नागेभ्यो वा १३ ७ दुष्टप्राणिभ्य १३ ८ ये सर्पन्ति गच्छन्ति ते लोकास्तेभ्य १३ ६ [सृ गतौ (भ्वा०) धातोर्बाहु० औणा० प । सर्पा =इमे वै लोका सर्पान्ति ह्यनेन सर्वेण सर्पन्ति यदिद किं च श० ७ ४ १ २५ देवा वै सर्पा । तेषामियं (पृथिवी) राज्ञी तै० २ २ २ ६ रज्जुरिव हि सर्पा कूपा इव हि सर्पाणामायतनानि, अस्ति वै मनुष्याणा च सर्पाणां च विभ्रातृव्यम् श० ४ ४ ५ ३]

सर्पिरासुतिः सर्पिषो घृतादेरासुति सवन यस्य स (पति) ११ ७०. सर्पिरासुतिर्यस्य स (अग्नि) २ ७.६ **सर्पिरासुते**=सर्पिषा समन्तात्प्रदीपिते (यज्ञ-कुण्डे) ५ २१.२ सर्पिभि सर्वतो जनिते (उपकारे) ५ ७६ [सर्पिष्-आसुतिपदयो समास. । सर्पिष् उदकनाम निघ० १.१२ आसुति =आङ्+षुञ् अभिषवे (स्वा०) धातो स्त्रियां क्तिन्]

सर्पिषः घृताऽऽदे ५ ६ ६ घृतस्य १५ ४३. आज्यस्य १५.४० गन्तु प्राप्तुमर्हस्य (घृतस्य) १.१२७ १ [सृप्लृ गतौ (भ्वा०) धातो 'अर्तिसृधृक्षिक्षरिक्षि०' उ० २ १०८ सूत्रेण इसि । सर्पिर् उदकनाम निघ० १.१२]

सर्माय गन्तवे (शत्रवे) १ ८० ५ [सृ गतौ (भ्वा०) धातोर्बाहु० औणा० मन्]

सर्वगणम् सर्वे गणा गण्या प्रशसनीया पदार्था यस्मात्तत (अपत्यम्) १६ ४८ सर्वे गणा गस्मिंस्तत (लोकम्) १ ११६ ८ सर्वे गणा समूहा यस्मिंस्तम् (बृहस्पति=विद्वज्जनम्) ५ ५१ १२. [सर्व-गणपदयो समास । सर्वगणम्=सर्वनामानम् नि० ६.३६]

सर्वतः सर्वस्माद्देशात् ३१ १ सर्वेभ्यो दिग्भ्य. सर्वेभ्यो देशेभ्यो वा २० ८ अन्याभ्य (दिग्भ्य) ६ ३६ [सर्वसर्वनाम्न प्राप्ति० पञ्चम्यन्तात् तसिल् पञ्चम्यास्तसिल्' सूत्रेण]

सर्वतातये सम्पूर्णसुखसाधकाय यज्ञाय, सर्वसुखकराय वा (यज्ञाय) ६ ५६ ६ सर्वस्मै सुखाय १ १०६ २ **सर्वतातिम्**=सर्वमेव (श्लोक=वाचम्) ३.५४.११. [सर्वप्राति० स्वार्थे 'सर्वदेवात् तातिल्' अ० ४ ४ १४२. सूत्रेण तातिल् । सर्वतातिप्राप्ति० चतुर्थ्येकवचनम्]

सर्वताता सर्वतातौ सर्वस्मिन् व्यवहारे, प्र०—अत्र 'सर्वदेवात्तातिल, अ० ४ ४ १४२. इति सूत्रेण सर्वशब्दात् स्वार्थे तातिल्-प्रत्यय 'सुपा सुलुक्०' इति सप्तम्या टादेश १ ६४ १५ सर्वस्मिन्नेव सङ्गच्छन्ते जगति ४ २६ ३. सर्वेषा सुखप्रदे यज्ञे ५ ६६ ३ सर्वानेव (अनागान्=अनपराधिप्रजाजनान्) ३ ५४ १६. राजपालनाख्ये यज्ञे ७ १८ १६ सर्वसुखकरे शिल्पमये यज्ञे ६ १५.१८ [सर्वतातिरिति पूर्वपदे व्याख्यातम् । तत 'सुपा सुलुक्०' इति सप्तम्या टादेश । सर्वतातौ=सर्वासु कर्मततिषु नि० ११.२४]

सर्वतातेव सर्वेषा वर्द्धको यज्ञ इव ६ १२ २ [सर्वताता-इवपदयो समास. । सर्वताता इति व्याख्यातम्]

सर्वतोमुखः सर्वतो मुखान्यवयवा यस्य स. (देव = ईश्वर) ३२ ४. [सर्वतस्-मुखपदयो समास]

सर्वधातमम् य सर्वं दधाति सोऽतिशयितस्तम् (तुर=सामर्थ्यम्) ५ ८२ १ [सर्वधाप्राति० अतिशायने

वाक् तु सरस्वती ऐ० ३ १ सरस्वती वाचमदधात् तै० १ ६ २ २. अथ यत्स्फूर्जयन् वाचमिव वदन् दहति तदस्य (अग्ने) सारस्वत रूपम् ऐ० ३ ४ सा (वाक्) ऊर्ध्वोदातनोद् यथापा धारा सततैवम् (सरस्वती=वाक्) ता० २० १४ २ जिह्वा सरस्वती श० १२ ६ १ १४ (यजु० ३८ २) सरस्वती हि गौ श० १४ २ १ ७ अमावस्या वै सरस्वती गो० उ० १ १२ मारस्वतमेपम् (आलभते) तै० १ ८ ५ ६ अविर्मल्हा (गलस्तनयुता इति सायण) सारस्वती श० ५ ५ ४ १. वर्षा शरदौ सारस्वताभ्याम् (अवरुन्धे) श० १२ ८ २ ३४ योपा वै सरस्वती वृपा पूपा श० २ ५ १ ११ सरस्वती (श्रिय) पुष्टिम् (आदत्त) श० ११ ४ ३.३ सरस्वती पुष्टि पुष्टिपत्नी तै० २ ५ ७ ४ सरस्वती पुष्टि पुष्टिपति श० ११ ४ ३ १६ सर्वे (प्रैषा) सारस्वता अन्नाद्यस्येवावरुद्धचै श० १२ ८ २ १६ एषा वा अपा पृष्ठ यत् सरस्वती तै० १ ७ ५.५ ऋक्सामे वै सारस्वतावुत्सौ तै० १ ४ ४ ६ सरस्वत्यै दधि श० ४ २ ५ २२ अन्तरिक्ष सारस्वतेन (अवरुन्धे) श० १२ ८ २ ३२. सरस्वतीति तद् द्वितीय वज्ररूपम् कौ० १२ २ अथ यत् (अदण) कृष्ण तत्सारस्वतम् श० १२ ६ १ १२]

सरस्वतिकृतस्य विदुष्या स्त्रिया कृतस्य भा०—सुशिक्षिता-निष्पादितस्य (अन्नस्य) प्र०—अत्र 'स्वार्थेऽण् सज्ञाछन्दसोर्वहुलम्' इति पूर्वपदस्य ह्रस्व २० ३५ [सरस्वती-कृतपदयो समास]

सरस्वती सरो वहुविज्ञान विद्यते ययोस्तौ (अश्विना=वैद्यकविद्यावेत्तारौ स्त्रीपुरुषौ) २० ५६ वहुविज्ञानयुक्तौ (अध्यापकोपदेशकौ) ६ ५० १२ [सरस्वतीति व्याख्यातम्। ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

सरस्वते समुद्राय २४ ३३ **सरस्वन्तम्**=सरास्युदकानि वहूनि विद्यन्ते यस्मिँस्तम् (सूर्यम्) १ १६४ ५२ [सर उदकनाम (निघ० १ १२) ततो भूम्यर्थे मतुप्। मनो वै सरस्वान् श० ७ ५ १ ३१ स्वर्गो लोक सरस्वान् ता० १६ ५ १५ पौर्णमास सरस्वान् गो० उ० १ १२]

सरः सरन्ति जलानि यस्मिँस्तडागे तत् २३ ४७ भा०—जलाशय २३ ४८ **सरांसि**=सरन्ति येषु जलानि तान्यन्तरिक्षादीनि ६ १७ ११ मेघमण्डलभूम्यन्तरिक्षस्थानानि (जलस्थानानि) ५ २६ ८ तडागान् ३० १६ **सरोभ्यः**=तडागेभ्य ३० १६ [सृ गतौ (भ्वा०) धातोरौणा० असुन्. सर उदकनाम निघ० १ १२ वाङ्नाम निघ० १ ११]

सरातय समाना रातयो दानानि येषान्ते (देवास = विद्वज्जना) ३३ ६४ [समान-रातिपदयो समासे समानस्य सादेश]

सरित् या सरति गच्छति सा (सरस्वती=वाणी) ३४ ११ **सरितः**=नद्य १३ ३८ [सरित नदीनाम निघ० १ १३ सृ गतौ (भ्वा०) धातो 'हृसृरुहि०' उ० १ ६७ सूत्रेण इति]

सरिरम् जलमिव सरलता कोमलता १५ ४ **सरिरस्य**=सलिलस्योदकस्य, प्र०—कपिलकादित्वाद्रेफ १३ ४२ अन्तरिक्षस्य १३ ४६ वहो (भा०—पूर्णसमुद्रस्य), प्र०—सरिरमिति वहुनाम निघ० ३ १, १७ ८७ **सरिराय**=कमनीयाय (उदकाय) २२ २५ **सरिरे**=वाचि १३ ५३ [पल गतौ (भ्वा०) धातो 'सलिकल्यनिमहि०' उ० १ ५४ सूत्रेण इलच्। कपिलकादित्वाद् रेफ। सरिरम् वहुनाम निघ० ३ १ सरिरम् (यजु० १३ ४२) आपो वै सरिरम् श० ७ ५ २ १८ (यजु० १३ ४६) इमे वै लोका सरिरम् श० ७ ५ २ ३४ (यजु० १३ ५३) वाग्वै सरिरम् श० ७ ५ २ ५३ (यजु० १५ ४) वाग्वै सरिर छन्द श० ८ ५ २ ४]

सरिष्यन् गमिष्यन् (पर्वत=मेघ) २ ११ ७ **सरिष्यन्तम्**=सर्वान् पदार्थानन्तरिक्ष गमिष्यन्तम् (भौतिकमग्निम्) २ ७ **सरिष्यन्तः**=प्राप्स्यन्त (वाजिन=योद्धृजना) ६ ६ [सृ गतौ (भ्वा०) धातो 'लृट सद्वा' इति शतृ]

सरी सरति जानाति य स सर, प्रशस्तो विद्यते यस्य स (विद्वज्जन) १ १३८ ३ [सरप्राति० प्रशसायामर्थ इनि.। सर=सृ गतौ (भ्वा०) धातो पचाद्यच्]

सरीमणि गमनाख्ये व्यवहारे ३ २६ ११ [सृ गतौ (भ्वा०) धातोर्वाहु० औणा० ईमनिन्]

सरीसृपेभ्यः सर्पादिभ्य २२ २६ [सृप्लृ गतौ (भ्वा०) धातोर्यङन्तात् पचाद्यचि 'यडोऽचि चे' ति यडो लुकि 'न धातुलोप आर्धधातुके' सूत्रेण गुणप्रतिपेधे च रूपम्]

सरूपा समान रूप यस्या सा (नारी) ४ १६ १० **सरूपा**=समान रूप यासान्ता (वत्सतर्य =गोवत्सा) २४ ५ [समान-रूपपदयोः समासे, स्त्रिया टापि, समानस्य सादेशे च रूपम्]

सर्गतक्तः जलस्य सङ्कोचक (सज्जन), प्र०—सर्ग इत्युदकनाम निघ० १ १२, ३ ३३ ११ य सर्ग उत्पत्तौ तक्तो हसित (प्रसव=सन्तान), प्र०—अत्र 'वाच्छन्दसि'

विद्याजनितस्य कार्यस्य ४ ३६ २ कर्मविशेषस्य ३ ५२ ५ **सवनानि**=प्रेरणानि ७ ३२ ६ **सवने**=सत्कर्मणि ४ ३३ ११ उत्पत्त्यधिकरणे जगति २७.२८ क्रियाविशेषयज्ञे ४ १६ २ सुन्वन्ति निष्पाद्यन्ति येन कर्मणा तस्मिन् ७ २९ २ भोजन-समये ५ ४० ४ सायकाले कर्त्तव्ये कर्म्मणि ३ ५२ ६ सङ्ग्रामे ९ ९ ऐश्वर्ययुक्ते राज्ये ३.६० ६ होमादिकर्मणि ३ २८ ४ [षु प्रसवैश्वर्ययो (भ्वा०) (अदा०) षुञ् अभिषवे (स्वा०) धातो करणेऽधिकरणे वा ल्युट्। सवनम् यज्ञनाम निघ० ३ १७ स्थानानि नि० ५ २५]

सवना ऐश्वर्ययुक्तानि वस्तूनि, प्र०—षु प्रसवैश्वर्ययो इत्यस्माद्धानोर्ल्युट्प्रत्यय ३ ३ ११४ 'शेश्छन्दसि बहुलम्' इति शेर्लुक् १ ४ २ सुन्वन्ति यैस्तानि (अध्वरकर्माणि) १ ४७ ८ सवनानि यज्ञसाधककर्माण्यैश्वर्याणि, कर्माणि प्रेरणानि वा ७ २२ ६ ओषधिनिर्माणानि ७ २२ ७ ऐश्वर्यसाधनानि (कर्म्माणि) ३ १ २० सुन्वन्ति येषु तानि (अन्ना=अन्नानि) ३ ३६ ८ प्रातःसवनादीनि कर्माणि ३४ १९ [सवनमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

सवम् प्रसूत जगत् ७ ३८ ४ ऐश्वर्यम् १ १६४ २६ **सवान्**=निष्पन्नान् पदार्थान् ४ २६ ७ ऐश्वर्ययोग्यान् (स्तोमान्=विद्याविशेषान्) १ १२६ १ **सवाय**=उत्पादनाय २.३८ १. **सवे**=जगद्रूपैश्वर्ये ५ ८२ ६ जगदाख्ये ऽस्मिन्नैश्वर्ये ११ २ विद्याप्रचारैश्वर्ये प्रेरणे वा ९ १० परमैश्वर्ययुक्ते प्रेरितव्ये जगति २० ११ [षु प्रसवैश्वर्ययो (भ्वा०) षुञ् अभिषवे (स्वा०) षूङ् प्राणिगर्भविमोचने (अदा०) षूट् प्राणिप्रसवे (दिवा०) षू प्रेरणे (तुदा०) धातोर्वा 'ऋदोरवि' त्यप्]

सवयस. समान वयो येषान्ते (विद्वांसो जना) १.१६५ १ [समान-वयस्पदयो समासे समानस्य सादेशश्छान्दस]

सवयसा समानवयस्को (स्त्रीपत्नी) १ १४४ ४ समान वयो ययोस्तौ (स्त्रियौ) १ १४४ ३ [समान-वयस्पदयो समासे द्विवचनस्याकारादेशश्छान्दस]

सवातरौ वायुना सह वर्त्तमानौ, भा०—वायुना प्रेरितौ (भौमविद्युतावग्नी) २८ ६ [सह-वातपदयो समासे सहस्य सादेश । सुगागमश्छान्दस]

सवात्यान् समानवाते भवान् (विद्यार्थिजनान्) २४ १६ [समान-वातपदयो समासे, समानस्य सादेशे च भवार्थे यत्]

सवासः उत्पन्नाः पदार्था ४ ५४.६ [सवमिति व्याख्यातम्। ततो जसोऽसुगागमश्छान्दस]

सवितः सर्वेषु जीवेष्वन्तर्यामितया सत्यप्रेरक व्यवहारप्रेरणाहेतुर्वा (ईश्वर सूर्यो वा) १.२६. सकलैश्वर्ययुक्त (अ०—राजन्) ३३ ८४ राज्यैश्वर्यप्रद (अ०—परमात्मन्) १.२५. सर्वोत्पादकव्यवहारोत्पत्तिहेतो वा (ईश्वर सूर्यो वा) १.२६ सकलैश्वर्यविधातर्जगदीश्वर २.१२. ऐश्वर्यवन् (सभाध्यक्ष) ५ ३९ विद्यैश्वर्ययुक्त (पूर्णविद्योपदेशक) २७ ८. सकलजगदुत्पादक जगदीश्वर ४ ५४ २. सत्कर्मसु प्रेरकेश्वर १९ ४३ उत्तमगुणकर्मस्वभावेषु प्रेरकेश्वर ३० ३ सर्वसिद्ध्युत्पादक (भगवन्) ११ ७ अनेकपदार्थोत्पादक तेजस्विन् विद्वन्राजन् ३३ ६९ हे सकल जगत् के उत्पत्तिकर्ता, समग्र ऐश्वर्ययुक्त (परमेश्वर) स० वि० ४, ३० ३ सर्वैश्वर्यस्य प्रसवितरीश्वर ८ ६ सकलैश्वर्यसयुक्त सम्राट् ९ १ सवितृवदैश्वर्यप्रद (ईश्वर) ३४ २७ पृथिव्याद्युत्पादक (परमात्मन्) १ २४ ३ सत्यव्यवहारे प्रेरक (ईश्वर) ५ ८१ ५. सत्कर्मसु प्रेरक राजन् ६ ७१ ३ **सविता**=सर्वेषा प्रसविता, प्रकाशवृष्टिरसाना च प्रसविता (देव = परमेश्वर) १ ३५ २ सूर्यो धर्मकृत्येषु प्रेरको वा (जन) १.१०७ ३ विद्यैश्वर्यकारक (देव =विद्वज्जन) ५ ४२ ३. सूर्यमण्डलम् ४ १३ २ अन्त प्रेरको वृष्टिहेतुर्वा (देव = जगदीश्वर सूर्यलोको वा) १ २२ प्रसवकर्त्ता सूर्य ६ ५० १३ सर्वस्य जगतो दिव्यस्य प्रसविता उत्पादक (परमात्मा) ४ ४. वृष्टिप्रकाशद्वारा दिव्यगुणाना प्रसवहेतु (यज्ञ) १ १६ सकलैश्वर्ययोक्ता प्रभ्वैश्वर्यदाननिमित्तो वा (परमेश्वर) ४ ५३ २. सकलजगज्जनक (जगदीश्वर) ४ ५३ ७ ऐश्वर्यवान् सूर्यवत् प्रकाशमान (विद्वज्जन) ७ ४५ ३ सर्वेषा वसूनामग्निपृथिव्यादीना त्रयस्त्रिंशतो देवाना प्रसविता (देव =परमेश्वर) १ ३ सकलैश्वर्यविधाता (ईश्वर) ५ ८१ ३. ऐश्वर्य प्रति प्रेरक (अग्नि = नृपति) २ १ ७ राजनियमै प्रेरक (राजा) ३३ २० सूर्य इव भासमान, भा०—सूर्यवद्विद्यया प्रकाशात्मा (उपदेशक) ३३ ३४ प्रसवकर्त्ता (परमात्मा) ५ ८२ ३ भास्कर ११ ४२ सर्वस्य जगतो निर्माता (ईश्वर) ११ ६ योगपदार्थज्ञानस्य प्रसविता (उपदेष्टृजन) ११ ३ ऐश्वर्यप्रसाधक (शिल्पिजन) ११ ११ सब जगत् की उत्पत्ति का कर्त्ता (ईश्वर) स० वि० १२१, १० ८५ ३६ धर्मयुक्त मार्ग मे प्रेरक (पति) स० वि० १२१, अथर्व० १४ १ ५१ सब जगत् को उत्पन्न और धारण करने वाला (परमात्मा) प० वि०। वपादि का कर्त्ता सूर्य स० प्र० ११३, ३३ ४३

तमप् । सर्वधा =सर्वोपपदे डुधाञ् धारणपोषणयो (जु०) धातो कर्त्तरि क्विप्]

सर्वभूतेषु सर्वेषु प्रकृत्यादिषु ४० ६ सम्पूर्ण प्राणि-अप्राणियो मे स वि० २१४, ४० ६ [सर्व-भूतपदयो समास]

सर्वरथा सर्वे रथा यानानि यस्या स (शतक्रतु = सेनेश) ५ ३५ ५ [सर्व-रथपदयो समास । सर्वरथप्राति० सु-स्थाने 'सुपा सुलुक्०' सूत्रेण डादेश]

सर्वराट् य सर्वस्मिन् राजते स (सूर्यो विद्वज्जनो वा) ५ २४ [सर्वोपपदे राजृ दीप्तौ (भ्वा०) धातो 'सत्सू-द्विषद्रुह०' सूत्रेण क्विप् । सर्वराट्=स सर्वमेवेनेष्ट्वा सर्वराड् इति नामाधत्त गो० पू० ५ ८]

सर्वलोकम् सर्वेषा दर्शनम् ३१.२२. [सर्व-लोकपदयो समास । लोक =लोकृ दर्शने (भ्वा०) धातोर्भावे घञ्]

सर्ववीरम् सर्वे वीरा यस्मात्तत् (रयिं=धनम्) ६ २४ सर्वे वीरा प्राप्यन्ते यस्मात्तम् (रयिं) १६ ५६ **सर्ववीरः**=शरीरात्मबलसुभूषिता सर्वे वीरा यस्मात् (यज्ञ =गृहाश्रम) ८ २२ सर्वे च वीराश्च ते १ ५१ १५ [सर्व-वीरपदयो समास]

सर्ववीरया सर्ववीरैर्युक्तया (विशा=प्रजया) १ १११ २ **सर्ववीरा**=सर्वे वीरा भवन्ति यासु सतीषु ता (विदुष्य स्त्रिय) १ ११३ १८ [सर्व-वीरपदयो समासे स्त्रिया टाप्]

सर्ववेदसम् सर्वे वेदसो वेदा विज्ञायन्ते यस्मिँस्तम् (बोधम्) १८ ६२ सर्ववेदैरुक्त कर्म्म १५ ५५ गृहाश्रमस्थ-पदार्थ, मोह, यज्ञोपवीत और शिखा आदि को स० वि० २०८, अथर्व० ६ ५ १७ [सर्व वेदस्पदयो समास । वेदस्=विद् ज्ञाने (अदा०) धातोरौणा० असुन्। अथवा सर्वोपपदे विद ज्ञाने (अदा०) धातो 'गतिकारकोपपदयो०' उ० ४ २२७ सूत्रेणासि]

सर्वशासः ये सर्व राज्य शासति तँ (राजपुरुषँ) ५ ४४ ४ [सर्वोपपदे शासु अनुशिष्टौ (अदा०) धातो 'कर्मण्यण्' इत्यण्]

सर्वशुद्धवालः सर्वे शुद्धा वाला यस्य स (पशु) २४ ३ [सर्व-शुद्धवालपदाना समास]

सर्वसेनः सर्वा सेना यस्य स (विद्वान् जन) ५ ३० ३ [सर्वा-सेनापदयो समास]

सर्वसेना समग्रा सेना ययोस्तौ (सभासेनेशौ) ६ ६८ २ [सर्वा-सेनापदयो समासे द्विवचनस्याकारादेश]

सर्वहुतः सर्वैर्हूयत आदीयते तस्मात् (परमेश्वरात्) ३१ ६ सर्वे जुह्वति सर्व समर्पयन्ति वा यस्मिन् तस्मात् (ईश्वरात्) ३१ ७ सर्वपूज्यात् सर्वोपास्यात् सर्वशक्तिमत परब्रह्मण, ऋ० भू० ६, ३१ ६ यत सर्वमनुष्यैर्होतुमादातु ग्रहितु योग्या वेदास्तस्मात् (परमात्मन) ऋ० भू० ६ ३१ ६ [सर्वोपपदे हु दानाऽदानयो (जु०) धातो 'कृतो बहुल वा' इति क्विप् कर्मणि, अधिकरणे वा]

सर्वायुः सम्पूर्णजीवनम् ३८ २० [सर्व-आयुष्पदयो समास]

सर्सृते भृशं सरति गच्छति २ २५ १ **सर्स्रते**=प्रसरंत, प्राप्नुत ३ ७ १ **सर्स्रे**=प्राप्नोति ६ १८ ७ [सृ गतौ (भ्वा०) धातोर्यङ्लुगन्ताल्लट्। व्यत्ययेनात्मने-पदम् । सर्स्रे प्रयोगे लिट् । सर्सृते गतिकर्मा निघ० २ १४]

सलक्ष्म समान लक्ष्म यस्य तत् (विषुरूप=व्यापक विविधरूप वा विषश्चिज्जनम्) ६ २० [समान-लक्ष्मपदयो समासे समानस्य सादेशश्छान्दस । लक्ष्म=लक्ष दर्शनाङ्क-नयो (चुरा०) धातोर्बहु० औणा० मन्]

सललूकम् सम्यग् लुब्धम् (हेतिं=वज्रम्) ३ ३० १७ [सललूक सलुब्ध भवति पापकमिति नैरुक्ता । सरलक वा स्यात् सर्त्तेरभ्यस्तात् नि० ६ ३]

सलिलम् आकाशरूप सब जगत् स० प्र० २८२, १० १२९ ३ **सलिलस्य**=अन्तरिक्षस्य ७ ४९ १ **सलिलः**=शुद्ध जल विद्यते यस्मिन् स (सिन्धु =नदी), प्र०—अत्राऽर्शादित्वादच् ८ ५९ **सलिलानि**=जलानीव निर्मलानि वचनानि १ १६४ ४१ [षल गतौ (भ्वा०) धातो 'सलिकल्यनि०' उ० १ ५४ सूत्रेण इलच्। सलिलम् उदकनाम निघ० १ १२ बहुनाम निघ० ३ १ सलिलम्= आपो ह वाऽइदमग्रे सलिलमेवास श० ११ १ ६ १ वेदिर्वै सलिलम् श० ३ ६ २ ५]

सवनम् सुवन्त्यैश्वर्य प्राप्नुवन्ति येन तत् क्रियाकाण्डम् १ १६ ५ सवति प्रसूयतेऽनेन तत् (इन्द्रिय=मन आदि) ८ ३ येन सूयते तत् (धर्मपथम्) ६ ६० ९ सकलैश्वर्य-प्रापकम् (आदित्यब्रह्मचर्यम) ४ ३५ ९ सुवैश्वर्यम् ४ ३४ ४ कार्यसिद्धयर्थं कर्म्म ४ ३५ ४ सकलसम्कार-रसोपेतम् (भोजनादिकम्) ४ ३५ ७ भोजन होमादिक वा ३ ३२ १ सुन्वन्ति निष्पादयन्ति पदार्थान् येन तत् (कर्म्म) १ २१ ४. सर्वसुखसाधनम् (विश्व=जगत्) १ १६ ८ आरोग्यकर होमादिकम् यज्ञक्रियाप्रेरणम् १९ २६ **सवनस्य**=शिल्प-

सवेदसा समानेन हुनद्रव्येण युक्तौ (अग्नीषोमौ=वाय्वग्नी) १ ९३.९ [समान-वेदस्पदयोः समासे द्विवचन-स्याकारादेश]

सव्यतः दक्षिणत २ ११.१८ [सव्यप्रानि० तसि' । सव्यम्=पुत्र अभिषवे (स्वा०) धातोः 'सुनोते' उ० ४.११० सूत्रेण य.]

सव्यः द्वितीयो वामपार्श्वस्थ. (अश्व) १.८२ ५. **सव्यान्**=वामपार्श्वान् ५ १९. **सव्येन**=सेनाया दक्षिण-भागेन १ १०० ९ [पुञ् अभिषवे (स्वा०) धातो सुनोते उ० ४ ११० सूत्रेण य]

सव्या उत्तरा (दिक्) २ २७.११ [सव्य इति व्याख्यातम् । ततष्टाप् स्त्रियाम्]

सव्रता समानकर्माणि ६ ७० ३. [समान-व्रतपदयो समासे शेर्लोपश्छन्दसि । व्रतम् कर्मनाम निघं० २.१]

सव्रताः समाननियमा (अग्नय =पावका) १५ ५७ सत्यैर्नियमै सह वर्त्तमाना. (अग्नय) १४.६. सनियमा (अग्नय) १४ ६ समानानि व्रतानि नियमा येषान्ते (देवा = विद्वज्जना) १४ १५ व्रतै सत्यैर्व्यवहारै सह वर्त्तमाना (देवा) १३ २५ नियमै सहिता (जना) १४ २७. समान गुण, कर्म, स्वभाव वाले (गृहस्थ जन) स० वि० १४१, अथर्व० ३ ३० १–७ [समान-व्रतपदयो समास. । समानस्य छन्दसि०' सूत्रेण समानस्य सादेश]

सश्चत् सञ्चति समवयति २.२२ २ सयोजयति, प्र०—अत्राऽऽडभाव २ २२ १. **सश्चत**=सेवन्ता सम्बध्नन्तु ७ २६ ४ समवयन्तु ७ १८ २५ विजानीत प्राप्नुत वा १ ६४ १२ प्राप्नुवन्ति, प्र०—अत्र व्यत्यय २७ २४. भजतु, प्र०—अत्र पच सेवने लोडर्थे लङ् । सुगागमो-ऽडभावश्च छान्दस । अ०—सेवते २० ७० **सश्चति**=प्राप्नोति १ १०१ ३ **सश्चसि**=जानासि प्रापयसि वा ३ ३४ प्राप्नोपि ८ २. **सश्चिम**=दूरे प्राप्नुयाम, गमयेम वा ३८ २० सदा सेवे आर्याभि० २ ४१, ३८ २० **सश्चिरे**=सज्जन्ति प्राप्नुवन्ति प्रापयन्ति वा १ ११० ६ समवयन्ति प्राप्नुवन्ति ५ ६४ ३ गच्छन्ति ५ ६७ ३. **सश्चुः**=प्राप्नुयु ६ ३६ ३ **सश्चे**=सम्बध्नामि ५ ३३ ८ [पच सेवने (भ्वा०) पच समवाये (भ्वा०) धातोर्वा लङ् । अडभावश्छान्दस सुगागमश्च । अन्यत्र लोट्, लट्, लिट् च। सञ्चति गतिकर्मा निघ० २ १४ लिटि द्वित्वाऽभावश्छान्दस]

सश्चतः विज्ञानवतो विद्याधर्मप्राप्तान् (प्रजाजनान्) १ ४२ ७ समवेता (प्रजाजना) ३ ९ ४ **सश्चते**=सम्बध्नाति ५ ३३ ८ [पच सेवने (भ्वा०) पच समवाये (भ्वा०) धातो शतृ । सुगागमश्छान्दस । सञ्चति गतिकर्मा निघ० २ १४.]

सस्तः अविद्यामुक्तञ्झमानान् (विदुषो जनान्) १.१३५.७. स्वपन प्राणिन १ १२८ ४. **सस्ताम्**=स्वपता पुरुषाणाम् १.५३ १. **सस्तम्**=शयानम् (जीवम्) ४ ५१ ५ स्वपन्त निन्दारहित वा (अहिं=सर्प शत्रु वा) १ १०३ ७ **सस्तः**=शयाना (ऋभव.=मेधाविजना) ४ ३३.७ [पच स्वप्ने (अदा०) धातो शतृ । सस्त स्वपन. नि० ४ १९. सस्ति स्वपितिकर्मा निघ० ३ २२]

सस्तीमिव यथा सुप्ताम् (पुरन्धिं=बहुप्रज्ञा स्त्रीम्) १ १३४ ३ [सस्तीम्-स्वपदयो समास । सस्तीम्=पच स्वप्ने (अदा०) धातो शतृन्ताद् ङीप्]

सस्तय सीद ३ ३० ९ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिट्]

ससाद निषीदति ६ १.६ अवसादयति १ ६७ ४. तिष्ठति, प्र०—अत्र लडर्थे लिट् 'सदे परस्य लिटि' अ० ८ ३ ११८ अनेन परसकारस्य मूर्धन्यादेशनिषेध १ २५ १० निवसेत् ७ ४५. निषीदेत् ५ १ ५. सीद २०.२ सीदतु १० २७ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिट्]

ससन्तु शयीरन् ७ ५५ ५ स्वपन्तु १ १२४ १०. **ससस्ति**=स्वपिति, भा०—निद्रालून्नस्मान् कर्महीनान् करोति २३ १८ **सस्तु**=शयताम् ७.५५ ५ [पच स्वप्ने (अदा०) धातोर्लोट् । ससस्ति-प्रयोगे लटि शप श्लु]

ससर्ज सृजति १ १०३ २ **ससृज**=सृजति ७ १८ ४ **ससृजे**=स्वनामर्थ्यरूपकारणादुत्पादितवान् ऋ० भू० १३५, अथर्व० १० ४ ८ **ससृज्महे**=भृश सृजेम ६ १६.३७ निष्पादयेम १ ८१ ८ **ससृज्यात्**=पुन पुननिष्पद्येत निष्पादयेद् वा १ २४.१३ [सृज विसर्गे (तुदा०) धातोर्लिट् । ससृजे-प्रयोगे व्यत्ययेनात्मनेपदम् । अन्यत्र यङ्लुगन्ताल्लटि व्यत्ययेनात्मनेपदे च रूपम् । अथवा शप श्लौ लटि रूपम् । अन्यत्र ससृज्यात्-प्रयोगे लिङ् । प्रससर्ज प्रसृजति नि० १० ४]

ससर्परीः सुखस्य प्रापिका (सत्यादिलक्षणोज्ज्वला वाणी) ३ ५३ १६ भृश सर्पणशीला (वाक्) ३ ५३ १५ [सृप्लृ गतौ (भ्वा०) धातोर्यङ्लुगन्ताद् वनिप् । 'वनो र च' इति ङीप् रेफश्च । प्रत्ययस्थवकारलोपश्छान्दस]

ससवान् प्रशस्तानि समानि अन्नानि विद्यन्ते यस्य स (राजा), प्र०—ससमित्यन्ननाम निघ० २ ७, ६ ४४ ७

ऐश्वर्यवान् राजा, सूर्यलोको वायुर्वा, प्र०—सवितेति पदनामसु पठितम् निघ० ५ ४ अनेन प्राप्तिहेतोर्वायोरपि ग्रहणम् १ ३५ ४ सूर्य इव स्वप्रकाशमान ईश्वर १ १८६ १ सर्वस्य विश्वस्य जनिता (अ०—सत्य प्रेरको जगदीश्वर) ६ २ विद्याव्यवहारेषु प्रेरक (विद्वज्जन) १६ ८० सब जगत् का उत्पत्तिकर्त्ता और सम्पूर्ण ऐश्वर्यों को देने वाला परमात्मा स० वि० १४१, अथर्व० १४ २ ७५ **सविता-रम्**=सर्वजगदन्तर्यामिनमीश्वरम् १ २२ ५ उत्पादक-मैश्वर्यहेतुं वा (परमेश्वर सूर्य वा) १ २२ ७ वेदविद्यैश्वर्यो-त्पादकम् (ईश्वरम्) ६ २७ सकलैश्वर्यप्रापकम् (ईश्वरम्) २२ १० मेघोत्पादकम् (सूर्यम्) ५ ४६ २. जनयितारम् (परमात्मानम्) ३० ४ देवानामन्यादीना रसाना वा प्रसवितारम् (ईश्वर सूर्य वा) ४ २५ सकलपदार्थनिर्माता-रम् (ईश्वरम्) ५ ८२ ७ ऐश्वर्यकारक राजानम् ३३ ४६ सर्वेषामुत्पादकम् (ईश्वरम्) ६ २१ **सवितुः**=सर्व-जगदुत्पादकस्य सकलैश्वर्यप्रदातु (ईश्वरस्य) १ १० सवति सकलैश्वर्यं जनयति तस्य (ईश्वरस्य) १ २१ परमेश्वरस्य सूर्यलोकस्य वा १ ३१ सकलैश्वर्यप्रसवितु, समग्रविद्या-बोधप्रसवितु, शत्रुविजयप्रसवितुर्वा (परमेश्वरस्य) ६ १० अखिलजगदुत्पादकस्येश्वरस्य ११ ४ सर्वेषामैश्वर्यव्यवस्था प्रति प्रेरकस्य (ईश्वरस्य) ११ ६ सकलैश्वर्यप्रदेश्वरस्य ३६ ३ सकलजगदुत्पादकस्य समग्रैश्वर्यस्येश्वरस्य ३ ६ ११ अन्तर्यामिणो जगदीश्वरस्य ५ ८२ १ य सुनोत्युत्पादयति सर्व जगत्तस्य (परमेश्वरस्य) सब जगत् के उत्पादक और सब ऐश्वर्य के दाता (परमेश्वर) का स० प्र० ५१, ३६ ३ योगैश्वर्यसम्प्रदस्येश्वररय १७ ७४ सकलैश्वर्य प्रापयत ईश्वरस्य २ ३८ ७ सुनोति सूयते सुवति वोत्पादयति सृजति सकल जगत् स सर्वपिता सर्वेश्वर सविता परमात्मा तस्य प० वि०, ३६ ३ सकलैश्वर्यस्य प्रसवितुर्जगदीश्वरस्य ६ ३० **सवित्रा**=सर्वान्तर्यामिणा जगदीश्वरेण ३ १० विद्युद्रूपेण ४ ३४ ८ प्रसवहेतुना (देवेन=विद्वज्जनेन) ३७ १४ प्रेरकेणैश्वर्यकारकेण वा (ईश्वरेण सूर्येण वा) ३७ १५ **सवित्रे**=सवितृविद्याविदे (विद्वत्पुरुषाय) ३८ ८ सकलरसोत्पादकाय सूर्याय २ ३० २ सन्तानोत्पादकाय (गृहपतये) ८ ७ सूर्यविज्ञानाय १० ५ ऐश्वर्योत्पादकाय (पुरुषाय) २६ ६०. सूर्याय २२ ६ [सवितृशब्दस्य रूपाणि। सवितृ=पू प्रेरणे (तुदा०) पूङ् प्राणिप्रसवे (दिवा०) पूङ् प्राणिगर्भविमोचने (अदा०) पुञ् अभिषवे (भ्वा०) पु प्रसवैश्वर्ययो (भ्वा०) धातोर्वा कर्त्तरि तृच्। सविता पदनाम निघ० ५ ६ निघ० ५ ४ सविता सर्वस्य प्रसविता नि० १० ३१ सविता व्याख्यात। तस्य कालो यदा द्यौरपहततमस्काकीर्णरश्मिर्भवति नि० १२ १२ सवितारम्=सर्वस्य प्रसवितार मध्यम वोत्तम वा पितरम् नि० ७ ३१ सविता-सविता वै देवाना प्रसविता श० १ १ २ १७ सविता वै प्रसविता को० ६ १४ सविता वै प्रसवानामीशे ऐ० १ ३० आदित्य एव सविता गो० पू० १ ३३ अग्निरेव सविता जै० उ० ४ २७ १ प्रजापतिर्वै सविता ता० १६ ५ १७ वरुण एव सविता जै० उ० ४ २७ ३ विद्युदेव सविता जै० उ० ४ ३३ स्तनयित्नुरेव सविता जै० उ० ४ २७ ६ वायुरेव सविता गो० पू० १ ३३ चन्द्रमा एव सविता गो० पू० १ ३३ यज्ञ एव सविता गो० पू० १ ३३ इय (पृथिवी) वै सविता श० १३ १ ४ २ अब्भ्रमेव सविता गो० पू० १ ३३ वेदा एव सविता गो० पू० १ ३३ अहरेव सविता गो० पू० १ ३३ पुरुष एव सविता जै० उ० ४ २७ १७ पशवो वै सविता श० ३ २ ३ ११ प्राणो वै सविता ऐ० १ १६ मनो वै सविता श० ६ ३ १ १३ यकृत् सविता श० १२ ६ १ १५ सविता राष्ट्र राष्ट्रपति तै० २.५ ७ ४ उष्णमेव सविता गो० पू० १ ३३ (सविता) रश्मिभिर्वर्षं (समदधात्) गो० पू० १ ३६ तद्वै सुपूत य देव सविता पुनात् श० ३ १ ३ २२]

सवितेव यथा सूर्य आकर्षणेन भूगोलान् धरति तथा १ ६५ ७ यथा सूर्य १ ११० ३ [सविता-इवपदयो समास। सवितेति व्याख्यातम्]

सविंश विंशत्या सह वर्त्तमान (वर्च=दीप्ति) १४ २३ [सह-विंशतिपदयो समासे सहस्य सादेश। समासान्तो डच् छान्दस]

सवीमनि महैश्वर्ये ४ ५३ ३ उत्पादिते जगति ६ ७१ २ य सूयते समारस्तस्मिन् (प्रसविते समारे) ४ २५ आज्ञा-याम् ३३ १७ [पु प्रसवैश्वर्ययो (भ्वा०) पूङ् प्राणिप्रसवे (दिवा०) धातोर्वा बाहु० औणा० ईमनिन्। सवीमनि प्रसवे नि० ६ ७]

सवीर्यः बलोपेत (देव=विद्वान् राजा) २८ ३ [सह-वीर्यपदयो समासे 'वोपसर्जनस्य' सूत्रेण सहस्य सादेश]

सवृत् य समानेन धर्मेण सह वर्त्तते तस्य बोधक (विद्वज्जन) १५ ६ **सवृते**=साधर्म्यपदार्थज्ञानाय १५ ६ [समानोपपदे वृतु वर्त्तने (भ्वा०) धातो क्विप्]

सवृधे य समानै सह वर्धते तस्मै (पुरुषाय) १६ ३० [समानोपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप्]

धातोर्लट् 'दससञ्जस्वञ्जा शपि' इत्यनुनासिकलोपः]

सस्वती उपतापकेन शब्देन ७ ५८ ५ [स्वृ शब्दोपतापयो (भ्वा०) धातो कर्त्तरि तृच्। विभक्तिव्ययत्यो द्वित्वञ्च छान्दसम्]

सस्वः अन्तर्हिता (तन्व =प्राणा) ७ ५६ ७ अन्तश्चरन्त (विद्वज्जना) ७ ६० १० [सस्व निर्णीतान्तर्हितनाम निघ० ३ २५]

सस्वः उपदिशति, प्र०—अत्र स्वृधातोर्लडि प्रथमैकवचने 'बहुल छन्दसि' इति शप स्थाने श्लु 'हल्ड्याब्भ्यो दीर्घात्०' इति तलोप १ ८८ ५ [स्वृ शब्दोपतापयो (भ्वा०) धातोर्लड्। शप श्लुञ्छन्दसि। 'हल्ङचाब्भ्य०' तलोप]

सस्वः गुप्त (पदविज्ञानम्) ५ ३० २

सह सङ्गे १ २३ १७ परस्परम् ३ १३ सङ्गार्थे १ २३ २४ साकम् १२ २८ सार्द्धम् २० २५ साथ स० वि० १४२, अथर्व० ३ ३० ६ साथ ही साथ स० प्र० ३१८, ४० १४]

सहच्छन्दसः सह छन्दांसि वेदाध्ययन स्वातन्त्र्य सुखभोगो वा येषान्ते (ऋषय ब्रह्मचर्येण धर्मानुष्ठानपुरस्सरमखिलान् वेदान् विज्ञातवन्तो जना) ३४ ४६ [सह-छन्दस्पदयो समास। चदि आह्लादने दीप्तौ च (भ्वा०) धातो 'चन्देरादेश्च छ' उ० ४ २१६ सूत्रेणासुन् छकारश्च धात्वादेरादेश]

सहजन्या सहोत्पन्ना (अप्सरा) १५ १६ [सहजन्यपदयो समासे स्त्रिया टाप्। जन्य =जनी प्रादुर्भावे (दिवा०) धातोर्यत् सहजन्या (यजु० ५ १६) (वायो) मेनका च सहजन्या चाप्सरसाविति दिक् चोपदिशा चेति ह स्माह माहित्थिरिमे तु ते द्यावापृथिवी श० ८ ६ १ २७]

सहजानुषाणि जनुभिर्जन्मभिर्निर्वृत्तानि जानुषाणि कर्माणि तै सह वर्त्तमानानि (भोजनानि) १ १०४ ८ सहजेनाऽनुषङ्गीणि (पात्राणि) प० वि०। सहज अनुषक्त स्वभाव से अनुकूल मित्रो को, आर्याभि० १ ४६, ऋ० १ ७ १६ ८ [सह-जानुषपदयो समास। जानुषम्= जनुष्प्राति० निर्वृत्तार्थेऽण्। जनुष्=जनी प्रादुर्भावे (दिवा०) धातो 'जनेरुसि' उ० २ ११५ सूत्रेण उसि]

सहदानुम् य सहैव ददाति तम् (वृत्र=मेघमिव) १८.६६ दानेन सह वर्त्तमानम् (वृत्रम्) ३ ३० ८ [सहदानुपदयो समास। दानु =डुदाञ् दाने (जु०) धातो 'दाभाभ्या नु' उ० ३ ३२ सूत्रेण नु]

सहदेवः देवै सह वर्त्ततेस (विद्वज्जन) १.१०० १७ [सह-देवपदयो समास]

सहध्यै सोढुम् ६ १ १ [पह मर्षणे (भ्वा०) धातोस्तुमर्थेऽध्यै प्रत्यय]

सहन्तमः अतिशयेन सहा इति सहन्तम (विद्वज्जन) १ १२७ ६ [सहस्प्राति० अतिशायने तमप्। सकारस्य नकारश्छान्दस]

सहन्तः सोढार (विद्वासो राजजना) ५ ८७ ५ [पह मर्षणे (भ्वा०) धातो शतृ]

सहन्ती सहन कुर्वती (विट्=उत्तमा प्रजा) ७ ५६ ५ [पह मर्षणे (भ्वा०) धातो शत्रन्तान् ङीप्]

सहन्त्य सहन्तेषु शान्तेषु भव (अन्ने=दात सद्गृहस्थ) ६ १६ ३३. सहनशील विद्वन् (जन) १ २७ ८ शत्रुओं के समूहो के घातक (ईश्वर) आर्याभि० १ २६, ऋ० ५ ८ ३५ २ [सहन्तप्राति० भवार्थे यत्। सहन्त= पह मर्षणे (भ्वा०) धातोर्बाहु० औणा० झच्]

सहपत्या स्वामिना सह ३७ २० [सह-पतिपदयो समास 'वोपमर्जनस्ये' ति विकल्पेन न सादेश। छान्दसत्वात् 'पति समास एव' इति न घिसज्ञा। तेन नादेशो न भवति]

सहप्रमाः सहैव प्रमा यथार्थं प्रज्ञान येषान्ते (ऋषय =सत्याऽसत्ये विविच्य सत्य लब्ध्वाऽसत्य हातवन्तो जना) ३४ ४६ [सह-प्रमापदयो समास। प्रमा= माङ् माने शब्दे च (जु०) धातो 'आतश्चोपसर्गे' इत्यङ्]

सहमानम् य सर्व सहते तम् (विद्वज्जनम्) ५ २५ ६ शत्रूणा वेगस्य सोढारम् (राजपुरुषम्) ६ १८ १ **सहमानः**=य मुखदु खादिक सहते (इन्द्र =सेनापति) १७ ३७. **सहमानाय**=बलयुक्ताय (जनाय) १६ २० शत्रून् सोढु शीलाय (इन्द्राय=सभासेनेशाय) २ २१ २ शत्रून् सोढु समर्थाय (रुद्राय=शूरवीराय) ७ ४६ १ [पह मर्षणे (भ्वा०) धातो शानच्। ताच्छील्ये चानश् वा]

सहमाना बलनिमित्ता, भा०—बलवर्द्धिका (ओषधि) १२ ६६ पत्यादीन् सोढुमर्हा (पत्नी) १३ २६. [पह मर्षणे (भ्वा०) धातो शानजन्तात् स्त्रिया टाप्]

सहमूलम् मूलेन सह वर्त्तमानम् (रक्ष =दुष्टाचारम्) ३ ३० १७ [सह-मूलपदयो समास]

सहवत्सा वत्सेन सह वर्त्तमाना (धेनु =दुग्धदात्री गौ) १ ३२ ६ [सह-वत्सपदयो समासे स्त्रिया टाप्]

सहवसुम् वसुभि सह वर्त्तमानम् (नार्मरम्=

सम्भाजक (जातविद्यो जन) ३ २२ १ ददत् (जातवेदा = उत्पन्नविज्ञानविद्वज्जन) १२ ४७ [ससम् अन्ननाम निघ० २ ७ पदनाम निघ० ४ २ ससप्राति० प्रशसायामर्थे मतुप्। ससम्=स्वपनमेतन्माध्यमिक ज्योति नि० ५ ३]

ससवांसम् पापपुण्ययोर्विभक्तारम् (इन्द्र=परीक्षक विद्वज्जनम्) ३ ३४ ८ **ससवांसः**=सुशयाना इव (देवा = विद्वज्जना) ४ ४२ १० सविभक्ता (देवा =विद्वास) ७ १० ये शेरते ते (जना) ४ ८ ६ [षण सभक्तौ (भ्वा०) धातोर्लिट क्वसौ रूपम्। षस स्वप्ने (अदा०) धातोर्वा लिट क्वसु]

ससस्य शयानस्य (मनुष्यस्य) ३ ५ ६ स्वप्नस्य ४ ७ ६ कार्यस्य ५.२१.४ स्वपत (पत्यु) ४ ५ ७ [षस स्वप्ने (अदा०) धातो शतृ। तलोपश्छान्दस]

ससान विभजेत् ३ ३४ ८ सनति विभजति ३ ३१ ७ [षण सम्भक्तौ (भ्वा०) धातोर्लिट्]

ससार समन्ताद् गच्छति ४ ३० ११ [सृ गतौ (भ्वा०) धातोर्लिट्]

ससूव जनयति ४ १८ १० [पूङ् प्राणिगर्भविमोचने (अदा०) धातोर्लिटि 'ससूवेति निगमे' अ० ७ ४.७४ सूत्रेण परस्मैपद वुगागमोऽभ्यासस्य चात्व निपात्यते]

ससृजान स्रष्टा सन् (पूज्यो राजा) ७ ८ २ [सृज विसर्गे (तुदा०) धातो शानच्। व्यत्ययेनात्मनेपद प्रत्ययस्य श्लुश्च सृजधातोर्लिट कानज्वा]

ससृमाणम् भृश गच्छन्तम् (एतशम्=अश्वम्) ४ १७ १४ [सृ गतौ (भ्वा०) धातोर्यङ्लुगताच्छानच्। व्यत्ययेनात्मनेपदम्]

ससृवांसम् सर्व ज्ञानवन्त शिल्पविद्यागुणप्राप्तिमन्त वा (ईश्वर भौतिकमग्नि वा) २ १४ **ससृवांसः**=प्राप्तवन्त (राजपुरुषा) ६ १६ [सृ गतौ (भ्वा०) धातोर्लिट क्वसु]

ससृवांसमिव प्राप्नुवन्तमिव (अग्नि=पावकम्) ३.६ ५ ससृवासम्=[सृ गतौ (भ्वा०) धातोर्लिट क्वसु। ससृवासम्-इवपदयो समास]

ससेन सेनासहित सेनाध्यक्ष (राजन्) १ ५१ ३ [सह-सेनापदयो समासे 'वोपसर्जनस्य' सूत्रेण सादेश]

सस्तः शयान इन्द्र =सुखधर्त्ता राजा) ६ २० १३ [पस स्वप्ने (अदा०) धातोर्वाहु० औणा० क्त]

सस्ताम् शयाताम् पुरुषार्थनाश- प्रापयत १ २६ ३ [षस स्वप्ने (अदा०) धातोर्लोट्। व्यत्ययेनात्मनेपदम्]

सस्तु शेताम् ७ ५५ ५ [षस स्वप्ने (अदा०) धातोर्लोट्]

सस्नितमम् अतिशयेन शुद्ध शुद्धिकारक च तथा शुद्धिहेतु भौतिक वा, अथवा स्वव्याप्त्या सर्वजगद्वेष्टयितारमीश्वर, शिल्पविद्याहेतु व्यापनशील भौतिक वा, प्र०—ष्णा शौचे, अथवा ष्णौ वेष्टने इत्यस्य रूपम् १ ८ [सस्निप्राति० अतिशायने तमप्। सस्नि =ष्णा शौचे (अदा०) धातो आदगमहनजन किकिनौ लिट् च' अ० ३ २ १७१. सूत्रेण किन्। लिड्वत्त्वाद् द्वित्वम्। सस्नि सस्नात मेघम् नि० ५ १]

सस्निना शुचिना (विद्वज्जनेन) २ २३ १० **सस्निम्**=ब्रह्मचर्यव्रतविद्याग्रहणाभ्या पवित्रम् (भा०—राज्यम्) ५ ३५ १ **सस्निः**=शुद्ध (अग्नि =विद्वज्जन) ३ १५ ५ शेते यस्मिन् स (रथ) २ १८ १ [सस्निरिति पूर्वपदे व्याख्यातम्। अथवा षस स्वप्ने (अदा०) धातोर्वाहु० औणा० नि]

सस्मिन् अन्तरिक्षे ७ ३६ ३ सर्वस्मिन्, प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति रेफवकारयोर्लोप १ ५२ १५ स्वस्मिन्, प्र०—अत्र वलोप १ १५२ ६. [सर्वप्राति० स्वप्राति० वा सप्तम्या पृषोदरादिना रूपसिद्धि]

सस्राणः सर्वगुणदोषान् प्राप्नुवन् (विद्वज्जन) १ १४६ २ [सृ गतौ (भ्वा०) धातो शानच्। शप श्लु। व्यत्ययेनात्मनेपदञ्च]

सस्राथे प्रापयत १ १५८ १. **सस्रुः**=स्रवन्ति १ ७३ ६ गच्छन्ति १ ५२ ५ प्राप्नुवन्ति ५ ५३ २ **सस्रे**=सरति गच्छति ७ ३६ १ [सृ गतौ (अदा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

सस्रुतः या समान सत्य मार्गं स्रुवन्ति गच्छन्ति ता (वाच) १ १४१ १ गमनशीलान् (विद्वज्जनान्) ४ २८ १ [समानोपपदे स्रुगतौ (भ्वा०) धातो क्विप्। समानस्य सादेशश्छान्दस। सस्रुत नदीनाम निघ० २ २३]

सस्रुषीः प्राप्तव्या (भुव =भूमय) १ ८६ ५ [सृ गतौ (भ्वा०) धातोर्लिट क्वसु। तत स्त्रिया डीप्]

सस्रोतसः समान मनोरूप स्रोत प्रवाहो यासा ता (वृत्तय) ३४ ११ [समान-स्रोतस्पदयो समास। स्रोतस्=स्रुगतौ (भ्वा०) धातो 'स्रुरिभ्या तुट् च' उ० ४ २०२ सूत्रेणासि। तुडागमश्च]

सस्वजाते स्वजेते, आश्रयत, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ १६४ २० [ष्वञ्ज परिष्वङ्गे (भ्वा०)

२ २ ११ सहमा वलेन युक्त (राजन्) ७.१६ ८ सहसि भव (विद्वज्जन) १.१४७ ५ य आत्मन सहो वलमिच्छति तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ११ २६ **सहस्यः**= सहसि वले भव पौप १४ २७. [सहस् वलनाम । निघ० २ ९. ततो भवार्थे साध्वर्थे वा यत् । अथवा सहस् पदाद् इच्छायामर्थे क्यजन्ताद् अच् कर्त्तरि । सहस्प्राति० वा 'मत्वर्थे मासतन्वो' सूत्रेण यत् । सहस्य (मास.)—एतौ (सहश्च सहस्यञ्च) एव हैमन्तिकौ (मासौ) स यद् हेमन्त इमा प्रजा सहसैव स्व वशमुपनयते तेनो हैतौ सहश्च सहस्यञ्च श० ४ ३.१ १८]

सहस्रकेतुम् असङ्ख्यातध्वजम् (रथ=यानम्) १ ११९ १. [सहस्र-केतुपदयो समास । सहस्रम् वहुनाम निघ० ३ १ केतु प्रज्ञानाम निघ० ३ ९]

सहस्रचक्षाः सहस्र चक्षासि दर्शनानि यस्माद्यस्य वा (सूर्य) ७ ३४ १० [सहस्र-चक्षस्पदयो समास । सहस्रम्=वहुनाम निघ० ३ १ चक्षस्=चक्षिङ् व्यक्तायां वाचि, अय दर्शनेऽपि (अदा०) धातोरौणा० असुन्]

सहस्रचेताः असङ्ख्यातविज्ञानविज्ञापन (इन्द्र = सेनाद्यधिपति) १ १०० १२ सहस्रो विज्ञानादि गुणो वाला (ईश्वर) आर्याभि० १.३४, ऋ० १ ७ १०.१२. [सहस्र-चेतस्पदयो समास । चेतस्=चिती सज्ञाने (भ्वा०) धातोरौणा० असुन्]

सहस्रजित् य सहस्राणि शत्रून् जयति स (राजा) १ १८३ १ असङ्ख्यात-विजेता (पावक इव दूत) ५ २६ ६. असहाय सन् सहस्र योद्धून् जेतु शील (अग्नि =विद्वान् राजा) ९ २८ [सहस्रोपपदे जि जये (भ्वा०) धातो कर्त्तरि क्विप्। 'ह्रस्वस्य पिति कृति तुगि' ति तुगागम]

सहस्रणीथ सहस्रैरसङ्ख्यैर्धार्मिकैर्नीथः प्राप्त (इन्द्र=राजा) ३ ६० ७ [सहस्र-नीथपदयो समास. । नीथ =णीञ् प्रापणे (भ्वा०) धातो 'हनिकुपिनीरमि०' सूत्रेण क्थन्]

सहस्रदातमम् अतिशयेनाऽसङ्ख्यदातारम् (सूरिं= विद्वास शिल्पिनम्) ६ ४५ ३३ [सहस्रदाप्राति० अतिशायने तमप् । सहस्रदा =सहस्रोपपदे डुदाञ् दाने (जु०) धातो क्विप्]

सहस्रदानः असङ्ख्यप्रद (वसिष्ठ =पूर्णविद्वज्जन) ७ ३३ १२ [सहस्रोपपदे डुदाञ् दाने (जु०) धातो 'कृत्य-ल्युटो वहुलम्' इति कर्त्तरि ल्युट्]

सहस्रदाना असङ्ख्यप्रदाना (राति'=दानक्रिया) ३ ३० ७ [सहस्रदानमिति व्याख्यातम् । ततष्टाप् स्त्रियाम्]

सहस्रदान्नाम् य सहस्रस्याऽसङ्ख्यातस्य दातृणा मध्ये, प्र०—अत्र 'आतो मनिन्०' अ० ३ २ ७४. अनेन वनिप्-प्रत्यय १ १७ ५. [सहस्र-दावन्पदयो समास । दावन्=डुदाञ् दाने (जु०) धातो 'आतो मनिन्०' इति वनिप्]

सहस्रदाः सहस्रमसङ्ख्य सुख ददातीति (विद्वज्जन) १३ ४० [सहस्रोपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि क्विप्]

सहस्रधारम् वहुविध ब्रह्माण्डं धरतीति त यज्ञम् १ ३. [सहस्रोपपदे धृञ् धारणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण्]

सहस्रधारा सहस्राण्यसङ्ख्या धारा प्रवाहा यस्या वाच सा ४ ४१.५ **सहस्रधाराम्**=सहस्रमसङ्ख्यानर्थान् धरति त सर्वज्ञानप्रदाम् (सुमतिं=प्रज्ञाम्) १७ ७४ सहस्र धारा हिरण्यादयो यस्यान्ता यद्वा या सहस्रमसङ्ख्यात प्राणि-जात धरति ता, भा०—सर्वधारिकाम् (मही=भूमिम्) ३३ २८ [सहस्र-धारापदयो समास । सहस्रोपपदे वा धृञ् धारणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण् । ततष्टाप् छान्दस.]

सहस्रपात् सहस्राण्यसख्याता पादा यस्मिन् स, भा०—यस्मिन् पूर्णे परमात्मन्यस्मदादीनामसङ्ख्यातानि पादादीन्यङ्गानि सन्ति स (पुरुष =परमात्मा) ३११ [सहस्र-पादपदयो समास । 'सख्यासुपूर्वस्य' इति पादस्य लोप समासान्त]

सहस्रपाथाः सहस्राण्यमितानि पाथास्यन्नादीनि यस्य स (अग्नि =पावक) ७ १ १४ [सहस्र-पाथस्पदयो समास । पाथस्=पा रक्षणे (अदा०)धातो 'उदके थुट् च' उ० ४ २०४ सूत्रेणासुन्]

सहस्रपोषम् असख्यातपुष्टिम्, भा० – असङ्ख्याता-मतुला पुष्टिम् ४.२६. [सहस्र-पोषपदयो समास । पोष = पुप पुष्टौ (दिवा०) धातोर्घञ्]

सहस्रपोष्यम् असङ्ख्यै पोषणीयम् (ब्रह्म=धनम्) ६ ३५ १ [सहस्र-पोष्यपदयो समास । पोष्यम्=पुप पुष्टौ (दिवा०) धातोर्ण्यत्]

सहस्रप्रधनेषु सहस्राण्यसङ्ख्यातानि प्रकृष्टानि धनानि प्राप्नुवन्ति येषु तेषु चक्रवर्त्तिराज्यसाधकेषु महायुद्धेषु १ ७ ४ [सहस्र-प्रधनपदयो समास । सहस्रम् वहुनाम निघ०

अग्निम्) २ १३ ८ [सह-वसुपदयो समास]

सहवीरम् वीरै सह वर्त्तमानम् (रयिं=धनम्) ३ ५४ १३ [सह-वीरपदयो समास]

सहवीराम् वीरैस्सह वर्त्तमाना सेनाम् २७ ६ [सह-वीरपदयो समासे स्त्रिया टाप्]

सहसः ब्रह्मचर्यबलयुक्तस्य (जनकस्य) ५ ३ ६ बलादिगुणै सह वर्त्तमानस्य (ईश्वरस्य विद्युदग्नेर्वा) १ ६८ २ विद्याबलवत (विदुप) १ १४१ १ प्रशस्तबलयुक्तस्य (जनस्य) १ ७४ ५ बलस्य बलवतो वायोर्वा ३ २८ ३ सहनशीलस्य (सज्जनस्य) ६ १२ १ बलिष्ठस्य (पुरुषस्य) १५ ४७ शरीरात्मबलवतो विदुप ६ ५० ६ सहत इति सहो वायुस्तस्य बलरूपस्य १ २६ १० **सहसा**= बलेनोत्साहेन वा ६ ६६ ६ सामर्थ्येनाऽऽकर्षणेन वा १ ५१ १० **सहसे**=बलप्रदाय मार्गशीर्षाय २२ ३१ **सहः**=उत्तम बलम् ३.३८ उदक बल वा ३ ३६ अनन्तसहनस्वरूप अनन्तसहनशक्ति वाला (ईश्वर) आर्याभि० २ ६, १६ ६ बलकारी मार्गशीर्ष १४ २७ बलवान् (परमात्मा) १० १५ यस्सहते स (विद्वज्जन) ६ १ १ सहनम् २८ ५ पराभावुक (अग्नि =सभाध्यक्ष) १ ३६ १८ निन्दा-स्तुति और स्वाऽपराधियो को सहन करने वाला (ईश्वर) स० प्र० २४६, १६ ६ सहनस्वभावम् (ब्रह्म) ऋ० भू० १६२, अथर्व० १३ ४ ५० यत सर्व सहते तस्मात् स एवैप सह (ईश्वर) ऋ० भू० ६१, अथर्व० १३ ४ १८ शारीर बलम् १८.३ [षह मर्षणे (भ्वा०) धातोरौणा० असुन् । सह उदकनाम निघ० १ १२ बलनाम निघ० २ ६ सहस बलस्य नि० ५ २५ सहस्प्राति०मत्वर्थे 'लुगकारेकाराश्च वक्तव्या' अ० ४ ४ १२८ वा०सूत्रेण यत् प्रत्ययस्य लुक् । सह =बल वै सह श० ६ ३ २ १४ एतौ (सहश्च सहस्यश्च) एव हैमन्तिकौ (मासौ) श० ४ ३.१.१८]

सहसस्पुत्र बलस्य पालक (अग्ने=राजन्) ५ ३ ६ बलस्योत्पादक (अग्ने=वैद्यराज विद्वन्) ३ १८ ४ **सहसस्पुत्रः**=बलिष्ठस्य वायो पुत्र इव वर्त्तमान (अग्नि) २.७ ६ [सहस्-पुत्रपदयो समासे पष्ठ्या अलुक् । अयमप्यग्निरोजसा बलेन मथ्यमानो जायते तस्मादेनमाह सहसस्पुत्रम् सहस सूनु सहसो यहुम् नि० ८ २]

सहसस्सूनो बलवता पुत्रदुष्टाना हिंसक (अग्ने=राजन्) ३ २४ ३ [सहस्-सूनुपदयो समासात् सम्बुद्धौ रूपम् । पष्ठ्या अलुक्]

सहसानम् य सर्व सहते तम् (राजानम्) ५ २५ ६ **सहसानः**=सहमान (इन्द्र =राजा), प्र०—अत्र वर्णव्यत्ययेन मन्य म ४ १७ ३ [षह मर्षणे (भ्वा०) धातो शानच् । वर्णव्यत्ययेन मकारस्य सकार । षह मर्षणे (भ्वा०) धातोर्वा 'ऋन्जिवृधि०' उ० २ ८७ सूत्रेण असानच्]

सहसावन् सहोऽधिक बल विद्यते यस्य तत्सम्बुद्धौ (राजन्) प्र०—अत्र प्रथमार्थे तृतीयाया अलुक् ३४ २३ बलेन तुल्य (विद्वज्जन) ५ २० ४ अत्यन्तबलवन् (सेनाध्यक्ष), प्र०—सहसा इत्यव्ययम्, भूमार्थे मतुप् च १ ६१ २३ प्रशस्तबलयुक्त (अग्ने=विद्वज्जन) ३ १ २२ बहु सहो बल सहन वा विद्यते यस्य तत्सम्बुद्धौ (विद्वज्जन) १ १८६ ५ [सहस्प्राति० प्रशसार्थे भूम्न्यर्थे वा मतुप् । समासे प्रथमार्थे तृतीयाया अलुक्]

सहस्विन् बहुबलयुक्त (अग्ने=राजन्) ४ ११ १. [सहस्प्राति० भूम्न्यर्थे छान्दस इनि]

सहसूक्तवाकः ऋग्यजुरादिलक्षणै सूक्तैर्वाकै सह वर्त्तमान (यज्ञ =गृहाश्रम) ८ २२ [सूक्त-वाकपदयो समासे तत सह-पदेन समास]

सहसोमाः सोमेन श्रेष्ठगुणसमूहेन सह वर्त्तमाना इव (गृहपतय =गृहाश्रमिण) ८ ११ [सह-सोमपदयो समास]

सहस्कृत य सहसा करोति तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ६ १६ ३७ सहो बल कृत येन तत्सम्बुद्धौ (अग्ने) १ ४५ ६ **सहस्कृतम्**=य सह सहन करोति कारयति वा तम् (जगदीश्वर भौतिकमग्निं वा) ३ १८ **सहस्कृतः**= सहसा बलेन निष्पन्न (राजा प्रजाजनो वा) ३३ ८३ [सहस्-कृतपदयो समास । सहन् बलनाम निघ० २ ६ बल वै सह श० ६ ३ २ १४]

सहस्तमा अतिशयेन सोढारौ (इन्द्राग्नी=वायुविद्युतौ) ६ ६० १ [सहस्प्राति० अतिशायने तमप् । ततो द्विवचनस्याकारादेश । सहस्=षह मर्षणे (भ्वा०) धातोरसुन् औणादिक]

सहस्तोमाः स्तोमै श्लाघाभिस्सह वर्त्तमाना यद्वा सहस्तोमा शास्त्रस्तुतयो येषान्ते (ऋषय =रागद्वेषदोषान् त्यक्तवन्त परस्परस्मिन् प्रीतिमन्तो जना) ३४ ४६ [सहस्तोमपदयो समास । स्तोम स्तवनात् नि० ७ १२]

सहस्त्रियम् सहप्राप्ता भार्याम् १२ ४७ [सह-स्त्रीपदयो समास]

सहस्य सहसि बले साधो (अग्ने=विद्वज्जन)

वा प्र०—अत्र 'भुज पालनाऽभ्यवहारयो, इत्यस्मात् लडि सिपि 'बहुल छन्दसि' इति शप स्थाने आदिर्ष्टस्य श्नम स्थाने श्लु 'श्लौ' इत्यद्वित्व 'बहुल छन्दसि' इतीडागमश्च १.३३ ६]

अबूबुधत् बोधयेत् १ १६१ १३ [बुध अवगमने (भ्वा०) धातोर्णिचि लुडि च रूपम् 'दीर्घो लघो' रिति दीर्घत्वम् अभ्यासस्य]

अबोधयः बोधयसि १ १०३ ७ बोधय ५ ७६ १. **अबोधि**=बोधयति १ ६२ ११ बुध्यते विज्ञायते १ १५७ १ प्रबुध्यते १५ २४ बुध्यताम् ३ ५६ ४ [बुध अवगमने (भ्वा०) धातोर्णिजन्ताल्लङ्]

अब्जाम् अप्सु जातम् (अहिं=मेघम्) ७ ३४ १६. **अब्जाः**=योऽप प्राणान् जनयति (ब्रह्म जीवो वा) १२ १४ योऽपो जनयति (ईश्वर) १० २४ योऽद्भ्यो जात (जीवात्मा) ४ ४० ५ [अप् उपपदे 'जनी प्रादुर्भावे' धातोर्विट्। नकारस्याकारश्च। अब्जाम् अप्सुजाम् नि० १० ४२ एप (सूर्य) वा अब्जा अद्भ्यो वा एप प्रातरुदेत्यप साय प्रविशति। ऐ० ४ २०]

अब्जिते योऽप्सु जयति तस्मै (इन्द्राय=विद्वत्सभासेनेशाय) २ २१ १ [अप कर्मनाम (निघ० २ १) तदुपपदे जि जये धातो क्विप् तुगागमश्च]

अब्दया येऽपो जलानि ददति ते (मरुत=मानवा) ५ ५४ ३ [अप उदक नाम (निघ० १ १२) तदुपपदे डुदाञ् दाने (जु०) धातो क प्रत्यय। 'सुपा सुलुगि' ति जस स्थाने यादेश]

अब्दः सवत्सर १२ ७४ [अप् उपपदे दा धातो क]

अब्दिमान् जलदवान् (मेघ) ५ ४२ १४ [अब्दप्राति० मतुप् अब्दशब्दस्य अब्दिभाव]

अब्रवम् उक्तवानस्मि १ १०८ ६ ब्रूयाम् ६ ५५ ५ **अब्रवीत्**=ज्ञापयति, प्र०—अत्र लडर्थे लङन्तर्गतो ण्यर्थ, प्रसिद्धीकरण धात्वर्थश्च १ २३ २० ब्रूयादुपदिशेत् १ १६१ १२ ब्रूते १ १६१ १६ **अब्रवीत**=उपदिशत ४ ३५ ३ **अब्रुवन्**=ब्रूयुरुपदिशेयु १ १६१ २ ब्रुवन्तु उपदिशन्तु ऋ० भू० १३४, ३१ २१ [ब्रूञ् व्यक्तायां वाचि (अदा० उभ०) धातोर्लङ् 'ब्रुव ईट्' इति हलादौ पिनीडागम]

अब्रवीतन उपदिशेत १ १६१ १२ ब्रूयु १ १६१ ८ ब्रूयात् १ १६१ ३ [ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लङि मध्यमबहुवचने तस्य स्थाने 'तप्तनप्तनथनाश्चे' ति तनप्। हलादौ पितीडागम]

अब्रह्मता अधनता ५ ३३ ३ वेदेश्वरनिष्ठारहितता १० २२. [ब्रह्म धननाम। निघ० २ १० ततो भावे तल् प्रत्यय नञ्समास ब्रह्म च वृहि वृद्धौ धातो 'वृ हेर्नोऽच्च' उ० ४ १४६ सूत्रेण मनिन् नकारस्याकार. यणादेशश्च]

अब्रह्मा अवेदवित् (दस्यु=दुष्टस्वभावो जन) ४ १६ ६ **अब्रह्माणः**=अचतुर्वेदविद (जना) ७ २६ १ [सिद्धि पूर्वपदे द्रष्टव्या तस्य पुसि 'ब्रह्मा' रूपम् नञ्समास]

अब्राह्मणाः न ब्राह्मणा, अब्राह्मणा, (प्राजापत्याजना), अविद्यमानो ब्राह्मणो येषा ते (प्राजापत्याजना) ३० २२ [ब्रह्मन्प्राति० 'तदधीते तद्वेद' इत्यण्। ब्रह्म वेदस्तधीते वेद वेति ब्राह्मण ब्रह्मणोऽपत्यमिति विग्रहे ब्रह्मन् अण् 'अन' प्रकृतिभावाट्टिलोपो न भवति। नञ्समासश्च समानार्थो ब्रह्मन्शब्दो ब्राह्मणश्च महाभा० ५ १ १]

अभक्तम् असेवितम् (आयु=जीवनम्) १ १२७ ५ विभागरहितम् (धनादिकम्) ३ ३० ७ [भज सेवायाम् (भ्वा०) धातो क्त। नञ्समास]

अभक्त भजेत ३ ३० १२ **अभक्षि**=सेवे ४ ३१ ५ **अभजत्**=सेवते २ ३८ १ सेवेत १ १४६ ५ भजेत् २ २४ १४ **अभजन्त**=भजन्ति १ ६१ १ भजन्तु १६ ५२ नित्यमानन्द सेवन्ते, प्र०—अत्र लडर्थे लङ् १ २० ८ **अभजः**=सेवेथा ३ ३५ ६ सेवस्व ३ ४७ ३ [भज सेवायाम् (भ्वा० उभ०) धातोर्लुङ् 'झलो झली' ति सिचो लोप 'अभजत्.' 'अभज' इत्येतयो परस्मैपदे, 'अभजन्त' प्रयोगे आत्मनेपदे च लङ्]

अभयन्त डरते है ५ ३० ५ [जिभी भये (जु०) धातोर् लङ् 'बहुल छन्दसी' ति शप श्लुर्न भवति]

अभयम् भयरहितम् (धार्मिक जनसमूहम्) ४ २६ ३ भयराहित्यम् १८ ६ निर्भयम् (प्राणिसमूहम्) ३६ २२ अविद्यमान भय यस्य यस्माद्वा (सज्जनम्) ६ २८ ४ भयवर्जितम् (ज्योति=प्रकाशम्) २ २७ ११ **अभयानि**=अविद्यमान भय येषु तानि (राज्यप्राणिन) ११ १५ **अभये**=भयरहिते व्यवहारे ३ ३० ५ [जिभी भये (जु०) धातो 'एरच्' भावे इत्यच् प्रत्यय नञ्समास। 'अज्विधौ भयादीनामुपसख्यानम्' इत्यपुसख्यानात् नपुसके ऽप्यच् भवति स्वर्गो वै लोकोऽभयम् श० १२ ८ १ २२]

अभयसनि अभय सनति सम्भजति येन (अपत्यम्)

३ १. प्रधने सग्रामनाम निघ० २.१७]

सहस्रभरम् य सहस्रमसङ्ख्य बिभर्त्ति तम् (श्रेष्ठ विजयम्) ६ २० १ [सहस्रोपपदे डुभृञ् धारणपोषणयो (जु०) धातो पचाद्यच्]

सहस्रभृष्टिम् भृष्टयो भर्ज्जनानि दहनानि यस्मात्तम् (वध=दुर्भिक्षम्) ५ ३४ २ सहस्राणां भृज्जक छेदकम् (वज्र =शस्त्रविशेषम्) ६ १७ १० सहस्रमसख्याता भृष्टय पाका यस्मात्तम् (वज्रम्) १ ८५ ६ **सहस्रभृष्टिः**=सहस्रमसङ्ख्याता भृष्टय पीडा दाहा वा यस्मात् स (वज्र) १ ८० १२. सहस्राणि वहूनि भृष्टय पाका यस्मात् स सूर्यस्य प्रकाश १ २४ [सहस्र-भृष्टिपदयो समास । भृष्टि =भ्रस्ज पाके(तुदा०) धातो स्त्रिया क्तिन्। 'ग्रहिज्या०' इति सम्प्रसारणम्]

सहस्रम् असङ्ख्यातगुणसम्पन्नम् (इन्द्र=सभाध्यक्षम्) १.८० ६ असङ्ख्यम् (जगत्) १ १८८ ८ असङ्ख्याता (स्तोमा =स्तुतय) १ ११ ८ 'असख्या (रुह.=नाड्य-ङ्कुरा) १२ ७६ असख्यमतुल बोधम् १८ ६२ सर्वमिद जगत्सहस्रनामकम् ऋ० भू० ११६, अथर्व० ६ ५ १७ सव ससार को स० वि० २०८, अथर्व० ६ ५.१७ असङ्ख्यगृहाश्रमव्यवहारम् १५ ५५ **सहस्रस्य**=असङ्ख्य-पदार्थयुक्तस्य जगत, असङ्ख्यपदार्थविशेषस्य, असङ्ख्यात-स्थूलवस्तुन १५ ६५. **सहस्राय**=अतुलविज्ञानाय, भा०—पुष्कलविद्यायै १३ ४० [सहस्रम् वहुनाम निघ० ३ १ सहस्रम्=सहस्वत् नि० ३ १० सहस्र—सर्व वै सहस्रम्। श० ४ ६ १ १५ भूमा वै सहस्रम् श० ३ ३ ३ ८. परम सहस्रम् ता० १६ ६ २ तदाहु किं सहस्रमितीमे लोका इमे वेदा अथो वागिति ब्रूयात् ऐ० ६ १५. आयुर्वै सहस्रम् तै० ३ ८ १५ ३ पशव सहस्रम् ता० १६ १० १२]

सहस्रमीळ्हे सहस्राणि मीळ्हानि धनानि यस्मात् तस्मिन् (आजौ=सङ्ग्रामे) १.११२ १० [सहस्र-मीळ्ह-पदयो समास । मीळ्हे सग्रामनाम निघ० २ १७]

सहस्रमुष्क असङ्ख्यवीर्य (इन्द्र=सेनापते) ६ ४६ ३ [सहस्र-मुष्कपदयो. समास । मुष्क =मुष स्तेये (क्र्या०) धातो 'सृवृभूशुषि०' उ० ३ ४१. सूत्रेण कक्]

सहस्रमूतिः सहस्रमूतयो रक्षणादीनि यस्मात् स (राजप्रजाजन) १ ५२ २ [सहस्र-ऊतिपदयो समास । ऊति =अव रक्षणगत्यादिषु (भ्वा०) धातो स्त्रिया क्तिन्]

सहस्रम्भरः सहस्रस्य जगतो धर्त्ता पोषको वा (अग्नि =विद्युदादिकार्यकारणस्य स्वरूप) २.६.१. य सहस्रममख्य शुभगुणसमूह बिभर्त्ति स (प्राप्तमनुष्यजन्मनर) ११ ३६ [सहस्रोपपदे डुभृञ् धारणपोषणयो (जु०) धातो 'सज्ञाया भृतृवृजि०' अ० ३ २ ४६ सूत्रेण खच्। सहस्र-म्भर=एषा ह वाऽग्नस्य (अग्ने) सहस्रम्भरता यदेनमेक सन्त वहुधा विहरन्ति ऐ० १ २८]

सहस्रयोजने सहस्राण्यसख्यानि चतु क्रोशपरिमितानि यस्मिन् देशे तस्मिन् १६ ५४ एतत्सख्यापरिमिते देशे १६ ६३. [सहस्र-योजनपदयो समास । सहस्रम् वहुनाम निघ० ३ १ योजनानि अड्गुलिनाम निघ० २.५ सहस्र-योजन—(यजु० १६ ५४) अयमग्नि सहस्रयोजनम् श० ६ १ १ २६ एतद्ध परम दूर यत्सहस्रयोजनम् श० ६ १.१ २८]

सहस्ररेताः अतुलवीर्य (विविद्वान्=श्रेष्ठो विद्वज्जन) ४ ५ ३ [सहस्र-रेतस्पदयो समास]

सहस्रवत् सहस्रमसङ्ख्यपरिमाण विद्यते यस्मिँस्तत् (सुवीर्यम्) ३ १३ ७ [सहस्रप्राति० मतुप्]

सहस्रवल्शम् सहस्राण्यसख्या वल्गा अड्कुरा इव शास्त्रवोधा यस्मिँस्त विज्ञानमय व्यवहारम् ७ ३३ ६. **सहस्रवल्शाः**=यथा वहुमूला वृक्षा रोहन्ति तथा ५ ४३ सहस्राऽड्कुरा वनस्पतय इवाऽङ्गोपाङ्गै सह वर्त्तमाना (दूर्वादय) ३ ८ ११ [सहस्र-वल्गपदयो समास]

सहस्रवीरम् सहस्राणि वीरा यस्मिँस्तम् (वह्नि = विज्ञानम्) १ १८८ ४ [सहस्र-वीरपदयो समास]

सहस्रवीर्या असङ्ख्यातपराक्रमा, भा०—जितेन्द्रिया (स्त्री) १३ २६ [सहस्रवीर्यपदयो समासे स्त्रिया टाप्]

सहस्रशः असख्याता वहव (रुद्रा =शूरवीरा जना) १६ ६ [सहस्रप्राति० वीप्साया शस्]

सहस्रशीर्षा सहस्राण्यसख्यातानि शिरासि यस्मिन् स (पुरुष =परमात्मा) ३१ १ [सहस्र-शिरस्पदयो समासे शिरस शीर्षन्भाव. 'शीर्षच्छन्दसि' सूत्रेण]

सहस्रशृङ्गः सहस्राणि शृङ्गाणि तेजासि किरणा यस्य सूर्यस्य स ७.५५ ७ [सहस्र-शृङ्गपदयो समास । शृङ्गाणि ज्वलतो नाम निघ० १ १७]

सहस्रसातमम् सहस्रमसङ्ख्यात सुख सनुते ददाति येन तदतिशयितम् (द्युम्न=ज्ञानम्), प्र०—'जनसनखन-क्रमगमो विट्' अ० ३ २ ६७ अनेन सहस्रोपपदात् सनोतेर्विट् 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१ अनेन नकारस्या-कारादेश, ततस्तमप् १ ६ ८ असख्याना पदार्थानामतिशयेन विभक्तारम् (सूरिं=विद्वास शिल्पिनम्) ६ ४५ ३३.

सहस्रसातमः=य सहस्रमराङ्ग्य सनोति ददाति सोऽतिशयित (अग्नि=महाविद्वज्जन) ३ ३ ६ अतिशयेन सहस्रस्य विभाजक (वाजी=अश्व) १ १७५ १ [सहस्रोपपदपरा सम्भक्तौ (भ्वा०) धातो 'जनसनखनक्रमगमो विट्' इति विट्। 'विड्वनोरनुनासिकस्यात्' इत्यात्त्वम्। सहस्रसाप्राति० अतिशायने तमप्]

सहस्रसातमाम् सहस्राणि बहूनि धनानि सुखानि वा सनोति ददाति यया साऽतिशयिता ताम् (ऊर्ति=रक्षा प्राप्तिमवगमञ्च), प्र०—अत्र सहस्रोपपदात् परा दाने इत्यस्माद्धातो 'जनसन०' इत्यनेन विट् 'विड्वनोरनुनासिकस्यात्' इति नकारस्याकारादेश, ततस्तमप्, ततष्टाप् १ १० १० [सहस्रोपपदे परा दाने (तना०) धातोर्विट्। ततोऽतिशायने तमप्। ततष्टाप् स्त्रियाम्]

सहस्रसाम् सहस्राणि कार्याणि सनति सम्भजति (यस्तम् अश्व=विद्युतम्) १ ११८ ६ सहस्र बह्वीर्विद्या सनोति तम् (ऋषि=वेदमन्त्रार्थद्रष्टार, शुभगुणोपदेष्टार, सकलविद्याप्रत्यक्षकारिण जनम्) १ १० ११ या सहस्राणि असख्यातानि कार्याणि सनोति ताम् (द्युत=कारणस्था दीप्तिम्) ३ १६ **सहस्रसाः**=य सहस्राणि सनति विभजति स (राजा) ४ ३८ १० य सहस्राणि पदार्थान् सनोति विभजति स (अग्नि) १ १८८ ३ ये सहस्र विद्याविषयान् सनन्ति ते (राजपुरुषा) ६ १७ [सहस्रोपपदे परा सम्भक्तौ (भ्वा०) परा दाने (तना०) धातोर्वा 'जनसनखनक्रमगमो विट्' अ० ३ २ ६७ सूत्रेण विट्। 'विड्वनोरनुनासिकस्यात्' इत्यात्त्वमनुनासिकस्य]

सहस्रसावे सहस्र-याऽसख्यस्य धनस्य साव प्रसवो यस्मिन् सङ्ग्रामे ३ ५३ ७ [सहस्र-सावपदयो समास। साव=पु प्रसवैश्वर्ययो (भ्वा०) धातोर्घञ्]

सहस्रस्थूणम् सहस्रमसख्या वा स्थूणा यस्मिँस्तज्जगत्, राज्य, यान वा ५ ६२ ६ **सहस्रस्थूणे**=सहस्राणि स्थूणा स्तम्भा यस्मिँस्तस्मिन् (सदसि=सभास्थाने) २ ४१ ५. [सहस्र-स्थूणापदयो समास। स्थूणा=तिष्ठति छादनादिकमनया सा स्थूणेति विग्रहे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'रास्नासाग्नास्थूणावीणा' उ० ३ १५ सूत्रेण न-प्रत्यय आकारस्य ऊकारादेशो निपात्यते। तत स्त्रिया टाप्]

सहस्रा सहस्राण्यसख्यातानि (अवद्विप=शत्रून्) १ १३३ ७ बहुविधा (ऊतय=रक्षा) ४.३१ १०. [सहस्रम् बहुनाम निघ० ३ १ ततश्चेर्लोपश्छन्दसि]

सहस्राक्ष सहस्रेष्वसख्यातेषु व्यवहारेष्वक्षि विज्ञान यस्य तत्सम्बुद्धौ, भा०—असख्यप्राणिशरीराणि प्रविश्यानेकनेत्रादिभिरङ्गै दर्शनादीनि कार्याणि कर्तुं समर्थ (अग्ने=योगिराज) १७ ७१. सहस्रेष्वसख्यातेषु युद्धकार्येष्वक्षिणी यस्य तत्सम्बुद्धौ, भा०—सर्वतो विदितसाम-दाम-दण्ड-भेदादिराजनीत्यवयवकृत्य (सेनाध्यक्ष) १६ १३ **सहस्राक्षः**=सहस्राण्यसख्यातान्यक्षीणि यस्मिन् ग (पुरुष=परमात्मा) ३१ १. असख्यदर्शन' (अग्नि=मनुष्य) १३ ४७ **सहस्राक्षाय**=सहस्रेष्वसख्यातेषु शास्त्रविषयादिष्वक्षिणी यस्य तस्मै विदुषे ब्राह्मणाय १६ २६ सहस्रेषु भृत्येषु अक्षिणी यस्य तस्मै (सेनापतये) १६ ८. [सहस्र-अक्षिपदयो समास। 'अक्ष्णोऽदर्शनात्' अ० ५ ४ ७६ सूत्रेण 'वा छन्दसि' नियमेन छन्दसि दर्शनार्थेऽपि समासान्तोऽच्]

सहस्राक्षा सहस्राण्यसख्यातानि अक्षीणि साधनानि याभ्यान्तौ (इन्द्रवायू=विद्युत्पवनौ) १ २३.३ [सहस्राक्ष इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

सहस्राक्षरा सहस्राणि असख्यातान्यक्षराणि यस्या सा (विदुषी स्त्री) १ १६४ ४१ [सहस्र-अक्षरपदयो समासे स्त्रिया टाप्। सहस्राक्षरा बृहदका नि० ११ ४०]

सहस्रिणम् सहस्रमसख्यात प्रशस्त सुख विद्यते यस्मिँस्तम् (रयिं=धनसमूहम्) १ ६४ १५ सहस्रमसख्याता गुणा विद्यन्ते यस्मिँस्तम् (वाज=बोधम्) १ १२४ १३ सहस्रमसख्या पदार्था विद्यन्ते यस्मिँस्तम् (रयिं=धनम्) ४ ४६ ४ सहस्रैर्योद्भिभि सयुक्तम् (वाज=सङ्ग्रामम्) ६ ८ ६ असङ्ख्य बल विद्यते यस्मिंस्तम् (वाज=वेगम्) ३ २२ १ सहस्राण्यसख्यातानि गुणानि यस्मिन् सन्ति तम् (वाज=पदार्थविज्ञानम्), प्र०—'तप सहस्राभ्या विनीनी' अ० ५ २ १०२ इति सहस्रशब्दादिनि प्रत्यय १ ५ ६ **सहस्रिणः**=असख्यातसुखाङ्गयुक्तान् (पदार्थान्) २ २७ असख्यपुरुषधनयुक्तस्य (वायो=राज्ञ) ४ ४८ ५ सहस्रमसङ्ख्याता वेगादयो गुणा सन्ति येषान्ते (वायुवेगा) २ ४१ १ **सहस्री**=असङ्ख्य (रयि=धनम्) ७ ४ ६ सहस्राण्यसख्याता उत्तमा मनुष्या पदार्था वा विद्यन्ते यस्य स (सम्राट्=चक्रवर्त्ती राजा) ७ ५८ ४ सहस्र सर्व सुखमस्मिन्निति स (रयि=श्री) ६ १५ १२ [सहस्रमिति बहुनाम निघ० ३ १ तत 'तप सहस्राभ्या विनीनी' अ० ५ २ १०२ सूत्रेण इनि]

सहस्रिणी सहस्राण्यसख्याता विद्याविषया विद्यन्ते

यस्या सा (वेदचतुष्टयी) ७ १५ ६ असख्या पदार्था दीयन्ते यस्या सा (राति =दानक्रिया) ६ ४५ ३२ **सहस्रिणीभिः**=सहस्राण्यसख्या वेगा विद्यन्ते यासु गतिषु ताभि २८ २८ सहस्राणि बहूनि शूरवीरसङ्घा यासु ताभि (सेनाभि) १ १३५ ३ सहस्राणि प्रशस्तानि पदार्थप्रापणानि विद्यन्ते यासु ताभि (ऊतिभि =रक्षणादिभि) प्र०—अत्र प्रशसार्थ इनि १ ३० ८ **सहस्रिणीः**=असङ्ख्याता (इष =अन्नानि) २ ६ ५ बह्वी (इष) १ १८८ २. [सहस्रप्रातिप० मत्वर्थे 'तप सहस्राभ्या विनीनी' सूत्रेण इनि । तत स्त्रियाम् 'ऋन्नेभ्यो ङीप्' अ० ४ १.५ सूत्रेण ङीप्]

सहस्रियम् सहस्रेषु भवम् (प्रजाजनम्) ७ ५६ १४ **सहस्रियः**=सहस्रेणाऽसख्यातेन योद्धृसमूहेन सम्मितस्तुल्य (अग्नि =पावक इव सेनापति) १५ ५२ [सहस्रप्रातिप० भवार्थे 'समुद्राभ्राद् घ' अ० ४ ४ ११८ सूत्रेण घ]

सहस्रियासः सहस्राणि (ऊर्म्मय =तरङ्गा) १ १६८ ८ [सहस्रियमिति व्याख्यातम् । ततो जसो ऽमुगागम]

सहस्व अभिभव, तिरस्कुरु, प्र०—सह अभिभवे इत्यस्य प्रयोग ३ २४ १ वली भव, भा०—वशे नय १२ ६६ क्षमस्व ६ ३७ **सहः**=सहसे, प्र०—लडि मध्यमैकवचनेऽडभाव १ १७४ ८ [षह मर्षणे (भ्वा०) धातोर्लोट् । अन्यत्र लड् । अटोऽभाव । व्यत्ययेन परस्मैपदञ्च]

सहस्वत् सहोऽतिशयित सहन विद्यते यस्मिन् तद्यथा स्यात्तथा, (मख =पालनशिल्पाख्यो यज्ञ) प्र०—अत्राऽतिशये मतुप् १ ६ ८ [सहस्प्रातिप० अतिशायने तमप् । सहस् इति व्याख्यातम्]

सहस्वतः प्रशस्त सहो बल विद्यते यस्मिँस्तस्य (अग्ने) १ ६७ ५ बलवत (सेनेशस्य) २ १३ ११ **सहस्वन्तः**=सह सहन विद्यते येषा ते (जना) प्र०—अत्र भूम्न्यर्थे मतुप् ३ १८ **सहस्वान्**=सहनकर्त्ता (विद्वज्जन) ६ ५ ६ अत्यन्तबलयुक्त (परमेश्वर) ६ २२.१ सहो बहुबल विद्यते यस्य स (इन्द्र =सेनापति) १७ ३७ **सहस्वः**=बहुबलयुक्त, सकलविद्याविद्वा (विद्वज्जन) ३ १४ २ प्रशस्त बलयुक्त (वीरपुरुष) ७ ४ ४ सोढु शील (वैद्यजन) १.१८६ ४ बहुसहनादिगुणयुक्त (विद्वन्) ५ ६ ७ [सहस्प्रातिप० प्रशसार्थे भूम्न्यर्थे वा मतुप् । सह बलनाम निघ० २ ६]

सहावा सहन कर्त्ता (राजकर्मचारी) ६ १८ २ य सहैव वनति सम्भजति (देव =विद्वज्जन) ७ ४५ ३ सोढा (भूपति) ३ ४६ ३ [सह =षह मर्षणे (भ्वा०) धातोर् घनर्थे क । सहप्रातिप० मत्वर्थे, वनिप् । पूर्वस्य सहिताया दीर्घ । अन्यत्र सहोपपदे वन सम्भक्तौ (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' विच् । पूर्वस्य सहिताया दीर्घ, धातोर्नकारस्यात्त्वम्]

सहावान् बलवान् (सेनेश) प्र०—अत्राऽन्येषामपि० दीर्घ १ १७५ ३ सहो बहु सहन विद्यते यस्मिन् स (ओषधिसार) १ १७५ २ [सहप्रातिप० भूम्न्यर्थे मतुप् । सह.=षह मर्षणे (भ्वा०) धातोरच् । सहम्प्रातिप० वा मतुप् । वर्णव्यत्ययेन सकारस्याकार । सह बलनाम निघ० २ ६]

सहासः सहनशीला बलवन्त (मरुत =मनुष्या) ७ ३४ २४ [सहप्रातिप० जसोऽसुक् । सह =षह मर्षणे (भ्वा०) धातोरच्]

सहिष्ठ अतिशयेन सोढा (राजन्) ६ १८ ४ [षह मर्षणे (भ्वा०) धातो कर्त्तरि तृजन्तात् 'तुञ्छन्दसि' इष्ठन् । तृचो लोप]

सहीयस अतिशयेन बलयुक्तान् सोढॄन् (नॄन्=मनुष्यान्) १ १७१ ६ अतिशयेन सहनशीलान् बलिष्ठान् (सज्जनान्) ४ ५५ १ **सहीयान्**=अतिशयेन सोढा (वीरजन) १ ६१ ७ [षह मर्षणे (भ्वा०) धातो कर्त्तरि तृजन्तात् 'तुश्छन्दसि' अ० ५ ३ ५६ सूत्रेणातिशायन ईयसुन् । 'तुरिष्ठेमेयस्सु' सूत्रेण तृचो लोप]

सहीयसि याऽतिशयेन सोढ्रि (साध्वि स्त्रि) ५ ७६ २ [सहीयस् इति व्याख्यातम् । तत स्त्रिया डीवन्तात् सम्बुद्धौ रूपम्]

सहुरिः सहनशील (जन) ७ ५८ ४ सहनस्वभाव (शमादिशुभकर्माचारिजन) २ २१ ३ **सहुरी**=सोढारौ (इन्द्राग्नी=वायुविद्युतौ) ६ ६० १ **सहुरे**=सहनशीलेन्द्र (राजन्) ४ २२ ६ [षह मर्षणे (भ्वा०) धातो 'जसिसहोरुरिन्' उ० २ ७३ सूत्रेण-उरिन्]

सहूतिभिः समाना हूतय आह्वानानि च सहूतयस्ताभि. १ ४५ १० **सहूती**—समाना हूतिराह्वान ययोस्तौ (अग्नीषोमौ=वाय्वग्नी) १ ६३ ६ [समाना-हूतिपदयो समासे समानस्य सादेश । हूति =ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो स्त्रिया क्तिन्]

सहूती समानप्रशसया ७ २७ ४ समानया स्पर्द्धया २ ३३ ४ [समाना-हूतिपदयो समासे समानस्य सादेश ।

हूति =ह्वेञ् स्पर्धाया शब्दे (भ्वा०) धातो स्त्रिया क्तिन्। तत 'सुपा सुलुक्' सूत्रेण टास्थाने पूर्वसवर्णदीर्घश्छान्दस]

सहृदयम् सव के समान हृदय (गृहस्थजन) स० वि० १४१, अथर्व० ३ ३० १ [समान-हृदयपदयो समासे समानस्य सादेशश्छान्दस]

सहोजाः य सहसा वलेन प्रसिद्ध (दूत =जीव) १ ५८ १ य सहसा वलेन जात (इन्द्र =सेनापति) १७ ३७ [सहस् उपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड । वचनव्यत्ययेन सो स्थाने जस् । सह वलनाम निघ० २ ९.]

सहोदाम् वलप्रदम् (इन्द्र=राजानम्) ६ १७ १३ य सहो वल ददाति तम् (इन्द्र=सम्राजम्) ७ ३६ **सहोदाः**=वलप्रदा (राजक्रिया) १.१७४.१० वलप्रद (सभेश) १ १७१ ५ [सहसुपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि क्विप् । सह वलनाम निघ० २ ९]

सहोभरिः य सहो वल विभर्त्ति स (राजा) ५ ४४ ३ [सहसुपपदे डुभृञ् धारणपोषणयो (जु०) धातो 'फलेग्रहिरात्मम्भरिश्च' अ० ३ २ २६ सूत्रे चकारस्यानुक्तसमुच्चयार्थकत्वाद् इन्]

सहोवृधम् य सहसा वलेन वर्धते त, वलस्य वर्धक वा (आप्त विद्वज्जनम्) ३ १० ९ सहो वल वर्धयतीति सहो वृधम् (अग्नि=सर्वाभिरक्षकमीश्वरम्) १.३६ २ [सहस्उपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

सहौजसः ओजसा वलेन सह वर्त्तमाना (स्त्रिय) १० ४ [सह-ओजस्पदयो समास]

सह्यसः सहीयसोऽतिशयेन वलवत (विद्वज्जनस्य) १.१२० ४ [प्र०—अत्र सहधातोरसुन् ततो मतुप् । तत ईयसुनि विन्मतोर्लुगिति मतुव्लोप । टेरिति टिलोप । छान्दसो वर्णलोपो वेतीकारलोप]

सह्याः सहन कुर्या १ १५२ ७ [षह मर्षणे (भ्वा०) धातोर्लिङि मध्यमैकवचने रूपम्]

सह्याः सोढु योग्या (दीप्तय) २ ११ ४ [पह मर्षणे (भ्वा०) धातो शकिसहोश्च' अ० ३ १ ९९ सूत्रेण यत्]

सह्योः सहनशीलस्य (सज्जनस्य) ६ १८ १२ [षह मर्षणे (भ्वा०) धातोर्वाहु० औणा० युच् युन् वा]

संयक्षतः सङ्गच्छत २ ३ ७ [सम्+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्लेटि सिपि प्रथमद्विवचने रूपम्]

संयत् सङ्गति १५ १८ सयम १५ ५ **संयतः**= सयमयुक्ता (प्रजा) ५ ३४ ९ **संयता**=सयमयुक्तेन (विज्ञानेन) १ १५१ ८ सयच्छन्ति येन तेन (द्युम्नेन= धनेन यशसा वा) ६ १६ २१ [सम्+यमु उपरमे (भ्वा०) धातो सम्पदादित्वात् 'अन्येभ्योऽपि दृश्यते' इति वा क्विप्। 'गम क्वौ' अ० ६ ४ ४० इत्यत्र 'गमादीनामिति वक्तव्यम्' इत्यनुनासिकलोपे तुगागम । सयत् सग्रामनाम निघ० २ १७]

संयतम् कृतसयमम् (स्वस्ति=सुखम्) ६ २२ १० **संयतः**=सम्यङ् नियमित (अग्नि =विद्वज्जन) २ २ २ [सम्+यमु उपरमे (भ्वा०) धातो क्त । 'अनुदात्तोपदेश०' अ० ६ ४ ३७ सूत्रेणानुनासिकलोप]

संयती सम्मिलिते (योगक्षेमसाधने) ५ ३७ ५ सयमेन गच्छन्त्यौ द्यावापृथिव्यौ २ १२ ८ [सम्+इण् गतौ (अदा०) धातो शत्रन्तान् ङीप्]

संयद्वसुः यज्ञस्य सङ्गतिकरण १५ १८ [सयत्-वसुपदयो समास]

संयद्वीरम् सयता सयमयुक्ता वीरा यस्मिँस्तम् (अग्न्यादिपदार्थवोधम्) २ ४ ८ [सयत-वीरपदयो समास । पूर्वपदस्यान्त्यलोपश्छान्दस]

संयन्ति प्राप्नुवन्ति २ ३५ ३ सम्यग् गच्छन्ति १ १९० ७ **संयन्तु**=सम्यक् प्राप्नुवन्तु १ १२५ ७ [सम्+इण् गतौ (अदा०) धातोर्लेट् । अन्यत्र लोट्]

संयासाय सम्यग् गमनाय ३९ ११ [सम्+यसु प्रयत्ने (दिवा०) धातोर्घञ्]

संयेमुः सम्यक्तया यच्छेयु ३ ३८ ३ [सम्+यमु उपरमे (भ्वा०) धातोर्लिट्]

संयौमि सम्यङ् मिश्रयामि, अग्नौ प्रक्षिप्य वियोजयामि वा १ २२ [सम्+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लट्]

संरभध्वम् सम्यक् प्रारम्भ कुरुत, भा०—मङ्गलान्याचरत ३५ १० **संरभस्व**=सम्यगारम्भ कुरु २७ ५. **संरभेमहि**=सम्यक्तया शत्रुभि सह युध्येमहि १ ५३ ५ [सम्+रभ राभस्ये (भ्वा०) धातोर्लोट । अन्यत्र लिड्]

सँरराण. सम्यग् दातृशील (प्रजापति =परमेश्वर), प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् 'वहुल छन्दसि' अ० २ ४ ७६ इति शप स्थाने श्लु ८ ३६ सम्यक् सुखानि राति ददाति स (यम =न्यायी सयमी सन्तान) १९ ५१ सम्यग् रममाण, भा०—व्याप्त (प्रजापति =ईश्वर) ३२ ५ सर्वप्राणिभ्योऽत्यन्त सुख दत्तवान् सन् (ईश्वर) ऋ० भू० ४४, ८ ३६ सत्यविद्याया सम्यग् दानकर्त्ता (परमेश्वर) ऋ० भू० २६०, १९ ५१ [सम्+रा दाने

(अदा०) धातो शानच्। व्यत्ययायेनात्मनेपदम्। शप श्लुश्च छान्दस]

संरराणे ये सम्यक् सुख रातो दत्तस्ते (द्यावापृथिव्यौ) ६७०६ [सररास इति व्याख्यातम्। तत स्त्रिया टावन्तात् प्रथमाद्विवचनम्]

संराधयन्तः परस्पर मिल के धन-धान्य राज्य-समृद्धि को प्राप्त होते हुए (गृहस्थादि मनुष्यो) स० वि० १४२, अथर्व० ३३०५ [सम्+राध संसिद्धौ (स्वा०) धातोर्णिजन्ताच्छतृ]

संरायस्पोषेण प्रशस्ताना रायो धनाना भोगपुष्ट्या ३१६ [सम् रैपदयो समासे तत पोषपदेन सह समास। समासे विभक्तेरलुक्]

संरिणीथः सम्यक्तया हिंस्तम् १११७१६

संरिणाति=सम्यग्गच्छति ५३१११ [सम्+रि हिंसायाम् (स्वा०) धातोर्लट्। विकरणव्यत्ययेन श्ना। रिणाति गतिकर्मा निघ० २१४]

संरिहाणे सम्यगास्वादकर्त्र्यौ (मातरा=मातृवद्वर्त्तमानेऽध्यापिकोपदेशिके) ३३३३ [सम्+लिह आस्वादने (अदा०) धातो शानजन्तात् स्त्रिया टाप्। ततो द्विवचने रूपम्। धातोर्लस्य रेफश्छान्दस]

संरोचते एकीभावेन प्रकाशते ३७१४ [सम्+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लट्]

संवतः ससेवमान (मनुष्य) ५१५३ सविभक्तान् (अवरान्=नीचाननुत्कृष्टगुणकर्मस्वभावान् नरान्) ११७१ विभागवत्य (विषयजन्या व्याधय) ११६११५ **संवतम्**=सम्यग् विभक्ताम् (यानगतिम्) ११ १२ [सम्+वन सम्भक्तौ (भ्वा०) धातो क्त। 'अनुदात्तोपदेश०' अ० ६४३७ सूत्रेणानुनासिकलोप। सवत सग्रामनाम निघ० २१७]

संवत्सम् सङ्गत वत्समिव, एकीभूत वात्सल्येन पालित सन्तानम् ४३३४ [सम्-वत्सपदयो समास]

संवत्सरः क्षणादिलक्षण काल, प० वि०। ऋ० ८८.४८२ सवत्सर इव नियमेन वर्त्तमान (विद्वज्जनो जिज्ञासुर्वा) २७४५ द्वादशभिर्मासैरलङ्कृत (वर्ष) १८२३ **संवत्सराय**=वर्षाय २४२५ चतुर्थ्याऽनुवत्सराय, प्र०—अत्राऽनो पूर्वपदस्य लोप ३०१५ [सम्+वस निवासे (भ्वा०) धातो 'सपूर्वाच्चित्' उ० ३७२ सूत्रेण सरन्। 'रा स्यार्धधातुके' अ० ७४४६ सूत्रेण सकारादावार्धधातुके परतन्तकारादेश। सवत्सर = सवसन्त्येऽस्मिन् भूतानि नि० ४२७ षष्टिश्च ह वै त्रीणि च शतानि सवत्सरस्याहोरात्रा इति च ब्राह्मण समासेन नि० ४२७ स ऐक्षत प्रजापति। सर्व वाऽअत्सारिष य इमा देवता असृक्षीति स सर्वत्सरो ऽभवत् सर्वत्सरो ह वै नामैतद् यत् सवत्सर इति श० ११ १ ६ १२ य स भूताना पति सवत्सर स श० ६ १ ३ ८ सवत्सरो वै प्रजापति श० २३३१८ सवत्सरो वै प्रजापतिरेकशनविध. श० १०२६१ सवत्सर प्रजापति ऐ० ११ ता० १६४१२ गो० उ० ३८ तै० १४१०१० स (सवत्सर) एव प्रजापतिस्तस्य मामा एव सह दीक्षिण ता० १०३६ स वै सवत्सर एव प्रजापति श० १६३३५ प्रजापति सवत्सर ऐ० ४२५ स एष प्रजापतिरेव सवत्सर कौ० ६१५ सवत्सरो यज्ञ प्रजापति श० १२५१२ सवत्सरो वै यज्ञ प्रजापति तस्यैत द् द्वार यदमावास्या चन्द्रमा एव द्वारपिधान श० ११११११ सवत्सरो यज्ञ श० ११२७१ सवत्सरसमितो वै यज्ञ पञ्च वा ऽऋतव सवत्सरस्य त पञ्चभिराप्नोति तस्मात्पञ्च जुहोति श० ३१४५ सवत्सरो वै पञ्चहोता तै० २२.३६ सवत्सरो वाव होता गो उ० ६६ सवत्सरो वै होता कौ० २६८ सवत्सरो वै धाता तै० १७२१ पुरुषो वै सवत्सर श० १२२४१ पुरुषो वाव सवत्सर गो० पू० ५३. प्राणो वै सवत्सर ता० ५१०३ वाक् सवत्सर ता० १२१२७ वृहती हि सवत्सर श० ६४२१० तदाहुस्सवत्सर एव मामेनि जै० उ० १३५१ सवत्सर स्वर्गाकार तै० २१५२ अग्नि सवत्सर ता० १७१३१७ अग्निर्वाव सवत्सर तै० १४१०१ सवत्सरोऽग्नि श० ६३१२५ ता० १०१२७ सवत्सर एवाग्नि श० १०४५२ सवत्सर एषोऽग्नि श० ६७११८ सवत्सरो वा अग्निर्वैश्वानर तै० १७२५ श० ६६१२० सवत्सरोऽग्निर्वैश्वानर ऐ० ३४१ सवत्सरो वैश्वानर श० ५.२५१५ सवत्सरो वै वैश्वानर श० ४२४४ सवत्सरो वै पिता वैश्वानर प्रजापति श० १५११६ सवत्सरो वै सोमो राजा (ऋ० ४५३७) कौ० ७१० सवत्सरो वै सोम पितृमान् तै० १६८२ सवत्सरो वा इन्द्राग्नुनासीर तै० १७११ इन्द्राय शुनासीराय=(सवत्सराय पुरोडाश द्वादशकपाल निर्वपति तै० १७११ सवत्सरो वै शुनासीर गो० उ० १२६ स य स सवत्सरो ऽसौ स आदित्य श० १०२४३ एष वै सवत्सरो य एष (आदित्य) तपति श० १४११२७ एष वै मृत्युर्यत्सवत्सर एष हि मर्त्यानामहोरात्राभ्यामायु क्षिणोत्यथ म्रियन्ते श० १०४३१ सवत्सरो विश्वकर्मा ऐ० ४२२ सवत्सरो वरुण श०

४४५.१८ सवत्सरो हि वरुण श० ४१४१० व्योमा (यजु० १४१३) हि सवत्सर श० ८४११११ सुमेक सवत्सर स्वेको ह वै नामैतद् यत् सुमैक इति श० १७२२६ पवत्सरो वै समस्त सहस्रवास्तोकवान् पुष्टिमान् ऐ० २४१ सवत्सरो वै परिक्षित्। सवत्सरो हीमा प्रजा परिक्षेति सवत्सर हीमा प्रजा परिक्षियन्ति ऐ० ६३२ सवत्सरो वै परिक्षित् सवत्सरो हीद सर्व परिक्षियतीति गो० उ० ६१२ सवत्सरो वै प्रवत शश्वतीरप ता० ४७६ सवत्सरो वज्र श० ३६४१६ सवत्सरो हि वज्र श० ३४४१५ सवत्सरो यजमान श० ११२७३२ अभ्रातृव्या तत्सवत्सर ऐ० ५२५ कौ० २७५ अग्निष्टोम उक्थ्योऽग्निर्ऋतु प्रजापति सवत्सर इति। एतेऽनुवाका यज्ञक्रतूनाञ्चर्तूनाञ्च सवत्सरस्य च नामधेयानि ते० ३१०४ सवत्सरो वै देवाना जन्म श० ८७३२१ सवत्सर खलु वै देवाना पू तै० १७७५ तस्य (सवत्सरस्य) वसन्त एव द्वार हेमन्तो द्वार त वा एत सवत्सर स्वर्ग लोक प्रपद्यते श० १६११६ सवत्सर सुवर्गो लोक तै० २२३६ श० ८४१२४ ता० १८२४ मध्ये ह सवत्सरस्य स्वर्गो लोक श० ६७४११ सवत्सरो वाव नाक पट्त्रिंशस्तस्य चतुर्विंशतिरर्धमासा द्वादशमासास्तद्यत्तमाह नाक इति न हि तत्र गताय कस्मै च नाक भवति श० ८४१२४ सवत्सरो वै देवाना गृहपति ता० १०३६ एक वा एतद् देवानामह। यत् सवत्सर तै० ३९२२१. सद्यो वै देवाना सवत्सर ता० १६६११ इमऽउ लोका सवत्सर श० ८२१७१७ सर्व वै सवत्सर श० १६११६ सवत्सर इद सर्वम् श० ८७११ सवत्सरो वा ऽऋतव्या (इष्टका) श० ८६१.४ ऋतव सवत्सर तै० ३९९१ ऋषभो वा एष ऋतूनाम्। यत् सवत्सर। तस्य त्रयोदशो मासो विष्टपम् तै० ३८३३ त्रयो वा ऽऋतव सवत्सरस्य श० ३४४१७ त्रेधा विहितो वै सवत्सर कौ० १९३ पञ्चर्तव सवत्सरस्य श० १५२१६ षड् वा ऽऋतव सवत्सरस्य श० १.२५१२. सप्ताऽर्तव सवत्सर श० ६६११४ द्वादश वा वै त्रयोदश वा सवत्सरस्य मासा श० २९३२७ सवत्सरस्य प्रतिमा वै द्वादश रात्रय तै० ११६७ त्रयोदश वै मासा सवत्सरस्य श० ३६४२४ एतावान् वै सवत्सरो यदेष त्रयोदशो मासस्तदत्रैव सर्व सवत्सर आप्तो भवति कौ० १९२ एतावान् वै सवत्सरो यदेष त्रयोदशो मासस्तदत्रैव सर्व सवत्सर आप्तो भवति कौ० ५८ स एष सवत्सर प्रजापति षोडशकल श० १८.४३.२२ सवत्सर सप्तदश ता० ६२२ सप्तदशो वै सवत्सरो द्वादशमासा पञ्चर्तव श० ६२२८ सवत्सर एव सप्तदशस्यायतन द्वादशमासा पञ्चर्तव एतदेव सप्तदशस्यायतनम् ता० १०१७ द्वादश वै मासा सवत्सरस्य पञ्चर्तव एष एव प्रजापति सप्तदश श० १.३५१० सप्तदशो वै प्रजापतिर्द्वादशमासा पञ्चर्तवो हेमन्तशिशिरयो समासेन तावान्त्सवत्सर। सवत्सर प्रजापति ऐ० ११ सवत्सरो वाव प्रतूर्त्तिरष्टादश (यजु० १४२३) तस्य द्वादशमासा पञ्चर्तव सवत्सर एव प्रतूर्त्तिरष्टादशस्तद्यत्तमाह प्रतूर्त्तिरिति सवत्सरो हि सर्वाणि भूतानि प्रतिरति श० ८४११३ सवत्सरो वाव तपो नवदश (यजु० १४२३) तस्य द्वादश मासा षड् ऋतव सवत्सर एव तपो नवदशस्तद्यत्तमाह तप इति सवत्सरो हि सर्वाणि भूतानि तपति श० ८४११४ सवत्सरो वाव वर्चो द्वाविंश (यजु० १४२३) तस्य द्वादशमासा सप्तर्तवो द्वेऽअहोरात्रे सवत्सर एव वर्चो द्वाविंशस्तद् यत्तमाह वर्च इति सवत्सरो हि सर्वेषा भूताना वर्चस्वितम श० ८४११६ सवत्सरो वाव सम्भरणस्त्रयोविंश (यजु० १४२३) तस्य त्रयोदश मासा सप्तर्तवो द्वेऽअहोरात्रे सवत्सर एव सम्भरणस्त्रयोविंशस्तद् यत्तमाह सम्भरण इति सवत्सरो हि सर्वाणि भूतानि सम्भृत श० ८४११७ चतुर्विंशो वै सवत्सर ता० ४१०५ चतुर्विंशत्यर्धमासो वै सवत्सर ऐ० ८४ सवत्सरो वाव गर्भा पञ्चविंशस्तस्य चतुर्विंशतिरर्धमासा सवत्सर एव गर्भा पञ्चविंश श० ८४११९ सवत्सरो वाव प्रतिष्ठा त्रयस्त्रिंश (यजु० १४२३) तस्य चतुर्विंशतिरर्धमासा षड् ऋतवो द्वे ऽहोरात्रे सवत्सर एव प्रतिष्ठा त्रयस्त्रिंशस्तद्यत्तमाह प्रतिष्ठेति सवत्सरो हि सर्वेषा भूताना प्रतिष्ठा श० ८४१२२ सवत्सरो वाव ब्रध्नस्य विष्टप चतुस्त्रिंशस्तस्य चतुर्विंशतिरर्धमासा सप्तर्तवो द्वे अहोरात्रे सवत्सर एव ब्रध्नस्य विष्टप चतुस्त्रिंश (यजु० १४२३) श० ८४१२३ सवत्सरो वाव विवर्त्तोऽष्टाचत्वारिंश (यजु० १४२३) षड्विंशतिरर्धमासास्त्रयोदशमासा सप्तर्तवो द्वे अहोरात्रे तद्यत्तमाह विवर्त्त इति सवत्सराद् हि सर्वाणि भूतानि विवर्त्तन्ते श० ८४१२५ त्रीणि वै षष्टि शतानि सवत्सरस्याह्नाम् कौ० ११७ त्रीणि च ह वै शतानि षष्टिश्च सवत्सरस्याहोरात्राणि गो० पू० ५५ एतावान् वै संवत्सरो यदहोरात्रे कौ० १७५ विरूप (नानारूप) सवत्सर ता० १४९८ यस्मादेषा समाना सती षडह विभक्तिर्नानारूपा तस्माद् विरूप सवत्सर

ता० १० ६ ७ षडहो वा उ सर्व सवत्सर कौ० १६ १० नवाहो वै गवत्सरस्य प्रतिमा प० ३ १२ सवत्सरस्य प्रतिमा या (एकाष्टकारूपा) त्वा रात्रि यजामहे म० २ २ १८ सवत्सरस्य या पत्नी (एकाष्टकारूपा) सा नो अस्तु सुमङ्गली (अथर्व० ३ १० २) म० २ २ १६ एषा वै सवत्सरस्य पत्नी यदेकाष्टका ता० ५ ६ २ मुख वा एतत् सवत्सररूप यत्फाल्गुनी पौर्णमासी को० ४ ४ ता० ५ ६ ८ गो० उ० १ १६ मुख (सवत्सरस्य) उत्तरे फल्गुन्यौ पुच्छ पूर्वे गो० उ० १ १६ एषा ह सवत्सरस्य-प्रथमा रात्रिर्यत् फाल्गुनी पौर्णमासी श० ६ २ २ १८ एषा वै प्रथमा रात्रि सवत्सरस्य यदुत्तरे फाल्गुनी तै० १ १ २ ६ एषा वै जघन्या रात्रि सवत्सरस्य यत्पूर्वे फाल्गुनी तै० १ १ २ ६ किं नु ते मयि (सवत्सरे) इति। अयम्म आत्मा स (आत्मा) मे त्वयि (सवत्सरे) जै० उ० ३ २४ ८ आत्मा वा एष सवत्सरस्य यद् विषुवान् ता० ४ ७ १ आत्मा वै सवत्सरस्य विषुवानङ्गानि पक्षौ=(दक्षिण पक्ष उत्तर पक्षश्च) गो० पू० ४ १८ आत्मा वै सवत्सरस्य विषुवानङ्गानि मासा श० १२ २ ३ ६ अथ ह वा ऽएष महासुपर्ण एव यत् सवत्सर। तस्य यान् पुरस्ताद्विषुवत पण्मासानुपयन्ति सोऽन्यतर पक्षोऽथ यान् पडुपरिष्टात्सो-ऽन्यतर आत्मा विषुवान् श० १२ २ ३ ७ सवत्सरो वै व्रत तस्य वसन्त ऋतुर्मुख ग्रीष्मश्च वर्षाश्च पक्षौ शरन्मध्य हेमन्त पुच्छम् ता० २१ १५ २ तस्य (सवत्सरस्य) वसन्त शिर तै० ३ ११ १० २ वर्षा उत्तर (पक्ष सवत्सरस्य) तै० ३.११ १० ३ वर्षा पुच्छम् (सवत्सरस्य) तै० ३ ११ १० ४. सवत्सरे सवत्सरे वै रेत सिक्त जायते ऐ० ४ १४. सवत्सरे सवत्सरे वै रेत सिक्तिर्जायते कौ० १६ ६. सवत्सरो वै प्रजननम् गो० पू० २ १५ सवत्सर हि प्रजा पशवोऽनुप्रजायन्ते ता० १० १ ६ तस्माद्दु सवत्सर ऽएव स्त्री वा गौर्वावडवा वा विजायते श० ११ १ ६ २ सवत्सर ऽएव कुमारो व्याजिहीर्षति श० ११ १ ६ ३ तस्मात्सवत्सर-वेलाया प्रजा· (शिशव) वाच प्रवदन्ति श० ७ ४ २ ३८ चक्षुर्वा एतत् सवत्सरस्य यच्चित्रापूर्णमास ता० ५.६ ११ प्रजापतेर्ह वै प्रजा सासृजानस्य पर्वाणि विसस्रसु। स वै गवत्सर एव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयो मन्वी पौर्णमासी चामावास्या चर्त्तुमुखानि श० १ ६ ३ ३५ सवत्सरोऽसि नक्षत्रेषु श्रित। ऋतूना प्रतिष्ठा तै० ३ ११ १ १४ (नक्षत्राणि) सवत्सरस्य प्रतिष्ठा तै० ३ ११ १ १३ तस्मादाहु गवत्सर सर्वे कामा इति श० १० २ ४ १ सवत्सरो वै सर्वस्य शान्ति ता० ६ ८ १३]

संवत्सरीणम् य सवत्सर भृतस्तम् (परमात्मानम्), प्र०='सम्परिपूर्वात् ख च' अ० ५ १ ६२ इति भृतार्थे ख १७ १३ [सवत्सरप्राति० 'सपरिपूर्वात् ख च' अ० ५ १ ६२ सूत्रेण निर्वृत्त अधीष्ट-भृत-भूत-भाव्यादिषु ख। खस्येनादेश]

संवदध्वम् सम्यक् सवाद प्रश्नोत्तर प्रीति ने करो स वि० १८७, १० १६१ २ सङ्गता भूत्वा परस्पर जल्पवितण्डादिविरुद्धवाद विहाय सम्प्रीत्या प्रश्नोत्तरविधानेन सवाद कुरुत ऋ० भू० ६२, १० १६१ २ [सम्+वद व्यक्तायां वाचि (भ्वा०) धातोर्लोट्]

संवननेन सम्यक्तया धर्मकृत्य के सेवन के साथ स० वि० १४३, अथर्व० ३ ३० ७, [सम्+वन सम्भक्तौ (भ्वा०) धातोर्ल्युट्। सवननप्राति० टा]

सवपामि सम्यग् विस्तारयामि १ २१ [सम्+डुवप बीजसन्ताने (भ्वा०) धातोर्लट्]

संवयन्ती प्रापयन्त्यौ (उषासानक्ता) २० ४१ [सम्+वय गतौ (भ्वा०) धातो शत्रन्तान् ङीप्]

संवयन्ती निर्मिमाना (उषासानक्ता=रात्रिदिने) २ ३ ६ [सम्+वेञ् तन्तु सन्ताने (भ्वा०) धातो शत्रन्तान् ङीप्]

संवरणस्य स्वीकृतस्य (राय=धनस्य) ५ ३३ १० **संवरणात्**=सम्यक् स्वीकरणात् ७ ३ २ सम्यक्तया-ऽऽच्छादनात् १५ ६२ **संवरणेषु**=आच्छादकेषु व्यवहारेषु ४ २१ ६ [सम्+वृञ् वरणे (स्वा०) वृञ् आवरणे (चुरा०) धातोर्ल्युट्]

संवर्च्चसा सङ्गत्या विद्याध्ययनप्रकाशनेन ३ १६ [सम्-वर्चस्पदयो समास। वर्चम्=वर्च दीप्तौ (भ्वा०)+असुन्]

संवर्तयन्तः सम्यग् वर्त्तमाना (किरणा) ५ ४८ ३ [सम्+वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताच्छतृ]

संवृत्वत् सवरणशीलम् (तम) ५ ३१ ३ [सम्+वृञ् वरणे (स्वा०) वृञ् आवरणे (चुरा०) धातोर्वा छान्दस रूपम्]

सवसाना. सम्यगाच्छादका (स्वसार=अङ्गुलय.) ४ ६ ८ **संवसानौ**=सम्यक् सुवस्त्रालङ्कारेणाच्छादितौ (विवाहितौ स्त्रीपुरुषौ) १२ ५७ [सम्+वस आच्छादने (अदा०) धातो शानच्]

संवाक् विनयपुरस्सरार्थयो सम्यक् प्रकाशिनी वाणी, राजनीतिनिष्ठा सम्यग् वाणी, भा०—यस्य वाणी सर्वदा

सत्याऽस्ति स सम्राट् ६ १२ [सम्-वाच्पदयो समासः। वाच्=वच परिभाषणे (अदा०) धातो 'विवव्वचिप्रच्छया-यतस्तु०' अ० ३ २ १७८ वा०सूत्रेण क्विप् दीर्घोऽसम्प्र-सारणञ्च]

संवाजेभिः श्रेष्ठतया विज्ञानादिगुणैः सङ्ग्रामैर्वा १ ५३ ५ [सम्-वाजपदयो समासे भिन्न ऐण् न भवति छन्दसि। वाजे सङ्ग्रामनाम निघ० २.१७]

संवाजैः सम्यग् युद्धैरन्नैर्विज्ञानैर्वा १ ४८ १६ [सम्-वाजपदयो समास। वाज अन्ननाम निघ० २ ७ बलनाम निघ० २ ६ वाजे सङ्ग्रामनाम निघ० २ १७]

संवावशन्त सम्यक्तया पुन पुन प्रकाशयन्त (नर =मनुष्या) १ ६२ ३ [सम्+वाशृ शब्दे धातोर्यङ्-लुगन्ताच्छतृ। 'बहुल छन्दसीति वक्तव्यम्' अ० ७ ३ ८७ वा०सूत्रेणोपधाया ह्रस्वत्वम्। धातूनामनेकार्थकत्वादत्र प्रकाशनेऽर्थे]

संविक्थाः एकीभावेन चल, अ०—विचल, प्र०—श्रोविजी भयचलनयो इत्यस्माल्लोटर्थे लट्, लटि मध्यमै-कवचने 'बहुल छन्दसि' इति विकरणाभावश्च १ २३ भय कम्पन च कुर्य्या ६ ३५ [सम्+श्रोविजी भयचलनयो (तुदा०) धातोर्लेट्। अटोऽभावो विकरणस्य लुक् च छन्दसि]

संवित् प्रतिज्ञा १८ ७ [सम्+विद ज्ञाने (अदा०) धातो सम्पदादित्वात् क्विप्]

संविदधातु समाधन विधान करोतु २ २४ [सम्+वि+दुधाञ् धारणपोषणयो (जु०) धातोर्लोट्]

संविदानः प्रतिजानन् (सुमन्तान) १६ ५४. सम्यग् विज्ञान कुर्वन् (विद्वज्जन) ७ ४४ ४ सम्यग् ज्ञाता सन् (सोम =चन्द्रलोक) ऋ० भू० १३८, ऋ० ६ ४ १३ २ सम्यग् ज्ञापयन् (प्रजापति =परमेश्वर) १२ ६१. **संविदानाः**=सम्यक् कृतप्रतिज्ञा (अ०—विद्वासो जना) १५ १३ सम्यग् विचारशीला (विद्वज्जना) १५ ११. समाननिश्चयाः (विद्वासो जना) १५ १० सम्यग् लब्ध-ज्ञान (विद्वज्जना) १५ १२ [सम्+विद ज्ञाने (अदा०) धातो ज्ञानच्। 'समो गमादिषु विदिप्रच्छिस्वरतीनामुप-सख्यानम्' अ० १ ३ २९ वा०सूत्रेणात्मनेपदम्]

संविदाना सम्यक् कृतप्रतिज्ञा (निर्ऋति=स्त्री) १२ ६३. **संविदाने**=सम्यग् विज्ञाननिमित्ते, भा०—सविदितक्रिये (धनुर्ज्ये) २६ ४१ प्रतिज्ञापालिके (योषा= पत्न्यौ) ६ ७५ ४ सम्यग् विज्ञापिके (उषासा=प्रात. साय-वेले) २६ ६ [सविदान इति व्याख्यानम्। तत स्त्रिया टाप्]

संविदुः सम्यक्तया जानन्ति ५ ४४.११. **संविद्युः**= एकीभावेन विदन्ति, प्र०—अत्र लटर्थे लिट् १ २३.२४ **संविदाम्**=सम्यक्तया विदनाम्, प्र०—विद ज्ञाने इत्यस्मा-त्लोटि प्रथमबहुवचने 'लोपस्त आत्मनेपदेषु' अ० ७ १.४१. अनेन तकारस्यापि सवर्णदीर्घे विसर्गादि रूपम् ६.३६ **संविदेय**=एकीभावेन विन्देय ४ २३ [सम्+विद ज्ञाने (अदा०) धातोर्लेटि 'विदो लटो वे' ति सूत्रेण निपातित णलादय आदेशा। अन्यत्र लिट्। 'सविदाम्' प्रयोगे विद ज्ञाने (अदा०) धातो सम्पूर्वकात् लोटि 'समो गमादिषु विदिप्रच्छिस्वरतीनामुपसख्यानम्' इत्यात्मनेपदे 'लोपस्त आत्मनेपदेषु' इति तकारो रूपम्। सविदेय=सम्+विदृ लाभे (तुदा०) धातोर्लिट्। नुमभावश्छान्दस]

संविविक्तः सम्यक् पृथक् कुर्वन् (परमेश्वरस्य) ३ ५४ ८ [सम्+वि+विजिर् पृथग्भावे (जु०) धातो क्त.]

सविव्यानः सम्यग् व्याप्नुवन् (राजा) ५ २६ ४. सम्यक् प्राप्नुवन् (इन्द्र =विद्वज्जन) १.१३० ४ [सम्+व्येञ् सवरणे (भ्वा०) धातो शानच्। शप. श्लुश्च छान्दस]

संविव्ये सवृणोति १.१७३ ६ **संविव्ययुः**=सम्यक्तया वेष्टयतम् ६ ७२ ५ [सम्+व्येञ् संवरणे (भ्वा०) धातोर्लिट्]

संविशस्व एकीभावेन विशस्व १४ ३ [सम्+विश प्रवेशने (तुदा०) धातोर्लोट्। व्यत्ययेनात्मनेपदम्]

संविश्वतुरा सम्यक्तया यद विश्व सर्वं तुरति त्वर-यति तेन (राया) १ ४८ १६. [विश्वोपपदे तुर त्वरणे (जु०) धातो कर्त्तरि क्विप्। तत सप्तपदेन समान। ततष्टा प्रत्यय]

संवृक् य संवृक्ते स (विद्वज्जन) ३८ २८ य सम्यग् वर्जयति स (इन्द्र =सूर्यलोक) २ १२ ३ [सम्+वृजी वर्जने (अदा०) धातो कर्त्तरि क्विप्]

संवेशपतये सम्यग् विशन्ति ये ते पृथिव्यादय पदार्थास्तेषा पति पालकस्तस्मै (अग्नये=परमेश्वराय भौतिकाय वा) २.२०. [सवेश-पतिपदयो समास। सवेश =सम् विश प्रवेशने (तुदा०) धातो कर्त्तरि 'कर्मण्यण्' इत्यण्]

संव्रता सत्यभाषणादीनि १२ ५८ [सम्+व्रतपदयो समासे शेर्लोपश्छन्दसि]

संशराय सम्यग्घिसनाय ३० १७ [सम्+शॄ हिंसायाम् (क्रया०) धातो 'ऋदोरवि' त्यप्]

संशाय सम्यक् सूक्ष्मवलान् कृत्वा १८ ७१ [सम्+शो तनूकरणे (दिवा०) धातो क्त्वा]

संशितम् सम्यक् तीक्ष्णबुद्धिस्वभावम् (राजानम्) २७ ८ प्रशसनीयम् (ब्रह्म=वेदविज्ञानम्) ११ ८१ **संशितः**=सम्यक् सूक्ष्मीकृत (रथ) २३ १४ स्तुत (हय=अश्व) २३ १४ [सम्+शो तनूकरणे (दिवा०) धातो क्त । 'शाछोरन्यतरस्याम्' अ० ७ ४ ४१ सूत्रेणेकारान्तादेश]

संशिशातु सम्यक्तया क्षयतु, प्र०—अत्र शो तनूकरणे इत्यस्मात् श्यन 'बहुल छन्दसि' श्लु, तत 'श्लौ' इति द्वित्वम् १ १११ ५ **संशिशीतम्**=सम्यक् तीक्ष्णीकुर्याताम् २ ३६ ७ **संशिशीमहि**=शत्रून् सूक्ष्मान् जीर्णान् कुर्म, प्र०—अत्र शो तनूकरणे इत्यस्माल्लटि श्यन स्थाने व्यत्ययेन श्लु 'छन्दस्युभयथा' इति श्लोरार्धधातुकत्वादाकारादेश १ १०२ १० **संश्यत्**=सम्यक् तनूकरोति १ १३० ४ [सम्+शो तनूकरणे (दिवा०) धातोर्लोट्। 'बहुल छन्दसीति' श्लु । 'बहुल छन्दसि' अ० ७ ४ ७८ सूत्रेणाभ्यासस्येत्वम् । सशिशीनम् प्रयोगे 'छन्दस्युभयथे' त्यार्धधातुकसज्ञाया धातोराकारादेशे 'ई हल्यघो' अ० ६ ४ ११३ सूत्रेण हलादौ सार्वधातुके क्ङिति आत ईकारादेश । सशिशीमहि प्रयोगे लटि शप श्लौ व्यत्ययेनात्मनेपदम् । 'छन्दस्युभयथा' इत्यार्धधातुकत्वादात्त्वम् । सार्वधातुकत्वाच्चेत्वम् । सश्यत् प्रयोगे लड् । 'श्नात श्यनि' इत्याकारलोप । अडभावश्छान्दस]

संशिशाधि सम्यक् शिक्षस्व, भा०—एतान् दुर्व्यसनेभ्यो निवर्तयेत् सुशीलान् सम्पादयेत् २७ ८ सम्यक्तया शिक्षय ६ १५ ६ [सम्+शासु अनुशिष्टौ (अदा०) धातोर्लोट्। 'बहुल छन्दसी' ति शप श्लु । अभ्यासस्येत्वम् 'बहुल छन्दसि' अ० ७ ४ ७८ सूत्रेण]

संसत् सम्राट्-सभा ४ १ ८ **संसदः**=सम्यक् सीदन्ति यासु ता (सभा) २६ १ **संसदि**=ससीदन्ति विद्वासो यस्या तस्या सभायाम् १ ६४ १ [सम्+पदलृ विशरणगत्यवसादनेषु (भ्वा०) धातोरधिकरणे क्विप् सम्पदादित्वात्]

संसनिष्यदत् सम्यक्तयाऽतिशयेन प्रस्रवन् (दधिक्रा=अश्व), प्र०—अत्र स्यन्दू-धातोर्यङ्लुक् शतृप्रत्यये ऽभ्यासस्य निक् निपात्यते ६ १४ [सम्+स्यन्दू प्रस्रवणे (भ्वा०) धातोर्यङ्लुगन्तान्छतरि 'दाधर्त्तिदर्धर्त्ति०' अ० ७ ४ ६५ सूत्रेणाभ्यासस्य निगागमो धातो सकारस्य पत्वञ्च निपात्यते]

संसन्नः सम्यक् गच्छन् प्राप्नुवन् (प्रजापति=जीव) ३६ ५. [सम्+पदलृ विशरण गत्यवसादनेषु (भ्वा०) धातो क्त]

संसमायुचसे सम्यक्तया मिश्रय, प्र०—अत्र विकरणाऽऽत्मनेपदव्यत्यय १५ ३० [सम्+आङ्+युमिश्रणेऽमिश्रणे च (अदा०) धातोर्लट्। व्यत्ययेनात्मनेपद शप्रत्ययश्च। समित्यस्य द्वित्वम् 'प्रसमुपोद पादपूरणे' अ० ८ १ ६ सूत्रेण]

संसमेतु एकीभावेन प्राप्नोतु, प्र०—अत्र 'प्रसमुपोद पादपूरणे' अ० ८ १ ६ इत्यनेन समित्यस्य द्वित्वम् ६ २० [सम्+इण् गतौ (अदा०) धातोर्लोट्। समित्यस्य द्वित्वम्]

संसर्पाय य सम्यक् सर्पति गच्छति तस्मै (गुप्तचराय) २२ ३० **संसर्पेण**=सम्यक् प्रापणेन १५ ७ [सम्+सृप्लृ गतौ (भ्वा०) धातो पचाद्यच् कर्त्तरि अन्यत्र घञ्]

संसहस्रम् सम्यक् सहस्रम् (वच=वचनम्) ७ ८.६ [सम्+सहस्रपदयो समास]

संसादि सम्पाद्यते २ ११ ८ [सम्+साव समिद्धौ (स्वा०) धातो कर्मणि लुङ्। अडभावश्छान्दस। धस्य दकारश्छान्दस]

ससिसिचे ससिञ्चति ३ ३२ १५ [सम्+पिचक्षरणे (तुदा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

संसीदस्व सम्यगास्व ३८ १७ [सम्+पदलृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लोट्। शित्प्रत्यये धातो सीदादेश]

संसृक्षाथाम् ससर्ग कुरुतम् १६ ७ **संसृज**=सम्यग् योजय १७ ५० सम्यग् युङ्ध्व १७ ५१ अ०—मयुनक्ति, प्र०—अत्र व्यत्ययो लडर्थे लोट् त्र १ २३ २४ एकीभावेन सम्यक् सृजनि १ २३ २३ **संसृजामि**=एकीभावेन सम्बध्नामि १८ ३५ सम्यक् निष्पादयामि १६ १ **संसृजेथाम्**=सम्यङ् निष्पादयेतम् १५ ५४ अच्छे प्रकार उत्पन्न करो स० वि० १३६, अथर्व० १४ २ ३७ [सम्+सृज विसर्गे (तुदा०) धातोर्लोट्। विकरणव्यत्ययेन वस। आत्मनेपद च व्यत्ययेन। अन्यत्र लोट् लेट् च]

संसृज्य ससर्गीभूत्वा १२ ३८ समुत्पाद्य ११ ५४ [सम्+सृज विसर्गे (तुदा०) धातो. क्त्वा। समासे क्त्वो ल्यप्]

संसृष्टजित् य समृष्टा॒ मिलिताञ्छत्रून जयति स (इन्द्र =सर्वसेनाधिपति) १७ ३५ [समृष्टोपपदे जि जये (भ्वा०) धातो क्विप् । समृष्ट =सम्+सृज विसर्गे (तुदा०) धातो क्त]

संसृष्टान् सम्यग्गुणयुक्तान् (पदार्थान्) २४ १६ [सम्+सृज विसर्गे (तुदा०) धातो क्त]

संसृष्टाम् सम्यग् सुशिक्षया निष्पादिताम् (कन्याम्) ११ ५५ [सम्+सृज विसर्गे (तुदा०) धातो क्तान्ताट् टाप्]

संस्कृतत्रम् य सस्कृत त्रायते रक्षति तम् (विद्वज्जनम्) ६ २८ ४ [सस्कृतोपपदे त्रैङ् पालने (दिवा०) धातोर्ड]

संस्कृतम् कृतसस्कारम् (पदार्थम्) ५ ७६.२ शिल्पविद्यासस्कारयुक्त) सर्वर्त्तुकम् (उत्तमयानम्) ४ ३४. [सम्+डुकृञ् करणे (तना०) धातो क्त । 'सपर्युपेभ्य करोतौ भूषणे' इति कान्पूर्व सुट्]

संस्कृतिः विद्यासुशिक्षाजनिता नीति ७ १४ [सम्+डुकृञ् करणे (तना०) धातो स्त्रिया क्तिन्। कात् पूर्व सुडागम]

संस्तिरः सम्यगाच्छादक (विद्वज्जन) १ १४० ७. [सम्+स्तृञ् आच्छादने (क्रया०) धातोर्मूलविभुजादित्वात् कर्त्तरि क]

संस्तुतेन सङ्गत्या प्रशसितेन (वर्चसा=विद्याध्ययनप्रकाशनेन) ३ १९ [सम्+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

संस्तुप् सम्यक् स्तुभ्नाति शब्दार्थसम्बन्धान् यया सा वाक् १५ ५ [सम्+स्तुभ्नु (सौत्रो धातु) धातो क्विप्]

संस्थाम् सम्यक् तिष्ठन्ति यस्या ताम् (सभाम्) १९ २९ [सम्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्घञर्थे क। तत स्त्रिया टाप्। यास्सप्त सस्था या एवैतास्सप्त होत्रा प्राचीर्वषट् कुर्वन्ति ता एव ता जै० उ० १ २१ ४]

संस्थे सम्यक् तिष्ठन्ति यस्मिँस्तस्मिन् राज्ये ५ ३ ८ जगति, प्र०—अत्र 'घञर्थे कविधानम्०' अ० ३ ३ ५८ इति वार्तिकेनाधिकरणे क प्रत्यय. १ ५४ [सम्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्घञर्थे क]

संस्पृशः य सस्पृशति तस्मात् (दिव =प्रकाशाद्विद्युत) ३७ १३ सम्यक् स्पर्शात् ३७ ११ [सम्+स्पृश सम्पर्शने (तुदा०) धातो क्विप्]

संस्मयमाना सम्यङ् मन्दहासयुक्ता (उषा इव युवति.) १.१२३ १० [सम्+ष्मिङ् ईषद्हसने (भ्वा०) धातोर्णिजन्ताच्छानच्। तत स्त्रिया टाप्]

संस्रवभागाः सम्यक् स्रूयन्ते ये ते सस्रवा, भज्यन्ते ये ते भागा, सस्रवा भागा येषान्ते (देवा =विद्वासो दिव्या पदार्था वा) २ १८ [सस्रव-भागपदयो समास। सस्रव =सम्+स्रु गतौ (भ्वा०) धातो 'ऋदोरप्' त्यप्। भाग =भज सेवायाम् (भ्वा०) धातोर्घञ्। सस्रवभागा वसवो वै रुद्रा आदित्या सस्रावभागा नै० ३ ३.९ ७]

संस्रष्टा श्रेष्ठाना मनुष्याणा शस्त्रास्त्राणा वा सगर्गस्य कर्त्ता (इन्द्र =सेनापति) १७ ३५. [सम्+सृज विसर्गे (तुदा०) धातो कर्त्तरि तृन्। 'सृजिदृशोर्झल्यमकिती' ति सूत्रेणामागमे यणादेश]

संहतः एकीभूता (धेनव.=गाव) ३ १७. [सम्+हन हिंसागत्यो (अदा०) धातो क्त]

संहन्मः सहितानि निमीलितान्यादर्शकानि कुर्म ७ ५५ ६ [सम्+हन हिंसागत्यो (अदा०) धातोर्लेट्]

संहंसि एकीभावेन नाशयसि १.५३.७. [सम्+हन हिंसागत्यो (अदा०) धातोर्लेट्]

संहानाय सहन्यते यस्मिँस्तस्मै (सगामाय) २२ ७ [सम्+हन हिंसागत्यो (अदा०) धातोर्घञ्]

संहाय सम्यक् त्यक्त्वा २ ३८ ४. [सम्+ओहाक् त्यागे (जु०) धातो क्त्वा। तत समासे क्त्वो ल्यप्]

संहितम् कृतसाधनम् (अ०—जगत्) १.१६८ ६ [सम्+डुधाञ् धारणपोषणयो (जु०) धातो क्त। 'दधातेर्हिरि' ति हिरादेश]

संहितः दृष्टाङ्ग (पशु) २९ ५८ सर्वैर्भूतैर्द्रव्यै सत्पुरुषैर्वा सह मिलित (सूर्य.=सविता) १८.३९. [सम्+हि गतौ वृद्धौ च (स्वा०) धातो क्त। (यजु० १८ ३९) असौ वा आदित्य सहित एष अहोरात्रे सदधाति श० ७ ४ १.८ सहिताम् (साम) तद्देवा सहितेन समदधुर्यत् समदधुस्तस्मात् सहितम् ता० ८ ४ ९. सहित भवति ह्यक्षरनिधन प्रतिष्ठायै प्रतिष्ठायै व सत्रमासते ता० ११.५ ४. सहित भवति ह्यक्षरनिधन प्रतिष्ठायै ता० १५.११ ३]

सँहिता सर्वपदार्थै सह वर्त्तमाना विद्युत्, सर्वव्यापक ईश्वरो वा ३ २२ [सहितमिति व्याख्यातम्। ततष्टाप् स्त्रियाम्। पर सन्निकर्ष सहिता। पदप्रकृति सहिता नि० १ १७]

सँहिनोमि सम्यक्तया वर्धयामि १ ६१ ४ [सम्+हि गतौ वृद्धौ च (स्वा०) धातोर्लेट्]

१६ ४८ [अभयोपपदे षण सभक्तौ (भ्वा०) धातोर्बाहुलकात् करणे 'इ' प्रत्यय]

अभरत् धारयति ऋ० भू० २३८, ११ ५ १६ धरेत् ४ २६ ७ भरति १ १६१ १० बिभर्ति २० ५६ **अभरन्**=धरन्ति पुष्णन्ति वा ४ ३३ ४ **अभरिष्यत्**=भरति २ ३० २ [भृञ् भरणे (भ्वा०) धातोर्लृडि लृडि च रूपाणि । अभरत् अहरत् निघ० ७ २६]

स्त्रीषखम् स्त्रिया मित्र पतिम् ३० ६ [स्त्री-सखिपदयो समासे समासान्त टच् 'राजाहस्सखिभ्य०' सूत्रेण]

स्थ सन्ति, प्र०—अत्र पुरुषव्यत्ययेन लडर्थे लोट् १ १५ २ भवथ ५ ५७ २ भवत १२ ४६ सन्तु ४ ३४ ६ तिष्ठत ५ ६१ १ सन्ति, प्र०—अत्र पुरुषव्यत्ययेन प्रथमपुरुषस्थाने मध्यमपुरुष १ १ **स्थः**=भवथ १ १५७ ६ स्त, प्र०—अत्र व्यत्यय १ १७ २ वर्त्तेते १ १०८ ११ भवत स्यात वा ६ ४ भवथ, भवतो वा १ १०८ ६ तिष्ठथ ५ ७३ १ तिष्ठन ५ २१ स्याताम् १० ६ **स्थात्**=तिष्ठति २ १५ ७ तिष्ठेत् ३ १५ ६ उपतिष्ठते २ ३ १० **स्थात**=तिष्ठन ५ ५३ ८ **स्थाः**=तिष्ठे ६ २४ ६ तिष्ठति ४ ३० १२ **स्थाति**=तिष्ठनि २ ३१ ३ **स्थाथः**=भवथ ४ ४६ ४ **स्थाम्**=अवतिष्ठस्व २ २८ ११ तिष्ठेयम् २ २७ १७ **स्थाम**=निष्ठेम १ १३६ ४ **स्थाः**=तिष्ठे ६ २४ ६ तिष्ठति ४ ३० १२ भवे १ १७४ १० **स्थुः**=तिष्ठेयु १ १६७ १ तिष्ठन्ति, प्र०—अत्र लडर्थे लुडडभावश्च १ २४ ७ उपतिष्ठन्तु ७ १८ ३ **स्थेयाम**=तिष्ठेम ६ ४७ ८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोट्। छान्दसत्वात् शिनि तिष्ठादेशो न भवति। अन्यत्र लुड, लेट्, लिड् चापि]

स्थन तिष्ठत ५.८७.६ भवत १२.८३. गन्नि १.१०५.१५ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोटि छन्दसि तिष्ठादेशाऽभावे छान्दस रूपम्]

स्थपतये तिष्ठन्ति यस्मिन्निति स्थम्, तस्य पतये पालकाय (सेनापतये) १६.१६ [स्थ-पतिपदयो समास। स्थ—ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्घञर्थे क]

स्थविरम् स्थूलम् (वज्र=विद्युद्रूपम्) ४.२०.६. स्थूल वृद्ध वा (वृषभम्) ४.१८.१० प्रवृद्धम् (क्षत्रम्) १.५४.८ **स्थविरस्य**=विद्याविनयाभ्यां वृद्धस्य (राज्ञः) ६.४७.८ विद्यया वयसा वा वृद्धस्य (सज्जनस्य) ६.१८.१२ **स्थविरः**=कृतज्ञो वृद्ध (सभेशो राजा) १.१७१.५. वृद्धो विज्ञातराजधर्मव्यवहार (इन्द्र=सेनापति) १७.३७ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'अजिरशिशिरशिथिल०' उ० १.५३ सूत्रेण किरच्प्रत्यये धातोर्वुक् ह्रस्वत्वञ्च निपात्यते]

स्थविरा स्थूला विस्तीर्णा (गी=वाणी) १.८१.७ [स्थविरमिति व्याख्यातम्। तत स्त्रिया टाप्]

स्थविरेभिः स्थूलैः (वाजैः=सङ्ग्रामैः) ६.१.११ विद्यावयोवृद्धैः (जनैः) ७.२४.४ [स्थविरमिति व्याख्यातम्। ततो भिस ऐस् न भवति 'बहुल छन्दसि' सूत्रेण]

स्थशः तिष्ठन्तीति स्थास्तानि बहूनि इति स्थश (जन्मानि) प्र०—अत्र 'बह्वल्पार्था०' इति शस् २.३८.८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्विप्। तत शस्]

स्थाणु· वृक्ष, म० प्र० ६६, नि० १.१८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'स्थो णुः' उ० ३.३७ सूत्रेण णु। स्थाणुस् तिष्ठते नि० १.१८]

स्थातः यस्मिन्तिष्ठति तत्समर्थो (इन्द्र=नृप) ६.४१.३ **स्थातारः**=ये तिष्ठन्ति ते (विद्वज्जनाः) ५.८७.६ **स्थातु**=स्थिरस्य स्थावरस्य (जगतः) ४.५३.६ कृतस्थिते (तिष्ठतो वृक्षाऽऽदेः) १.५८.५ तिष्ठतो जगतः १.७०.४ अवरस्य (जगतः) १.१५६.३ **स्थातॄन्**=भूम्यादिस्थावरान् (लोकान्) १.७२.६ **स्थात्रे**=स्थिरस्य कारणस्य मध्ये, प्र०—अत्र षष्ठ्यर्थे चतुर्थी १.१६४.१५ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो कर्त्तरि तृच्]

स्थातॄणाम् स्थावराणाम् (वनानाम्=पदार्थानां रश्मीनां वा), प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति तुक् १.७०.२ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो कर्त्तरि क्विप्। 'वा छन्दसी' ति तुक्]

स्थातारा स्थातारौ (अध्यापकोपदेशकौ) १.८१.३ ष्ठा गतिनिवृत्तौ (भ्वा०) धातोरृजन्ताद् द्विवचनस्याकारादेशः]

स्थातुः स्थावरसमूहम्, प्र०—अत्र ष्ठा-धातोस्तु प्रत्ययः 'सुपां सुलुक्०' इत्यम स्थाने सुश्च १.६८.१ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्णिगा० तुर्वाहुलकात्]

स्थानम् तिष्ठन्ति यस्मिंस्तत् ५.७६.४ नित्यर्थम् (स्थलम्) २.८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोरधिकरणे ल्युट्]

स्थारश्मानः स्थिरा रश्मान किरणा इव व्यवहारा येषां ते (विद्वांसो राजजनाः) ५.८७.५ [स्था-रश्मानूपदयो समास। स्था=ष्ठा गतिनिवृत्तौ (भ्वा०)+क्विप्। रश्मन् रश्मिपर्यायश्छान्दस]

स्थालीभिः यासु पदार्थान् स्थापयन्ति पाचयन्ति वा ताभिः (पात्रविशेषाभिः) १६.२७ **स्थालीः**=यासु पच्यन्तेऽन्नानि ता (पात्रविशेषाः) १६.८६ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'स्थाचतिमृजेत्रन्०' उ० १.११६ सूत्रेण आलच्। तत स्त्रिया गौरादित्वान् ङीप्। पत्नी स्थाली तै० २.१.६.१]

स्थाः स्थावरम् (जगत्) २.२८.४ [स्था-स्थावर नि० ५.३]

स्थिरधन्वने स्थिरं दृढं धनुर्यस्य तस्मै (स्थिरायशूरवीराय) ७.४६.१ [स्थिर-धन्वन्पदयो समास। स्थिरधन्वने—दृढधन्वने नि० १०.६]

स्थिरपीतम् धर्माऽनुष्ठानेश्वरप्राप्तिरूप मोक्षफलं पीतं प्राप्तं येन तं विद्वांसम् ऋ० भू० ३१७, १०.७१.५ दृढविद्यायुक्तम् (विद्वज्जनम्) प० वि०। [स्थिर-पीतपदयो समास। पीतम्=पा पाने (भ्वा०) धातो क्त]

स्थिरम् ध्रुवम् (रथ=यानम्) ३.३५.४ निश्चलम् (बलम्) १.१२७.३ गमनरहितम् (यानम्), दृढं बलम् १.३६.३. [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'अजिरशिशिरशिथिल०' उ० १.५३ सूत्रेण किरच्प्रत्यये धातोराकारलोपः]

स्थिरः निश्चलप्रवृत्तिः (इन्द्र=सभाद्यध्यक्षः) १.१०१.४ स्वपरिधिस्थः (इन्द्र=सूर्यः) २.४१.१० निश्चलः (अर्वा=विज्ञानयुक्तः सुसन्तानः) ११.४४ **स्थिरैः**=दृढैः (अङ्गैः) २५.२१ [स्थिरमिति व्याख्यातम्]

स्थिरा निश्चला (जनी=मातरः) प्र०—अत्राऽऽकारादेशः १.१६७.७ निश्चलानि (दैव्यानि वस्तूनि) १३.१३ स्थिराणि दृढानि (गवासि=गवानि) ७.५६.७

चिर स्थातुमर्हाणि (आयुधा=आग्नेयादि—शतघ्न्यादीनि अस्त्र-शस्त्राणि), प्र०—अत्र 'शेश्छन्दसि०' इति लोप १ ३६ २ [स्थिरमिति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

स्थिरा निश्चला (मति) १६ ५० **स्थिराः**= दृढा (नेमय=कलाचक्राणि) १ ३८ १२ [स्थिरमिति व्याख्यातम् । तत स्त्रिया टाप्]

स्थिरेभिः दृढै (अङ्गै=अवयवै) २ ३३ ६ [स्थिरप्राति० 'बहुल छन्दसी' ति भिस ऐस् न भवति]

स्थूणा स्तम्भ इव दृढा नीति ५.६२ ७ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'रास्नासास्नास्थूणावीणा' उ० ३ १५ सूत्रेण न । आकारस्य ऊ आदेशो निपातनात् । तत स्त्रिया टाप्]

स्थूणेव [स्थूणावत् ५ ४५ २ यथा धारक स्तम्भ १ ५६ १ स्थूणा-इवपदयो समास]

स्थूरम् स्थिरम् (रत्न=रमणीय धनम्) ६ १६ १० **स्थूरयोः**=स्थूनयो (गभस्त्यो=बाह्वो) प्र०—अत्र वर्णव्यत्ययेन लस्य स्थाने र ६ २६ २ **स्थूराभ्याम्**= स्थूलाभ्याम् (पदार्थाभ्याम्), प्र०—अत्र कपिलकादित्वा-ल्लत्वविकल्प २५ ६ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'स्थ किच्च' उ० ५ ४ सूत्रेण ऊरन् । स्थूर समाश्रित-मात्रो महान् भवति नि० ६ २२]

स्थूलगुदया स्थूलया गुदया सह २५ ७ [स्थूला-गुदापदयो समास । स्थूल स्थूरेण व्याख्यातम्]

स्थूलपृषती स्थूलानि पृषन्ति यस्या सा (भा०—चन्द्रादिगुणयुक्ता पशू) २४ २ [स्थूल-पृषत्पदयो समास । स्त्रिया ङीप् । स्थूल स्थूरेण व्याख्यातम् । पृषत्—पृषु सेचने (भ्वा०) धातो 'वर्त्तमाने पृषद्बृहत्०' २ ८४ सूत्रेणाति शतृवच्च]

स्थूलम् महत् कर्म्म २३ २८ [स्थूलमिति स्थूरेण व्याख्यातम्]

स्नातः कृतस्नान (मनुष्य) २० २० स्नानविधि को किया हुआ (ब्रह्मचारी) स० वि० ७६, अथर्व० ११ ५ २६ [ष्णा शौचे (अदा०) धातो क्त]

स्नातः स्नान कुरुत १ १०४ ३ [ष्णा शौचे (अदा०) धातोर्लोट् । स्नाते शुद्ध्यर्थस्य नि० १२ २६]

स्नाती शुद्धा (उषा) ५ ८० ५ [ष्णा शौचे (अदा०) धातो शतृन्तात् ङीप्]

स्नावभ्यः स्थूलनाडीभ्य, सूक्ष्माभ्य सिराभ्यो वा ३६ १० [ष्णा शौचे (अदा०) धातो 'स्नामदिपद्यर्त्ति०' उ० ४.११३ सूत्रेण वनिप्]

स्नीहितीषु स्नेहकारिणीषु (कृष्टिषु=मनुष्यादि-प्रजासु) १ ७४ १ [ष्णिह प्रीतौ (दिवा०) धातो क्तिन् । धातोर्दीर्घश्छान्दस]

स्नुना व्याप्तेन (सहसा=बलेन) ४ २८ २ **स्नुभिः**=इच्छद्भिर्द्रु (मनुष्यै) ५ ६० ७ पवित्रैर्गुणै ५ ८७ ४ **स्नुषु**=प्रान्तेषु १७ १४ **स्नोः**=प्रकाशमानात् पुरुषार्थात् ४ २७ ४. [ष्णा शौचे (अदा०) धातोर्वाहु० औणा० कु]

स्पट् स्पष्टा (राजा) ५ ५६ १ [स्पश बाधनस्पर्शनयो (भ्वा०) धातो क्विप् कर्त्तरि]

स्पन्दने किञ्चिच्चलने ३ ५३ १६ [स्पदि किञ्चिच्चलने (भ्वा०) धातोर्ल्युट्]

स्पन्द्रा प्रचलितौ (अश्विनौ=स्त्रीपुरुषौ) १ १८० ६ [स्पदि किञ्चिच्चलने (भ्वा०) धातोरौणा० रक् । ततो द्विवचनस्याकारादेश]

स्परत् प्रीणयेत्, प्र०—अत्र लड्यडभाव १ १६१ ५ [स्पृ प्रीतिपालनयो (स्वा०) धातोर्लङ् । व्यत्ययेन शप् । अडभावश्च]

स्पर्द्धन्ते परोत्कर्ष न सहन्ते ६ १४ ३ [स्पर्द्ध सघर्षे (भ्वा०) धातोर्लट्]

स्पर्द्धमाना ईर्ष्यन्ती (सेना) १७ ४७ [स्पर्द्ध सघर्षे (भ्वा०) धातो शानजन्तात् स्त्रिया टाप्]

स्पर्द्धमानाः ईर्ष्यका (अयज्वानो जना) १ ३३ ५ [स्पर्द्ध सघर्षे (भ्वा०) धातो शानच्]

स्पशम् वन्वकम् (सूर्यम्) ४ १३ ३ दूतम् ३३ ६० **स्पशः**=स्पर्शकान् (शुभगुणान्) ४ ४ ३ अविद्याऽन्धकार बाधमाना विद्याप्रकाश स्पर्शन्त (देवास=आप्ता विद्व-ज्जना) ६ ६७ ५ स्पर्शवन्त पदार्था १ २५ १३ बाधनानि १३ ११ [स्पश बाधनस्पर्शनयो (भ्वा०) धातो रच् । औणा० वा अन्]

स्पार्हम् स्पृहा वाञ्छा तस्या इदम् १ ३१ १४ [स्पृहाप्राति० 'तस्येदम्' इत्यर्थेऽण् । स्पृहा=स्पृह ईप्सायाम् (चुरा०) धातो स्त्रियामड् । ततष्टाप्]

स्पार्हराधाः स्पार्हं स्पृहणीय राधो धन यस्य स (राजा) ४ १६ १६ [स्पार्ह-राधस्पदयो समास । स्पार्हमिति व्याख्यातम् । राधम् धननाम निघ० २ १०]

स्पार्हवीरम् स्पार्हा अभिकाङ्क्षिता वीरा यस्मिन् तम् (रयिं=श्रियम्) ५ ५४ १४ [स्पार्ह-वीरपदयो

समास । स्पार्ह इति व्याख्यातम्]

स्पार्हः स्पर्हणीय (विद्वज्जन) ४ ४७ १ स्पृहणीय (अग्नि =विद्वज्जन) ४ १ १२. य स्पृहयन्ति तस्याऽयम् (देव =दिव्यगुणसम्पन्नो मनुष्य) २७ ३० **स्पार्हे**= अभीप्सनीये (वर्णे=शुक्लादिगुणे) २ १.१२ [स्पृहा-प्राति० 'तस्येदम्' इत्यर्थेऽण्। स्पृहा—स्पृह ईप्सायाम् (चुरा०) धातो स्त्रियामड्। तनष्टाप्। स्पार्हा—स्पृहणीयानि नि० ३ ११]

स्पार्हा ईप्सितव्यानि (वस्त्रादीनि) १ १३५.२ अभिकाङ्क्षितु योग्यानि (जनिमानि=जन्मानि) ४ १ ७ स्पर्हणीयानि (कर्माणि) ४ १ ६ स्पृहणीयानि (वस्तूनि) १ १२३ ६ स्पृहणीया (श्रिय) ७ १५ ५ अभिकाङ्क्षितु-महेण (शिक्षकेण) २ २३ ६ [स्पार्हप्राति० शेर्लोप-श्छन्दसि। स्पार्हमिति व्याख्यातम्। स्पार्हा स्पृहणीयानि नि० ३ ११]

स्पूर्धन् स्पर्द्धमाना (शत्रुवद् दुर्जना) ६.६७ ६. [स्पर्द्ध सघर्षे (भ्वा०) धातो शतृ। वर्णव्यत्ययेनाकारस्योकारादेश]

स्पूर्धसे स्पर्धार्थे ५ ६४ ४ [स्पर्द्ध सघर्षे (भ्वा०) धातोरीणा० असुन्। वर्णव्यत्ययेनाकारस्योकारादेश]

स्पृणवाम अभीच्छेम ५ ४४ १० [स्पृ प्रीतिसेवनयो (भ्वा०) धातोर्लेट्]

स्पृतम् सेवितम् (चतुष्पात्=गवादिकम्) १४ २५. प्रीतम् (क्षत्र=राज्यकुलम्) १४ २४ **स्पृताः**=प्रीति-मन्त (सज्जना) १४ २५ प्रीता. (प्रजा) १४ २६ [स्पृ प्रीतिसेवनयो (स्वा०) धातो. क्त]

स्पृत्वा अभिव्याप्य ३१ १ [स्पृ प्रीतिसेवनयो (स्वा०) धातो क्त्वा]

स्पृधः स्पर्द्धमाना ईर्ष्यायुक्ता शत्रुसेना ३३ ६६ स्पर्द्धन्ते येषु तान् (सङ्ग्रामान्) ६.२० ६ स्पर्द्धन्ते यासु ता सङ्ग्रामसेना ६ ५ ६ अरिसेना. ३३ ६७ या स्पर्द्धन्ते ता शत्रुसेना १६ ७१ या स्पर्धयन्ते ता (सेना) सङ्ग्रामा वा ५ ५५ ६ स्पर्हणीयान् सङ्ग्रामान् ६ ४५ १८. स्पर्धमानान् शत्रून् १ ८ ३ [स्पृध सङ्ग्रामनाम निघ० २ १७. स्पर्द्ध सघर्षे (भ्वा०) धातो क्विप्। 'बहुल छन्दसि' अ० ६ १ ३४ इति सम्प्रसारणमल्लोपश्च]

स्पृधानम् स्पर्द्धमानम् (ज्योति =प्रकाशम्) ३ ३१ ४ [स्पर्द्ध सघर्षे (भ्वा०) धातो शानच्। 'बहुल छन्दसी' ति शपो लुक्। धातो सम्प्रसारणमपि 'बहुल छन्दसि' अ० ६.१.३४ इति पूर्वरूप। अत्वोपश्च छान्दस]

स्पृधि अभिकाङ्क्ष ५ ३ ६. [स्पृ प्रीतिपालनयो (स्वा०) धातोर्लोट्। 'बहुल छन्दसी' ति विकरणस्य लुक्]

स्पृश अनुगतो भव १३ १० गृहाण ४ ३.१५ **स्पृशन्ति**=प्राप्नुवन्ति १ ६२ ११ सम्बध्नन्ति १ ३६ ३ [स्पृश संस्पर्शने (तुदा०) धातोर्लट्। अन्यत्र वत्]

स्पृहयद्वर्णः स्पृहयन् वर्णो यस्य स (अग्नि = पावक) २.१० ५ य स्पृहयद्भिर्वर्ण्यते स्वीक्रियते स (अग्नि =शरीरस्था) विद्युत् ११ २४ [स्पृहयत्= वर्णपदयो. समास। स्पृहयत्=स्पृह ईप्सायाम् (चुरा०) धातो शतृ]

स्पृहयाय्यः स्पृहणीय (रयि =धनम्) ७ ४ ६ [स्पृह ईप्सायाम् (चुरा०) धातो 'स्पृहिगृहि०' अ० ३ २ १५८ सूत्रेणायलुच्]

स्पृहयाय्यानि स्पृहणीयानि (वसूनि) ६ ७ ३. [स्पृह ईप्सायाम् (चुरा०) धातो 'अुदक्षिस्पृहिगृहिभ्य आय्य' उ० ३ ६६ सूत्रेण आय्य]

स्पृहयेत् ईप्सेत आप्तुमिच्छेत् १ ४१.६. [स्पृह ईप्सायाम् (चुरा०) धातोर्लिङ्। कथादिष्वदन्तत्वादल्लोपस्य स्थानिवद्भावेन वृद्धिगुणयोरभाव]

स्फरीः अवृद्ध मा कुर्या ६ ६१ १४ [स्फर स्फुरणे (अदा०) धातोर्लुङ्। अटोऽभाव]

स्फातिम् वृद्धिम् १ १८८ ६ [स्फायी वृद्धौ (भ्वा०) धातो स्त्रिया क्तिन्]

स्फिग्या मध्यस्थाऽवयवरूपया (पृथिव्या) ३ ३२ ११

स्फुर पुरुषार्थय ४ ३.१४ **स्फुरत्**=सञ्चालयेत् १ ८४ ८ [स्फुर सचलने (तुदा०) धातोर्लेट्। अन्यत्र लेट्। स्फुरत्—अवस्फुरिष्यति नि० ५ १७]

स्फुरान् स्फूर्तिमत (देवान् किरणान्वा) ६ ६७ ११ [स्फुर सचलने (तुदा०) धातोर्घञर्थे क। ततो मत्वर्थीयस्य लुक्]

स्म एवा एव ४ १० ७. आश्चर्यगुणप्रकाशे १ १०२ ३ हर्षे १ १०२ ५ आनन्दे १ १०४ ५ अतीतार्थे क्रियायोगे १ २८ ६ प्रकारार्थे १ १२ ५ स्पष्टार्थे १ १२ ८ प्रसिद्धौ, प्र०—अत्र 'निपातस्य च' इति दीर्घ पत्वञ्च छान्दस दृश्यते ३३ ६४ वर्त्तमाने ३ ४६ सुखार्थे १.१५ १० खलु, प्र०—अत्रा'ऽविहितलक्षणो मूर्धन्य सुपामादिषु द्रष्टव्य' अ० ८ ३ ५३ इति वार्तिकेन मूर्धन्यादेश १ ३७.१५

स्मत् एव ५ ८७ ८ श्रेष्ठार्थे १ ५१ १५ प्रशंसायाम् १ १८६ ६ तत्कर्मानुष्ठानोक्तम् १ १०० १३

स्मदूधनी बहुदुग्धप्रापिका (गाव) प्र०—अत्र स्मदुपपदाद् ऊधसोऽनङ् १ ७३ ६ [स्मद्-ऊधस्पदयो समासे समासान्तोऽनङ् 'ऊधसोऽनङ्' सूत्रेण। तत स्त्रिया ङीप्]

स्मद्दिष्टयः निश्चिता दिष्टयो दर्शनानि येषान्ते (विद्वासो जना) ७ १८ २३ **स्मद्दिष्टिः**=कल्याणोपदेष्टा (इन्द्र=सम्राट्) ३ ४५ ५ **स्मद्दिष्टीन्**=प्रशंसितदर्शनान् (जनान्) ६ ६३ ६ [स्मद्-दिष्टिपदयो समास। दिष्टि=दिश अतिसर्जने (तुदा०) धातो स्त्रिया क्तिन्। धातूनामनेकार्थकत्वादत्र दिश दर्शनेऽर्थे]

स्मयते आनन्दयति, प्र०—अत्राऽन्तर्गतो ण्यर्थ १ ९२ ६ **स्मयन्त**=ईषद्धसन्ति १ १६८ ८ **स्मयेते**=ईषद्धसत ३ ४ ६ [स्मिङ् ईषद्धसने (भ्वा०) धातोर्लट्। अन्यत्र लङ्। अडभावश्छान्दस]

स्मयमानः किञ्चिद्धसन्निव (प्रवक्तृजन) २ ४ ६ [स्मिङ् ईषद्हसने (भ्वा०) धातो शानच्]

स्मयमानाभिः किञ्चिद्धासकारिकाभि (कन्याभि) १ ७९ २ [स्मिङ् ईषद्हसने (भ्वा०)+शानच्+टाप्+भिस्]

स्मयमानासः किञ्चिद् हासेन प्रसन्नताकारिण्य (योषा=स्त्रिय) १७ ९६ किञ्चिद्धसन्त्यो मितहासा (योषा) ४ ५८.८ [स्मयमानेति व्याख्यातम्। ततो जसोऽसुक्]

स्मर पर्यालोचय, भा०—परमेश्वरस्याऽऽज्ञापालनमुपासनञ्च कुरु ४० १५ [स्मृ चिन्तायाम् (भ्वा०) धातोर्लोट्]

स्मरकारीम् या स्मर काम करोति ता दूतिकाम् ३० ९ [स्मरोपपदे डुकृञ् करणे (तना०) धातो 'कर्मण्यण्' इत्यण्। तत स्त्रिया ङीप्। स्मर=स्मृ आध्याने (भ्वा०)+भावेऽप्]

स्मसि स्म १ ५७ ५ भवेम १ ३७ १५ भवाम १ २९ १ [अस भुवि (अदा०) धातोर्लटि उत्तमे बहुवचनम्। 'इदन्तो मसि' इति मस इदन्तत्वम्]

स्य अन्त प्रापय ४ १६ २ **स्यतम्**=तनूकुरुतम् ६ ७४ ३ **स्यनाम्**=अन्ते भवताम् २ ४० ४ **स्यतु**=प्राप्नोतु १ १४२ १० विमुञ्चत २७ २० **स्यन्ति**=कार्याणि समापयति १ ८५ ५ **स्यस्व**=विद्या पारङ्गमय ७ २ ९ अन्त कुरु ३ ४ ९ प्राप्नुहि १ १०१ १० [षोऽन्त कर्मणि (दिवा०) धातोर्लोट्। अन्यत्र लडपि। स्यस्व-प्रयोगे व्यत्ययेनात्मनेपदम्]

स्यन्दताम् प्रस्रवन्तु ५ ८३ ८. [स्यन्दू प्रस्रवणे (भ्वा०) धातोर्लोट् स्यन्दते गतिकर्मा निघ० २ १४]

स्यन्दमानाभ्यः प्रस्रुताभ्यः (अद्भ्य=जलेभ्य) २२ २५ **स्यन्दमानाः**=प्रस्रवन्त्य (आप=जलानि) १ ३२ २ [स्यन्दू प्रस्रवणे (भ्वा०) धातो शानच्। तत स्त्रिया टाप्]

स्यन्दयध्यै स्यन्दयितु प्रस्रावयितुम् ४ २२ ७ [स्यन्दू प्रस्रवणे (भ्वा०) धातोर्णिजन्तात् तुमर्थेऽध्यै]

स्यन्द्रः प्रस्रावक (तायु=स्तेन) ६ १२ ५ **स्यन्द्राः**=धैर्यगतय (नर=नायका जना) ५ ५२ ८ [स्यन्दू प्रस्रवणे (भ्वा०) धातोर्वाहु० औणा० रक्]

स्यन्द्रासः किञ्चिच्चेष्टमाना (पुरुषार्थिजना) ५ ५२ ३ प्रस्रवन्त प्रस्रावयन्तो वा (अग्नय=पावका) ५ ८७ ३ [स्यन्द्र इति व्याख्यातम्। ततो जसोऽसुक्। स्यन्द्रास बलनाम निघ० २ ९]

स्यन्नाः आशुगमना (एन्य=नद्य) ५ ५३ ७ [स्यन्दू प्रस्रवणे (भ्वा०) धातो क्त। तत स्त्रिया टाप्]

स्य असौ, प्र०—अत्र 'स्यश्छन्दसि बहुलम्' इति सोर्लोप ९ १४ [त्यद् सर्वनाम्न. सौ रूपम्। सोर्लोपश्छन्दसि]

स्यात् भवेत् ७ ३४ २१ **स्यात**=भवेयु १ १ **स्याम्**=भवेयम् ६.५० ९ **स्याम**=भवेम १ ४ ६ होवे, स० वि० १५६, ७ ४१ ५ प्रवृत्ता भवेम ५ ६५ ५ **स्याः**=भवेत् ४ १६ १८ भवे ७ १ ८ भूया ६ ३३ ५ [अस भुवि (अदा०) धातोर्लिङ्]

स्यातन भवेत १ ३८ ४ [अस भुवि (अदा०) धातोर्लिङ्। तस्य तनबादेशश्छान्दस]

स्यामि प्रविशामि १२ ६५ [षोऽन्त कर्मणि (दिवा०) धातोर्लट्। धातूनामनेकार्थकत्वादत्र प्रवेशनेऽपि]

स्यालात् स्वस्त्रीभ्रातु १ १०९ २. [स्याल आमन्त्र सयोगेनेति नैदाना। स्याल्लाजानावपतीति वा नि० ६ ९]

स्यूतम् विविधसाधनै कारुभिर्निष्पादितम् (नर=विनयाभियुक्त मनुष्यम्) १ ३१ १५ [षिवु तन्तुसन्ताने (दिवा०) धातो क्त। 'च्छ्वो शूडनुनासिके चे' ति वकारस्य ऊठ्]

स्यूमगभस्तिः समूहकिरण (सूर=सूर्य) १ १२२ १५ [स्यूम-गभस्तिपदयो समास]

२ ३२ ७. [मु-अङ्गुरिपदयो समास]

स्वजन्मना स्वस्य जन्मना ७ १ १२ [स्व-जन्मन्-पदयो समास']

स्वजाम् स्वात्मजनिताम् (मेना=वाचम्) १ १२१.२ **स्वजाः**=स्वस्मात्कारणाज्जाता (धूतय =मनुष्या) १ १६८ २ [स्वोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड. । तत स्त्रिया टाप्]

स्वजेन्यम् स्वेन जेतु योग्यम् (व्यवहारम्) ५ ७ ५ [स्व-जेन्यपदयो समास । जेन्यम्—जि जये (भ्वा०) धातोर्यत् । नुगागमश्छान्दस]

स्वञ्चम् य सुष्ठ्वञ्चति जानाति प्रापयति वा तम् (परमात्मानम्) ६.१५ १०. सुष्ठ्वञ्चन्त प्राप्तशरीरात्मबलेन युक्तम् (युवान जनम्) ६ ५८.४ **स्वञ्चः**=ये सुष्ठ्वञ्चन्ति गच्छन्ति ते (मरुत =बलिष्ठा मनुष्या) ७ ५६ १६ याभि सुष्ठ्वञ्चन्ति गच्छन्ति प्राप्नुवन्ति वा ते (हरित =अङ्गुलय) ४ ६ ६ [सु+अञ्चु गतिपूजनयो (भ्वा०) धातो कर्त्तरि क्विप् । 'ऋत्विग्दधृक्०' इत्यादिना वा क्विन्]

स्वञ्चाः य सुष्ठ्वञ्चति स (शिल्पिजन) ५ ३७.१. [सूपपदे अञ्चु गतिपूजनयो (भ्वा०)धातोरसुन् । स्वञ्चा —स्वञ्चा सु अञ्चन । नि० ५.७]

स्वतवद्भ्यः स्वतो वासो येषान्तेभ्य (मरुद्भ्य = मनुष्येभ्य) २४ १६ **स्वतवान्**=स्वैर्गुणैर्वृद्ध. (इन्द्र = राजा) ४ २० ६ य स्वान् तौति वर्धयति स (गृहस्थो जन), प्र०—अत्र तु-धातोरौणादिक आनि प्रत्यय १७ ८५ स्वेन प्रवृद्ध (पायु =रक्षको राजा) ४ २ ६ [स्वोपपदे तु गति वृद्धिहिंसासु (अदा०) धातोर्वाहु० औणा० आनि]

स्वतवसः स्वकीयबलयुक्ता (धूतय =मनुष्या) १ १६८ २ स्व स्वकीय तवो बल येषा ते (विद्वज्जना) १ १६६ २ स्वकीयबला (मरुत =विद्वज्जना) ७ ५९ ११ **स्वतव** =स्वकीय तवो बल यस्य तत्सम्बुद्धौ (इन्द्र= गृहस्थिजन) ६ २२ ६ [स्व-तवस्पदयो समास । तव बलनाम निघ० २ ९]

स्वतवः स्व स्वकीय तवो बल यस्मिँस्तन् (मन) १ १५९ २ [स्व-तवस्पदयो समास । तव बलनाम निघ० २ ९]

स्वद आस्वादय ३ १४ ७ **स्वदतु**=आभुनक्तु ९ १ आस्वादयतु ३० १ स्वदता स्वादिष्ठा करोतु प्र०—अत्र व्यत्ययेन परस्मैपदम् ११.७. **स्वदन्ताम्**=भुञ्जताम् ६ ७ **स्वदन्ति**=सुस्वादमदन्ति ७ २ २ **स्वदन्तु**=प्राप्नुवन्तु २९ ३५ सुष्ठु सेवन्ताम्, अ०—सुसेवन्ताम् ४ १२. स्वदस्व मुड्ढ्व ३.५४ २२ **स्वदाति**=आस्वदेत्, प्र०—अत्र लेटि व्यत्ययेन परस्मैपदम् २० ४५ [ष्वद आस्वादने (भ्वा०) धातोर्लोट् । व्यत्ययेन परस्मैपदम् । अन्यत्र लट् लेट् लोट् चापि । स्वदति अर्चतिकर्मा । निघ० ३ १४]

स्वदन्तः सुष्ठु भुञ्जाना (मर्त्तास =मनुष्या) २.१ १४ [ष्वद आस्वादने (भ्वा०) धातो शतृ । व्यत्ययेन परस्मैपदम्]

स्वदय आस्वादय २९ २६ [ष्वद आस्वादने (चुरा०) धातोर्लोट्]

स्वदितानि आस्वादितानि (हव्या=अत्तुमर्हाणि वस्तूनि २९ १० [ष्वद आस्वादने (भ्वा०) धातो क्त]

स्वधया स्वकीयया धृतया प्रज्ञया ४ ५८ ४ अन्नादिना ८ ६१. स्वस्वरूपधारणया क्रियया १ १५४ ४ अन्नादिपदार्थयुक्तया पृथिव्या सह ४ १३ ५ स्वकीयया गत्या ४ १४ ५ अन्नविद्यया, शरीरबुद्धिबलधारणेन ऋ० भू० २६२, १९.६० अमृतरूपया सेवया ऋ० भू० २५४, २ ३४. स्वकीयपदार्थधारणक्रियया १९ ६० जलेनान्नेन वा ३ ४७ उदकेनाऽन्नेन वा १ १०८ १२ अपने ही अन्नादि पदार्थ के धारण से स० वि० १४३, अथर्व० १२ ५ ३ **स्वधा**=या स्व दधाति सा (स्त्री) ५.३४ १ अमृतात्मकमन्नम् २ ७ स्वान् दधाति यया सा क्रिया, स्वेन धारिता सेवा वा १९ ३६ ये स्व दधति ते (मनुष्या), प्र०—अत्र विभक्तिलोप ३३ ७४. अपना ही धारण स० वि० १९७ ९ ११३ १० **स्वधाभिः**=स्वय धारितै पदार्थै १.११३ १३ द्यावापृथिवीभि १ ९५ ४ **स्वधाम्**=स्वकीया धारणशक्तिम् १ ८८ ६ सूदकम् २ ३५ ७ **स्वधायै**=स्ववस्तुधारणलक्षणायै राजनीत्यै १० २१ मोक्षविद्याप्राप्तये ऋ० भू० २५८, १९ ४५ अन्नाय, पृथिवीराज्याय, न्यायप्रकाशाय वा २ ३२ **स्वधाः**=उदकानि १ १४४ २ ये स्वयमेव दधते ते (पुत्रादय) २ ३४ [स्वोपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्विप् सम्पदादित्वात् । अथवा ष्वद आस्वादने (भ्वा०) धातोर्वाहु० औणा० आ प्रत्यय । धातोर्दस्य ध । स्वधा अन्ननाम निघ० २ ७ । उदकनाम निघ० १ १२ द्यावापृथिव्योर्नाम निघ० ३ ३० स्वधा—स्वधा वै पितृणामन्नम् श० १३ ८ १ ४ स्वधा वै शरद् । श० १३ ८ १ ४]

स्वधर्मन् स्वस्य वैदिके धर्मणि ३ २१ २ [स्व-धर्मन्

अभिमृशे अभिमृशे=अभिसहे २ १० ५ [अभि+मृष तितिक्षायाम् (दिवा०) धातोर्लट् व्यत्ययेन शप्। षकारस्य शकारश्छान्दस]

अभिमित्रम् अभिमुख सखायमिव ७ १८ १० [अभि-मित्रयो समास]

अभियन्तु प्राप्नुवन्तु १२ ६६ [अभि+या प्रापणे (अदा०) धातोर्लोट्]

अभियासिषत् सम्मुख यातुमिच्छतु १ १७४ ५ [अभि+या प्रापणे (अदा०) धातोरिच्छायामर्थे सन्। ततो द्वित्वाऽभावो लेट् च]

अभियुग्वना योऽभियुज्यते वन्यते विभज्यते तेन (रथेन) ६ ४५ १५ [अभि+युजिर् योगे (रुधा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप्]

अभियुग्वा योऽभियुङ्क्ते स, भा०—सयुक्त (मरण प्राप्तो जीव) ३६ ७ [अभि+युजिर् योगे (रुधा०) धातो क्वनिप्]

अभियुजः या आभिमुख्येन युज्यन्ते ता प्रजा ३ ११ ६ योऽभियुङ्क्ते तस्य (तन्यतो =विद्युत) ४ ३८ ८ या आभिमुख्येन युञ्जते ता शत्रुसेना ५ ४ ५ या अभियुञ्जते ता (विश =प्रजा) ६ २५ २ [अभि+युजिर् योगे (रुधा०) धातो 'सत्सूद्विष०' अ० ३ २ ६१ सूत्रेण क्विप्]

अभियुध्य अभिमुख युध्यस्व, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ६१ २३ आभिमुख्येन योधय गमय, प्र०—अत्र अन्तर्भाविण्यर्थं युध्यतिर्गतिकर्मा निघ० २ १४, ३४ २३ [अभि+युध सम्पहारे (दिवा०) धातोर्लोट् व्यत्ययेन परस्मैपदम्]

अभियोधिष्टम् अभिमुख युध्येयाताम् ६ ६० २ [अभि+युध सम्प्रहारे (दिवा०) धातोर्लुङ् अडभावश्च]

अभिरक्षति सब ओर से रक्षा करता है ३३ ३० **अभिरक्षन्ति**=सर्वत पालयन्ति १ १६३ ५ [अभि+रक्ष पालने (भ्वा०) धातोर्लट्]

अभिरुरुहुः अभिवर्धन्ते ५ ७ ५ [अभि+रुह बीजजन्मनि प्रादुर्भावे च धातोर्लिट्]

अभिवक्षसि आभिमुख्येन वदसि ३ १५ ५ [अभि+वच परिभाषणे (अदा०) धातोर्लेट् 'सिब्बहुल लेटि' इति सिप्]

अभिवक्षि प्रापय ६ २१ १२ [अभि+वह प्रापणे (भ्वा०) धातोर्लुडि उत्तमैकवचने रूपम् अडभावो पुरुषव्यत्ययश्च]

अभिवदति दूसरे के साथ सवाद या दूसरे को अभिवादन करता है स० वि० २०६ अथ० ६ ६ १.४ [अभि+वद व्यक्तायां वाचि (भ्वा०) धातोर्लट्। वदति गतिकर्मा निघ० २ १४]

अभिवर्षतु अभिमुख वर्षतु ३६ १० सब ओर से बरसे आर्याभि० २ २२, ३६ १० [अभि+वृषु सेचने (भ्वा०) धातोर्लट्]

अभिववक्षे अभिसहन्ति, प्र०—अय 'वक्ष सङ्घाते' इत्यस्य प्रयोग १ १४६ २ [अभि+वक्ष रोषे सङ्घात इत्येके (भ्वा०) धातोर्लिट्। व्यत्ययेन परस्मैपदम्]

अभिवव्रे अभिमुख वृणोति ४ १ १३ [अभि+वृञ् वरणे (स्वा०) धातोर्लिट्]

अभिवष्टि अभित कामयते ४ १ ८ [अभि+वश कान्तौ (अदा०) धातोर्लट्। वष्टि कान्तिकर्मा निघ० २ ६]

अभिवहन्ति प्रापयन्ति १ ११८ ४ [अभि+वह प्रापणे (भ्वा०) धातोर्लट्]

अभिवावशाना अभिमुख भृश कामयमाना (गौ = पृथिवी) १ १६४ २८ [अभि+वश कान्तौ (अदा०) धातो 'लिट कानज्वा' अ० ३ २ १०६ सूत्रेण कानच् वावशान पदनाम निघ० ४ २]

अभिवावशे अभिमुख भृश कामयते २ १४ ६ [अभि+वश कान्तौ (अदा०) धातोर्यङ्लुक् व्यत्ययेनात्मनेपदम्]

अभिवाहि आभिमुख्येन प्राप्नुहि १८ ४५ [अभि+वा गतिगन्धनयो (अदा०) धातोर्लोट्]

अभिविक्त सर्वतो विजानीत २५ ३७ सर्वतो विञ्ज्यात् पृथक् कुर्यात् १ १६२ १५ [अभि+विजिर् पृथक् भावे (रुधा०) धातोर्लुङ् अडभावश्च]

अभिविख्येषम् अभित सर्वतो विविध पश्येयम्, प्र०—अत्राऽभिव्योरुपपदे चक्षिङ् इत्यस्याऽऽशीर्लिङ्यार्धधातुकसज्ञामाश्रित्य रयाञ्-आदेश, 'लिङ्याशिष्यङ्' इत्यङ्, सार्वधातुकसज्ञामाश्रित्य च या इत्यस्य इय्-आदेश, सकारलोपाऽभाव इति १ ११]

अभिविद्योत् अभिविद्योतयेत् ४ ४ ६ [अभि+वि+द्युत दीप्तौ (भ्वा०) धातोर्लुङ्। अडभाव । 'द्युद्भ्यो लुङी' ति परस्मैपदम्। च्लेर्लुक् च]

अभिविनश्यति सर्वतोऽदृष्ट भवति १ १७० १ [अभि+वि+णश अदर्शने (दिवा०) धातोर्लट्]

सुलुक्०' सूत्रेण शस. स्थान आकारादेश । अन्यत्र प्रथमाद्विवचनस्याकार]

स्वधरासः सुष्ठ्वध्वरा क्रियायोगसिद्धयो येभ्यस्ते (अग्नय =पावका) ४ ४५ ५ [सु-अध्वरपदयो समासे जसोऽमुक्]

स्वनः शब्द १ १४३ ५ [स्वन शब्दे (भ्वा०) धातो 'स्वनहसोर्वा' इत्यप् । स्वनः वाङ्नाम निघ० १ ११.]

स्वनयेन स्वस्य नयन यस्य दातुस्तेन (दातृजनेन) १.१२६.३. [स्व-नयपदयो समास । नय.—णीञ् प्रापणे (भ्वा०) धातो 'एरच्' इत्यच्]

स्वनीक शोभनमनीक सेना यस्य तत्सम्बुद्धौ (सेनापते) २ १ ८. उत्तमसैन्य (अग्ने=राजन्) ४ ६.६. शोभनान्यनीकानि सैन्यानि यस्य तत्सम्बुद्धौ (अग्ने=विद्वन्राजन्) ६ १५ १६ [सु-अनीकपदयो समास । अनीकम्=अन प्राणने (अदा०) धातो 'अनिहृपिभ्या किच्च' उ० ४ १७ सूत्रेण ईकन्]

स्वप शेष्व ७.५५ २ [ञिष्वप् शये (अदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुङ् न]

स्वपतः शयन प्राप्तस्य (लोकस्य=जीवस्य) ३४ ५५. **स्वपते**=प्राप्तसुषुप्तये (जनाय) २२ ७ **स्वपन्**=शयान. सन् (भा०—उत्तमपुरुष) ५.४४.१३ [ञिष्वप् शये (अदा०) धातो शतृ]

स्वपत्यम् सुष्ठ्वपत्ययुक्तम् (रयिं=श्रियम्) २ ४ ८ शोभनान्यपत्यानि सन्ताना यस्मात्तम् (रयिम्) ७ १ ५. शोभन सन्तानम् १ ११६ १६ **स्वपत्यस्य**=शोभनान्यपत्यानि विद्यार्थिनो वा यस्य तस्य (शिक्षो =शिक्षकजनस्य) ३.१६.३ शोभनापत्यसहितस्य (राय =धनस्य) २ २ १२. **स्वपत्यानि**=शोभनानि च तान्यपत्यानि २७.२३ शोभनशिक्षायुक्तान् पुत्रादीन् १ ७२ ६. सुष्ठु शिक्षयोत्तमानि चाऽपत्यानि च तानि ४ ३४ ६ **स्वपत्ये**=स्वकीये सन्ताने ३ ३.७ [सु-अपत्यपदयो. समास । अपत्यम् अपत्यनाम निघ० २ २. अपत्य कस्मात् ? अपतत भवति । नानेन पततीति वा नि० ३.१]

स्वपत्यै शोभनान्यपत्यानि यस्या तस्यै (इळे=अन्नरूपायै राज्यलक्ष्म्यै) १ ५४ ११. [सु-अपत्यपदयो समासे स्त्रिया टापि चतुर्थ्येकवचने छान्दस रूपम्]

स्वपनम् निद्राम् ३० १७ [ञिष्वप् शये (अदा०) धातोर्ल्युट्]

स्वपसः शोभनानि धर्म्याणि कर्माणि येषान्ते (विद्वज्जना) १ १६१ ६ सुष्ठ्वपो धर्म्यं कर्म कुर्वाणाः (विद्वज्जना) ४ २ १६ सुष्ठ्वपासि कर्माणि येभ्यस्ते (पितर.) १.१५६ ३ **स्वपसा**=सुष्ठु कर्मणा २५ ३ **स्वपाः**=शोभनानि धर्म्याण्यपासि कर्माणि यस्य स (विद्वज्जन) १.१३०.६. सत्यभाषणादिकर्मा (योगिजन.) ५ २६ १५. शोभनान्यपासि कर्माणि यस्य तद्वन् (अग्ने=सभापते राजन्) ८ ३८. सुष्ठुकर्मा (विद्वज्जन) ५ २ १० श्रेष्ठकर्मानुष्ठान· (पिता) ५ ६० ५ [सु-अपस्पदयो. समास । अप कर्मनाम निघ० २ १ स्वपस. सुकर्माणः नि० ८.१३]

स्वपस्तमम् अतिशयेन शोभनान्यपासि कर्माणि यस्मात्तम् (वज्र =किरणसमूहम्) १ ६१ ६ **स्वपस्तमः**=शोभनान्यपासि कर्माणि यस्य सोऽतिशयित. (राजसन्तानः) ४.१७ ४. [स्वपस् इति व्याख्यातम् । ततोऽतिशायने तमप्]

स्वपस्यमानः शोभनानि चाऽपासि कर्माणि च स्वपासि, तान्याचरतीव न (सूनु) १ ६२ ६ [स्वपस् इति व्याख्यातम् । तत आचारेऽर्थे क्यङन्ताच्छानच्]

स्वपस्यया आत्मन. सुष्ठ्वपस. कर्मण इच्छया १ १६१ ११ सुष्ठ्वपासि कर्माणि तान्यात्मन इच्छया ४ ३५.२. शोभनान्यपासि कर्माणि यस्या तया क्रियया १ ११० ८ **स्वपस्या**=सुष्ठु धर्म्यकर्मेच्छया ४.३५ ६. [स्वपस् इति व्याख्यातम् । तत आत्मन इच्छायामर्थे क्यजन्तात् स्त्रियाम् 'अ प्रत्ययात्' इत्यकार ततष्टाप्]

स्वपस्याय शोभनान्यपासि कर्माणि यस्य तस्मै (इन्द्राय=ऐश्वर्ययुक्ताय जनाय) २४ १ [सु-अपस्पदयो समासे कृते मत्वर्थे यत् छान्दस]

स्वपाक सुष्ठ्वपरिपक्वज्ञान (अग्ने=राजन्) ४ ३ २. [सु-अपाकपदयो समास । अपाक —नञ्-पाकयो समास । पाक =डुपचप् पाके (भ्वा०) धातोर्घञ्]

स्वपिवात वायुरिव वर्त्तमान (राजन्) ७ ४६.३ [स्वपिवात स्वाप्तवचन नि० १० ६]

स्वपूभिः शयानैः, स्वकीयैः पवित्राचरणैः सह ७ ५६ ३ [ञिष्वप् शये (अदा०) धातोर्वाहुः औणा० ऊ । अथवा स्वोपपदे पूञ् पवने (क्रया०) धातो क्विप्]

स्वप्नस्य निद्राया १ १२० १२ **स्वप्नेन**=शयनेन २.१५ ६ [ञिष्वप् शये (अदा०) धातो 'स्वपो नन्' इति नन्]

स्वभानवः स्वकीया भानुर्दीप्ति प्रकाशो येषान्ते (विप्रा =मेधाविजना) ३ ५१ वायुवत् स्वभानवो ज्ञान-

पदयो समासे 'सुपा सुलुक्०' इति सप्तम्या लुक्]

स्वधापते अन्नादीना स्वामिन् (इन्द्र=महैश्वर्ययुक्त प्रजाजन) ६४४२ स्वकीयपदार्थाना धर्त्त (इन्द्र=राजन्) ६४४३ अन्नस्वामिन् (इन्द्र=राजादिजन) ६४४१ [स्वधा-पतिपदयो समास । स्वधेति व्याख्यातम्]

स्वधायिभ्यः ये स्वधामुदकमन्न वैतु प्राप्तु शीलास्तेभ्य (पितृभ्य=पालकेभ्यो जनकाध्यापकेभ्य) १६३६ [स्वधोपपदे इण् गतौ (अदा०) धातोस्ताच्छील्ये णिनि । स्वधेति व्याख्यातम्]

स्वधावन् प्रशस्ताऽन्नयुक्त (राजन्) ५३२ **स्वधावान्**=प्रशस्तस्वधा अमृतरूपा गुणा विद्यन्ते यस्मिन् स (भा०-हृद्यो महागुणो बाल, अमृतवर्षकश्चन्द्रमा) ३३५ बहुधनधान्ययुक्त (इन्द्र=सूर्य इव राजा) ७२०१ स्वेन स्वकीयेन गुणेन धार्यत इति स्वधाऽमृतरूप ओषध्यादिरसस्तद्वान् (हरि=चन्द्र) १६५१ स्वधा स्वकीया अवयवा प्रशस्ता विद्यन्तेऽस्मिन् स (कवि=काल) १६५४ प्रभूताऽन्नवान् (इन्द्र=पुरुषार्थिसभेश) २२०६ बह्वन्नाद्येश्वर्य ४५२ [स्वधाप्राति० प्रशसाया भूम्न्यर्थे वा मतुप् । स्वधेति व्याख्यातम् । स्वधावत्—अन्नवते नि० १०६ स्वधाव अन्नवन् नि० १२१७]

स्वधावरी बह्वन्नादिप्रदे (रोदसी=द्यावापृथिव्यौ) ७३१७ [स्वधावन् इति व्याख्यातम् । तत स्त्रिया 'वनो र च' इति ङीप्-रेफौ]

स्वधावः प्रशस्त स्वधाऽन्न विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=जगदीश्वर सभाध्यक्ष वा) १६३६ बह्वन्नयुक्त (जगदीश्वर) १७२१ प्रशस्तानि स्वधा अमृतरूपाण्यन्नानि विद्यन्ते यस्य तत्सम्बुद्धौ (अग्ने=प्रकाशात्मन् विद्वज्जन) ३२०३ बहुधनधान्ययुक्त (राजन्) ५३५ हे स्वसामर्थ्यादि धारण करने वाले (ईश्वर) आर्याभि० २३८, १७२१

स्वधाग्ने=य स्व दधाति तस्मै (पत्ये) ५३२१० य स्व वस्त्वेव दधाति, य स्वा धार्मिका क्रिया दधाति तस्मै (देवाय=विद्वज्जनाय) ७४६१ [स्वधावन् इति व्याख्यातम् । तत सम्बुद्धौ 'मतुवसो रु सम्बुद्धौ०' अ० ८३१ सूत्रेण रुत्वम्]

स्वधास्थाः सत्यविद्याभक्ति-स्वपदार्थधारिण (सर्वमनुष्या) ऋ० भू० २५४, [स्वधोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क । स्वधेति व्याख्यातम्]

स्वधितिम् वज्रम् २३६७ **स्वधितिः**=विद्युत् ११६२१८ वज्र इव वर्त्तमान (वैद्य) २५४१ अविनाशित्वाद् वज्रमय (रुद्र=उपदेशक) ३६३ **स्वधिते**=स्वेष्वात्मीयेषु धिति पोषण यस्यास्तत्सम्बुद्धौ (अध्यापिके स्त्रि) ६१५ रोगनाशने स्वधितिर्वज्रवत् प्रवर्त्तमान (विद्वज्जन) ४१ दुखविच्छेदक (विद्वज्जन) ५४२

स्वधितौ=वज्रवद्वर्त्तमानौ (स्वरौ) २५३२ स्वेन धृतौ (स्वरौ=शब्दोपतापौ) ११६२६ [स्व-धितिपदयो समास । धिति—डुधाञ् धारणपोषणयो (जु०) धातो स्त्रिया क्तिन् । स्वधिति वज्रनाम निघ० २२०]

स्वधितिवान् स्वधिति प्रशस्तो वज्रो विद्यते यस्य स (विद्वान् शिल्पिजन) १८८२ [स्वधितिरिति व्याख्यातम् । तत प्रशसाया मतुप्]

स्वधितीव वज्रधर इव (राजेव) ५७८ [स्वधिति-इवपदयो समास । स्वधिति वज्रनाम निघ० २२०]

स्वधृतिः स्वेपा धारणम् २२१६ स्वेपा पदार्थाना धारणम् ८५१ [स्व-धृतिपदयो समास । धृति=धृञ् धारणे (भ्वा०) धातो स्त्रिया क्तिन्]

स्वध्वर शोभना अध्वरा यस्य तत्सम्बुद्धौ (विद्वज्जन) १४४८ सुष्ठ्वहिंसायुक्त (राजन्) ५२८५ **स्वध्वरम्**=सुष्ठ्वहिंसनीयम् (विद्युदाख्य वह्निम्) ३६८ शोभना अध्वरा यस्मात्तम् (अग्नि=प्रकाशमानामग्निविद्याम्) ६१६४०. सुष्ठ्वध्वरा अहिंसिता क्रिया यस्मात्तम् (रथ=रमणीय यानम्) ४४६४ सुष्ठ्वहिंसाधर्मप्राप्तम् (अग्निम्) ५६३ शोभना पालनीया अध्वरा यस्य तम् (जनम्) १४५१ सुष्ठ्वध्वरा अहिंसनीया व्यवहारा यस्मात्तम् (अग्नि=अग्निविद्याम्) १५३२ शोभना अध्वरा अहिंसादयो व्यवहारा यस्य तम् (अग्नि=सत्योपदेशकम्) ७१६१ **स्वध्वरः**=शोभनकारित्वादहिंसनीय (पुरुष) १५४७ सुष्ठु यज्ञस्याऽनुष्ठाता (पति) ११२७१ हिंसितुमनर्ह (राजा) २२८ **स्वध्वरे**=सुशोभमाने (यज्ञे) ११४२५ शोभनेऽहिंसामये (यज्ञे) ५१७१ [सु-अध्वरपदयो समास । अध्वर यज्ञनाम निघ० ३१७ अध्वर इति यज्ञनाम । ध्वरति हिंसाकर्मा तत्प्रतिषेध नि० १८]

स्वध्वरा सुष्ठ्वहिंस्रस्वभावयुक्तान् (विद्यार्थिजनान्) ७१७४ सुष्ठ्वहिंसाधर्मयुक्तान् (सज्जनान्) ६१०१ शोभनान्यहिंसादीनि कर्माणि येषु व्यवहारेषु तान् ३२६१२ शोभनोऽध्वरोऽहिंसामयो व्यवहारो येषान्तान् (देवान्=विदुषोऽध्यापकान्) ७१७३ सुष्ठ्वध्वरो यज्ञो याभ्यान्तौ (सूर्यविद्युतौ) ३६६. [सु-अध्वरपदयो समासे सुपा

ततो लोट् । अन्यत्र लट् । अथवा स्वृ शब्दोपतापयो. (भ्वा०) धातोर्लोट् । अन्यत्र लट् च]

स्वरङ्कृतेन सुष्ठु पूर्णेन कृतेन (यज्ञेन) १ १६२ ५. सुष्ठ्वलङ्कृतेन (यज्ञेन), प्र०—अत्र कपिलकादित्वाद्रेफः २५.२८ [सु-अलम्-कृतपदाना समास. । कपिलकादित्वात् लस्य रेफ]

स्वरणम् य स्वरति शब्दार्थसम्बन्धानुपदिशति तम् (सोमान=यजमानम्) १ १८.१ सर्वविद्याप्रवक्तारम् (विद्वज्जनम्) ३.२८. [स्वृ शब्दोपतापयो (भ्वा०) धातो इति 'कृत्यल्युटो बहुलम्' कर्त्तरि ल्युट् । स्वरणम्=प्रकाशनवन्तम् नि० ६.१०]

स्वरवः सुस्वरान् सेवमाना (हसा पक्षिविशेषा) ३.८ ६. स्वकीयो रवो विद्याप्रज्ञापक शब्दो येषान्ते (देवास =विद्वज्जना) ३ ८ ६ प्रशसका विद्वज्जना.) ३.८ १०. प्रतापयुक्ता (उपस इव कन्या) ४ ५१ २ **स्वरुम्**=तापकमादित्यम् १.६२ ५ **स्वरुः**=उपदेष्टा (विद्वज्जन) ४ ६ ३ भा० प्रतापयुक्त (इन्द्र =ईश्वर) ३३ २४. **स्वरूणाम्**=यज्ञशालास्तम्भ-शब्दानाम् ७ ३५ ७. [स्वृ शब्दोपतापयो (भ्वा०) धातो 'शृस्वृस्निहि०' उ० १.१०. सूत्रेण उ । स्वरु—एतस्माद् (यूपात्) बाऽएषो (शकल) ऽपछिद्यते तस्मै तत्स्वमेवारुर्भवति तस्मात् स्वरुर्नाम श० ३.७ १ २४]

स्वरः स्वय राजमान स्वातन्त्र्यम् १८.१ **स्वरेण**=महाशब्देन १.६२ ४ **स्वरौ**=शब्दोपतापौ १ १६२ ६ [स्वोपपदे राजृ दीप्तौ (भ्वा०) धातोर्ड । अन्यत्र—स्वृ शब्दोपतापयो (भ्वा०) धातोरच् । स्वर वाङ्नाम । निघ० १.११. स्वर —स यदाह स्वरोऽसीति सोम वा एतदाहैष ह वै सूर्यो भूत्वाऽमुष्मिल्लोके स्वरति तद् यत् स्वरति तस्मात्स्वरस्तत् स्वरस्य स्वरत्वम् । गो० पू० ५ १४ य आदित्यस्स्वर एव स. जै० उ० ३ ३३ १ प्राण स्वर ता० ७ १ १०. पशव स्वर गो० उ० ३ २२. श्रीर्वै स्वर श० ११ ४ २ १० प्रजापति स्वर. । ष०३ ७ यथा स्वरेण सर्वाणि व्यञ्जनानि व्याप्तान्येव सर्वान् कामानाप्नोति यश्चैव वेद । सहितो० ख० २ तस्माद् यज्ञे स्वरवन्त दिदृक्षन्तऽएव । श० १४ ४ १ २७ अनन्तो वै स्वर । ता० १७ १२ ३]

स्वराजम् य स्वेन सूर्य इव राजते तम् (सर्वाधीश राजानम्) ३ ४६ २ स्वेषा राजा स्वराजस्तम् (अग्नि=सभाध्यक्षम्) १ ३६ ७ **स्वराजः**=य स्वेन राजते तस्य (राज्ञ) ३ ४६ १ स्व· राजत इति स्वराट्, तस्य (जगत) ५.५२.१. स्वय राजमाना. (विद्युदादयोऽग्वा) १ १८१.२. ये स्व राजन्ते ते, भा० स्वाधीना. (राजपुरुषा) १० ४ **स्वराजे**=य. स्वय राजते तस्मै सर्वाधिपतये परमेश्वराय १.५१ १५ **स्वराट्**=यः सर्वेषु धर्माचरणेषु स्वय राजते स (पति) १३.२४. य स्वेनैव राजते स (इन्द्र·=सम्राट्) ३ ४५ ५ य स्वय राजतेऽसौ परमात्मा १६ ६० बुद्धि. २० ६ य. सम्यग् राजते स (कृतविवाह पुरुष) १३.३५ या स्वय राजते सा (स्त्री) १४ १३. यः स्वयं राजते प्रकाशते स्वान् राजयति प्रकाशयति वा स स्वराट् परमेश्वर ऋ० भू० २६२, १६ ६० [स्वोपपदे राजृ दीप्तौ (भ्वा०) धातो 'सत्यूद्विषद्रुह०' अ० ३ २ ६१ सूत्रेण क्विप् । स्वराट्—(यजु० १३ २४) असौ वै (द्यु-) लोक स्वराट् । श० ७ ४.२ २२ स्वराट् वै नच्छन्दो यत् किञ्च चतुस्त्रिंशदक्षरम् । कौ० १७ १ सोऽग्वमेवेनेष्ट्वा स्वराडिति नामाधत्त गो० पू० ५ ८]

स्वराज्यम् स्वस्य राज्यम् १ ८०.४. स्वकीय राज्यम् १ ८० २ स्वप्रकाशवन्तम् (अग्नि=विद्युतम्) २ ८ ५ **स्वराज्ये**=स्वकीये राष्ट्रे ५ ६६ ६ [स्व-राज्यपदयो समास· । राज्यम्—राजन्प्राति० भावकर्मणोरर्थयो 'पत्यन्तपुराहितादिभ्यो यक्' इति यक्]

स्वरितारः अध्यापका उपदेष्टारो वा १.१६६.११ [स्वृ-शब्दोपतापयोः (भ्वा०) धातो कर्त्तरि तृच्]

स्वरित्राम् शोभनान्यरित्राणि यस्या ताम् (नावम्) २१ ६ [सु-अरित्रपदयो समासे स्त्रिया टाप् । अरित्रम्—ऋ गतौ (भ्वा०) धातो अर्त्तिलूधूसू०' अ० ३.२.१८४ सूत्रेण करण इत्र]

स्वरिः य शोभनश्चासावरिश्च (इन्द्र =सूर्य सभाध्यक्षो वा) १ ६१ ६ [सु-अरिपदयो समास]

स्वरोचिषः स्वय रोची रोचनमेषान्ते (विद्वासो राजजना.) ५.८७ ५ **स्वरोचिः**=स्वकीय रोचिर्दीपन यस्य स (सूर्य) ३ ३८ ४ स्वकीया रोचिर्दीप्तिर्यस्य स (विद्युदग्नि) ३३ २२ [स्व-रोचिष्पदयो. समास । रोचिष्=रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्बाहु० औणा० इसि]

स्वर्काः शोभना अर्का अन्नादय पदार्था येषान्ते (यजमाना) १६ ३२ शोभना अर्का मन्त्रा विचारा येषा ते (मरुत =मनुष्या) ७ ३५ ६ शोभनोऽर्कोऽन्नादिकमैश्वर्यं येषान्ते (अश्वा योद्धारो वा) ७ ३८.७ सुष्ठ्वर्का अन्नानि वज्रा वा येषान्ते (विद्वज्जना) २१.१०. शोभनोऽर्कोऽन्न

दीप्तयो येषान्ते (विद्वासो जना) १ ३७ २ **स्वभानवे**=स्वकीयप्रज्ञाप्रदीप्तये ६ ४८ १२ **स्वभानो**=स्वकीयदीप्ते (विवाहितजन) ६ ६४ ४ [स्व-भानुपदयो समास। भानु अहर्नाम निघ० १ ६ भा दीप्तौ (अदा०) धातो 'दाभाभ्या नु' रिति नु]

स्वभिष्टयः शोभना अभिष्टयोऽभिप्राया येषान्ते (नर=नायका जना) १ १७३ ६ **स्वभिष्टिम्**=शोभना अभिष्टय इष्टयो यस्मात्तम् (इन्द्र=सेनेशम्), प्र०—अत्र व्यत्ययेन ह्रस्व १ ५१ २ **स्वभिष्टिः**=सुष्ठ्वभिगता सङ्गतिर्यस्य स (इन्द्र=नृप) ६ ३३ १ [सु-अभीष्टि-पदयो समासे छान्दस ह्रस्वत्वम्। अभीष्टि=अभि+इषु इच्छायाम् (तुदा०)+क्तिन्]

स्वभिष्टिसुम्नः सुष्ठ्वभिष्टि सुम्न सुख यस्य यस्माद् वा (इन्द्र=परमैश्वर्यो राजा) ६ २० ८ [स्वभिष्टिरिति व्याख्यातम्। तस्य सुम्नपदेन सह समास। सुम्नम् सुखनाम निघ० ३ ६]

स्वभूतिः अपना ऐश्वर्य आर्याभि० १ १३, ऋ० १ ४ १४ २ **स्वभूते**=स्वकीयैश्वर्ये (वायुवद्विद्वज्जन) २७ ३३ [स्व-भूतिपदयो समास]

स्वभूत्योजाः स्वकीया भूतिरैश्वर्यमोज पराक्रमो वा यस्य स (परमेश्वर) १ ५२ १२ [स्व-भूति-ओजस् पदाना समास]

स्वम् स्वकीयम् १ ४६ ६ **स्वः**=स्वयम् (ऋत्विग्) २ ५ ७

स्वमहिम्ना स्वप्रभावेण १.५६ ७. [स्व-महिमन्-पदयो समास]

स्वमीढेषु स्व सुख मिह्यते सिच्यते येषु तेषु (सङ्ग्रामेषु) १ १३० ८ [स्वर्-मीढपदयो समासे पूर्वपदस्य रेफस्य लोपश्छान्दस। मीढ=मिह सेचने(भ्वा०)+क्त]

स्वयञ्जाः स्वय जाता (आप=जलानि) ७ ४६ २ [स्वयमुपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड। तत स्त्रिया टाप्]

स्वयतासः स्वेन बलेन नियम प्राप्ता नत्वन्येनाश्वादिनेति १ १६६ ४ [स्व-प्रतपदयो समासे जसोऽसुक्। यत=यमु उपरमे (भ्वा०)+क्त]

स्वयम्भू. य. स्वय भवति स, उत्पत्तिनाशरहित. (प्रथम=ईश्वर) २३ ६३ स्वयभवदनादिस्वरूप. (सूर्य=जगदीश्वरो विद्वान् जीवो वा) २२६ यो निमित्तोपादानसाधारणकारणरहित (परमात्मा) ऋ० भू० ३६, ४० ८ सदा स्वसामर्थ्ययोगैकरसत्वाभ्या वर्त्तमान (ईश्वर) प० वि०। सनातन स्वय सिद्ध परमेश्वर स० प्र० २४४, ४० ८ जिसका आदि-कारण माता, पिता, उत्पादक कोई नही, किन्तु सब का आदि कारण वह (ईश्वर) आर्याभि० २ २, ४० ८ अनादिस्वरूपो यस्य सयोगेनोत्पत्तिर्वियोगेन विनाशो, मातापितरौ, गर्भवासो, जन्म, वृद्धिक्षयौ च न विद्येते स (परमात्मा) ४० ८. [स्वयमुपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्। स्वयम्भू अन्तरिक्षनाम निघ० १ ३]

स्वयशसम् स्वकीयगुणकर्मस्वभावकीर्त्तियुक्तम् (सोम्=अहोरात्रव्यवहारम्) १ ६५ २ **स्वयशसः**=स्वकीय यशो येषान्ते (जना) १ १३६ ७ **स्वयशाः**=स्वकीय यश कीर्त्तिर्यस्य स (सत्पुरुष) ७ ३७ ४. स्वकीयकीर्त्ति (अग्नि=सूर्य) १ ६५ ५ [स्व-यशस्पदयो समास। स्वयशस्—आत्मयशा नि० ८ १५]

स्वयशस्तरम् स्वकीय यश कीर्त्तिर्यस्य तदतिशयितम् (स्वराज्यम्) ५.८२ २ [स्व-यशस्पदयो समासेऽतिशायने तरप्]

स्वयशस्तरः स्वकीय यशो धन प्रशसन वा यस्य सोऽतिशयित (इन्द्र=सम्राट्) ३ ४५ ५ अतिशयेन स्वकीय यशो यस्य स (धर्मात्मजन) ५ १७ २ [स्व-यशस्पदयो समासेऽतिशायने तरप्। यश अन्ननाम निघ० २ ७ धननाम निघ० २.१०]

स्वयशोभिः स्वकीयाभि प्रशसाभि १ १२६.८ स्वगुणस्वभावकीर्त्तिभि १ ६५ ६ [स्व-यशस्पदयो समास]

स्वयुक्ताः स्वेनैव गच्छन्त (मरुत=वायव) १ १६८ ४ [स्व-युक्तपदयो समास। युक्त=युजिर् योगे (रुधा०) धातो क्त]

स्वयुक्तिभिः स्वा युक्तयो योजनानि यासु ताभि (नीतिभि) १ ५० ६ आत्मीय-प्रकारै १.११६ ४. [स्व-युक्तिपदयो समास। युक्ति=युजिर् योगे (रुधा०) धातो स्त्रिया क्तिन्]

स्वयुः य स्वय याति स (अग्नि=वह्नि) २ ४ ७ य स्व धन याति स (इन्द्र=सम्राट्) ३ ४५ ५ [स्वोपपदे या प्रापणे (अदा०) धातो 'मृगय्वादयश्च' उ० १ ३७. इति कु]

स्वर जानीहि, प्राप्नुहि, प्र०—स्वरतीति गतिकर्मसु, निघ० २ १४, १ १० ४ **स्वरन्ति**=शब्दयन्ति ५ ५४ २ उच्चरन्ति ५ ५४ १२ [स्वरति गतिकर्मा निघ० २ १४

मोक्षसुखाय ऋ०भू० १५६, ११.३ [स्वर्ग-प्राति० भवार्थे यत्]

स्वर्चिः प्रशसितदीप्ति (अग्नि) २ ३ २ [सु-अर्चिप्-पदयो समास । अर्चि ज्वलतोनाम निघ० १ १७]

स्वर्जितम् स्व सुख जयत्युत्कर्षति येन तम् (यज्ञम्) ११ ८ **स्वर्जिते**=य सुखेन जयति तस्मै (इन्द्राय=सेनेशाय) २ २१ १ [स्वर् इत्युपपदे जि जये (भ्वा०) धातो क्विप्]

स्वर्जेषे सुखेन जयशीलाय (विदे=ज्ञानवते विदुषे) १ १३२ २. [स्वर् इत्युपपदे जि जये (भ्वा०) धातोस्तुमर्थे से-प्रत्यय]

स्वर्ज्योतिः यथा स्वरन्तरिक्षलोकसमूह द्योतते तथा (भगवान्) ५ ३२ [स्वर्-ज्योतिप्पदयो समास]

स्वर्णरम् य स्व सुख नयति तम् (अग्नि=पावकम्) ६.१५ ४ सुखस्य नेतारम् (अग्नि=विद्युदादिस्वरूपम्) २ २ १ स्वर्णर =ये स्व सुख नयन्ति ते (मरुत =मनुष्या) ५ ५४ १० **स्वर्णरात्**=स्वरादित्य इव नरान्नायकात् (राज्ञ) ४ २१ ३ **स्वर्णरे**=स्व सुखेन युक्ते नरे ५ १८ ४ [स्वर्-नरपदयो समास]

स्वर्थम् सुष्ठ्वर्थ प्रयोजन यस्माद्यद्वाऽनर्थसाधनरहितम् (रयि=धनम्) १ १४१ ११ **स्वर्थे**=शोभनाऽर्थे (रात्रिदिने) १.६५ १ सुष्ठ्वर्थ प्रयोजन ययोरस्ते (स्त्रियौ) ३३.५ [सु-अर्थपदयो समास]

स्वर्दृक् य स्व सुख पश्यति स (जन) ७ ५८ २ **स्वर्दृशम्**=स्व सुख दृश्यते यस्मात्तम् (अग्नि=वह्निम्) ३ २ १४ सुख द्रष्टुम् ७ ३२ २२ य स्वरादित्येन दृश्यते तम् (विद्वज्जनम्) ५ २६ २ सुखेन द्रष्टु योग्यम् (इन्द्र=सभेश राजानम्) २७ ३५. **स्वर्दृशः**=ये सुखेन विद्याऽऽनन्द पश्यन्ति तान् (देवान्=विद्वज्जनान्) १ ४४ ६ य सुख पश्यति तस्य (ब्रह्मचारिण) १ १५५ ५ स्व सुख पश्यन्ति येभ्यस्ते (सज्जना) २ २४ ४ ये स्व सुख यन्ति ते (ऋभुक्षण =मेधाविजना) ७ ३७ २ **स्वर्दृशौ**=यौ स्व सुख दर्शयतस्तौ (राजामात्यौ) ५ ६३ २ [स्वर् इत्युपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो क्विप् । स्वर्दृश —सूर्यदृश नि० १ २३ असौ (सूर्य) वाव स्वर्दृक् ऐ० ४ १०]

स्वर्देवाः सुखे प्रकाशिता (विद्वज्जना) ऋ० भू० १५४, १८ २१ [स्वर्-देवपदयो समास । स्वर् इति व्याख्यास्यते]

स्वर्भानुः य स्वरादित्य भाति स विद्युद्रूप (सूर्य्य) ५ ४० ५. आदित्येन प्रकाशित. (मेघ) ५.४० ६ **स्वर्भानोः**=आदित्यप्रकाशस्य ५ ४० ६. स्वरादित्यस्य भानुर्दीप्तिर्यस्य तस्य (मेघस्य) ५ ४० ८ [स्वर्-भानु-पदयो. समास]

स्वर्मीढस्य सुष्ठ. सेचकस्य (प्रवनस्य=प्रकृष्टस्य धनस्य) १.१६६ २ **स्वर्मीढे**=स्व सुखस्य मीढ सेचन यस्मिँस्तस्मिन् (आजौ) १ ६३ ६. स्व किरणान् जलानि वा मेहयति यस्मादन्तरिक्षात्तस्मिन् १ ५६ ५ स्व सुखेन युक्ते सङ्ग्रामे ४ १६ १५ [स्वर्-मीढपदयो समास । मीढ =मिह सेचने (भ्वा०)+क्त । मीढ सग्रामनाम निघ० २ १७]

स्वर्यतः युद्ध-भाव-गेष्णा ऋ० भू० १५६, ११ ४ [स्वर्यन्त स्वर्गच्छन्त नि० १३ ६]

स्वर्यम् स्वरेषु शब्देषु साधुम् (अश्मान=मेघम्) ५ ५६ ४ स्वरेषु विद्यासु सुशिक्षितासु वाक्षु साधु (अनीक=सैन्यम्) १ २१ ४ स्व सुखे साधुस्तम् (वृत्र=किरणसमूहम्) १ ६१ ६ स्वर्हितम् (पुरुषम्) ४ १७ ४ प्रकाशमयम् (वज्रम्) ऋ० भू० २८३, १ ३२ २ स्वरे गर्जने वाचि वा साधुस्तम् (अहि=मेघमिव शत्रुम्) प्र०—स्वरिति वाङ्नामसु पठितम् निघ० १ ११ समी०—इद पद सायणाचार्येण मिथ्यैव व्याख्यातम् १ ३२ २ **स्वर्यः**=स्वरेषु साधु (इन्द्र.=सभाद्यध्यक्ष) १.६२ ४ [स्वर वाङ्नाम निघ० १ ११. तत साध्वर्थे यत्। स्वर्प्राति० साध्वर्थे यत्]

स्वर्यवः य आत्मन स्व सुख कामयन्ते ते (विप्रा=मेधाविजना) ३ ३० २० ये सुख यावयन्ति मिश्रयन्ति ते (विप्रा) ३ ५० ४ [स्वर्प्राति० आत्मन इच्छायामर्थे क्यजन्ताद् उ । अथवा स्वर् इत्युपपदे यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्विप्]

स्वर्वत् वहुसुखयुक्तम् (ज्योति =ज्ञानप्रकाशम्) ६ ४७ ८ स्व सुख सम्बद्ध यस्मिन् तत् (साम), प्र०—अत्र सम्बन्धे मतुप् १ १७३ १ स्व वहुविध सुख विद्यते यस्मिँस्तत् (द्युम्न=यशो धन वा) ६ १६ ६ सुखवत् (दात्र=दानम्) १ १८५ ३ [स्वर्प्राति० सम्बन्धे मतुप् भूम्न्यर्थे वा]

स्वर्वती विद्यमानसुखा (त्वेषा=प्रदीप्ति) १.१६८ ७ सुखवती (स्त्री) ५ ३४ १ **स्वर्वतीम्**=वहुसुखकारिकाम् (अदिति=दिवम्) १ १३६ ३ **स्वर्वतीः**=स्व सुख विद्यते यासु ता (अप =कर्मणि)

सत्कारो वा येषान्ते (वीरराजजना) ६.१६ **स्वर्कै**= शोभना अर्का मन्त्रा विचारा वा देवा विद्वासो येषु तै (रथै) १.८८.१ [सु-अर्कपदयो समास । अर्क अन्ननाम । निघ० २.७ वज्रनाम निघं० २.२०. पदनाम निघ० ४.२ स्वर्कै स्वञ्चनैरिति वा स्वर्चनैरिति वा, स्वर्चिभिरिति वा । नि० ११.१४ स्वर्का—स्वञ्चना इति वा, स्वर्चना इति वा, स्वर्चिष इति वा नि० १२.४४ अर्क—अर्को देवो भवति यदेनमर्चति । अर्को मन्त्रो भवति यदनेनार्चन्ति । अर्कमन्न भवत्यर्चति भूतानि नि० ५.४]

स्वर्गम् अत्यन्त सुख को स० वि० २०६, अथर्व० ६.६.६ **स्वर्गान्**=स्व सुख गच्छन्ति प्राप्नुवन्ति येभ्य स्तान् (समुद्रान्=लोकान्) १३.३१ **स्वर्गाय**=विशेष-सुखभोगाय, भा०—मुक्तिसुखाय ३५.२२ सुखविशेषाय ३०.१३ सुखगमकाय पुरुषार्थाय, भा० आभ्युदय नैश्रेयसिकसुखप्राप्तये २२.३४ **स्वर्गे**=सुखकारके (लोके) १५.११ सुखमये (लोके) २३.२०. सुखप्रापके (लोके) १५.१० [स्वर् इत्युपपदे गम्लृ गतौ (भ्वा०) धातो 'डप्रकरणेऽन्येष्वपि दृश्यते' अ० ३.२.४८ वा०सूत्रेण ड । स्वर्गो लोक परो वा अस्माल्लोकात्स्वर्गो लोक ऐ० ६.३० प्रतिकूलमिव हीत स्वर्गो लोक ता० ६.७.१० एकविंशो वा इत स्वर्गो लोक तै० ३.१२.५.७ सहस्रसमितो वै स्वर्गो लोक श० १३.१.३.१ सहस्राश्वीने वा इत स्वर्गो लोक ऐ० २.१७ चतुश्चत्वारिंशदाश्वीनानि सरस्वत्या विनशनात् प्लक्ष प्रास्रवणस्तावदित स्वर्गो लोक सरस्वती सम्मितेनाध्वना स्वर्गं लोक यन्ति ता० २५.१०.१६ अपरिमितो वै स्वर्गो लोक ऐ० ६.२३ अनन्तोऽसौ (स्वर्ग) लोक ता० १७.१२.३ साम्राज्य वै स्वर्गो लोक ता० ४.६.२४ स्वर्गो लोक सरस्वान् ता० १६.५.१५ स्तोमा वै त्रय स्वर्गा लोका ऐ० ४.१८ स्वर्गो वै लोक सूर्यो ज्योतिरुत्तमम् (यजु० २०.२१) श० १२.६.२.८. अहर्वै स्वर्गो लोक । ऐ० ५.२४ स्वर्गो वै लोको ब्रघ्नस्य विष्टपम् ऐ० ४.४ स्वर्गो वै लोको नाक (यजु० १२.२) श० ६.३.३.१४ दिशो वै स नाक स्वर्गो लोक श० ८.६.१.४ स्वर्गो वै लोक सधस्थ (यजु० १८.५६) श० ६.५.१.४६ अथ यत्पर भा (सूर्यस्य) प्रजापतिर्वा स स्वर्गो लोक श० १.६.३.१० असौ वै (स्वर्गो) लोको महासि तस्यादित्या अधिपतय तै० ३.८.१८.२ अग्निर्वै स्वर्गस्य लोकस्याधिपति ऐ० ३.४२ एष वै स्वर्गो लोको यत्र पशु सज्ञपयन्ति श० १३.५.२.२ ओमिति वै स्वर्गो लोक ऐ० ५.३२ स्वरिति सामभ्योऽक्षरत् स्व स्वर्गलोको ऽभवत् प० १.५ इद वा वामदेव्य यजमानलोकोऽमृतलोक स्वर्गो लोक ऐ० ३.४६ स्वर्गो वै लोको यज्ञायज्ञिय (साम) श० ६.४.४.१०. वृहद् वै स्वर्गो लोक तै० १.२.२.४ वृहता (साम्ना) वै देवा स्वर्ग लोकमायन्। ता० १८.२.८. स्वर्गा वै लोका स्वरसाम् कौ० १२.५ स्वर्गा वै लोका षष्ठमह ऐ० ६.२६ स्वर्ग एव लोक पष्ठी चिति श० ८.७.४.१७ एकवृद् वै स्वर्गो लोक श० १३.२.१.५ वाजो वै स्वर्गो लोक ता० १८.७.१२ तस्मात् (भूर्लोकात्) असावेव (स्वर्गो) लोक श्रेयान् (अथर्व० ७.६.१) ऐ० १.१३ स्वर्गो वै लोकोऽभयम् श० १२.८.१.२२ स्वर्गो लोको देवो देवता भवति गो० पू० ४.८ स्वर्गो वै लोको दुरोहणम् ऐ० ४.२० स्वर्गस्य हैष लोकस्य रोहो यन्निविद् ऐ० ३.१.६ स्वर्गो वै लोको रोह (यजु०१३.५१) श० ७.५.२.३६ मध्ये ह सवत्सरस्य स्वर्गो लोक श० ६.७.४.११ तस्य (सवत्सरस्य) वसन्त एव द्वार हेमन्तो द्वार त वाऽएत सवत्सर स्वर्ग लोक प्रपद्यते श० १.६.१.६ ता वा एता पञ्च (इष्टय) स्वर्गस्य लोकस्य द्वार । अपाद्मा अनुवित्तयो नाम । तप प्रथमा रक्षति । श्रद्धा द्वितीयाम् । सत्य तृतीयाम् । मनश्चतुर्थीम् । चरण पञ्चमीम् तै० ३.१२.४.७ ता वा एता सप्त (इष्टय) स्वर्गस्य लोकस्य द्वार । दिव श्येनयोऽनुवित्तयो नाम । आशा प्रथमा रक्षति । कामो द्वितीयाम् । ब्रह्म तृतीयाम् । यज्ञश्चतुर्थीम् । आप पञ्चमीम् । अग्निर्वलिमान् षष्ठीम् । अनुवित्ति सप्तमीम् । तै० ३.१२.२.६ एतस्या ह (उदीच्या प्राच्या) दिशि स्वर्गस्य लोकस्य द्वारम् श० ६.६.२.४ स्वर्गो वै लोको यज्ञ कौ० १४.१ तया ह यजमान सर्वमायुरस्मिँल्लोके एत्याप्नोत्यमृतत्वमश्नुते स्वर्गे लोके । कौ० १३.५ ऋतेनैवैन स्वर्ग लोक गमयन्ति ता० १८.२.६ छन्दोभिर्हि स्वर्ग लोक गच्छन्ति श० ६.५.४.७ सर्वैर्वै छन्दोभिरिष्ट्वा देवा स्वर्ग लोकमजयन्। ऐ० १.६ छन्दोभिर्वै देवा आदित्य स्वर्गं लोकमहरन् ता० १२.१०.६ स्वर्गो वै लोको माध्यन्दिन सवनम्। गो० उ० ३.१७ अवस्तात्प्रपदनो ह स्वर्गो लोक श० ८.६.१.२३ नव स्वर्गा लोका ऐ० ४.१६ दश स्वर्गा लोका गो० उ० ६.२ दश पुरुषे स्वर्गनरकाणि तान्येन स्वर्ग गतानि स्वर्गं गमयन्ति नरक गतानि नरक गमयन्ति जै० उ० ४.२५.६ नवै मनुष्य स्वर्ग लोकमञ्चसा वेदाश्वो वै स्वर्गं लोकमञ्चसा वेद श० १३.२.३.१ असमायी वै स्वर्गो लोक कञ्चिद्वै स्वर्गे लोके समेतीति ऐ० ६.२६]

स्वर्ग्याय स्व सुख गच्छति येन तद्भावाय ११.२.

अ० ६ १ १५१. सूत्रेण सुडागम]

स्वश्नम् सुष्ठु मेघम् २ १४ ५. [सु-अश्नपदयो समास । अश्न मेघनाम निघ० १ १०]

स्वश्वः शोभना अश्वा वेगवन्तो विद्युदादयस्तुरङ्गा वा यस्मिन् स (रथ) १ ११७ २. शोभना अश्वा यस्य स (इन्द्र =नृप) ६ ३३ १. शोभनाऽश्व (मनुष्य.) ४ ४५ ७ सुष्ठ्वश्वा यस्य स. (अग्नि =विद्वज्जन) ४ २.४ **स्वश्वान्**=शोभनाश्च तेऽश्वाश्च तान् १० २२ **स्वश्वाः**= शोभना अश्वास्तुरङ्गा अग्न्यादय पदार्था वा येषान्ते (नर =नायका जना) ४ ४२ ५. शोभना अश्वास्तुरङ्गा महान्तो जना वा येषान्ते (नर =श्रेष्ठा मनुष्या.) ७ ५६ १ [सु-अश्वपदयो समास]

स्वश्वासः शोभना अश्वा येषा ते (मनुष्या) ५ ६५ ३ [सु-अश्वपदयो समासे जसोऽमुगागम]

स्वश्व्यम् शोभनेष्वश्वेषु साधुम् (रत्न=धनम्) ३ २६ ३. शोभनेष्वश्वेषु भवम् (कार्यम्) २५ ४५ शोभना अश्वा यस्मिँस्तम् (रथम्) १ १८० ६. शोभनेष्वश्वेषु विद्याव्याप्तिविषयेषु साधुम् (वीर्यम्) १ ४० २० शोभनेष्वश्वेषु अग्न्यादिषु भवम् (बलम्) २ १ ५ [सु-अश्वपदयो समासे भवार्थे साध्वर्थे वा यत्]

स्वसरम् दिनम् ६ ६८ १० **स्वसराणि**=अहानि, प्र०—स्वसराणीत्यहर्नामसु पठितम् निघ० १ ६, १ ३ ८ **स्वसरेषु**=गोष्ठेषु २ २ २ [स्वसराणि अहर्नाम निघ० १.६. गृहनाम निघ० ३ ४ पदनाम निघ० ४ २ स्वसराणि—स्वसराण्यहानि भवन्ति स्वय सारिण्यपि वा । स्वरादित्यो भवति स एनानि सारयति नि० ५ ४]

स्वसा भगिनी १ ८० २ वहिन स० वि० १४१, अथर्व० ३ ३० ३ **स्वसारम्**=भगिनीस्वरूपां रात्रिम् १ ६२ ११ **स्वसारः**=अङ्गुलय ४ ६ ८ भगिन्य कन्या २ ५ ५. भगिन्य इव सर्पादिनाशेन सुखप्रदा (मयूर्य) १ १६१ १४ भगिन्य इव वर्त्तमाना कला १ १६४ ३ अङ्गुल्य इव मैत्री भगिनित्वमाचरन्त्य (विदुष्य स्त्रिय) ४ २२.७ युवतयो भगिन्य १.७१ १ **स्वस्रा**=सुष्ठ्वस्यति प्रक्षिपति यया विद्यया क्रियया वा तया, भा०—वेदादिशब्दविद्यया, प्र०—'सावसेर्ऋन्' उ० २ ६६ अनेन स्वसृशब्द· सिध्यति ३ ५७ **स्वसुः**=भगिन्या इव वर्त्तमानाया उषस ६ ५५ ४ **स्वसृः**=स्वसेव वर्त्तमाना (सर्वमूर्त्तद्रव्या) ६ ६१ ६ **स्वसॄणाम्**=स्वसॄणा भगिनीनाम् १ ६५ ४ **स्वस्रोः**=भगिनीवद्वर्त्तमानयो (रात्र्युषसो) १ ११३ ३ [सु+असु क्षेपणे (दिवा०) धातो 'सावसेर्ऋन्' उ० २.६६. सूत्रेण ऋन् । स्वसार अगुलिनाम निघ० २ ५. स्वसा=सु असा स्वेषु सीदतीति वा नि० ११ ३२]

स्वसिचः या स्वैर्जलैर्जलेन सिच्यन्ते ता (नाव=विमानानि) १० १६. [स्वोपपदे षिच क्षरणे (तुदा०) धातो कर्मणि क्विप्]

स्वसृत् य स्वान् सरति प्राप्नोति स (सेनापति·) १ ८७ ४ **स्वसृतः**=ये स्वान् गुणान् सरन्ति प्राप्नुवन्ति ते (मरुत =मनुष्या.) १ ६४ ११ [स्वोपपदे सृ गतौ (भ्वा०) धातो कर्त्तरि क्विप् । 'ह्रस्वस्य पिति०' इति तुगागम·]

स्वस्तकौ उत्तम घर वाले (स्त्री पुरुषौ) सं० वि० १३७, अथर्व० १४.१.२२ सुखयुक्त (स्त्रीपुरुषौ) म० वि० १४०, अथर्व० १४ २.६४

स्वस्तये सुखाय कल्याणाय च १ १ ६ निरुपद्रवाय (सुखाय), परमसुखाय ५ ५१ १२ सुखलब्धये ६ १५ १८ आनन्दाय ५ ५१ १३ अविनष्टायाऽभिपूजिताय सुखाय १ २२ १२ सर्वसुखाय ऋ० भू० ८८, ऋ० १ ६ १५ ५ निरुपद्रवता के लिए आर्याभि० २.५०, २५ १८ सब दुःखों के नाश के लिए आर्याभि० २ १५, ३ २४ स्वस्थता के लिए आर्याभि० १ १०, ऋ० १ ६ १५ ५ ऐहिक-पारमार्थिक-सुखाय, वे० भा० न० । **स्वस्तिभिः**=कल्याणकरैः कर्म्मभि २० ५४ स्वास्थ्यकारिकाभि सुखैः कर्मभिर्वा ७ ३ १० स्वास्थ्यप्रदैः सुखैः, भा०—विद्याशिक्षासौभाग्यं ३४ ४०. विद्यादिदानैः ७ ३५ १५ सुखैः सह २७ २८ सब प्रकार के रक्षणों से आर्याभि० १ २७, ऋ० ५ ३ २७.२५ **स्वस्तिम्**=सुख शान्ति वा ६ २ ११ **स्वस्तिः**=स्वास्थ्यम् ३ ३८ ६ **स्वस्त्या**=प्रापकसुखक्रियया १३ १६ सत्क्रियया १५ ६४. [स्वस्तीत्यविनाशिनाम । अस्तिरभिपूजित सु-अस्तीति नि० ३ २२ स्वस्तये-स्वस्त्ययनाय नि० ५ २७]

स्वस्ति स्वास्थ्यम् ३ ३८ ६ शरीरसुख धातुसाम्यसुख, इन्द्रियशान्तिसुख, विद्ययाऽऽत्मसुख वा १ ८६ ६ प्राप्तव्य सुखम्, प्र०—स्वस्तीति पदनामसु पठितम् निघ० ५ ५ अनेन प्राप्तव्य सुख गृह्यते ३ १८ सुखमयम् (धनम्) ५ ४ ११ सुख सुखेन वा ४ ३३ कल्याणम् १७ ३६ शोभनमस्ति यस्मिन् प्राप्तव्ये तत्सुखम् ४ २० [सु-अस्ति-पदयो समास । स्वस्ति पदनाम निघ० ५ ५ स्वस्ति स्वपितिकर्मा निघ० ३ २२]

स्वस्तिगव्यूतिः स्वस्ति सुखेन सह गव्यूतिर्मार्गो

१.१०८ स्व प्रशस्तानि सुखानि विद्यन्ते यासु ता (ऊती =रक्षणाद्या) १११९८ प्रशस्तसुखयुक्ता (अप =प्राणान्) ५२११ [स्वर्प्राति० भूम्न्यर्थे मतुवन्तात् स्त्रिया डीप्]

स्ववन्तः वहुसुखयुक्ता (विद्वज्जना) ६५०२ **स्ववान्**=वहु सुख विद्यते यस्मिन्त्स (परमात्मा) ६२२३ स्ववंहुसुख विद्यते यस्य स (कीरि =स्तोता विद्वज्जन) ६३७१ [स्वर्प्राति० मतुप् भूम्न्यर्थे। स्वर् इति व्याख्यास्यते]

स्वावित् प्राप्तसुख (वैश्वानर =प्रधानपुरुष) ३३१० सुखप्रापक. (मातरिश्वा=वायु) १९६४ **स्वाविदम्**=स्व सुख वेदयति तम् (वृजन=योगवलम्) ७१२ स्व सुख विन्दन्ति येन तम् (राजानम्) ५४४१ स्वोऽन्तरिक्ष विन्दति येन तम् (रथम्) १५२१ स्व सुख विन्दति यस्मात्तम् (अग्निम्) ३३५ स्वरुदक विन्दन्ति येन तम् (विद्वज्जनम्) २२३३ **स्वाविदः**=सुख को प्राप्त होने वाले (विद्वान् लोग) स० वि० १८९, अथर्व० १९४१.१. **स्वाविदा**=स्व सुख विन्दति येन तेन (नाभिना=वन्धनेन) ६३९४ **स्वाविदे**=य सुख वेत्ति तस्मै, भा०—सुखप्रापकाय (विद्वज्जनाय) १७१२ [स्वर् इत्युपपदे विद्लृ लाभे (तुदा०) धातो क्विप्। स्वाविदि सूर्यविदि नि० ७२५]

स्वाविदा यौ सुख विन्दतस्तौ (स्त्रीपुरुषौ) ११३१ [स्वाविदिति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

स्वर्षाता सुखस्य दाता (राजा) ६३३४ सुखाना विभाजक (अविद्यो जन) ६.१७८ सुखस्याऽन्त प्राप्त (राजा) ४१६९. सुखाना विभागे, प्र०—अत्र 'सुपा सुलुक्०' इति डेर्डा ११३१६ [स्वर् इत्युपपदे पणु दाने (तना०) धातो क्त। पण सम्भक्तौ (भ्वा०) धातोर्वा क्त। स्वर्षातप्राति० सोर्विभक्तेर्डादेश। अथवा स्वर् इत्युपपदे षोऽन्त कर्मणि (दिवा०) धातो क्त। तत सोर्डादेश]

स्वर्षाम् य स्व सुख सनोति तम् (सेनाद्यध्यक्षम्), प्र०—अत्र 'सनोतेरन' अ० ८३१०८ अनेन पत्वम् १९१२१ स्व सुख सनति विभजति यया ताम् (धिय=प्रज्ञा कर्म वा) ५४५१० सुखप्रापकम् (सूरि=विद्वज्जनम्) १.६१.३. य स्व सुख सनति सम्भजति तम् (राजान सेनापतिं वा) ३४२० स्व सुखानि सनन्ति भजन्ति यया ताम् (जिह्वा=वाचम्) १३१५ स्व सुख सनोति ददाति यया ताम् (जिह्वाम्) १५२३ **स्वर्षाः**=स्व सुखेन सनोति स (वज्र =शस्त्रास्त्रसमूह), प्र०—अत्र स्वपूर्वात् सन-धातो 'कृतो वहुलम् वा' इति करणे विच् ११००१३. स्व सुख सनोति येन स (मनुष्य) २१८१ [स्वर् इत्युपपदे पण सम्भक्तौ (भ्वा०) पणु दाने (तना०) धातोर्वा 'जनसनखन०' इति विट्। 'विड्वनोरनुनासिकस्यात्' इत्याकारादेश। 'सनोतेरन' अ० ८३१०८ सूत्रेण पत्वम्]

स्ववर्त्तयः शोभन वर्त्तये ५३०७ [सु+वृत्तु वर्त्तने (भ्वा०) धातोर्णिजन्ताल्लङ्]

स्ववसम् शोभनमवो रक्षणादिक यस्य तम् (गृहपतिम्) ५.८२ सुष्ठ्ववो रक्षण यस्मात्तम् (अग्नि=विद्युतम्) ५६०१ **स्ववसः**=शोभनमवो रक्षणादिक कर्म येषा ते (ऋभव =मेधाविजना) ४.३३.८ [सु-अवस्पदयो समास। अवस्=अव रक्षणादिषु (भ्वा०) धातोरसुन्]

स्ववसा सुष्ठु रक्षकौ (वाय्वग्नी) १९३७ [सु-अवस्पदयो समासे द्विवचनस्याकारादेश। अवस्=अव रक्षणगत्यादिषु (भ्वा०) धातोरसुन्]

स्ववान् प्रशस्त स्व विद्यते यस्य स (इन्द्र =सभेश) २०५२ स्वे प्रशस्ता स्पर्शादयो गुणा विद्यन्ते यस्य स (वायु) प्र०—अत्र प्रशसार्थे मतुप् १३५१०. वहव स्वे स्वकीया उत्तमा जना विद्यन्ते यस्य स (इन्द्र =राजा) २०५१ स्वे आत्मीया वहवो विद्यन्ते यस्य स (सर्वोत्तमो राजा) ६६८५ प्रशस्ता स्वे भृत्या पदार्था वा विद्यन्ते यस्मिन् स (रथ) ११११८१ स्वकीयसामर्थ्ययुक्त इन्द्र =राजा) ६४७१८ स्वे स्वकीया प्रकाशादयो गुणा विद्यन्ते यस्मिन् स (देव =सूर्य) ३४२६ [स्वप्राति० प्रशसाया भूम्न्यर्थे वा मतुप्]

स्वविद्युतः स्वेन रूपेण व्याप्ता (अग्नय =पावका) ५८७३ [स्व-विद्युत्पदयो समास]

स्ववृष्टिम् स्वकीयाना घनानामिव प्रेरिताना पदार्थाना जलाना वा वर्षण प्रति १५२१४ स्वस्य शस्त्राणा वा वृष्टिर्यस्य तम् (सूर्य सभाद्यध्यक्ष वा) १५२५ [स्व-वृष्टिपदयो समास]

स्वशोचिः स्व शोचिस्तेजो यस्य स (तेजस्विजन) ६६६६ [स्व-शोचिष्पदयो समास। शोचि ज्वलनो नाम निघ० ११७]

स्वश्चन्द्रम् स्वेन प्रकाशेनाऽऽह्लादकारकेण युक्त सुवर्णम् १५२९ [स्व-चन्द्रपदयो समास। चन्द्रमिति हिरण्यनाम निघ० १२ 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे'

स्वादुषसदः ये स्वादून्यन्नानि भोक्तुं ससीदन्ति न्याय कर्त्तुं सभाया वा ते (राजपुरुषा) ६७५९ ये स्वादुषु भोज्याद्यन्नेषु सम्यक् सीदन्ति ते (पितर=पालनक्षमा राजपुरुषा) २९४६ [स्वादूपपदे सम्पूर्वकात् पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्। राम सस्य मूर्धन्यश्छान्दस]

स्वादुः सुस्वादयुक्त (ओषधिसार) ६४७१. [स्वादुरिति व्याख्यातम्। ततो मत्वर्थीयस्य लुक्]

स्वादो स्वादु (अन्नम्) ११८७२ [स्वादुरिति व्याख्यातम्। तत सम्बुद्धौ रूपम्]

स्वादोः स्वादयुक्तस्य (मध्व=मधुरादिगुणयुक्तस्य पदार्थस्य) १८४१० स्वादिष्ठान् (मर्त्तभोजनात्) ११११४६ [स्वादुरिति व्याख्यातम्]

स्वाद्म अतिस्वादुमत् (वस्तु) ३२०१४ स्वादिष्ठम् (मधु=रसम्) ३३१११ [स्वाद आस्वादने (भ्वा०) धातोर्वाहु० औणा० मनिन्]

स्वाद्म स्वादिष्ठानाम् (पितूनाम्=अन्नानाम्) १६९२ [स्वाद आस्वादने (भ्वा०) धातोरौणा० मनिन्]

स्वाद्मानम् स्वादिष्ठ भोगम् २२१६ **स्वाद्मानः**= स्वादिष्ठा पदार्था ११८७५ [स्वाद आस्वादने (भ्वा०) धातोर्वाहु० औणा० मनिन्]

स्वाद्वीम् सुस्वादुयुक्ताम् (ओषधीम्) १९१ [स्वादुरिति व्याख्यातम्। तत स्त्रिया ङीष् 'वोतो गुणवचनात्' सूत्रेण]

उदीरत् सन्नुदन् ४ २ ७ **उदीरताम्**=उत्कृष्टतया प्रेरताम् १९.४९ **उदीरते**=कम्पयन्ति गच्छन्ति वा ५.८३ ३ उत्कृष्टतया कम्पयन्ति २ १७ १ प्राप्नुवन्ति १२ ८२ उत्कृष्टा जायन्ते १ ८१ ३ उत्कृष्ट कम्पन्ते गच्छन्ति ४ ४५ २ [उत्+ईर गतौ कम्पने च (अदा०) धातो शतृ। व्यत्ययेन परस्मैपदम्। अन्यत्र लोट् लट् च। 'बहुल छन्दसी' ति शपो लुड् न भवति]

उदीरय उत्कृष्टतया गमय १ ४८ २ प्रेरयत ५ ४२ ३ **उदीरयताम्**=उत्कृष्टतया प्रेरयन्तु १ १२३ ६ **उदीरयन्ति**=उत्कृष्टतया प्रेरते १.१६८ ८ [उद्+ईर गतौ कम्पने च (अदा०) धातोर्णिचि लोट्, लटौ। ईर क्षेपे (चुरा०) धातोर्वा रूपाणि]

उदीरयन्ती कर्मसु प्रवर्त्तयन्ती (उषा) १ ११३ ८ [ईर क्षेपे प्रेरणे (चुरा०) धातो. शत्रन्तान् ङीप्]

उदीराणाः उत्कृष्टता प्राप्ता (राजप्रजाजना) ४.३९ ५. उत्कृष्ट ज्ञान प्राप्ता (मनुष्या) ७.४४ २ [उत्+ईर गतौ (अदा०) धातो शानच्। ताच्छील्ये चानश् वा]

उदीर्ध्वम् ऊर्ध्वं कम्पध्वम् १ ११३ १६ [ईर गतौ कम्पने च (अदा०) धातोर् उत्पूर्वाल् लोट्]

उदीर्ष्व उत्कृष्टमिच्छ ऋ० भू० २११ विचार और निश्चय रख स० प्र० १५२, १०.१८ ८ [ईर गतौ कम्पने च (अदा०) धातोर् उत्पूर्वाल्लोट्]

उदुद्धर्षसे उत्कृष्टतयाऽऽनन्दसि ४ २१ ९ [उत्+हृष तुष्टौ (दिवा०) धातोर्लट्। व्यत्ययेन शप् आत्मनेपद च]

उदूपथुः उत्कृष्टतया वपत १ ११७ १२ ऊर्ध्वं वपेथाम् १ ११६ ११ ऊर्ध्वं वपेतम् १ ११७ ५ [उत्+डुवप् बीजसन्ताने (भ्वा०) धातोर्लिटि मध्यमद्विवचनम्। 'अमयोगात्०' इति लिट कित्वे यजादित्वात् सम्प्रसारणम्]

उदूहथुः ऊर्ध्वं वहत १ १८२ ७ [उत्+वह प्रापणे (भ्वा०) धातोर् लिटि मध्यमद्विवचनम्। यजादित्वात् किति सम्प्रसारणम्]

उदृचः उत्कृष्टा अधीता प्रत्यक्षीकृता ऋचो यस्मिँस्तस्य (यज्ञस्य=शिल्पविद्यासिद्धस्य) ४.९ **उदृचि**=उत्कृष्टा ऋचो यस्मिन्नध्ययने तस्मिन् १ ५३ ११ [उत्-ऋच्+पदयोर्बहुव्रीहि। 'विभाषा समासान्तो भवति' इति परिभाषाश्रयेण 'ऋक्पूरब्धू पथाम्०' इति समासान्तो न भवति]

उदेति उदय प्राप्नोति। १ १५७ १ सब जगत् मे उदित प्रकाशमान हो रहे हो आर्याभि० १ ४७ **उदेषि**=उत्कृष्टतया प्राप्तोऽसि १ ५०.५ [उत्+इण् गतौ (अदा०) धातोर्लट्]

उदैत् उदेति ३१ ४ उदित प्रकाशितोऽस्ति ऋ० भू० १२१ **उदैति**=अधिष्ठातृत्वेन व्याप्नोति ऋ० भू० १५२ जाता है स० प्र० २४६, ३४१ जाता आता है आर्याभि० २.४३, ३४१ उद्गच्छति ३४१ [उत्+इण् गतौ (अदा०) धातोर्लङ्। 'आटश्चे' ति वृद्धि]

उदैरत् प्रेरयति ७ २३ १ **उदैरतम्**=उत्कृष्टतया गच्छतम् १.११८ ६. [उत्+ईर गतौ कम्पने च (अदा०) धातोर्लङ्। 'बहुल छन्दसी' ति शपो न लुक्। व्यत्ययेन परस्मैपदम्]

उदैरयतम् प्रेरयतम् १ ११७ २४ उत्कृष्टतया गमयतम् १ ११२ ५ [उत्+ईर क्षेपे=प्रेरणे (चुरा०) धातोर्लङ्]

उदोजसम् उत्कृष्ट पराक्रमम् १२ ८१ [उत्+ओजस्पदयो. समास। ओज=उर्ज आर्जवे (तुदा०) धातो 'उर्जेर्वले वलोपश्च' उ० ४ १९२ इति वलोपो गुणोऽसुन् च प्रत्यय]

न्भार्थे (सौत्रो धातु) धातोर्लुङ् । 'जृस्तम्भुम्रुचु०' अ० ३.१.५८ सूत्रेण च्लेर्वाऽङादेशे पक्षे सिच्]

उदस्थात् उत्तिष्ठते ७.१६.३ उत्तिष्ठति १.१६४.१७ उत्तिष्ठतु १७.४१ ऊर्ध्वमुदेति १.१२३.१ **उदस्थाम्**=उत्कृष्टतया तिष्ठेयम् ४.२८ उत्कृष्टतया प्राप्नुयाम् ४.२८ **उदस्थुः**=उत्तिष्ठन्तु ७.६०.४ [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ् । 'गातिस्थाघुपाभूभ्य.' इति सिचो लुक्]

उदहार्य्यः या उदक हरन्ति ता. (स्त्रिय) १.६७ [उदकोपपदे हृञ् हरणे (भ्वा०) धातोरण्प्रत्यये स्त्रिया ङीप् । उदकस्योदादेशश्छान्दस·]

उदा उदकेन ५.४१.१४ [उदकप्राप्ति० तृतीयैकवचनम् । 'पट्टन्नोमाम्' सूत्रेणोदन्नादेश । 'अयस्मयादीनि छन्दसि' इत्यजादावपि पदमञ्ज्ञाया नकारान्लोपो, न त्वरलोप. । इनादेशोऽपि न छान्दसत्वाद्]

उदाचरत् ऊर्ध्वं गच्छति ७.५५.७. [उत्+आङ्+चर गतौ (भ्वा०) धातोर्लङ्]

उदाजत् ऊर्ध्वं क्षिपति २.१२.३ ऊर्ध्वमधो गमयति २.२४.१४ विक्षिपेत् हन्यात् २.१४.३ प्रक्षिपति ३.४४.५ ऊर्ध्वं समन्तात् क्षिपतु, प्र०—अत्र लोडर्थे लङ् १.११२.१२. **उदाजन्**=प्राप्नुवन्ति ४.१.१३ [उत्+अज गतिक्षेपणयो (भ्वा०) धातोर्लङ्]

उदादाय ऊर्ध्वं समन्ताद् गृहीत्वा १.२८ [उत्+आङ्+डुदाञ् दाने (जु०) धातो क्त्वा । समासे क्त्वो ल्यप्]

उदानः य ऊर्ध्वमनिति (वायुविशेष) ६.२० उदानिति बलयति येन स (वायु.) २२.२३ **उदानाय**=उत्कृष्टाय बलाय १३.१६. उत्कृष्टाय जीवनबलसाधनाय (वायवे) ७.६ स्फूर्त्तिहेतव ऊर्ध्वमन्यते चेष्ट्यते येन तस्मै उत्क्रमणपराक्रमहेतवे (वायवे) १.२०. [उत्+अन प्राणने (अदा०) धातोर्घञ् प्रत्यय । तद् यदस्यैषो (उदान) ऽन्तरात्मन्यनो यद्वैनेनेमा. प्रजा यतास्तस्मादन्तर्यामो नाम श०४.१.२.२ उदान उदयनीय ऐ०१.७ उदन्त इव ह्ययमुदान प०२.२ चन्द्रमा उदान जै०३०४ २२६ उदानो वै त्रिककुप् छन्द श०८.५.२.४ उदानो वै नियुत श०६.२.२.६ एति ('आ' इति) उदान श०१.४.१.५ उदानो वै बृहच्छोचा श०१.४.३.३ उदाना मासा ता ५.१०.३]

उदारत् उदूर्ध्वं प्राप्नोति १७.८६ उत्कृष्टतया प्राप्नोति ४.५८.१ **उदारताम्**=प्राप्नुताम् ३.३३.१३. [उत्+ऋ गतौ (जु०) धातोर्लुङि 'सत्तिशास्त्यर्तिभ्यश्चे' त्यङ् । ऋदृशोऽङि' सूत्रेण गुण]

उदारिथ उत्कृष्टतया प्राप्नोपि २.६.३ उत्कृष्टं. सावनै. प्राप्नुहि १७.७५. [उत्+आङ्+ऋ गतौ (जु०) धातोर्लिटि मध्यमैकवचनम्]

उदारथिः उद्दीपक (ईश्वर) १.८७.१० [उत्+आङ्+ऋ गतौ (भ्वा०) धातो 'उद्यत्तेञ्चित्' उ० ४.८८. सूत्रेण घथिन् प्रत्यय]

उदारः य उत्कृष्ट परीक्ष्य ऋच्छति ददाति, भा०—सुपात्रेभ्यो दाता (राजा=प्रकाशमानो जन) १२.२२. [उत्+ऋ गतौ (भ्वा०) धातोरण् प्रत्यय]

उदारुहम् उत्कृष्टतया रोहेयम् १७.६७ [उत्+आङ्+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लङ् । विकरणव्यत्ययेन श]

उदाहसत् उत्कृष्टतया ज्ञापयन्ति, प्र०—अत्र 'ओहाङ् गतौ' इत्यस्माल्लङर्थे लुङ् १.६.४ [उत्+आङ्+ओहाङ् गतौ (जु०) धातोर्लुङ् । छान्दस रूपम्]

उदिङ्गय उत्कृष्टतया गमय ४.५७.४ [उत्+इङ् गतौ (भ्वा०) धातोर्णिचि लोट्]

उदितः उदय प्राप्त (सूर=सूर्य) ३.२७ [उत्+इण् गतौ (अदा०) धातो क्त]

उदिता उदिते (काले), प्र०—अत्राऽऽकारादेश ३.३४.२. उदये ७.४१.४ उत्कृष्टप्राप्तौ १.११५.६ उदितावुदये ७.६७ सूर्योदये ६.५१.१ उदितौ प्राप्तोदयौ (इन्द्राग्नी=पवनविद्युतौ) १.१०८.१२. उदयसमये ३४.३७ [उत्+इण् गतौ (अदा०) धातो क्त. । उदितस्य रूपाणि]

उदितिम् उदयम् ६.१५.११. [उत्+इण् गतौ (अदा०) धातो क्तिन् स्त्रियाम्]

उदिते उदय प्राप्ते (सूर्ये) ५.५४.१०. ['उदित' इति व्याख्यातम्]

उदिथः प्राप्नुय १०.१६ [उत्+इण् गतौ (अदा०) धातोर्लेटि मध्यमद्विवचने रूपम्]

उदियर्त्ति ऊर्ध्वं प्राप्नोति ४.४५.१. उत्कृष्टतया जानाति १.११३.१७ उन्नयति ६.४७.३ **उदियर्षि**=उत्कृष्टतया प्राप्नोपि १२.१०७ [उत्+ऋ गतौ (जु०) धातोर्लट् । 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्येत्त्वम् । 'अभ्यासस्यासवर्णे' इत्यभ्यासस्येयङ्]

उदियाय उदेति ७.३३.१३ [उत्+इण् गतौ

उद्यतम् उद्वृतम् (ब्रह्म) १ ८०.६. **उद्यतः**= प्रयत्नेन प्रेरित (असु =प्राण) ८ ५८ उत्कृष्टतया यत (सिन्धु =नदी) ८ ५६ ऊर्ध्व गच्छन् (प्रजापति =जीव) ३६ ५ उद्योगी (यज्ञ =शिष्य) ६ ६८ १ [उत्+यमु उपरमे (भ्वा०) धातो क्त]

उद्यतस्रुचे उद्यता उत्कृष्टतया गृहीता स्रुग् येन तस्मै यज्ञानुष्ठात्रे १ ३१ ५ [उद्यत-स्रुच्पदयो समास। यत-स्रुच =ऋत्विङ्नाम। निघ० ३ १८]

उद्यता उत्कृष्टतया यतानि गृहीतानि (वस्तूनि) २ ३१ ७ [यमु उपरमे (भ्वा०) धातो क्तप्रत्यये=यत इति रूपम्। उत्-यतपदयो समास]

उद्यतिम् उद्यमम् १ १६० ३ [उत्+यमु उपरमे (भ्वा०) धातो क्तिन्]

उद्यते कथ्यते ५ ५५ ८ विलद्यते १ १६४ ४७ [वद व्यक्तायां वाचि (भ्वा०) धातो कर्मणि लट्। यजादित्वात् किति सम्प्रसारणम्। अन्यत्र उन्दी क्लेदने (रुधा०) धातो कर्मणि लट्]

उद्यन् उदयन् (सूर्य) ७ ६० १ उदय प्राप्नुवन् (सूर्य) १ १२४ १ [उत्+इण् गतौ (अदा०) धातो शतृ। 'इणो यण्' अ० ६ ४ ८१ सूत्रेण यणादेश.]

उद्यन्ता उत्कृष्टतया नियन्ता (इन्द्र =सेनेश) १ १७८ ३ [उत्+यमु उपरमे (भ्वा०) धातो कर्त्तरि तृच्]

उद्यन्तु उद्गच्छन्तु १७ ४२ [उत्+इण् गतौ (अदा०) धातोर्लोट्। 'इणो यण्' सूत्रेण यणादेश]

उद्यमिष्ट उत्कृष्टतया नियच्छेत् ५ ३२ ७ [उत्+यमु उपरमे धातोर्लुङ्। 'समुदाङ्भ्यो यमोऽग्रन्थे' अ० १ ३ ७५ सूत्रेणात्मनेपदम्। इडागमश्छान्दस]

उद्ययमीति उत्कृष्टतया पुन पुनरतिशयेन नियम करोति १ ६५.७ [उत्+यमु उपरमे (भ्वा०) धातोर्यङ्लुकि रूपम्]

उद्यंसते उत्कृष्टतया रक्षति १ १४३ ७

उद्यासाय ऊर्ध्व गमनाय ३६ ११ [उत्+यसु प्रयत्ने (दिवा०) धातोर्भावे घञ्]

उद्युवामहे उत्कृष्टतया विभजामहे ६ ५७ ६ [उत्+यु मिश्रणे अमिश्रणे च (अदा०) धातोर्लट्। व्यत्ययेनात्मनेपद शप्रत्ययश्च]

उद्येमिरे उत्कृष्टतया युञ्जन्ति १ १०.१. [उत्+यमु उपरमे (भ्वा०) धातोर्लिट्। 'समुदाङ्भ्यो यमोऽग्रन्थे' इत्यात्मनेपदम्]

उद्रः जलचर कर्कटाऽऽख्य २४ ३७. [उनत्ति विलद्यतीति विग्रहे उन्दी क्लेदने (रुधा०) धातो 'रुफावितञि०' उ० २ १३ सूत्रेण रक् प्रत्यय]

उद्रिच्यते अधिको भवति ७ ३२ १२ [उत्+रिचिर् विरेचने (रुधा०) धातो कर्मणि लट्]

उद्रिणम् उदकवन्तम् (उत्स=कूपम्) २ २४ ४ [उद्र इति व्याख्यानम्। ततो मत्वर्थ इनि.]

उद्रिरिचे उत्कृष्टतयाऽतिरिच्यते १.१०२ ७ [उत्+रिचिर् विरेचने (रुधा०) धातोर्लिट्]

उद्वत्सु ऊर्ध्वेषूत्कृष्टेषु प्रदेशेषु १ १६१ ११ [उत्-शब्दाद् मतुप्। 'भय' अ० ७ २ १० सूत्रेण मतुपो भय वादेश]

उद्वतः उपरिस्थितान मार्गान् ३ २ १० ऊर्ध्वान् प्रदेशान ७ ५० ४ ऊर्ध्वदेशस्था (समा =वृष्टिजलानि) ५ ८३ ७

उद्वधीत् उत्कृष्टतया हन्यात् १३ १६ [उत्+हन हिंसागत्यो. (अदा०) धातोर्लुङ्। 'लुङि चे' ति हनो वधादेश। अडभावश्छान्दस]

उद्वपतु उत्कृष्टतया बीजवत् सन्ततोतु ११ ६३ [उत्+डुवप् बीजसन्ताने (भ्वा०) धातोर्लोट्]

उद्वयसम् उत्कृष्ट वयो जीवन यन्मात्तम् (रस=सारम्) ६ ३. [उत्+वयस् पदयोर्बहुव्रीहि। वय =अन्ननाम निघ० २.७ वेति गच्छतीति विग्रहे वी गत्यादिषु (अदा०) धातोरसुन् प्रत्यय]

उद्वरीवृजत् उत्कृष्टतया भृश वर्जयति ६ ५८ २ [उत्+वृजी वर्जने (अदा०) धातोर्णिजन्ताल्लुङ]

उद्वहन्ति उत्कृष्टतया प्रापयन्ति ज्ञापयन्ति प्रकाशयन्ति प० वि०। ऊर्ध्व प्राप्नुवन्ति १ ५० १ [उत्+वह प्रापणे (भ्वा०) धातोर्लट्]

उद्वावृषाणः उत्कृष्टतया वलिष्ठ सन् (राजा) ४ २६ ३ उत्कृष्टतया भृश वलकरस्य (मघस्य=धनस्य) ४ २० ७ [उत्+वृष शक्तिवन्धने (चुरा०) धातोर्यङन्ताच्छानच्]

उद्वृह उत्कृष्टतया वर्धस्व ३ ३० १७. **उद्वृहः**= उच्छेदये ६ ४८ १७ [उत्=वृह वृद्धौ (भ्वा०) धातोर्लोट्। व्यत्ययेन श प्रत्यय। वृहू उद्यमने (तुदा०) धातोर्वा लोट्]

उनत्त विद्यासुशिक्षाभ्या सिञ्चत ५.४२ ३ [उन्दी क्लेदने (रुधा०)। धातोर्लोट् 'श्नसोरल्लोपो' ऽपि न, छान्दसत्वात्]

उदोजसः उत्कृष्टमोजो पराक्रमो येषान्ते (मरुत = मानवा) ५ ५४ ३ [उत्+ओजस्-पदयोर्बहुव्रीहि]

उद्गः जलस्य १ ११२.१२.

उदगात् ऊर्ध्वं व्याप्नोति १ ५० १३

उद्गाता यज्ञ मे सामगान करने वाला महापण्डित आर्याभि० १ ५२ [उत्+गा स्तुतौ (जु०) धातो कर्त्तरि तृच्। सूर्य उद्गाता गो० पू० १ १३ आदित्यो वा उद्गाताऽधिदैव चक्षुरध्यात्मम् गो० पू० ४ ३ पर्जन्यो वा ऽउद्गाता श० १२ १.१ ३ वर्षा उद्गाता तस्माद्यदा बलवद्वर्षति साम्न इवोपब्दि क्रियते श० १२ २ ७ ३२ प्रजापतिर्वा ऽउद्गाता श० ४.३ २ ३ उद्गातैव यश गो० पू० ५ १५ प्राण उद्गाता कौ० १७ ७ गो० उ० ५ ४ ते य एवेमे मुख्या प्राणा एत एवोद्गातारश्चोपगातारश्च जै० उ० १ २२ ५ देवाना वै षड् उद्गातार आसन् वाक् च मनश्च चक्षुश्च श्रोत्र चाऽपानश्च प्राणश्च जै० उ० २ १ १]

उद्गातेव यथोद्गाता तथा (वेदविज्जन) २ ४३ २ [उद्गातेति व्याख्यातम्]

उद्गुरमाणाय य उत्कृष्टतया गुरत उद्यच्छत्युद्यम करोति तस्मै (पुरुषाय) १६ ४६ [उत्+गुरी उद्यमने (तुदा०) धातो शानच्]

उद्गृहीताय ऊर्ध्वं गृहीत जल येन तस्मै (मेघाय) २२ २६ [उत्+ग्रह उपादाने (क्रया०) धातो क्त। 'ग्रहोऽलिटि दीर्घ' इतीटो दीर्घ]

उद्गृह्णते य ऊर्ध्वं गृह्णाति तस्मै (मेघाय) २२.२६ [उत्+ग्रह उपादाने (क्रया०) धातो शतृ। धातो सम्प्रसारण किति]

उद्ग्राभम् उत्कृष्टतया ग्रहणम् १७ ६४ **उद्ग्राभेण** = उत्कृष्टतया गृह्णाति येन तेन (साधनेन) १७ ६३ [उत्+ग्रह उपादाने (क्रया०) धातोर्घञ्। 'हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यम्' अ० ८ २ ३५ वा० सूत्रेण हकारस्य भकार]

उद्दिशः या उद्दिश्यन्ते ता (शत्रुलक्षिता दिश) ६ १६ [उत्+दिश अतिसर्जने (तुदा०) धातो 'ऋत्विक्०' इति सूत्रेण क्विन्। 'कृतो बहुलम्' अ० ३ ३ ११३ वा० सूत्रेण कर्मणि क्विन्]

उद्दृंह उद्बर्धय १७ ७२ [उत्+दृहि वृद्धौ (भ्वा०) धातोर्लोट्]

उद्द्रावाय ऊर्ध्वं गताय द्रवीभूताय (वाष्पाय) २२ ८ [उत्+द्रु गतौ (भ्वा०) धातोर्घञ् 'उदि श्रयतियौतिपूद्रुव' अ० ३ ३ ४६ सूत्रेण]

उद्द्रुताय उत्कर्षं गताय (घृम्राय) २२ ८ [उत्+द्रु गतौ (भ्वा०) धातो क्त]

उद्धर्षय उत्कर्षय, भा०—नित्य हर्षय, उन्नय १७ ४२ **उद्धर्षयन्ति** = उत्साहयन्ति ५ २७ ५ [उत्+हृष तुष्टौ (दिवा०) धातोर्णिजन्ताल्लोट्]

उद्ना उदकेन ५ ८५ ६ [उदक+टा। 'पद्दन्नोमास्०' इति उदन्नादेशे 'अल्लोपोऽन' इत्यल्लोप]

उद्वाधस्व पृथक् कुरु ४ २८ [उत्+वाधृ विलोडने (भ्वा०) धातोर्लोट्]

उद्बुध्यस्व प्रकाशितो भव ऋ० भू० ३०५ ऊर्ध्वत्वेन जानीहि १८ ६१ उत्कृष्टरीत्या जानीहि १५ ५४ [उत्+बुध अवगमने (दिवा०) धातोर्लोट्]

उद्बोधत् उद्बोधय ४ १५ ७ [उत्+बुध अवगमने (भ्वा०) धातोर्लेट्]

उद्भरन्तु उत्कृष्टतया धरन्तु १७ ५३ [उत्+भृञ् भरणे (भ्वा०) धातोर्लोट्]

उद्भिदम् पृथिवी भित्त्वा जातेन काष्ठेन निर्मितम् (रथम्) १ १०२ ६ उद्भिद्य जायते तम् (भा०—जात बलम्) २८ २५ **उद्भिदः** = ये पृथिवी भित्त्वा प्ररोहन्ति (वृक्षादिवत् परोपकारिणो जना) ५ ५६ ६ य उद्भिन्दन्ति (क्रतव = यज्ञा प्रज्ञा वा) २५ १४ उत्कृष्टतया दुःखविदारका (देवा) १ ८६ १. उद्भेद विदारण प्राप्ता (ओषधिरसा) १ १३६ ६ ये पृथिवीमुद्भिद्य जायन्ते (ओषध्यादय) १ १३६ ६ [उत्+भिदिर् विदारणे (रुधा०) धातो क्विप्]

उद्भिनदत् उद्भिन्द्यात् १२ २७ [उत्+भिदिर् विदारणे (रुधा०) धातोर्लेट्]

उद्भिः उदकै १ ८५ ५

उद्भृतम् उत्कृष्टरीत्या धृतम् (ओज = बलम्) ६ ४७ २७ उद्धृतम् (मेद = स्निग्ध वस्तु) २१ ४४ उत्कृष्टतया पोषितम् (मेद = स्निग्ध वस्तु) २१.४५ [उत्+भृञ् भरणे (भ्वा०) धातो क्त]

उद्भौ उदुत्कृष्टानि वस्तूनि भवन्ति यस्मिँस्तस्मिन् (शर्मन् = गृहे) १५ १ [उत्+भू सत्तायाम् भ्वा०) धातो 'डुप्रकरणे मितद्रवादिभ्य उपसख्यानम्' अ० ३ २ १८० वा० सूत्रेण डु]

उद्मेघे समुद्रे ऋ० भू० १८६

प्रयोग' १ २८ ३. [उप+च्युङ् गतौ (भ्वा०) धातो 'ऋदोरप्' इत्यप् । च्यवते गतिकर्मा निघ० २ १४]

उपजग्मुषः य उप=सामीप्य गतवन्तस्तान् (मनुष्यादीन्) १ ५३ ६ [उप+गम्लृ (भ्वा०) धातोर्लिट क्वसु.]

उपजायते यत्किञ्चिदुत्पद्यते तत्सर्वं त्रयोदशो मासो वा १ २५ ८ [उप+जनी प्रादुर्भावे (दिवा०) धातोर्लट्]

उपजिह्विका उपगताऽनुकूला जिह्वा यस्या पत्न्या मा ११ ७४ [उप+जिह्विकापदयो समास । जिह्वा=वाङ्नाम निघ० १ ११ उपजिह्विका वन्नीभिरुपजिह्विका इति सीमिकानाम् । उपजिह्विका उपजिघ्रेय नि० ३ २]

उपतस्थुः समीप तिष्ठन्ते १ ६५ ६ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लिट्]

उपतिष्ठथः समीपस्थौ भवत ५ ६३ ३ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लट्]

उपतिष्ठन्त उपतिष्ठन्तु १ १३५ ८ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लङ् । अडभाव । व्यत्ययेनात्मनेपदम्]

उपतिष्ठाते समीप तिष्ठेत १ १२४ ११ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लट्]

उपदद्यमाने उपादीयमाने (शर्मन्=गृहे) ६ ४६ १३. [उप+दद दाने (भ्वा०) धातो कर्मणि शानच्]

उपदधामि समीप धरामि ५ २५ समीप धारयामि, तेन पुष्णामि उपदधाति वा १ १८ सामीप्येन धारयामि १ १८ [उप+डुधाञ् धारणपोषणयो (जु०) धातोर्लट्]

उपदसत् समीप नश्येत् १ १३६ ५ **उपदस्यन्ति**=समीपतया क्षयन्ति ५ ५५ ५ समीप नश्यन्ति १ ६२ १२ [उप+दसु उपक्षये (दिवा०) धातोर्लेट् लट् च]

उपदाम् उप समीपे दीयते ताम् (उत्कोचम्) ३० ६ [उप+डुदाञ् दाने (जु०) धातो 'आतश्चोपसर्गे' अ० ३ ३ १०६ सूत्रेणाङ् स्त्रियाम्]

उपद्यवि समीपस्थे प्रकाशितेऽप्रकाशिते वा (धार्मिकेऽधार्मिके जने) ७ ३१ ६ [उप+द्युपदयो समास]

उपद्रव समीपमागच्छ ६ ४८ १६ [उप+द्रु गतौ (भ्वा०) धातोर्लोट्]

उपधापयेते सामीप्येन पाययत, भा०—समीप पालयेताम् ३३ ५ समीप पाययेते १ ६५ १ [उप+धेट् पाने (भ्वा०) धातोर्णिजन्ताल्लट् । आत्वे पुगागम । 'धेट उपसन्यानम्' अ० १.३ ८६ वा० सूत्रेण परस्मैपदप्रतिषेधादात्मनेपदम्]

उपधीव यथोपधिर्मध्यस्थस्य रथाऽवयवस्य धारिका २ ३६ ४. [उपधि-इवपदयो समास । उपधि=उप+डुधाञ् धारणपोषणयो (जु०) धातो कि प्रत्यय]

उपध्वस्ताः उपाऽध पतिता (पशव) २४ १४ [उप+ध्वसु अवस्रंसने (भ्वा०) धातो क्त]

उपनतिः उपनमन्ति यया सा (अस्थि) २० १३ [उप+णम प्रह्वत्वे शब्दे (भ्वा०) धातो स्त्रिया क्तिन्]

उपनयमानः विद्यापठनार्थमुपवीतं दृढव्रतमुपदिशन् (आचार्य्य) ऋ० भू० २३५, अथर्व० ११ ५ ३ प्रतिज्ञापूर्वक समीप रख के (आचार्य) स० वि० ८०, अथर्व० ११ ५ ३ [उप+णीञ् प्रापणे (भ्वा०) धातो शानच् । 'सम्माननोत्सञ्जनाचार्यकरण०' अ० १ ३ ३६ सूत्रेणात्मनेपदमाचार्यकरणे]

उपनिपद्यते समीपतया प्राप्नोति ऋ० भू० २२१ अथर्व० १८ ३ ११ [उप+नि+पद गतौ (दिवा०) धातोर्लट्]

उपनिपद्यमानम् समीपे प्राप्नुवन्तम् (सूर्यम्) १.१५२ ४ [उप+नि+पद गतौ (दिवा०) धातो शानच्]

उपनिषेदुः ब्रह्मचर्य ही से समीप प्राप्त होवे स० वि० १६८, १६ ४१ १ समीपता से प्राप्त होकर अनुष्ठान करते हैं स० वि० १८६, अथर्व० १६ ४१ १ [उप+नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिट्]

उपनीतम् प्राप्तसमीपम् (अश्मान=मेघम्) १ १२१ ६ [उप+णीञ् प्रापणे (भ्वा०) धातो क्त.]

उपन्यसादि अ०—समीप निषाद्येत ४ ६ २ [उप+नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो. कर्मणि लुङ्]

उपपतिम् य पत्यु समीपे वर्त्तते तम् (अन्यपतिम्) ३० ६ [उप-पतिपदयो समास]

उपपर्चनम् उपसम्बन्ध ६ २८ ८. [उप+पृची सम्पर्के (रुधा०) धातोर्भावे ल्युट्]

उपपृक् उप सामीप्य पृङ्क्ते स्पृशति य स (अहि=मेघ) १.३२ ५ [उप+पृची सम्पर्के (रुधा०) धातो क्विप् । उपपृक् उपपर्चन नि० ६ १८]

उपपृङ्धि सम्बधान २ २४ १५ [उप+पृची सम्पर्के (रुधा०) धातोर्लोट्]

उपपृच्यताम् उपसम्बध्यताम् ६ २८.८ [उप+पृची सम्पर्के (रुधा०) धातो कर्मणि लोट्]

उनत्त उच्छिन्न (पशु) २४.७ [उन्दी क्लेदने (रुधा०) धातो क्त]

उनत्ति आर्द्रीकरोति ५ ८५ ४ [उन्दी क्लेदने (रुधा०) धातोर्लट्]

उनप् उम्भति पूरयति २ १३ ६ [उभ पूरणे (तुदा०) धातोर्लट्। विकरणव्यत्ययेन श्नम्। आडभावश्छान्दस]

उनोति प्रेरयति ५ ३१ १

उन्दन् आर्द्रीकुर्वन् (अग्नि=विद्युत्) २ ३ २ [उन्दी क्लेदने (रुधा०) धातो शतृ]

उन्दन्ति क्लेदन्ति १ ८५ ५ [उन्दी क्लेदने (रुधा०) धातोर्लट्]

उन्धि उन्दयति क्लेदयति ५ ८३ ८ [उन्दी क्लेदने (रुधा०) धातोर्लोट्]

उन्नयध्वम् उत्कर्षत २ १४ ६. **उन्नयन्ति**=उन्नतिशील करके प्रतिष्ठित करते हैं म० प्र० १०६, ३ ८ ४ ऊर्ध्वत्वेनोत्तम सम्पादयन्ति ३ ८ ४ **उन्नयामि**=ऊर्ध्वं वध्नामि भा०—प्रापयामि ११ ८२ [उत्+णीञ् प्रापणे (भ्वा०) धातोर्लोट्। अन्यत्र लट्]

उन्नशत् उत्कर्षेण नश्यति १ १६४ २२ **उन्नशन्**=नाशयेयु २ २३ ८ [उत्+णश अदर्शने (दिवा०) धातोर्लुङ्। पुषादित्वाद्ङ्। अटभावश्छान्दस]

उन्निनीथः उत्कर्षं प्राप्नुथ १ १८१ १ **उन्निनेथ**=उन्नय ६ १८ १३ **उन्निन्ययुः**=ऊर्ध्वं नयतम् १ ११६ ८ [उत्+णीञ् प्रापणे (भ्वा०) धातोर्लिट्]

उन्नीतः ऊर्ध्वं नीत सुगन्धादिपदार्थं ८ ५८ [उत्+णीञ् प्रापणे (भ्वा०) धातो क्त]

उन्नीयमानाः उत्कृष्टान् गुणान् प्रापयन्त (देवा=विपश्चित) ३ ८ ६ [उत्+णीञ् प्रापणे (भ्वा०) धातो कर्मणि शानच्]

उन्नेतॄणाम् उत्कर्षं प्रापयितॄणाम् (पुरुषाणाम्) ६ २ [उत्+णीञ् प्रापणे (भ्वा०) धातो कर्त्तरि तृच्]

उन्मत्तम् उन्मादरोगिणम् (जनम्) ३० ८ [उत्+मदी हर्षे (दिवा०) धातो क्त। ईदित्त्वादनिट्त्वम्]

उन्ममन्द उन्मन्दते कामयते २ ३३ ६ [उत्+मदि स्तुतिमोदमस्वप्नकान्तिगतिषु (भ्वा०) धातोर्लिट्। व्यत्ययेन परस्मैपदम्]

उन्मा ऊर्ध्वं मिनोति यया तुलया तद्वत्, भा०—तुलादिकम् १५ ६५ [उत्+मा माने (अदा०) धातोर्घञ्]

उप सामीप्ये १ ८२ १ सामीप्ये क्रियायोगे, प्र०—उपेत्युपजन प्राह नि० १ ३, २ १६ उपगमार्थे १ २१ ४ क्रियार्थे १ ५ गतार्थे २ १० उपयोगार्थे १ २२ १६ [उप इत्युपजनम् नि० १ ३ इय (पृथिवी) वा ऽउप श० २ ३ ४ ६ उप वै रथन्तरम् ता० १६ ५ १४]

उप समीपस्थ सन् (पुत्र) १२ ७८

उपकृणवन्त उपकुर्वन्ति ७ ३७ ७ [उप+डुकृञ् करणे (तना०) धातोश्छान्दस रूपम्]

उपक्षरन्ति समीपतया वर्षन्ति १ १२५ ४ उपवर्षन्ति ५ ६२ ४ [उप+क्षर सचलने (भ्वा०) धातोर्लट्]

उपक्षियन्तः उपनिवसन्त (सज्जनाः) ३ ५६ ३ [उप+क्षि निवासगत्यो (तुदा०) धातो शतृप्रत्यय]

उपक्षेतारः उपगतान् द्वैधीकुर्वाणा (मनुष्या) ३ १ १६ [उप+क्षि निवासगत्यो (तुदा०) धातो कर्त्तरि तृच्]

उपक्षेति उपनिवसति २ २७ १३ विजानाति निवासयति वा १ ७३ ३ निवासित और धारण करता है आर्याभि० १ ४६ [उप+क्षि निवासगत्यो (तुदा०) धातोर्लट्। 'बहुल छन्दसी' ति शपो लुकि शप्रत्ययस्यापि लुक्]

उपगतम् समीपमागच्छतम् ५ ७१ ३ [उप+गम्लृ गतौ (भ्वा०) धातो क्त]

उपगन्तम् सामीप्येन गमयतम् १ १३७ ३ [उप+गम्लृ गतौ (भ्वा०) धातोर्लोट्। बहुल छन्दसीति' शपो लुकि छकारादेशो न भवति]

उपगमेयम् समीपतया प्राप्नुयाम् १ १५८ ३ [उप+गम्लृ गतौ (भ्वा०) धातोर्लिङ्। 'लिङ्याशिष्यङ्' अ० ३ १.८६ सूत्रेणाङ्]

उपगात् उपगच्छेत्, प्र०—अत्राऽडभाव १ १६४ ४ [उप+इण् गतौ (अदा०) धातोर्लुङ्। 'इणो गा लुङि' सूत्रेण गादेश। अडभावश्च]

उपगायत सामीप्येन शास्त्राणि पाठयत ३३ ८२ [उप+गै शब्दे (भ्वा०) धातोर्लोट्]

उपगृणन्ति उपगन्तु स्तुवन्ति १ ४८ ११ [उप+गृ शब्दे (क्र्या०) धातोर्लट्]

उपगेषम् समीप प्राप्नुयाम्, अ०—विजानीयाम् ५ ५ [उप+गेषृ अन्विच्छायाम् (भ्वा०) धातोर्लुङ्। अडभावश्च। धातोश्च गतिरर्थो धातूनामनेकार्थत्वात्]

उपचिताम् अन्येषा वर्धमानाना रोगाणाम् १२ ६७ [उप+चिञ् चयने (स्वा०) धातो क्विप्]

उपच्यवम् प्रापणम्, प्र०—अत्र 'च्युड गतौ' इत्यस्य

(परमेश्वरम्) २ २३ १ [उपम-श्वस्पदयो समास । ततोऽतिशायने तमप्]

उपमस्य उपमा विद्यते यस्य तस्य (राज्ञ) ४ ४२ १ उपमायुक्तस्य (कृष्टे =मनुष्यस्य) ४ ४२ २ [उपमप्राति० मत्वर्थीयप्रत्ययस्य लुक्]

उपमस्याम् उपमायाम्, प्र०—अत्र 'वाच्छन्दसि' इति स्याडागम १ १४५ ५ [उपमप्राति० सप्तमी। उपमम् इति व्याख्यातम्]

उपमा उपमीयतेऽनयेति दृष्टान्त १ ३१ १५ दृष्टान्त १ १२४ २ सब व्यवहारो मे उपयुक्त अन्तरिक्षादि आर्याभि० २ २८, १३ ३ **उपमाः**=उपमिमते याभिस्ता. (भा०—दृष्टान्ता) १३ ३ [उप+मा माने (अदा०) धातो 'आतश्चोपसर्गे' अ० ३ ३ १०६ सूत्रेण स्त्रियाम् अड्]

उपमातयः उपमा. ४ २३ ३ **उपमातिः**=उपमानम् ४ ४३ ४ [उप+मा माने (अदा०) धातोर्बाहुलकादौणादिकम् ति प्रत्यय]

उपमातिवनि. उपमातेर्विभाजक (अहि =मेघ) ५ ४१ १६ [उपमाति-वनिपदयो समास । उपमाति = उप+मा माने+ति । वनि =वन सम्भक्तौ (भ्वा०) धातोर्बाहुलकादौणादिक 'इ' प्रत्ययः]

उपमादम् य उपमा ददाति तम् (अग्नि=पावकम्) ३ ५ ५ [उपमोपपदे डुदाञ् दाने (जु०) धातो क प्रत्यय]

उपमासि प्रापयसि १ ६२ ७ परिमिमीषे १ १४२ २ **उपमाहि**=उपमन्यस्व ४ २२ १० [उप+मा माने (अदा०) धातोर्लेट् लोट् च]

उपमित् य उपमिनोति स (रोध =रोधनम्) ४ ५ १ य उप=समीपे मिनोति प्रक्षिपति स १ ५६ १ [उप+डुमिञ् प्रक्षेपणे (स्वा०) धातो क्विप्। ह्रस्वस्य तुगागम]

उपमिताम् सब प्रकार की उत्तम उपमायुक्त (शाला) को मं० वि० १६६, अथर्व० ६ ३ १ [उप+मा माने (अदा०) धातो क्त । 'द्यतिस्यतिमा०' इतीकारादेश]

उपमिमीहि उत्कृष्टतया मान्य कुरु ७ १६ ११. उपमितान् कुरु १ ८४ २० [उप+माङ् माने शब्दे च (जु०) धातोर्लोट्। व्यत्ययेन परस्मैपदम्]

उपयच्छामि उत्कर्षेण गृह्णामि ३८ ६ [उप+यमु उपरमे (भ्वा०) धातोर्लट्। 'इपुगमियमा छ' इति छकारादेश]

उपयन्तम् समीप प्राप्नुवन्तम् (अध्यापकम्) २ ३३.१२ [उप+इण् गतौ (अदा०) धातो शतृ]

उपयन्ति समीपतया प्राप्नुवन्ति १ ८३ २ **उपयन्तु**= समीप प्राप्नुवन्तु ३ ४ समीप गमयन्तु ५ ६२ ४ [उप+इण् गतौ (अदा०) धातोर्लेट्]

उपया अधर्मी के समीप रहने वाले उसके सहायक को, आर्याभि० १ २६

उपयात समीपतया प्राप्नुत ४ ३५ १ **उपयातम्**= समीप प्राप्नुतम् ३.२५ ४. उपाऽऽप्नुत २ ३६ ८ **उपयाति**=समीप गच्छति ७ १ १२. **उपयाथः**=समीप प्राप्नुत १ १८३ १ समीपतया प्राप्नुथ १ १८२ २ [उप+या प्रापणे (अदा०) धातोर्लोट्। अन्यत्र लट्]

उपयामगृहीतः अध्यापननियमै स्वीकृत. (सुताऽध्येता) ७ ३३. सुनियमैर्गृहीताऽन्त करण (विद्वज्जन) २६ ६ सुनियमैर्निगृहीताऽऽत्मा २६ ५ सुनियमैरधीतविद्य भा०—सुशिक्षित. (इन्द्र =सेनापति) ७.२२ सर्वनियमोपनियमसामग्रीसहित (मुख्यसभासद्) ७ ३६ यमानां समूहो याम्, उपगत च तद् याम चोपयाम्, उपयामेन गृहीत उपयामगृहीत परमेश्वर ७.२५. सेनासु नियमस्वीकृत (इन्द्र =सेनापति) ७ ३७. यमनियमादिभिर्योगाङ्गै साक्षात् स्वीकृत (इन्द्र.=ईश्वर) ७ ४० सेनादिसामग्रीसंगृहीत (इन्द्र =सेनापति) ८ ४४ भा०—यमादिसाधनाऽन्वित (योगजिज्ञासुर्जन) ७ ८ योगाऽभ्यासेन स्वीकर्त्तुं योग्य (इन्द्र =भगवान्) ७ ३६ राज्याङ्गैर्युक्त (शिल्पविधिविज्जन) ७ १६ राज्यगृहाश्रमसामग्रीसहित (विद्वान् राजा वा) ६ ४ राज्यव्यवहाराय स्वीकृत (अग्नि =सभापती राजा) ८ ३८ राजनियमै स्वीकृत (इन्द्र =सभासेनापति) ७ ३८ उपगतैर्यामैर्यमै स्वीकृत (जगदीश्वर) ८ ४१ उपगतयमैर्विदित (ईश्वर) २६ ३ उपयामैर्गृहीतानि जितानि इन्द्रियाणि येन स (इन्द्र =विद्वज्जन) २६ ४ उपयामा सामग्रीगृहीता येन स (गृहस्थो जन) ८ ३३ उपयामेन सत्कर्मणा योगाभ्यासेन गृहीत स्वीकृत (जगदीश्वर) २३ ४ यो यामैर्यमसम्बन्धिभि कर्मभिरुप समीपे गृहीत साक्षात्कृत (भगवान्) २३ २ कर्षकादिभि स्वीकृत (राजपुरुष) १६ ६ उपयामैरुत्तमनियमै सङ्गृहीत, भा०—शिक्षित (विद्वान्) २० ३३ उपगतैर्वर्म्यैर्यामैर्यमसम्बन्धिभिर्नियमैर्गृहीत सयुत (राजप्रजाजन) १६ ८ उपयामै. प्रजाराजजनै स्वीकृत (इन्द्र =सम्राट्) ६ २ उपगतैर्यामानामिमै सेवकै पुरुषै स्वीकृत (इन्द्र =सम्राट्) ६ २

उपप्रक्षे समीपतया सम्पर्के ५.४७.६ [उप+पृची सम्पर्के (रुधा०) धातोश्छान्दस रूपम्]

उपप्रयन् सामीप्यड्गच्छन् (सेनापति) १.१०३.४ **उपप्रयन्तः**=उत्कृष्ट निष्पादयन्तो जानन्त (जना) ३.११ समीपतया प्राप्नुवन्त (राजप्रजाजना) ४.३६.५ प्रयत्नेनोपाय कुर्वन्त (मनुष्या) ७.४४.२ समीप प्राप्तवन्त (मनुष्या.) १.७४.१ [उप+प्र+इण् गतौ (अदा०) धातो शतृ]

उपप्रयन्ति समीप गच्छन्ति ३.१२.७ **उपप्रयन्तु**=प्राप्नुवन्तु, भा०—उपतिष्ठेयु ३.४.५६ [उप+प्र+इण् (अदा०) धातोर्लेट्]

उपप्रयाहि समीपतया गच्छाऽऽगच्छ १.८२.६ समीप प्राप्नुहि १५.५२ [उप+प्र+या प्रापणे (अदा०) धातोर्लोट्]

उपप्रवहतः अच्छे प्रकार से प्राप्त हो सकते है स० वि० १०५, ५.४१.७ [उप+प्र+वह प्रापणे (भ्वा०) धातोर्लट्]

उपप्रसत्रे सम्बन्ध को समीपता से प्राप्त होती है स० वि० १०४, २.३५.५ [उप+प्र+सृ गतौ (भ्वा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

उपप्राऽगात् समीपतया गच्छतु प्राप्नोतु १.१६२.७ समीप गच्छति १.१६३.१२ समीपतया प्राप्नुयात् २५.३० [उप+प्र+इण् गतौ (अदा०) धातोर्लुङ्। 'इणो गा लुङी' ति गादेश। 'गातिस्थाघु०' इति सिचो लुक्]

उपप्रेत समीपतया प्राप्नुत ३.५३.११ [उप+प्र+इण् गतौ (अदा०) धातोर्लोट्]

उपप्रैत् समीप प्राप्नोति ५.३०.६ [उप+प्र+इण् गतौ (अदा०) धातोर्लट्]

उपबर्बृहत् सामीप्येन भृशमुपवर्हयति ५.६१.५ [उप+वृह वृद्वौ (भ्वा०) धातोर्यड्लुगन्ताल् लड्। अडभावश्च]

उपबर्हणीम् सुवर्द्धिकाम् (क्षा=भूमिम्) १.१७४.७. [उप+वृह वृद्वौ (भ्वा०) धातोर्ल्युडन्तान् ङीप् स्त्रियाम्]

उपब्दिः महाशब्दकर्त्ता (विद्वज्जन) १.७४.७ वाक् प्र०—उपब्दिरिति वाङ्नाम, निघ० १.११, १.१६६.७

उपब्रवामहै समीपतयोपदिशेम ५.५१.१२. [उप+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लोट्। 'बहुल छन्दसी' ति शपो न लुक्]

उपब्रुवते समीपमुपदिशन्ति १.१३४.२. **उपब्रुवे**=समीप्येनोपदिशामि १.१७६.५ समीपमुपदिशेयम् १.१८५.७ उपयोगि वच उपदिशेयम् १.१८८.८. समीपतया कथयामि ३.३७.५ **उपब्रूते**=समीपमुपदिशेत् १.४०.२ [उप+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लट्]

उपभरन्ती उपधरन्ती (स्वसा=भगिनी) २.५.६ [उप+भृञ् भरणे (भ्वा०) धातो शत्रन्तान् ङीप्]

उपभूषतम् सामीप्येनाऽलङ्कुरुतम् ३.३.८८ [उप+भूष अलङ्कारे (भ्वा) धातोर्लोट्]

उपभृत् योपगत विभर्त्यनया हस्तक्रियया सा घृताची=होमक्रिया) २.६ [उप+डुभृञ् धारणपोषणयो (जु०) धातो स्त्रिया सम्पदादित्वात् क्विप्। ह्रस्वस्य तुगागम। अथेदमन्तरिक्षमुपभृत् श० १.३.२.४ अन्तरिक्षमुपभृत् तै० ३.३.१.२. सावित्र्युपभृत् तै० ३.३.७.६. उपभृत् सव्य. (हरत) तै० ३.३.१.५ अत्तैव जुहूराद्य उपभृत् श० १.३.१.११]

उपभ्राजन्ते समीप प्रकाशन्ते ७.५५.२ [उप+भ्राजृ दीप्तौ (भ्वा०) धातोर्लट्]

उपमदन्ति समीपतया कामयन्ते, भा०—सिद्धकामा भवन्ति २५.३० [उप+मदी हर्षे (दिवा०) धातोर्लट्। व्यत्ययेन शप्]

उपमन्थितारम् समीपे विलोडितारम् (दुर्जनम्) ३०.१२. [उप-मन्थ विलोडने (भ्वा०) धातो कर्त्तरि तृच्]

उपमन्युम् उप समीपे मन्तु योग्यम् (कारु=शिल्पकार्यकर्त्तृजनम्) १.१०२.६ [उप-मन्युपदयो समास। मन्यु=मन ज्ञाने (दिवा०) धातोरौणादिको युच्। मन्युरिति क्रोधनाम निघ० २.१३ पदनाम निघ० ५.४]

उपमम् उपमाम् ५.६४.४ उपमानम् १.११०.५ दृष्टान्तस्वरूपम् १.६१.३ उपमेयसाधकतमम् (अर्कं=धनधान्यम्) ७.४०.७ येनोपमीयते तम् (अर्क=सत्कर्त्तव्यमन्न विचार वा) ७.३६.७ उपमायुक्तम् (नाम) ५.३.३ येनोपमिमीते तम् (केतु=प्रज्ञाम्) ७.३०.३ [वस्तुत उपगतेन स्तुतम् १.११०.५ उपमे अन्तिकनाम निघ० २.१६. उप+मा माने (अदा०) धातो 'आतश्चोपसर्गे' सूत्रेण क]

उपमर्मृजन्त अत्यन्त मार्जयन्तु शोधयन्तु १.१३५.५ [उप+मृजूष् शुद्धौ (अदा०) धातोर्यड्लुगन्ताच्छान्दस रूपम्]

उपमश्रवस्तमम् उपमीयते येन तच्छ्रवस्तदतिशयितम्

वचि' रिति वचिरादेश]

उपवक्तेव यथोपवक्ता तथा (सविता=सूर्य इव राजा) ६.७१ ५ [उपवक्तृ-इवपदयो समास]

उपवक्षतः समीप वहत, अ०—उपगत वहत प्राप्यत, प्र०—अत्र लडर्थे लेट् १ १६ २ [उप+वह प्रापणे (भ्वा०) धातोर्लेट्। 'सिब् बहुल लेटी' ति सिप्]

उपवसुम् उप समीपे वसूनि यस्या ताम् (स्वस्ति=सुखम्) ६ ५६ ६ [उप-वसुपदयो समास। वसुरिति धननाम निघ० २ १०]

उपवहतः समीपतया प्राप्नुत १ ८४ २ **उपवहन्तु**=समीप प्राप्नुवन्तु १ ४६ १ [उप+वह प्रापणे (भ्वा०) धातोर्लेट् लोट् च]

उपवाकम् उपगता वाग् यस्मिँस्तम् (सूर्यम्) १ १६४.८ **उपवाकाः**=उपगता प्राप्ता यवा १६.२२ **उपवाकैः**=उपनयन्ति यैस्तै. (कर्मभि) १६ ६०

उपवाकाभिः उपदेशक्रियाभि २१ ३० उपगताभिर्वाग्भि २१ ३१ [यच्छ्लेष्माणस्ता उपवाका (अभवन्) श० १२ ७ १ ३]

उपवाच्यः उपवक्तु योग्य (इन्द्र=सूर्य) १ १३२.२. उपदेशनीय (सविता=सर्वैश्वर्यप्रद ईश्वर) ४.५४ १ [उप+वच परिभाषणे (अदा०) धातोर्ण्यत् प्रत्यय]

उपविष्टाय य उपविशति तस्मै (जनाय) २२ ७. [उप+विश प्रवेशे (तुदा०) धातो क्तो बाहुलकादौणादिक]

उपवीतिने प्रशस्तमुपवीत यज्ञोपवीत विद्यते यस्य तस्मै, भा०—यज्ञोपवीतधारकाय (सेनाधीशाय) १६ १७. [उपवीतप्राति० मत्वर्थे इनि। उपवीतम्=उप+वी गतिप्रजनकान्त्यसनखादनेषु (अदा०) धातो क्त सज्ञाया 'क्तिच् क्तौ च सज्ञायाम्' अ० ३ ३ १७४ सूत्रेण]

उपवेतु उत्कृष्टतया व्याप्नोतु ५ ११ ४ [उप+वी गतिप्रजनकान्त्यसनखादेनषु (अदा०) धातोर्लोट्]

उपवोचन्त उपगतमुपदिशन्तु १ १२७ ७ **उपवोचे**=समीपमुपदिशेयम् ४ ४६ ४ [उप+वच परिभाषणे (अदा०) धातोर्लुङ्। अडभावो व्यत्ययेनात्मनेपदञ्च]

उपशाकेभिः उपशक्यन्तै यै कर्मभिस्तै· प्र०—अत्र 'बहुल छन्दसि' इति भिस ऐस् न १ ३३ ४. [उप+शक्लृ शक्तौ (स्वा०) धातोर्घञ्]

उपशिक्षति उत्कृष्टतया विद्या ददाति, प्र०—अत्र व्यत्ययेन परस्मैपदम् ६ २८ २ **उपशिक्षन्ति**=समीपतया शिक्षा प्रददति १ १७३ १०. [उप+शिक्ष विद्योपादाने (भ्वा०) धातोर्लेट्। व्यत्ययेन परस्मैपदञ्च]

उपशिक्षन् उपगता विद्या ग्राहयन् (ब्रह्मा=चतुर्वेदविज्जन) ५ ४०.८ [उप+शिक्ष विद्योपादाने (भ्वा०) धातो. शतृ। व्यत्ययेन परस्मैपदम्]

उपशिक्षायै उपवेदादिविद्योपादानाय, भा०—परीक्षादानाय ३० १० [उप+शिक्ष विद्योपादाने (भ्वा०) धातो 'गुरोश्च हल' इति स्त्रियाम् अड्]

उपशिश्रियाणाः ये उपश्रयन्ति ते (मरुत=वनिष्ठा योद्धृजना) ७ ५६ १३ [उप+श्रिञ् सेवायाम् (भ्वा०) धातोश्छन्दसि लिट्। 'लिट कानज्वा' इति कानच्]

उपशृणवत् समीपतया शृणुयात् १७.६० [उप+श्रु श्रवणे (भ्वा०) धातो· शतृ। 'श्रुव शृ चे' ति श्नु शृ आदेशश्च]

उपशृण्वन्ति सामीप्येन शृण्वन्ति १२ ६४ [उप+श्रु श्रवणे (भ्वा०) धातोर्लट्। 'श्रुव. शृ चे' ति श्नु, शृ आदेशश्च]

उपशेषे सन्तानोत्पादनाय ऋ० भू० २११ [शेप इत्यपत्यनाम निघ० २ २]

उपश्रवत् समीप शृणुयात् ६.५० ६ [उप+श्रु श्रवणे (भ्वा०) धातोर्लेट्। छान्दसत्वात् 'श्रुव शृ च' इति श्नुर्न भवति]

उपश्रिताः उपश्लेषतया श्रिता कण्ठा येषान्ते (रुद्रा=जीवा वायवो वा) १६ ५६ [उप्+श्रिञ् सेवायाम् (भ्वा०) धातो क्त]

उपश्रुतिम् उपगता श्रूयमाणाम् (गिरा=वाचम्) ८ ३४ उपयुक्ता श्रुतिं श्रवणम् १.१० ३ [उप+श्रु श्रवणे (भ्वा०) धातो क्तिन्]

उपश्रोता य उपद्रष्टा सञ्छृणोति (उपदेशको जन) ७ २३ १ [उप+श्रु श्रवणे (भ्वा०) धातोस्तृच्। वायुर्वा उपश्रोता गो० उ० ४ ६ वायुरुपश्रोता तै० ३ ७ ५ ४]

उपश्वासय उपप्राणय ६ ४७ २६ [उप+श्वस प्राणने (अदा०) धातोर्णिचि लोटि च रूपम्]

उपसचन्ते समीप समवयन्ति १ १६० २ [उप+पच् समवाये (भ्वा०) धातोर्लट्। व्यत्ययेनात्मनेपदम्]

उपसत्ता उपसीदन् (अग्नि=विनयप्रकाशितो राजा) २७ ४ य उपसीदति स (अग्नि=विद्वज्जन) २७ २ [उप+षदॢ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि तृच्]

उपसदम् य समीपे सीदति तम् (पुरुषम्) ३० ६

साङ्गोपाङ्गसाधनै (स्वीकृत) (अध्यापक) ८ ४७ शास्त्र-नियमोपनियमा गृहीता येन स (कुमारब्रह्मचारी) ८ १ उपयामेन विवाहनियमेन गृहीत (गृहपति) ८ ७. उप-यामाय गृहाश्रमाय गृहीत (गृहपति) ८ ११ साधनोप-साधनै स्वीकृत (इन्द्र=राजा) ६ ३ ब्रह्मचर्यनियमै स्वीकृत (अङ्ग=राजा) १० ३२ उपनियमै स्वीकृत (र्योगमभीप्सु) ७ ११ उपात्तैर्गृहीत, भा०—यमादिभि-र्योगाङ्गैर्निरुद्धचित्त (योगजिज्ञासु) ७ ४ उपयामा. शौचादयो नियमा गृहीता येन स (योगी) ८ १२ विनयादि-राजगुणैर्युक्त (सभापती राजा उपदेशको वा) ७ २० विद्याविचारसयुक्त (विद्वज्जन) २६ ८ [याम.=यमु उपरमे (भ्वा०) धातोर् अच्। तत समूहार्थेऽण्, तस्येद-मर्थेऽण् वा। उप-यामपदयो समासे तत उपयाम-गृहीतपदयो समास। गृहीत=ग्रहउपादाने (क्रया०)+क्त]

उपयामम् उपगत नियमम् २५ २ [उप-यामपदयो समास। याम.=यमु उपरमे (भ्वा०) धातोर्घञ् 'यम समुपनिविषु च' इति सूत्रेण। इय (पृथिवी) वाऽउपयाम इय वा इदमन्नाद्यमुपयच्छति पशुभ्यो मनुष्येभ्यो वनस्पतिभ्य श० ४ १ २ ८]

उपयासत् उपागच्छेत् ५ ४० ४ [उप+या प्रापणे (अदा०) धातोर्लेट् सिव्विकरण]

उपयाहि उपगत प्राप्नुहि ८.२० उपाऽऽगच्छ ३ ६० ७ समीप प्राप्नुहि १ १३५ १ समीप गच्छ प्राप्नुहि वा १ ८२ ५ [उप+या प्रापणे (अदा०) धातोर्लोट्]

उपयुज्महे समादधीमहि, प्र०—अत्र बहुल छन्दसि इति श्यनो लुक् १ १६५ ५. [उप+युज समाधौ (दिवा०) धातोर्लट्। श्यनो लुक्]

उपयुञ्जाथे नियुक्तौ भवत १ १५१ ४ [उप+युजिर् योगे (रुधा०) धातोर्लट्]

उपरतातिं उपरतातौ पलै मेघाऽस्त्रादिभि योद्धव्ये सङ्ग्रामे ७ ४८ ३ उपराणा मेघानामवकाशवत्यन्तरिक्षे १ १५१ ५ [उपर इति मेघनाम निघ० १ १०. उपरो मेघो भवति। उपरमन्तेऽस्मिन्नभ्राणि। उपरता आप इति वा नि० २ २१]

उपरम् मेघम् १.६२ ५ मेघमिव प्र०—उपरमिति मेघनाम निघ० १ १०, ५ ३१ ११ **उपराः**=समीपे रम-माणा (किरणा) ५ २९ ५ **उपरेण**=उत्कृष्टनियमेन ६.२ [उपर इति मेघनाम निघ० १.१० आ उपर उपल इत्येताभ्या साधारणानि पर्वतनामभि (उपर शब्दो मेघ-पर्वतयोर्वाचक इत्यर्थ) उपर उपलो मेघो भवति, उप-रमन्तेऽस्मिन्नभ्राणि, उपरता आप इति वा नि० २ २२]

उपरा मेघ इव १ ५४ ७ समीपस्था दिक् १ १६७ ३ **उपरासु**=श्रेष्ठासु (मनुष्यादिप्रजासु) ४ ३७ ३ दिक्षु, प्र०—उपरा इति दिङ्नाम निघ० १ ६, १ १२७ ५ [उपरा इति दिङ्नाम निघ० १ ६]

उपरासत् उपदद्यात् ६ ५० ६ [उप+रासति दान-कर्मा (निघ० ३ २०) धातोर्लेट्]

उपरासः वानप्रस्थ सन्यास। श्रममाप्ता गृहाश्रम-भोगेभ्य उपरता (पितर=प्रजाशोधका वृद्धा जना) १९ ६८ [उप+रमु क्रीडायाम् (भ्वा०) धातो 'अन्येष्वपि दृश्यते' अ० ३ २ १०१ सूत्रेण ड प्रत्यय। प्रथमावहुवचने च जस्यसुगागमे रूपम्]

उपरि ऊर्ध्वं वर्त्तमानम् (द्या=प्रकाशम्) ४ ३१ १५ ऊर्ध्वमुत्कृष्टे व्यवहारे १८ ४४ उत्कर्षे ३३ ८५ सर्वोपरि विराजमाना (मति=प्रज्ञा) १३ ५८ ['उपर्युपरिष्टात्' अ० ५ ३ ३१ सूत्रेण ऊर्ध्वस्योपभावो रिल् च प्रत्ययो निपात्यते। दिग्देशकालेषु]

उपरिप्रुता उपरि प्रवते यस्तेन (भङ्गेन=मर्दनेन) ७ ३ [उपर्युपपदे प्रुङ् गतौ (भ्वा०) धातो क्विप्। ह्रस्वस्य तुगागमे तृतीयाया रूपम्]

उपरिष्टात् ऊर्ध्वात् ३७ १२ ['उपर्युपरिष्टात्' अ० ५ ३ ३१. सूत्रेण दिग्देशकालेषु वर्त्तमानस्योर्ध्वस्योपभावो रिष्टातिल् च निपात्यते]

उपरिसदः ये उपरि उत्कृष्ट आसने व्यवहारे वा सीदन्ति ते (देवा=आयुर्वेदविदो विद्वाम) ९ ३६ **उपरि-सद्भ्यः**=सर्वोपरि विराजमानेभ्य (देवेभ्य=विद्वद्वरेभ्य) ९ ३५ [उपर्युपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्प्रत्यय]

उपरिस्पृशम् य उपरि स्पृशति तम् (अधिराजान=राजानम्) ३४ ४६ [उपर्युपपदे स्पृश सम्पर्शने (तुदा०) धातो क्विप्]

उपरेण उत्कृष्टनियमेन ६ २

उपलान् मेघान्, प्र०—उपल इति मेघनाम, निघ० १ १०, २५ ८ [उपल इति (मेघपर्वतयोनमि)। आ उपर उपल इत्येताभ्या साधारणानि पर्वतनामभि' नि २ २२]

उपवक्ता उपदेशकानामुपदेशक (विद्वज्जन) ४ ९ ५ [उप+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोस्तृच्। 'ब्रुवो

भूमी) २ ३२ १ [उप+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

उपस्तुतौ निकटे प्रशसितौ (अश्विनौ=अध्यापकोपदेशकौ) १ ८१ ७ [उप+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

उपस्तुत्यम् उपस्तोतुमर्हम्(कर्माङ्गमग्निम्)१ १६३.१ उपगतस्तुतिविषयम्, भा० सर्व प्रशसितम् (कर्म) २९ १२ समीपे प्रशसनीयम् (उक्थ्य कर्म) १ १३६ २ [उप+ष्टुञ् स्तुतौ (अदा०) धातो 'एतिस्तुशास्वृदृजुप क्यप्' अ० ३ १ १०९. सूत्रेण क्यप्]

उपस्तुहि सामीप्येन प्रकाशय १ १२ ७ समीपतया प्रशस २ ८ १ समीपतया प्रशसय १ २२ ६ [उप+ष्टुञ् स्तुतौ (अदा०) धातोर्लोट्]

उपस्तृणन्ति आच्छादयन्ति २५ ३९ बिछौने आदि करते है स० वि० २०९, अथर्व० ९ ६ ८ [उप+स्तृञ् आच्छादने (क्रया०) धातोर्लट्]

उपस्तृणीषणि उपाऽऽच्छादनीयम् (ऐश्वर्यम्) ६ ४४ ६]

उपस्तोषाम समीपतया प्रशसेम ६ ५५ ४ [उप+ष्टुञ् स्तुतौ (अदा०) धातोर्लोट्। उपस्तोपाम उपस्तुम नि० ८ ७]

उपस्थम् समीपस्थम् (वायुम्) २ ३५ ९ उपतिष्ठन्ति यस्मिँस्तम् (सज्जनम्) २ ४१ २१ **उपस्थे**=कर्त्तृणा समीपस्थे देशे १ ९५ ५ उत्सर्गे १ ११७ ५ स्वाङ्के ११ ५७ समीपे स्थातव्ये व्यवहारे १ १०९ ३ अङ्क १ १८५ ५ उत्सङ्गे १२ ३९ गोद मे आर्याभि० १ २७, ऋ० ५ ३ २७ २५ उपतिष्ठन्ति यस्मिँस्तस्मिन् प्र०—अत्र 'घञर्थे कविधानम् स्था०' अ० ३ ३ ५८ इति वार्त्तिकेनाऽधिकरणकारके क प्रत्यय १ ३१ ९ समीपे स्थापयितव्ये व्यवहारे १ १०९ ३ सामीप्ये ११ २१ **उपस्थात्**=य समीपे तिष्ठति तस्मात् (यानात्) ६ ६२ ६ समीपात् ३ ३३ १ समीपस्थव्यवहारात् १ ९५ ४ **उपस्था**=उपतिष्ठन्ति यस्मिँस्तत्र १ ३५ ६ क्रोडे तिष्ठति सा (उषा) १ १२४ ५ [उपस्थे उपस्थाने नि० ७ २६ उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'घञर्थे कविधानम्। स्थास्नापाव्यधिहनियुध्यर्थम्' अ० ३ ३ ५८ वा० सूत्रेणाधिकरणे क प्रत्यय]

उपस्थात् उपतिष्ठते २ ३ १० [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ्। अडभावश्छान्दस]

उपस्थाय सामीप्य प्राप्य ३ ४८.३ यथावत् जान कर उपस्थित निकट प्राप्त होकर आर्याभि० २ १०, ३२ ११ पठित्वा सरोव्य वा, भा०—सम्पाद्य लब्ध्वा ३२.११ उपगतो भूत्वा विदित्वा च ऋ० भू० ८९ समीप स्थित होकर स० वि० २१५, ३२ ११ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

उपस्थायम् अभिक्ष्णमुपस्थातुम् १ १४५ ४ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'आभीक्ष्ण्ये णमुल् च' अ० ३ ४ २२ इति णमुल्]

उपस्थावराभ्यः उपस्थिताभ्योऽवराभ्यो निकृष्टक्रियाभ्य ३० १६ [उपस्था-अवरापदयो समास। उपस्थ इति व्याख्यातम्]

उपस्थिताय प्राप्तसमीपत्वाय (पदार्थाय) २२ ७ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त। 'द्यतिस्यतिमा०' इतीकारादेश]

उपस्थुः उपतिष्ठन्तु ७ १८ ३ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ्]

उपस्थेयाम उपतिष्ठेम ६ ४७ ८ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोराशिषि लिङि 'लिङ्याशिष्यङ्' अ० ३ १ ८६ सूत्रेणाङिकृते 'छन्दस्युभयथा' अ० ३.४ ११७ सूत्रेण सार्वधातुकत्वादियादेश]

उपस्थेषम् उपपत्सीय, प्र०—अत्र 'लिङ्याशिष्यङ्' इत्यङि कृते 'छन्दस्युभयथा' इति सार्वधातुकत्वादियादेश आर्धधातुकत्वात् सकारलोपो न भवति २ ८

उपस्रवन्तु प्राप्नुवन्तु ३५ २० [उप+स्रु गतौ (भ्वा०) धातोर्लोट्]

उपहत्नुम् य उपहन्ति तम् (वीरपुरुषम्) २ ३३.११ [उप+हन हिसागत्यो (अदा०) धातो 'कृहनिभ्या क्त्नु' उ० ३ ३० इति क्त्नु प्रत्यय]

उपहरति स्वीकार करता है स० वि० २१०, अथर्व० ९ ६ १२ [उप+हृञ् हरणे (भ्वा०) धातोर्लोट्]

उपहिन्वन्तु सामीप्येन प्रीणयन्ति सेधयन्ति, प्र०—अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च १ २३ १७ [उप+हि गतौ वृद्धौ च (स्वा०) धातोर्लोट्। हिनोत इति पदनाम निघ० ४ ३]

उपहूतस्य समीपमाहूतस्य (पयस=उदकस्य दुग्धस्य वा) ३८ २८ सत्कारेणाऽऽहूतोपस्थितस्य (वीरगृहपते) ८ १२ **उपहूतः**=सम्मानित उपस्थित (वीरगृहपति) ८ १२ सत्कृत्याऽऽहूत (जन) २० ३५ उप समीपे कृताऽऽह्वान (विद्वज्जन) ३८ २८ समीप सम्यक्

उपसीदन्ति यस्या ता वेदीम् २ ६ १. **उपसदाम्**=य उपसीदन्ति तेषामतिथीनाम् १६ १४ [उप+पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्। ते (देवा) एताभिरुपसद्भिरुपासीदस्तद् यदुपासीदस्तस्मादुपसदो नाम श० ३ ४ ४ ४ ऋतव उपसद श० १० २.५.७ मासा उपसद १० २ ५ ६ अर्धमासा उपसद श० १० २ ५ ५. अहोरात्राणि वा ऽउपसद श० १० २ ५ ४ इमे लोका उपसद श० १० २ ५ ८ एतदु यज्ञे तप। यदुपसद, तपो वा ऽउपसद श० १० २ ५ ३ तपो ह्युपसद श० ३ ६ २ ११ ग्रीवा वै यज्ञस्योपसद श० ३ ४ ४ १ वज्रा वा ऽउपसद श० १० २.५ २ जितयो वै नामैता यदुपसद ऐ० १ २४ ता (उपसद) वा ऽज्यहविषो भवन्ति श० ३ ४ ४ ६ इषु वा एता देवा समस्कुर्वत यदुपसदस्तस्याग्निरनीकमासीत्, सोम शल्यो विष्णुस्तेजन वरुण पर्णानि ऐ० १ २५]

उपसदेम समीप प्राप्नुयाम ६ ७५ ८ [उप+पद्लृ-विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिङ्। छान्दसत्वात् सीदादेशो न भवति]

उपसद्य सामीप्य प्राप्य १८ ७५ [उप+पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

उपसद्यः समाश्रयितु योग्य (परमेश्वर) ऋ० भू० २२२ प्राप्तु योग्य (न्यायाधीशो राजा) २ २३ १३ समीप जाने और शरण लेने योग्य (सभापति राजा) स० प्र० १८३, अथर्व० ६ १० ६८ १ **उपसद्याय**=समीपे स्थापयितु योग्याय (यतिरूपायाऽतिथये) ७ १५ १ [उप+पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर् ण्यत्। छान्दसत्वाद् वृद्धिर्न भवति]

उपसन्नमन्तु समीप प्राप्त होकर नम्र होवे स० वि० १६०, अथर्व० १६ ४१ १ यथावत् सत्कार किया करे स० वि० १६८, अथर्व० १६ ४१ १ [उप+सम्+णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लोट्]

उपसंप्रयात समीप सम्यक् प्राप्नुत १५ ५३ [उप+सम्+प्र+या प्रापणे (अदा०) धातोर्लोट्]

उपसि समीपे ५ ४३ ७ [उपसि उपस्थे नि० ६ ६]

उपसीदन् समीपतया तिष्ठन्ति १ ७२ ५ समीपतयाऽवतिष्ठन्ते १.६५ १ [उप+पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लङ्। अडभावश्छान्दस। शिति सीदादेश]

उपसृज उत्कृष्टतयोत्पादय ३ ४ १०. उत्कर्षेण निर्मिमीहि ६.३६ ४. **उपसृजन्ति**=समीपतया ददते २ १ १६ समीप प्रयच्छन्ति २ २ १३ [उप+सृज विसर्गे (तुदा०) धातोर्लोट्]

उपसृजन् समीप प्रापयन्निव (गृहस्थो जन इव) ८ ५१ [उप+सृज विसर्गे (तुदा०) धातो शतृ]

उपसेक्तारम् उपसेचनकर्त्तारम् (पुरुषम्) ३० १२ [उप+षिच् क्षरणे (तुदा०) धातो कर्त्तरि तृच्]

उपसेदिम समीपतया प्राप्नुयाम १ ८६ २ उपतिष्ठेम ५ ८ ४. **उपसेदुः**=उपसीदन्ति ७ ३३ ६ [उप+पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिट्। उपसेदिम=उपसीदेम नि० १२ ३६]

उपस्तभायत् उपस्तभ्नीयात् ४ ५ १ [उप+स्तम्भु स्तम्भनार्थे सौत्रो धातु, तस्य णिचि लेटि च रूपम्। मकारलोपश्छान्दस]

उपस्त्यः ये उप समीपे स्त्यायन्ति सघ्नन्ति ते (वैद्या) प्र०—अत्रोपपूर्वात् 'स्त्यै सघाते' इत्यस्मादौणादिक क्विप् सम्प्रसारणं च १२ १०१ **उपस्तिः**=सहति (मित्रजन) १२ १०१. [उप+ष्टयै शब्दसघातयो (भ्वा०) धातोरौणादिक क्विप्, सम्प्रसारण पूर्वरूपे च रूपम्]

उपस्तिरे उपस्तृणामि, प्र०=अत्र 'वाच्छन्दसि' इति रेफादेश २ ३१ ५ [उप+स्तृञ् आच्छादने (क्रया०) धातोश्छान्दस रूपम्]

उपस्तिरे आस्तरणे ५ ८५.१ सस्तराय ४ ३३ १

उपस्तुतम् उपगतैर्गुणैः प्रशसितम् (सद्वैद्यम्) १ ११२ १५ य उपगतैर्गुणैः स्तूयते तम् (सुवीर्यं=सुबलम्) १ ३६ १७ **उपस्तुतः**=समीपे प्रशसित (इन्द्र=राजा) ७ २७ ३ उपगत स्तौति स उपस्तुतो विद्वान् प्र०—अत्र स्तुधातोर्बाहुलकादौणादिक क्त प्रत्यय १ ३६ १० **उपस्तुताः**=उपगतेन स्तुता (ऋभव=मेधाविनो जना) १ ११० ५ [उप+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

उपस्तुता उपगतप्रशसया कीर्त्तितौ (अश्विना=स्त्रीपुरुषौ) ५ ७६ २ उपगतैर्गुणैः प्रशसितौ (अध्यापकोपदेशकौ) १ १३६ १ [उप+ष्टुञ् स्तुतौ (अदा०) धातो क्त। 'सुपा सुलुक्०' इत्याकार]

उपस्तुतिम् उपगता प्रशसाम् १ १४८ २ उपमिता प्रशसाम् ४ ५६ ५ **उपस्तुतिः**=उपगता चाऽसौ स्तुति १ १५८ ४ **उपस्तुत्या**=ययोपस्तौति तया (वाचा) ६ ६१ १३ समीपेन स्तुत्या २१ ४६ [उप+ष्टुञ् स्तुतौ (अदा०) धातो स्त्रिया क्तिन्]

उपस्तुते उप समीपे प्रशसिते (द्यावापृथिवी=सूर्य-

सामीप्येन गच्छ ५ ३६ [उप+इण् गतौ (अदा०) धातोर्लुङ्। 'इणो गा लुडि' सूत्रेण गादेशे 'गातिस्था०' इति सिचो लुक्]

उपाघ्नत नित्य घ्नन्ति ऋ० भू० २३८ [उप+आङ्+हन हिंसागत्यो (अदा०) धातोर्लङ्। 'आडो यमहन' इत्यात्मनेपदम्]

उपाचर समीप समन्तात् प्राप्नुहि १ १८७.३ [उप+आङ्+चर गतौ (भ्वा०) धातोर्लोट्]

उपाचरत् उपचारिणीव वर्त्तते १ ४६ १४ [उप+चर गतौ (भ्वा०) धातोर्लङ्]

उपाजत समीपतया विजानीत १ १६१ ६ [उप+आङ्+अज गतिक्षेपणयो (भ्वा०) धातोर्लोट्]

उपातसत् उपभूपयेत्, भा०—प्रशसयेत् २३ २८ [उप+तसि अलंकारे (चुरा०) धातोर्लङ्। नुमागम आगमानुशासनस्यानित्यत्वात्]

उपातिष्ठन्त समीप स्थिरा भवेयु, प्र०—अत्र लिङर्थे लङ् १ ११ ६ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लङ्। व्यत्ययेनात्मनेपदम्]

उपानट् समीपतया समन्ताद् व्याप्नोति १७ ८६. [उप+आङ्+नक्त् व्याप्तिकर्मा (निघ० २.१८) धातोर्लङ्]

उपाऽऽयन् उपायन्ति, प्राप्नुवन्ति १३ ५१ [उप+आङ्+इण् गतौ (अदा०) धातोर्लङ्]

उपायने समीपे प्राप्ते (काले) २ २८.२. [उप+अय गतौ (भ्वा०) धातोर्ल्युट्]

उपाऽऽयात उत्कर्षेण समन्तात् प्राप्नुत ४ ३४.५ [उप+आङ्+या प्रापणे (अदा०) धातोर्लोट्]

उपाऽऽयातन समीप समन्तात्प्राप्नुत ४ ३४ ६ [उप+आङ्+या प्रापणे (अदा०) धातोर्लोट्। तस्य तनपादेशश्छान्दस.]

उपायातम् समीपतया सम्यक् प्राप्नुतम् १ ११६ १६ समीपमागच्छत, उपागच्छत, प्र०—अत्र व्यत्यय १.२ ५. उपायात समीप समन्तात् प्राप्नुत, प्र०—अत्र व्यत्यय १ २ ६. **उपायातु**=समीपमागच्छतु ४ २१ १ **उपायाहि**=समीप समन्तात्प्राप्नुहि १.१३० १ समीपतया प्राप्तो भव १ ३ ५ [उप+आङ्+या प्रापणे (अदा०) धातोर्लोट् लङ् वा]

उपावत समीपतया रक्षत ३३ १६ [उप+अव रक्षण-गतिकान्तिप्रीतितृप्त्यादिषु (भ्वा०) धातोर्लोट्]

उपावतुः समीप कामयेताम् १ १६१ १०.

उपावरोह उपवर्त्तस्व ६ २६ **उपावरोहन्तु**=समुपाश्रयन्तु ६ २६ [उप+अव+रह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लोट्]

उपावसि उत्कृष्टतया रक्षसि १२.१०७. [उप+अव रक्षणादिषु (भ्वा०) धातोर्लट्]

उपावसुम् उप समीपे वसूनि यस्या ताम् (स्वस्ति=सुखम्) ६ ५६ ६ [उप-वसुपदयो समास। सहितायां पूर्वपदस्य दीर्घ]

उपावसृज उत्कर्षेण यथावद् देहि २६ ३५ [उप+अव+सृज विसर्गे (तुदा०) धातोर्लोट्]

उपावसृजन् समीपतया विविधया क्रियया आज्ञां कुर्वन् (विद्वज्जन.) १ १४२.११ [उप+अव+सृज विसर्गे (तुदा०) धातो शतृप्रत्यय]

उपावसृक्षत् उपावसृजेत् २१.४६ [उप+अव+सृज विसर्गे (तुदा०) धातोर्लुङ्। च्ले. क्सादेशश्छान्दस। 'सृजिदृशोर्झल्यमकिति' अ० ६ १ ५८. नूनेणागमः]

उपावह समीप समन्ताद् वहति प्रापयति, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ २२ ६ **उपावहन्तु**=सामीप्येनाऽभित प्राप्नुवन्तु १ ४७ ८ [उप+आङ्+वह प्रापणे (भ्वा०) धातोर्लोट्]

उपावह्रियमाणः क्रियाकौशलेनोपयोज्यमान (इन्द्र=विद्युत्) ८ ५६ [उप+अव+हृञ् हरणे (भ्वा०) धातो. कर्मणि शानच्]

उपाविधन् समीप समन्ताद् विदधतु १.१४६ १ [उप+आङ्+वि+डुधाञ् धारणपोषणयो (जु०) धातोर्लङ्। शपो लुक्]

उपावीः उपागत पालक इव, शरणागतस्य रक्षक (त्वष्टा=सर्वदु खच्छित् सभापति) ६ ७. [उप+अव रक्षणादिषु (भ्वा०) धातोर्बाहुलकाद् औणादिक ई प्रत्यय]

उपावृतः ये भोगा उपावर्त्तन्ते (सुखोपभोगा.) १२ ८ [उप+आङ्+वृतु वर्त्तने (भ्वा०) धातो क्विप्]

उपश्रिताः उपश्लेषतया श्रिता कण्ठा येषान्ते (रुद्रा=जीवा वायवो वा) १६ ५६ [उप-श्रितपदयो समास। सहिताया पूर्वपदस्य दीर्घ]

उपासते प्राप्य सेवन्ते ३२ १४ अनुशासनं मन्यन्ते ऋ० भू० १०६, स्वीकुर्वन्ति प० वि०। उपासना करते हैं स० वि० १८६, १० १६१ २ यथावत् मानते हैं आर्याभि० २.४८, २५ १३ उपाश्रित होते हैं आर्याभि० २ ५३,

प्रापित (कीलाल=उत्तमान्नादिपदार्थसमूह) ३ ४३ कृतोपह्वान, अ०—स्पर्द्धित सन् (पिता=पालनहेतु सूर्यलोक) २ ११ [उप+ह्वेञ् स्पर्द्धाया शब्दे च (भ्वा०) धातो क्त। यजादित्वात् किति सम्प्रसारणे पूर्वरूपे 'हल' इति दीर्घ]

उपहूता यथावत् स्पर्द्धिता (भारती=वाणी) २९ ८ उपहूयते जनै राज्यसुखार्थं या (माता, पृथिवी=विद्या) २ १० [उपहूत इति व्याख्यातम्। तत स्त्रिया टाप्]

उपहूताः सामीप्य प्रापिता (अजाऽवय) ३ ४३ सम्यक् प्राप्ता (गाव) ऋ० भू० २४०. नियन्त्रिता (पितर) ऋ० भू० २६२ सामिप्यमाहूता (पत्नी=विदुष्य स्त्रिय) ६ ३४ समीपस्था (अजाऽवय) स० वि० १४७, ३ ४३ [उपहूत इति व्याख्यातम्। तस्य प्रथमा-बहुवचने रूपम्]

उपह्वयताम् उपह्वयति, अ०—स्वीकरोतु, प्र०—अत्र व्यत्ययेन लडर्थे लोट् २ ११ उपगत स्पर्धतामुपदिशताम् २ १० **उपह्वयामहे**=समीप शब्दयामहे ३ ४२ हम प्रशसा करते और प्रीति से समीपस्थ बुलाते है म० वि० १४६, ३ ४२ **उपह्वये**=सामीप्येन स्वीकुर्वे १ २१ १ समीप गन्तु स्पर्द्धे १ १३ ८ सामीप्येन सम्यक् स्पर्द्धे १ १३ १० उपगम्य स्वीकुर्वे १ २३ १८ निकटमाह्वये १ १३ १२ उपगतभोगद्योतनाय उपतापये, अ०—उपगम्योपतापये १ १३ ३ उपयोक्तु स्वीकुर्वे १ २२ १२ उपस्तुयाम् २२ १३ सामीप्येन स्वीकरोमि १ १६४ २६ समीपतया स्पर्द्धे १ १३ ७ [उप+ह्वेञ् स्पर्द्धाया शब्दे च (भ्वा०) धातोर्लोट्]

उपह्वरे उपह्वरन्ति कुटिलयन्ति येन तस्मिन् व्यवहारे, प्र०—अत्र 'कृतो बहुलम्' इति करणे अच् १ ६२ ६ निकट २६ १५ **उपह्वरेषु**=उपस्थितेषु कुटिलेषु मार्गेषु १ ८७ २ [उप+ह्वृ कौटिल्ये (भ्वा०) धातो 'कृतो बहुलम्' अ० ३ ३ ११३ वा० सूत्रेण करणेऽच्]

उपाकयोः समीपस्थयो सेनयो १ ८१ ४ **उपाके**=समीपे ७ ४२ ३ समीप वर्त्तमाने (उपसौ=रात्र्यहनी) प्र०—उपाके इति अन्तिकनाम, निघ० २ १६, ३ ४६ परस्परमसन्निहितवर्त्तमाने (रात्रिदिने) १ १४२ ७ सन्निहिते, भा०—परस्परेण कालेन सह वर्त्तमाने सम्बद्धे (उपासानक्ता=रात्रिदिने २९ ३१ [उपाके उपक्रान्ते नि० ८ ११ अन्तिकनाम निघ० २ १६]

उपाकरम् उपाकरोमि १ ११४ ९ [उप+डुकृञ् करणे (तना०) धातोर्लुङ्। 'कृमृदरुहिभ्यश्छन्दसि' अ० ३ १ ५९ सूत्रेण च्लेरङ्]

उपाकृधि उपाकुरु १७ ६ [उप+आङ्+डुकृञ् करणे (तना०) धातोर्लोट्। 'श्रुशृणुपृकृवृभ्यश्छन्दसि' अ० ६ ४ १०२ सूत्रेण हेर्धिरादेश। विकरणव्यत्ययेन शप्। 'बहुल छन्दसी' ति शपो लुक्]

उपागच्छतम् समीप प्राप्नुतम् १ ४७ ३ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट्]

उपाऽऽगच्छतम् उपगत समन्ताद् गमयत, प्र०—अत्र लडर्थे लोऽन्तर्गतो ण्यर्थश्च १ ७१ ४ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट्]

उपागतम् समीपतयाऽऽगच्छतम्, प्र०—अत्र 'गम्लृ गतौ' इत्यस्माद् 'बहुल छन्दसि' अ० २ ४ ७३ इति शपो लुकि सति शित्वाऽभावाच्छस्याऽभाव 'अनुदात्तोपदेश०' अ० ६.४ ३७ इत्यादिना मलोपश्च ७ ८ समीपमागच्छत, प्र०—अत्र लोट्-मध्यम-द्विवचनम् १ २ ४ समीप समन्तात् प्राप्नुतम् ३३ ५६ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट्। छान्दसत्वाच्छपो लुकि छकारादेशो न भवति। मकारलोपश्च]

उपागन्तम् समीपतया सम्यक् प्राप्नुतम् १ १३७ १ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट्। शपो लुकि छत्वमपि न]

उपागन्म प्राप्नुयाम ६ १६ ३८ [उप+गम्लृ गतौ (भ्वा०) धातोर्लङ्। शपो लुकि छत्वाऽभावे 'म्वोश्चे' ति नकारादेश]

उपागमन्तु समीप सर्वतो गच्छन्तु १ १०७ २ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट्। 'बहुल छन्दसी' ति शपो लुकि छत्वमपि न भवति]

उपागहि समीपतयाऽऽगच्छति, अ०—उपागच्छति, प्र०—अत्र शपो लुकि सति 'वाच्छन्दसि' इति हेरपित्वाद् 'अनुदात्तोपदेश०' अ० ६ ४ ३७ इत्यनुनासिकलोपो लडर्थे लोट् च १ ४२ समीपमागच्छ १७ ६ समीप समन्ताद् गच्छति, प्र०—अत्र व्यत्ययो लडर्थे लोट् 'बहुल छन्दसि' इति शपो लुक् च १ १६ ५ उपागच्छ उपागच्छति वा १ ९१ १० [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट्। 'बहुल छन्दसी' ति शपो लुकि छत्व न भवति। हेरपित्वात् कित्वादनुनासिकलोप]

उपाऽऽगाम् समीप प्राप्नुयाम् ५ ४२ **उपाऽऽगाः**=

उभयतः शीर्ष्णी उभयत शिरोवदुत्तमा गुणा यस्या सा, भा०—वाह्याभ्यन्तररक्षणाभ्या सर्वोत्तमा (वाग् विद्युच्च) प्र०—अत्र पञ्चभ्या अलुक् ४ १६ [उभयतस्-शिरस्पदयो समास । 'शीर्षश्छन्दसि' अ० ६ १ ६० सूत्रेण शिरस स्थाने 'शीर्षन्' आदेश । स्त्रिया ङीप्]

उभयत्र गमनाऽऽगमनयो ३ ५३ ५ [उभयसर्वनाम्न सप्तम्यन्तात् त्रल्]

उभयस्य द्विविधस्य (जगत स्थातुश्च) ४ ५३ ६ [उभप्राति० 'उभादुदात्तो नित्यम्' अ० ५ २ ४४ सूत्रेणा-वयवे विहितस्य तयपोऽयजादेश]

उभया वर्त्तमानेन सह पूर्वाऽपराणि (जन्मकृत्यानि) २ ६ ७ [उभयप्राति० परस्य जस स्थाने भूतस्य शेर्लुक् 'शेश्छन्दसि वहुलम्' अ० ६ १ ७० सूत्रेण]

उभयादतः उभयोरध ऊर्ध्वभागयोर्दन्ता येपान्ते (पशव) ३१ ८ उभयतो दन्ता येपान्ते उष्ट्रगर्दभादय ऋ० भू० १२४ [उभय-दन्तपदयोर्वहुव्रीहौ 'छन्दसि च' अ० ५ ४ १४२ सूत्रेण दन्तस्य दतृ-आदेश । सहिताया पूर्वपदस्य दीर्घ]

उभयासः उभयत्र वर्त्तमाना (सेनाजना) ४ २४ ३ [उभयप्राति० प्रथमावहुवचने जसोऽसुगागम]

उभयाहस्ति उभये हस्ता प्रवर्त्तन्ते यस्मिँस्तत् (राध =द्रव्यम्) ५ ३६ १ [उभय-हस्तपदयोर्वहुव्रीहौ 'द्विदण्डयादिभ्यश्च' अ० ५ ४ १२८ सूत्रेण समासान्त इच् प्रत्यय । सहिताया पूर्वस्य दीर्घ । उभयाहस्ति उभाभ्या हस्ताभ्याम् नि० ४ ५]

उभयाहस्त्या समन्तादुभयत्र हस्तो येपु कर्मसु तानि तेपु साधूनि (वसु=वासस्थानानि) १ ८१ ७ [उभय-हस्तपदयोर्वहुव्रीहौ समासान्त इच्प्रत्यये कृते 'तत्र साधुर्' इत्यर्थे यत्प्रत्यये जस स्थानेभूतस्य शेर्लुक्]

उभ्नाः प्रपूर्द्धि, प्र०—अत्र व्यत्ययेन श्ना १ ६३ ४ [उभ पूरणे (तुदा०) धातोर्लोट् । विकरणव्यत्ययेन श्ना-प्रत्यय]

उमेभिः रक्षणादिकर्त्तृभिस्सह (देवेभि =विद्वज्जनै) ५ ५१ १

उरणम् आच्छादकम् (दुर्जनम्) २ १४ ४ [ऋ गतौ (भ्वा०) धातो 'अर्त्ते क्युरुच्च' उ० ५ १७ सूत्रेण क्यु प्रत्ययो धातोरुकारादेशश्च । उरण =ऊर्णावान् भवति, ऊर्णा पुनर्वृणोतेरूर्णोतिर्वा नि० ५ २१]

उरवः विशालजघनोरस्का (पितर =पालनक्षमा राजपुरुषा) २६ ४६ वहव (परमाणव) ५.४७.२ वहु-प्रज्ञा (पूर्णविद्या परीक्षका जना) २ २७ ३. वहव (मरुत =मनुष्या) ५ ५७ ४ **उरवे**=विस्तृताय (मार्गाय) १.१३६ २ [ऊर्णुञ् आच्छादने (अदा०) धातो 'महति ह्रस्वश्च' उ० १ ३१ सूत्रेण कु प्रत्ययो नुलोपो ह्रस्वश्च ऊर्णोत्याच्छादयत्यल्पानिति विग्रह । उरुवहुनाम निघ० ३ १]

उरः हृदयम्, भा०—अन्त करणम् २० ७ वक्ष-स्थलम् १ १५८ ५ **उरसा**=अन्त करणेन ११ ३१ [ऋ गतौ (भ्वा०) धातो 'अर्त्तेरुच्च' उ० ४ १६५. सूत्रेणासुन् प्रत्ययो धातोरुकारादेशश्च । उरुस्त्रिष्टुप् प० २ ३ उरस्त्रिष्टुभ श० ८ ६ २.७]

उराणम् वहुवल कुर्वन्तम् (इन्द्र=सेनेशम्) १ १७३ ७ **उराणः**=य उरून् वहूननिति प्राणयति स (सूर्य) ४ ६ ३. य उरुर्वह्वनिति स (जन), प्र०—अत्र वर्णव्यत्ययेनोकारस्य स्थानेऽकार ३ १६.२ वहुकुर्वाण (अग्नि =विद्युत्) ४ ७ ८ वहुकुर्वन् (अग्नि =सूर्य) ४ ६ ४ [उराण =उरु कुर्वाण. नि० ६ १७. 'उरु' इत्यु-पपदे अन प्राणने (अदा०) धातोरण् । वर्णव्यत्ययेनो-कारस्याकार । उरुपपदाद्वा णीञ् धातोर्ड प्रत्यय । उराण पदनाम निघ० ४ ३]

उरु व्यापकम् (अन्तरिक्षम्=आकाशम्) ३ ५४ १६ विस्तीर्णम् (सुखम्) ५ ४१ वहुविधम् (सुखम्), प्र०—उर्विति वहुनामसु पठितम् निघ० ३ १, १.७ वहु (अन्त-रिक्षम्) ७ ५ **उरुः**=वहुशक्ति (जगदीश्वर) २.१३ ७ सर्वशक्तिमान् (ईश्वर) ऋ० भू० १६२ **उरुणा**=वहुना (पथा=मार्गेण) ४ २६ ५ **उरुम्**=वहुगुणाऽन्वित न्यायम् ८ २३ वहुवलादिगुणविशिष्टम् (वीरसेनाम्) १ ५७ ६ वहुविधम् (लोक=भुवनसमूहम्) १ ६३ ६ वह्वाच्छादन स्वीकरण वा ४ २७ वह्वैश्वर्यम् (इन्द्र=राजाद्यध्यक्षम्) ३ ४१ ५ वहुसुखकर विस्तीर्णम् (लोकम्) ७ ६० ६ **उरुषु**=विस्तीर्णेषु (विक्रमणेषु=सृष्टिक्रमेषु) १ १५४ २ **उरो !**=वहुसुखप्रतिपादक (अन्तरिक्ष =यज्ञ) ४ ७ **उरोः**=वहुन (मनस =विज्ञानात्) प्र०—अत्र लिङ्ग-व्यत्ययेन पुस्त्वम् ४ ६ वहुगुणैश्वर्यात् १७ ४६ वहुविध-गुणयुक्तात् (अन्तरिक्षात्=आकाशात्) ३.४६ ३. वहोरनन्तात् (अन्तरिक्षात्) ५ १६ **उरौ**=वहुसुखकरे (कार्ये) ५ ४२ १७ पुष्कले (अन्तरिक्षे=आकाशे) ३ ६ ८ वहुरूपे (अन्तरिक्षे=आकाशे) ५ ५२ ७ विस्तृते (अन्त-रिक्षे=अन्तराल आकाशे) ६ ३३ वाहौ ३ १ ११ ['उरु'

३२ १४ उपास्यतया जानन्ति ४० ९ **उपास्महे**=उपासन कुर्महे ऋ० भू० १६६, अथर्व० १३ ४ ४७ [उप+आस उपवेशने (अदा०) धातोर्लट्]

उपासदत् उपसीदति ६ ५७ २ [उप+पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लुङ्। लृदित्त्वाद् अङ्]

उपासीदतम् सामीप्येनाऽभितो गच्छतम् १ ४७ ८ [उप+आङ्+पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लोट्। शिति सीदादेश]

उपासृजध्वम् उत्कृष्टतया विविधविद्यायुक्त कुरुत ६ ४८.११ [उप+आङ्+सृज विसर्गे (तुदा०) धातोर्लोट्। व्यत्ययेनात्मनेपदम्]

उपासेदिम समीप समन्तात्प्राप्नुयाम २५ १५ [उप+आङ्+पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिट्]

उपास्थात् उपतिष्ठेत् २५.४४ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ्। 'गातिस्थाघुपाभूभ्य०' इति सिचो लुक्]

उपास्थित उपतिष्ठति २ ५ ६ **उपाऽस्थुः**=उपतिष्ठन्ति ४ ४१ ९ समीप प्राप्नुवन्तु ४ ४१ ८ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ्। 'अकर्मकाच्चे' त्यात्मनेपदे 'स्थाध्वोरिच्च' अ० १ २ १७ सूत्रेणेकारान्तादेश किच्च]

उपांशुः उपगता अंशवो यत्र स उपांशुर्जप १८ १९. उपगृहीता (जपरूप) १३.५४. **उपांशोः**=उप सामीप्येऽनिति तस्य (सेनेशस्य) प्र०—अत्राऽनधातोरु शुगागमश्च ९ ३८ [उप-अंशुपदयो समास। अंशु=शमष्टमात्रो भवति। अननाय शम्भवतीति वा नि० २.५ अनिरुक्त वा ऽउपांशु श० १ ३ ५ १० प्रमाणो वा ऽअस्य (यज्ञस्य) उपांशु श० ४.१ १ १ अथवा उपांशु प्राण एव कौ० १२ ४ यज्ञमुख वा ऽउपांशु श० ५ २ ४ १७ इयं (पृथिवी) ह वा ऽउपांशु श० ४ १ २ २७]

उपेतिः उपेयते सुखानि यया सा (नीति) १ ७६.१ [उप+इण् गतौ (अदा०) धातो स्त्रिया क्तिन्]

उपेतौ प्राप्तौ (पितरा=जनकौ) ३ १८.१. [उप+इण् गतौ (अदा०) धातो क्त]

उपेमसि समीप समन्ताद् प्राप्नुम १ १ ७ [उप+इण गतौ (अदा०) धातोर्लट्। 'इदन्तो मसि' इति मस इदन्तत्वम्]

उपेयतुः समीपं प्राप्नुत ३ २.९

उपैति समीपतया प्राप्नोति ७ १ ६ समीपता मे प्राप्त होता है सं० वि० २०९, अथर्व० ९ ६.४ [उप+इण् गतौ (अदा०) धातोर्लट्]

उपैमसि सामीप्यं सर्वत प्राप्नुम वे० भ्रा० नि० उपगम्य समन्तात् प्राप्नुम, प्र०—अत्र 'इदन्तो मसि' इतीकारादेश ३ २२ अ०—नित्यमुपाप्नुम ३ २३ [उप+आङ्+इण् गतौ (अदा०) धातोर्लट्। मस इदन्तता]

उपैमि समीपतया ज्ञातु प्राप्तुमनुष्ठातु प्राप्नोमि १ ५ समीप प्राप्त होऊं स० प्र० १६४, २० २४ समीप प्राप्त होता हूँ स० वि० १८९, २० २४ **उपैषि**=समीपतया प्राप्नोपि १ ५३ ७ **उपैहि**=समीप प्राप्त हो स० प्र० १५२, १० १८ ८ [उप+इण् गतौ (अदा०) धातोर्लट् लोट् च। 'एत्येधत्यूठ्सु' अ० ६ १ ८९ सूत्रेण वृद्धिरेकादेश]

उपो समीपे १ ६१ १४ सामीप्ये १ १२४ ४.

उपोक्षत (उप+आ+उक्षत) समीप समन्तात् सिञ्चत १ ८७ २ [उप+आङ्+उक्ष सेचने (भ्वा०) धातोर्लोट्]

उपोत्थितः समीपे प्रकाशित (विष्णु=हिरण्यगर्भ परमेश्वर) ८ ५५ [उप+उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त। 'घतिस्यतिमास्थाम्०' अ० ७ ४ ४० सूत्रेणेकारादेश। 'उद स्थास्तम्भो०' इति पूर्वसवर्णादेश]

उपोदके उपगतान्युदकानि यस्मिँस्तस्मिन् (लोके) ३५ ६ [उप+उदकपदयो. समास]

उपोप अति सामीप्ये १ १२३.७ सामीप्ये, प्र०—अत्र 'उपर्यध्यधस सामीप्ये' अ० ८ १ ७ इति द्वित्वम् ८ २

उपोपपृच्यते सामीप्येन सम्बध्यते ३ ३४ [उप+पृची सम्पर्के (रुधा०) कर्मणि लट्। उपशब्दस्य द्वित्व सामीप्ये]

उपोपसश्चसि सामीप्येन प्राप्नोपि, प्र०—सश्चतीति गतिकर्मसु पठितम् निघ० २ १४, ८ २ [उप+सश्चति गतिकर्मा (निघ० २ १४) धातोर्लट्। सामीप्ये उपशब्दस्य द्वित्वम्]

उव्जतम् कुटिलमपहत, कुटिल दूरीकुरुत, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १.२१ ५ **उव्जन्तु**=कुटिल कुर्वन्तु ६ ५२ १ **उव्जः**=हन्या ४.१९ ५. [उव्ज आर्जवे (तुदा०) धातोर्लोट्]

उव्जन् आर्जव कुर्वन् (इन्द्र=सूर्य) १ ५२ २ [उव्ज आर्जवे (तुदा०) धातो शतृप्रत्यय]

उव्धम् उन्दकम् (दृढज्ञानम्) ४.१.१५

व्यापकाय (राज्ञे) ७ ३१ ११ [उरु-व्यचस्पदयो समास । व्यचस्=वि+अञ्चु गतिपूजनयो (भ्वा०) धातोरसुन् प्रत्यय । बाहुलकादनुनासिकलोप । अथवा व्यच व्याजीकरणे (तुदा०) धातोरसुन् । धातूनामनेकार्थत्वाद् व्याप्त्यर्थे]

उरुव्यचसा बहुव्यापिनौ (रोदसी=द्यावापृथिवी) १ १६० २ [पूर्वपदे व्याख्यातम्]

उरुव्यचा बहुव्याप्त्या १ १०८ २ [उरूपपदे विपूर्वादञ्चते क्विप्]

उरुव्यचाः बहुषु व्याप्त (विद्वज्जन) ५ ४६ ६ उरु बहुविध व्यचो विज्ञान पूजन सत्करण वा यस्य स (सभाध्यक्ष) १ १०४ ६ बहुशुभगुणव्याप्त (समृद्धो राजा) ३ ५० १ ['उरुव्यचसम्' पदे व्याख्यातम्]

उरुव्यञ्चम् उरुषु बहुषु विशेषेणाञ्चति तम् (रुक्मम्=आदित्यम्) १५ २५ बहुव्याप्तिमन्तम् (स्तोमम्) ५ १ १२ [उरूपपदे विपूर्वात् अञ्चु गतिपूजनयो (भ्वा०) धातोरण् प्रत्यय]

उरुशर्म्मा उरूणि बहूनि सुखानि यस्या सा (अदिति=विदुषी माता) १० १६ [उरु-शर्मन्पदयो समास । 'उरु' व्याख्यातम् । शर्मन्=सुखनाम निघ० ३ ६ गृहनाम निघ० ३ ४]

उरुशंस बहुभि प्रशसित (वरुण=विद्वज्जन) २१ २ य उरून् बहून् शसति तत्सम्बुद्धौ (आप्त विद्वन्) १८ ४६ उरु बहुशस प्रशसा यस्य तत्सम्बुद्धौ (विद्वज्जन) १ १३८ ३ बहुभि शस्यते यत्तत्सम्बुद्धौ पक्षे सूर्यो वा (वरुण=जगदीश्वर) १ २४ ११ **उरुशंसस्य**=बहुप्रशसितस्य (विद्वत्पितु) २ २८ ३ **उरुशंसः**=बहुप्रशस (राजा) ४ १६ १८ [उरु+शसु स्तुतौ (भ्वा०) धातोरण् प्रत्यय]

उरुशंसा बहुस्तुती (मित्रावरुणा=अध्यापकोपदेशकौ) ३ ६२ १७ [पूर्वपदे व्याख्यातम्]

उरुशंसाः बहुप्रशसा (जगत्कल्याणकरा जना) २ २७ ६ [उरूपपदे शसु स्तुतौ (भ्वा०) धातोरण्। 'कृतो बहुलमि' ति वा कर्मण्यण्]

उरुष्य पाहि १ ५८ ६ रक्ष, प्र०—अत्र कण्ड्वाद्याकृतिगणत्वादुरुपशब्दाद् यक्, अ०—सतत पृथग् रक्ष ३ २६ बहुना योगाऽभ्यासेनाऽविद्यादिक्लेशानन्त नय, प्र०—अत्रोरूपपदात् 'षोऽन्त कर्मणि' इत्यस्मात् क्विप्, ततो नामधातुत्वात् क्विप्, ततो मध्यमैकवचनप्रयोग ७ ४ रक्ष, प्र०—उरुष्यतीति रक्षति कर्मा नि० ५ २३, १.६१ १५. सेवस्व ४ २ ११. **उरुष्यत**=सेवध्वम् ५ ८७ ६ **उरुष्यतम्**=प्रेरयेतम् ५ ६५ ६ सेवेतम् ४.४३ ४ सेवेथाम् ४.४३ ७. **उरुष्यति**=रक्षति २ २६ ४ वर्धयति १ १५५ २ सेवते ६ १४ ५ **उरुष्यय.**=रक्षथ १.११६ ६ सेवेथाम् १ १५५ २ **उरुष्या**=सेवेत, रक्षेत ६ ४. **उरुष्यात्**=रक्षेत् ७ १ १५ **उरुष्याः**=रक्षे ७ ३ ८ **उरुष्येत्**=सेवेत ४ ५५ ५ **उरुष्व**=सेवस्व ४ २ ११ [उरुप्-शब्दात् कण्ड्वाद्याकृतिगणत्वाद् यक्। ततो लोट्। अथवा उरूपपदे षोऽन्त कर्मणि (दिवा०) धातो विवपि ततो नामधातोर्लोट्। अथवा उरुष्यती रक्षतिकर्मा नि० ५ २३]

उरुष्यत् आत्मन उरुर्बहुरिवाचरति ३ ५८ [उरु बहुनाम (निघ० ३ १) तत आचारे क्यचि लेट्। 'सुग् वक्तव्य' अ० ७ १ ५१ वा० सूत्रेण क्यचि सुगागम]

उरूची या उर्वीर्बह्वीर्विद्या अञ्चति प्राप्नोति सा (जिह्वा=वाणी) ३ ५७ ५ या बहूनञ्चति प्राप्नोति सा पृथिवी ७ ३५ ३ बह्वीना पदार्थविद्याना ज्ञापिका बह्वर्थज्ञापिका वा (वेना=वेदचतुष्टयी वाक् वाणी वा) प्र०—उर्विति बहुनामसु पठितम् निघ० ३ १, १ २३ योरुणि बहून्यञ्चति सा (गौ=पृथिवी) ३ ३१ ११ **उरूचीम्**=या उरूणि बहून्यञ्चति प्राप्नोति ताम् (महीं=भूमिम्) २१ ५ उरुणि बहूनि वस्तून्यञ्चन्तीम् (अमतिं=सुन्दर रूपम्) ७.४५ ३ [उरूपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्०' अ० ३ २ ५९ सूत्रेण क्विन्। 'अच' इत्यकारलोपो ङीपि। 'चौ' इति पूर्वस्य दीर्घ]

उरूची य उरून् बहूनञ्चतस्ते (रोदसी=द्यावापृथिव्यौ) ४ ५६.४ ये बहूनञ्चतस्ने (रोदसी=भूमिप्रकाशौ) ६.११ ४ [पूर्वपदे व्याख्यातम्। 'वा छन्दसि' अ० ६ १ १०६ सूत्रेण पूर्वसवर्णदीर्घ]

उर्वराजिते य उर्वरा सर्वफलपुष्पशस्यादिप्रापिका जयति तस्मै (इन्द्राय=विद्वत्सभासेनेशाय) २ २१ १ [उर्वरा उपपदे जि जये (भ्वा०) धातो क्विप्। ह्रस्वस्य तुक्]

उर्वी बहुविस्तीर्णे (द्यावापृथिवी) १ १८५ ६ हिसके (अपारे=द्यावापृथिव्यौ) ३ १ १४ [उर्वी=द्यावापृथिवीनाम निघ० ३ ३० ऊर्णुञ् आच्छादने (अदा०) धातो 'महति ह्रस्वश्च' उ० १ ३१ सूत्रेण कु। स्त्रिया ङीप्]

उर्वी बहुफलाद्युपेता (भूमि=पृथिवी) ६ ४७ २० [उर्वी पृथिवी नाम निघ० १ १ उर्वी.=ऊर्णोतेर्वृणोतेरित्यौर्णवाभ नि० २ २७]

इति 'उरव' पदे व्याख्यातम् । उरु बहुनाम निघ० ३ १]

उरुक्रमस्य बहुपराक्रमस्य (विष्णो =परमेश्वरस्य) १ १५४.५ **उरुक्रमः**=बहव क्रमा पराक्रमा यस्य स (ईश्वरो विद्वज्जनो वा) १ ९० ९ अनन्त पराक्रम (ईश्वर) आर्याभि० १ १, ऋ० १ ६ १८ ९ बहुपुरुषार्थ (विद्वज्जन) ३ ५४ १४ उरुर्महान् क्रम पराक्रमो यस्य स, अनन्त, महापराक्रमयुक्त परमात्मा स० प्र० २१, ३६ ९ उरुर्बहु क्रम ससाररचने यस्य स (विष्णु =ईश्वर) ३६ ९ उरवो बहवो क्रमा यस्य (एवयामरुत्=विज्ञानवान् मनुष्य) ५ ८७.४ [उरु-क्रमपदयो समास । उरुपदम् 'उरव' इत्यत्र व्याख्यातम् । उरु बहुनाम निघ० ३ १ क्रम =क्रमु पादविक्षेपे (भ्वा०) धातोर्घञ् । 'नोदात्तोपदेश०' इति सूत्रेण वृद्धिप्रतिषेध]

उरुक्षया उरुक्षयौ बहुषु जगत्पदार्थेषु क्षयो निवासो ययोस्तौ (मित्रावरुणौ=सूर्यवायू) अत्र 'सुपा सुलुग्०' इत्याकार 'उर्विति बहुनामसु' पठितम् निघ० ३ १ 'क्षि निवासगत्यो' अस्य धातोरधिकरणार्थे क्षयशब्द १ २ ९ [उरु-क्षयपदयो समास । उरु बहुनाम निघ० ३ १ क्षय =क्षि निवासगत्यो (तुदा०) धातो 'पुसि सज्ञाया घ प्रायेण' त्यधिकरणे घ]

उरुगायः ! उरूणि बहूनि शास्त्राणि गायति पठति, तत्सम्बुद्धौ (कुमार ब्रह्मचारिन्) ८ १ **उरुगायम्**=उरूणि गया अपत्यानि धनानि गृहाणि वा यस्मात्तम् (श्रव =अन्न श्रवण वा) ६ ६५.६ बहुभिर्गीयमान विद्यावोधम् ७ ३५ १५ बहुभि प्रशसनीयम् (विद्यार्थिजनम्) ६ २८ ४ **उरुगायस्य**=बहुर्गाय स्तुतिर्यस्य तस्य (विष्णो = व्यापकस्येश्वरस्य) प्र०—अत्र 'गै शब्दे' इत्यस्माद् 'घञर्थे कविधानम्' इति कर्मणि क ६ ३ बहुभि स्तुतस्य (सज्जनस्य) ३ ६ ४ बहुधा प्रशसितस्य (परमेश्वरस्य) १ १५४ ६ **उरुगायः**=यो बहूनर्थान् वेदद्वारा गायत्युपदिशति स (विष्णु =परमेश्वर) ५ १८ य उरुभिर्बहुभिर्मन्त्रैर्गीयते स्तूयते वा स (परमेश्वर) १ १५४ १ बहुभि स्तुत (अलविद्यो जन) २ १ ३ **उरुगायाय**=बहुप्रशसिताय (जीवनाय) १ १५५ ४ बहुप्रशसाय (विष्णवे= परमेश्वराय) ४ ३ ७ [उरूपपदे गै शब्दे (भ्वा०) धातोरण् प्रत्यय । 'आतो युक् चिण्कृतो' रिति युगागम । अथवा= उरु-गयपदयो समास । गय =अपत्यनाम निघ० २ २ धननाम निघ० २ १०. गृहनाम निघ० ३ ४ अथवा= उरूपपदे गायते 'घञर्थे कविधानमि' ति कर्मणि क । उरुगायस्य विष्णोर्महागते नि० २ ८]

उरुगाया बहुप्रशसौ (अध्यापकोपदेशकौ) ४ १४.१. [उरूपपदे गै शब्दे (भ्वा०) धातो 'घञर्थे कविधानमि' ति कर्मणि क]

उरुचक्रयः बहुकर्त्तारो महापुरुषार्थिन (विद्वज्जना) ५ ६७ ४ **उरुचक्रिः**=बहुकर्त्ता (विद्वज्जन) २ २६ ४ [उरु-चक्रिपदयो समास । उरु बहुनाम निघ० ३ १ चक्रि =डुकृञ् करणे (तना०) धातो 'किकिनावुत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' अ० ३ २ १७१ वा० सूत्रेण कि प्रत्ययो लिट्वच्च कार्यम्]

उरुचक्षसम् उरु बहुविध वेदद्वारा चक्ष आख्यान यस्य तम् (परमेश्वरम्) १ २५ ५ उरुषु बहुषु चक्षो विज्ञान प्रकाशन वा यस्य त कर्मकर्त्तरि जीवम् १ २५ १६ **उरुचक्षसः**=बहुदर्शनान् (नॄन्=उत्तमविदुष) ६ ५१ ९ **उरुचक्षसा**=उरु बहु चक्षो व्यक्त वचन दर्शन वा यस्यास्तया (वाचा विद्युता वा) ४ २३ [उरु-चक्षस्पदयो समास । उरु बहुनाम निघ० ३ १ चक्षस्=चक्षिङ् व्यक्तायां वाचि दर्शनेऽपि (अदा०) धातो असुन् प्रत्यय । 'चक्षिङ ख्याञ्' इति ख्याञादेशे प्राप्ते 'असनयोश्च प्रतिषेधो वक्तव्य' अ० २ ४ ५४ वा० सूत्रेण प्रतिषेध]

उरुचक्षाः उरूणि बहूनि चक्षासि दर्शनानि यस्मात् स (सूर्य =सविता) ७ ३५ ८ [उरु-चक्षस्पदयो समासः, । चक्षस्पूर्वपदे व्याख्यातम्]

उरुञ्जयसम् बहुवेगवन्तम् (अग्निम्) ५ ८ ६

उरुञ्जयः बहुगन्तार (देवा =विद्वज्जना) ७ ३९ ३ [उरुञ्जय बहुजवा नि० १२ ४३ उरूपपदे जवतिगतिकर्मा (निघ० २ १४) धातोर्बाहुलकाद् ड्रि प्रत्यय]

उरुधारा उर्वी धारा विद्यामुशिक्षाधारणा यस्या सा (पत्नी) ८ ४२ [उर्वी-धारापदयो समास । पूर्वपदस्य पुवद्भाव । धारा वाङ्नाम निघ० १ ११]

उरुप्रथाः बहु प्रथ सुखस्य विस्तारो यस्मात् स, (घर्म =यज्ञ), प्र०—उर्विति बहुनामसु पठितम् निघ० ३ १, १ २२ बहुविस्तार (इन्द्र =सूर्य) २० ३९ [उरु-प्रथपदयो समास । उरु बहुनाम निघ० ३ १ प्रथ =प्रथ प्रख्याने (भ्वा०) धातो. 'घञर्थे कविधानमि' ति क]

उरुव्यचसम् बहुषु सद्गुणेषु व्यापकम् (इन्द्र= धार्मिक राजानम्) ६ ३६ ३ उरुव्यचस =बहुव्यापकस्य (अग्ने =पावकस्य) २७ १६ **उरुव्यचसे**=बहुषु विद्यासु

उलूखलक उलूखल कायति शब्दयति यस्तत्सम्बुद्धौ विद्वन् (जन) १ २८ ५ [उलूखलोपपदे कै शब्दे (भ्वा०) धातो क प्रत्यय । उलूखल पूर्वपदे व्याख्यातम् । उलूखल पदनाम निघ० ५ ३]

उलूखल सुतानाम् उलूखलेन सम्पादितानाम् (पदार्थानाम्) प्र०—उलूखलशब्दार्थं यास्कमुनिरेव समाचष्टे—उलूखलमुरुकरं वोर्कर वोर्ध्वख वोरु मे कुर्वित्यब्रवीत् तदुलूखलमभवत्, उरुकर चैतदुलूखलमित्याचक्षते, नि० ९ २०, १ २८ ४ [उलूखल-सुनपदयोः समास । उलूखल व्याख्यातम् । सुत =षु प्रसवैश्वर्य (अदा०) धातो क्त]

उल्काः विद्युत ४ ४ २ विद्युत्पाता· १३ १० [उष दाहे (भ्वा०) धातो 'शुकवल्कोल्का' उ० ३ ४२ सूत्रेण कक् प्रत्ययान्तो निपात्यते । षकारस्य लत्वम् । ओषति दहतीति विग्रह]

उल्वम् बलम् १० ८ आवरणम् १९ ७६ [उल्व पदनाम । निघ० ४ ३ उच समवाये (दिवा०) धातो 'उल्वादयश्च' उ० ४.९५ सूत्रेण वन् प्रत्यय । निपातनाच्चकारस्य लत्व गुणाभावश्च । उल्व ऊर्णोतेर्वृणोतेर्वा नि० ६ २५ उल्व धृत श० ६ ६ २ १५ उल्व वाऽऊषा ७ ३ १ ११]

उवाच उच्यात् ५ २ ८ वक्ति २ ३० २ [वच परिभाषणे (अदा०) धातोर्लिट्]

उवास वसति १ ४८ ३ वस १ ११३ १३ [वस निवासे (भ्वा०) धातोर्लिट् । 'लिट्यभ्यासस्य०' इति सम्प्रसारणम्]

उवाह वहति १ ११६ १८ [वह प्रापणे (भ्वा०) धातोर्लिट । लिटि अभ्यासस्य सम्प्रसारणम्]

उवोच वदति ७ ४ ३ उच्यात् ७ २१ १ **उवोचिथ**= उपदिश ७ ३८ ३ [उच समवाये (दिवा०) धातोर्लिट् । अत्र व्यक्तायां वाचि धातूनामनेकार्थत्वात् । अथवा वच परिभाषणे (अदा०) धातोर्लिट् । धातोरकारस्यौकारश्छान्दस]

उशतः कामितान् (दिव्यान् गुणान्) प्र०—अत्र 'कृतो बहुलम्०' इति कर्मणि लट स्थाने शतृ-प्रत्यय १ १२ ४ कामयमानान् (पितॄन्=जनकादीन्) १९ ७० विद्यादिसद्गुणान् कामयमानान् (देवान्=विदुषो गृहस्थान्) ८ १९ [वश कान्तौ (अदा०) धातोर्लट स्थाने शतृप्रत्यय) 'कृतो बहुलमि' ति कर्मणि शतृ । धातोर्ग्रह्यादिसूत्रेण सम्प्रसारणम्]

उशती कामयमाना (जाया=हृद्या स्त्री) ४.३ २ कामयमाने (अध्यापिकोपदेशिके) ३ ३३ १ कामना करती हुई (जाया=स्त्री) स० प्र० ९०.१० ७१ ४ **उशतीम्**= कामयमानाम् (मनीषा=प्रज्ञाम्) ६ ४७ ३ **उशतीः**= कामयमाना (मातर) ३६ १५ स्वस्वधारणगुण प्रकाशयन्ती (पत्नी=पृथिव्यादिद्रव्यम्यशक्तय इव) १.२२ ९ कमनीया· (ऊर्म्या =रात्री) २ ४ ३ [वश कान्तौ (अदा०) धातो शत्रन्तान् ङीप् । उशती उशत्यौ कामयमाने नि० ९ ३९ कामयमाना नि० १ १९]

उशतीव कामयमाना स्त्रीव १ ३२ १० [उशतीइवपदयो समास]

उशते कामयमानाय (ईश्वराय) ४ १७ १७ उशद्भि =कामयमानै (ज्ञानिभिर्जनकै) १९ ५१ **उशद्भ्यः**=त्वत्पदार्थान् कामयमानेभ्य (देवेभ्य = शत्रुभ्य) १ १६२ ११ सत्पुरुषेभ्य २५ ३४ **उशन्**= कामयमान (इन्द्र=राजन्) ४ २० ४ कामयन् (मित्र) ४ २७ [वश कान्तौ (अदा०) धातोर्लट शतृ । उशत कामयमानान् नि० ६ १३ उशन्नुशन्तमिति प्रिय प्रियमित्येवैतदाह श० ३ ३ ३ १० वायुर्वा उशन् ता० ७ ५ १९]

उशधक् य उशान् युद्ध कामयमानान् दहति स (इन्द्र =राजा) ३ ३४.३ उश. कमनीयान् दहति येन स (अग्नि) ३ ६ ७ कामयमान (अग्नि =उत्तमो राजा) ७.७ २ य उशन्ति परस्व कामयन्ति तान् दहति स (सभेश) ३३ २६ [उशोपपदे दह भस्मीकरणे (भ्वा०) धातो क्विप् । उश =वश कान्तौ (अदा०) धातोरिगुपधलक्षण क प्रत्यय । धातो सम्प्रसारणम्]

उशना सर्वहितड्कामयमान (परमेश्वर) ४ २६ १ कान्तियुक्त (विद्वान्) १ १३० ९ कामयिता (विद्वज्जन) १ ८३ ५ धर्मकामुक (प्रजापालको राजा), प्र०—अत्र डादेश १ १२१ १२ **उशनाः**=कामयमाना (विद्वज्जना) ५ ३१ ८ **उशने**=कामयमाने (काव्ये) १ ५१ ११ [वश कान्तौ (अदा०) धातो 'वशे कनसि' उ० ४ २३९ सूत्रेण कनसि । वष्टि कामयते स इति विग्रह । 'ऋदुशनस्०' अ० ७ १ ९४ सूत्रेणानङ् आदेश सौ]

उशनेव यथाकाम (उपदेशको जन) ४ १६ २ [उशना-इवपदयो समास]

उशन्तम् कामयन्तम् (स्योनम्=सुखम्) ४ २७ कामयमान (पति) १ ७१ १ **उशन्तः**=शृण्वन्त श्रावयन्त (जना) ऋ० भू० २६५ सन्तानो की कामना करते हुए

उर्वरासाम् बहुश्रेष्ठाना भूमीनाम् ६ २० १ बहुश्रेष्ठा पदार्था सन्ति यस्या ता भूमिं सनति तम् (प्रजाजनम्) ४ ३८ १ **उर्वरासु**=सुन्दरवर्णयुक्तासु (वाणीषु) १ १२७ ६ पृथिव्यादिनिमित्तेषु ६ २५ ४. भूमिषु ४ ४१ ६

उर्वर्याय उरूणा महतामर्य्याय स्वामिने (पुरुषाय) १६ ३३ [उरु-अर्यपदयो समास । उरु बहुनाम निघ० ३ १ ऊर्णुञ् आच्छादने (अदा०) धातो 'महति ह्रस्वश्च' उ० १ ३१ सूत्रेण कु प्रत्यय । अर्य =अर्य स्वामी वैश्ययो' सूत्रेण स्वामिन्यभिधेये ऋ गतौ (भ्वा०) धातोर्यत् प्रत्ययो निपात्यते]

उर्वशी ययोरूणि बहूनि सुखान्यश्नुवते सा यज्ञक्रिया, प्र०—उर्वशीति पदनामसु पठितम् निघ० ५ ५, उर्विति बहुनामसु पठितम् निघ० ३ १ तस्मिन्नुपपदे अशूङ् धातो 'सपदादिभ्य क्विप्' तत शार्ङ्गरवाद्यन्तर्गतत्वात् ङीन् ५ २ उरु बहु अश्नाति यया सा दीप्ति १५ १९ उरवो बहवो वशे भवन्ति यया सा वाणी प्र०—उर्वशीति पदनामसु पठितम् निघ० ४ २, ५ ४१.१९ बहुवशकर्त्री प्रज्ञा ५ ४१ १९ **उर्वशीः**=बहु व्यापिका (क्रिया) ४ २ १८ **उर्वश्याः**=विशेषविद्याया ७ ३३ ११ [उर्वशी पदनाम निघ० ५ ५ उरूपपदे अशूङ् व्याप्तौ (स्वा०) अश भोजने (क्र्या०) धातोर्वा 'सपदादिभ्य क्विप्' इति स्त्रिया क्विप् । तत स्त्रिया ङीन् । अथवा उरूपपदे अशूङ् व्याप्तौ (स्वा०) धातो 'सर्वधातुभ्य इन्' उ० ४ ११८ सूत्रेण इन् । तत स्त्रिया 'कृदिकारादक्तिन' अ० ४ १ ४५ वा० सूत्रेण ङीप् । उर्वशी अप्सरा । उर्वभ्यश्नुते, उरुभ्यामश्नुते, उरुर्वा वशोऽस्या नि० ५ १३]

उर्वारुकमिव यथोर्वारुकफलम् पक्वं भूत्वामृतात्मकं भवति तथा ३ ६० यथोर्वारुकफलम् ७ ५९ १२

उर्विया पृथिव्याम् ३ १ १८ पृथिव्या, प्र०—उर्वीति पृथिवीनाम निघ० १ १, १ १२४ १ उर्व्या पृथिव्या सह, प्र०—अत्रोर्वीशब्दात् टास्थाने डियाजादेश १ ९२ ९ बहुरूपया दीप्त्या ६ ६ ४ बहुरूप (विद्वज्जन) २ ३५ ८ बहुपुरुषार्थयुक्ता (स्त्री) ६ ६४ ३ बहुत्वेन २९ ३० [उर्वी पृथिवी नाम निघ० १ १ तत 'टास्थाने डियाजादेश 'इयाडियाजीकाराणामुपसख्यानम्' अ० ७ १ ३९ वा सूत्रेण । उर्विया उरुत्वेन नि० ८ १०]

उर्वी बहुफलादियुक्ते (रोदसी=द्यावापृथिवी) ७ १८ २४ बहुरूपे द्यावापृथिव्यौ १ ६१.८ बहुपदार्थधरे (रोदसी=सूर्यभूलोकौ) ४ ४२ ३ बहुले (रोदसी=प्रकाशाऽप्रकाशे जगती) ३ ५६ ७ महती (मही=पृथिवी) ३ ३८ ३ विस्तीर्णा (पृथ्वी) १ १८९ २ बहुत्वे (पृथिवी द्यौश्च) ६ ६८ ४ बहुफलाद्युपेता (भूमि) ६ ४७ २० **उर्वीम्**=विस्तृताम् (क्षा=भूमिम्) ६ १७ ७ बहुपदार्थयुक्ताम् (पृथिवी=भूमिम्) ७ ३८ २ महतीम् (अध्यापिकोपदेशिकाम्) ३ ३३ ३ उर्वी =बहुस्वरूपे (सूर्यभूमी) ३ ६ १० षड्विधा भूमी ६ ४७ ३ बहुसुखप्रदा प्रजा ३ ३३ ६ बह्वी पृथिवी १ ८ ७ **उर्व्या**=महत्या पृथिव्या सह १२ १ बहुरूपयोत्तमफलप्रदया पृथिव्या सह १४ ८ **उर्व्याः**=पृथिव्या १ १४६ २ **उर्व्यै**=बहुरूपायै (दिशे) २२ २७ [ऊर्णुञ् आच्छादने (अदा०) धातो 'महति ह्रस्वश्च' उ० १ ३१ सूत्रेण कुप्रत्यये=उरु । ततो ङीषि उर्वी । उर्वी नदीनाम निघ० १ १३ उर्व्य ऊर्णोते, वृणोतेरित्यौर्णवाभ नि० २ २६ पृथिवीनाम निघ० १ १ द्यावापृथिवीनाम निघ० ३ ३० ययेथ पृथिव्युर्वी एवम् उरुर्भूयासम् श० २ १ ४ २८]

उलप्याय उलपे उत्क्षेपणे साधवे (जनाय), प्र०—अत्रोलश्चौरादिकाद्धातोरौणादिकोऽपन् प्रत्यय १६ ४५ [उलपप्राति० 'तत्र साधु' रित्यर्थे यत् । उलप =वल सवरणे (भ्वा०) 'विटपविष्टपविशिपोलपा' उ० ३ १४५ सूत्रेण कपन् प्रत्यपान्तो निपात्यते । धातोरादेश्च सम्प्रसारणम्]

उलः क्षुद्रकृमि २४ ३१

उलूकः उलूक २४ ३८ [वल सवरणे (भ्वा०) धातो 'उलूकादयश्च' उ० ४ ४१ सूत्रेण ऊकप्रत्ययान्तो निपात्यते]

उलूखलः बहुकार्यकरेण साधनेन, प्र०—अत्र 'सुपा सुलुक्०' इति तृतीयैकवचनस्य लुक् १ २८ ६ [उरूपपदे डुकृञ्करणे (तना०) धातो 'कृञो हेतुताच्छील्यानुलोम्येषु' अ० ३ २ २० सूत्रेण टप्रत्यये, उकारस्य दीर्घे, रेफयोर्लत्वे ककारस्य खकारश्च वर्णव्यत्ययेन । लत्वम्, ककारस्य खकारश्च वर्णव्यत्ययेन । उलूखलम् उरुकर वोर्ककर वोर्ध्वख वोरु मे कुर्वित्यब्रवीत्तदुलूखलमभवत् । उरुकर चैतत्तदुलूखलमित्याचक्षते परोक्षेणेति च ब्राह्मणम् नि० ९ २० (प्रजापतिरब्रवीत्) उरु मे करदिति तस्माद् उरुकरमुरुकर ह वै तदुलूखलमित्याचक्षते परोऽक्षम् श० ७ ५ १ २२ अन्तरिक्ष वोलूखलम् श० ७ ५ १ २६ योनिरुलूखलम् श० ७ ५ १ ३८]

उपसाम्=प्रत्यूप कालानाम् २ २८ २ प्रभातवेलानाम् ६ ४७ ५ **उपसि**=दिने ४ २ ८ **उपसे**=प्रात:कालाय १ ११३ १ **उषः**=उषर्वद् वर्त्तमाने विदुषि (स्त्रि) १ ११३ १२ उषर्वत् सर्वरूपप्रकाशिके विदुषि स्त्रि १ ४८ १६ उषा इव कमनीये स्त्रि १ ४८ ६ हे दाहगुण-युक्तोषर्वत् स्त्रि १ ४८ २ उपस १ ४८ ४ उषा., प्र०—अत्र 'सुपा सुलुग्०' इति विभक्तेर्लुक् १ ५७ ३ उषर्व-द्विद्याप्रकाशयुक्ते स्त्रि १ १२४ २ उषा इव शुम्भमाने (स्त्रि) ४ ५२ ३ **उषाः**=सुप्रभात १ ११३ ४. दिननिमित्त प्रकाश १ ११३ ८ प्रातर्वेलेव ४ ३० १० प्रबोधदात्री १ ४८ ५ सुशोभा कान्ति १ ४८ ७ दाहनिमित्तशीला १ ४६ १ दाहाऽऽरम्भनिमित्ता १ ११३ ५ सूर्याचन्द्रमसो प्रात प्रकाश १ ४६ १४ प्रभावती १ ४८ ३ उषर्वत् प्रकाशिका (स्त्री) १ ४८ १५ [उष दाहे (भ्वा०) धातो 'उष किच्च' उ० ४ २३४ सूत्रेणासि प्रत्यय. किच्च। ओषति दहतीति विग्रह। स्त्रियाम् उषा। तत्र इगुपध-लक्षणे क-प्रत्यये स्त्रिया टाप्। उषा पदनाम निघ० ५ ५ निघ० ५ ६ उपस् उच्छतीति सत्या रात्रे पर काल नि० २ १८ उषा वष्टे कान्तिकर्मण, उच्छतेरितरा माध्यमिका नि० १२ ५ रात्रिर्वा उषा तै० ३ ८ १६ ४ योषा सा एका ऐ० ३ ४८ भूताना पतिर्गृहपतिरासीदुषा पत्नी श० ६ १ ३ ७]

उषसः दाहाऽऽदिकर्त्तॄन् पदार्थान् १ १३४ ३ [उषस व्याख्यातम्]

उषसा रात्रिदिने ५ १ ४ प्रात साय सन्धिवेले ३ १४ ३ [व्याख्यातम् उपसम्। 'सुपा सुलुक्०' इत्याकारा-देश]

उषसौ रात्र्यहनी, अ०—स्त्रीपुरुषौ ३ ४ ६ [उषस व्याख्यातम्]

उषस्याः उषोदेवताका, भा०—उषोगुणा पशव पक्षिणश्च २४ ४ [उपस व्याख्यातम्। तत्र भवार्थे यत् प्रत्यय]

उषः मुखे निवासिनि विदुषि (स्त्रि), प्र०—अत्र 'वस निवासे' इत्यस्माद्धातोरौणादिकोऽसुन् स च बाहुलकात् कित् १.११३ ७

उषाणः दहन् (सैन्यपुरुष) ४ १६ १४ [उष दाहे (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपदम्। 'बहुल छन्दसी' ति शपो लुक्]

उषाभ्याम् उभयवेलाभ्याम्, प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति सलोप २१ ५० [उषसिति व्याख्यातम्]

उषाम् उपस प्रभातवेलाम् १ १८१ ६ [उष दाहे (भ्वा०) धातोरिगुपधलक्षण क। स्त्रिया टाप्]

उषासम् उपस प्रभातसमयम्, प्र०—अत्र 'अन्ये-षामपि०' इति दीर्घ १५ २४ दिनमुख प्रभातम् ६ ३० ५ **उषासः**=प्रभातवेला इव शोभमाना (विदुष्य स्त्रिय) प्र०—अत्र 'वाच्छन्दसि' इत्युपधादीर्घ ७ ४१ ७ प्रभात-वाता १ १३४ ४ प्रत्यूषसमया १ १२३ २ [उपसमिति व्याख्यातम्। उपधादीर्घश्छान्दस]

उषासा प्रात सायवेले २६ ६ प्रभाते २० ६१ [उप-समिति व्याख्यातम्। 'सुपा सुलुक्०' इत्याकारादेश]

उषासौ रात्रिदिने इव (अध्यापकोपदेशकौ) १.१८८ ५ प्रात सायवेले, प्र०—अत्र 'अन्येषामपि०' इत्युपधादीर्घ २१ ५० [उपसमिति व्याख्यातम्]

उषासानक्ता उषाश्च नक्तञ्च ते २० ४४ प्रत्यूप-रात्र्यौ २ ३१ ५ रात्रिदिने ५ ४१ ७ भा० अहोरात्रौ २८ ३७

उषे दहनकर्त्र्याविव स्त्रियौ २१ १७ काम दहन्त्यौ (सुपेशसा=सुखरूपे स्त्रियौ) २१ ३५ प्रतापयुक्ते (प्रात सायवेले) २८ ६ [उष दाहे (भ्वा०) धातोरिगुपधलक्षण क। स्त्रिया टापि सम्बुद्धौ रूपम्]

उष्णन् दहन् (अग्नि=वह्नि) २ ४७ [उष दाहे (भ्वा०) धातो शतृ। विकरणव्यत्ययेन श्ना]

उष्णिक् यद् दु खानि दहति तम् (वय=पराक्रमम्) १४ १० स्नेहनम् १४ १८ **उष्णिहम्**=उष्णिहा प्रति-पादितम् (इन्द्रिय=जीवस्य लिङ्गम्) २८ २५ **उष्णिहा** यया उप स्निह्यति तया (क्रियया) २३ ३३ **उष्णिहे**=उत्कृष्टतया स्निह्यति यया तस्यै क्रियायै २४ १२ **उष्णिहा**=छन्दोविशेष २१ १३ [उत्पूर्वात् ष्णिह प्रीतौ कान्तौ (दिवा०) धातो 'ऋत्विग्दधृग्०' अ० ३ २ ५९ सूत्रेण क्विन्। निपातनाद् उपसर्गान्तलोप पत्व च। उष्णिक् उष्णिगुत्स्नाता भवति। स्निह्यतेर्वा स्यात्कान्ति-कर्मण। नि० ७ १२ उष्णिगुत्स्नातात् स्निह्यतेर्वा कान्ति-कर्मणोऽपि वोष्णीषिणो वेत्यौपमिकम्। दे० ३ ४ यस्य सप्त ता उष्णिहम् कौ० ६ २ अष्टाविंशत्यक्षरोष्णिक् कौ० २६ १ आयुर्वा उष्णिक् ऐ० १ ५ ग्रीवा उष्णिह श० ८ ६.२ ११ चक्षुरुष्णिक् श० १० ३ १ १ पशवो वा उष्णिक् ता० ८ १०.४ अजाविकमेवोष्णिक् कौ० ११ २ औष्णिहो वै पुरुष ऐ० ४ ३]

(स्त्रीपुरुष) स० वि० १३६, अथर्व० १४ २ ३८ कामयमाना (जनकादय) १६ ७० [वश कान्तौ (अदा०) धातोर्लट शतृप्रत्यय]

उशन्ता कामयमानौ (स्त्रीपुरुषौ) ७ ४२ ५ [वश कान्तौ (अदा०) धातो शतृप्रत्यय]

उशन्ति प्रकाशन्ते, कामयन्ते १ २ ४ भा०—साक्षात्कर्तुं प्रयतन्ते ७ ८ [वश कान्तौ (अदा०) धातोर्लट्। ग्रह्यादिसूत्रेण सम्प्रसारणम्]

उशमानः कामयमान (इन्द्र=राजा) ४ १६ ४ [वश कान्तौ (अदा०) धातो शानच्। व्यत्ययेनात्मनेपद शप्रत्ययश्च]

उशानः कामयमान (विद्यार्थिजन) ४ २३ १ [वश कान्तौ (अदा०) धातो शानच्। व्यत्ययनात्मनेपदम्]

उशिक् कामयमान (राजा) ८ ५० सत्यङ्कामयमान (अग्नि=भौतिकोऽग्निरिव राजा) १ ६० ४ कमिता (अग्नि=विद्वज्जन) ३ ३ ७ कान्तिमान् (भगवान्) ५ ३२ सर्वप्रिय, कमनीयस्वरूप अर्थात् सब लोगो का चाहने योग्य (ईश्वर) आर्याभि० २ १७, ५ ३२ **उशिग्भिः**=कामयमानैर्वीरैः (राजपुरुषैः) ३ ३४ ४. **उशिजम्**=सद्गुणप्रचार कामयमानम् (अध्यापकम्) ३ २७ १० **उशिजः**=मेधाविन (यजमाना=सङ्गन्तारो जना) प्र०—उशिगिति मेधाविनाम निघ० ३ १५, १२ २८ कामयमानान् (प्रजाजनान्) ३ १५ ३ कामयमाना (गोपालका जना) ४ १६ ६ कामयितार (राजाप्रजाजना) १ ६० २ कमनीयान् (देवान्=विदुषो जनान्) ६ ७ कमनीया (विद्युद्द्यौमसूर्यरूपेण ज्योतीषि) ३ २ ६ कमितार (मनीषिणो जना) २ २१ ५ [वश कान्तौ (अदा०) धातो 'वश किन्' उ० २ ७१ सूत्रेण 'इजि' प्रत्यय किच्च। उशिक् कान्तिकर्मा निघ० २ ६ उशिज=मेधाविनाम निघ० ३ १५ उशिग्वष्टे कान्तिकर्मण निं० ६ १०]

उशेन्यः कमनीय (राजा) ७ ३ ६ [वश कान्तौ (अदा०) धातो कृत्यार्थे केन्य प्रत्यय। धातो सम्प्रसारणम्]

उश्मसि कामयेमहि १ ६४ ३ कामयामहे, प्र०—अत्र 'इदन्तो मसि' इति मसेरिदन्ताऽऽदेश १ २१ १ प्रकाशयितु प्राप्तु वा कामयामहे १ २२ ६ उश्म कामयामहे ६ ३ [वश कान्तौ (अदा०) धातोर्लट्। 'इदन्तो मसि' रिति मस इदन्तत्वम्। कामयामहे नि० २ ७. उश्मसि कान्तिकर्मण निघ० २.६]

उषद्भिः य उषन्ति हविर्दहन्ति तैर्यजमानै २६ ३७ ईश्वरादिपदार्थविद्या कामयमानैर्विद्वद्भि सह १ ६ ३. [उष दाहे (भ्वा०) धातो शतृ। व्यत्ययेन श]

उषमाणः दहन् (राजा) ४ २२ २ [उष दाहे (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपद शप्रत्ययश्च]

उषर्बुधम् य उषसि बोधयति तम् (अग्नि=वह्निम्) ३ २ १४ य उषसि बुध्यते तम् (द्विजम्) ४ ६ ८ **उषर्बुधः**=उषसि बोधयुक्ता (हसास=अश्वा) ४ ४५ ४ रात्रिचतुर्थप्रहरे जागृता (सज्जना) १ १३२ २ य उषसि स्वय बुध्यन्ते, सुतान् बोधयन्ति तान् (देवान्=विदुषो जनान्) १ ४४ १ य उष काल बोधयन्ति तान् किरणान् १ ६२ १८ उप सम्प्राप्य बोधयन्ति तान् (देवान्=दिव्यान् भोगान्) १ १४ ६ उषसि बोधयुक्ता (हसास=अश्वा) ४ ४५ ४ **उषर्बुधे**=प्रत्युष काले जागरूकाय (अग्नये=विद्युते) १ १२७ १० [उषस्-उपपदे बुध अवगमने (भ्वा०) धातोरिगुपधलक्षण क प्रत्यय। अन्तर्भावितण्यर्थ]

उषर्भुत् य उषसि बुध्यते (अतिथिर्जन) ६ ४ २ य उषसि सर्वान् बोधयति स (अग्नि=विद्युदाद्यग्नि) प्र०—अत्रोषरुपपदाद् बुधधातो क्विप् 'वशो भप्०' इति भत्वञ्च १ ६५ ५ [उषस् उपपदे बुध अवगमने (भ्वा०) धातो क्विप्। 'कृतो बहुलमि' ति कर्तृभिन्नेष्वपि कारकेषु क्विप्]

उषसम् प्रात कालम् १ ४४ ८ दिनम् ३ ३२ ८ प्रभातकालम् ३ २० १ सन्धिवेलाम् १ ११५ २ रात्र्यन्तसमयम् १ ७१ १ प्रत्युष कालम् १ ५६.४ प्रत्यूष कालम् २ १२ ७ प्रभातसमयम् १ ११३ ११ **उषसः**=दिवसानि १ ६० ७ दिवसस्य ७ ३६ २ दिवसमुखस्य ४ १४ १ प्रभातवेला इव स्त्रिय १ ११३ २० प्रभातवेलाया दिनमिव ४ २ १५ प्रभाता इव १ ७६ १ प्रात कालीना सूर्यस्य रश्मय १ ६२ २ प्रात कालस्था प्रकाशा १ ६२ १ प्रातर्वेला इव ४ ५१ ३ प्रात कालस्य मध्ये १ १३१ ६. प्रात साय समयान्, भा०—प्रभातस्य १५ ३७ प्रातकालात् १ ४४ १ प्रातर्मुखानि दिनानि १३ २८ प्रत्यूषकालमिव सत्पुरुषान् ३ ४४ २ प्रकाशकर्त्र्यो वेला ३ १७ ३. उष काल से स० वि० १३८, अथर्व० १४ २ ३१ प्रात काल की वेलाओ को स० प्र० ११०, ऋ० १ १७६ १ **उषसा**=रात्र्यवसानोत्पन्नया दिवसहेतुना ३.१० दिनप्रमुखेन १ ६२ ५ दिनेन सह १ ७३ ७ प्रातकालेन युक्तया क्रियया १ ४४ २ प्रकाशेन १ ४४ १४

३ ४३ ८ अतिशयेन गुणप्राप्तये १ ४८ १४ ऐक्यभाव-प्रवेशाय ३५० ५ रक्षणाद्यर्थाय १ १०६ १ रक्षादिव्यवहार-सिद्धये ५ ४६ ३ रक्षार्थम् १ १०४ २ रक्षणाद्याय पुष्टये १ ८ १ रक्षणाय, स्वामित्वप्राप्येत क्रियोपयोगाय वा १ ६ ६ क्रियासिद्धीच्छायै १ २३ ३ प्रीतये १ २२ ५ धनाढ्याय ७ ४४ १ प्रीत्याद्याय २७ ४१ **ऊतिभिः**=रक्षा-प्राप्ति-विज्ञान-सुख-प्रवेशनै १ ७ ४ अन्वेषणादिरक्षा-दिभि ५ ३३ ७ रक्षाप्रीतितृप्त्यवगमप्रवेशयुक्ताभि (क्रिया-भि) १ ३२ ८ रक्षणादिकर्त्तृभि सेनाभि २ ११ १६ **ऊतिम्**=रक्षा, प्रीतिमवगम च १ १० १०. **ऊतिः**=रक्षणादियुक्ता नीति १ ११७ १६ रक्षणादिका (क्रिया) १ ६३ ६ [अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेश-श्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादान-भागवृद्धिषु (भ्वा०) धातो 'ऊतियूति०' अ० ३ ३ ६७ सूत्रेण क्तिन् निपात्यते। 'ज्वरत्वर०' अ० ६ ४ २०. सूत्रेण ऊठ्। ऊतिरवनात् निघ० ५ ३ ऊती ऊत्या च पथा (च) नि० १२ २१ ऊतय खलु वै ता नाम याभिर्देवा यजमानस्य हवमायन्ति। ये वै पन्थानो या सुतयस्ता वा ऊतयस्त उ एवैतत् स्वर्गयाणा यजमानस्य भवन्ति। ऐ० १ २]

ऊती ऊत्या रक्षणाद्यया क्रियया ४ १ ५ ऊतये रक्षणाद्याय, प्र०—अत्र 'सुपा सुलुग्०' इति चतुर्थ्या एक-वचनस्य पूर्वसवर्णादेश १ १०० १ ऊत्यै रक्षणाद्याय ४ २६ १ रक्षणादिव्यवहारसिद्धये १ १००.२ ऊत्या रक्षणाद्येन ४ २३ २ रक्षक (परमेश्वर) ऋ० भू० ३०८ ऊत्या रक्षणादिक्रियया ४ ३१ १ रक्षाद्यया क्रियया, प्र०—'सुपा सुलुग्०' इति पूर्वसवर्ण १८ ७४ रक्षाभि, प्र०—अत्र 'सुपा सुलुग्०' इति भिसो लुक् ४ ४१ ११ रक्षा के लिए आर्याभि० १ ३२, ऋ० १ ७ १० १५ सम्यग्रक्षया ७ १६ ११ ऊत्या रक्षणादिकर्मयुक्तया(क्रियया) १ १७८ १ व्यवहारविद्यारक्षे १ १८५ ६ ['ऊतय' पदे व्याख्यातम्]

ऊतीः रक्षाद्या क्रिया १ १३० ५ रक्षणाद्या १ ११६ ८ ['ऊतय' पदे व्याख्यातम्]

ऊत्या रक्षणादिसक्रियया १ १३५ ५ रक्षणेन ऋ० भू० २६० रक्षया ६ ४८ ६ ['ऊतय' पदे व्याख्यातम्]

ऊदिम वदेम १ १६१ १ [वद व्यक्तायां वाचि (भ्वा०) धातोर्यजादित्वात् किति सम्प्रसारणम्]

ऊधन् ऊधनि उषसि, प्र०—ऊध इत्युषसो नामसु पठितम् निघ० १ ८, १२ २० ऊधनि अवयवे ४ ७ ७ ऊधनि दुग्धाऽऽधारे १ १५२.६. आढ्ये धनाढ्ये (सदने=राज्ये) ४ १० ८ **ऊधनि**=रात्रौ, प्र०—ऊध इति रात्रि-नाम निघ० १ ७, २ ३४ २ उप ममये ५ ३४ ३ अत्र वर्णव्यत्ययेन सस्य न ३.२६ १४ उपसि १.५२.३ **ऊधनः**=विगतीर्णबलान् (पुरुषान्) ४ २२.६ **ऊधः**=पयोधिकरणम् २ ३४ १० दुग्धाऽधिकरणम् १ ६६ २ दुग्धाऽऽधारम् ७ ५६.४ स्तनाऽऽधार २.१४ १० जलाऽऽ-धार धनसमूहम् ५.३२ २ जलस्थानम् १ १४६ २ रात्री ३ १ ६ उषा ३ ५५ १३ उपसम् १ ६४.५ उत्कृष्टम् (सोम=दुग्धादिरसम्) ४.२३ १ ऊर्ध्वं गमयिता (विद्वज्जन) ५ ४४ १३ [वह प्रापणे (भ्वा०) धातो-र्बहुलकाद् औणादिकोऽसुन्। धातो सम्प्रसारणे कृते दीर्घत्व धकारश्चान्तादेश वर्णव्यत्ययेन सस्य नकार। ऊधस् रात्रिनाम निघ० १ ७ गोरूध उद्धततर भवति उपोनद्धमिति वा। स्नेहानुप्रदानसामान्याद्रात्रिरप्यूध उच्यते नि० ६ १६ ऊधा रात्रिनाम निघ० १.७]

ऊनम् अ०—बुद्धिबलशौर्यादिकमपर्याप्तम् ३ १७ न्यून (बलादि) आर्याभि० २.३३, ३.१७ [अवति रक्षादिक करोतीति विग्रहे अव रक्षणादिषु (भ्वा०) धातो 'इण सिञ्जि०' उ० ३ २ सूत्रेण नक् प्रत्यय]

ऊनयोः परिहीण क्षीण न्यून सम्पादये, ऊनये. प्र०—लुङ्प्रयोगोऽयम् १ ५३ ३. [ऊन परिहाणे (चुरा०) धातोर्लुङ्। 'नोनयतिध्वनयति०' अ० ३ १ ५१ सूत्रेण णिजन्ताद् धातोश्च्लेश्चङ प्रतिषेधे सिच्। आडभावश्च]

ऊपथुः वपेथाम् १.११६.११. वपेतम् १ ११७ ५ वपत १ ११७ १२ **ऊपिषे**=वपसि, प्र०—अत्र लडर्थे लिट् १ ३१ ६ [डुवप् बीजसन्ताने (भ्वा०) धातोर्लिट्। यजादित्वात् किति सम्प्रसारणम्]

ऊम् अप्यर्थे १ ३२ १५ अद्भुते १.११३ २ आश्चर्ये ३ ५७ ४ चार्थे १ ३६ १३ निश्चयार्थे १.३४ ११ वितर्के १ २६ ५. जिज्ञासने १ २८ ३]

ऊमाः कमनीया· (अभ्वा=किरणा) ३ ६ ८ सर्वस्य रक्षणादिकर्त्तार (आप्ता पुरुषा) ५ ५२ १२ रक्षादिकर्मकर्त्तार (विद्वज्जना) ३३ ८० **ऊमैः**=रक्षणादिभि १ १६६ ७ **ऊमासः**=रक्षणादिकर्त्तार (विद्वज्जना) १ १६६ ३ [अव रक्षणादिषु (भ्वा०) धातो 'अविसिवि०' उ० १ १४४ सूत्रेण मन् प्रत्यय किच्च। 'ज्वरत्वर०' सूत्रेण ऊठ्। ऊमा वै पितर प्रात सवने, ऊर्वा माध्यन्दिने, काव्यास्तृतीयसवने (ऊमा=ऋतुविक्षेप)

उष्णीष. शिरोवेष्टनमिव ३८ ३ [उत् पूर्वात् ष्णी वेष्टने (भ्वा०) धातोर्णिजन्ताद् बाहुलकाद् ईषन् प्रत्यय । उपसर्गान्तलोपश्च । उष्णीष स्नायते नि० ७ १२]

उष्णीषिणे प्रशस्तमुष्णीष शिरोवेष्टन विद्यते यस्य तस्मै ग्रामण्यै भा०—प्रधानपुरुषाय १६ २२ [उष्णीष प्राति० अतिशायने इनि । उष्णीष पूर्वपदे व्याख्यातम्]

उस्रयाम्णे उस्रौ किरणैरिव यानेन याति तस्मै (जनाय) ४ ३२ २४ [उस्रोपपदे या प्रापणे (अदा०) धातोर्मनिन् प्रत्यय । 'उस्र' अग्रिमपदे द्रष्टव्यम्]

उस्रः रश्मिरिव (विद्वज्जन) १ ६६ ५ किरणान्, प्र०—उस्रा इति रश्मिनाम निघ० २ १५, ५ ४६ ३ किरणयुक्तानि दिनानि ७ १५ १८ गा प्र०—उस्रेति गोनाम निघ० २ ११, ३ ५८ ४ **उस्राः**=सूर्यकिरणा, १ ३८ रश्मीन् ४ ४५ ५ किरणा ४ १ १३ किरणान् ६ ३ ६ दिनानि ६ ५२ १५ गाव १ १२२ १४ रश्मय ४ २५ २ मूलराज्ये परम्परया निवसन्त (विद्वास) १ १७१ ५ [वस निवासे (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक् । कित्वात् सम्प्रसारणम् । उस्रा रश्मिनाम निघ० १ ५ गोनाम निघ० २ ११]

उस्रा रश्मयो विद्यन्ते ययोस्तौ (अश्विना=अन्तरिक्षविद्युतौ) ६ ६२ १ किरणवद्वर्त्तमानौ (अग्निवायू) २ ३६ ३ [उस्र इति व्याख्यातम् । ततो मत्वर्थे 'लुगकारेकाराश्च वक्तव्या' अ० ४ ४ १२८ वा० सूत्रेण अकारप्रत्यय]

उस्रा इव यथा किरणास्तथा १ ८७ १ [उस्रा व्याख्यातम् । उस्रा-इवपदयो समास]

उस्रि गवादियुक्तम् (भेषजम्=औषधम्) ५ ५३ १४ [उस्रेति गोनाम निघ० २ ११ ततो मत्वर्थ इकारप्रत्यय]

उस्रिकम् य उस्राभिर्गोभिश्चरति तम् (विद्वज्जनम्) १ १६० ५ [उस्रेति गोनाम निघ० २ ११ चरत्यर्थे ततष् ठन्प्रत्यय]

उस्रियः उस्रासु किरणेषु भव (वृषभ=मेघ) ५ ५८ ६ [उस्रेति रश्मिनाम निघ० १ ५ ततो भवार्थे घ प्रत्यय]

उस्रिया क्षीरादिप्रदा (गौ) ४ ५ ६ **उस्रियाणाम्**=गवाम् ४ ५८ रश्मीनाम् ५ ३० ४ किरणानाम् ५ ३० ११ **उस्रियाभिः** किरणै १ ६२ ३ **उस्रियायाम्**=पृथिव्याम् ३ ३० १४ गवि १ १८० ३ भूमौ ३ ३६ ६ **उस्रियायाः**=दुग्धदात्र्या धेनो, प्र०—उस्रियेति गोनाम निघ० २ ११, १ १५३ ४ धेनोर्गौ १ १२१ ५ **उस्रियासु**=पृथिवीषु ५ ८५ २ गोषु ४ ३१ भूमिषु २ ४० २. **उस्रियाः**=किरणा, प्र०—अत्र इयाडियाजीकाराणामुपसङ्ख्यानाम्, इत्यनेन शस स्थाने डियाजादेश, उस्रेति रश्मिनामसु पठितम् निघ० १ ५, १ ६ ५ उस्रासु रश्मीषु भवा विद्युत १ ११२ १२ पृथिव्या वर्त्तमाना (प्रजा) ४ ५० ५ किरणैस्सयुक्त (सूर्य) ३ १ १३ गाव किरणा ३ ३१ ११ ['उस्रिया' इति गोनाम निघ० २ ११ उस्रेति रश्मिनाम (निघ० १ ५) ततो भवार्थे य प्रत्यय । उस्राविषोऽम्या भोगा नि० ४ १६]

उस्रेव यथा गौस्तथा १ ६२ ४ [उस्रा इव पदयो समास]

उस्रौ रश्मिमन्तौ निवासहेतू सूर्य्यवायू, प्र०—उस्रेति रश्मिनामसु पठितम् निघ० १ ५ गोनामसु च निघ० २ ११, ४ ३३ [उस्रा रश्मिनाम गोनाम च । तत्र मत्वर्थे 'लुगकारेकाराश्च वक्तव्या' अ० ४ ४ १२८ वा० सूत्रेण अकार]

उहीत वहेत् ७.३७ ६ [वह प्रापणे (भ्वा०) धातोर्लिङ् । छान्दस रूपम्]

उहुवः भारवहा वोढार (हसास=अश्वा) ४ ४५ ४ [वह प्रापणे (भ्वा०) धातोश्छान्दस रूपम्]

उह्यमानः गम्यमान (इन्द्र=राजपुरुष) २ १८ ६ [वह प्रापणे (भ्वा०) धातो कर्मणि शानच्]

ऊचिम उच्याय १ १६१ १ **ऊचिषे**=वक्ति १२ ४६ उच्या ३ २२ ३ **ऊचुः**=वदन्ति ६ ४५ ८. वदन्तु ४ ३३ ६ [वच परिभाषणे (अदा०) धातोर्लिट्]

ऊचुषे वक्तुमर्हाय (श्रवसे=धनाय) १ १०३ ४. [वच परिभाषणे (अदा०) धातोर्लिट क्वसु]

ऊतयः रक्षा ४ ३१ १० रक्षका गुणा ३ १३ २ रक्षादिक्रियावन्त (जना) १ १३४ २ रक्षणादिका क्रिया १ ६१ ६ रक्षादय १ ५१ २ रक्षणादीनि कर्माणि १ ८४ २० रक्षणाद्या ५ ५४ ७ रक्षणानि १ ११ ३ रक्षा-विज्ञान-सुखप्राप्त्यादय १ ८ ६ अनन्तरक्षण तथा बलादि गुण आर्याभि० १ ४१, ऋ० १ ७ ६ ७ कमनीया रक्षादय प० वि० । रक्षा करने हारे (उपाय) आर्याभि० १ २६ रक्षादिक्रियावन्त (क्राणा=सज्जना) १ १३४ २ **ऊतये**=व्यवहार-सिद्धि-प्रवेशाय ३ ३६ ६ विद्याप्राप्ताय प्र०—अत्राऽवधातो प्रयोग 'ऊतियूति०' अ० ३ ३ ६७ अस्मिन् सूत्रे निपातित १ ४ १ विद्यादिशुभगुणप्रवेशाय

ऊर्जः ऊर्जयन्ति सर्वे पदार्था यस्मिन् स कार्त्तिक १४ १६ **ऊर्जाय**=बलाऽन्नोत्पादकाय कार्त्तिकाय २२ ३१ [ऊर्ज बलप्राणनयो (चुरा०) धातो क्विप्। ततो मत्वर्थे 'लुगकारेकाराश्च वक्तव्या' अ० ४ ४ १२८ वा० सूत्रेण अकार]

ऊर्जा वेगपराक्रमादिगुणयुक्ता (सहिता=विद्युत्) ३ २२ [ऊर्ज बलप्राणनयो (चुरा०) धातोर्बाहुलकाद् ओणादिकेऽन् प्रत्यये स्त्रिया टापि रूपम्]

ऊर्जा पराक्रमयुक्तानि कर्माणि, भा०—शरीरात्मबलानि १२ ६ [ऊर्ज बलप्राणनयो (चुरा०) धातोर्बाहुलकादौणादिकोऽन्। 'शेश्छन्दसि बहुलम्' अ० ६ १ ७० सूत्रेण शेर्लोप]

ऊर्जानी पराक्रमयुक्ता नीति १ ११६ २

ऊर्जाहुतयः ऊर्जा बल-प्राणनकारिका आहुतयो ग्रहणानि दानानि वा येषान्ते (ग्रहा=गृहाश्रमिणो जना) ६ ४ [ऊर्ज्-आहुतिपदयो समास। ऊर्ज् इति व्याख्यातम् आहुति=आङ्+हुदानादानयो (जु०) धातो क्तिन्]

ऊर्जाहुती सुसस्कृताऽन्नाऽऽहुती २८ ३६ अन्नस्याऽऽहुती २१ ५२ बलप्राणधारिके (उषासानक्ता=रात्रिदिने), बलस्याऽऽदात्र्यौ (रात्रिदिने) २८ १६ [ऊर्जाहुती ऊर्जाह्वान्यौ। द्यावापृथिव्याविति वाहोरात्रे इति वा शस्य च समा चेति कात्थक्य नि० ६ ४१ सिद्धि पूर्वपदे द्रष्टव्या]

ऊर्णम्रदाः य ऊर्णैराच्छादकैर्मृदन्ते ते (जना) २१ ५७ [ऊर्णोपपदे म्रद मर्दने (भ्वा०) धातोरच् प्रत्यय]

ऊर्णम्रदसम् ऊर्णानि धान्याच्छादनानि तुषाणि म्रदयन्ति येन त पाषाणमयम्, अ०—प्रस्तर उलूखलाख्य साधकोऽस्याऽन्ति तन्मात्तम् २ २ ऊर्णानि सुखाऽऽच्छादनानि म्रदयति येन त यज्ञम् २ ५ **ऊर्णम्रदाः**=य ऊर्णानाच्छादकानि मृदन्ति ते (मनुष्या) २१ ३३ य ऊर्णै रक्षकैर्मृदनन्ति (अर्का=मन्त्रार्थविदो जना) ५ ५ ४ ऊर्णमाच्छादन मृदनन्ति सन्त्वेषन्ति यया सा (ऊर्क्=शिल्पविद्या) ४ १० [ऊर्णोपपदे म्रद मर्दने (भ्वा०) धातोरमुन् प्रत्यय]

ऊर्णाम् आच्छादिकाम् (शत्रुसेनाम्) ४ २२ २ **ऊर्णाः**=रक्षिता (विदुषा सज्ञा) ५ ५२ ६ [ऊर्णुञ् आच्छादने (अदा०) धातो 'ऊर्णोतेर्ड' उ० ५ ४७ सूत्रेण ड प्रत्यय। स्त्रिया टाप्। ऊर्णा पुनर्वृणोतेरूर्णोतिर्वा नि० ५ २१]

ऊर्णायुम् अविम् १३ ५० [ऊर्णाप्राति० 'ऊर्णाया युस्' अ० ५ २ १२३ सूत्रेण मत्वर्थे युस्। 'सिति च' इति पदत्वाद् भत्वाऽभावात् 'यस्येति चे' ति लोपो न। ऊर्णा याति प्राप्नोतीत्यूर्णायुरिति विग्रहे ऊर्णोपपदे या प्रापणे धातो 'डुप्रकरणे मितद्वादिभ्य उपसख्यानम्' अ० ३ २ १८० वा० सूत्रेण डु प्रत्यय। इममूर्णायुमित्युर्णावलमित्येतद् श० ७ ५ २ ३५]

ऊर्णावन्तम् बहूर्णादिवस्त्रयुक्तम् (योनिं=गृहम्) ६ १५ १६ [ऊर्णा प्राति० भूम्न्यर्थे मतुप्]

ऊर्णासूत्रेण ऊर्णाकम्बलेनेव (भा०—साधनविशेषेण) १६ ८० [ऊर्णा-सूत्रपदयो समास। ऊर्णा व्याख्यातम्]

ऊर्णु आच्छादय १६ ५३ **ऊर्णुत**=आच्छादयत २ १४ ३ **ऊर्णुते**=आच्छादयति १ ६२ ४ **ऊर्णुवाथाम्**=आच्छादयताम् २ १६ प्राप्नुयाथाम् २३ २० **ऊर्णुषे**=स्वव्याप्त्याऽऽच्छादयसि ४ ५४ २ विस्तारयसि ३३ ५४ **ऊर्णोत्**=आच्छादयति स्वीकरोति वा १ ६८ १ **ऊर्णोति**=निष्पादयति १ १० ५ १५ [ऊर्णुञ् आच्छादने (अदा०) धातोर्लोट् लट् लेट् च]

ऊर्दरम् कुसूलम् २ १४ ११ [ऊर्क् पराक्रमं रस वा दृणातीति विग्रहे 'ऊर्जि दृणातेरलचौ' उ० ५ ४० सूत्रेण द विदारणे (क्र्या०) धातोरलचौ प्रत्ययौ। ऊर्दर कृदरमित्यावपनम्य, ऊर्दरमुदीर्ण भवति ऊर्ज दीर्ण वा नि० ३ २०]

ऊर्ध्वग्रावाणः मेघा ३ ५४ १२ [ऊर्ध्व=उच्छ्रितो भवति। ग्राव मेघनाम निघ० १ १० तयो समास]

ऊर्ध्वचितः ऊर्ध्व सचिन्वन्त (विद्वज्जना) १२ ४६ ऊर्ध्वानुत्कृष्टगुणान् चेतयन्ति ते मनुष्याश्चितानि कपालानि वा १ १८ [ऊर्ध्वोपपदे चिञ् चयने (स्वा०) धातो क्विप्]

ऊर्ध्वनभसम् ऊर्ध्व नभो जल यस्मात्तम्, अ०—त्वद्यज्ञशोधित जलमूर्ध्वप्रापकम् (मारुतम्) ६ १६ [ऊर्ध्वनभस्पदयो समास। ऊर्ध्व=उच्छ्रितो भवति नि० ८ १५ नभ=उदक नाम निघ० १ १२]

ऊर्ध्वपृश्निः ऊर्ध्व उत्कृष्ट पृश्नि स्पर्शो यस्य स (पशु पक्षी वा) २४ ४ [ऊर्ध्व-पृश्निपदयो समास। ऊर्ध्व व्याख्यातम्। पृश्नि=साधारणनाम निघ० १ ४ स्पृशति सयुक्तो भवतीति विग्रहे 'घृणिपृश्नि०' उ० ४ ५२ सूत्रेण स्पृश सस्पर्शने (तुदा०) धातोर्नि प्रत्ययो निपात्यते। धातो सकारलोप]

ऊर्ध्वबर्हिभ्यः ऊर्ध्वमुत्कृष्ट बर्हिर्वर्द्धन येभ्यस्तेभ्य (पितृभ्य=पालकेभ्यो जनेभ्य) ३८ १५ [ऊर्ध्व-बर्हि-

नैत्तरीय ४.४७२) ऐ० ७३४]

उरः वक्षस्थलम् १ १५८ ५

ऊरुभ्याम् जानुन ऊर्ध्वाभ्या पादाऽवयवाभ्याम् २५ ६ [ऊर्णुञ् आच्छादने (अदा०) धातो 'ऊर्णोतेर्नुलोपश्च' उ० १ ३० सूत्रेण कु]

ऊरू सक्थिनी २० ८ ऊरू इव वेगादिकर्मकर्त्तृणी (शरीराङ्गे) ३१ ११ कटि के अधस्थ और जानु के उपरिस्थ भाग स० प्र० ११४, ३१ ११ व्यापारादिमध्यमै-र्गुणैरुत्पन्ने (शरीराऽवयवे) ऋ० भू० १२५ **ऊरुम्**=वह्वाच्छादन स्वीकरण वा ४ २७ **उरुभ्याम्**=जानुन ऊर्ध्वाभ्या पादाऽवयवाभ्याम् २५ ६ **ऊरौ**=आच्छादने ८.५५ [पूर्वपदे व्याख्यातम् । अनुष्टुप् छन्दो विश्वेदेवा देवतोरु श० १०.३ २ ६]

ऊर्क् सुमस्कृतमन्नम् १८ ६ पराक्रमाऽन्नादिप्रदा शिल्पविद्या ४ १० पराक्रमोऽन्न वा १७ १ बलवान् (ब्रह्म) १०.२५ रस १८ ५४ **ऊर्ज्जम्**=पराक्रमाख्या नीतिम् १ ११६.८ पराक्रमम् १ ११८ ७ पराक्रममन्नादिक वा ४ १० विद्यादिपराक्रममनुत्तम रस वा १ १६. प्राणनम् २८ १६ बलम् १५ ६ शरीराऽऽत्मबलम् १२ ५८ अनेकविध बलम् ३ ४१ इष्ट विविध रसम्, प्र०—ऊर्ग्रस, श० १ ५ ४.२, २ ३४ पराक्रम तथा अन्नादि ऐश्वर्य को स० वि० १४६, ३.४१ अन्न पराक्रम वा, प्र०—ऊर्गिति अन्ननाम, निघ० २ ७, ६ ७० ६ **ऊर्जः**=पराक्रमस्य ६ ४८ २ पराक्रमान् ५ १७ ५ पराक्रमात् १ ५८ ८ पराक्रमयुक्तस्य (मनुष्यस्य) ५ ७ १ पराक्रमयुक्ता (विद्यार्थिनो जना) ७ १७ ६ पराक्रमा अन्नादयो वा २ ११.१ बलपराक्रमप्रदा, भा०—बलपराक्रमयोर्जनका. (आप =प्राणरूपा) १८ ४१ बलादियुक्तस्य (विद्वज्जन-स्य) ६ १६ २५ पृथिवी आदि जगत् रूप अन्न का, आर्याभि० १ ४०, ऋ० १ ७ ३ ३ वायुरूपात् कारणात् १ ६६ ३ **ऊर्जाम्**=बलयुक्ताना सेनानामन्नादीना वा ५ ४१ १२ **ऊर्जे**=वेदविद्याविज्ञानग्रहणाय ऋ० भू० १५२ पराक्रमप्राप्तये १४ २२ पराक्रमोत्तमरसलाभाय, प्र०—श० ५ १ २ ८, ११ कार्त्तिकाय ७ ३० अत्यन्त पराक्रम के लिए आर्याभि० २ ३१, ३८ १४ [ऊर्जे अन्नाय नि० ६.२६ ऊर्ग् इत्यन्ननामोर्जयतीति सत । पक्व सुप्रवृक्णमिति वा नि० ३ ८ ऊर्क्=अन्ननाम निघ० २ ७ ऊर्ज बलप्राणनयो (चुरा०) धातो क्विप् । ऊर्क् अन्न च रस च नि० ६ ४१ ऊर्ज दधाथामिति रस दधाथामित्येवै-तदाह श० ३ ६ ४ १८ ऊर्ग् वा आपो रस कौ० १२ १ आपो वा ऽऊर्जोऽद्भ्यो ह्यूर्ग् जायते श० ६ ४ १ १० ऊर्ग् वा उदुम्बर तै० १ १ ३ १० अन्न वा ऽ ऊर्गुदुम्बर श० ३ २ १ ३३ ऊर्ग् वा अन्नमुदुम्बर तै० १ २ ६ ५ ऊर्ग् वा अन्नाद्यमुदुम्बर ऐ० ५ २४ कौ० २५ १५ ऊर्ग् वै मुञ्जा तै० ३ ८ ११ ऊर्ग् विराट् तै० १ २ २ २ अन्न-मूर्जम् कौ० २८ ५]

ऊर्जम् पराक्रमम् ११.८३ **ऊर्जे**=बलयुक्ताय पराक्रमाय) ११ ५० [ऊर्ज बलप्राणनयो (चुरा०) धातो क्विप्]

ऊर्जयन् बल प्राप्नुवन् (विद्वज्जन.) २ ३५ ७ [ऊर्ज बलप्राणनयो (चुरा०) धातो शतृ]

ऊर्जयन्तीम् पराक्रमादिदानेनोन्नयन्तीम् (सुमतिं=श्रेष्ठा प्रज्ञाम्) ५ ४१ १८ बल प्रापयन्तीम् (महौषधीम्) १२ ८१. **ऊर्जयन्तीः**=बलयन्त्य (शक्तय) ३ ७ ४ **ऊर्जयन्त्यः**=ऊर्जवतीषु बलयन्तीषु साध्व्य (आप) २.१३ ८ [ऊर्ज बलप्राणनयो (चुरा०) धातो शत्रन्तान् ङीप्]

ऊर्जयमाने बल कुर्वाणे (उपासानक्ता=रात्रिदिने) २८ १६ [ऊर्ज बलप्राणनयो (चुरा०) धातो शानच्]

ऊर्जव्यस्य बहुबलप्राप्तस्य (भा०—सर्वविद्यासम्बन्ध-स्य) ५ ४१ २०

ऊर्जसने पराक्रमस्य प्रक्षेपणे ६ ४ ४ [ऊर्ज्-असन-पदयोऽसमास । ऊर्ज् व्याख्यातम् । असनम्=अमुक्षेपणे (दिवा०)+ल्युट्]

ऊर्जस्वती अन्नवती, ऊर्ग् बहुविधमन्न यस्या सा (पृथिवी) प्र०—अत्र 'तदस्यास्त्य०' इति भूम्नि मतुप् 'ऊर्गिति अन्ननाम' निघ० २ ७ 'ज्योत्स्नातमिस्रा०' अ० ५ २ ११४ इति निपातित १ २७ ऊर्ज पराक्रमसम्बन्धो विद्यते यस्या सा (सीता=काष्ठपट्टिका) १२ ७० बहुत बल, आरोग्य, पराक्रम को बढाने वाली, धन-धान्य से पूरित सम्बन्ध वाली (शाला) स० वि० १६७, अथर्व० ६ २ ३ १६ **ऊर्जस्वतीः**=बलपराक्रमप्रदा (आप = जलानि प्राणान्वा) १० १ [ऊर्जस्प्राति० भूम्न्यर्थे मतु-वन्तात् स्त्रिया ङीप् । ऊर्जस्=ऊर्जबलप्राणनयो (चुरा०) धातोरसुन् । ऊर्जस्वती नदीनाम निघ० १ १३]

ऊर्जस्वन्तम् प्रशस्तबलकारकम् (अ०—रसम्) १७ ८७ उत्तमपराक्रमसम्बन्धिनम् (करदाय प्रजापुरुषम्) ६ ३०. [ऊर्ज बलप्राणनयो (चुरा०) धातोरसुन् प्रत्ययान्तान् भूम्न्यर्थे मतुप्]

ऊर्व्याय ऊर्वी हिंसाया साधवे (पुरुषाय) १६ ४५ [उर्वी हिंसार्थे (भ्वा०) धातोर्बाहुलकादौणादिक कु प्रत्यय । स्त्रिया ङीप् । तत 'तत्र साधु' रित्यर्थे यत्]

ऊर्व्यूतिः ऊर्व्या पृथिव्या ऊती रक्षा येन स (राजा) ६ २४ २ [ऊर्वी-ऊतिपदयो समास । ऊर्वी=ऊर्णुञ् आच्छादने (अदा०)+कु । स्त्रिया ङीप् । ऊति =अव-रक्षणादिषु (भ्वा०+क्तिन्)]

ऊवध्यम् वधितु ताडितुमर्हम् (उदरस्थमपक्वमन्नम्) १ १६२ १० ऊरू वध्ये येन तत् (रेत =वीर्यम्) प्र०—अत्र छान्दसो वर्णलोपो वा, इति रुलोप १६ ८४ मलीनम् (भा०—दुर्गन्धयुक्त द्रव्यम्) २५ ३३ [ऊरु-वध्यपदयो समास । पूर्वपदस्थस्य रोर्लोप । वध्यम् वधप्राति० 'दण्डा-दिभ्यो य' अ० ५ १ ६६ सूत्रेणार्हत्यर्थे य प्रत्यय]

ऊवुः तन्तुवद् विस्तारयेयु. १ ६१ ८ [वेञ् तन्तु-सन्ताने (भ्वा०) धातोर्लिट् । 'वश्चास्यान्यतरस्या किति' इति सूत्रेण यकारस्य वकार]

ऊष निवासयन्ति ४ ५१ ४ **ऊषतुः**=वास कुरुते थे स० प्र० १२०, १० ४० २ **ऊषुः**=वसेयु ३ ७ १० [वस निवासे (भ्वा०) धातोर्लिट् । यजादित्वात् सम्प्रसारणम् । 'शासिवसिघसीनाञ्चे' ति षत्वम् । पुरुषव्यत्यय]

ऊष्मणः आतपान् ६ १८ **ऊष्मणा**=ऊष्णतया २५ ६ [उष दाहे (भ्वा०) धातोर्बाहुलकादौणादिको मनिन् प्रत्यय । अन्येषामपीति दीर्घ]

ऊष्मण्या ऊष्मसु साधूनि (पात्राणि) २५ ३६ [ऊष्मन्प्राति० 'तत्र साधु' रित्यर्थे यत् । ऊष्मन् इति व्याख्यातम्]

ऊहति वितर्कयति ५ ३४.३ **ऊहथुः**=प्राप्नुतम् १ ११६ ४ प्रापयतम् १ ४७ ६ प्रापयथ ६ ६३ ६ वहतम् १ ११६ २० वहेतम् १ ११६ ३ वहथ, प्र०—अत्र पुरुष-व्यत्यय ६ ६२ ३ देशान्तरमगत सम्यक् सुखेन प्रापयत ऋ० भू० १६०, सद्यो गमयेतम् १ ११६ ५ **ऊहामि**= तर्कयामि ६ ३ तर्केण निश्चयामि ५ २५ योजयामि, तर्केण क्षिपामि, तर्कं प्राप्नोमि करोमि वा २ १५ [ऊह वितर्के (भ्वा०) धातोर्लट् । व्यत्ययेन परस्मैपदम् । ऊहणु =वह प्रापणे (भ्वा०) धातोर्लिट् । यजादित्वात् किति सम्प्रसारणम्]

ऊहिरे प्राप्नुवन्ति २ ३४ १२ **ऊहिषे**=वितर्कयसि १ १२८ ६ **ऊहुः**=वहन्ति ४ २७ ३ [वह प्रापणे (भ्वा०) धातोर्लिट् । सम्प्रसारण किति । ऊहिषे=ऊह वितर्के (भ्वा०) धातोर्लिट् । छान्दसत्वाद् आमोऽभाव]

ऊहे वितर्कयामि ५ ३ ६ [ऊह वितर्के (भ्वा०) धातो-र्लट्]

ऊह्यते देशान्तर गम्यते १ १२० ११. **ऊह्याथे**= वितर्कयथ ४ ५६ ६ [वह प्रापणे (भ्वा०) ऊह वितर्के (भ्वा०) धातो कर्मणि लट]

ऊह्याः प्राप्ता (दिश) ६ ६० २

ऋक् ऋग्वेद· १८ २६ ऋग्वेदाऽध्ययनम् ऋ० भू० १५४, **ऋग्भिः**=मन्त्रै २ ३५ १२ **ऋचम्**=प्रशंसनीय-मृग्वेदम् ३६ १. **ऋचः**=ऋग्वेदश्रुतय १८ ६७ ऋग्वेदा-ऽऽदे १ १६४ ३६ चत्वारो वेदा ऋ० भू० ३१६, ऋच्छ्रुतय ५ ४४ १४ प्रशंसितबुद्धयो विद्यार्थिन ५ ४४ १५ सब वेदों का स० प्र० ६१, १ १६४ ३६ ऋग्वेद ३४ ५ **ऋचा**=वेदचतुष्टयेन १ १६४ ३६ प्रशंसया, ऋग्वेदादिना ६ १६ ४७ स्तुत्या ५ ६४ १ ऋग्वेदेन ११ ८ प्रशंसया ५ ६ ५ स्तुत्या ऋग्वेदादिना वा, भा०—वेदरीत्या १८ ६३ वेदादि शास्त्र पढ़ने में, स० वि० २१५, १ १६४ ३६ ऋग्वेदादि में स० प्र० ६१, १ १६४ ३६ प्रशंसितौ (स्त्री-पुरुषौ) २ ३७ **ऋचे**=स्तुतये १३ ३६ [ऋच् स्तुतौ (तुदा०) धातो क्विप् 'अन्येभ्योऽपि दृश्यन्ते' सूत्रेण । ऋक् वाङ्नाम निघ० १ ११ ऋक् अर्चनी नि० १ ८ अथेमानि प्रजापतिर् ऋक्पदानि शरीराणि सञ्चित्याऽभ्यर्चत् । यद-भ्यर्चत्ता एवर्चोऽभवन् जै० उ० १ १५ ६ प्राणो वा ऋक् प्राणेन ह्यर्चति श० ७ ५ २ १२ ब्रह्म वा ऋक् कौ० ७ १० वागृक् जै० उ० ४ २३ ४. वागेवर्चश्च सामानि च । मन एव यजूंषि श० ४ ६ ७ ५ ऋग् रथन्तरम् ता० ७ ६ १७ अमृत वा ऋक् कौ० ७ १० अस्थि वा ऋक् श० ७ ५ २ २५ ऋक् शतपदी प० १ ४ तस्य (दक्षिणनेत्रस्य) यच्छ्वेत तदृचा रूपम् जै० उ० ४ २४ १२ ऋक्सामयोर्हंसे (शुक्लकृष्णे) रूपे श० ६ ७ १ ७ उक्थमिति वह्वृच (उपासते) श० १० ५ २ २० यदेतन्मण्डल (आदित्य) तपति । तन्महदुक्थ ता ऋच स ऋचा लोक श० १० ५ २ १ वीर्यं वै देवतऽर्च्चं श० १.७ २ २०]

ऋक्वता बहुप्रशंसायुक्तेन (गणेन=उपदेश्यविद्यार्थि-समुदायेन) ४ ५० ५ [ऋच्प्राति० प्रशंसाया मतुप् । 'अयस्मयादीनि च्छन्दसि' अ० १ ४ २० सूत्रेण पदत्वात् कुत्व भत्वाज्जशत्व च न भवति]

ऋक्वभिः प्रशस्ता ऋच स्तुतयो विद्यन्ते येषु कर्मसु तै १ ८७ ६ प्रशंसनीयै (विनयादिगुणै) ६ ३२ २ प्रशंसितै (कविभि =विपश्चितै ६ ३२ ३ प्रशंसितैर्गुणकर्म-

पदयो समास । वर्हि =वृह वृहि वृद्धौ (भ्वा०) धातो-र्वाहुलकादौणादिक इ प्रत्यय]

ऊर्ध्वम् उपरिस्थम् (भानु=किरणम्) ४ ६ २ उत्कृष्ट भागम् १ ८८ ४ उत्कृष्टगुणम् (यज्ञम्) ५ १७ उच्छ्रितम् उत्कृष्टम् (केतु=प्रज्ञाम्) ३ ८ ८ उत्कृष्टमार्गम् प्रति १ ८५ १० प्राप्तोन्नतिम् (अध्वरम्=अहिंसनीय व्यव-हारम्) २७ १८ अग्रगामिनम् (राजानम्) २३ २७ **ऊर्ध्व.** =उन्नत (अग्नि =राजकर्मचारिजन) ४ ४.५. उपर्य्याकाशस्थ (अग्नि =राजा) १२ १३ ऊर्ध्वगामी (पावक) ५ १ २ उपर्य्यविष्ठाता (अग्नि =विद्वान्) ४ ६ १ ऊर्ध्व स्थित उत्कृष्ट (इन्द्र =पुरुषार्थी सभेश) २ २० ६ ऊर्ध्व स्थित ऊर्ध्व स्थापितो वा (जन) ४ १० सर्व से उत्कृष्ट गुण वाला (परब्रह्म) आर्याभि० १ १६ उपरिगामी (गातु =स्तावको जन) ३ ४ ४ ऊर्ध्वगामी (अग्नि = पावक) ७ ३६ १ [ऊर्ध्व =उच्छ्रितो भवति नि० ८ १५ उत्+डुधाञ् धारणपोषणयो (जु०) धातोर्वाहुलकादौ-णादिक क्वन् प्रत्यय· । वाहुलकाद् 'उत्' इत्यस्य 'ऊर्' इत्यादेश]

ऊर्ध्वया उपरि गत्या १५ ४७

ऊर्ध्वया उत्कृष्टया (विद्यया) १ १२७ १ **ऊर्ध्वा**= उत्कृष्टा (उषा) ३ ५५ १४ ऊर्ध्व स्थिता (उष =उषा) ३ ६१ ३ उत्कृष्टसुखप्रापिका (वाणी =वाणी) १ ८८ ३ **ऊर्ध्वाम्**=उत्कृष्टाम् (धियम्) १ १४४ १ **ऊर्ध्वाः**=ऊर्ध्व-गमयित्र्य (मेधा =प्रज्ञा) ३ ५८ २ उत्तमा (समिध) २७ ११ उपरिस्था (दिश) १६ ६४ ऊर्ध्व गामिन्यो ज्वाला १ १८१ ६ उच्चपदव्य (स्त्रिय) १ १४० ८ **ऊर्ध्वायै**=ऊर्ध्ववर्त्तमानायै (दिशे) २२ २४ **ऊर्ध्वा**= ऊर्ध्वानि (तेजांसि) २७ ११ ऊर्ध्व गन्तृणि (तेजांसि) ७ ४३ २ **ऊर्ध्वासः**=उत्कृष्टा (जना) ७ ३१ ६ ['ऊर्ध्वम्' इति व्याख्यातम् । अथैतदन्तरिक्षम् (ऊर्ध्वा दिक्) एषा हि दिग्बृहस्पते श० २ ३ ४ ३६ पङ्क्ति (छन्द) ऊर्ध्वा दिक् श० ८ ३ १ १२ एषा वा ऊर्ध्वा बृहस्पतेर्दिक्-वदेष उपरिष्टादर्यम्ण पन्था श० ५ ५ १ १२ स्वर्ग्येव ऊर्ध्वा दिक् ऐ० १ १८]

ऊर्ध्वशोचिषम् ऊर्ध्वज्वालम् (अग्निम्) ६ १५ २ [ऊर्ध्व-शोचिष्पदयो समास । शोचिस्=शोचति ज्वलति-कर्मा (निघ० १ १६) धातो 'अर्चिशुचिहुसृपि०' उ० २ १०८ सूत्रेण इसि प्रत्यय]

ऊर्ध्वसानु. ऊर्ध्व सानव शिखरा यस्य स (अर्वा= सूर्य) १ १५२ ५ [ऊर्ध्व-सानुपदयो समास । सानु = पण् सम्भक्तौ (भ्वा०) धातो 'इसनिजनिचरि०' उ० १ ३ सूत्रेण नुण्प्रत्यय । पणु दाने (तना०) धातोर्वा नुण्]

ऊर्मयः तरङ्गादय १ ५२ ७ वीचय १ ४४ १२ समुद्रादिजलतरङ्गा ६ ४४ २० **ऊर्मिभिः**=शत्रुभेदनोत्थ श्रमस्वेदोदकै १७ ६५ प्रापकै प्रकारैस्तरङ्गैर्वा, प्र०— अत्र 'अर्त्तेरुच्च' उ० ४ ४ इति ऋधातोर्मि प्रत्यय ऊकारा-देशश्च १ ६५ १०. **ऊर्मिम्**=उपम जलवीचिं वा १ ६५ १० रक्षणादिकम्, प्र०—आनन्दम् ४ ५८ ११ तरङ्गमिवो-च्छ्रितम् (आहारम्) ७ ४७ १. वोधम् १७ ६६ जलधारम् ४ ५७ २ लहरीम् ७ ३८ **ऊर्मिः**=ज्ञाता (राजा), प्रापक (राजा) १० २ आच्छादकस्तरङ्ग ६ ६ जलसमूह ४ ५८ १ **ऊर्म्मीन्**=सतरङ्गान् (सिन्धून्=नदी) ४ १६ ५. [ऊर्मि ऊर्णोति नि० ५ २४ ऊर्णुञ् आच्छादने (अदा०) धातो 'अर्त्तेरुच्च' उ० ४ ४४ सूत्रेण वाहुलकान् मि । ऋ गतौ (भ्वा०) धातोर्वा मि प्रत्यय]

ऊर्म्या रात्र्या सह, प्र०—ऊर्म्येति रात्रिनाम, निघ० १ ७, १ १८४ २ **ऊर्म्यायाः**=रात्रे ६ ६५ २. रात्र्या ६ १० ४ **ऊर्म्ये**=रात्रीव वर्त्तमाने (देवि=विदुषि स्त्रि) ५ ६१ १७ [ऊर्म्या रात्रि नाम निघ० १ ७]

ऊर्म्याय ऊर्मिषु जलतरङ्गेषु भवाय वायुरिव वर्त्त-मानाय (मनुष्याय) १६ ३१ [ऊर्मि पद व्याख्यातम् । तत्र भवार्थे यत्]

ऊर्व इव प्राप्तेरग्निरिव ३ ३० १६

ऊर्वम् आच्छादकम् (सत्यम्) ४ २८ ५ दुःखाना हिंसकम् (अग्निम्) २ ३५ ३ हिंस्यम् (दुष्टजनम्) ६ १७ १ दोषहिंसनम् १ ७२ ८. निरोधस्थानम् ३ ३२ १६ **ऊर्वात्**= बहुरूपात् ५ ४५ २ हिंसनात् ६ १७ ६ विस्तीर्णात् (परिश्रमात्) ४ १२.५ **ऊर्वान्**=आच्छादकान् पावकान् ७ १६ ७ विनश्वरान् पदार्थान् २ १३ ७ [उर्वी हिंसार्थे (भ्वा०) धातोर्वाहुलकादौणादिक क्वन् प्रत्यय । 'राल्लोप' इति वलोपे 'वॉरपधाया०' इति दीर्घे । ऊषा वै पितर प्रात सवने, ऊर्वा माध्यन्दिने, काव्यास्तृतीयसवने गि० ७ ३४]

ऊर्वष्ठीवे ऊरु चाऽष्ठीवन्तौ च ते, प्र०—अत्र 'अच-तुरवि०' अ० ५ ४ ७७ इति निपातित १८ २३. [ऊरु= ऊर्णुञ् आच्छादने (अदा०) धातो 'ऊर्णोतेर्नुलोपश्च' उ० १ ३०. सूत्रेण कु प्रत्यय । अष्ठीवत्=अस्थिप्राप्ति० मतुपि 'आसन्दीवदष्ठीवत्० अ० ८ २ १२ सूत्रेणाष्ठीभाव । तयो समासे 'अचतुरविचतुर०' अ० ५ ४ ७७ सूत्रेण समासान्तेऽच्-प्रत्यये टिलोपो निपात्यते]

वा) ४ २४ ८ ['ऋ' उपपदे हन् हिंसागत्यो (अदा०) धातो क्वनिप् प्रत्यय । ह्य घकार नकारस्याकारश्छान्दस]

ऋघावान् ऋघा बह्वच स्तुनय सत्याऽसत्यविवेचिका मतयो विद्यन्ते यस्मिन् स (मन्त्र =विचार) १ १५२ ५ य ऋन् शत्रून् घ्नन्ति ते वा बहव शूरा विद्यन्ते यस्य स (इन्द्र =परमैश्वर्ययुक्तो जन), प्र०—अत्र हनधातोर्वर्ण-व्यत्ययेन ह्य घो नलोपश्च ३ ३० ३

ऋचसे प्रशसिताय कर्मणे ६ ३६ ५ [ऋच् स्तुतौ (तुदा०) धातोरसुन् प्रत्यय]

ऋचीषम ऋचा तुल्यप्रशसनीय (इन्द्र =राजन् ६ ४६ ४ **ऋचीषमाय** =ऋच्यन्ते स्तूयन्ते त ऋचीषा ना-नतिमान्यान् करोति तस्मै (इन्द्राय =सभाद्यध्यक्षाय), प्र०—अत्र ऋचधातोर्बाहुलकादौणादिक कर्मणीषन् प्रत्यय १ ६१ १ [ऋच् स्तुतौ (तुदा०) धातोर्बाहुलकादौणादिक कर्मणीषन् प्रत्यय । ऋचीषोपपदे मा माने (अदा०) धातो 'अन्येष्वपि दृश्यते' अ० ३ २ १०१ वा० सूत्रेण ड प्रत्यय । ऋचीषम =ऋचामम नि० ६ २३]

ऋच्छतु प्राप्नोतु १३ ४७ [ऋच्छ गत्यादिषु (तुदा०) धातोर्लोट् । ऋच्छति गतिकर्मा निघ० २ २४ परिचरण-कर्मा निघ० ३ ५]

ऋच्यमाना स्तूयमाना (वाक्) ६ ३८ २ **ऋच्य-माने**=स्तूयमाने (अहोरात्रे) ६ ४९ ३ [ऋच् स्तुतौ (तुदा०) धातो कर्मणि शानच् । स्त्रिया टाप्]

ऋजवे सरलाय, भा०—विनयेन युक्ताय (विदुषे) ३७ १० **ऋजुः**=सरल (विद्वज्जन) २ २६ १ [अर्ज अर्जने (भ्वा०) अर्ज प्रतियत्ने (चुरा०) धातोर्वा 'अर्जिदृशि०' उ० १ २७ सूत्रेण कु प्रत्यय । धातोश्च 'ऋजि' आदेश । ऋजु =ऋजुरित्यप्यस्य (ऋञ्जते) भवति नि० ६ २१ असौ वा लोक ऋजु सत्य ह्यृजु सत्यमेव य एष (सूर्य) तपति श० १४ १ २ २२]

ऋजिप्यम् ऋजूना पालके भवम् (वृषण=राज-पुरुषम्) ६ ६७ ११ ऋजिपेषु सरलाना पालकेषु साधुम् (राजजनम्) ४ ३८ २ **ऋजिप्यः**=सरलगामिषु साधु (राजा) ४ ३८ ७ य ऋजुगामिषु साधु (सज्जन) ४ २७ ४ **ऋजिप्याः**=ऋजीन् सरलान् व्यवहारान् प्यायन्ते वर्द्धयन्ति ते (सखाय =सुहृदो जना) ३ ३१ १७ ['ऋजि' उपपदे पा रक्षणे (अदा०) धातो क । तत 'तत्र साधु' इत्यर्थे यत् । अथवा= 'ऋजि' उपपदे ओप्यायी वृद्धौ (भ्वा०) धातो क प्रत्यय]

ऋजिप्यासः ये ऋजि कोमलत्व वर्द्धयन्ति ते (प्राज्ञा राजजना) २ ३४ ४ ['ऋजि' उपपदे ओप्यायी वृद्धौ (भ्वा०) धातो क । तत प्रथमाबहुवचने जसोऽनुनागम । ऋजि =ऋज गतिस्थानादिषु (भ्वा०) धातोरिक् प्रत्यय]

ऋजिश्वना ऋजव ऋजुगुणयुक्ता सुशिक्षिता श्वानो येन तेन सह (व्यवहारेण) १ ५३ ८ ऋजव सरला श्वानो वृद्धयो यस्मिन्व्यवहारे तेन, प्र०—अत्र श्वन्शब्द श्विधातो कनिन्प्रत्ययान्तो निपातित उणा० १ १०१ १ **ऋजिश्वने** =ऋजुगुणैर्वृद्धाय (अपत्याय) ४ १६ १३ ऋज्वादिगुणवर्धकाय (सुपात्राय) ६ २० ७ **ऋजिश्वा**= ऋजि सरलश्चाऽसौ श्वा च ५ २९ ११ **ऋजिश्वानम्**= य ऋजीन् ज्ञानादि-सरलान् गुणान् श्वन्ति ते धार्मिक मनुष्यम्, प्र०—अत्र 'इक् कृपाभिभ्य' इत्यृजधातोरिक् 'श्वयूइधातोर्ट्वनिप् श्वकारलोपश्च १ ५१ ५ [ऋजिश्वन् पदयो समास । श्वन्=टुओश्वि गतिवृद्धयो (भ्वा०) धातोरौणादिक कनिन्]

ऋजीते सरले व्यवहारे २९ ४९ ['ऋजि' उपपदे इण् गतौ (अदा०) धातो क्त]

ऋजीते ऋजु गच्छति ६ ७५ १२ ['ऋजि' उपपदे इण् गतौ (अदा०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

ऋजीपी सरलगामी (शकुन =पक्षी) ४ २९ ६

ऋजीषम् उपार्जकम् (इन्द्र=सूर्यलोकम्) प्र०—अत्र 'अर्जेर्ऋज् च' उ० ४ २ इत्यर्जधातोरीषन् प्रत्यय ऋजा-देशश्च १ ३२ ६ [अर्ज अर्जने (भ्वा०) धातो 'अर्जेर्ऋज च' उ० ४ २८ सूत्रेणेषन् प्रत्यय । ऋजादेशश्च]

ऋजीषिणम् ऋजूना सरलाना धार्मिकाणा जना-नामीषितु शीलम् (इन्द्र=राजानम्) ६ ४२ २ प्रशस्त-मुपार्जन विद्यते यस्मिँस्तम् (मरुता गणम्) १ ६४ १२ **ऋजीषिण.**=कोमलस्वभावा (मरुत =विद्वज्जना) २ ३४ १ सर्वविद्यायुक्ता उत्कृष्टसेनाङ्गोपार्जका (नृतमास = नायका जना) १ ८७ १ **ऋजीषिन्**=सरलस्वभाव (सज्जन) ७ ४२ ३ ऋजुभावमिच्छन् (विद्वज्जन) ३ ४३ ५ ऋजीपि सरलत्व यस्याऽस्ति तत्सम्बुद्धौ (तेजस्विन् राजपुरुष) ६ १७ १० ऋजुधर्मयुक्त (इन्द्र=राजन्) ६ २० २ शोधक (सज्जन गृहस्थिन्) ३ ३२ १ **ऋजीषी**=ऋजु (इन्द्र = जगदीश्वरः) ४ १६ ४ सरलगुणकर्मस्वभाव (राजा) ६ २४ १ सरलादियुक्त (राजा) ५ ४० ४ ऋजुनीति (इन्द्र.=राजा) ४ १६.१ ऋजुगामी (राजकर्मचारी) ६ १८ २ ['ऋजि' उपपदे ईप गतिहिंसादर्शनेषु (भ्वा०)

स्वभावैः १ १५५ ६ सत्कर्तृभि (मरुद्भि=मनुष्यै) ५ ५२ १. सत्कर्त्तव्यै. (मरुद्भि=मनुष्यै.) ५ ६० ८ ऋग्वेदादिभि ७ १० ४ **ऋग्वा**=सत्कर्त्ता (सत्पुरुष) ७.३७ ४ **ऋग्वाणः**=प्रशस्ता ऋच स्तुतयो विद्यन्ते येषान्ते (विद्वान्) १ ८७ ५. स्तुत्याना गुणाना स्तावका (सज्जना) ३ १३ ५ [ऋच्प्राति० मत्वर्थे 'छन्दसीवनिपौ' अ० ५ २ १०९. वा० सूत्रेण वनिप्। अयस्मयादित्वात् पदत्वात् कुत्वं भत्वाच्च जश्त्व न भवति।]

ऋक्षलाभिः गत्यादानै २५ ३. [ऋक्षोपपदे ला आदाने (अदा०) धातोर् 'बलर्थे क विधानमि' ति क प्रत्ययो भावे स्त्रिया टाप्। ऋक्ष=ऋषी गतौ (तुदा०) धातो स प्रत्यय]

ऋक्षः पशुविशेष ५ ४६ ३ भल्लूक २४ ३६ **ऋक्षाः**=सूर्यचन्द्रनक्षत्रादिलोका १ २४ १०. [ऋषी गतौ (तुदा०) धातो 'ऋषेर्जातौ' उ० ३ ६७ सूत्रेण स प्रत्यय.। ऋक्षा स्तृभिरिति नक्षत्राणाम्। उदीर्णानीव ख्यायन्ते निघ० ३ २०. सप्तर्षीन् उ ह स्म वै पुरऋक्षा इत्याचक्षते श० २.१ २ ४]

ऋक्षीकाभ्यः या ऋक्षा गती कुर्वन्ति ताभ्य. (स्त्रीभ्य) ३० ८

ऋक्सामम् ऋच सनन्ति सम्भजन्ति येन तत् साम १३ ५६

ऋक्सामयोः ऋक् च साम च तयोर्वेदयो ४ ६ **ऋक्सामानि**=ऋक् च सामानि च तानि १८ ४३ **ऋक्सामाभ्याम्**=ऋचन्ति स्तुवन्ति पदार्थान् येन स ऋग्वेद, सामयन्ति सान्त्वयन्ति कर्माऽन्त फल प्राप्नुवन्ति येन स सामवेद., ऋक् च साम च ताभ्याम्, प्र०—अत्र 'अचतुर-विचतुर-सुचतुर-स्त्री-पुस-छेत्रवडुहर्क्सामि०' अ० ५.४ ७७ इति सूत्रेणाऽय समासान्ताऽच्प्रत्ययेन निपातित ४.१ [ऋक्-सामन्पदयो समास। 'अचतुरविचतुर०' अ० ५ ४ ७७ सूत्रेण द्वन्द्वसमासे समासान्तेऽच् प्रत्यये 'नस्तद्धिते' अ० ६ ४ १४४ सूत्रेण टिलोप। ऋक्सामे वा इन्द्रस्य हरी ऐ० २ २४ तै० १ ६ ३ ६ ऋक्सामे वै हरी श० ४ ४ ३ ६ ऋक्सामे वै सारस्वतावुत्सौ तै० १ ४ ४.६. ऋक्सामानि वा एष्टय ऋक्सामैर्ह्यागासत ऽइति नो ऽस्त्विक्त्य नोऽस्त्विति श० ६ ४ १ १२]

ऋग्मियम् य ऋग्भिर्मीयते तम् (राजानमिव सूर्यम्) ६ ८ ४ य ऋग्भिर्मीयते प्रमीयते तम् (अग्निम्) ३ २ ४ ऋचा वेदमन्त्राणा निर्मातारम् (इन्द्र=धारकमीश्वरम्) प्र०—ऋगुपधात् मीञ् धातो विवप्, अमीयडादेशश्चेति १ ६ ६ स्तुतिभि स्तवनीयम् (आप्त विद्वज्जनम्) ६ ४५ ७ **ऋग्मियाय**=ऋग्भिर्यो मीयते स्तूयते तस्मै (सभाद्यध्यक्षाय, प्र०—अत्र ऋगुपपदान्मावातोर्वाहुलकादौणादिको डियच्-प्रत्यय १ ६२.१. य ऋचो मिनोत्यधीते तस्मै (नरे=नायकाय जनाय) ३४ १६ [ऋच्शब्दान् मत्वर्थीय 'बहुल छन्दसि' अ० ५ २ १२२. सूत्रेण ग्मिनि। अमीयडादेश, छन्दसि सर्वनामस्थानेऽपि पदत्वान्नलोप। ऋगुपपदाद्वा मा माने (अदा०) धातो डियच् प्रत्यय। ऋग्मियम् ऋग्मन्तमिति वा, अर्चनीयमिति वा, पूजनीयमिति वा नि० ७.२६.]

ऋग्मी ऋग्वेदी (इन्द्र=सभाध्यक्षो वा), **ऋग्मिभिः**=ऋच. ऋग्वेदमन्त्रा सन्ति येषान्ते ऋग्मयस्तै. (विद्वज्जनै.) प्र०—अत्र मत्वर्थीयो बाहुलकाद् ग्मिनि. प्रत्यय १ १०० ४ [ऋच्प्राति० मत्वर्थे 'बहुल छन्दसि' अ० ५.२ १२२ सूत्रेण ग्मिनि.]

ऋघायतः ऋत सत्य हिंसत (दुर्जनस्य), प्र०—अत्र हनधातो 'छान्दसो वर्णलोपो वा' इति तलोपो बाहुलकादौणादिको डण्) प्रत्यय. २ २५ ३ वावमानान् (वनून्=अधर्मसेविनो जनान्) ४ ३०.५ [ऋतोपपदे हन हिंसागत्यो (अदा०) धातोर्बाहुलकादौणादिको डण्। पूर्वपदस्य तकारलोप। ऋघायप्राति० क्विपि नामधातुसज्ञाया लट्]

ऋघायन्त बाध्यन्ते ४ १७.२ [रघ हिंसासराध्यो. (दिवा०) धातोऽन् सप्रसारणं च। तत आचारे क्यड्]

ऋघायमाणम् परिचरितुमर्हम् (इन्द्र=जगदीश्वरम्) प्र०—ऋघ्यते पूज्यते इति ऋघ, अत्र बाहुलकात् क, तत आचारे क्यड् 'ऋघ्नोतीति परिचरणकर्मसु पठितम् निघ० ३.५, १ १० ८. **ऋघायमाणः**=वर्द्धमान. (सभेश) प्र०—अत्र ऋघु धातो. क. प्रत्ययो वर्णव्यत्ययेन घ, तत 'उपमानादाचारे' इति क्यड् १.१७६.१. ऋघो हिंसितुम् इवाऽऽचरति (सभापति.), प्र०—अत्र रघधातोर्वाहुलकादौणादिको-ऽन् प्रत्यय. सम्प्रसारणञ्च तत आचारे क्य १ ६१ १३ [ऋघु वृद्धौ (स्वा०) धातोरिगुपधलक्षण क। तत आचारे क्यडन्तात् शानच्। घस्य घो वर्णव्यत्ययेन। रघ हिंसाम्राव्यो (दिवा०) धातोऽन्। तत. क्यड् आचारे। रेफस्य सप्रसारणम्, घस्य घकारश्छान्दस। ऋघ्नोतीति परिचरणकर्मा (निघ० ३.५) धातो क। तत क्यड् आचारे। तत शानच्]

ऋघावा शत्रूणा हन्ता (अर्य=स्वामीश्वरो राजा

४ ६ ६ [ऋजूपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो क्विन् प्रत्यय]

ऋञ्जत प्रसाध्नुत ५ ८७ ५ **ऋञ्जते**=प्रसाध्नोति १ १४३ ८ प्रसाधयन्ति २ २ ५ भृज्जन्ति १ १४१ ६ [ऋजि भर्जने (भ्वा०) धातोर्लोट् लट् च। लोटि व्यत्ययेन परस्मैपदम्। ऋञ्जति पदनाम निघ० ४ ३ ऋञ्जति प्रसाधनकर्मा नि० ६ २१]

ऋञ्जती ऋञ्जमाना पाचयित्री (शरु =दुष्टाना हिंसिका ऋष्टि) १ १७२ २ [ऋजि भर्जने (भ्वा०) धातो शत्रन्तान् ङीप्। व्यत्ययेन परस्मैपदम्]

ऋञ्जन् ससाध्नुवन् (विद्वज्जन) २ ३१ १ प्रसाध्नुवन् (राजा) ४ ३८ ७ प्राप्नुवन् (काल) १ ६५ ७ [ऋञ्जति प्रसाधनकर्मा (नि० ६ २१) धातो शतृप्रत्यय]

ऋञ्जन्ति साध्नुवन्ति ३ ४३ ६ **ऋञ्जसे**= प्रसाध्नोपि ४ ८ १ [ऋञ्जन्ति प्रसाधनकर्मा (नि० ६ २१) धातोर्लट्]

एवः प्रापणम् १५ ५ ज्ञानम् १५ ४ **एवान्**=प्राप्तव्यान् (पदार्थान्) ६ ५१ २ **एवा.**=कामयमाना (मरुत =मनुष्या) ५ ४१ ५ **एवेन**=गमनेन १ १२८ ३ **एवैः**=विज्ञानादिप्राप्तै सद्गुणै सह ७ ६ ६ ज्ञापकै प्रापकैर्गुणै १ ६८ २ प्रशस्तैर्ज्ञानै कर्मभिर्वा १ १०० १८ प्राप्तै प्रशस्तज्ञानै १ १०० २ प्रापणै ५ ४१ ५ सुखप्रापकै. (गुणै) ४ ५६ १ [एवै कामैरयनैरवनैर्वा नि० १२ २१ एव =इण् गतौ (अदा०) धातोर्बाहु० औणादिको वन्]

एवासः गमनशीला (रथा) १ १६६ ४ ['एव' इति व्याख्यातम्। ततो जसोऽसुक्]

सूत्रेण वतुप् । 'आ सर्वनाम्न' अ० ६ ३ ९१ सूत्रेणाकारादेश सर्वनाम्न]

एतासः समन्तात् प्राप्ता (वायव इव विद्वास) १ १६५ १ [आङ्+इण् गतौ (अदा०) धातो क्त । जसो ऽसुक् च]

एतो एते (जना) ५ ४५ ५

एतोः अयनम् २ १५ ५ एताम् (अविष्या=रक्षाम्) २ ३८ ३

एत्य सेवा कृत्वा ऋ० भू० २८९, अथर्व० १५ ११ २ [आङ्+इण् गतौ (अदा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

एत्यै समन्ताद् गत्यै २७.४५ [आङ्+इण् गतौ (अदा०) धातो स्त्रिया क्तिन्]

एदिधिषुः पतिम् अकृतविवाहाया ज्येष्ठाया पुत्र्यामूढा कनिष्ठा तस्या पतिम् ३० ९

एधताम् वर्द्धताम् २३ २६ **एधते**=वर्द्धते ८ ५ [एध वृद्धौ (भ्वा०) धातोर्लोट् लट् च]

एधते समन्तात् प्रदीपयति ७ १ ८ [आङ्+ञिइन्धी दीप्तौ (रुधा०) धातोर्लट् । नकारलोपश्छान्दस]

एधमानद्विट् यो वर्धमानान् द्वेष्टि स (राजप्रजाजन) ६ ४७ १६ [एधमानोपपदे द्विप् अप्रीतौ (अदा०) धातो कर्त्तरि क्विप् । एधमान =एध वृद्धौ (भ्वा०) धातो शानच् । एधमानद्विट्=एधमानान् द्वेष्टि नि० ६ २२]

एधः इन्धते प्रदीपयन्ति येन तद्वत्, भा०—इन्धन, घृतम् ३८ २५ वर्द्धक (जगदीश्वर) २० २३ इन्धनम् १ १५८ ४ [ञिइन्धी दीप्तौ (रुधा०) धातोर्घञ् प्रत्यये 'अवोदैध०' अ० ६ ४ २९ सूत्रेण नलोपो गुणश्च निपात्यते । वर्धकार्थे तु एध वृद्धौ (भ्वा०) धातो कर्त्तर्यच्]

एधि प्राप्तो भव ४ १ ५ भवसि १ ९१ १५ भवतु ४ १९ वर्धय, वर्धयिता भव ७ ४७ प्राप्त हो स० प्र० १५२, अथर्व० १४ २ १८ [अस् भुवि (अदा०) धातोर्लोट् । 'ध्वसोरेद्धौ०' इति सकारस्यैत्वे हावल्लोपे च, एत्वस्यासिद्धत्वाद् 'हुझल्भ्यो हेर्धि' इति धिभाव । एधि=भव नि० १० १७]

एधिषीमहि सर्वतो वर्द्धयेम ३८ २५ वर्द्धिपीमहि २० २३ [एध वृद्धौ (भ्वा०) धातोराशिषि लिङि, उत्तमपुरुषबहुवचनम्]

एन एति पुरुषार्थेन सुखानि यस्तत्सम्बुद्धौ (विद्वज्जन) १ १७३ ९ [इण् गतौ (अदा०) धातोर्बाहुलकादौणादिको न प्रत्यय]

एनस एनसः अधर्मस्याऽधर्मस्य ८ १३ [एनस पदस्य वीप्साया द्विर्वचनम्]

एनसः अपराधात् २० १४. अपराधस्य ४ १२ ५ विरोधाऽऽचरणस्य ८ १३ दुष्टाचारात् २० २० पाप मे आर्याभि० २ १९, ८ १३ पापो को आर्याभि० २ १९, ८ १३ धर्मविरुद्धाचरणात् भा०—दुष्टाचारात् ६ १७ दु ख के आर्याभि० २ १९, ८ १३ **एनः**=अधर्माचरणम् ८ १३ अपराधम् ६ ५१ ७ कुपथ्यादिकमपराध वा ६ ७४ ३ पापाचरणम् १ १२५ ७ प्रापक (दुर्जन) ७ १८ १८ दु खफल पापम् ५ ३६ पापरूप कर्म को स० वि० ७, ४० १६ [ईयते प्राप्यते दु खमनेनेति विग्रहे इण् गतौ (अदा०) धातो 'इण आगसि' उ० ४ १९८ सूत्रेणासुन् प्रत्यय । एनप्=एन एते नि० ११ २१]

एना एनेन पूर्वोक्तेन (नमसा=अन्नेन) प्र०—अत्रा ऽऽकारादेश. १५ ३२ [इदम सर्वनाम्न । 'द्वितीयाटौस्स्वेन' अ० २ ४ ३४ सूत्रेणान्वादेश एनादेश । 'सुपा सुलुग्' इत्याकारादेश । एनम् एनाम्=अस्यास्या इत्येतेन व्याख्यातम् नि० ५ २८]

एनांसि भा०—दुश्चेष्टा २० १६ अपराधान् २० १५ ['एनस' पदे द्रष्टव्यम्]

एनी ये इतस्ते (द्यावापृथिव्यौ) १ १४४ ६ [एनद सर्वनाम्नोऽन्वादेशे 'वा छन्दसि०' इत्येनादेश औ प्रत्ययेऽपि]

एनीम् प्राप्तु योग्याम् (श्रियम्) ५ ३३ ६ **एनीः**=एन्यो मृगस्त्रिय इव (अवनय =नद्य) ५ ८५ ६ [एनी नदीनाम निघ० १ १३]

एनोः एनयो (अध्यापकोपदेशकयो) प्र०—अत्र 'छान्दसो वर्णलोप०' इत्यकारलोप १ १३६ १ अनयोर्मध्ये ६ ६९ ८ [इदम सर्वनाम्न ओसि 'द्वितीयाटौस्स्वेन' अ० २ ४ ३४ सूत्रेणान्वादेश एनादेश । 'छान्दसो वर्णलोप' इति वा० सूत्रेणाकारलोप]

एन्यः या यन्ति ता नद्य, प्र०—एन्य इति नदीनाम निघ० १ १३, ५ ५३ ७ [एनी+जस् । एनी नदीनाम निघ० १ १३]

एम प्राप्नुयाम ४ ७ ९ [इण् गतौ (अदा०) धातोर्लङि उत्तमपुरुषबहुवचनम्]

एमन् प्राप्तव्ये स्थाने, प्र०—अत्र सप्तम्या लुक् 'एमन्नादिषु छन्दसि पररूपम्' इति वार्त्तिकेन पररूप च १३ १७ एति गच्छति तस्मिन् वायौ, प्र०—अत्र सप्तमी

ऐन्द्रम् परमैश्वर्यस्वरूप, सब विद्वानो मे अत्यन्त शोभायमान (ईश्वर) को आर्याभि० २.१८ इन्द्रस्यैश्वर्यस्येदम् (सद =सभाम्) १६ १८ इन्द्रस्य परमैश्वर्यस्येदधिकरणम् (ईश्वर सभाध्यक्षो वा) ५ ३० इन्द्रो विद्युद्देवता यस्य तद् विज्ञानम् १६ १५ ऐश्वर्यकारकम् (सवनम्= आरोग्यकर होमादिकम्) १६ २६ इन्द्रस्य विद्युत इदम् (वलम्) १६ ८ **ऐन्द्रः**=विद्युद्देवताक (उदान =य ऊर्ध्वमनिति) ६ २० इन्द्रदेवताक (अरुण पशु) २६ ५८ इन्द्रो जीवो देवताऽस्य स ऐन्द्र (प्राण =शरीरस्थो वायुविशेष) ६ २० [इन्द्रप्राति० 'सास्य देवता' (अ० ४ २ २४) अर्थे 'तस्येदम्' अ० (अ० ४ ३ १२०) अर्थे वाऽण् प्रत्यय]

ऐन्द्रवायवः इन्द्रो विद्युद्वायुश्च तयोरय सम्बन्धी (कर्त्तव्य) १८ १६ [इन्द्र-वायुपदयो समासे 'तस्येदम्' इत्यर्थेऽण् प्रत्यय । वाक् प्राणश्चैन्द्रवायव ऐ० २ २६]

ऐन्द्राग्नः इन्द्राग्निदैवत्य (सहित =दृढाङ्ग पशु) २६ २८ इन्द्रो वायुरग्निर्विद्युच्च ताभ्या निर्वृत्त (व्यवहार) १८ २० **ऐन्द्राग्नाः**=इन्द्राग्निदेवताका (सञ्चरा प्राणिन) २४ १५ वायुविद्युत्सङ्गिन भा०—वाय्वग्न्यादिगुणा पशव २४ ८ वायुविद्युद्देवताका (सञ्चरा =मार्गा) २४ १७ [इन्द्र-अग्निपदयो समासे 'सास्य देवता' इत्यर्थे तेन निर्वृत्तमित्यर्थे वाऽण् प्रत्यय]

ऐन्द्राबार्हस्पत्याः वायुसूर्यदेवताका (पशव) २४ ७ [इन्द्र-वृहस्पतिपदयो समासे 'सास्य देवता' इत्यर्थे 'दित्यदित्या०' इति ण्य प्रत्यय । 'देवताद्वन्द्वे च' अ० ६ ३ २६ सूत्रेण पूर्वपदस्यानङ् । 'देवताद्वन्द्वे च' अ० ७ ३ २१ सूत्रेणोभयपदवृद्धि]

ऐन्द्रावैष्णवाः विद्युद्वायुदेवताका (पशव) २४ ७ [इन्द्र-विष्णुपदयो समासे 'सास्य देवता' इत्यर्थेऽण् । पूर्वपदवदानङ् उभयपदवृद्धिश्च]

ऐमि समन्तात्प्राप्नोमि ४ २ समन्तात् प्राप्नुयाम् प्र०—अत्र लिङर्थे लट् ३ ४१ सव प्रकार से प्राप्त होता हूं स० वि० १४६, ३ ४१ [आङ्पूर्वाद् इण् गतौ (अदा०) धातोर्लट्]

ऐये गच्छेः ५ २ ८ [ईङ् गतौ (दिवा०) धातोर्लिङ् । आडागमश्छान्दस]

ऐरत् प्राप्नोति २ १५ ८ प्रापयेत् ४ ४ ६ ऐरयति २ १६ ६ कम्पयनि यथाक्रम चालयति ४ ५.६ ३ प्रेरयेत् ३ ३१ १५ प्रेरयति ३ ५५ २० **ऐरत**=प्रेरयन्ति ७ २३ १ **ऐरतम्**=गच्छतम् १ ११८ ६. [ईर गतौ कम्पने च (अदा०) धातोर्लङ् । 'बहुल छन्दसी' ति शपो लुक् न । व्यत्ययेन परस्मैपदम्]

ऐरम् प्रेरयेयम् ४ २६.३ [ईर गतौ कम्पने च (अदा०) धातोर्लङ् । व्यत्ययेन परस्मैपदम् । छान्दसत्वाच् छपो लुङ् न]

ऐरयत् कम्पयति २ १७ १ गमयति १ ५१.११ प्रेरयति २ २० ७ प्रेरयेत् ६ ५.६.३ वीरयत् वीरयत्यूर्ध्वमधो गमयति, प्र०—अत्र लङर्थे लुङ् १ ७ ३. **ऐरयतम्**=प्रापयतम् ६ ७२.३. गमयतम् १ ११२ ५. प्रेरयतम् १ ११७ २४ **ऐरयन्**=प्राप्नुवन्ति, प्र०—अत्र लङर्थे लट् १ २८ **ऐरयम्**=प्रेरयेयम् ४ ४२ ३. [ईर गतौ कम्पने च (अदा०) धातोर्णिचि लट्]

ऐरयः ईर्ष्व २.१७ ३ [ईर गतौ कम्पने च (अदा०) धातोर्णिचि लडि मध्यमैकवचनम्]

ऐरयेथाम् प्रेरयेतम् ६ ६६ ८ चालयेथाम् १ १५७ ५ [ईर गतौ कम्पने च (अदा०) धातोर्णिचि लडि च रूपम्]

ऐरिरे समन्तात् प्राप्नुवन्त, प्र०+ईर गतौ कम्पने च, इत्यस्याऽमन्त्र इति प्रतिषेधादामोऽभावे प्रयोग १ ६ ४, [ईर गतौ कम्पने च (अदा०) धातोराङ् पूर्वाल् लिट् । आमोऽभावश्च छान्दस]

ऐलवृदाः इलाया पृथिव्या इमानि वस्तुजातानि ऐलानि, तानि ये वर्धयन्ति ते, भा०—पृथिवीरक्षका वायव, प्र०—अत्र वर्णव्यत्ययेन धस्य द, इगुपधलक्षण कश्च १६ ६० [इला पृथिवीनाम निघ० १ १ तत 'तस्येदम्' इत्यर्थेऽण् प्रत्यय । ऐलोपपदे वृधु वृद्धौ (भ्वा०) धातोरिगुपधलक्षण क । अन्तर्भावितण्यर्थ. । वर्णव्यत्ययेन धकारस्य दकार]

ऐषन्त इच्छेयुः १ १२६ ५ [ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लङ् । धातूनामनेकार्थत्वाद् इच्छार्थेऽपि]

ओ सम्बोधने १ १७७ ५ आभिमुख्ये १ १६५ १४ अवधारणे १ ११३ ११ प्रेरणेषु २ ३४ १५]

ओकसः सर्वनिवासार्थस्याऽऽकाशस्य १ ३० ६ **ओकः**=गृहम् ४ १६ १५ स्थानम् २ १६ १ निवासस्थानम् ६ ४१ १ **ओकसि**=गृहे ५ ३३ ४ **ओकांसि**=निवासान् ३४ ५७ समवेतानि गृहाणि २ ३८ ५ [अवतिरक्षणहेतुर्भवतीति विग्रहे अव रक्षणादिषु (भ्वा०) धातोर्वाहुलकात् कक् प्रत्यय । उच्यते यत्रेति विग्रहे उच समवाये (दिवा०) धातोर्वा बाहुलकाद् औणादिकोऽसुन्

एवावदस्य एवान् प्राप्तान् गुणान् वदन्ति येन तस्य (क्षत्रस्य=राष्ट्रस्य) ५ ४४ १० ['एव' इति व्याख्यातम्। तदुपपदे वद व्यक्तायां वाचि (भ्वा०) धातो 'पुसि सज्ञायां घ प्रापेण' अ० ३ ३ ११८ सूत्रेण करणे घ प्रत्यय]

एवो एव ४ १२ ६

एषते (आ+ईषते) अभिगच्छति ५ ६७ ५ प्राप्नोति १ १४६ १ हिनस्ति ५ ८६ ३ [आङ् पूर्वाद् ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लट्]

एषस्य सर्वत्र प्राप्तव्यस्य (विष्णो=परमेश्वरस्य) ७ ४० ५ ऐश्वर्यवत (विष्णो=ईश्वरस्य) २ ३४ ११ [इण् गतौ (अदा०) धातोर्वाहु० औणादिक स प्रत्यय]

एषः कार्यकारणसङ्गत्या यदनुमीयते (योनि=असम प्रमाणम्) ८.४१ [इण् गतौ (अदा०) धातोर्वाहुलकादौणादिक स प्रत्यय]

एषि प्राप्नोषि १ १२३ १० [इण् गतौ (अदा०) धातोर्लट्। मध्यमैकवचनम्]

एषे एतु प्राप्तुम् ५ ४१ ५ गन्तुम् ५ ६६ ३ [इण् गतौ (अदा०) धातोस्तुमर्थे 'तुमर्थे सेसेन०' इति सेन् प्रत्यय]

एषे (आ-इषे) समन्तादिच्छामि ५ ४६ १ सब सुख प्राप्त कराने को समर्थ होवे स० वि० १०५, ५ ४१ ७ [आङ्+ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लट्]

एषे समन्तादिच्छवे (अन्नये=विदुषे जनाय) १ १८० ४ [आङ्पूर्वाद् इषु इच्छायाम् (तुदा०) धातो कर्त्तरि क्विप्। ततश्चतुर्थ्या एकवचनम्]

एषो इयम् (उषा=प्रातर्वेला) १ ४६ १

एष्टयः समन्तादिष्टयो विद्वत्पूजा सत्सङ्गो विद्यादानञ्च याभ्यस्ता (क्रिया) १८ ४३ **एष्टः**=भा०—समन्तात् पूजितु योग्य (विष्णु=परमेश्वर) २३ ४६ [आङ्+यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो. स्त्रिया क्तिन्। किति सम्प्रसारणम्। ऋक्सामानि वाऽएष्टय ऋक्सामैर्ह्याशासनऽइति नोऽस्त्विन्द्रस्य नोऽस्त्विति श० ६ ४ १ १२]

एष्टा पर्यालोचक (विद्वज्जन) १ १८४ २

एष्टाः=सर्वत इष्टकारिण (राय=धनसमूहान्) ५ ७. [इष गतौ (दिवा०) धातो कर्त्तरि तृच्। अन्यत्र आङ्पूर्वाद् इषु इच्छायाम् (तुदा०) धातो क्त]

एष्टौ मन्ताद् यज+क्रियायाम् ६ २१ ८ [आङ् यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो स्त्रिया क्तिन्। सप्तम्या एकवचनम्]

एहि (आ-इहि) आगच्छ ६ १६ १६ आगच्छन्ति प्र०—अत्र व्यत्यय ५ ८३ ६ प्राप्नुहि प्रापयति वा, प्र०—अत्र पुरुषव्यत्ययो लडर्थे लोट् च १ ६ १ समन्तात् प्राप्नुहि प्राप्नोतु वा ४ २० समन्तात् प्राप्नुयात्, प्र०—अत्र व्यत्यय ३ २७ अध्ययनेनैवैति प्राप्नोति १ १५ अभित प्राप्नुहि, समन्तादेति, अ०—सञ्जानीहि ५ ६ [आङ् पूर्वादिण् गतौ (अदा०) धातोर्लोट्]

एहिमायासः आ समन्ताच्चेष्टाया प्रज्ञा येषान्ते (विश्वेदेवास=समस्तवेदपारगा विद्वास) प्र०—चेष्टार्थस्याऽऽङ्पूर्वस्य ईहधातो 'सर्वधातुभ्य इन्' उ० ४ ११६ इतीन्प्रत्ययान्त रूपम् 'मायेति प्रज्ञानामसु पठितम्' निघ० ३ ६, १ ३ ६ [एहि-मायापदयो समास। एहि=आङ्+ईह चेष्टायाम् (भ्वा०) धातो 'सर्वधातुभ्य इन्' उ० ४ ११६ सूत्रेण इन्। माया प्रज्ञानाम निघ० ३ ६]

ऐक्षेताम् पश्यत ३२.७ [ईक्ष दर्शने (भ्वा०) धातोर्लङि प्रथमपुरुषद्विवचनम्]

ऐजन् एजन्ति १ ६३ १ [एजृ कम्पने (भ्वा०) धातोर्लङ्]

ऐट्ट प्रशसेत ३ ४८ ३ [ईड स्तुतौ (अदा०) धातोर्लङ्]

ऐडम् इडाया वाचो व्याख्यात्री साम १३ ५७ **ऐडेन**=इडाया अन्नस्येद सस्करण तेन १५ ७ [इळा वाङ् नाम निघ० १ ११ अन्ननाम निघ० २ ७ इळाप्राति० व्याख्यानार्थे तस्येदमर्थे वाऽण् प्रत्यय]

ऐत् प्राप्नोति ५ ३० ६ **ऐत**=प्राप्नुत ४ ३५ ३ [इण् गतौ (अदा०) धातोर्लङ्]

ऐतन विज्ञापयत १ ११० ३ विजानीत १ १६१ ६ प्राप्नुत १ ११० २ [इण् गतौ (अदा०) धातोर्लङि मध्यमबहुवचनम् तस्य तनवादेशश्छान्दस]

ऐताम् प्राप्नुत १४ ३० **ऐतु**=समन्तात्प्राप्नोतु ३३ ३४ [इण् गतौ (अदा०) धातोर्लङि प्रथमद्विवचनम्। ऐतु=आङ्+इण् गतौ+लोट्]

ऐधेव एधै काष्ठैरिव १ १६६ १ [ऐध-इव पदयो समास। एध=ञिइ-धी दीप्तौ (रुधा०) धातोर्घञि 'अवोदैध०' इति नलोप। एधप्राति० 'तस्येदम्' इत्यर्थेऽण्, स्वार्थे वाऽणि 'ऐध' इति रूपम्]

ऐनोः प्रेरये ४ १६ ७ **ऐनोत्**=प्राप्नोति, प्र०—अत्रेणधातोर्व्यत्ययेन श्नु १ ६६ ५ [इण् गतौ (अदा०) धातोर्लङ्। व्यत्ययेन शप श्नु]

ओणिम् दुःखाऽन्धकारस्याऽपनयनम् १ ६१ १४

ओण्योः=द्यावापृथिव्यो, प्र०—ओण्योरिति द्यावापृथिवीनामसु पठितम्, निघ० ३ ३०, ४.२५ [ओणृ अपनयने (भ्वा०) धातो 'इक् कृष्यादिभ्य' अ० ३ ३ १०८ वा० सूत्रेण इक् प्रत्यय । ओण्यौ द्यावापृथिव्योर्नाम । निघ० ३ ३०]

ओतम् सूत्रे मणिगणा इव प्रोतम्, भा०—सञ्चितम् (ज्ञानम्) ३४ ५ सर्वव्यापक (चित्त=चित्त को) स० प्र० २४७, ३४४ **ओतः**=ऊर्ध्वतन्तु पट इव ३२ ८ [आङ्+वेञ् तन्तुसन्ताने (भ्वा०) धातो क्त । 'ग्रहिज्या०' इति सूत्रेण किति सम्प्रसारणम्]

ओतवै विस्तारणाय १ १६४ ५ [आङ्+वेञ् तन्तुसन्ताने (भ्वा०) धातोस्तुमर्थे तवै प्रत्यय । 'छन्दस्युभयथा' इति सार्वधातुकत्वे सार्वधातुकमपिदिति कित्वे च ग्रह्यादिसूत्रेण सम्प्रसारणम्]

ओतुम् रचयितुम् ६ ६ २ [आङ्+वेञ् तन्तुसन्ताने (भ्वा०) धातोस्तुमुन् । 'छन्दस्युभयथा' इति सार्वधातुकत्वे किति सम्प्रसारणम्]

ओतुम् रक्षकम् (तन्तु=जगत्कारणम्) ६ ६ ३ [अव रक्षणादिषु (भ्वा०) धातो 'सितनिगमिमसि०' उ० १ ६६ सूत्रेण तुन् । ज्वरत्वर०' इति सूत्रेणोपधावकारयोरूठ् । ततो गुणे रूपम्]

ओदती उन्दन कुर्वन्ती (उषा) १ ४८ ६ [उन्दी क्लेदने (रुधा०) धातोराङ्पूर्वाच्छत्रन्तान् ङीप् । छान्दसत्वान् श्नमोऽभाव । ओदती उषो नाम । निघ० १ ८]

ओद्यन् ओषधीषु, प्र०—अत्र सप्तमी-लुक् १३ ५३ [उन्दी क्लेदने (रुधा०) धातोर्मनिन्नौणादिक । 'अवोदैधौद्य०' इति न लोपो गुणश्च निपात्यते]

ओपमिमीहि अभित श्रेष्ठैरुपमितान् कुरु १ ८४ २० [आङ्+उप+माङ् माने (जुहो०) धातोर्लोट् । व्यत्ययेन परस्मैपदम्]

ओपशमिव अत्यन्त सम्बद्धम् (द्या=प्रकाशम्) १ १७३ ६ ['ओ' इत्यवधारणे, तदुपपदे पश बन्धने (चुरा०) धातोर्घञर्थे क । तत =ओपशम्-इव-पदयो समास]

ओ३म् योऽवति सकल जगत्तदास्या ४० १७ एतन्नामवाच्यमीश्वरम् ४० १५ अवतीत्योम्, रक्षा करने से यह ईश्वर का नाम है, म० प्र० १४, ४० १७ ईश्वर-वाचको यज्ञो वेदविद्या वा, प्र०—ओ३म् ख ब्रह्म, अत्र 'अवतेष्टिलोपश्च' उ० १ १४२ अनेनाऽवधातोर्मन् प्रत्ययोऽस्य टिलोपश्च, अ०—हे ओङ्कारवाच्यबृहस्पते, भा०—एतत्परमेश्वरस्यैव नाम २ १३ ओंकार शब्द परमेश्वर का सर्वोत्तम नाम है, इसमें अ, उ और म् तीन अक्षर मिलकर 'ओ३म्' समुदाय हुआ, इस एक नाम से परमात्मा के बहुत नाम आते हैं, जैसे—अकार से विराट्, अग्नि और विश्वादि, उकार से हिरण्यगर्भ, वायु और तैजसादि, मकार से ईश्वर, आदित्य और प्राज्ञादि स० प्र० ११ रक्षा करने वाला (ईश्वर), म० वि० ११४, १० ८५ ४४ यह मुख्य परमेश्वर का नाम है जिस के साथ अन्य सब नाम लग जाते हैं म० वि० ७५, ३६ ३ [अव रक्षणगतिकान्तिप्रीत्यादिषु (भ्वा०) धातो 'अवतेष्टिलोपश्च' उ० १ १४२ सूत्रेण मन्प्रत्ययो टिलोपश्च प्रत्ययस्यैव । धातोरुपधावकारयोरूठ् च चादिषु पाठादव्ययम् । तदेतदक्षर (ओङ्कार) ब्राह्मणो य काममिच्छेत् त्रिरात्रोपोषित प्राङ्मुखो वाग्यतो बर्हिष्युपविश्य सहस्रकृत्व आवर्तयेत् सिद्धन्त्यस्यार्या सर्वकर्माणि च गो० पू० १ २२ (ओङ्कारस्य) को धातुरित्याप्लृधातुरवनिमप्येके रूपसामान्यादर्थसामान्याच्चैतदीय, तस्मादापेरोङ्कार सर्वमाप्नोतीत्यर्थ गो० पू० १ २६ को विकारो न्यवते । प्रसारणमाप्नोतेराकारपकारौ विकार्यावादित ओङ्कारो विक्रियते । द्वितीया मकार एव द्विवर्ण एकाक्षर ओमित्योङ्कारो निर्वृत्त गो० पू० १.२६ ने (देवा) ओङ्कार ब्रह्मण पुत्र ज्येष्ठ दक्षु गो० पू० १ २३ लातव्यो गोत्रो, ब्रह्मण पुत्रो, गायत्र छन्द, शुक्लो वर्ण., पुसो वत्सा रुद्रो देवता ओङ्कारो वेदानाम् गो० पू० १ २५ तासामभिपीडितानां (व्याहृतीनां) रस प्राणेदत् । तदेतदक्षरमभवदोमिति यदेतत् जै० उ० १ २३ ७ तानि (भूर्भुव स्व) शुक्राण्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त अकार उकारो मकार इति । तानेकधा समभरत्तदेतद् ओ३मिति ऐ० ५ ३२, ओमिति वै साम जै० उ० १ ६ २ ओमिति मन जै० उ० १ ६ २ ओमित्यथर्वणा शुक्रम् गो० पू० २ २४ ओमितीन्द्र जै० उ० १ ६ २ ओमित्यसौ योऽसौ (सूर्य) तपति ऐ० ५ ३२ हन्तेति चन्द्रमा ओमित्यादित्य जै० उ० ३ ६ २ ओमिति वै स्वर्गो लोक ऐ० ५ ३२ ओमित्येतदेवाक्षरमृतम् जै० उ० ३ ३६ ५ तदेत् सत्यमक्षर यदोमिति । तस्मिन्नाप प्रतिष्ठिता जै० उ० १ १० २ तस्मादोमित्येव प्रतिगृह्णीयात् तद्धि सत्य तद्देवा विदु श० ४ ३ २ १३ ओमित्यृच प्रतिगर एव तथेति गाथाया ओमिति वै देव तथेति मानुषम् ऐ० ७ १८ यद्वै नेत्यृच्योमिति तत् श० १ ४ १ ३० एतद्व वा (ओमिति) अक्षर

प्रत्यय (उणा० ४.२१६) । कुत्वन्तु न्यङ्क्वादित्वात् । ओक इति निवासनामोच्यते नि० ३ ३ गृहा वा ओका निरु० ८ २६]

ओकिवांसा सङ्गतौ सम्बद्धौ (इन्द्राग्नी=वायु-विद्युतौ) ६ ५९ ३ [आङ्पूर्वाद् उच समवाये (दिवा०) धातोर्लिट क्वसु । 'सुपा सुलुग्०' इत्याकार । छान्दस रूपम्]

ओक्ता समन्तादुक्तानि प्रशसितानि (अन्नानि धनानि वा) १ ६३ ९ [आङ्पूर्वाद् वच परिभाषणे (अदा०) धातो क्त । 'शेश्छन्दसि बहुलम्' इति शेर्लोप]

ओक्यम् ओकेषु गृहेषु साधु (विद्योपदेशम्) १.१३३ ५ ['ओक' इति व्याख्यातम् । तत 'तत्र साधु' इत्यर्थे यत्]

ओक्ये गृहे ३ ४२ ८ घर मे, आर्याभि० १ ३७, ऋ० १ ६ २१ १३ ['ओक' इति व्याख्यातम् । ततो भवार्थे यत्]

ओक्षतम् समन्तात् सिञ्चेनाम् २१ ९ [उक्ष सेचने (भ्वा०) धातोर्लेडि मध्यमद्विवचनम्]

ओजस. पराक्रमस्य १ ५२ १२ बलस्य ५ ३२ ९ अपने सामर्थ्य मे, आर्याभि० १ १३, ऋ० १ ५२ १२ **ओजसा**=बलेन, प्र०—ओज इत्युदकनाम, निघ० १ १२, २ २२.३ उदकेन सह ३४ ७ स्वबलेन १ १३० ९ प्रशस्त शरीरात्मसभा-सेनाबलेन ८ ३९ बलेन वेगेन वा १ १९ ८ स्वस्य शरीरबुद्धिबलेन सैन्येन वा १७ ३८ अनन्तबलेन, प्र०—ओज इति बलनामसु पठितम्, निघ० २ ९, १ ११.८ पराक्रमेण, कोमलेन कर्मणा वा १ १२७ ४ विद्याबलेन १ ५५ ६ सामर्थ्येन ३० ४१ बलादिगुणसमूहेन १ १९ ४ **ओजसे**=बलयुक्ताय (सभाध्यक्षाय) १ ५७ ५ पराक्रमाय ८ ३९ आत्मबलाय ७ २८ **ओजः**=वेगवद् बलम् ४ ७ १० जलवेग, प्र०—ओज इत्युदकनाम, निघ० १ १२, २८ ५ पराक्रमकारि (अ०—वैद्युत तेज ५ ५ पराक्रमस्वरूप (ईश्वर), आर्याभि० २ ९, १९ ९ पराक्रमो आर्याभि० २ ९, १९ ९. महाप्राणवत्त्वम् १९ ९ पराक्रमयुक्त (अ०—परमाप्त परमात्मा) १० १५ जलमिव बलम् ५ ३१ ७ न्यायपालनाऽन्वित पराक्रम, ऋ० भू० १०२ सत्य विद्याबलम्, ऋ० भू० १४९ बलकरमन्त्रादिकम् ६ ४६ ७ बलपराक्रम ३४ ५१ मानस बलम् ३६ १ शरीरस्य तेज १८ ३ अनन्त सामर्थ्य-युक्त (ईश्वर) स० प्र० २४६, १९ ९ प्राणधारणम् ६ १९ ६ वीर्य्यम् ५ ३२ १० बलकरमन्त्रादिकम् ६ ४६ ७

ओजांसि=शरीरात्मन पराक्रमान् १ ८० १५ [उज्जति कोमलो भवतीति विग्रहे उज्ज आर्जवे (तुदा०) धातो 'उज्जेर्बले बलोपश्च' उ० ४ १९२ सूत्रेणासुन् प्रत्यय । ओजो बलम् । नि० ६ २३ ओज =उदकनाम निघ० १ १२ बलनाम निघ० २ ९ ओजसा बलेन । ओज ओजतेर्वा उज्जतेर्वा नि० ६ ८ ओज सह सह ओज कौ० ३ ५ वज्रो वा ओज श० ८ ४ १ ९०]

ओजस्वतीः विद्याबलपराक्रमयुक्ता राजस्त्रिय, जितेन्द्रिया (राजस्त्रिय) १० ३ ['ओज' इति पूर्वपदे व्याख्यातम् । ततोऽतिशायने मतुपि स्त्रिया ङीप्]

ओजायमानम् ओज पराक्रममिवाऽऽचरन्तम् (अहिं=मेघम्) २ १२ ११ बलयन्तम् (अहिं=मेघम्) ३ ३२ ११ **ओजायमानः**=ओज इवाऽऽचरन् (जन) १ १४० ६ [ओजस्पदादाचारेऽर्थे 'कर्तुः क्यङ् सलोपश्च' अ० ३ १ ११ सूत्रेण क्यङ् सलोपश्च । तत शानच्]

ओजिष्ठ ! अतिशयेनौजस्विन् (राजन्) १ १२९ १० **ओजिष्ठम्**=अतिशयेन बलप्रदम् (श्रव =अन्न श्रवण वा) ६ ४६ ५ अतिशयेन बलिष्ठम् (मेद =स्नेह) ३ २१ ५ अतिशयेन पराक्रमयुक्तम् (द्युम्न=यशोधन वा) ५ १० १ **ओजिष्ठः**=अतिपराक्रमी (इन्द्र =विद्वान् राजा) ८ ३९ अतिशयेनौजस्वी, भा०—ब्रह्मचर्येण शरीरात्मबलयुक्तो विद्वान् (राजा) ३३.६४ **ओजिष्ठाय**= अतिशयेनौजो विद्यते यस्मिन् विद्या-व्यवहारे तस्मै ५ ५ ['ओजस्' इति व्याख्यातम् । ततोऽतिशायन इष्ठन् । 'टे' अ० ६ ४ १५५ सूत्रेणेष्ठनि परे टेर्लोप]

ओजिष्ठया अतिशयेन पराक्रमयुक्तया (दक्षिणया) १ १९९ ४ [ओजस्प्राति० अतिशायन इष्ठन् । तत स्त्रिया टाप्]

ओजिष्ठेभिः अतिशयेन बलादिगुणयुक्तैर्नरोत्तम-सैन्यै ४ २० १ बलिष्ठैर्योद्धृभि २० ४८ ['ओजिष्ठ' इति व्याख्यातम् । ततो भिस ऐसादेशो न]

ओजीयः बलिष्ठम् (विश्व=जगत्) २ ३३ १० [ओजस्प्राति० अतिशायन ईयसुन् । टेर्लोप]

ओजीयान् अतिशयेन पराक्रमी (राजा) ६ २० ३ [ओजस्प्राति० अतिशायन ईयसुन् । टेर्लोप]

ओजोभिः पराक्रमादिभि ७ ५६ ६ [ओजस्प्राति० तृतीयाबहुवचनम् । 'ओजस्' इति व्याख्यातम्]

ओज्मानम् पराक्रमयुक्त रसम् २९ ५३ बलकारिणम् (मेघमिव मुखम्) ६ ४७ २७.

सर्वासामोषधीना रसो यत्पय को० २ १ अग्नेर्वा एषा तनू यदोषधय तै० ३ २ ५ ७ यदुग्रो देवा ओषधया वनस्पतय-स्तेन को० ६ ५ ओषधयो वै पशुपतिस्तस्माद् यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति श० ६ १ ३ १२ ओषधयो वै मुद, ओषधिभिर्हीद सर्व मोदते श० ९ ४ १ ७ ओषधयो वहि ऐ० ५ २८ श० १ ३ ३ ९ तै० २ १ ५ १ ओषधय खलु वै वाज तै० १ ३ ७ १ ओषधयो मधुमती तै० ३ २ ८ २ रसो वा एव ओषधिवनस्पतिषु यन्मधु ऐ० ८ २० सौम्या ओषधय श० १२ १ १ २ सोम ओषधीनामधिराज गो० उ० १ १७ सोमो वै राजा ओषधीनाम् कौ० ४ १२ सोमो वा ओषधीना राजा तै० ३ ९ १७ १ औषधो वै सोमो राजा ऐ० ३ ४० ओषधि-लोको वै पितर श० १३ ८ १ २० जगत्य ओषधये श० १ २ २ २ ओषधयो वै देवाना पत्न्य श० ६.५ ४ ४. सैनान्य वा एतदोषधीना यद्यवा ऐ० ८ १६ साम्राज्य वा एतदोषधीना यन्महाव्रीहय ऐ० ८ १६ (प्रजापति) विष्णोरध्योषधीरसृजत तै० २ ३ २ ४]

ओषधिः सोमादि १ १६६ ५ [पूर्वपदे व्याख्यातम्]

ओहते प्राप्नोति ५ ५२ १० व्यवहारान् वहति, प्र०—अत्र 'वाच्छन्दसि' इति सम्प्रसारण लघूपधगुण १ १७६ ४ वहति प्रापयति ५ ४२ १० वितर्कयति ७ १६ ११ प्राप्नोति प्रापयति वा ५ ५२ ११ [वह प्रापणे (भ्वा०) धातोर्लट्। छान्दसत्वात् सम्प्रसारण लघूपधगुण। ऊह वितर्के (भ्वा०) धातोर्वा छान्दस रूपम्]

ओहते वितर्कयुक्ताय (जनाय) २ २३ १६ [ऊह वितर्के (भ्वा०) धातो शत्रन्ताच्चतुर्थी। अलघूपधत्वेऽपि छान्दसत्वाद् गुण]

ओहम् ओहति प्राप्नोति येन तम् (स्तोम=स्तुतिम्) १ ६१ १ **ओहेन**=बीजादिस्थापनेन १ १८० ५ **ओहैः**=अर्दकै कर्म्मभि ४ १० १ विद्यासुखप्रापकै (स्तोमै = वेदभागै) १५ ४४ रक्षणादिभि १७ ७७ [वह प्रापणे (भ्वा०) धातोर्घञर्थे क प्रत्यय। छान्दसत्वात्सम्प्रसारणे कृते गुण]

ओहसा प्राप्तेन बलेन वेगेन वा ६ ६७ ९ [वह प्रापणे (भ्वा०) धातोरसुन्। छान्दसत्वात् सम्प्रसारणे कृते गुण]

ओहसानम् तर्कगम्यम् (अहि=मेघम्) ६ १७ ९ [ऊह वितर्के (भ्वा०) धातोर्घञर्थे क। छान्दसत्वाद् गुण। ओहोपपदे पण सभक्तौ (भ्वा०) धातोरण् प्रत्यय]

ओहानम् त्यजन्तम् (मेघम्) ५ ३० ६ [ओहाक् त्यागे (जु०) धातो 'कृत्यल्युटो बहुलमि' ति कर्त्तरि ल्युट्। छान्दसत्वादोकारानुबन्धस्य लोपो न]

ओहानः रक्षक (विद्वज्जन) ६ ५२ ५ [ओहाङ् गतौ (जु०) धातो पूर्वपदवल्ल्युट् कर्त्तरि]

ओषधीः ओषध्य २० १९ [ओषधिप्राति० 'गृदि-कारादक्तिन' इति वार्तिकसूत्रेण ङीप्]

औक्षन् सिञ्चन्ति ३ ९.९ सिञ्चेरन् ३३ ७ [उक्ष सेचने (भ्वा०) धातोर्लङ्]

औचथ्यम् उचितेषूचितेषु कर्मसु साधुम् (विद्वज्जनम्) १ १५८ ४ **औचथ्यः**=प्रशसितेषु भव (रेवण =धनम्) १ १५८ १ [उच समवाये (दिवा०) धातोर्बाहुलकादौणादिकोऽथ प्रत्यय, स च णित्। औचथप्राति० साध्वर्थे भवार्थे वा यत्]

औच्छत् निवासयति ५ ३० १४ **औच्छः**=विवासयति ५ ७९ २ निवासवती वर्त्तते ५ ७९ ३ [उच्छी विवासे (भ्वा०) धातोर्लङ्]

औद्भिदम् उद्भिनत्ति दुःखानि येन तदेव, भा०—विद्वद्भि सह परामृश्य सत्यासत्यनिर्णय (हिरण्य=तेजो सुवर्णादिकम्) ३४ ५० [उत्+भिदिर् विदारणे (रुधा०) धातोर्मूलविभुजादित्वात् क। तत स्वार्थे प्रज्ञादित्वादण्]

औद्भिद्यम् उद्भिदा पृथिवी भित्त्वा जाताना भावम् (वृक्षादि) १८ ९ [उद्भिदप्राति० भावे ष्यञ्]

औपद्रष्ट्र्याय उपद्रष्ट्रत्वाय ३० १३ [उपद्रष्ट्र-प्राति० भावे कर्मणि वा ष्यञ्]

औब्जः य उब्जत्यार्जवी करोति तेन निर्वृत्त स (सूर्यलोक) १.५६ ५ [उब्ज आर्जवे (तुदा०) धातोरच् कर्त्तरि। ततो निर्वृत्तार्थेऽण् प्रत्यय]

औब्जः आर्जवे भव २ २३.१८ [उब्ज आर्जवे (तुदा०) धातोर्घञर्थे क। ततो भवार्थेऽण्]

औब्जत् उब्जति सरली करोति १ ८५ ९ [उब्ज आर्जवे (तुदा०) धातोर्लङ्]

औभ्नात् मृद्नाति ४ १९ ४ [उभ उम्भ पूरणे (तुदा०) धातोर्लङ् विकरणव्यत्ययेन शप श्ना। मृद्नात्यर्थे धातूनामनेकार्थकत्वात्]

और्णनाभम् ऊर्णा नाभ्या यस्य तदपत्यमिव (वृत्र=मेघम्) २ ११ १८ [ऊर्णा-नाभिपदयो समास। समासान्तोऽच प्रत्यय। ततोऽपत्यार्थेऽण्]

और्णोत् ऊर्णुत आच्छादयति १७ १८ स्वीकरोति

वेदाना त्रिविष्टपम् जै० उ० ३ १६ ७ एतद् (ओमिति) एवाक्षर त्रयी विद्या जै० उ० १ १८ १० न (ब्रह्म) ओमित्येतदक्षरमपद्यद् द्विवर्णञ्चतुर्मात्र सर्वव्यापि सर्वविभ्वयानयाम ब्रह्म गो० पू० १ १६ एप (ओमित्यक्षरम्) उ ह वाव परम जै० उ० १ ८ ५ यथा मूच्या पलशानि-मन्तृण्णानि स्युरेवमेतेना (ओमिति) अक्षरेणेमे लोका मन्तृण्णा जै० उ० १ १० ३ एवमेवैव विद्वान् ओमित्येतदेवाक्षर ममाराह्य यददोऽमृत तपति तदप्रपद्य ततो मृत्युना पाप्मना व्यावर्त्तते जै० उ० १ १८ ११]

ओमभिः रक्षणादिकारकै (ओपवै) ५ ४३ १३ [अव रक्षणादिपु (भ्वा०) धातोर्मनिन्। उपधावकारयोरुठ् धातो]

ओमानम् रक्षादिकर्त्तारम् (जनम्) ६ ५०.७ रक्षणादिसत्कर्मपालकम् (ऊर्जं=पराक्रमम्) १ ११८ ७ ['ओमन्' इति पूर्वपदे व्याख्यातम्। ततो द्वितीयैकवचनम्]

ओमासः अवन्ति सद्गुणै क्षन्ति ते (देवास = विद्वज्जना) ७ ३३ रक्षका, ज्ञानिनो विद्याकामा उपदेशप्रीतयो, विज्ञानतृप्तयो याथातथ्यावगमा, शुभगुणप्रवेशा, सर्वविद्याश्रावि॰, परमेश्वरप्राप्तौ व्यवहारे च पुरुषार्थिन, शुभविद्यागुणयाचिन, क्रियावन्त, सर्वोपकारमिच्छुका, विज्ञाने प्रशस्ता आप्ता सर्वशुभगुणलिङ्गिनो दुष्टहिंसका शुभगुणदातार सौभाग्यवन्तो ज्ञानवृद्धा, (विश्वेदेवास = सर्वे विद्वाम), प्र०—अव रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगम-प्रवेश-श्रवण-स्वाम्यर्थयाचन-क्रियेच्छा-दीप्त्यवाप्त्यालिङ्गन-हिंसा-दान-भाग-वृद्धिषु, इत्यस्माद् 'अविसिविसिशुपिभ्य कित्, इत्यनेनौणादिकेन सूत्रेणाऽवधातोरोमशब्द सिध्यति। ओमास इति पदनाममु पठितम्, निघ० ४ ३, १ ३ ७ [अव रक्षणादिपु (भ्वा०) धातोरौणादिको मन् प्रत्यय। ततो जसोऽमुगागम। ओमास पदनाम निघ० ४ ३ ओमास अवितारो वा ऽवनीया वा नि० १२ ४०]

ओम्यावतीम् अवन्ति त ओमास्तेषु भवा प्रशस्ता विद्या तद्वतीम् (नीतिम्) १ ११२ २० ['ओम' इति पूर्वपदे व्याख्यातम्। ततो भवार्थे यत् प्रत्यये मतुपि च स्त्रिया डीप्]

ओम्यावन्तम् ये अवन्ति ते ओमानस्तान् ये यान्ति प्राप्नुवन्ति त ओम्या, एते प्रशस्ता विद्यन्ते यस्य तम् (विद्वज्जनम्) १ ११२ ७ [अव रक्षणादिपु (भ्वा०) धातोर्मनिन् प्रत्यय ओमन्। तदुपपदे या प्रापणे (अदा०) धातोरण् प्रत्यय। ततोऽतिशायने मतुप्]

ओर्णुत आच्छादयत २.१४.३. आङ्+ऊर्णुञ् आच्छादने (अदा०) धातोर्लोट्]

ओषतात् दह १३ १२ **ओषति**=दहेत् १ १३० ८ **ओषः**=दहसि १ १७५ ३ [उष दाहे (भ्वा०) धातोर्लोट्। 'तुह्योस्तातङ्' इति तातङादेश। अन्यत्र लट्]

ओषधयः यवादय, प्र०—फलपाकान्ता बहुपुष्पफलोपगा, मनु० १ ४६, १ २१ सोमाद्या ३६ १७ सोमयवाद्या २० १६ **ओषधीनाम्**=सोमाद्योषधीनाम् १ १२७.८ **ओषधीभिः**=यवादिभि, प्र०—ओषधय ओषद् धयन्तीति वा दोष धयन्तीति वा, नि० ६ २७, १ २१ यवसोमलतादिभि १५ ७ **ओषधीभ्यः**=प्रसिद्धाभ्य (वनस्पतिभ्य) ६ २ रोगनिवारिकाभ्य (सोमलतादिभ्य) ६ ६ **ओषधीषु**=सोमलतादिषु १६ ३३ **ओषधीः**=गोधूमाद्या (अन्नानि) १ १०३ ५ वृक्षादि वनस्थ सर्व पदार्थ, आर्याभि० १ २७, ऋ० ७ ३४ २५ सर्वरोगनाशिका (सोमाद्या) १ ६१ २२ ओषधय १३ २७ यवादीन् १ १६३ ७ सोमलतादय ओषध्य, प्र०—'अत्र वाच्छन्दसि' इति पूर्वसवर्णदीर्घ १ ६० ६ **ओषधे**=ओषधिवद्वर्त्तमाने (स्त्रि) १२ ६६ ओषधिवद्वर्त्तमान विद्वन् (जन) १२ १०० ओषो विज्ञान धीयते यस्मिँस्तत्सम्बुद्धौ (अ० विज्ञानवराऽध्यापक, प्र०—अत्र 'ओष गतौ' इत्यस्माद् गतिरत्र विज्ञान गृह्यते ६ १५ ओषधिव्यापिन् (ईश्वर) १ १८७ १० ओषधि १२ १०१ ओषधिम् १२ ६८ सोमलताद्योषधिगण ४ १ सर्वरोगनिवारक (विद्वज्जन) ५ ४२ **ओषध्याः**=यवादे १ २५ [ओषद् उपपदे धेट् पाने (भ्वा०) धातो 'कर्मण्यधिकरणे च' अ० ३ ३ ६३ इति विहित कि प्रत्ययोऽत्र 'कृतो बहुलम्' इति कर्तर्यपि, तलोपश्च, स्त्रिया डीप्। ओषद्=उप दाहे (भ्वा०) धातो शतृ। ओषधय ओषद्धयन्तीति वा, ओषत्येना धयन्तीति वा, दोष धयन्तीति वा नि० ६ २७ ओषधय पदनाम निघ० ५ ३ (प्रजापति) ता (आहुति) व्यौक्षत् ओष धयेति, तत ओषधय समभवँस्तस्मादोषधयो नाम श० २ २ ४ ५ द्रव्यो वा ओषधय पुष्पेभ्योऽन्या फल गृह्णन्ति। मूलेभ्यो अन्या तै० ३ ८ १७ ४ उभयो (ओषधय) ऽस्मै स्वदिता पच्यन्ते ऽकृष्टपच्याश्च कृष्टपच्याश्च ता० ६ ६ ६ वाग्दैवत्य साम, वाचो मनो देवता, मनस पशव, पशूनामोषधय, ओषधीनामाप। तदेतदद्भ्यो जात सामाप्सु प्रतिष्ठितमिति जै० उ० १ ५६ १४ आपो ह वाऽओषधीना रस श० ३ ६ १ ७ अपामोषधय (रस) ओषधीना पुष्पाणि (रस) पुष्पाणा फलानि (रस)। ता० १४ ६ ४ १ एप ह वै

प्रत्ययः । कक्ष =कक्षो गाहते वस इति नामकरण ख्यातेर्वाऽनर्थकोऽभ्यास । किमस्मिन् रयानमिति । तत्सामान्याद् मनुष्यकक्षो वाहुमूलसामान्यादश्वस्य नि० २.२.]

कक्षीवता शिक्षकेन विदुषा १ ११७ ६. **कक्षीवते**=कक्षा प्रशस्ताऽङ्गुलय इव विद्याप्रान्ता विद्यन्ते यस्य तस्मै (जनाय) १ ५१ १३ प्रशस्तशासनयुक्ताय (विद्यार्थिने जनाय) १ ११६ ७ **कक्षीवन्तम्**=कक्षेषु विद्याऽध्ययन-कर्मसु साध्वी-नीति कक्षा, सा वह्वी विद्यते यस्य विद्या जिघृक्षोस्तम् (विद्वज्जनम्), प्र०—अत्र भूम्न्यर्थे मतुप् 'कक्ष्याया सज्ञाया मतो सम्प्रसारण कर्त्तव्यम्' अ० ६ १ ३७. इति वार्त्तिकेन सम्प्रसारणादेश 'आसन्दीवदष्ठीवच्च०' अ० ८ २ १२ इति निपातनात् मकारस्थाने वकारादेशश्च ३ २८ या कक्षासु कराऽङ्गुलिक्रियासु भवा शिल्पविद्यास्ता प्रशस्ता विद्यन्ते यस्य तम् (यजमानम्), प्र०—कक्षा इति अङ्गुलिनामसु पठितम्, निघ० २ ५, अत्र कक्षाशब्दात् 'भवे च्छन्दसि' इति यत्, तत प्रशसाया मतुप् १ १८ १ प्रशस्ता कक्षा सहाया विद्यन्ते यस्य तम् (स्तोतार जनम्) १ ११२ ११ **कक्षीवन्तः**=प्रशस्ता कक्षयो विद्यन्ते येषान्ते (भृत्या जना) १ १२६ ४ **कक्षीवान्**=सर्वसृष्टि-कक्षा विद्यन्ते यस्मिन् स (ईश्वर) ८ २६ १ युद्धे प्रशस्त-कक्ष (वीरयोद्धा) १ १२६ ३ वह्वय कक्षयो विद्याप्रदेशा विदिता सन्ति यस्य स (विद्वज्जन) १ १२६ २ ['कक्ष्या' इत्यङ्गुलीनाम निघ० २ ५ ततो भवार्थे यत्। ततो प्रशाया मतुपि 'कक्ष्याया सज्ञाया मतौ सम्प्रसारणम्' अ० ६ १ ३७ वा सूत्रेण सप्रसारणे 'आसन्दीवदष्ठीवत्०' अ० ८ २ १२ सूत्रेण मकारस्य वकार । कक्षीवत् कक्ष्यावान् नि० ६ १०]

कक्ष्यप्रा कक्ष्य प्रात पिपूर्त्त (हरी=अश्वौ) ८ ३४ कक्षासु भवा कक्ष्या सर्वपदार्थाऽवयवास्ता प्रात प्रपूरयन-स्तौ (हरी=अश्वौ) १ १० ३ [कक्ष्योपपदे प्रा पूरणे (अदा०) धातो क प्रत्यय । 'सुपा सुलुगि' ति सूत्रेणा-कारादेश । कक्ष्या अङ्गुलिनाम निघ० २ ५ प्रकाशयन्ति कर्माणि नि० ३ ९ रज्जुरश्वस्य कक्ष सेवते निरु० २ २.]

कक्ष्य· कक्षासु भव (मद =आनन्द) ५ ४४ ११ **कक्ष्याय**=कक्षासु भवाय, भा०—कक्षास्थाय (जनाय) १६ ३४ **कक्ष्ये**=कक्षासु भवे (रोदसी=द्यावापृथिव्यौ) १ १७३ ६ [कक्षाप्राति० भवार्थे यत्]

कङ्कः लोहपृष्ठ २४ ३१ [ककि गतौ (भ्वा०) धातोरच् प्रत्यय]

कङ्कतः चञ्चल (मनुष्य) १ ११९ १ विषवान् इव (प्राणी इव) १ १९१ १ [ककि गतौ (भ्वा०) धातोर्वाहुल-कादौणादिकोऽतच् प्रत्यय]

कच्च कदा च ३३ ३५

कच्चित् किञ्चित् (आग =अपराधम्) २ २७ १४

कञ्चन् कश्चिदपि (शत्रुम्) १७ ४५

कण्टकीकारीम् या कण्टकी करोति ताम् (दुष्टा स्त्रियम्) ३० ८ ['कण्टकी' इत्युपपदे डुकृञ् करणे (तना०) धातोरण् प्रत्यय । स्त्रिया ङीप्]

कण्ठ्यम् कण्ठे भव स्वरम् ३९ ९ [कण्ठप्राति० भवार्थे 'शरीरावयवाच्च' अ० ४ ३ ५५ सूत्रेण यत्। कण्ठ =कणति येन शब्द करोतीति विग्रहे कण शब्दार्थे (भ्वा०) धातो 'कणेठ' उ० १ १०३ सूत्रेण ठ०]

कण्वतमः अतिशयेन मेधावी (जन) १ ४८ ४ [कण्वप्राति० अतिशायने तमप्। 'कण्व' इति मेधाविनाम निघ० ३ १५]

कण्वम् मेधाविनम् (जनम्) १ ११२.५ **कण्वाः**=मेधाविनो विद्वास, प्र०—कण्व इति मेधाविनाम, निघ० ३ १५, १ १४ २ [कण्व इति मेधाविनाम। निघ० ३ १५ कणति निमीलति चेष्टते य इति विग्रहे कण निमीलने (चुरा०) धातो 'अशूप्रुषिलटिकणि०' उ० १ १५१ सूत्रेण क्वन् प्रत्यय]

कण्वहोता कण्वो मेधावी चाऽसौ होता दाता च (विद्वान्) ५ ४१ ४ [कण्व-होतृपदयो समास । कण्व इति व्याख्यातम्। होता=हु दानादानयो (जु०) धातो-स्तृच्]

कण्वासः शिल्पविद्याविदो मेधाविन (जना) १ ४६ ९ [कण्व इति व्याख्यातम्। ततो जसोऽसुगागम]

कत् कदा, प्र०—छान्दसो वर्णलोपो वा, इत्याकार-लोप १ १२१ १ कुत्र, प्र०—पृषोदरादित्वात् 'क्व', इत्यस्य स्थाने कत् १ १०५ ५ केन (पथा=मार्गेण) १ १०५ ६ [किम सर्वनाम्न सप्तम्यन्तात् 'सर्वैकान्य०' अ० ५ ३ १५. सूत्रेण दा प्रत्यय । छान्दसत्वादाकारलोप]

कतमत् बहुनामुपादानाना मध्ये किमिति प्रश्ने (आरम्भणम्) १७ १८ **कतमस्य**=किस (देवस्य=सदा मुक्त परमात्मा) का स० प्र० ३३०, १ २४ १ **कतमः**=कौन सा (देव =परमात्मा) स० प्र० २७३, अथर्व० १० २३.४ २० बहूना मध्ये क (सभापती राजा) ७ २९ [किम् सर्वनाम्नो 'वा बहूना जातिपरिप्रश्ने डतमच्' अ० ५ ३ ९३ सूत्रेण डतमच्। ततो नपुसके 'अद्ड्डतरादिभ्य०'

१६८५ आच्छादित कर रखा है, आर्याभि० २.३२, १७१८ **और्णोः**=आच्छादयतु ६१७६ [ऊर्णुञ् आच्छादने (अदा०) धातोर्लङ्]

औशिजस्य कामयमानेषु कुशलस्य (राजभृत्यस्य) ४२१७ कामयमानाऽपत्यस्य ४२१६ य उशिज प्रकाशे ज्ञान स उशिक्, तस्य विद्यावत पुत्र इव (यजमान) ११८१ य सर्वा विद्या वष्टि स उशिक्, तस्य विद्यापुत्र इव, भा०—विद्याज पुत्र ३२८. विद्याकामस्य पुत्र ११२२५ कमनीयस्य पुत्र (परिव्राट्=सन्यासी) १११६६ कामयमानस्य पुत्र ६४६ **औशिजाय**=मेधाविपुत्राय, प्र०—उशिज इति मेधाविनाम, निघ० ३५, १११२११ [वश कान्तौ (अदा०) धातो 'वश कित्' उ० २१७ सूत्रेण इजि प्रत्यय किच्च । ग्रह्यादिसूत्रेण सम्प्रसारणम् । वष्टि य कामयते यत्काम्यते वा स उशिक् । उशिज्प्राति० 'कृतलब्धक्रीतकुशला' अ० ४३३८ सूत्रेण कुशलार्थे वा 'तस्यापत्यम्' अ० ४१६२ सूत्रेणापत्यार्थे वा 'तत्र जात' अ० ४.३२५ सूत्रेण जातार्थे वा अण् प्रत्यय.। आदिवृद्धि । उशिज इति मेधाविनाम निघ० ३१५ 'उशिक् इति कान्तिकर्मा निघ० २६ औशिज = उशिज पुत्र । उशिग् वष्टे कान्तिकर्मण नि० ६१०]

औष्णिहाय उष्णिग्वोवित्राय (सवित्रे=ऐश्वर्योत्पादकाय पुरुषाय) २६६० [उत्+ष्णिह प्रीतौ (दिवा०) धातो 'ऋत्विग्दधृग्०' अ० ३२५६ सूत्रेण क्विन् प्रत्यय । निपातनादुपसर्गान्तलोप पत्व च उष्णिगुत्स्नाता भवति, स्निह्यतेर्वा स्यान् कान्तिकर्मण नि० ७१२ उष्णिहप्राति० 'प्रज्ञादिभ्यश्च' अ० ५४.३८ सूत्रेणाण् ।]

औहत ऊहते १.१६४२६ [ऊह वितर्के (भ्वा०) धातोर्लङ्]

औहिष्ट वितर्कयति ६१७८ [ऊह वितर्के (भ्वा०) धातोर्लुङ्]

ककरान् पक्षिविशेषान् २४२० [कक लौल्ये (भ्वा०) धातोर्वाहुलकादौणादिकोऽरन् प्रत्यय]

ककुत् महान् (अग्नि =सर्वस्वामीश्वर, प्रकाशादिगुणवान् भौतिको वा) ककुह इति महन्नामसु पठितम् निघ० ३.३, ककुह-शब्दस्य स्थाने ककुत्, पृषोदराद्याकृतिगणान्तर्गतत्वात् सिद्ध ३१२ प्र०—ककुहशब्दस्यान्त्यलोपो वर्णव्यत्ययेन हस्य द १३१४. [ककुह =महन्नाम निघ० ३३ पृषोदरादित्वादन्त्यलोपो हस्य च द । अथवा= कस्य देहस्य सुखस्य वा कु भूमिं ददातीति विग्रहे कम्+कु+दा+क प्रत्यय । कक लौल्ये (भ्वा०) धातोर्गौणा० उति प्रत्यय.]

ककुत्पतिः दिशा पालक (अग्नि =प्रसिद्ध पावक) १५२०. [ककुभ =दिङ्नाम निघ० १६ ककुभ्-पति-पदयो समास । भस्य दकारो वर्णव्यत्ययेन]

ककुन्मान् प्रशस्ता ककुतो लौल्या गुणा विद्यन्ते यस्मिन् (पराक्रम), प्र०—अत्र कक्धातोर्गौणादिक उनि उ० १६४, ६६ [कक लौल्ये (भ्वा०) धातोर्ऋवाहुलकादौणादिक (१६४) उति प्रत्यय । ततोऽतिशायने मतुप्]

ककुप् दिश १४६ लालित्ययुक्ता (छन्दोऽर्थविज्ञापनम्) २३३३ दिगिव यश. १५४ भा०—उत्तमानि वस्त्राणि २१२१ **ककुभम्**=दिग्वच्छुद्धम (रूपम्) ८४६. स्तम्भकम् (इन्द्रिय=धनम्) २८.३३ **ककुभः**=दिश ४१६४ सर्वा दिश, प्र०—ककुभ इति दिङ्नाम, निघ० १६, ३४२४ **ककुभा**=ककुप्छन्दसा २८४४ **ककुभाम्**=दिशाम् ५४४२ **ककुभे**=ककुवुष्णिक्-छन्दोऽर्थाय २४.१३. ['ककुभ' इति दिङ्नाम निघ० १६ ककुप् ककुभिनी भवति । ककुप् च कुञ्जश्च कुजतेर्वोञ्जतेर्वा नि० ७१२ प्राणो वै ककुप् छन्द. श० ८.५२४ कीकसा. ककुभ श० ८.६२१० पुरुषो वै ककुप् । ता० ८१०.६]

ककुभाय प्रसन्नमूर्त्तये (पुरुषाय) १६.२०.]

ककुहः महती (जनित्री +मातृ), प्र०—ककुह इति महन्नाम, निघ० ३३, ३५४१४ सर्वा दिश ११८१.५ **ककुहाः**=दिश ११८४३ ['ककुह' इति महन्नाम निघ० ३३]

ककुहः महान् (जन) ५७३७ **ककुहान्**=महत (यतस्त्रुच =ऋत्विज) प्र०—ककुह इति महन्नाम निघ० ३३, २३४.११ ['ककुह' इति महन्नाम निघ० ३३]

ककुहासः महान्तो विद्वास (जना) ११६३ सर्वा दिश ४.४४२ ['ककुह' इति महन्नाम निघं० ३३ ततो जसोऽसुगागम]

कक्कटः मृगविशेष २४३२ [कखनि हसनीति विग्रहे कक्ष हसने (भ्वा०) धातोर्वाहुलकादौणादिक (उ० ४८१) अटन् प्रत्यय । कुगागमे चर्त्वे च रूपम्]

कक्षः क्रान्तस्तटादि ६४५३१ **कक्षाणाम्**=गृहप्रान्तावयवेषु स्थितानाम् (जनानाम्) १६१६ **कक्षेषु**=सामन्तेषु ११७६ [कषनि हिनस्तीति विग्रहे कष हिंसार्थे (भ्वा०) धातो 'वृतृवदिवचि०' उ० ३६२. सूत्रेण स

१ ११६ १० कामयमानानाम् (जनानाम्) १ १६३ ८ कमनीयानाम् (जनानाम्) २९ १९ [कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोर्बाहुलकाद् औणादिक ईन प्रत्यय । 'कनीनाम्' प्रयोगे नुटोऽभाव आगमशासनस्यानित्यत्वात्]

कनीयसः अतिशयेन कनिष्ठात् (विद्यार्थिन) ७ २० ७ [युवन्प्रातिः अल्पाद्वातिशायने ईयसुन्। 'युवाल्पयो कन्०' इति कन्नादेश]

कनीय. अतिशयेन कनिष्ठम् ['कनीयस' इति पदे ४ २४ ९ [पूर्वपदे व्याख्यातम्]

कनीयान् अतिशयेन कनिष्ठ (बन्धुविद्वान्) ४ ३३ ५ व्याख्यातम्]

कन्या कुमारिका (शिष्या) १ १६१ ५ कमनीया (विदुषी कन्या) ६ ४९ ७ [कन्यते दीप्यते काम्यते गच्छति वेति विग्रहे कनी दीप्तिकान्तिगतिषु (भ्वा०) धातो 'अघ्न्यादयश्च' उ० ४ ११२ सूत्रेण यक्। स्त्रियां टाप्। कन्या कमनीया भवति, क्वेय नेतव्येति वा, कमनेनानीयत इति वा, कनतेर्वा स्यात्कान्तिकर्मण नि० ४ १५]

कन्या इव यथा कुमार्य्य ४ ५८ ९ कुमार्य्य इव १७ ९७ [कन्या-इव पदयो समास। कन्येति व्याख्यातम्]

कपनेव वायुगतय इव ५ ५४ ६ [कपना-इव-पदयो समास। कपना कम्पना क्रियायो भवन्ति नि० ६ ४]

कपर्दिनम् कृतब्रह्मचर्य्य जटिल विद्वासम् (वैद्यम्) १ ११४ ५ जटाजूट ब्रह्मचारिणम् (विद्वासम्) ६ ५५ २ **कपर्दिनः**=प्रशसितो जटाजूटो विद्यते यस्य तस्य (अ०—सेनापते) १६ १० **कपर्दिने**=जटिलाय ब्रह्मचारिणे १६ २९ कृतब्रह्मचर्याय (सेनापतये) १६ ४८ जटायुक्ताय जनाय १६ ४३ [कपर्दप्रातिः प्रशसाया मत्वर्थीय इनि]

कपिञ्जल. पक्षिविशेष २४ ३८ [कपिशब्दोपपदे जॄ वयोहानौ (क्रया०) धातो खच्प्रत्ययो बाहुलकाद् रेफस्य लत्व च। कपिञ्जल कपिरिव जीर्ण, कपिरिव जवत ईषत् पिङ्गलो वा, गमनीय शब्द पिञ्जयतीति वा नि० ३ १८]

कबन्धिनः बहूदका (मरुत=मनुष्या) ५ ५४ ८ [कबन्धमित्युदकनाम निघ० १ १२ ततो भूम्नि इनि। कबन्ध मेघम्। कवनमुदक भवति तदस्मिन् धीयते। उदकमपि कबन्धमुच्यते बन्धिरनिभूतत्वे कमनिभूत च नि० १० ४]

कम् सुखम्, प्र०—कमिति वारिमूर्द्धसुखेषु १.२८ ८ सुखस्वरूपम् (देवम्=ईश्वरम्) ५ १८ सुखकारकम् (वपु=शरीरम्) १.१०२ २ सुखकर सुन्दरम् (अत्क=वस्त्रम्) ६ २९ ३ सुखसम्पादकम् (सोमवल्ल्यादिरसम्) १ ४७ १० कल्याणम् १ ८८ ३ सब से सुख दाता (ईश्वर) को आर्याभि० १ ३१, ऋ० १ ७ ८ १ सुखकारिणम् (नव=नौरादिकम्) ११८२ ५ सुखप्रदम् (देशम्) १ ३९ १ [कम् उदकनाम निघ० १ १२ सुखनाम निघ० ३ ६. पदपूरण नि० १ १९ उदकम् निघ० ४ १७ अन्नम् नि० ६ ३५]

कमयाध्वे कामयध्वम् २ १४ ८ [कमु कान्तौ (भ्वा०) धातो 'कमेर्णिङ्' इति स्वार्थे णिचि लट्। वृद्धयभाव-श्छान्दस]

कयस्य विज्ञातु (विदुषो जनस्य) १.१२९ ५

कर कुर्या ४ ३३.५ कुरु १ ८२ १ [डुकृञ् करणे (तना०) धातोर् लोट्। विकरणव्यत्ययेन शप्]

करञ्जम् य किरति विक्षिपति धार्मिकान्तम् (पर्णयम्=दम्युम्) प्र०—अय 'कृ विक्षेपे' इत्यस्माद्बाहुलकादौणादिकोऽञ्-प्रत्यय १ ५३ ८ [कृ विक्षेपे (तुदा०) धातोर्बाहुलकादौणादिकोऽञ्प्रत्यय]

करणम् साधनम् ६ १८ १३ करोति येन तत् ५ ३१ ७ **करणानि**=साधनानि कर्माणि वा २ १५ १ क्रियन्ते यैस्तानि (अपासि=कर्माणि) ४.१९ १०. कुर्वन्ति यैस्तानि साधनानि ५.३१.९ [डुकृञ् करणे (तना०) धातो करणे ल्युट्। करण कर्मनाम निघ० २ १]

करणा कुर्वन्ती (अश्विना=स्त्रीपुरुषौ) ११९ ७. [डुकृञ् करणे (तना०) धातो 'कृत्यल्युटो बहुलम्' नि कर्त्तरि ल्युट्। 'सुपा सुलुग्' इत्याकार]

करत् कुर्य्यात् ४ ३९ ६ करोतु, प्र०—लेट्-प्रयोगोऽयम् ७ २५ कुर्य्यु, प्र०—लेट्-प्रयोगोऽय 'बहुल छन्दसि' इति विकरणाभाव १ ८९ ३ **करतः**=कुर्याताम् २१ ४३ **करताम्**=कुरुत, प्र०—अयाऽपि लडर्थे लोट्, विकरणव्यत्ययश्च १ २३ ६ कुर्याताम् ३३ ४६ करति=कुर्यात् ४ २२ १ **करते**=करोति ४ ४४ ३ कुर्य्यात् ४ १९ १ **करथः**=कुर्याताम् ६ ५० ३ **करन्**=कुर्य्यात् ५.३० ९ कुर्वन्तु ११८६ २ कुर्य्यु, प्र०—लेट्प्रयोगोऽयम् 'बहुल छन्दसि' इति विकरणाऽभाव १ ८९ ३ **करसि**=कुर्या ६ ३५ १. **करसे**=कुर्या ३ ४३ ५ **कर**=कुर्यात् ३.४१ ६ कुर्या ६ ४५ २७ करोति ६ २२ १० कुरु १ ८२ १ [डुकृञ् करणे (तना०) धातोर्लेट्। विकरणव्यत्ययेन शप्। करत कुरुथ नि० ३ १५]

करम्भम् भोग कर्त्तुं योग्यम् (पदार्थम्) ६ ५७ २

अ० ७ १ २५ सूत्रेण स्वमो स्थानेऽद्ड्]

कतमः अत्यन्ताऽऽनन्दयुक्त (परमात्मा) ऋ० भू० २१८ अतिशयेन सुखकारी (सत्यराजा=सत्यन्याय-प्रकाशक सभेश) २० ४ [क० सुखनाम (निघ० ३ ६) ततोऽतिशायने वा तमप्]

कतमाम् बहूना मध्ये काम् (द्यां=प्रकाशम्) १ ३५ ७ ['कतम इति व्याख्यातम्। तत स्त्रिया टाप्]

कतरा द्वयोर्द्वयोर्मध्ये कतरौ (द्यावापृथिव्यौ कार्य-कारणे वा) १ १८५ १ अनयोर्मध्ये एक (सभेश मेनेगो वा) ६ ६६ ८ [किम सर्वनाम्न 'किंयत्तदोनिर्द्धारणे द्वयो-रेकस्य डतरच्' अ० ५ ३ ९२ सूत्रेण निर्धारणे डतरच्]

कतिधा कतिप्रकारै ३१ १० [कतिप्राति० प्रकारेऽर्थे 'सङ्ख्याया विधार्थे धा' अ० ५ ३ ४२. सूत्रेण धा। सङ्ख्या-सज्ञा तु 'बहुगुणवतु डति सङ्ख्या' अ० १ १ २२ सूत्रेण। कति=किम सर्वनाम्न 'किम सङ्ख्यापरिमाणे डति च' अ० ५ २ ४१ सूत्रेण डति प्रत्यय]

कत्पयम् कतिपयम् (मेघम्) प्र०—अत्र 'छान्दसो वर्णलोपो वा' इती लोप ५ ३२ ६ [कत्पयम्=सुखपयसम्। सुखमस्य पय नि० ६ ३]

कथा कथम् १ ५४ १ केन प्रकारेण ४ ३ ५ किस प्रकार से, आर्याभि० २ ३२, १७ १८ केन हेतुना १ ४१ ९ [किम सर्वनाम्न 'था हेतौ च च्छन्दसि' अ० ५ ३ २६ सूत्रेण हेतौ प्रकारवचने च था प्रत्यय। तस्य विभक्ति-सज्ञकत्वात् 'किम क' अ० ७ २ १०३ सूत्रेण किम कादेश। कथा कथम् नि० ९ ३०]

कथो कथम् ५ २९ १३

कदा कस्मिन् काले ३ ३४. [किम सर्वनाम्न सप्त-म्यन्तात् काले वाच्ये 'सर्वैकान्य०' अ० ५ ३ १५ सूत्रेण दा प्रत्यय]

कदाचन कदाचिदपि ३४ ४१ कभी भी स० प्र० २३८, १० ४८ ५ ['कदा' इति व्याख्यातम्। कदा-चन-पदयो समास]

कद्रीची अचाक्षुष्यगमना (पृथिवी) १ १६४ १७ [किम्शब्दोपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्०' इत्यादिना क्विन्। 'विष्वग्देवयोश्च०' अ० ६ ३ ९२ सूत्रेण पूर्वपदस्य टेरद्रिरादेश स्त्रिया ङीप्। 'अच' इत्यकारलोपे 'चौ०' अ० ६ ३ १३८ सूत्रेण दीर्घ]

कधप्रियाः ये कथाभि कथाभि प्रीणयन्ति ते (विद्वज्जना) प्र०—अत्र वर्णव्यत्ययेन थकारस्य धकार 'ङ्यापो सज्ञाछन्दसोर्बहुलम्' अ० ६ ३ ६३ अनेन ह्रस्व १ ३८ १ **कधप्रिये**=कथन कथा प्रिया यस्या सा (उप) १ ३० २० [कथोपपदे प्रीञ् तर्पणे कान्तौ च (क्रया०) धातोर्मूलविभुजादित्वात् क। ङ्यङ् आदेश पूर्वपदस्य ह्रस्वत्व थकारस्य च धकार।]

कनिक्रदत् भृश शब्दयन्, भा०—उच्चैः शब्दयन् (हरि=अश्व) ३३ ९० भृश शब्दायमान (उपदेशक) २ ४२ १ भृश गच्छन् (अग्नि=विद्युत्सन्तान) ११ ४६ [क्रदि आह्वाने रोदने च (भ्वा०) धाता 'दाधर्तिदर्धर्ति०' अ० ७ ४ ६५ सूत्रेण लुडि च्लेरडादेशो द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च निपात्यते। कनिक्रदत्=न्यक्रन्दीत् नि० ९ ३]

कनिक्रदम् भृश विकल प्राप्तव्ययम् (पशुम्) १३ ४८ [क्रदि वैक्लव्ये (भ्वा०) धातोर्यङ्लुडन्तादच्]

कनिष्ठाय अतिशयेन बालकाय १६ ३२ [अल्पप्राति० अतिशायन इष्ठन्। 'युवाल्पयो कन्०' अ० ५ ३ ६४ सूत्रेण वा कन्नादेश]

कनीन इव यथा प्रकाशमानो जन १ १७७ १८ [कनीन-इवपदयो समास। कनीन=कनी दीप्तिकान्ति गतिषु (भ्वा०) धातोर्बाहुल० ईनप्रत्यय]

कनीनकम् कनति प्रकाशते येन तत् (चक्षु=दर्शकम्) प्र०—अत्र कनीधातोर्बाहुलकादौणादिक ईनक-प्रत्यय ४ ३२ [कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोर्बाहुलकादौणादिक ईनक प्रत्यय]

कनीनकः य कनति दीपयति स एव कनीनक, भा०—वृष्ट्युत्पादक (सूर्य), प्र०—अत्र कनीधातोर्बाहुलकादौ-णादिक ईनप्रत्ययस्तत स्वार्थे कन् ४ ३ **कनीनकाभ्याम्**=प्रदीप्ताभ्या कमनीयाभ्याम् (कर्णाभ्या=श्रवणसाधका-भ्याम्) २५ २ तेजोमयाभ्या कृष्णगोलकतारकाभ्याम् २५ १ [कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोर्बाहुल० औणादिक ईन प्रत्यय। तत स्वार्थे कन्। कनीनक कन्यके नि० ४ १५ शुष्णो दानव प्रत्यङ् पतित्वा मनुष्या-णामक्षीणि प्रविवेश स एष कनीनक कुमारक इव परि-भासते श० ३ १ ३ ११]

कनीनकेव कमनीयेव (विज्ञानकर्मणी) ४ ३२ २३. [कनीनक इति व्याख्यातम्। तस्य इवपदेन सह समास]

कनीन. दीप्तिमान् (सूर्य) ३ ४८ १ **कनीनाम्**=कान्तीनाम् २ १५ ७ कन्येव वर्त्तमानाना रात्रीणा सूर्यादीना वा १ ६६ ४ यौवनत्वेन दीप्तिमता ब्रह्मचारिणा कन्यानाम्

श्रवणनाधकाभ्याम् २५.२ कुर्वन्ति श्रवण याभ्याम् १६.६१ **कर्णाः**=ये कार्याणि कुर्वन्ति ते (पशव) २४.३ **कर्णे**=कुर्वन्ति येन तस्मिन् ५.३१.६ **कर्णेभिः**=श्रोत्रै, प्र०—अत्र ऐनभाव १.८६.८ वानो ने आर्याभि० २.२७, २५.२१ **कर्णैः**=नौचालकै (वैवनै) २.३४.३ **कर्णौ**=करोति श्रवण याभ्यान्तौ २५.२ कर्त्री (पृथिवीसूर्य्यौ) ३३.७१ **कर्णा**=श्रोत्रौ ४.२६.३ कर्णौ श्रोत्रे ३३.१६ कर्णानि ४.२३.८. [डुकृञ् करणे (तना०) धातो कृ विक्षेपे (तुदा०) धातोर्वा 'कृवृजृमि०' उ० ३.१० सूत्रेण नक् प्रत्यय। कर्ण कृन्ततेर्निकृन्तद्वारो भवति। ऋच्छतेरित्यागायण। ऋच्छन्तीव ने उदगन्तमिति ह विज्ञायते नि० १.६]

कर्णयोनयः कर्ण श्रोत्र योनिर्येषा ते (धार्मिका वीरा) २.२४.८ [कर्ण-योनिपदयो समान]

कर्त्त कुरुत, अत्र 'बहुल छन्दसि' इति विकरणस्य लुक्, लोडादेशस्य तस्य स्थाने तबादेश १.६०.५ **कर्त्तन**=कुर्यात् ७.४८.४ कुरुत २.१४.६ कुर्वन्तु १२.६६ [डुकृञ् करणे (तना०) धातोर्लोट्। 'बहुल छन्दसीति' विकरणस्य लुक्]

कर्त्तम् कूपम्, प्र०—कर्तमिति कूपनाम, निघ० २.२३, १.१२१.१३

कर्त्तरि कारके (कर्म सम्पादके जने) १.१३६.७ [डुकृञ् करणे (तना०) धातोस्तृच्प्रत्यये सप्तम्येकवचनम्]

कर्त्तवै कर्त्तुम् २.२२.१ [डुकृञ् करणे (तना०) धातोस् तुमर्थे तवै प्रत्यय]

कर्त्ता निष्पादक (इन्द्र=सेनापति) १.१००.६ **कर्त्तारम्**=भा०—स्रष्टारम् (ईश्वरम्) २६.६ **कर्त्तृभि.**=सुकर्मकारिभिर्जीवै सह ७.३६ पुरुषार्थिभि (जनै) १.५५.८ कर्मकारकै (सज्जनै) ६.१६.१ [डुकृञ् करणे (तना०) धातो कर्तरि तृच्। ताच्छील्ये तृन् वा]

कर्त्तोः कर्त्तु समर्थस्य (परमेश्वरस्य) ३३.३७ [डुकृञ् करणे (तना०) धातोस्तुमर्थे तोसुन् प्रत्यय। 'कत्वातोसुन्०' इत्यव्ययसज्ञा]

कर्त्तोः कर्त्तव्य गमनाद्यगन्तव्य कर्म्म २.३८.४ [डुकृञ् करणे (तना०) धातोस् तोसुन् प्रत्यय]

कर्त्तात् छेदकात् (अवपद=आपत्कालात्) २.१६.६

कर्त्वम् कर्त्तु योग्य कार्य्यम्, प्र०—अत्र करोतेस्त्वन् प्रत्यय. १.१०.२ **कर्त्व**=कर्त्तु योग्य (विद्युदादि.) प्र०—अत्र कृत्यार्थे त्वन् प्रत्यय १.१६१.३ **कर्त्वानि**=कर्त्तु योग्यानि (धनानि) २.३०.१० [कर्त्व कर्मनाम निघ० २.१ डुकृञ् करणे (तना०) धातो 'कृत्यार्थे तवैकेन्०' स० ३.४.१४ सूत्रेण त्वन प्रत्यय]

कर्म धर्म्य कृत्यम् १.१७३.६ कर्तुंयदीप्सितमभीष्ट योग्य चेष्टामयमुत्क्षेपणादिकमस्ति तत्. भा०—पुरुषार्थम् प्र०—कर्तुमीप्सिततम कर्म, स० १.४.४६ क्रियमाणम् १.६२.६ अभीप्सिततमा क्रिया १.६.५ **कर्मण.**=चेष्टितस्य (कार्यस्य) १.११.४ **कर्मणा**=ईप्सिततमेन व्यापारेण ६.६६.१. मतिक्रियया ७.३३.१३ [डुकृञ् करणे (तना०) धातो 'सर्वधातुभ्यो मनिन्' उ० ४.१४५ सूत्रेण मनिन् प्रत्यय। क्रियते तत् कर्म क्रिया वा। अर्पनादित्वादुभयलिङ्गम्। कर्मन् कर्मनाम निघ० २.१. कर्म कस्मात्. क्रियत इति सत नि० ३.१ यज्ञो वै कर्म श० १.८.१ पुण्यो वै पुण्येन कर्मणा पाप पापेनेति श० १.८.२.१४. वीर्य वै कर्म श० ११.५.४.५ कर्मणि विद्य गो० पू० १.३२]

कर्म कुर्म्म, प्र०—अत्र लुटि चर्त्वेन् 'छन्दस्युभयथा' इत्यार्धधातुकत्वेन टित्त्वाभावाद् गुण १.१७३.४ कुर्यात् ६.५१.८ [डुकृञ् करणे (तना०) धातोर्लुट्। छान्दसत्वाच्च्लेर्लुक्, अडभावो गुणश्च]

कर्मकृतः ये कर्माणि कुर्वन्ति ते, भा०—पुरुषार्थिन (जना) ३.४७ [कर्मोपपदे डुकृञ् करणे (तना०) धातो क्विप्। ह्रस्वस्य तुक्]

कर्मणि कर्मणि क्रियाया क्रियायाम् १.१०१.४ [कर्मणि पदस्य वीप्साया द्वित्वम्]

कर्मणे कर्तव्याय १.५५.३ क्रियासिद्धये ३०.७ कर्तुं योग्यत्वेन सर्वोपकारार्थाय, भा०—क्रियायै १.१ पञ्चविधलक्षणचेष्टामात्राय, प्र०—उत्क्षेपणमवक्षेपणमाकुञ्चन प्रसारण गमनमिति कर्माणि वैशे० १.७ इत्यन पञ्चविध कर्म गृह्यते १.१३ ['कर्म' इति पदे व्याख्यातम्]

कर्मण्यम् कर्मणा सम्पन्नम् (वीरम्), प्र०—अत्र 'कर्मवेषाद्यत्' अ० ५.१.१००. इति कर्मशब्दाद् यत् 'ये चाभावकर्मणो' इति प्रकृतिभावश्च १.६१.२० **कर्मण्य**=य कर्मणा मपद्यते स (वीर=सन्तान) ३.४७ कर्मसु कुशल (वीरजन) ७.२.६ ['कर्म' इति व्याख्यातम्। तत. सम्पादिन्यभिधेये 'कर्मवेषाद्यत्' अ० ५.१.१०० सूत्रेण यत्। 'ये चाभावकर्मणो' अ० ६.४.१६८ सूत्रेण प्रकृतिभावाट्टेर्लोपो न भवति]

कर्मण्याम् य कर्मभि सम्पद्यते ताम् (मूर्दं=मृति-

दध्यादियुक्त भक्ष्यविशेषम् ३ ५२ ७ **करम्भस्य**=दधिसमृष्टस्य मक्तुन १९ २२ **करम्भः**=कर्त्ता (ईश्वर) १ १८७ १० करोति मथन येन म. १९ २१ **करम्भात्**=य करम्भमन्नविशेषमत्ति स (देव =विद्वज्जन) ६ ५६ १ **करम्भेण**=अविद्याहिंसनेन, प्र०—अत्र 'कृ हिंसायाम्' इत्यस्माद्धातोर्बाहुलकादौणादिकोऽम्भच्-प्रत्यय ३ ४४. [डुकृञ् करणे (तना०) धातो, अथवा कृ हिंसायाम् (क्र्या०) धातोर्बाहुलकादौणादिकोऽम्भच् प्रत्यय]

करम्भिणम् बहव करम्भा पुरुषार्थेन मशोधिता दध्यादय पदार्था विद्यन्ते यस्य तम् (आप्त विद्वासम्) ३ ५२ १ सुष्ठुक्रियया निष्पन्नम् (भोज्यमन्नरसादिकम्) २० २९ [करम्भप्राति० भूम्नि इन् प्रत्यय। 'करम्भम्' इति व्याख्यातम्]

करस्नम् बाहुम्, प्र०—करस्नाविति बाहुनाम, निघ० २४, १ १६१ १२ **करस्ना**=बाहू, प्र०—करस्नौ बाहू कर्मणां प्रस्नातारौ, नि० ६ १४, ३ १८ ५. यौ करान् कर्त्तॄन् स्नापयत शोधयतस्तौ (गभस्ती=हस्तौ) ६ १९ ३ [करस्नौ बाहुनाम निघ० २ ४ करस्नौ बाहु कर्मणा प्रस्नातारौ नि० ६ १७ करोपपदे ष्णा शौचे (अदा०) धातो क प्रत्यय। 'सुपा सुलुगि' त्याकार]

करः य करोति स (विद्वज्जन) ६ १८ १४ [डुकृञ् करणे (तना०) धातोरच् प्रत्यय]

करा कुर्वाणा (अध्यापका) १ ११६ १३

कराम कुर्याम, प्र०—अत्र विकरणव्यत्ययेन शप् १९ ६२ **करामहे**=कुर्याम, प्र०—अत्र लेटि व्यत्ययेन शप्, अथवा भ्वादिर्मन्तव्य ९ ५ [डुकृञ् करणे (तना०) धातोर्लेट्। विकरणव्यत्ययेन शप्]

करांसि करणीयानि कर्म्माणि ४ १९ १० [करम् कर्मनाम निघ० २ १ डुकृञ् करणे (तना०) धातोरसुन् प्रत्यय]

करिक्रत् भृश करोति ३.५८ ९ [डुकृञ् करणे (तना०) धातोर्यङ्लुगन्तस्य शतरि 'दाधर्त्तिदर्द्धर्ति०' अ० ७ ४ ६५ सूत्रेण निपातनादभ्यासककारस्य चुत्वाऽभावो रिगागमश्च निपात्यते]

करिक्रत् भृश कुर्वन् (इन्द्र.=जगदीश्वर) १ १३१ ३ **करिक्रतः**=येऽतिशयेन कुर्वन्ति (जना) १.१४० ५. [पूर्वपदे व्याख्यातम्। करिक्रत् कर्मनाम निघ० २ १]

करिष्यतः ये करिष्यन्ति तान् (देवान्=दिव्यान् गुणान्) ११.३ [डुकृञ् करणे (तना०) धातोर्लृट स्थाने 'लृट सद्वा' इति सूत्रेण शतरि रूपम्]

करिष्यथ करिष्यमाणं साधयिष्यथ ११ ६८ **करिष्यसि**=करोषि, प्र०—अत्र 'बाच्छन्दसि सर्वे विधयो भवन्ति, इति लडर्थे लृट् १ १ ९ [डुकृञ् करणे (तना०) धातोर्लृट्]

करिष्यन् करूँगा ऐसी इच्छा करता हुआ (सन्यासीजन) स० वि० १९५, ९ ११३ १ [डुकृञ् करणे (तना०) धातोर्लृट स्थाने शतृ]

करिष्या कर्त्तुं योग्यानि (कार्याणि), प्र०—अत्र 'सुपा सुलुग्०' इति डादेश १ १६५ ९

करिष्या करिष्यसि, प्र०—सिज्लोपो दीर्घश्चाऽत्र छान्दस ३३ ७९

करुणस्य कृपामस्य कर्मण १.१०० ७ करुणा करने वाले (ईश्वर) का, आर्याभि०, अथर्व० १२ ३ ४७ [कृ विक्षेपे (तुदा०) धातो 'कृवृदारिभ्य उनन्' उणा० ३ ५३. सूत्रेण उनन् प्रत्यय। करुणम् कर्मनाम निघ० २ १.]

करूळती य करूळूढा कामयते स करूळन सोऽस्याऽस्तीति (विद्वज्जन) ४ ३० २४

कर्कन्धु येन कर्म दधाति (मधु=विज्ञानम्) १९.९१ **कर्कन्धुभिः**=ये कर्कवदरीक्रिया दधति तै (यवादिभिरन्नै) २१ ३२ **कर्कन्धुम्**=य कर्कान् कारुकानन्तति व्यवहारे वध्नाति तम् (वय्यम्=ज्ञातार विद्वासम्) १ ११२ ६ **कर्कन्धूनि**=कर्कन्धुफलानि स्थूलानि पक्वानि वदरीफलानीव १९ २३ [कर्क कण्टक दधातीति विग्रहे कर्कोपपदाद् डुधाञ् धारणपोषणयो (जु०) धातोर् 'अन्दूदम्फू०' उ० १ ९३ सूत्रेण कू प्रत्यय। छान्दस ह्रस्वत्वम्। यत्स्नेहस्तत् कर्कन्धु श० १२ ७ १ ४]

कर्कन्धुरोहितः कर्कन्धुवदरीफलमिव रोहित. (पशु) २४ २ [कर्कन्धुरोहितपदयो समास। कर्कन्धु पूर्वपदे व्याख्यातम्। रोहित =रोहति प्रादुर्भवतीति विग्रहे रुह प्रादुर्भावे (भ्वा०) धातो 'रुहेरश्लो वा' उ० ३.९४ सूत्रेण क्त प्रत्यय]

कर्करिः भृश कुर्वन् (उपदेशको जन) २ ४३ ३ कर्त्तव्य कर्म, धर्म को ही पुरुषार्थ से करता हुआ (ईश्वर) आर्याभि० १ ५३ ऋ० २ ८ १२ ३ [डुकृञ् करणे (तना०) धातोर्यङ्लुगन्ताद् बाहुलकाद् औणा० इ प्रत्यय]

कर्णम् श्रुतस्तुतिम् (सखायम्=सुहृद्वर्द्धमानं पतिम्) २९ ४० **कर्णयोः**=श्रोत्रयो २१ ५० **कर्णः**=दीर्घकर्ण (गर्दभ =पशुविशेष) २४ ४० **कर्णाभ्याम्**=

वार्णम्) २६.२ कल्याण अर्थात् संसार और मुक्ति के सुख देने हारी (वाच=ऋग्वेदादि चारों वेदों की वाणी को) स० प्र० ६७ २६२. **कल्याण्य.**=कल्याणकारिण्य. (योग.=स्त्रिय.) ४.४८.८ कल्याणावस्थाशीला.. भा०—सौभाग्यवन्त: (योग.=स्त्रिय.) १७६६. [कल्याणपदं व्याख्यातम्। ततः स्त्रिया ङीप्। कल्याणी तत्त्वम्। गे० ५.२५. कौ० २७५.]

कवचिने सम्बद्धं कवचं शरीररक्षासाधनं विद्यते यस्य तस्मै (पुरुषाय) १६.३५. [कवचशब्दात् संसर्गे इनि प्रत्यय। कवचम्=कुत्रचित् भवति, काचित्तं भवति, काऽप्यत्र भवतीति वा नि० ५.२६.]

कवत्वे कुत्सितकर्मव्यापनात् ७.३२.६. [कु शब्दे (अदा०) धातोरौणा० क्वसु प्रत्यय.। बहुलवचनाद् गुण.]

कवन्धम् मेघम् ५.८५.३ [कवन्धम् उदकनाम निघं० १.१२ तत्रो मत्वर्थीयप्रत्ययस्य लुक्। कबन्धं मेघम्, कबन्धमुदकं भवति तस्मिन् धीयते उदकमपि कबन्धमुच्यते नि० १०.८.]

कवय: सर्वशास्त्रविद: (मन्त्र=शास्त्रविदोपिणो जना.) ६४६.११. सकलशास्त्रेषु निपुणा. (विद्वान्.) ५.५२.१३. विक्रान्तप्रज्ञामेधाविन (जना.) ३.५४.१०. विद्वांस: क्रान्तदर्शना क्रान्तप्रज्ञा वा ऋ० भू० १५८ बृहद्गिन उपदेशका ८.३६.८ मेधाविन. (विद्वांस.), प्र०—कविरिति मेधाविनाम निघ० ३.१५ १२ ६७ पूर्णविद्या. (नर=नायका जना.) ५ ५८.८. अनूचाना विद्वांस: ३.८.४. **कवये**=विशिष्टाय (विदुषे) ५.१५.१. सर्वविद्यायुक्ताय (धार्मिकाय राज्ञे) ४.२ २०. **कविम्**=सर्वज्ञम् (परमेश्वरम्) २.२३.१ सर्वेषां दुष्टानां सर्वज्ञतया क्रमितारमीश्वरं, सर्वेषां प्रजानां दर्शयितारं भौतिकं वा (अग्निम्=ईश्वरं भौतिकं वा) १ १२ ७ वेदविद्याया उपदेष्टारं निमित्तं वा (ईश्वरम्) ४ २५ विद्वांसमिव क्रान्तप्रज्ञम् (वायुं=पवनम्) ६.४६.४. विद्यासाक्षात्कर्तारम् (मेधाविनम्) १ ११६.१४. क्रान्तदर्शनम् (अग्निम्) ७ २४ **कवि:**=विक्रान्तदर्शन (अग्नि=पावक ईश्वर) ३ ३ ४ क्रान्तदर्शन क्रान्तप्रज्ञ. सर्वज्ञो वा (सविता=ईश्वर सूर्यो वा) १२.३. क्रान्तप्रज्ञादर्शन. (मर्त्य=मनुष्य) १.६१.१४ सर्वेषां क्रान्तप्रज्ञ. सर्वज्ञ (सविता=ईश्वर:) ५.८१.२ सर्वविद्यावित् (विद्वज्जन) १ ७६ ५. मन्त्रार्थं (अग्नि.=पावक.) १४ ३६ शब्दहेतु. (अग्नि.) १३.३५ काव्यादिनिर्माणे चतुर: (मघवा=राजा) ७.१८.२ ज्ञातप्रज्ञ: (अनिरुद्धोऽनिधि:) ७.१५.२. त्रयविद्याया दर्शनविषयस्य वा क्रमक. (इन्द्र:=विद्वान् सेनापतिः सूर्यो वा १ ११.४. पूर्णविद्वान् (परमेश्वर), आर्याभि० २.१७, ५.३२ सर्वशास्त्रवित् (अध्यापक.) २३.३६. **कवी**=क्रान्तदर्शनौ सर्वव्यवहारदर्शनहेतू (मित्रावरुणौ=सूर्यवायू), ५०—कवि. क्रान्तदर्शनो भवति कवतेर्वा. नि० १२.१३ एतन्निरुक्तमित्रावरुणाभ्यां कविशब्देन मुख्यावर्थौ गृह्येते १.२.६. सकलविद्यावेत्तारावध्यापकोपदेशकौ १.१८८ ३. प्राणौ (भिषजा=चिकित्सकौ २८.३ **कवीन्**=धार्मिकान् विदुष. (जनान्) ३.३८ १. **कवे!**=वक्त: (राजन् विद्वन्) ७ १६.३०. सकलशास्त्रोपयोगज्ञवेदविद् (आप्ताऽध्यापक) २.१.१३. [कुशब्दे (अदा०) धातो अच इ' उ० ४.१३६ सूत्रेण इ' प्रत्यय:। कवि:=मेधाविनाम निघ० ३ १५. कवि: क्रान्तदर्शनो भवति कवतेर्वा नि० १२.१३. अथो वाऽविदित: कवि. शु० ६ ७ २.४. ये वा अनूचानास्ते कव्य. गो० २.२. एते वै कव्यो यद्ऋष. शु० १.४.२.८. ये वै तेन ऋषय: पूर्वे प्रेतास्ते वै कव्य. ऐ० ६.२०. शुश्रुवांसो वै कव्य. तै० ३.२.२.३. ये विद्वांसस्ते कव्य. शु० ७ २.२.४.]

कवषम् उपदेशकम् (राजानमात्यम्) ७.१८ १२. **कवष:**=शब्दं कुर्वन् (द्वार:=गृहद्वारम्) २६.५. **कवषा:**=शब्दं कुर्वाणा. (द्वार.=गृहद्वाराणि) २६.५. [कुशब्दे (अदा०) धातो. 'ऋतन्यञ्जि०' उ० ४२. सूत्रेण असप्रत्यय.। सस्य षकारश्छान्दस.। बाहुलकाद् औणादिकोऽषट्प्रत्यय.]

कवष्य. शब्दे साधव' (वीरजना.) २०.४०. प्रशस्ता: (विद्या.), प्र०—अत्र 'कुशब्दे' धातोर्बाहुलकादौणादिकोऽषट्प्रत्यय: २० ६०. सच्छिद्रा: (द्वार.=द्वाराणि) २१.३४. ['कवष्यम्' इति व्याख्यातम्। तत्र. 'तत्र साधु इत्यर्थे यत्]

कवासख. कवि. सखा यस्य (मघवा=धनवान् मनुष्य.) ५.३८.३. [कवि-सखिपदयो' समास। पूर्वपदस्येकारस्याकारश्छान्दस. कवासखो यस्य कवय: सखाय: नि० ६.१६.]

कविक्रतुम् कवि: सर्वज्ञा सकलविद्यायुक्ता क्रतु. प्रज्ञा कर्म क्रमदर्शनं वा यस्य तम् (देवं=परमात्मानं सभाध्यक्षं प्रजापुरुषं वा) ४ २५. कवीनां क्रतु यज्ञ इव प्रज्ञा यस्य तम् (अग्निं=भौतिकम्) ३ २.४. कवीनां विदुषां क्रतु. प्रज्ञा कर्म वा क्रतुवत् यस्य स तम् (विद्वज्जनम्) ३.२७ १२ प्रज्ञप्रज्ञाम् ५ ११.४. **कविक्रतु:**=कवि सर्वज्ञ क्रान्तदर्शनो

काम्), प्र०—अत्र 'कर्मवेषाद्यत्' अ० ५ १.१०० इति कर्मशब्दात् सम्पादिन्यर्थे यत् ११ ५५ [कर्मण्यमिति व्याख्यातम्। तत स्त्रिया टाप्]

कर्मन् राज्यकर्मणि १ १२१ ११ ['कर्म' इति व्याख्यातम्]

कर्मन्कर्मन् कर्मणि कर्मणि १ १०२ ६. [कर्मन् पदस्य वीप्सायां द्वित्वम्]

कर्मभिः धर्म्याभि क्रियाभि २३ ३७ **कर्मसु**=कृष्यादिक्रियासु १० ३३ **कर्माणि**=जगत्सृष्टि-पालन-प्रलयकरणन्यायादीनि १३ ३३ सत्कर्मों को स० वि० १४५, ४.२. कर्त्तुरीप्सिततमानि क्रियमाणानि ३४ २ कर्त्तुं योग्यानि, कर्त्तुरीप्सिततमानि १ ६१ १३ जगत् की उत्पत्ति-स्थिति-प्रलय आदि कर्मों को, आर्याभि० १ २३, ऋ० १.२ ७.१६ ['कर्म' इति पद व्याख्यातम्]

कर्मारम् य कर्माण्यलङ्करोति' तम् (सज्जनम्) ३० ७ **कर्मारेभ्यः**=असि-भुशुण्डी-शक्त्यादिनिर्मातृभ्य (शिल्पिभ्य) १६ २७ [कर्मोपपदे ऋ गतौ (भ्वा०) धातोरण् प्रत्यय]

कर्वरम् कर्त्तव्य कर्म ६ २४ ५ [कर्वर कर्मनाम निघ० २ १ किरति विक्षिपतीति विग्रहे कॄ विक्षेपे (तुदा०) धातो 'कॄगॄ०' उ० २ १२१ सूत्रेण क्वरच्प्रत्यय]

कर्ष विलिखति ५ ८३ ७ [कृष विलेखने (भ्वा०) धातोर्लेडर्थे लोट्]

कर्हि कस्मिन् समये ६ ३५ २ कदा ५ ७४ १० [किम सर्वनाम्न सप्तम्यन्ताद् 'अनद्यतने हिलन्यतरस्याम्' अ० ५ ३ २१ सूत्रेण हिल्। किम कादेश]

कलविङ्कः चटक २४ ३१ **कलविङ्कान्**=चटकान् २४ २०

कलशम् घटम् १ ११७ १२. **कलशः**=कुम्भ ३ ३२ १५ **कलशे**=पात्रे ६ ४७ ६ [कलशशब्दोपपदात् शीङ् शये (अदा०) धातो. 'अन्येष्वपि दृश्यते' अ० ३ २ १०१ सूत्रेणाधिकरणे ड. प्रत्यय। पूर्वपदस्य ह्रस्वत्वम्। कलश कस्मात्? कला, अस्मिञ्छेरते मात्रा। कलिश्च कलाश्च किरतेर्विकीर्णमात्रा नि० ११ १२]

कलशा कुम्भाविव ६ ६८ २. [पूर्वपदे व्याख्यातम्। 'सुपा 'सुलुगि'त्याकार']

दीना हित (अग्नि=सूर्य) ३३ ९२ चन स्वन्नादिषु हितो=हितकारी (अग्नि=विद्वज्जन) ३ ११ २ अन्नाय हितकारी (अग्नि=पावक) ३ २ ७ चनसे अन्नाय हित (अग्नि) ३ २ २ चनसे पृथिव्याद्यन्नाय हितकारी (अग्नि) प्र०—चन इत्यन्ननाम, नि० ६ १५, ३३ ७५ [चनस्पद व्याख्यातम्। तदुपपदे हि गतौ वृद्धौ च (स्वा०) धातो-रौणादिक क्त। अथवा=चनस्-हितपदयो समास]

चन्द्र आह्लादप्रद (विद्वज्जन) ५ १० ४ **चन्द्रम्**=आह्लादकारकम् (यन्त्रम्) ४ १८ सुवर्णम्, प्र०—चन्द्र-मिति हिरण्यनामसु पठितम्, निघ० १ २, ४ २६ आनन्द-कर देदीप्यमान सुवर्णमिव वर्त्तमानम् (अग्नि=वह्निम्) ३ ३ ५ आह्लादकर सुवर्णम् ४ २ ३१ हिरण्यवदानन्द-प्रदम् (स्वरूपम्) १२ १० ४ **चन्द्राणि**=काञ्चनादीन् धातून् ४ २६ **चन्द्राय**=चन्द्रलोकस्य प्राप्तये ३९ २ चन्द्रमण्डलाय २२ २९ चन्द्रलोकाय २२ २८ **चन्द्राः**=आह्लादकरा (विद्वज्जना) ७ ३९ ७ आनन्ददा (विदुष्य स्त्रिय) ७ ४० ७ चन्द्रादिलोकान्, प्र०—अत्र शस स्थाने जस् १२ १० २ **चन्द्रे**=हे आह्लादकारके (पत्नि!) ८ ४३ **चन्द्रेण**=इन्दुना १ ४८ ९ आनन्देन १९ ९३ रत्नजटितेन (रथेन=यानेन) ४ ४८ ३ आह्लादकेन सुवर्णादिजटितेन (रथेन=यानेन) ४ ४८ २ सुवर्णमयेन (रथेन) ४ ४८ १ [चदि आह्लादने दीप्तौ च (भ्वा०) धातो 'स्फायितञ्चिवञ्चि०' उ० २ १३ सूत्रेण रक्-प्रत्यय चन्द्रम्=हिरण्यनाम निघ० १ २ चन्द्रमाश्चायन् द्रमति, चन्द्रो माता, चान्द्र मानमस्येति वा। चन्द्रश्चन्दते कान्ति-कर्मण। चन्दनमित्यप्यस्य भवति। चारु द्रमति, चिर द्रमति, चमेर्वा पूर्वम् नि० ११ ५ असौ वै चन्द्र प्रजापति श० ६ २ २ १६ चन्द्र एव सविता जै० उ० ४ २७ १३ चन्द्र ह्येतच्चन्द्रेण क्रीणाति यत्सोम हिरण्येन (चन्द्र=सोम, चन्द्रम्=हिरण्यम्) श० ३ ३ ३ ६ चन्द्र हिरण्यम् तै० १ ७ ६ ३ चन्द्रा ह्यापः तै० १ ७ ६ ३ असौ वै चन्द्र पशुस्त देवा पौर्णमास्यामालभन्ते श० ६ २ २ १७]

चन्द्रदक्षिणा.=चन्द्र सुवर्ण दक्षिणा दान येषान्ते (सेनाप्रजाजना) ७ ४५ [चन्द्र-दक्षिणापदयो समास। चन्द्र इति पद व्याख्यातम्। दक्षिणा=दक्षते समर्द्धयति-कर्मणो व्यृद्ध समर्द्धयतीति नि० १ ७]

चन्द्रबुध्न. चन्द्र सुवर्ण चन्द्रमा वा बुध्नेऽन्तरिक्षे यस्य यस्माद्वा स (मेघ), प्र०—चन्द्रमिति हिरण्यनाम, निघ० १ २, १ ५२ ३ [चन्द्र-बुध्नपदयो समास। चन्द्र इति व्याख्यातम्। बुध्नमन्तरिक्ष बद्धा अस्मिन् धृता आप इति वा इदमपीतरद् (शरीरस्य मूल हृदयम्) बुध्नमेतस्मादेव बद्धा अस्मिन् धृता प्राणा इति नि० १० ४४]

चन्द्रमसम् चन्द्रलोकम् २३ ५९ **चन्द्रमसः**=चन्द्र-लोकाऽऽदे १ ८४ १५ चन्द्रस्य २४ ३५ **चन्द्रमसि**=चन्द्रलोके २३ ४ चन्द्रलोकसमीप आह्लादे वा १ २८ **चन्द्रमाः**=यस्सर्वान् चन्दत्याह्लादयति स १८ ४० इन्दु (देवता) १४ २० आह्लादकारक इन्दुलोक १ १० ५ १ चन्द्रलोक २३ ४ आनन्दस्वरूपत्वादाह्लादकत्वाच्च (ईश्वर) ३२ १ शैत्यकर (चन्द्रलोक) ३३ ९० आह्लाद-करश्चन्द्र २३ ४६ आनन्दस्वरूप और स्व-सेवको को आनन्द देने वाला (ईश्वर), आर्याभि० २ ४, ३२ १ [चन्द्र इति व्याख्यातम्, तदुपपदे माङ् माने शब्दे च (जु०) धातो 'चन्द्रे मो डित्' उ० ४ २२८ सूत्रेणासि प्रत्यय। चन्द्रमा पदनाम निघ० ५ ५ चन्द्रमा=चायन् द्रमति, चन्द्रो माता, चान्द्र मानमस्येति वा नि० ११ ५ स (इन्द्र) चन्द्र म आहरेति प्रालपत्। तच्चन्द्रमसश्चन्द्रमसत्वम् तै० २ २ १० ३ चन्द्रमा वै मा मास। तस्मान् मेत्याह। भा इति हेतत् परोक्षेणैव जै० उ० ३ १२ ६ चन्द्रमा वै सोम कौ० १६ ५ तै० १ ४ १० ७ श० १२ १ १ २ चन्द्रमा उ वै सोम श० ६ ५ १ १ सोमो राजा चन्द्रमा श० १० ४ २ १ असौ वै सोमो राजा विचक्षणश्चन्द्रमा कौ० ४ ४ ७ १० एतद्वै देवसोम यच्चन्द्रमा ऐ० ७ ११ चन्द्रमा वाऽस्य (सोमस्य) दिवि श्रव उत्तमम् श० ७ ३ १ ४६ यद्वद्रश्चन्द्रमास्तेन कौ० ६ ७ (प्रजापति) त (रुद्र) अब्रवीन्महान्देवोऽसीति। तद्यदस्य तन्नामाकरोच्चन्द्रमास्तद्रूपमभवत् प्रजापतिवै चन्द्रमा प्रजापतिर्वै महान्देव श० ६ १ ३ १६ (इन्द्र.) त (वृत्र) द्वेधान्वभिनत्तस्य यन् सौम्य न्यक्तमास त चन्द्रमम चकाराथ यदस्यासुर्य्यमास तेनेमा प्रजा उदरेणाविध्यत् श० १ ६ ३ १७ अथैष एव वृत्रो यच्चन्द्रमा श० १ ६ ४ १३ चन्द्रमा एव मन्थी श० ४ २ १ १ चन्द्रमा वै वरेण्यम् जै० उ० ४ २८ १ चन्द्रमा द्विपात्तस्य पूर्वपक्षापरपक्षौ पादौ गो० पू० २ ८ चन्द्रमा वै पञ्चदश एष हि पञ्चदश्यामपक्षीयते पञ्चदश्यामापूर्य्यते तै० १ ५ १० ५ अथो चन्द्रमा वै भान्त पञ्चदश स च पञ्चदशाहान्यापूर्यते पञ्चदशापक्षीयते तद् यत्तमाह भान्त इति भाति हि चन्द्रमा श० ८ ४ १ १० षोडशकलो वै चन्द्रमा ष० ४ ६ एतद्वै देवसत्य यच्चन्द्रमा कौ० ३ १ चन्द्रमा पुनरसु० तै० २ ५ ७ ३ चन्द्रमा वै जायते पुन तै० ३ ९ ५ ४ मनो मे रेतो मे प्रजा मे पुनस् सम्भूतिर्मे तन्मे त्वयि (चन्द्रमसि) जै० उ० ३ २७ १४ नक्षत्राणि स्थ चन्द्रमसि श्रितानि। सवत्सरस्य प्रतिष्ठा

१ १६४ २४ **चतुष्पदे**=गवाद्याय १६ ४८. गवादि पशुवर्ग के लिए आर्याभि० २ २१, ३६ ८ [चतुर्-पादपदयो समास । पादस्य पदादेशश्छान्दस । समासान्तलोपे पदादेशश्छान्दस]

चतुष्पदाः चत्वारि पदानि यासु ता (प्रजा) २३ ३४ [चतुर्-पादशब्दयो समासे समासान्तलोपे पदादेशे 'टाबृचि' अ० ४ १ ६ सूत्रेण टाप्]

चतुष्पदी चतुर्वेदाऽध्यापिका (विदुषी स्त्री) १ १६४ ४१ **चतुष्पदीम्**=चत्वारि धर्मार्थिकाममोक्षा पदानि यस्यास्ताम् (स्वाहा=वाचम्) ८ ३० [चतुर्-पादपदयो समासे समासान्तलोपे पदादेशे स्त्रिया 'पादोऽन्यतरस्याम्' इति ङीप्]

चतुष्पदे चत्वार पादा यस्य गवादेस्तस्मै ११ ८३

चतुष्पात् चत्वार पादा यस्य स गवादि ४ ५१ ५ गवादिकम् १४ २५ गवादीन् १४ ८ [चतुर्-पादयो समासे समासान्तलोपे 'पादोऽन्यतरस्याम्' इति ङीपोऽभावे रूपम्। चतुष्पाद पशव गो० उ० १ ४ तै० २ १ ३५ चतुष्पादा पशव ता० ३.८ ३ चतुष्पादा वै पशव ऐ० २ १८ चतुष्टया वै पशवोऽथो चतुष्पादा कौ० १६ ३]

चतुस्त्रिंशत् एतत्सङ्ख्याका (वङ्क्री=कुटिला गती) १ १६२ १८ अष्टौ वसव एकादश रुद्रा, द्वादशाऽदित्या, इन्द्र, प्रजापति प्रकृतिश्चेति (तन्तव =वस्वादय) ८ ६१ शिक्षणानि २५ ४१ [चतुर्-त्रिंशत्पदयो समास]

चतुस्त्रिंशः चतुस्त्रिंशद्विध (नाक =आनन्द) १४ २३ [तस्य चतुस्त्रिंशोऽग्निष्टोम प्रजापतिश्चतुस्त्रिंशो देवतानाम् ता० १२ ७ ५ अश्वश्चतुस्त्रिंशो दक्षिणाना प्रजापतिश्चतुस्त्रिंशो देवतानाम् ता० १७ ११ ३]

चतु.सहस्रम् चत्वारि सहस्राणि सङ्ख्या यस्य तम् (घर्म=प्रतापम्) ५ ३० १५

चतुःस्रक्तिः चतुस्रा, भा०—प्राप्तरसा (नाभि) चार ३८ २० कोणे वाली (नाभि) आर्याभि० २ ४१, ३८ २० [एष वै चतुस्रक्तिर्य एष (सूर्य) तपति दिशो ह्येतस्य स्रक्तय श० १४ ३ १ १७]

चत्ताय याचिताय (शत्रवे) १ १३२.६ आह्लादाय, अ०—आनन्दाय ८ ५३ [चते याचने (भ्वा०) धातो क्त]

चत्वारः वर्णा आश्रमाश्च १ १२२.१५ ऋत्विज ७ १८ २३ पृथिव्यादय ५ ४७ ४ [चतुर् इति व्याख्यातम् तत प्रथमाबहुवचनम्। 'चतुरनडुहोरामुदात्त' इत्यामागम । चत्वारश्चलिततमा सख्या नि० ३ १०]

चत्वारि चत्वारो वेदा ४ ५८ ३ नामाख्यातोपसर्गनिपाता १ १६४ ४५

चत्वारिंशः एतत्सङ्ख्यापूरको ब्रह्मचर्यव्यवहारकर (वर्ष =अध्ययनम्) १५ ३ [चत्वारिंशत्प्राति० पूरणार्थे डट्]

चत्वारिंश्याम् चत्वारिंशत पूर्णायाम् (शरदि=शरदतौ) २ १२ ११ [चत्वारिंशत्प्राति० पूरणार्थे डट्। तत स्त्रिया ङीप्]

चन अपि ४ १८ ८ कदाचित् १ १८ ७ आकाङ्क्षायाम् ३ ३४

चनस्यतम् अन्नवदेतौ सेव्येताम्, प्र०—'चायतेरन्ने ह्रस्वश्च' उ० ४ २०० अनेनाऽसुन्प्रत्ययान्ताच्चनस्शब्दात् क्यच्प्रत्ययान्तो नामधातोर्लोटि मध्यमस्य द्विवचनेऽय प्रयोग १ ३ १. [चनस्शब्दाद् 'उपमानादाचारे' अ० ३ १ १० सूत्रेण क्यच्। ततो लोट्]

चनः अन्नादिकमैश्वर्य्यम् ७ ३८ ३ भोग्यमन्नम् २० ८९ अन्नभोजनादिव्यवहारम् १ ३ ६ भक्ष्य-भोज्य-लेह्यचूष्यामरयन्नम्, प्र०—अत्र 'चायतेरन्ने ह्रस्वश्च' उ० ४ २००. अनेनाऽसुन्प्रत्ययो नुडागमश्च १ २६ १० [चायृ पूजानिशामनयो (भ्वा०) धातो 'चायतेरन्ने ह्रस्वश्च' उ० ४ २०० सूत्रेणासुन् प्रत्ययस्य नुडागमे सति यलोपो ह्रस्वश्च। चन अन्ननाम नि० ६ १५]

चनिश्चदत् आह्लादयति ५ ४३ ४

चनिष्ठम् अतिशयेनाऽन्नम् ५ ७७ ४. [चनस्पद व्याख्यातम्। ततोऽतिशायन इष्ठन् प्रत्यये टिलोपे रूपम्]

चनिष्ठा अतिशयेनाऽन्नाद्यैश्वर्ययुक्ता (सुमति = शोभना प्रज्ञा) ७ ५७ ४ [चनिष्ठ व्याख्यातम्। तत स्त्रिया टाप्]

चनोधाः चनास्यन्नानि दधातीति (गृहपतिर्जन), प्र०—चन इत्यन्ननामसु पठितम्, निघ० ६ १५, ८ ७ अभ्यासेनाऽधिकार्यो ग्राह्य, सर्वेभ्योऽधिकाऽन्नवान् गम्यते (गृहपतिर्जन) प्र०—अभ्यासे भूयासमर्य मन्यते, नि० १० ४२, ८ ७ [चनस्पद व्याख्यातम्। तदुपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्विप्। चन इत्यन्ननाम नि० ६ १५]

चनोहितः यश्चनाम्यन्नानि हिनोति प्रापयति स (अग्नि =पावक) २२ १६. ओषधिपाकसामर्थ्येन अन्ना-

चन्द्रेव सुवर्णानीव, प्र०—चन्द्रमिति सुवर्णनाम, निघ० १ १२, ३ ६१.७ [चन्द्र-इवपदयो समास]

चमसम् यज्ञसाधनम् ८ ३५ ३ चमत्यस्मिन् मेघे १ ११० ३ मेघम् १ १६१ १ मेघमिव गर्जनायुक्त रथम् ४ ३५ २. पेयसाधनम् ४ ३५ ५ मेघमिव विभक्तम् (उक्थ्य=प्रशसनीय कर्म) ४ ३६ ४ **चमसः**=आचामति येन स (यज्ञपात्रम्) ४ ३५ ४ **चमसा**=चमसौ ४ ३३ ५ **चमसान्**=मेघानिव (पदार्थान्) १ १६१ ६ मेघान् प्र०—चमस इति मेघनाम, निघ० १ १०, ४ ३३ ६ **चमसा.**=ये चाम्यन्ति अदन्ति भोगान् येभ्यो मेघेभ्यस्ते (इन्द्रयानाः=मेघा) १ ५४ ६ होम-भोजन-पात्राणि १८ २१ [चमु अदने (भ्वा०) धातो 'अत्यविचमि०' उ० ३ ११७ सूत्रेण असच्प्रत्यय। चमस=मेघनाम निघ० १ १० चमस कस्मात्? चमन्त्यस्मिन्निति नि० १० १२]

चमू द्विविधे सैन्ये ५ ५१ ४. सेनया, प्र०—अत्र 'सुपा सुलुक्०' इति तृतीयैकवचनस्य लुक् ८ ३६ **चमूषु**=भक्षयित्रीषु सेनासु ३ ४८ ४ **चम्वा**=सेनयेव ३ ५५ २० **चम्वोः**=सेनयोर्मध्ये ४ १८ ३ द्यावापृथिव्योर्मध्ये ६ ५७ २ पदाति-हस्त्यश्वादिस्थयो सेनयोरिव १ २८ ६ [चमु अदने (भ्वा०) धातो 'कृपिचमितनि०' उ० १ ८० सूत्रेण ऊ प्रत्यय स्त्रियाम्। चम्वौ द्यावापृथिव्योर्नाम निघ० ३ ३०]

चमूपदः ते चमूषु सेनासु सीदन्ति अवस्थिता भवन्ति ते वीरा १ ५४ ६ चमन्त्यदन्ति विनाशयन्ति शत्रुबलानि याभिस्ताश्चम्व, ये चमूषु सेनासु सीदन्ति ते (इन्दव=सोमाद्योषधिगणा), प्र०—अत्र 'कृतो बहुलम्' इति वार्त्तिकमाश्रित्य 'सत्सूद्विष०' अ० ३ २ ६१ अनेन करणे क्विप् 'कृपि-चमितनि०' उ० १ ८१ अनेन चमूशब्दश्च सिद्ध १ १४ ४ [चमूपद व्याख्यातम्। तदुपपदे पद्लृ विशरण-गत्यवसादनेषु (भ्वा०) धातो करणे क्विप्]

चम्रिषः चमन्त्यदन्ति भोगांस्तान् (पूर्वी=प्राचीना प्रजा), प्र०—अत्र बाहुलकादौणादिक इसि प्रत्ययो रुडागमश्च १ ५६ १ [चमु अदने (भ्वा०) धातोर्बाहुलकाद् इसि प्रत्ययो रुट् च]

चम्रीषः ये चमूभि शत्रुसेना ईषन्ते हिंसन्ति ते (वीरा योद्धृजना) १ १०० १२ चमू=सेना मे वश को प्राप्त (परमात्मा) आर्याभि० १ ३४, ऋ० १ ७ १० १२

चम्वीव यथा चम्वौ यज्ञपात्रे २० ७६

चयत् चिनोमि ५ ६० १ **चयते**=एकत्र करोति १ १६७ ८ **चयध्वे**=सञ्चिनुत ७ ५२ २. सञ्चिनुथ ६ ५१ ७ [चिञ् चयने (स्वा०) धातोर्लेट्। अन्यत्र लट्। विकरणव्यत्ययेन शप्]

चयमानाः वर्धमाना (देवा=पूर्णविद्या विद्वज्जना) २ २७ ४ [चय गतौ (भ्वा०) धातो शानच्]

चयसे प्राप्नोषि १.१६० ५ **चयिष्टम्**=चिनुत ६ ६७ ८ **चयेम**=चिनुयाम १ १३२ १ [चय गतौ (भ्वा०) धातोर्लेट्। अन्यत्र लुङ् लिङ् च। चिञ् चयने (स्वा०) धातोर्वा रूपाणि। विकरणव्यत्ययेन शप्। चयेम=चातयेम नि० ४.२५]

चय्यम् चयेषु सान्त्वनेषु भवम् प्र०—'चय सान्त्वने' धातोरच् ततो यत् १६ ८८ [चय गतौ (भ्वा०) धातोरच्। ततो भवार्थे यत्। धातूनामनेकार्थकत्वात् सान्त्वने ऽर्थेऽपि]

चर विजानीहि, प्र०—अत्र चर इत्यस्य गत्यर्थत्वात् प्राप्त्यर्थो गृह्यते ८ ३४ प्राप्नुहि प्राप्नोति वा १ १० ३ [चर गतौ (भ्वा०) धातोर्लोट्]

चरकाचार्यम् चरकाणा भक्षकाणामाचार्य्यम् ३० १८ [चरक-आचार्यपदयो समास। चरक=चर भक्षणार्थे ऽपि (भ्वा०) धातोरच्। तत स्वार्थे कन्। अथवा चर धातो 'क्वुन् शिल्पिसज्ञयो०' उ० २ ३२ सूत्रेण क्वुन्]

चरणम् गमनम् ३ ५ ५ विहरना, म० वि० १६७, ६ ११३ ६ [चर गतौ (भ्वा०) धातोर्भावे ल्युट्। चक्षुरेव-चरण चक्षुषा ह्ययमात्मा चरति श० १० ३ ५ ७ आदित्य एव चरण यदा ह्येवैष उदेत्यथेद सर्व चरति श० १० ३.५ ३]

चरणीयमाना प्राप्नुवती (उप=उषा) ३ ६१ ३

चरण्यत् चरणमिवाऽऽचरेत्, प्र०—'वाच्छन्दसि' इत्यत्रात्लोप ईत्वाऽभावश्च ८ २४ [चरणपदात् 'उपमानादाचारे' इति क्यच्। ततो नामधातोर्लेट्। अल्लोप ईत्वाभावश्च छान्दसम्]

चरत् चरति ३३ ६३ गच्छति ६ ५६ ६ प्राप्नोति १ १७३ ३ सर्व जानाति, प० वि०, ३६ २४ **चरतः**=कुरुत २ २४ ५ वर्त्तेते २० २५ चलत ६ २७ ७ आगच्छत १ ६२ ८ प्राप्नुत १ १०२ २ **चरति**=प्राप्तोऽस्ति ३ ५५ ६ विलसति ३ ५८ १ स्वेनैव स्व प्रकाशित मन् भवति, ऋ० भू० १४४ भ्रमति २३.४६ सेवते १ ५२ ६. प्राप्नोति ५ ४४ ८ गच्छति ५ ६३.४ [चर गतौ (भ्वा०) धातोर्लेट्। अन्यत्र लट्]

तै० ३ ११ १ १३ चन्द्रमा अस्यादित्ये श्रित । नक्षत्राणा प्रतिष्ठा तै० ३ ११ १ १२ (सूर्यरश्मि =चन्द्रमा) सूर्यस्येव हि चन्द्रमसो रूपमय श० ६ ४ १ ६ चन्द्रमा एव सविता गो० पू० १ ३३ चन्द्रमा मे मनसि श्रित तै० ३ १० ८ ५ तद् यत्तन् मनश्चन्द्रमास्स जै० उ० १.२८ ५ अथ यत्तन्मन आसीत् स चन्द्रमा अभवत् जै० उ० २ २ २ यत्तन्मन एष स चन्द्रमा श० १० ३ ३ ७ मनश्चन्द्रमा जै० उ० ३ २ ६ एष वै (चन्द्रमा) रेत श० ६ १ २ ४ स (चन्द्रमा) वै देवाना वस्वन्न ह्येषाम् श० १ ६ ४ ५. अन्नमु चन्द्रमा श० ८ ३ ३ ११ अन्नमु वै चन्द्रमा जै० उ० १.३ ४ चन्द्रमा ह्येतस्यान्न य एष (सूर्य) तपति श० ४ ६ ७ १२ चन्द्रमा वै प्राण जै० उ० ४.२२ ११ असौ वै चन्द्र· प्रजापति श० ६ २.२ १६ प्रजापतिर्वै चन्द्रमा श० ६ १ ३ १६ चन्द्रमा वै धाता प० ४ ६ चन्द्रमा एव धाता विधाता च गो० उ० १ १० चन्द्रमा वै ब्रह्म ऐ० २ ४१ चन्द्रमा वै ब्रह्मा श० १२ १.१ २ गो० पू० २ २४ चन्द्रमा ब्रह्मा (आसीत्) गो० पू० १ १३. चन्द्रमा वै ब्रह्मा-ऽधिदैव मनोऽध्यात्मम् गो० पू० ४ २ चन्द्रमा वै ब्रह्म कृष्ण (यजु० २३.१३) श० १३ २ ७ ७ यददश्चन्द्रमसि कृष्ण पृथिव्या हृदय श्रितम् म० १ ५ १३ स यदस्यै पृथिव्याऽअनामृत देवयजनमासीत्तच्चन्द्रमसि न्यदधत तदे-तच्चन्द्रमसि कृष्णम् श० १ २ ५ १८ यदस्या (पृथिव्या) यज्ञीयमासीत्तदमुष्या (दिवि) अदधात् । तददश्चन्द्रमसि कृष्णम् तै० १ १ ३ ३ एतद्वा इय (भूमि) अमुष्या (दिवि) देवयजनमदधाद् यदेतच्चन्द्रमसि कृष्णमिव ऐ० ४ २७ चन्द्रमा एव (सवत्सरस्य) द्वारपिधान श० ११ १ १ १ रात्रिर्वै चन्द्रमा श० १२ ४ ४ ७ चन्द्रमा उदान जै० उ० ४ २२ ६ स (चन्द्रमा) अस्य (सूर्यस्य) व्यात्तम् आपद्यते । (सूर्य) त (चन्द्रमस) ग्रसित्वोदेति । स (चन्द्रमा) न पुर-स्तान्न पश्चाद् दक्षे श० १ ६ ४ १८ चन्द्रमा वा अमावस्या-यामादित्यमनुप्रविशति ऐ० ८ २८ अर्यप चन्द्रमा दक्षिणे-नैति प० २ ४ तस्मादिमौ सूर्याचन्द्रमसौ प्रत्यञ्चौ यन्तौ सर्व एव पश्यति श० ४ २ १ १८ चन्द्रमा मनुष्यलोक जै० उ० ३ १३ १२ वाग्घ चन्द्रमा भूम्वोपरिष्टात् तस्थौ श० ८ १ २ ७ वागिति चन्द्रमा जै० उ० ३ १३ १२ हन्तेति चन्द्रमा ओमित्यादित्य जै० उ० ३ ६ २ चन्द्रमा वै हिङ्कार जै० उ० १ ३ ४ चन्द्रमा एव हिङ्कार जै० उ० १ ३३ ५ चन्द्रमा प्रतिहार जै० उ० १ ३६ ६ चन्द्रमा वै यज्ञायज्ञिय यो हि कश्च यज्ञ सतिष्ठते, एतमेव तस्याहुतीना रसोऽप्येति तद्यदेत यज्ञोऽप्येति तस्माच्चन्द्रमा यज्ञायज्ञियम् श० ६ १ २ ३६ चन्द्रमा वै भर्ग जै० उ० ४ २८ २ वायुराप श्चन्द्रमा इत्येते भृगव गो० उ० २ ८ वृष्टिर्वै वृष्ट्वा चन्द्र-मसमनुप्रविशति ऐ० ८ २८ चन्द्रमा एव सर्वम् गो० पू० ५ १५]

चन्द्ररथम् चन्द्रमिव रथ यस्य तम् (अग्नि=वह्निम्) ३ ३ ५ **चन्द्ररथः**=चन्द्र रजत सुवर्ण वा रथे यस्य स (होता=विद्यादातृजन) १ १४१ १२ [चन्द्र-रथ पदयो समास । चन्द्रपद व्याख्यातम्। रथ =रमु क्रीडायाम् (१वा०) धातो 'हनिकुपि०' उ० २ २ सूत्रेण क्थन्प्रत्यय]

चन्द्ररथा चन्द्र इव रथो यस्या सा (विदुषी स्त्री) ३ ६१ २ **चन्द्ररथाः**=चन्द्र सुवर्णमिव रथो रमणीय स्वरूप यासा ता (उषस =प्रभातवेला) ६ ६५ २ [चन्द्र-रथयो समासे स्त्रिया टाप् । चन्द्ररथौ व्याख्यातौ]

चन्द्रवत् सुवर्णादियुक्तमानन्दादिप्रद वा (राध = धनम्) ५ ५७ ७ **चन्द्रवता**=पुष्कल चन्द्र सुवर्ण विद्यते यस्मिँस्तेन (राधसा=धनेन), प्र०—चन्द्र इति हिरण्यनाम, निघ० १ २, ३ ५० ४ बहूनि चन्द्राणि सुवर्णादीनि धनानि विद्यन्ते यस्मिँस्तेन (राधसा=धनेन) ३ ३० २० [चन्द्र इति व्याख्यातम् । ततो मतुप्]

चन्द्रवर्णाः चन्द्रस्य वर्ण इव वर्णो येषान्ते (विद्वज्जना) १ १६५ १२ [चन्द्र-वर्णपदयो समास]

चन्द्रा आह्लादयित्री, भा०—बहुसुखकारिका (वाग्विद्युद् वा) ४ २१ आह्लादप्रदा (उषा) १ १५७ १ आह्लादकानि सुवर्णादीनि ४ २३ ६ **चन्द्राभिः**=आनन्द-धनकरीभि (प्रजाभि) ६ ६ ७ **चन्द्राणि**=आनन्दप्रदानि सुवर्णा-दीनि (वसूनि=द्रव्याणि) ५ ४२ ३ काञ्चनादीन् धातून् ४ २६ [चन्द्रपद व्याख्यातम्। तत स्त्रिया टाप् । चन्द्रा ह्याप तै० १ ७ ६ ३]

चन्द्राग्राः चन्द्र सुवर्णमानन्दो वाऽग्रे यासा ता (गिर =वाच) ५ ४१ १४ चन्द्र सुवर्णमग्रमुत्तम यासु ता (वाच) ६ ४६ ८ चन्द्रमाह्लादनमग्र मुख्य यासान्ता (साधनानि) ३४ ४२ [चन्द्राग्रा चायनीयाग्राणि धनानि नि० १२ १८]

चन्द्रास आह्लादकरा (सोमा =ओषध्यादय पदार्था) ३ ४० ४ [चन्द्रप्राति० जसोऽसुगागम]

चन्द्री चन्द्र बहुसुवर्ण विद्यते यस्य स, (भा०—न दरिद्रो विद्वान्) २० ३७ चन्द्र बहुविध सुवर्ण विद्यते यस्य स (भिषक्=वैद्य) ११ ३१ [चन्द्रपद व्याख्यातम् । ततो मत्वर्थे इनि प्रत्यय]

[चर गतौ (भ्वा०) धातो 'अत्तिलूधू०' उ० ३ २ १८४ सूत्रेण करणे इन प्रत्यय]

चरिष्णु यच्चरति गच्छति (अग्नि -विश्वतेज) ४७६ **चरिष्णुः**=गन्ता (त्वेष =प्रकाश) ६ ६१ ८ [चर गतौ (भ्वा०) धातो 'अलङ्खनिराकृञ्०' उ० ३ २ १३६ सूत्रेण तच्छीलादिष्वर्थेषु ष्णुगुन्प्रत्यय]

चरिष्यामि अनुष्ठास्यामि १ ५ आचरण करूंगा, आर्याभि० २ ४७, १ ५ [चर गतौ (भ्वा०) धातोर्लृट्]

चरुम् ज्ञानलाभ मेघ वा १ ७ ६. **चरुः**=स्थालीपाक , पाको वा २६ ६० [चर गतौ भक्षणे च (भ्वा०) धातो 'भृमृशीङ्तृचरि०' उ० १ ७ सूत्रेण उ प्रत्यय । चरु मेघनाम निघ० १ १० चरुर्मृच्चयो भवति, चरनेर्वा समुच्चरन्त्यस्मादाप निघ० ६ ११ ओदनो हि चरु श० ४ ४ २ १ इमे लोकाश्चरु पचविल मै० १ ४.६ काठ० ३२ ६]

चरूणाम् पात्राणाम् २५ ३६ अन्नादिपचनाऽऽधाराणाम् (पात्राणाम्) १ १६२ १३ [चरुपद व्याख्यातम्]

चरेते सञ्चरन्ति १ १२३ ७ [चर गतौ (भ्वा०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

चर्कर्मि भृश करोमि ४ ३६ २ [डुकृञ् करणे (तना०) धातोर्यङ्लुगन्ताल् लट्]

चर्किरन् भृश विक्षिपेयु १ १३१ ५ **चर्किराम**=भृश विक्षिपेम ४ ४० १ भृश विक्षेपयाम ४ ३६ ४१ [कृ विक्षेपे (तुदा०) धातोर्यङ्लुगन्तात् सामान्ये लङ् । अडभावश्छान्दस]

चर्कृतात् सतत कर्त्तुं योग्यात् कर्मण १ १०४.५ [डुकृञ् करणे (तना०) धातोर्यङ्लुगन्तात् क्त]

चर्कृतिः अत्यन्तक्रिया ५ ७४ ६ भृशमुत्तमा क्रिया ६ ४८.२१ [डुकृञ् करणे (तना०) धातोर्यङ्लुगन्तात् स्त्रिया क्तिन्]

चर्कृत्यम् भृश कर्त्तुं योग्यम् (राजपुरुषम्) ४.३८ २ पुन पुन कर्त्तव्येषु कार्येषु साधुम् (नोकम्=अपत्यम्), प्र०—अत्र यङ्लुगन्तात् करोते क्तस्तत साध्वर्थे यत् १ ६४ १४ सभापति होने को अत्यन्त योग्य (सभापति राजा) स० प्र० १८३, अथर्व० ६ १० ६८ १ बार बार सत्क्रियासु योजनीयम् (ताराऽऽदय यन्त्रम्) ऋ० भू० १६६ **चर्कृत्य.**=पुन . पुनरुपासनीय (परमेश्वर) ऋ० भू० २२२ [डुकृञ् करणे (तना० धातोर्यङ्लुगन्तात् क्त । तत 'तत्र साधु' इति यत्]

चर्कृषत् भृश कर्षन् भृश ग्रीम विलिखन् (कृषाऽऽकृषन्) १ १७६ २. पुन पुनर्भृश कर्षन्, प्र०—अत्र यङ्लुगन्तात् १ २३.१५ [कृष विलेखने (भ्वा०) धातोर्यङ्लुगन्तात्]

चर्मणः त्वच ४ ३६ ४ चर्मप्रान्ते ३.६० २ त्वगुपरिभागस्य १ १६१ . [चर गतौ (भ्वा०) धातो 'सर्वधातुभ्यो मनिन्' उ० ४ १४५ सूत्रेण मनिन् । चर्म चरतेर्वा क्रान्त भवतीति वा नि० २ ५ जिह्वा चर्म । नि० ग० ६ २ ११.४ चर्म चाऽजिनस्य (मृगस्य) तन्मानुष, चर्म देवता श० ३ २ १ ८]

चर्मन् चर्माणि ४ ५ ७ [व्याख्यातम्। सप्तम्या लुक्]

चर्मम्नम् यच्चर्म निजान म्नाभ्यस्यति तम् (जनम्) ३० १५ [चर्मन्नुपपदे म्ना अभ्यासे (भ्वा०) धातो क प्रत्यय]

चर्माणीव यथा चर्माणि लोमानि धृतानि ६ ८ ३ [चर्मन्-इवपदयो समास]

चर्मेव यथा चर्म रोमाण्यावृणोति तथा ४ १३ ४ चर्मवत् काष्ठादिनावृत्य १ ८५ ५ [चर्मन्पद व्याख्यातम्। चर्मन्-इवपदयो समास]

चर्षणय. विद्वान् (मनुष्या) ६ ३३ २ मनुष्या. ११८४ ८. **चर्षणिभ्यः**=उक्तेभ्यो मनुष्येभ्य १ ८४ २० **चर्षणिः**=द्रष्टा मनुष्य . प्र०—चर्षणिरिति पदनामसु पठितम्, निघ० ४ २, १ ४६ ४ **चर्षणीनाम्**=मनुष्याणाम्, प्र०—चर्षणय इति मनुष्यनामसु पठितम् निघ० २ ३, १ ७ ६ मनुष्यादिप्राणीनाम्, प्र०—'कृपेन्नादेश्च च' उ० २ १०० अनेन कृपन्नातोऽनि प्रत्यय आदेश्चकारादेशश्च ११७२ मनुष्याणा तत्सम्बन्धिसेनाना वा १७.३३ ऐश्वर्येण प्रकाशमानानाम् (मानुषाणा=मानवाना मध्ये) ४ ८ ८ मनुष्यादिप्रजानाम् ३ १० १ विद्याप्रकाशवता मनुष्याणाम् ३ ६२ ६ **चर्षणीभ्यः**=दुष्टेभ्य श्रेष्ठेभ्यो वा मनुष्येभ्य १ ५५ १ चर्षणी =प्राणान् मनुष्यान् वा ५ ८६ २ प्रकाशान् ४ ७ ४ प्रकाशमाना मनुष्यसेना ५ २३ १ [चर्षणि =चायिता आदित्य नि० ५ २४ चर्षणीनाम् मनुष्याणाम् नि० १२ २१ कृष विलेखने (भ्वा०) धातोर्बाहुलकादौणादिको अनि प्रत्यय । आदेश्च धातोश्चकारादेश । चर्षणय =मनुष्यनाम निघ० २ ३ चर्षणि पदनाम निघ० ४ २]

चर्षणी प्रचर्षणी सम्यक् सुखप्रापकौ (इन्द्राग्नी=

चरतः स्वगत्या व्याप्तस्य (दिव =सूर्यस्येव विदुष) १ १४६ १. **चरता**=प्राप्तेन (वधेन) ३ ३२ ६ **चरताम्**=प्राणभृताम् २ ३८ ६ [चर गतौ (भ्वा०) धातो शतृप्रत्यय]

चरथम् चर्य्यते गम्यते भक्ष्यते यस्तम् (रज = सकारण लोकसमूहम्) १ ५८ ५ मनुष्यादिजङ्गमम् १ ७२ ६ जङ्गम-समूहम् १ ६८ १ आगमन विज्ञान वा ३ ३१ १५. **चरथाम्**=जङ्गमानाम् (प्राणिनाम्) १ ७० २. चरथाय=गमनाय विज्ञानाय भोजनाय वा ४ ३६ ३. सब से अधिक आनन्द भोग, सब देशों में अव्याहत गमन=इच्छाऽनुकूल आने जाने के लिए, आर्याभि० १ १६, ऋ० १ ३ १०.१४ चरणाय १ ३६ १४ भ्रमणाय ४ ५१ ५ [चरथाय=चरणाय नि० ४.१९ चर गतौ (भ्वा०) धातोरौणादिको बाहुलकाद् अथ प्रत्यय]

चरद्भ्यः अनर्थकारिभ्य (प्रजापुरुषेभ्य) १६ २१. [चर गतौ (भ्वा०) धातोर्बाहु० औणादिक अति· प्रत्यय]

चरध्यै चरितु भक्षितु गन्तुम् १.६१.१२. [चर गतौ (भ्वा०) धातोस्तुमर्थे अध्यै प्रत्यय। चरध्यै चरणाय नि० ६,२०]

चरन् विचरन् (पुत्र) १.१४४ ४ जानन् प्राप्त सन् (ईश्वर सूर्यलोको वा) १ ३३ ४ **चरन्तम्**=प्राप्नुवन्तम् (आत्मानम्) ३ १९ ज्ञातार सर्वज्ञमीश्वरम्, ऋ० भू० १६३ विहरन्तम् (पुत्रम्) ४ १८ १२ व्यवहरन्तम् (कुमारम्) ५ २ ४ सर्वं जगज्जानन्त, सर्वत्र व्याप्नुवन्तम (अ०—स्वात्मनि परमात्मान, बाह्यदेशे सूर्य वायु वा) १ ६ १ गच्छन्तम् (सूनुम्) १ १८५ २ **चरन्तः**=विचरते हुए (गृहस्थादि मनुष्य) स० वि० १४२, अथर्व०-३ ६ ५. [चर गतौ (भ्वा०) धातो शतृप्रत्यय। वायुर्वै चरन् तै० ३ ९ ४ १]

चरन्त चरन्तु, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् ३ ४ ५ [चर गतौ (भ्वा०) धातोर्लङ्। अटभावो व्यत्ययेनात्मनेपदञ्च]

चरन्ता प्राप्नुवन्तौ गच्छन्तौ वा (विद्याकामौ जनौ) १ १५८.२. [चर गतौ (भ्वा०) धातो शतृ। प्रथमाद्विवचनस्याकारश्छान्दस]

चरन्ति वर्त्तन्ते २ ३० प्रवर्त्तन्ते १ ९४ ५ प्राप्नुवन्ति गच्छन्ति वा ४ ६ १० व्यवहरन्ति १७ ३१ सञ्चरन्ति ५ ९ २ विचरन्ति ६ ४७.३१ आचरन्ति ७ ३३ ९ गच्छन्त्यागच्छन्ति १ ३६ ३ जानन्ति गच्छन्ति वा ७ १.१५ व्यवहरन्ति १७ ३१ प्रवृत्त हो रहे हैं आर्याभि० २ ४४, १७ ३१ [चर गतौ (भ्वा०) धातोर्लट्]

चरन्तीः प्राप्नुवन्त्य (नद्य =सरिता) ३ ३३ ४ **चरन्ती**=प्राप्नुवन्ती (वाक्) ७ ३६ ७ प्राप्नुवत्यौ (उषासा=प्रातःसायं वेले) २९ ६ गच्छन्ती (योषा=स्त्री) १ १९७ ३ [चर गतौ (भ्वा०) धातो शतृन्ताद् ङीप्]

चरन्तु विलसन्तु ४ ८ ७ [चर गतौ (भ्वा०) धातोर्लोट्]

चरमम् अन्तिमम् (युक्ताहारविहार ब्रह्मचर्य्यम्) ७ ५९ ३ [चर गतौ (भ्वा०) धातो 'चरेश्च' उ० ५ ६९ सूत्रेण अमच्-प्रत्यय]

चरसि गच्छसि प्राप्नोषि ११ ३९ [चर गतौ (भ्वा०) धातोर्लट्]

चरसे व्यवहर्त्तुं भोजयितु वा १ ९२ ९ चरितुं गन्तुम् ५ ४७ ४ [चर गतौ भक्षणे च (भ्वा०) धातोस्तुमर्थे असेन् प्रत्यय]

चराचरेभ्यः स्थावर-जङ्गमेभ्य (जड-चेतनेभ्य) २२ २९ [चर-अचरपदयो समास। चर =चर गतौ (भ्वा०) धातोरच्]

चराणि गतिमन्ति प्राप्तव्यानि वा (वीर्ययुक्तानि सैन्यानि) ५ २९ १३ [चर गतौ (भ्वा०) धातोरच्। घञर्थे को वा]

चराथा चरथया (वसव्या), प्र०—अत्र चरधातोर्बाहुलकादौणादिकोऽथच् प्रत्यय, प्रत्ययाऽऽदेर्दीर्घ 'सुपा सुलुग्०' इत्याकारादेशश्च १ ६६ ५ [चराथा=चरन्त्या नि० १० २१]

चरामसि विचराम १ ५७ ४ [चर गतौ (भ्वा०) धातोर्लट्। उत्तमबहुवचने 'इदन्तो मसि' इति मस इदन्तता]

चरामि गच्छामि १ १६४ ३७ प्राप्नोमि ३ ५५ १४. [चर गतौ (भ्वा०) धातोर्लट्]

चरितवे चरितु व्यवहर्त्तुम् १ ११३ ५ [चर गतौ (भ्वा०) धातोस्तुमर्थे तवेन् प्रत्यय]

चरितस्य अनुष्ठितस्य कर्मणः १ ११०.२ [चर गतौ (भ्वा०) धातो क्त]

चरित्रम् शत्रु-शीलम् १ ११६ १५ **चरित्रान्**=व्यवहारान् ६.१४ **चरित्राय**=धर्माऽऽचरणाय १३ १९ शुभ-कर्माऽऽचाराय १४ १२. सत्कर्माऽनुष्ठानाय १५ ६४

शाम्मि १७ ६३ **चाकशीहि**=भृश चक्ष्व पुन पुनश्शाधि, प्र०—अय कगद्यातोर्यङ्लुगन्तस्य प्रयोग 'वाच्छन्दसि' इति पित्वादीट् १६ २ [काशृ दीप्तौ (भ्वा०) धातोर्यङ्लुकि लटि रूपम्। 'बहुल छन्दसीति वक्तव्यम्' अ० ७ ३ ८७ वा० सूत्रेण ह्रस्वत्वम्। अन्यत्र लोट्]

चाक्षुष्यः चक्षुष इमा दर्शनीया (वर्षा) १३ ५६ [चक्षुष् प्राति० 'तत्र साधु' इति यत्। हितार्थे वा यत्। चक्षुष्यप्राति० स्वार्थेऽण्]

चाक्ष्मः व्यक्तवाक् (राजपुरुष) २ २४ ६ [चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्बाहुलकादौणादिको मक्। बाहुलकादेवोपधादीर्घश्च। चाक्ष्म पश्यतिकर्मा निघ० ३ ११]

चातयते विज्ञापयति, प्र०—चनतीति गतिकर्मा, निघ० २ १४, ४ १७ ६ [चतति गतिकर्मा (निघ० २ १४) धातोर्णिजन्तात् लट्]

चातयस्व याचयस्व २ ३३ २ नाग प्रापय ७ १ ७ हिंसय हिन्धि वा ५ ४ ६ [चते याचने (भ्वा०) धातोर्णिजन्तात् लोट्। धातूनामनेकार्थकत्वाद् हिंसार्थेऽपि। चातयतिर्नागने नि० ६ ३०]

चायमानः पूज्यमान (अग्नि=राजा) ६ २७ ८ वर्धमान (पशु=गवादि) ७ १८ ८ **चायमानाय**=सत्कर्त्रे (सज्जनाय) ६ २७ ५ [चायृ पूजानिशामनयो (भ्वा०) धातो शानच्]

चायवः सत्कर्त्तारः (राजजना) ३ २४ ४ [चायृ पूजानिशामनयो (भ्वा०) धातोर्बाहुलकादौणादिक उ प्रत्यय]

चारणाय अतिशूद्रायाऽन्त्यजाय, ऋ० भू० ३१० [चर गतौ (भ्वा०) धातोर्णिजन्तात् ल्युट्। 'कृत्यल्युटो बहुलमि' ति कर्त्तरि ल्युट्]

चारय प्रापय २३ २१ [चर गतौ (भ्वा०) धातोर्णिजन्तात्लोट्]

चारवः सुन्दरस्वभावा गन्तारो वा (नर=मनुष्या) ५ ५६ ३ [चर गतौ (भ्वा०) धातो 'इसनिजनिचरि०' उ० १ ३ सूत्रेण बुण्। चारु चरते नि० ८ १५ रुचेर्विपरीतस्य नि० ११ ५]

चारु श्रेष्ठतरम् (मन) १ १८७ ६ सुन्दर वस्त्रम् ५ ४८ ५ सुन्दर भोक्तव्यम् (भवन=भोजनम्) ३ ३२ १ श्रैष्ठ्य यथा स्यात्तथा १ ७२ २ पवित्र (नाम) स० प्र० ३३०, १ २४ १ **चारुम्**=श्रेष्ठ व्यवहारम् १ ७२ १०. श्रेष्ठाम् (मतिं=बुद्धिम्) २० ७८ भक्षणीय सुन्दरम् (पुरोडाश=सुसम्कृताऽन्नविशेषम्) ३ ५२ ५ **चारुः**=अत्युत्तम (सोम=महौषधिरस) ४ ४६ २. श्रेष्ठ (ईश्वर सभाध्यक्षो वा) १ ६४ १३ सुन्दरा (सोमलता) ६ ८ १ अत्यन्तशोभायमान और शोभा का देने वाला (ईश्वर), आर्याभि० १ ४८, ऋ० १ ६ ३२ १३. [चारुपद व्याख्यातम्]

चारुतमम् अतीव सुन्दरम् (कर्म) १ ६२ ६ **चारुतमः**=अतिशयेन सुशील सुन्दर (अतिथि) ५ १.६ [चारुपद व्याख्यातम्। ततोऽतिशायने तमप्]

चारुप्रतीकः सुन्दर गुणकर्मस्वभावै प्रतीत (विद्वान् श्रीमज्जन) २ ८ २ [चारु-प्रतीकपदयो समास। चारु-व्याख्यातम्। प्रतीक=प्रतिप्राप्तिकर नूप्रत्यय। निपातस्य दीर्घ]

चाषान् भक्षणानि २५ ७ **चाषेण**=भक्षणेन, भा०—औषधसेवनेन १२ ८७ [चष भक्षणे (भ्वा०) धातोर्घञ्]

चिकितः जानासि, प्र०—मध्यमैकवचने लेट्प्रयोग १ ६१.१ [कि ज्ञाने (जु०) धातोर्लेट्]

चिकितान ! ज्ञानयुक्त (मर्त्त=मनुष्य) ५ ६६ १ [कित ज्ञाने (भ्वा०) धातोर्लिट स्थाने कानच्]

चिकितानः ज्ञानवान् ज्ञापक (महाबलिजन) ३ १८ २ [कित ज्ञाने (भ्वा०) धातोर्लिट स्थाने कानच्]

चिकितुषः प्रशस्तविद्यस्य (विद्वज्जनस्य) १ ७३.१ **चिकितुषा**=विज्ञापयित्र्या (वाचा) ६ ६१ १३ **चिकितुषे**=चिकित्सितु विचारयितुमिष्टाय (रणाय=सङ्ग्रामाय) ६ ४१.४ ज्ञातव्याय (विद्यार्थिने जनाय) ५ ४१.११ विज्ञापनाय ४ १६ २ विज्ञानवते (पत्ये) ६ ६६ १. [कित ज्ञाने (भ्वा०) धातोर्लिट. स्थाने क्वसु प्रत्यय]

चिकितुः विज्ञातु (सेनाऽध्यक्षस्य) ३ ५३ २४ [कि ज्ञाने (जु०) धातोस्तृच्, गुणाऽभावो द्वित्व च छान्दसम्]

चिकिते जानाति ७ २३ २ जानातु ३ ५३ २३. विज्ञापयति २ ४ ५ चिकित्सति १ ५१ ७ ज्ञापयति १ ७१ ७ [कि ज्ञाने (जुहो०) धातोर्लेट्। व्यत्ययेनात्मनेपदम्]

चिकित्रिरे जानीत १ १६६ १३. [कित ज्ञाने (भ्वा०) धातोर्लिटि झस्य इरेच्। रुडागमश्छान्दस]

चिकित्रे विज्ञानवते (पूर्णविद्यायाध्यापकाय) १ १८६ ६ [कित ज्ञाने (भ्वा०) धातोस्तृच्। गुणाभावो द्वित्व च छान्दसम्]

विद्युत्प्रसिद्धाग्नी) १ १०६ ५ [चर्षणिरिति व्याख्यातम्। तत प्रथमाद्विवचनम्]

चर्षणीधृत् यो मनुष्यान् धरति (इन्द्र =राजा) ४ १७ २० **चर्षणीधृतम्**=चर्षणीना सत्यासत्यविवेचनेना धर्त्तारम्(अध्याकमुपदेशक वा) ४ १ २ विद्वद्भिर्धृतम् (अध्यापकमुपदेशक वा) ४ १ २ **चर्षणीधृतः**=सत्योपदेशेन मनुष्येभ्य सुखस्य धर्त्तार (सर्वविद्वज्जना), प्र०—चर्षणय इति मनुष्यनामसु पठितम्, निघ० २.३, १ ३ ७ सुशिक्षया मनुष्याणा धर्त्तु (देवस्य) ११ ६२ चर्षणयो मनुष्यास्तान् धरन्ति पोषयन्ति ते (देवास =विद्वास) ७ ३३ [चर्षणिरिति व्याख्यानम्। तदुपपदे धृञ् धारणे (भ्वा०) धातो क्विप्। तुगागम। चर्षणिधृत =मनुष्यधृत नि० १२ ४०]

चर्षणीप्राम् यश्चर्षणीन् मनुष्यान् प्राति व्याप्नोति तम् (रयिं=धनम्) ६ ४६ १५ **चर्षणीप्राः**=यश्चर्षणीन् मनुष्यान् प्राति व्याप्नोति स (अग्नि =राजा) ४ २ १३ यश्चर्षणीन् मनुष्यान् सुखै पिपर्त्ति स (इन्द्र =सूर्य) १ १८६ ६ यश्चर्षणीन् मनुष्यान् प्राति विद्यया पिपर्त्ति स (राजा) १ १७७ १ यश्चर्षणीन् मनुष्यान् सत्यविद्याशिक्षा-शीलै प्राति प्रपूर्त्ति स (इन्द्र =धार्मिको विद्वान्, राजा वा) ३ ३४ ७ यश्चर्षणिषु मनुष्येषु विद्युद्रूपेण व्याप्नोति (अग्नि =सूर्य) ६ १६ १ यो विद्यादिभिर्गुणैश्चर्षणीन् मनुष्यान् प्राति व्याप्नोति (विद्वज्जन) ६ ३६ ४ चर्षणीन् मनुष्यान् प्राति सुखै प्रपूरयति स (इन्द्र = भगवान् जगदीश्वर) ७ ३६ [चर्षणिरिति व्याख्यातम्। तदुपपदे प्रा पूरणे (अदा०) धातो क्विप्]

चर्षणीसहम् मनुष्याणा सोढारम् (क्रतु=प्रज्ञाम्) ५ ३५ १ शत्रुसेनाया सोढारम् (राजानम्) ६ ४६ ६ चर्षणयो मनुष्या शत्रून् सहन्ते येन तम् (विद्युद्यानम्) १ ११६ १० मनुष्यसेनाया कार्यसहनशीलम् (तारार्य यन्त्रम्) ऋ० भू० १६६ **चर्षणीसहाम्**=ये चर्षणीन् मनुष्यसमूहान् सहन्ते तेषाम् (योद्वृजनानाम्) २८ १ [चर्षणिरिति व्याख्यातम्। तदुपपदे षह मर्षणे (भ्वा०) धातो क्विप् करणे 'कृतो बहुल वे' ति वार्त्तिकेन। कर्त्तरि वा क्विप्]

चलाचलासः चलाश्चाऽचलाश्च ता (शङ्कव = कीला) १ १६४ ४८ चला चालनाऽर्हा अचला स्थित्यर्हा कला) ऋ० भू० २०७, १ १६४ ४८ [चल-अचलपदयो समास]

चषालवन्तः बहवश्चषाला भोगा विद्यन्ते येषान्ते (बहुश्रुता विद्वास) ३ ८ १० [चषालप्राति० भूम्न्यर्थे मतुप्। चषाल =चष भक्षणे (भ्वा०) धातो 'सानसिवर्णसि०' उ० ४ १०७. सूत्रेणालच् प्रत्ययान्तो निपात्यते]

चषालम् वृक्षविशेषम् १ १६२ ६ यूपाऽवयवम्, भा०—अश्वबन्धनादिनिमित्ताय काष्ठविशेषज वस्तु २५ २६ [व्याख्यातम्। चषान्नाद् वै देवनास्स्वर्ग लोकमायन् काठ० २६ ४]

चष्टे वदति ७.२८ ४ उपदिशति १ १६० ७ प्रकाशयति ७ ६० ३ कथयामि ६ २६ २ जानाति ७ ६१ १ दर्शयति, प्र०—अत्राऽन्तर्गतो ण्यर्थ १ १०८ १. कथयति ७ ३४ १० कथयामि ६ २६ २ अभित ख्याति ३ ५६ १. पश्यति १२ ६६ विख्यायते ५ १६ १ [चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्लट्। अय धातुर्दर्शनार्थेऽपि। चष्टे पश्यतिकर्मा निघ० ३ ११]

चस्कन्द प्राप्नोति १३ ५ [स्कन्दिर् गतिशोषणयो (भ्वा०) धातो सामान्ये लिट्]

चाकन् चड्कन्यते काम्यते, प्र०—'कनी दीप्तिकान्तिगतिषु' इत्यस्य यड्लुगन्तस्य क्विबन्त रूप 'बाच्छन्दसि सर्वे विधयो भवन्ति, इति तुगभाव 'दीर्घोऽकिन' इत्यभ्यासस्य दीर्घत्व च। सायणाचार्येणेद भ्रमतो मित्सज्ञकस्य ण्यन्तस्य च कनीधातो रूपमशुद्ध व्याख्यातम् १ ३३ १४ कामयते २ ११ ३ कामयसे प्र०—अत्र कनी दीप्तिकान्तिगतिषु इत्यस्माल्लडो मध्यमैकवचने 'बहुल छन्दसि' इति शप स्थाने श्लु 'श्लौ' इति द्वित्व 'बहुल छन्दस्यमाङ्योगेऽपि' इत्यडभाव, सयोगान्तसलोपश्च १ १७४ ५ [कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोर्यड्लुगन्तप्रयोग। चाकन् चायन्निति वा कामयमान इति वा नि० ६ २८ चाकन् पदनाम निघ० ४ ३ चाकनत् कान्तिकर्मा निघ० २ ६ चाकनत् पश्यतिकर्मा निघ० ३ ११]

चाकन कामये, प्र०—अत्र कनधातोर्वर्तमाने लिट् 'तुजादीना दीर्घोऽभ्यासस्य' इति अभ्यासदीर्घत्वञ्च १ ५१ ८ प्रकाशितो भवेयम्, प्र०—अत्र तुजादित्वादभ्यासदीर्घ १ १२० १० कामना करता हूँ, आर्याभि० १ १४ **चाकनन्त**=कामयन्ते ५.३१ १३ **चाकनः**=कामयसे १ ५१ १२ **चाकनाम**=कामयेमहि २ ११ १३ **चाकन्तु**=कामयन्तु १ १२२ १४ [कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोर्लिट्। छान्दस रूपम्]

चाकशीति अभिपश्यति १ १६४ २० **चाकशीमि**=प्रकाशयामि ४ ५८ ५ भृश प्राप्नोमि १३ ३८ सर्वतोऽनु-

चितन्त्या बुद्धिमत्या (मात्रा) १ १२६ ७ [चिती सज्ञाने (भ्वा०) धातो शत्रन्तात् ङीपि तृतीयैकवचनम्]

चितयत् सज्ञापयेत् १ १८० ८ [चिति सज्ञाने (भ्वा०) धातोर्णिजन्तात् लेट्। गुणाऽभावश्छान्दस]

चितयत् यच्चित ज्ञातार करोति तत् (ब्रह्म=धनमन्न वा) २ ३४ ७

चितयन् ज्ञापयन् (देव=विद्वज्जन) ५ १५ ५ [चिती सज्ञाने (भ्वा०) धातोर्णिजन्ताच्छतृप्रत्यय]

चितयन्त चित कुर्वन्तु २ ३४ २ विज्ञापयन्ति ४ ५१ ३ [चिती सज्ञाने (भ्वा०) धातोर्णिजन्तात् लड्। अडभावश्छान्दस]

चितयद्भि ज्ञापयद्भि (अर्कै=विद्वद्भि) ५ ४१ ७ सब सत्य विद्याओ को जनाने हारे (ब्रह्मचारियो) से, स० वि० १०५, ५ ४१ ७ **चितयन्तम्**=ज्ञापयन्तम् (रूपम्) ६ ६ ७ **चितयन्त**=सञ्चेतयन्त (जना) प्र०—अत्र 'वाच्छन्दसि' इत्युपधागुणो न १ ११३१ २ ज्ञापयन्त (नर=नायका जना) ५ १६ २ गुणाना चिति कुर्वन्त (सभासेनाप्रजास्था जना) १ ६४ ४ सञ्जानन्त (क्षितय=मनुष्य) १ ३३ ६ [चिती सज्ञाने (भ्वा०) धातोर्णिजन्ताच्छतृप्रत्यय। गुणाऽभावश्छान्दस]

चितयन्ति ज्ञापयन्ति ७ ६० ६ **चितयन्ते**=प्रज्ञापयन्ति ५ ५६ २ सञ्ज्ञापयन्ति १ १७१ ५ [चिती सज्ञाने (भ्वा०) धातोर्णिजन्तात् लट्]

चितयन्त्या चेतनताया कर्त्र्या (कृपा=सामर्थ्येन) १७ १० ज्ञापयन्त्या (कृपा=कृपया) ६ १५ ५ [चिती सज्ञाने (भ्वा०) धातोर्णिजन्ताच्छतृप्रत्यय]

चितये चेतनाय (परमेश्वराय) २३ ४६ [चिती सज्ञाने (भ्वा०) धातो क्तिच्प्रत्यय। यच्चेतयमाना अपश्यस्तस्माच्चितय श० ६ २ ३ ६ पञ्च ह्येतेऽग्नयो यदेताग्चितय श० ६ २ १ १६ पञ्च तन्वो व्यस्रसन्त लोम त्वड् मासमस्थि मज्जा ता एवैता पञ्च चितय श० ६ १ २ १७ ऋतवो हैते यदेताग्चितय श० ६ २ १ ३६ सप्त योनीरिति चितीरेतदाह श० ६ २ ३ ४४]

चितयेम ज्ञापयेम २ २ १० चिति सज्ञानमाचक्ष्महि ४ ३६ ६ [चिती सज्ञाने (भ्वा०) धातोर्णिजन्तात् लिड्]

चित इन्धनै सयुक्त (अग्नि) १ ११२ १७ सञ्चित (अग्नि) १ १५८ ४ [चिञ् चयने (स्वा०) धातो क्त प्रत्यय]

चिताना. सज्ञाकारिण्य (अप=जलानि प्राणान्वा), प्र०—अत्र विकरणलुग् व्यत्ययेनाऽऽत्मनेपदञ्च १० १. [चिती सज्ञाने (भ्वा०) धातो शानच्। विकरणस्य लुक्, आत्मनेपदञ्च व्यत्ययेन]

चितासः सञ्चययुक्ता (जीवा) ७ १८ १० [चिञ् चयने (स्वा०) धातो क्त प्रत्यय। जसोऽसुगागमश्च]

चित्तगर्भासु चित्त चेतनत्व गर्भो यासु तासु (प्रजासु) ५ ४४ ५ [चित्त-गर्भपदयो समास। चित्त व्याख्यायते। गर्भ=गृ निगरणे (तुदा०) गृ शब्दे (क्र्या०) धातोर्वा 'अर्त्तिगृभ्या भन्' उ० ३ १५२ सूत्रेण भन्प्रत्यय]

चित्तम् चेतति येन तत् (योगाभ्यामजनिता विद्युतम्) ११ ६६ अन्त करणम् १ १६३ ११ अन्त करणस्य स्मरणात्मिका वृत्तिम् १ १७० १ सर्वज्ञ, सर्वव्यापक साक्षी (मन) स० प्र० २४७, ३४ ५ स्मृति १८ २ स्वान्तम् १७ ४४ सञ्ज्ञानम् ५ ७ ६ पूर्वपराऽनुभूत स्मरणात्मक धर्मेश्वरचिन्तनम्, ऋ० भू० ६४ स्मृतिसाधकम् (अन्तकरणम्) २२ २० विज्ञानसाधिकामन्त करणवृत्तिम् २५ २ सर्वपदार्थ-विषयिज्ञानम् ३४ ५ **चित्तानि**=अन्त करणानि ७ ५६ ८ सज्ञप्तानि धर्म्याणि कर्म्माणि १२ ५८ [चिती-सज्ञाने (भ्वा०) धातो क्त। चित्त प्रज्ञानाम निघ० ३ ६ चित्त चेतते नि० १ ६ चित्त विज्ञातम् तै० स० ४ १ ६ १ मै० २ ७ ७ मनो वै चित्तम् मै० ४ २ ६]

चित्तिनः विद्वान् सज्ञान (गृहस्थादिमनुष्यगण), स० वि० १४२, अथर्व० ३ ३० ५ [चित्तप्राप्ति० मत्वर्थे इनि प्रत्यय। वचनव्यत्यय]

चित्तिभिः चयनक्रियाभि ५ ४४ १० चयनै १ १६४ २६ काष्ठादिचयनै ३ ३ ३ सज्ञानै १७ ५३ सम्यग् विज्ञानैस्सह, भा०—विद्यासञ्चयै १२ ३१ **चित्तिम्**=चिन्वन्ति यया ताम् (क्रियाम्) १७ ७८ चिन्वन्ति विद्या यया ताम् (प्रकृतिम्) २ २१ ६ कृतचयना क्रियाम् ४ २ ११ ज्ञानम् २७ ६ **चित्तिः**=सम्यङ् ज्ञाता ज्ञापको वा (ईश्वरो विद्युद्वा) १ ६७ ५ [चित्तिभि कर्मभि नि० २ ६ चिती सज्ञाने (भ्वा०) धातो क्तिन् स्त्रियाम्। चिति स्तुक् मै० १.६ १ तै० आ० ३ १ १]

चित्पति चेतयति येन विज्ञानेन तस्य पति पालयिताऽधिष्ठातेश्वर ४ ४ [चित्-पतिपदयो समास चित्=चिञ् चयने (स्वा०) धातो 'कृनो बहुल वा' इति करणे क्विप् प्रजापतिर्वै चित्पति ३ १ ३ २२ मनो वै चित्पति तै० स० ६ १ १ ६ मै० ३ ६ ३]

चित्र ! अद्भुतविद्य (इन्द्र=मनुष्य) ६ ४६ २ अद्-

चिकित्वत् ज्ञापयन्तीम् (सत्यवाचम्) ४५२४ **चिकित्वः**=ज्ञानवन् (परमेश्वर जीव वा) १७०३ विज्ञानवन् (परमेश्वर) २६८ विज्ञातव्यम् (ऋत=सत्य कारणम्) ५१२२ बुद्धिमन् (विद्वज्जन) ५२७ शुद्ध-बहुप्रज्ञायुक्त (राजन्) ६५३ [कित ज्ञाने (भ्वा०) धातो-र्मतुप्। धातोर्द्वित्व 'वा छान्दसि' इति वार्तिकेन]

चिकित्वान् ज्ञानवान् ज्ञानहेतुर्वा (देव =सूर्योऽध्या-पको वा) १७१५ विवेकी (विद्वज्जन) ४५१२ ज्ञान-वान् ज्ञापको वा (विद्वज्जन) १७१७ विज्ञानवान् (विद्वान् जन) ४८४ सत्यार्थविज्ञापक (अग्नि = विद्वज्जन) ४१२१ केतयति जानातीति (धार्मिकोऽखिल-विद्यो न्यायकारी जन) प्र०—अत्र 'कित् ज्ञाने' अस्माद् वेदोक्ताद्धातो क्वसु प्रत्यय 'चिकित्वान् चेतनवान्' नि० २११, १२५११ **चिकित्वांसम्**=विद्वासम् (सज्जनम्) ४७५. **चिकित्वांसः**=विज्ञापयन्त (विद्वज्जना) ७६०७ [किन ज्ञाने (भ्वा०) धातोर्लिट स्थाने क्वसु। चिकित्वान् चेतनवान् नि० ८५ नि० २११ चिकित्वानिति विद्वानि-त्येतत् श० ६४२६]

चिकित्विन्मनसम् चिकित्वित विज्ञानवता मन इव मनो यस्य तम् (देव=विद्वान जनम्) ५२२३ [चिकि-त्वित्-मनस्पदयो समास]

चिकित्सत् चिकित्सते ४१६१० **चिकित्सति**= सशय प्राप्नोति ४०६ [किन निवासे रोगापनयने च (भ्वा०) धातो 'गुप्तिज्किद्भ्य सन्' इति स्वार्थे सन्। तत शतृ। अन्यत्र लट्]

चिकित्सन्ती चिकित्सा कुर्वती (अर्या=वैश्यकन्या) ११२३१ [कित निवासे रोगापनयने च (भ्वा०) धातो स्वार्थे सन्। तत शत्रन्तात् ङीप्]

चिकित्स यश्चिकित्सति रोगपरीक्षा करोति तत्-सम्बुद्धौ (इन्द्र=वैद्यराज) ६४७२० [चिकित्स धातोरच्-प्रत्यय, तत सम्बुद्धि। चिकित्स=कित निवासे रोगापन-यने च (भ्वा०) धातो स्वार्थे सन्]

चिकित्स सशययुक्तो भव १६१२३ रोगनिवारणा-येव विघ्ननिवारणोपाय कुरु ३४२३ [कित निवासे रोगा-पनयने च (भ्वा०) धातो स्वार्थे सन्। ततो लोटि मध्यमैक-वचनम्]

चिकिद्धि ज्ञापय २४३३ विजानीहि ५११० परमविद्या प्राप्त कराओ आर्याभि० १५३, ऋ० २८१२३ [कित ज्ञाने (भ्वा०) धातोर्लोट्। बहुल छन्दसी' ति शप श्लु]

चिकीषते वेत्तुमिच्छति ११८ [कि ज्ञाने (जु०) धातोरिच्छायामर्थे सन्नन्ताल् लट्। व्यत्ययेनात्मनेपदम्]

चिकेत उद्बुध्येत २४६ विजानीयात् २१४१० जानाति १६७४ केतति जानाति, प्र०=अत्र 'कित ज्ञाने' धातोर्लङर्थे लिट् १३५७ विजानीत ११६४१६ आचरति ऋ० भू० २१३, अथर्व० ५१२ **चिकेतत्**=जानाति ५३६१ चिकेतति विजानाति ६६२६ विजानीयात्, प्र०—अय 'कित ज्ञाने' धातोर्लेट्, प्रथमैकवचनप्रयोग 'बहुल छन्दसि' इति शप श्लु १३५६ **चिकेतति**=ज्ञापयति १४३३ जानाति १८२४ **चिकेतसि**=जानीया ११३१६ **चिकेथे**=जानीथ ५६६४ [कित ज्ञाने (भ्वा०) धातोर्लिट् सामान्ये। अन्यत्र लेटि शप श्लौ रूपम्]

चिक्युः चिनुयु ११६४३८ [चिञ् चयने (स्वा०) धातोर्लिटि प्रथमबहुवचनम्। 'विभाषा चे' इत्यभ्यासात् परस्य वा कुत्वम्। चिक्यृ कान्तिकर्मा निघ० २६० पश्यति-कर्मा निघ० ३११]

चिच्युषे च्यावयसि ४३०२२ [च्युङ् गतौ (भ्वा०) धातोर्लिटि मध्यमैकवचनम्। अभ्यासोकारस्य इकार-श्छान्दस, डडभावश्च]

चित् अपि २०५२ इव, प्र०—चिदित्युपमार्थे, नि० १४, ११०६ अ०—यथा १६५ एवार्थे, प्र०—चिदिद पूजायाम्, नि० १४, १६५ पूजार्थे, प्र०—चिदिद ब्रूयादिति पूजायाम्, नि० १४, ११०६ अ०—अन्ये नास्तिका १४५ निश्चयार्थे ५४११७ भी, स० वि० १५६, ७४१२ खलु ११६७७ चार्थे १२८६ पुनरर्थे १३०४ यदि ११६४ वितर्के १२४१० किञ्चित् २१७१४ [चिदित्येषोऽनेककर्मा। आचार्यश्चिदिद ब्रूयाद् इति पूजायाम्। दधिचिदित्युपमार्थे। कुल्मापाश्चिदाहरे-त्यवकुत्सिते नि० १४]

चित् या विद्याव्यवहारस्य चेतयमाना वाग् विद्युद्वा ४१६. सज्ञप्ता (कन्या) १२५३ **चितः**=चेतयन्ति स-जानन्ति ये ते चित (मनुष्या कपालानि वा) ११८ सचिता (विद्वज्जना) १२४६ [चिती सज्ञाने (भ्वा०) धातो क्विप्। अथापि पशुनामेह भवत्युदात्त। 'चिदसि मनासि धीरसि' चितास्त्वयि भोगा, चेतयस इति वा नि० ५.५. चित् मर्मणि नि० ६३३]

चितन ज्ञापयत ४३७७

१५२२ त्वष्टा नक्षत्रमभ्येति चित्राम् तै० ३११९ चक्षुर्वा एतत् सवत्सरस्य यच्चित्रा पूर्णमास ता० ५९११ इन्द्रस्य चित्रा तै० १५१३ चित्रा नक्षत्र त्वष्टा देवता मै० २१३२० य सपत्नवान् भ्रातृव्यवान् वा स्यात् स चित्रायामग्निमादधीत मै० १६९ या तामिष्टकाम् (इन्द्र॰) आवृहत् सा चित्राऽभवत् मै० १६९]

चित्रयामम् चित्रा अद्भुता यामा प्रहरा यस्माद् यद्वा चित्र याम प्रापण यस्य तम् (अग्नि=पावकम्) ३२१३ [चित्र-यामपदयो समास । चित्र व्याख्यातम् । याम =या प्रापणे (अदा०) धातोर्गुणादिको मन् प्रत्यय]

चित्रराती चित्राऽद्भुता रातिर्दानं याभ्या तौ (वायु-विद्युतौ) ३६२५ चित्राऽद्भुता रातिर्दानं ययोस्तौ (सभा-सेनेशौ) ६६२११ [चित्रा-रातिपदयो समास । चित्रा व्याख्यातम् । राति =रा दाने (अदा०) धातो क्तिन् । औकारे द्विवचने परे 'प्रथमयो पूर्वसवर्ण' इति पूर्वसवर्णदीर्घ]

चित्रशोचिषम् अद्भुतप्रकाशम् (नाकं=सुखम्) ५१७२ [चित्र-शोचिष्पदयो समास । शोचिष्=शोचि =ज्वलतो नाम निघ० १ १७]

चित्रशोचिः चित्र विविध शोचि प्रकाशो यस्य स (विप्र =मेधाविजन) ६१०३ [चित्र-शोचिस्पदयो समास । शोचिस्=शोचति ज्वलतिकर्मा (निघ० १ १६) धातोरौणा० इसि प्रत्यय]

चित्रश्रवस्तम चित्राण्यद्भुतानि श्रवास्यतिशयिता-न्यन्नानि वा यस्य तत्सम्बुद्धौ (अग्ने=विद्वज्जन) १५३१. **चित्रश्रवस्तमम्**=चित्राण्याश्चर्यभूतानि श्रवास्यन्नादीनि यस्मात् तम् (द्युम्न=धनम्) ११६२ चित्राण्यद्भुतानि श्रवासि श्रवणान्यन्नानि वा येन तदतिशयितम् (द्युम्न= यशस्कर धन विज्ञान) वा ३५९६ **चित्रश्रवस्तमः**= चित्रमद्भुत श्रव श्रवण यस्य सोऽतिशयित (अग्नि = परमेश्वरो भौतिको वा) ११५ चित्रमाश्चर्य श्रव श्रवण यस्य स चित्रश्रवा, अतिशयेन चित्रश्रवा चित्रश्रवस्तम (अग्नि =परमेश्वर) वे० भा० न० ११५ आश्चर्य-श्रवणादि, आश्चर्यगुण, आश्चर्यशक्ति, आश्चर्यरूपवान् और अत्यन्त उत्तम (ईश्वर), आर्याभि० १५, ऋ० १११५ चित्राण्यद्भुतानि श्रवास्यतिशयितान्यन्नादीनि यस्य (अग्नि =विद्युदिव विद्वज्जन) १४५६ [चित्र-श्रवस्-पदयो समासे कृतेऽतिशायने तमप् । चित्र व्याख्यातम् । श्रवस्=अन्ननाम निघ० २७ धननाम निघ० २१०]

चित्रसेनाः चित्राऽद्भुता सेना येषान्ते (राजपुरुषा) ६७५९ अद्भुतसैन्या (पितर =पालनकर्मा राजपुरुषा) २९४६ [चित्रा-सेनापदयो समास । चित्रा व्याख्यातम् । सेना=गिर् बन्धने (रधा०) धातो 'ऋवृजृगिद्रुप०' उ० ३.१० सूत्रेण न प्रत्यय । उनेन गतेति वा]

चित्रा विविधाऽऽश्चर्यगुण (शुचि =पवित्रोऽग्नि) प्र०—अत्र 'सुपा सुलुग्०' इत्याकारादेश १६६१ विचित्रश्चरूपोषा १९२१२ विविधव्यवहारसिद्धिप्रदा (उषा =सुप्रभात) १११३४ **चित्राम्**=अद्भुतगुण-प्रकाशिकाम् (उषम्=उच्छामन्नादिप्राप्तिं वा) १६३८ अद्भुतविषयाम् (सुमतिं=प्रज्ञाम्) १७७४ [चित्रापद व्याख्यातम्]

चित्रामघे ! चित्राण्यद्भुतानि मघानि धनानि यस्यास्तत्सम्बुद्धौ (उष) प्र०—अत्र अन्येषामपि इति दीर्घ १४८१० [चित्र-मघपदयो समास । पूर्वपदस्य दीर्घ । मघम्=धननाम निघ० २१०]

चित्रायुः चित्रमायुर्यस्या सा (विदुषी कन्या) ६४९७ [चित्र-आयुपदयो समास । आयु =इण् गतौ (अदा०) धातो 'गमेरिण्च्च' उ० २११८ सूत्रेण उसि प्रत्यय । आयु =अन्ननाम निघ० २७]

चित्रावसो ! चित्रमद्भुतं वसु धनं विद्यते यस्मिंस्त-त्सम्बुद्धावीश्वर ! चित्राणि वसूनि धनानि यस्माद् वा स भौतिकोऽग्निर्वा, प्र०—अत्र 'अन्येषामपि०' इति दीर्घ ३१८ [चित्र-वसुपदयो समास । पूर्वपदस्य दीर्घ । वसु=वस निवासे (भ्वा०) धातो 'शृस्वृ०' उ० १.१० सूत्रेण उ प्रत्यय । वसु=धननाम निघ० २१० रात्रि-नाम निघ० १७ रात्रिर्वै चित्रावसु सा हीयं सर्वमृह्येव चित्राणि वसति श० २३४२२]

चित्रिणीषु अद्भुतासु सेनासु ४३२.२ [चित्र व्याख्यातम् । ततो मत्वर्थ इनि । तत स्त्रिया ङीप्]

चित्रोतयः चित्रा आश्चर्यवद्रक्षणाद्या क्रिया यासु ता मात्रादयोऽध्यापिका) १२१०८ [चित्रा-ऊतिपदयो समास । ऊति =अव रक्षणादिषु (भ्वा०) धातो 'ऊति-यूति०' अ० ३३९७ सूत्रेण क्तिन् प्रत्ययान्तो निपात्यते]

चित्र्यम् अद्भुते भवम् (रयं=यानम्) ५६३७ चित्रेषु अद्भुतेषु भवम् (रयिं=धनम्) ७२०७ [चित्र व्याख्यातम् । ततो भवार्थे यत्]

चिनवत् चिनुयात् ४२११ **चिनुहि**=सञ्चय कुरु

भुतगुणकर्मस्वभाव (इन्द्र=राजन्) ६ ४६ ५ आश्चर्यगुण-कर्मस्वभाव (इन्द्र=राजन्) ४ ३२ २ आश्चर्यरूप (इन्द्र=शत्रुनाशक विद्वज्जन) २७ ३८ अद्भुतकर्मकारिन् (इन्द्र=परमैश्वर्यप्रद राजन्) ७ २० ७ अद्भुत (विद्वन्) २७ ३९ **चित्रम्**=नानाविधम् (इन्द्रम्=ऐश्वर्यम्) १ १४२ ४ अद्भुत विज्ञानम् ४ २३ २ अद्भुतस्वरूपम् ३४ ३३ आश्चर्यगुणयुक्तम् (राध=धनम्) १ ११० ९ चक्रवर्त्ति-राज्यश्रिया विद्यामणिमुक्तर्णहस्त्यश्वादियोगेनाऽद्भुतम् (राध=धनम्) १ ९ ५ आश्चर्यभूतम् (रयिं=धनम्) ६ ६ ७ आश्चर्यवेगादियुक्तम् (रथ=रमणहेतु यानम्) १.३४ १० **चित्रस्य**=अद्भुतरय (राधस=धनस्य) १ २२ ७ **चित्रः**=नानावर्णोऽद्भुत (सविता=सूर्य) ६ ४ ६. अद्भुतगुणकर्मस्वभावपरमेश्वर ३६ ४ अद्भुत-पुरुषार्थ (अग्नि=विद्वज्जन) ६ ४८ ९ शौर्यादिगुणै-रद्भुत (विद्वान्=शिल्पी) १ ८८ २ **चित्राः**=अद्भुता अनेकवर्णा (किरणा) १ ११५ ३ **चित्रेभिः**=अद्भुतै (अभ्रैं=घनै) ५ ६३ ३ **चित्रे**=आश्चर्य-व्यवहारे १ ३० २१ [चिञ् चयने (स्वा०) धातो 'अमिचिमि-शसिभ्य क्त्र' उ० ४ १६४ सूत्रेण क्त्र प्रत्यय । चित्र चायनीय महनीयम् नि० २२ ६ सर्वाणि हि चित्राण्यग्नि श० ७ ४ १ २४ चित्ररूपा वै पशव जै० ३ १०१ चित्राण्येव नक्षत्राणाम् (रूपम्) जै० २ ४२९

चित्रक्षत्र चित्रमद्भुत क्षत्र राज्य धन वा यस्य (राजन्) ६ ६ ७ [चित्र-क्षत्रपदयो समास । चित्र व्याख्यातम् । क्षत्रमपि व्याख्यातम्]

चित्रज्योतिः चित्रमद्भुत ज्योतिर्यस्य स (भा०—सूर्य) १७ ८० [चित्र-ज्योतिस्पदयो समास । चित्र व्याख्यातम्]

चित्रतमम् अत्यन्ताऽऽश्चर्ययुक्त रूपम् ६ ६ ७ अतिशयेनाऽऽश्चर्यरूपम् (स्वं=सुखम्) ४ २३ ६ **चित्र-तम.**=अतिशयेनाऽऽश्चर्यस्वरूपगुणक्रियायुक्त (रथ) १ १०८ १. अतिशयेनाश्चर्यगुणकर्मस्वभाव (विद्वज्जन) ६ ३८ १ [चित्र व्याख्यातम् । तोऽतिशायने तमप्]

चित्रतमा अतिशयाऽद्भुतगुणकर्मस्वभावोत्पादकानि (कर्माणि) ४ १ ६ [चित्र व्याख्यातम् । ततोऽतिशायने तमप् । तत 'सुपा सुलुगि' त्याकार]

चित्रदृशीकम् आश्चर्य-दर्शनम् (अर्णा=जलम्) ६ ४७ ५ [चित्र-दृशीकपदयो समास । चित्र व्याख्यातम् । दृशीकम्=दृशिर् प्रेक्षणे (भ्वा०) धातोर्वाहुलकादौणादिक ईकन् प्रत्यय]

चित्रध्रजतिः विचित्रगति (अग्नि) ६ ३ ५ [चित्र-ध्रजतिपदयो समास चित्र व्याख्यातम् । ध्रजति=ध्रज गतौ (भ्वा०) धातोर्गौणादिकोऽति प्रत्यय]

चित्रबर्हिषम् चित्रमाश्चर्य बर्हिरन्तरिक्ष भवति यस्मात्तत् (धरुण=पृथिवीम्) १ २३ १३ चित्रमनेकविधं बर्हिरुत्तम कर्म क्रियते येन तम् (राजान=प्राण जीव वा) १ २३ १४ [चित्र-बर्हिष्पदयो समास । चित्र व्याख्यातम् बर्हि=अन्तरिक्षनाम निघ० १ ३ उदकनाम निघ० १ १२ पदनाम निघ० ५ २]

चित्रभानवः आश्चर्यप्रकाशा (मेधाविनो जना) १ ८५ ११ चित्रा अद्भुता भानवो दीप्तयो येभ्यस्ते (गिरय) १ ६४ ७ **चित्रभानुम्** अद्भुतकिरणम् (अग्नि=विद्युतम्) ७ १२ १ **चित्रभानु**=विचित्रदीप्ति (अग्नि=पावक) २ १० २ अद्भुतप्रकाश (विवस्वान्=सूर्य) ७ ९ ३ चित्रा भानवो दीप्तयो यस्य यस्माद् वा (सविता=ऐश्वर्यवान्राजा सूर्यलोको वायुर्वा) १ ३५ ४ **चित्रभानो !**=चित्रा आश्चर्यभूता भानवो दीप्तयो यस्य स (इन्द्र=परमेश्वर सूर्यो वा) १ ३ ४ चित्रा भानवो विद्याप्रकाशा यस्य तत्सम्बुद्धौ (इन्द्र=सभेश) २० ८७ [चित्र-भानुपदयो समास । चित्र व्याख्यातम् । भानु=अहर्नाम निघ० १ ९ भानु=भा दीप्तौ (अदा०) धातो 'दाभाभ्या नु' उ० ३ ३२ सूत्रेण नु प्रत्यय]

चित्रया अनेकविधया (ऊती=ऊत्या) २ १७ ८ **चित्रा**=अद्भुतगुणकर्मस्वभावा (उषा) ४ ५२ २ अद्भुतस्वरूपा (उषा=प्रभातवेला) ४ १४ ३ विविध-व्यवहारसिद्धिप्रदा (उषा) १ ११३ ४ विचित्रस्वरूपोषा, प्र०—चित्रेत्युपनाम, निघ० १ ८, १ ९२ १२ [चित्रप्राति० स्त्रिया टाप्]

चित्रा चित्राण्यद्भुतानि (सुखानि) १ १२५ ६ [चित्र व्याख्यातम् । तत 'सुपा सुलुग्०' इत्याकार]

चित्राभिः अद्भुताभि (ऊतिभि=रक्षादिभि) ४ ३२ ५ **चित्राम्**=अद्भुतविषयाम् (सुमतिं=प्रज्ञाम्) १७ ७४ अद्भुतमुखप्रकाशिकाम् (इषम्) १ ६३ ८ [चित्र-पद व्याख्यातम् । तत स्त्रिया टाप् । ते ह देवा समेत्योचु । चित्र वाऽअभूम यऽइयत सपत्नानवधिष्मेति तद्वै चित्रायै चित्रात्वम्, चित्र ह भवति हन्ति सपत्नान् हन्ति द्विपन्त भ्रातृव्य य एव विद्वाँश्चित्रायामाधत्ते श० २ १ २ १७ चित्रा शिर (नक्षत्रियस्य प्रजापते. तै०

चेतिष्ठः अतिशयेन चेतयिता (सोम =ओषधिसमूह) १ ६५ ५ [चिती सज्ञाने (भ्वा०) धातोरितृच्। तनोऽतिशायने इष्ठन्। 'तुरिष्ठेमेयस्सु' अ० ६ ४ १५४ सूत्रेण तृ-शब्दस्य लोप]

चेत्ता ज्ञानस्वरूप (देवता=सवितेश्वर) १.२२ ५ सम्यग् ज्ञानस्वरूपत्वेन सत्याऽसत्यज्ञापक (परमेश्वर) २२ १० [चिती सज्ञाने (भ्वा०) धातो कर्त्तरि तृच्]

चेत्यः चितिपु भव (विद्युदग्नि) ६ १ ५ [चिती-प्राति०भवार्थे यत्। चिति =चिञ् चयने (स्वा०) धातो क्तिन्]

चो च ५ २६ १३

चोद प्रेरय १ ४८ २ **चोदत्**=प्रेरयेत् ७ २७ ३ **चोदत**=प्रेरयत १ १६८ ४ [चुद सञ्चोदने (चुरा०) धातोर्लोट्। 'अनित्यण्यन्ताश्चुरादय' इति णिचोऽभाव]

चोदना प्रेरणानि कर्माणि २६ ७ [चुद सचादने (चुरा०) धातोर्ल्युट्। 'शेश्छन्दसि बहुलम्' इति शेर्लोप]

चोदप्रवृद्ध चोदनेन प्रेरणेन प्रवृद्ध (इन्द्र =सूर्य इव सभेश) १ १७८ ६ [चोद-प्रवृद्धपदयो समास। चोद = चुद सचूर्णने (चुरा०) धातोर्घञ्]

चोदम् प्रेरणाम् २ १३ ६ **चोदः**=प्रेरक (विद्वान् नर) ५ ६१ ३ [चुद सचूर्णने (चुरा०) धातोर्भावे घञ्। अन्यत्र कर्त्तरि अच्]

चोदय प्रेरय प्रापय १ ६ ५ **चोदयः**=प्रेरय ६ २६ ३ **चोदयत्**=प्रेरयति, प्र०—अत्र लटर्थे लटडभावश्च ७ १६ **चोदयत**=प्रेरयत १ १८८ ८ [चुद सचोदने (चुरा०) धातोर्लोट्। अन्यत्र लङ् अडभावश्च]

चोदयन् प्रेरयन् (सेनापति) १ ८० ५ [चुद सञ्चूर्णने (चुरा०) धातोर्णिजन्ताच्छतृप्रत्यय]

चोदयन्मति प्रज्ञाप्रेरकम् (अग्नि=विद्वज्जनम्) ५.८ ६

चोदयसि प्रेरयसि १ ६४ १५ **चोदयासे**=चोदय ६ ४६ १३ [चुद सञ्चूर्णने (चुरा०) धातोर्लट्। अन्यत्र लेट्]

चोदयित्री शुभगुणग्रहणप्रेरिका (सरस्वती=वाणी) १ ३ ११ प्रेरयित्री (विदुषी स्त्री) २० ८५ [चुद सञ्चूर्णने (चुरा०) धातोर्णिचि कर्त्तरि तृचि स्त्रिया ङीप्]

चोदस्व प्रेरयस्व १ १०४ ७ **चोदः**=चुद्यात् प्रेरयेत् १ १४३ ६ **चोदामि**=प्रेरयामि ३ ४२ ८ [चुद सचूर्णने (चुरा०) धातोर्लोट्। अन्यत्र लटपि। 'अनित्यण्यन्ताश्चुरादय' इति णिचोऽभाव]

चोदिता प्रेरक (परमेश्वर) १ ५१.८ उत्तम कामों में प्रेरणा करने वाला (ईश्वर), आर्याभि० १ १४ **चोदितारा**=प्रेरकौ (अश्विनौ=अध्यापकोपदेशकौ) ५ ८३ ६ [चुद सचूर्णने (चुरा०) धातो कर्त्तरि तृच्]

चोदीः शुभे कर्मणि प्रेरयसि १ ६३ ४ [चुद सचूर्णने (चुरा०) धातोर्लुटि मध्यमैकवचनम्। अटभावश्छान्दस। अनित्यण्यन्ताश्चुरादय इति णिचोऽभावश्च]

चोष्कूयते भृशमाह्वयति ६ ४७ १६. **चोष्कूयसे**=सब धन के दाता हो, अपने सेवकों पर दया कर रहे हो, आर्याभि० १ २८, ऋ० ५ ८ १७ ४१ [चोष्कूयते पदनाम निघ० ४ ३ कु शब्दे (तुदा०) धातोर्यङन्तान् लट्। अभ्यासस्य पुगागमश्छान्दस। चोष्कूयते व्युदस्यति नि० ६ २२]

चोष्कूयमाणः सर्वानाप्रावयन् (इन्द्र =राजा) प्र०—'प्कुञ् आप्रवणे' इत्यस्य यङन्त रूपम् १ ३३ ३ [चोष्कूयमाण पदनाम निघ० ४ ३ प्कुञ् आप्रवणे (क्रया०) धातोर्यङन्ताच् शानच्। चोष्कूयमाण ददत्। चोष्कूयतेश्चर्करीतवृत्तम् नि० ६ २२]

च्यवतानः च्यावयन् सन् (अर्य =स्वामी) ५ ३३ ६

च्यवनः गन्ता (राजकर्मचारी) ६ १८ २ च्यावयिता (शमादि शुभकर्माचारी जन) २ २१ ३ [च्युङ् गतौ (भ्वा०) धातो 'कृत्यल्युटो बहुलम्' नि कर्त्तरि ल्युट्। औणादिको युच् वा। च्यवन ऋषिर्भवति, च्यावयिता स्तोमाना च्यवानमित्यप्यस्य निगमो भवति नि० ४ १६ च्यवनो वै दाधीचोऽश्विनो प्रिय आसीत् ता० १४ ६ १० सा (सुकन्या) होवाच (हे अश्विनौ) पतिं (च्यवन) नु मे पुनर्युवाण कुरुतम् श० ४ १ ५ ११]

च्यवना प्राप्तानि (भुवनानि) २ १२ ४ [च्युङ् गतौ (भ्वा०) धातोर्ल्युटि जस स्थाने भूतस्य शेर्लोप]

च्यवन्त च्यवन्ते १ ४८ २ **च्यवन्ते**=प्राप्नुवन्ति १ १६७ ८ **च्यवम्**=प्राप्नुयाम् १ १६५ १० **च्यवस्व**=गच्छ ४ ३४ [च्युङ् गतौ (भ्वा०) धातोर्लङ्, अडभाव। अन्यत्र लट् लोट् च। च्यवते गतिकर्मा निघ० २ १४]

च्यवानम् गच्छन्तम् (रथम्) १ ११७ १३ पृच्छन्तम् (विद्यार्थिजनम्) ५ ७५ ५ गन्तारम् (युवान जनम्) १ ११८ ६ **च्यवानात्**=गमनात् ५ ७४ ५ पलायमानात् (राजपुरुषात्) १ ११६ १० [च्युङ् गतौ (भ्वा०) धातो शानच्। आगम शासनस्यानित्यत्वान्मुकोऽभाव। अन्यत्र भावे ल्युटि दीर्घश्छान्दस]

६ ५३ ४ [चिञ् चयने (स्वा०) धातोर्लेट्। अन्यत्र लोट्]

चिन्वती चयन कुर्वती (उषा =प्रभातवेला) ३ ६१ ४ [चिञ् चयने (स्वा०) धातो शत्रन्तान् ङीप्]

चिन्वन्तु वर्धयन्तु, प्र०—अत्राऽन्तर्गतो ण्यर्थ ४ २४ सञ्चिन कुर्वन्तु २३ ३६ [चिञ् चयने (स्वा०) धातोर्लोट्]

चिन्वानः वर्धमान (मनुष्यजन्मप्राप्तो जन) १३ ४७ पुष्ट सन् (अग्नि =राजा) १३ ४६ [चिञ् चयने (स्वा०) धातो शानच्]

चियन्तु चिन्वन्तु, प्र०—अत्र 'बहुल छन्दसि' इति विकरणलुगियडादेशश्च १ ६० ४ [चिञ् चयने (स्वा०) धातोर्लोट्। 'बहुल छन्दसी' ति विकरणस्य लुक्। इयडादेशश्च]

चिश्चा चिश्चेति शब्दानुकरणम् ६ ७५ ५ [चिश्चा शब्दानुकरणम् नि० ६ १४]

चीयमानः वर्धमान (अग्नि =पावक इव राजा) १३ ४७ [चिञ् चयने (स्वा०) धातो कर्मणि शानच्]

चुक्रुधाम कुपिता भवेम २ ३३ ४ [क्रुध कोपे (दिवा०) धातोर्लिटि उत्तम बहुवचने आडागमश्छान्दस]

चुच्यवत् च्यावयति २ ४१ १० [च्युङ् गतौ (भ्वा०) धातोर्यङ्लुकि लेटि रूपम्]

चुमुरिम् अत्तारम् (शम्बर=मेघम्) ६ १८ ८ चोरम् ७ १६ ४ वक्त्रसयुक्तम् (दस्यु=बलात्कारिण चोरम्) २ १५ ६

चुमुरिम् चोरम् ७ १६ ४

चृत नाशय, प्र०—अत्राऽन्तर्गतो ण्यर्थ १ २५ २१ विमुञ्च १२ ६३ **चृतन्ति**=ग्रथ्नन्ति १ ६७ ४ [चृती हिंसाग्रन्थनयो (तुदा०) धातोर्लोट्। अन्यत्र लट्]

चेकितानः प्रज्ञापक (विप्र =मेधाविजन) ३ २६ ७ प्रज्ञापयन् (सूर्य) ४ १४ २ ज्ञानयुक्त (विद्वान् राजा) १५ ५१. [कित ज्ञाने (भ्वा०) धातोर्लिट स्थाने कानच्। चेकितान सत्पतिश्चेकितान इत्ययमग्नि सता पतिश्चेतयमान इत्येतत् श० ८.६ ३ २०]

चेकितानाः भृश चेतयन्ती (उषा =प्रभातवेला) १ ११३ १५ प्राणिन प्रज्ञापयन्ती (उषा =प्रभातवेला) ४ १४ ३ [कित ज्ञाने (भ्वा०) धातोर्लिट स्थाने कानच्, ततो स्त्रिया टाप्]

चेकिते जानाति, प्र०—अत्र 'वा छन्दसि सर्वे विधयो भवन्ति' इत्यभ्यासस्य गुण १ १५ ३ विज्ञापयतु ७ ६१ १३ [कि ज्ञाने (जु०) धातोर्लट्। छान्दसोऽभ्यासस्य गुण। व्यत्ययेनात्मनेपदम्]

चेतः चेतति स्मरति येन तत् (चित्तम्) ३४ ३ **चेतसा**=चित्तेन ५ ७३ ६ [चिती सज्ञाने (भ्वा०) धातोरीणादिकोऽसुन्। चेत प्रज्ञानाम निघ० ३ ६]

चेतति सज्ञापयति प्रकाशयति वा, प्र०—अत्राऽन्तर्गतो ण्यर्थ १ १० २ सजानीते सज्ञापयति वा ३ ११ ३ [चिती सज्ञाने (भ्वा०) धातोर्लट्। अन्तर्गतो ण्यर्थ]

चेततः चेतनस्वरूपस्य (सवितु =जगदीश्वरस्य) २२ ११. सज्ञापकस्य (राज्ञ) ४ ५ ४ **चेतते**=प्रज्ञापकाय (अध्यापकाय) ३ १४ २ [चिती सज्ञाने (भ्वा०) धातो शतृप्रत्यय]

चेतथ सजानीध्व ज्ञापयत वा ५ ५६ ३ **चेतथ.**= चेतयत प्रकाशयित्वा धारयित्वा च सज्ञापयत प्र०—अत्र व्यत्ययोऽन्तर्गतो ण्यर्थश्च १ २ ५ ज्ञापयय ४ ४५ ६ [चिती सज्ञाने (भ्वा०) धातोर्लोऽर्थे लट्]

चेतनम् चेतयति येन तत् (स्वरूपम्) १ १३ ११ चेतति येन तम् (यज्ञम्) १ १७० ४ अनन्तविज्ञानादियुक्तम् (अग्नि=परमात्मानम्) ४ ७ २ **चेतनः**=ज्ञानादिगुणयुक्त (जीवात्मा) २ ५ १ [चिती सज्ञाने (भ्वा०) धातो करणे ल्युट्। अन्यत्र 'कृत्यल्युटो बहुलम्' इति कर्तरि ल्युट्]

चेतन्ती सम्पादयन्ती सती (सरस्वती=वाक्) १ ३ ११ सज्ञापयन्ती (सरस्वती=विदुषी स्त्री) २० ८५ [चिती सज्ञाने (भ्वा०) धातो शत्रन्तान् ङीप्]

चेतयत् ज्ञापयत् ४ १ ६ **चेतयति**=सम्यग् ज्ञापयति १ ३.१२ **चेतयध्वम्**=ज्ञापयध्वम् ३ ५३ ११ [चिती सज्ञाने (भ्वा०) धातोर्णिजन्ताल् लट अटभावश्च। अन्यत्र लट्लोटौ]

चेतयन्ती प्रज्ञापयन्ती (क्रिया-प्रज्ञायुक्ता वाक्) २६ ३३ [चिती सज्ञाने (भ्वा०) धातोर्णिजन्ताच्छत्रन्तान् ङीप्। चेतयन्ती चेतयमाना नि० ८ १४]

चेतारः सम्यग् ज्ञानयुक्ता विज्ञापका (पूर्णविद्या जना) ७ ६० ५ [चिती सज्ञाने (भ्वा०) धातोस्तृच् प्रत्यय कर्तरि]

चेति जानाति, प्र०—अत्र विकरणस्य लुक् ४ ४३ ६ विज्ञायते ४ ३७ ४ सज्ञायते, प्र०—अत्र चिधातोर्लुट्यटभावश्चिण् च १ ६२ १२ सज्ञापयति ३ १२ ६ [चिती सज्ञाने (भ्वा०) धातो सामान्ये लुट्। अटभाव, चिण् च। अथवा लटि विकरणस्य लुक्]

पशवः गवादय २० ६६ सिंहादय १४ ३० गाय आदि सब पशु स० वि० १४५ अथर्व० १२ ५ १० **पशु**=पशुमिव प्र०—अत्र 'सुपा सुलुक्०' इति विभक्ते-र्लुक् ३ ५३ २३ **पशुना**=व्यवहृतेन विक्रीतेन गवादिना ४ २६ **पशुभिः**=हस्त्यश्वगवादिभि ५ २८ **पशुभ्यः**=पशुओं के लिए स० प्र० १५२ अथर्व० १४ २ १८. **पशुम्**=प्रसिद्धम् (गवादिकम्) १३ ४७ द्रष्टव्यम् (अश्वा-दिकम् १३ ४८ पश्यन्तम् (कामासक्त स्वपतिम्) ५ ६१ ५ सर्वद्रष्टारम् (परमेश्वरम्) ऋ० भू० १२८, ३१ १५ **पशुः**=पश्यकश्चतुष्पात् सिंहादि ६ ६ यो दृश्यते भोग्य-पदार्थसमूह समक्षे स्थापित स प्र०—अत्र 'अर्जिदृशि-कमि०' उ० १ २७ इत्यौणादिक-सूत्रेणाऽस्य सिद्धि ३ ५७ दृश्य, द्रष्टव्य (अग्नि=वह्नि) २३ १७. **पशून्**=पशुवद् वर्त्तमानान् मूर्खत्वयुक्तान् गवादीन् वा १ ७२ ६ गोहस्त्यश्वादीन् ६ ३१ श्रिय प्रजा वा, प्र०—श्रीर्हि पशव शत० १ ६ ३ ३६ प्रजा वै पशव शत० १ ४ ६ १७ हरिणादीनारण्यान् ६ ३१ [दृशिर् प्रेक्षणे (भ्वा०) धातो 'अर्जिदृशिकम्यमि०' उ० १ २७. उ प्रत्यय धातोश्च पशिरादेश। पशु=पश्यते नि० पशव (अग्नि) एतान् पञ्चपशूनपश्यत्। पुरुषमेव गामवि-मज यदपश्यत्तस्मादेते पशव श० ६ २ १ २ तऽएते सर्वे पशवो यदग्नि। श० ६ २ १ १२ अग्निर्हि देवाना पशु ऐ० १ १५ योनिर्वै पशूनामाहवनीय (अग्नि) कौ० १८ ६ रौद्रा वै पशव श० ६ ३ २ ७ वायुर्प्रणेत्रा वै पशव. श० ४ ४ १ १५ त्वष्टुर्हि पशव श० ३ ८ ३ ११ पशवो वै सविता श० ३ २ ३ ११ अन्तरिक्षदेवत्या खलु वै पशव तै० ३ २ १ ३ पशवो वै वैश्वदेवम् (शस्त्रम्) कौ० १६ ३ सप्त ग्राम्या पशव सप्तारण्या श० ३ ८ ४ १६ पशवो वै घृतश्चुत ता० ६ १ १७. पशवो वै हविष्मन्त श० १ ४ १ ६ पशवो वै हविष्पङ्क्ति कौ० १३ २ पशवो वै हरिश्रिय ता० १५ ३ १० श्रीर्वै पशव ता० १३ २ २ पशवो यज्ञ श० १२ ८ ३ १ शान्ति. पशव ता० ४ ५ १८ इन्द्रिय वै वीर्य रस पशव ता० १३ ७ ४ पशवो वै वसु ता० ७ १० १७ पशवो वै रयि तै० १ ४ ४ ६ पशवो वै राय श० ३ ३ १ ८ पशवो वै रायस्पोष श० ३ ४ १ १३ पुष्टि पशव श० ३ १ ४ ६ पौष्णा पशव श० ५ २ ५ ६ साहस्रा पशव कौ० २१ ५ पशव सहस्रम् ता० १६ १० १२ पशव गिपि तै० १ ३ ८ ५ पशवो वै मरुत ऐ० ३ १६ पशुर्वै मेध ऐ० २ ६ वाजो वै पशव ऐ० ५ ८ पशवो वै वाजिनम् तै० १ ६.३ १० अन्न पशव श० ६ २ १ १५ पशवो वै धाना गो० उ० ४ ६ पशवो वा इडा कौ० ३ ७ प्राणा पशव श० ७ ५ २ ६ गृहा वै पशव श० १ ८ २ १४ पशवो वा उत्तरवेदि तै० १ ६ ४ ३ पशवो वै चतुरुत्तराणि छन्दासि ता० ४ ४ ६ आत्मा वै पशु. कौ० १२ ७ यजमान पशु तै० २ १ ५ २. वज्रो वै पशव श० ६ ४ ४ ६ पशवो वै ग्रावाण ता० ६.६ १३ पशवो वै उक्थानि कौ० २८ १० पशव ऊपा श० ७ १ १ ६ पशवो वै नियुत ता० ४ ६ ११ प्रजा पशव सूक्तम् कौ० १४ ४ सोमो वै पशु ता० ५ १० ८ पशवो वै सप्तदश ता० १६ १० ७ पशवो वै प्रतिहर्त्ता ता० ६ ७ १५ पशव स्वर गो० उ० ३ २२ पशवो वै बृहद्रथन्तरे ता० ७ ७ १ पशवो वै ज्यैतम् (साम) ता० ७ १० १३ पशवो वै वामदेव्यम् (साम) ता० ४ ८ १५ वाम हि पशव ऐ० ५ ६ पशवो वै वैरूपम् (साम) ता० ५ ३.१२ पशवो वै लोम (साम) ता० १ ३ ११ ११ पशवो वै रौरवम् (साम) ता० ७ ५ ८. पशवो वै यज्ञम् (साम) [illegible] १३ ३ ६ पशवो वै श्रद्धय (साम) पशूनाम-वरु[illegible] ५ ३४ पशव सदो विशीयग ([illegible] ता [illegible]शवो वै सुरूप (साम) [illegible]

धातोर्लिट् । सप्रसारणमकारलोपश्च छान्दस]

पाकम् परिपक्वव्यवहारम् १.१६४.२१. पचन्ति परिपक्व ज्ञान कुर्वन्ति यस्मिन् धर्म्ये व्यवहारे तम् १ ३१.१४ **पाकः**=ब्रह्मचर्यादितपसा परिपचनीयः (मनुष्य.) १.१६४.५. **पाकाय**=परिपक्वाय ३ ६.७. परिपक्वव्यवहाराय ४.५ २. [डुपचष् पाके (भ्वा०) धातोर्घञ् प्रत्यय । पाक. प्रशस्यनाम निघ० ३.४ पा पाने (भ्वा०) धातोर्वा 'अर्भकपृथुकपाका वयसि' उ० ५ ५३. सूत्रेण कन् प्रत्ययो निपात्यते]

पाकारोः मुखादिपाकस्यारोर्मर्मच्छिदः शूलस्य च १२.९७ [पाक-अरुषदयो समास । पाकमिति व्याख्यातम् । अर =ऋ गतौ (भ्वा०) धातोर् औणादिको बाहु० उ. प्रत्यय]

पाक्या विद्यायोगाभ्यामेन परिपक्वधिय (देवान्=विदुषो जनान्) प्र०—अत्र विभक्तेराकारादेश १ १२०.४. पाकोऽस्याऽस्तीति पाकी (विज्ञानपुरस्सर. परमात्मा) प्र०—अत्र 'सुपा सुलुक्०' इति ङ्यादेश २ २७.११ [पाक इति व्याख्यातम् । ततो मत्वर्थ इनि. । पाकी प्रातिप० 'सुपा सुलुग्०' इति ङ्यादेश]

पाङ्क्तराधसम् य. पङ्क्ती समुदायान् राध्नोति तम् (यज्ञम्) ३७.७. ['पङ्क्ति' इत्युपपदे राध संसिद्धौ (स्वा०) धातोरौणादिकोऽसुन्-प्रत्यय.]

पाङ्क्तान् पङ्क्तिरूपेण गन्तॄन् पक्षिविशेषान् २४.२६. **पाङ्क्ताय**=पङ्क्तिपु साधवे (शाकरराय=शक्तिजाय यन्त्राय) २९ ६०. **पाङ्क्तेन**=पङ्क्तिप्रकाशितेन (छन्दसा=स्वच्छेनाऽर्थेन) १३.५३. [पङ्क्तिप्रातिप० 'तत्र साधु ' इत्यर्थे भवार्थे वा अण् प्रत्यय']

पाजः बलम् प्र०—पाजम् इति बलनाम निघ० २ ९, १ ११५ ५ **पाजः**=बलम् ७ ३ ४ प्र० पातेर्बले जुट् च उ० ४.२०३. इत्यसुन् १३ ९ अन्नादिकम् ७.१० १. **पाजसा**=बलेन ११ ४९ [पा रक्षणे (अदा०) धातोः 'पातेर्बले जुट् च' उ० ४.२०३. सूत्रेणासुन्प्रत्यय' । पाज अन्ननाम निघ० २ ७ बलनाम निघ० २.९ पाज =पालनात् नि० ६ १२]

पाजसी रक्षणनिमित्ते (द्यावाक्षामा=सूर्यपृथिव्यौ) प्र०—अत्र विभक्ते पूर्वसवर्ण. 'पातेर्बले जुट् च' उ० ४.२०३ अनेन पा धातोरसुन् जुडागमश्च १ १२१.११. [पाजस् इति व्याख्यातम्]

पाजस्यम् पाजस्वत्सेषु साधु (यवादिकमन्नम्) २५ ८. [पाजस् इति व्याख्यातम् । तत्र 'तत्र साधु' इत्यर्थे यत्]

पाञ्चजन्यम् पञ्चसु जनेषु प्राणादिषु भवा प्राप्तयोगसिद्धिम् (ऋषिम्=वेदपारगाध्यापकम्) १ ११७.३. पञ्चजना प्राणा बलवन्तो यस्य तदपत्यम् ५ ३२ ११. **पाञ्चजन्यः**=पञ्चसु सकलविद्येषु अध्यापकोपदेशक-राजसभा-सेना-सर्वजनाधीशेषु जनेषु भव (इन्द्र=सेनाद्यधिपति.) प्र०—अत्र 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' अ० ४ ३ ५८. इति वार्त्तिकेन ञ्य प्रत्यय' १ १००.१२. पञ्चानां पञ्चसु वा जनेषु साधु. (अग्नि=विद्वज्जन) २६ ९. पांच प्राणों का जनक (ईश्वर) आर्याभि० १ ३४ ऋ० १ ७ १० १२. **पाञ्चजन्याः**=पञ्चजनेभ्यो हिता (अग्नय = आहवनीयादय पावका) प्र०—पञ्चजना इति मनुष्यनाम निघ० २ ३, १८.६७ [पञ्चन्-जनपदयो. समासे भवार्थे 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' अ० ४ ३ ५८. वा० सूत्रेण ञ्य. प्रत्यय. । पाञ्चजन्यया=पञ्चजनीनया नि० ३ ८ पञ्चजना =गन्धर्वा पितरो देवा असुरा रक्षासीत्येके चत्वारो वर्णा निषाद पञ्चम इत्यौपमन्यव नि० ३.८. एष वा अग्नि पाञ्चजन्य तै० सं० ५ ३ ११ ३]

पाञ्चजन्यासु पञ्चसु दिनेषु प्राणेषु भवासु (कृष्टिषु=मनुष्यादिप्रजासु) ३ ५३ १६ [पाञ्चजन्यमिति व्याख्यातम् । तत. स्त्रियां टाप्]

पाणिघ्नम् य. पाणिभ्यां हन्ति तम् (पुरुषम्) ३० २० [पाणीत्युपपदे हन हिंसागत्यो (अदा०) धातो 'कृतो बहुल वा' इति वा० सूत्रेण टक्]

पाणिना रक्षितसमूहेन १ २० किरणसमूहेन व्यवहारेण १.१६ **पाणिभिः**=करैः २ ३१ २ **पाणौ**=बाहू ४ २१ ९ प्रशस्तनीयौ (बाहू=भुजौ) ६ ७१ १ [पाणि = पण व्यवहारे स्तुतौ च (भ्वा०) धातो 'पणिपणाय्योरुडायलुकौ च' उ० ४ १३३ सूत्रेण इण्प्रत्यय आयलुक् च । पाणि. पणायते पूजाकर्मण प्रगृह्य पाणी देवान् पूजयन्ति नि० २ २६ पाणी वै गभस्ती श० ४.१.१ ९]

पात् रक्षतु ४.५५ ५. **पात**=रक्षत २७ २८ **पातम्**=रक्षत, प्र०—अत्र व्यत्ययः ४ ९ रक्षतम् १ १२० ४. प्राप्नुतम् १.४६ ५ पालयत १ ९३ ८. पिबतम् १ १५३ ४ **पाताम्**=रक्षताम् १ १८५ १० **पाति**=रक्षति ५.१२.६. प्राप्नोति ३ ५ ५ पालयति ४.५ ८. **पातु**=रक्षति प्र०—अत्र लडर्थे लोट् २ ५. रक्षतु ४ १९ पालयतु पालयति वा ४ १५ **पाथ**=रक्षका भवथ १ ८६ १. प्राप्नुत ८ ३१. **पाथः**=रक्षथ. १.१५९.३ **पान्ति**=

१.२२ २० अवलोकन्ते ६ ५ देखते हैं आर्याभि० १ २१ ऋ० १ २७ २० **पश्यात्**=सम्प्रेक्षते ४ २५ ४ **पश्यान्**=पश्येयु १ ११३ ११ **पश्यामि**=सप्रेक्षे १ ३०. **पश्येम**=हम देखें आर्याभि० २ २७, २५ २१ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्लोट् । शिति पश्यादेश । अन्यत्र लड्, लोट्, लट्, लेट् लिड् च]

पश्यद्भ्यः सप्रेक्षमाणेभ्य (मनुष्येभ्य) १ ११३ ५ **पश्यन्**=सत्याऽसत्यं प्रेक्षमाण (सुवीर पालको जन) १ ११६ २५ पर्य्यालोचमान (गोतम =विद्वज्जन) १ ८८ ५ विजानन् (परमेश्वर) ७.६० २. समीक्षमाण (वैश्वानर =ब्रह्मचारी जन) ६.९ ३ दर्शयन् (सविता= सूर्य) प्र०—अत्राऽन्तर्गतो ण्यर्थ ३३ ४३ देखता हुआ (पति) स० वि० १२२, अथर्व० १४ १ ५७ दिखाता हुआ (सविता=सूर्य) स० प्र० ३१३, ३३ ४३ **पश्यन्तौ**= समीक्षमाणौ (देवौ=देदीप्यमानौ विद्वज्जनौ) २९ ७ [दृशिर् प्रेक्षणे (भ्वा०) धातो शतृ-प्रत्यय । शिति पश्यादेश]

पश्व इष्टिः पशो सङ्गति १ १८० ४ [पश्व-इष्टि-पदयो समास. पश्व =पशुप्राति० षष्ठी। गुणाऽभाव-श्छान्दस 'जसादिषु छन्दसि वावचनम्' अ० ७ ३ १०९ (वा०) इति विकल्पनात्। इष्टि =यज देवपूजासगतिकरण-दानेषु (भ्वा०) धातो स्त्रिया क्तिन्]

पश्वयन्त्रासः पश्वानि दृष्टानि यन्त्राणि यैस्ते (मनुष्या) ४ १ १४. [पश्व-यन्त्रपदयो समासे जसोऽमु-आगम]

पश्वः पशून् ४ ६ ३ गवादीन् (पशून्) ६ १ १२. पशो ४ २ १८ **पश्वा**=अपहृतस्य पशो स्वरूपाङ्गपाद-चिह्नाऽन्वेषणेन १ ६५ १ **पश्वे**=पशुसमूहाय १ ४३ २ [पशव इति व्याख्यातम्। पशुप्राति० 'जसादिषु छन्दसि वा वचनम्' अ० ७ ३ १०९ वा० सूत्रेण गुणादीना विकल्पे यणादेशे रूपम्]

पश्विषे पशूनामिषे वृद्धीच्छायै १ १२१ ७ [पशूपपदे इषु इच्छायाम् (तुदा०) धातो सम्पदादित्वात् क्विप् स्त्रियाम्]

षष्ठवाट् य षष्ठेन पृष्ठेन वहति स उष्ट्रादि प्र०—वर्णव्यत्ययेन ऋकारस्याऽऽकारादेश १४ ९ प्र०—इद पद पृषोदरादिना सिद्धम् २१ १७ [पृष्ठोपपदे वह प्रापणे (भ्वा०) धातो 'वहश्च' अ० ३ २ ६४ सूत्रेण ण्वि प्रत्यय। ऋकारस्याकारश्छान्दस]

षष्ठौही वडवाऽऽदि १८ २७ [षष्ठवाट् इति व्याख्या-तम्। तत. 'तस्येदम्' इत्यण्-प्रत्यये स्त्रिया ङीपि 'वाह ऊठ्' इत्यूठि 'एत्येधत्यूठ्सु' इति वृद्धि । प्रजनन वै षष्ठौही। प्रजनन ब्रह्मा जै० २ २०३ धात्रे द्वादशकपाल, षष्ठौह्य-प्रवीता दक्षिणा काठ० १५ ३]

पसः राष्ट्रम् २३ २२ लिङ्गम् २० ९. राष्ट्रं पस श० १६ २९ ६. भगस्सौभाग्य पस काठ० ३८ ४]

पस्त्यसदः ये पस्त्येषु गृहेषु सीदन्ति तान् (नॄन्= उत्तमविदुषो जनान्) ६.५१ ९. [पस्त्योपपदे पद्लृ विशरण-गत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्। पस्त्य गृहनाम निघ० ३ ४]

पस्त्याभिः पस्त्यानि गृहाणि विद्यन्ते यासु भूमिषु ताभि प्र०—पस्त्यमिति गृहनाम निघ० ३ ४ तत 'अर्शादि-भ्योऽच् अ० ५ २ १२७. इत्यच्-प्रत्यय १ ४०.७ **पस्त्या-नाम्**=गृहाणा जीवशरीराणा वा १ १६४ ३० **पस्त्याम्**= गृहम् ४ ५५ ३ **पस्त्यासु**=पस्त्येभ्यो गृहेभ्यो हितास्वासु प्रजासु १ २५ १० गृहशालासु १० ७ न्यायगृहेषु १० २६ [पस्त्यम् गृहनाम (निघ० ३ ४) ततो मत्वर्थे 'अर्शआदिभ्यो ऽच्' अ० ५ २ १२७ सूत्रेणाच्। अथवा हितार्थे यत्। विशो वै पस्त्या श० ५ ३ ५ १९]

पस्त्यावत् गृहवत् २ ११ १६ **पस्त्यावतः**=प्रश-स्तानि पस्त्यानि गृहाणि विद्यन्ते यस्य (विदुषो जनस्य) १ १५१ २ प्रशमितानि पस्त्यानि विद्यन्ते येषु तान् (क्षयान्=निवासान्) ४ ५४ ५ [पस्त्यमिति गृहनाम निघ० ३ ४ तत प्रशसाया मतुप्। मतुपि पूर्वस्य दीर्घ-श्छान्दस]

पस्पशे स्पृशति कर्त्तुं शक्नोति वा प्र०—अत्र लडर्थे लिट् १ २२ १९ वक्ति प्र०—अत्र लडर्थे लिट् ६ ४ समर्थ हुआ आर्याभि० १.२३ ऋ० १ २७ १९ [स्पश बाधनस्पर्शनयो (भ्वा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

पस्पृधानम् पुन. पुन स्पर्धमानम् (एतश=अश्वम्) १ ६१ १५ **पस्पृधानेभ्यः**=स्पर्द्धमानेभ्य ईप्समानेभ्यो वा (नृभ्य =मनुष्येभ्य) २ १९ ४ [स्पर्द्ध सङ्घर्षे (भ्वा०) धातो शानचि सम्प्रसारणमकारलोपश्च छान्दसम्। मुगा-गमोऽपि न आगमशासनस्याऽनित्यत्वात्]

पस्पृधानासः स्पर्धमाना (प्रजा) ७ १८ ३. [स्पर्ध संघर्षे (भ्वा०) धातो शानच्। ततो जसोऽमुक्। आगम-शासनस्याऽनित्यत्वान् मुग् आगमो न भवति]

पस्पृधे स्पर्द्धन्ते ६ ३४ १ [स्पर्ध सघर्षे (भ्वा०)

पाद ग० १३८३८ पाद पद्यते नि० २.८ दिश पादा तै० म० ७५२५१]

पादा चरणौ प्र०—अत्राऽऽकारादेश ८२३ पादौ ६२६३ मूर्धन्त्वादिनीचगुणैरुत्पन्नौ (शूद्रौ) ऋ० भू० १२५,३१ १० पद्यते गम्यते याभ्या गमनागमनाभ्या तौ (चरणौ) प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश १२४८ [पद गतौ (दिवा०) धातोर्घञ्। 'सुपा सुलुग्०' इत्याकारादेश]

पादि गच्छ ११४६ प्रतिपद्यताम्, प्राप्यताम् ११०५३ पाद्येत ६२०५ [पद गतौ (दिवा०) धातोर्लुंडि रूपम्। अडभावश्छान्दस]

पान्तम् रक्षन्तम् (इन्द्र=परमैश्वर्यम्) ७३३२ [पा रक्षणे (अदा०) धातो शतृप्रत्यय। अहर्वै पान्तम्। ता० ६१७ पान्तम्=पानीयम्। नि० ७२५ पान्तो वै पुरुष जै० ३६५ रात्रि पान्तम्। जै० १२१४]

पान्ता रक्षकौ (अध्यापकोपदेशकौ) ११२२४ [पा रक्षणे (अदा०) धातो शत्रन्तात् प्रथमाद्विवचन-स्याकारादेश]

पापतीति प्रकर्षेण पुन पुन पतति गच्छति ६६५ [पत्लृ गतौ (भ्वा०) धातोर्यङ्लुगन्ताल्लट्]

पापत्वाय पापस्य भावाय ७३२१८ [पापप्राति० भावे त्व प्रत्यय]

पापया अधर्मरूपया (क्रियया) १२६५ [पाप-प्राति० स्त्रिया टाप्]

पापस्य पापाऽऽचारस्य (रक्षस) ११२६११ **पापाः**=अधर्माऽऽचरणा (जना) ११६०५ [पा रक्षणे (अदा०) धातो 'पानीविपिभ्य प.' उ० ३२३ सूत्रेण प प्रत्यय। पान्ति रक्षन्त्यस्मादिति विग्रह। पापप्राति० मत्वर्थीयस्य लुक्। पाप पानाऽपेयाना पापत्यमानोऽवाडेव पततीति वा पापत्यनेर्वा स्यात् नि० ५२]

पापासः अधर्माचारा (दुर्जना) ४५५ [पाप-प्राति० जसोऽमुगागम। पापास=पापा नि० ६२५]

पाप्मना अधर्मात्मना जनेन ६४ पापेन १६११ **पाप्मने**=पापाऽऽत्मने (दुर्जनाय) ३०१८ पापाऽऽचरणाय ३०५ **पाप्मा**=अपराध ६३५ **पाप्मानम्**=दुष्टकर्म-कारिणम् (पा०—दुष्ट जनम्) २६१० रोगादिकम् १२६६ [पा रक्षणे (अदा०) धातो पा पाने (भ्वा०) धातोर्वा 'नामन्-सीमन्व्योमन्०' उ० ४१५१ सूत्रेण मनिन्-प्रत्यय पगागमश्च निपात्यते। पाप्मा वाऽयशस्ति श० ६.३२७ पाप्मा वै सपत्न श० ८.५१६ पाप्मा वै वृक्ष श० ११५७१३ पाप्मा वै मृत्यु श० ६३३८ वरुणो वाऽएत गृह्णाति य पाप्मना गृहीतो भवति श० १२.७२१७. श्रमो वै पाप्मा श० ६३३७ पाप्मा वै वृत्र. श० ८.५१६ पाप्मा सुरा काठ० १४६ भ्रातृव्यो वै पाप्मा जै० ३२२२]

पायनाय पानाय १११६६ [पा पाने (भ्वा०) धातोर्णिजन्तात् ल्युट्। योग्नादेश]

पायय पाययति वा अ०—तत्पाने हेतुरस्ति ११४३ [पा पाने (भ्वा०) धातोर्णिजन्तात्लोट्। व्यत्ययेन परस्मै-पदम्]

पाययते रक्षा कार्यते १५६१ [पा रक्षणे (अदा०) धातोर्णिजन्तात्लट्। लुगागमस्तु न छन्दसि सर्वविधीना विकल्पनात्]

पायवः रक्षका (आप्ता भृत्या) ४४.१३ पालका (राजपुरुषा) ५१२४ **पायवे**=पालनाय ६४७२८ गुह्यावयवदाहाय ३६१० **पायुना**=पाशेन्द्रियेण २५७ **पायुभिः**=रक्षणै रक्षकैर्वा ५७०३ रक्षणोपायै ११८६४ रक्षकै (विद्वद्भि) ११४३८ रक्षादिभि ३४१३ **पायुम्**=पात्यनेन त गुह्येन्द्रियम् ६१४ य पिबति नम् (जनम्) २२४ **पायुः**=पालनकर्त्ता (परमेश्वर) १८६५ पालकै (अग्नि=नृपति) २१७ गुदेन्द्रियम् २०८ सर्वस्य रक्षक (ईशान=ईश्वर) २५१८. निरन्तर रक्षक (ईश्वर) आर्याभि० ११० ऋ० १६१५५ पालनहेतु (सभाध्यक्ष) प्र०—अत्र 'पा रक्षणे' इत्यस्मादुण् १३११३ [पा रक्षणे (अदा० धातो 'कृवापाजि०' उ० ११ सूत्रेण उण्प्रत्यय]

पारतः पारात् ४३०१८ [पारप्राति० 'तसि प्रकरणे आद्यादिभ्य उपसख्यानम्' अ० ५४४४ वा० सूत्रेण तसि]

पारम् परभागम् १४६११ सर्वदुःखेभ्य पृथग्भूतम् (परतटम्) ३१८ परतटम् ११८३६ **पारः**=य पार-यिता स (इन्द्र=राजा) ५३१८ **पाराय**=मृगकर्म-समाप्त्यर्थम् ३०१६ **पारे**=अपरभागे १५२१२ समुद्र-भूमिपरभागे २११८ [पार कर्मसमाप्तौ (चुरा०) धातोरच्प्रत्यय। पार पर भवति नि० २२४]

पारय दुःखात्पार देश गमय ६२०१२ पार प्रापय १६७७ दुःखाचारात् पृथक्कृत्वा श्रेष्ठाचार नय ११८६२ तीरे प्रापय ११७४६ **पारयतम्**=पारयत २.३६४

रक्षन्ति ५ ६७ ३ प्राप्नुवन्ति २ ११ १४ पालयन्ति ५ ५२ २ **पान्तु**=सतत रक्षन्तु ४ ११ पालयन्तु २ ३ ८ **पासतः**=रक्षेताम् ७ ३४ २३ **पासि**=रक्षसि १ १३४.५ पालयसि २ १ ६ **पाहि**=अ०—दूरे रक्ष ३ ४८ पाति रक्षति २ १६. रक्षय प्र०—अत्रान्तर्गतो ण्यर्थ ३ ३७ पाति वा ३ १७ पालय २ ६ रक्षा कीजिए स० वि० १४६, ३.३७ रक्षयति पाति वा १ २ १ पालन कर आर्याभि० २ ३३, ३ १७ **पाः**=रक्ष ४ २० ४ [पा रक्षणे (अदा०) धातोर्लेट्। अन्यत्र लोट् लट् लङ् च। पातमित्यत्र पा पानि (भ्वा०) धातोर्वा लुङ् अडभाव]

पातयति जागरयति १ ४८ ५ [पत्लृ गतौ (भ्वा०) धातोर्णिजन्ताल् लट्]

पातल्ये पतनशीले (प्राणिनि) ३ ५३ १७ [पाताल-प्राति० भवार्थे यत्। पाताल =पत्लृ गतौ (भ्वा०) धातो 'पतिचण्डिभ्यामालन्' उ० १ ११७ सूत्रेण आलन्]

पातवे पातुम् प्र०—अत्र पा-धातोस्तुमर्थे तवेन्-प्रत्यय २० ५९ पातु पान कर्त्तुम् १ २८ ६ रक्षितुम् २६ २५ [पा पाने (भ्वा०) धातोस्तुमर्थे तवेन्-प्रत्यय]

पातवै पातु रक्षितुम् ३ ४६ ५ [पा रक्षणे (अदा०) धातोस्तुमर्थे तवैप्रत्यय]

पाता रक्षक (इन्द्र =ऐश्वर्यकारी राजा) ६ २३ ३. पानकर्त्ता (इन्द्र =राजा) प्र०—अत्र तृन्-प्रत्यय ६ ४४ १५ [पा रक्षणे (अदा०) पा पाने (भ्वा०) धातोर्वा कर्त्तरि तृच् तृन् वा]

पात्नीवतः प्रशस्ता पत्नी यज्ञसम्बन्धिनी तद्वतोऽयम् भा०—विवाहितस्त्रीव्रत (जन) १८ २० [पत्नीशब्दात् प्रशसायामर्थे मतुप्। 'छन्दसीर' अ० ८.२ १४ सूत्रेण मतोर्मस्य वकार। पत्नीवत्-प्राति० 'तस्येदमिति' अण्-प्रत्यय। रेत सिक्तिवै पात्नीवतग्रह कौ० १६ ६ रेतो वै पात्नीवत. गो० उ० ४ ५ अग्निर्हि देवाना पात्नीवत नेष्टृत्विजाम् कौ० २८ ३]

पात्रम् पिवति पाति वा येन ६ ४४ १६ दातु योग्यम् (प्रय =अन्नादिकम्) २ ३७ ४ पद्यते येन तत् (रथम्) १ ८२ ४ पान्ति रक्षन्ति तम् ३३ ८ य पातिस्तम् (राजानम्) ६ ७ १ पालनम् १ १२१ १ पत्राणा ज्ञानाना समूहम् १ ११० ५ पाति रक्षति समस्त शिल्पव्यवहार यस्तम् (अग्निम्) ७ २४ काष्ठादिक पात्रम् १ १७५ ३ **पात्राणि**=यै पिवन्ति तानि १९ ८६ **पात्रेषु**=पानसाधनेषु १६ ६२ [पा रक्षणे (अदा०) पा पाने (भ्वा०) धातोर्वा 'दादिभ्यश्छन्दसि' उ० ४ १७० सूत्रेण त्रन्प्रत्यय। 'सर्वधातुभ्य ष्ट्रन्' उ० ४ १५९. सूत्रेण वा ष्ट्रन् पात्र पानात् नि० ५ १ पत्रप्राति० वा समूहार्थे अण्]

पात्रस्येव यथा पात्रस्य मध्ये १ ७५ १ [पात्रस्य-इव-पदयो समास]

पात्रा पात्राणि सुवर्णरजतादीनि १ १०४ ८ शत्रूणा यानानि ६.२७ ६ भोजनाद्यर्थ सुवर्णादि पात्रो को आर्याभि० १.४९ ऋ० १ ७ १९ ८ [पात्रप्राति० शेर्लोप-श्छन्दसि। पोत्रमिति व्याख्यातम्]

पाथन रक्षत १ १६६ ८ [पा रक्षणे (अदा०) धातो-र्लोट्। त-प्रत्ययस्य थनादेश 'तप्तनप्तनथनाश्च' इति सूत्रेण]

पाथसि अन्ने १३ ५३ **पाथः**=पालकमन्नम् २१ ४० रक्षणीयमाचरणम् प्र०—पाथ इति पदनाम, निघ० ४ ३, ८ ५० पृथिव्यादिकम् ७ ५ ७ अन्तरिक्षमार्गम् १ ११३.८ पृथिव्याद्यन्नम् ३.५५ १०. अन्नाद्यैश्वर्यम् ७ ४७ ३. वर्त्म १ १५४ ५ विज्ञानाचरणम् ८ ५० ज्ञातव्य कर्म्म ८ ५० मार्गम् ३ ८.९ रक्षकमन्नम् २ ३ ९ अन्नमुदक वा ३ ३१ ६ पाति शरीरमात्मानञ्च येन तदन्नम्, प्र०—'अन्ने च' उ० ४ २०५. अनेन पातेरन्नेऽसुन्प्रत्यय थुडागमश्च २ १७ उदकम् ७ ३४ १० **पाथांसि**=फलादीनि २१ ४७ अन्नानि २१ ४६. रक्षणीयान्याचरणानि प्र०—पाथ इति पदनाम निघ० ४ ३, ८ ५० ३ [पा रक्षणे (अदा०) धातो 'उदके थुट् च' उ० ४ २०४ 'अन्ने च' उ० ४ २०५ सूत्रेण वा असुन्प्रत्यय थुडागमश्च। पाथोऽन्तरिक्ष पथा व्याख्यातम्। उदकमपि पाथ उच्यते पानात्। अन्नमपि पाथ उच्यते पानादेव नि० ६ ६]

पाथ्यः पथिपु भव (वृषा=वर्षकस्सूर्य) ६ १६ १५ [पाथस् इति व्याख्यातम्। ततो भवार्थे यत्। पथिन्प्राति० वा भवार्थे यत्]

पादगृह्य पादान् ग्रहीतु योग्य (शत्रुर्जन) ४ १८ १२ [पादोपपदे ग्रह उपादाने (क्रया०) धातो क्यप् प्रत्यय-श्छान्दस]

पादम् चरणम् ७ ३२.२ **पादः**=एकोऽशो भागो वा ३१ ३ प्रकाश्यमान जगदेकगुणम् ऋ० भू० १२१, ३१ ३ **पादाः**=पत्तव्या (कर्मोपासनाज्ञानानि कालासवनानि वा) ४ ५८ ३ पद्यन्ते गच्छन्ति यैस्ते २९ २० अधिगमसाधनानि १७ ९१. **पादौ**=नीचस्थानीयौ (पदार्थौ) ३१.१० चरणौ ६ ४७ १५ [पद गतौ (दिवा०) धातो. 'पदरुजविशस्पृशो घञ्' इति घञ्प्रत्यय। प्रतिष्ठा वै

योग्या (इक्षव =गुडादिनिमित्ता) २५१ पालनीया (धिय =प्रज्ञा) ७२७१ **पार्ये**=पालयितव्ये (शूरसातौ=सङ्ग्रामे) ६२६१ पालनीये पूर्णे वा (दिवि=प्रकाशे) ७३२१४ पालयितु पूरयितु योग्ये (दिवि=कामे) ७३२२१ पूरयितव्ये (शर्मन्=गृहे) ६३३५ पारयितव्ये (भरद्वाजे=राज्यपोषकव्यवहारे) ६१७१४ [पार कर्मसमाप्तौ (चुरा०) धातोर्णिजन्ताद् यत् अथवा पॄ पालनपूरणयो (जु०) धातो 'ऋहलोर्ण्यत्' इनि ण्यत्-प्रत्यय]

पार्वतेयी पर्वतस्य मेघस्य दुहितेव या सा पार्वतेयी (धिषणा=धारणवती द्यौ) प्र०—पर्वत इति मेघनामसु पठितम् निघ० १।१०, पर्वतस्येयं घनपङ्क्तिः पार्वती तस्याऽपत्य दुहितेव पार्वतेयी वृष्टि 'स्त्रीभ्यो ढक्' अ० ४।१।१२० अनेन ढक्-प्रत्यय १।१९ [पर्वत इति मेघनाम निघ० १।१० तत 'तस्येदम्' इत्यण्प्रत्ययान्तात् ङीप्। तत 'स्त्रीभ्यो ढक्' इत्यपत्यार्थे ढक्। 'टिड्ढाणञ्०' इति ङीप्]

पार्श्वतः समीपात्, उभयत इत्यस्ततोऽङ्गात् २१४४, ४३, ४५ [स्पृश सस्पर्शने (तुदा०) धातो 'स्पृशे श्वण्शुनौ पृ च' उ० ५२७ सूत्रेण श्वण्प्रत्यय 'पृ' आदेशश्च। स्पृशति येन स पार्श्व। तत 'तसिप्रकरणे आद्यादिभ्य उपसख्यानम्' अ० ५४४४ वा० सूत्रेण तसि]

पार्श्वयोः वाम-दक्षिणभागयो २४१ **पार्श्वे**=अग्रे पृष्ठे ३१२२ [पूर्वपदे व्याख्यातम्। पार्श्वौ द्यावापृथिवीनाम निघ० ३।३०]

पार्ष्ण्या पार्ष्णिषु कक्षासु साधृनि (ताडनानि) २५४० स्पर्शकारकेण (कशया) ११६२१७ [पर्पति सिञ्चतीति विग्रहे पृषु सेचने (भ्वा०) धातो 'घृणिपृश्निपार्ष्णि०' उ० ४५२ सूत्रेण नि प्रत्ययो वृद्धिश्च निपात्यते। पार्ष्णि प्राति०' तत्र साधु' इत्यर्थे यत्। तत शेर्लोप]

पावक ! पवित्रकारक पवित्रताहेतोर्वा (विश्वेश्वर भौतिकाऽग्ने वा) ११३१ पवित्रकर्त्त शुद्धिहेतुर्वा (अग्ने=जगदीश्वर भौतिकोऽग्निर्वा) ११२१० पुनाति पवित्रता करोति तत्सम्बुद्धावीश्वर ! पवित्रताहेतुरग्निर्वा ११२९ वह्निवत् पवित्रकारक (विद्वज्जन) ३१०८ जनाऽन्त करणशोधक (अग्ने=विद्याप्रकाशोपदेशक) १७८ **पावकम्**=पवित्रकारकम् (मरुता गणम्) १६४१२ पवित्रकर वह्निम् ५४३ **पावकः**=पवित्रकर (अग्निरिव विद्वज्जन) ५७४ शुद्धिप्रचारक (विद्वान् राजा वा) १७१५ शोधक (भा०—पवित्रो जन) १७११ पवित्रकारी (विद्वान् गृहस्थो जन) १७७ प्रकाशितयशा (राजा) ७३९ पवित्रीकर (विद्वज्जन) ७९१ **पावकाः**=पवित्रा पवित्रकरा (प्रजासेनाध्यक्षा) ३३१२०. **पावके**=वह्निरिव पवित्रस्तस्मिन् (राजनि) ६५२ [पूङ् पवने (भ्वा०) धातो कर्त्तरि ण्वुल्-प्रत्यय। यद्वै शिव शान्त तत्पावकम् श० ९१२३० अन्न वै पावकम् श० २२१७]

पावकया पावकस्य क्रियया ६१५५ पवित्रकारिकया (कृपा=सामर्थ्येन) १७९१ **पावका**=पावपवित्रकारक व्यवहार कायर्यति शब्दयति या सा (सरस्वती=सर्वविद्याप्रापिका वाक्) प्र०—'पूङ् पवने' इत्यस्माद्भावार्थे घञ्, तस्मिन् सति 'कै शब्दे' इत्यस्माद् 'आतोऽनुपसर्गे कः' अ० ३२३ इति क प्रत्यय 'उपपदमतिङ्' अ० २२१९. इति समास. १३१० पवित्रकारिका (सरस्वती=सुसस्कृता वाक्) २०८४. पवित्रस्वरूप और पवित्र करने वाली सत्यभाषणमय मङ्गलकारक वाणी आर्याभि० १८ ऋ० ११६१० **पावकायै**=पवित्रकर्त्र्यै (सरस्वत्यै=वाचे) २२२० **पावकाः**=पवित्रकर्त्र्य (आप =जलानि) ७४९२ पवित्रा (मिह=सेचका वृष्टय) ३३१२० पवित्रकर्मकर्त्र्य (उपस=प्रभातवेलेव दुहितर) ४५१२. वह्नय इव वर्त्तमाना (मरुत =मनुष्या) ७५६१२ [पूङ् पवने (भ्वा०) धातो कर्त्तरि ण्वुल्। तत स्त्रिया टाप्। 'पावकादीना छन्दस्युपसख्यानम्' अ० ७३४५ वा० सूत्रेण इत्व न भवति। अथवा पाव-कपदयो समासे स्त्रिया टाप्। पाव =पूङ् पवने (भ्वा०) धातोर्घञ्। क =कै शब्दे (भ्वा०) धातो क प्रत्यय]

पावकवर्चाः पवित्रीकारिकाया विद्युतो वर्चो दीप्तिरिव वर्चोऽध्ययन यस्य स (पुत्र) १२१०७ [पावकावर्चस्-पदयो समास। पूर्वपदस्य ह्रस्व]

पावकवर्णम् अग्निवत् प्रकाशमानम् (यज्ञं=गृहाश्रमाख्यम्) १७६ **पावकवर्णाः**=पावकवत् पवित्रो गौरो वर्णो येषा ते ब्रह्मवर्चस्विन (विपश्चित =विद्वासो जना) ३३८१ [पावक-वर्णपदयो समास]

पावकशोचिषम् पवित्रकरदीप्तिम् (विद्युदारय वह्निम्) ३९८ पावकस्य शोचिरिव शोचिर्दीप्तिर्यस्य तम् (अग्निम्=वह्निम्) ४७५ **पावकशोचिषः**=पावकस्याऽग्ने शोचिर्दीप्तिरिव शोचिर्यस्य विदुषस्तस्य ३११७. **पावक-**

पारयथ=पार प्राप्नुथ २ ३४ १५. **पारयन्ति**=पार गमयन्ति १ १८२ ६ **पारयात्**=समुद्रपार गमयेत् १ १४० १२ [पार कर्मसमाप्तौ (चुरा०) धातोर्लेट्। अन्यत्र लटलेटावपि]

पारयन्ता पार गमयन्तौ (इन्द्राविष्णू=महाराजशिल्पिनौ) ६ ६९ १ [पार कर्मसमाप्तौ (चुरा०) धातो शतृप्रत्यय। 'सुपा सुलुग्०' सूत्रेण प्रथमाद्विवचनस्याकारादेश]

पारयन्ती विजय प्रापयन्ती (ज्या=प्रत्यञ्चा) २९ ४० पार प्रापयन्ती (योषा=पत्नी) ६ ७५ ३ [पार कर्मसमाप्तौ (चुरा०) धातो शत्रन्तान् ङीप्। पारयन्ती=पार नयन्ती नि० ९ १८]

पारयामसि रोगसमुद्रात् पार गमयेम १२ ९६ [पार कर्मसमाप्तौ (चुरा०) धातोर्लेट्। 'इदन्तो मसि' इति मस इदन्तता]

पारयिष्णवः रोगजदुःखेभ्य पार नेतु समर्था (ओषधी=सोमादीन्) १२ ७७ **पारयिष्णुः**=दुःखात् पारयिता (सेनाध्यक्षो राजा) ९ ९ [पार कर्मसमाप्तौ (चुरा०) धातो 'णेश्छन्दसि' अ० ३ २ १२७ सूत्रेण तच्छीलादिष्वर्थेषु इष्णुच्]

पारावतघ्नीम् पाराऽवारघातिनीम् (सरस्वती=विदुषी स्त्रियम्) ६ ६१ २ ['पारावत' इत्युपपदे हन हिंसागत्यो (अदा०) धातो टक् 'कृनो वहुल वा' इति वा० सूत्रेण। ततो ङीप्। पारावतघ्नीम्=पारावारघातिनीम् नि० २ २४]

पारावतान् कलरवान् (कपोतान्) २४ २५ **पारावताः**=परावति दूरदेशे भवा (चित्रा=रूपाणि) ५ ५२ ११ [परप्राति० मतुप्प्रत्यये परवत्। छान्दस पूर्वस्य दीर्घ। परावत्प्राति० भवार्थेऽण्। अथवा पारापतशब्दोऽयम्। पकारस्य वकार पृपोदरादित्वात्। पारापत=परोपपदे आङ्पूर्वात् पततेरच्प्रत्यय]

पारिषत् सुखे प्रजा पालयेत् प्र०—अत्र पॄ-धातोर्लेटि सिप् 'सिब्बहुल णिद्' इति वार्त्तिकेन णित्वाद् वृद्धि १ १०० १४ [पॄ पालनपूरणयो (जु०)धातोर्लेट्। 'सिब्बहुल लेटि' इति सिप्। तस्य च णित्वाद् वृद्धि]

पारुष्णान् पक्षिविशेषान् २४ २४

पार्जन्यः पर्जन्यवद्गुण (सुपर्ण=पक्षिविशेष) २४ ३४ मेघदेवताक (पशु) २४ ३ **पार्जन्याः**=मेघदेवताका (नभोरूपा=पशव पक्षिणो वा) २४ ६ [पर्जन्य इति व्याख्यातम्। तत 'सोम्य देवता' इति सूत्रेण अण्-प्रत्यय]

पार्थवानाम् पृथौ विस्तीर्णाया विद्याया भवाना राज्ञाम् ६ २७ ८ [पृथुप्राति० 'तत्र भव' इत्यर्थेऽण्प्रत्यय]

पार्थिवम् पृथिव्या सम्बन्धि (रज=लोक) ३४ ३२ पृथिव्या विकारम् (रज=द्व्यणुकादिरेणु) १३ २८ पृथिव्या विदितम् (रज=अरणुत्रसरेण्वादि) १ ९० ७ पृथिवीमय पृथिव्यामन्तरिक्षे वा विदितम् (रज) १ ८१ ५ **पार्थिवस्य**=पृथिव्या विदितस्य पदार्थविज्ञानस्य १ १४४ ६ **पार्थिवः**=पृथिव्या विदित (पदार्थ) २७ ३६ **पार्थिवात्**=पृथिवीसयोगात (दिव=प्रकाशात्) प्र०—'सर्वभूमिपृथिवीभ्यामणञौ' अ० ५ १ ४१ इति सूत्रेण पृथिवीशब्दादञ्प्रत्यय १ ६ १० **पार्थिवानाम्**=पृथिव्यामन्तरिक्षे विदिताना मध्ये १ ९५ ३ **पार्थिवानि**=पृथिव्यामन्तरिक्षे भवानि विदितानि वा (परमाण्वादीन्) ६ ६१ ११ पृथिव्या विकारा अन्तरिक्षे विदितानि च (रजासि=लोकान्) प्र०—अत्र 'तत्र विदित इति च' अ० ५ १ ४३ अनेनाञ्-प्रत्यय ५ १८ पृथिवीविकारजातानि (शारीरिकबलादीनि) १ १५५ ४ अन्तरिक्षे विदितानि कार्याणि (रजासि=लोकान्) प्र०—पृथिवीत्यन्तरिक्षनाम निघ० १ ३, ५ ८१ ३ पृथिव्यादिकृतानि वा (कार्याणि) ६ ६ ६ **पार्थिवाः**=पृथिव्या विदिता राजानो बहुमूल्या पदार्था वा ७ २५ ११ **पार्थिवे**=पृथिवीसम्बन्धिभूगर्भविद्यायाम् ऋ० भू० २६४ [पृथिवीप्राति०विदितार्थे 'तत्र विदित इति च' सूत्रेण निमित्ते सयोगोत्पातौ च 'सर्वभूमिपृथिवीभ्यामणञौ' सूत्रेणाञ्प्रत्यय। अथवाभवार्थेऽञ्]

पार्थिवा पृथिवीत्यास्यस्य कारणस्य विकारभूतानि भूगोलाख्यानि कार्याणि १ ६४ ३ पृथिव्या विदितानि (वसूनि=द्रव्याणि) ६ ४५ २० [पार्थिवप्राति० शेर्लोपश्छन्दसि। पार्थिव इति व्याख्यातम्]

पार्थिवासः पृथिव्या विदिता (अग्नय=पावका) ३५ ८ पृथिव्या भवा (पदार्था) ६ ५० ११ [पार्थिवप्राति० जसोऽनुगागम। पार्थिव इति व्याख्यातम्]

पार्यम् पार्य्यते समाप्यते कर्म येन तम् (वीरजनम्) १ १२१ १२ **पार्याणि**=परितु पूरयितु योग्यानि (पक्ष्माणि=कर्माणि नेत्रोर्ध्वलोमानि वा) २५ १ **पार्याय**=दुःखेभ्य पारे वर्त्तमानाय (जनाय) १६ ४२ पारभवाय (व्यवहाराय) ४ १६ ११ दुःखपार गमयते (अवसे=रक्षणाद्याय) ४ २५ १ **पार्याः**=परितु पालयित

२ ३१. विद्याऽऽनन्ददायकास्तत्सबुद्धौ (जनकादय) २ ३१ सेवितु योग्यास्तत्सम्बुद्धौ, ये पान्ति विद्यान्नादिदानेन तत्सम्बुद्धौ, अन्नभोगादि विद्याशिक्षकास्तत्सम्बुद्धौ, श्रेष्ठाना पालका दुष्टेषु क्रोधकारिणस्तत्सम्बुद्धौ, पापाऽऽपत्काल-निवारकास्तत्सम्बुद्धौ, प्रीत्या पालकास्तत्सबुद्धौ, विद्या-दातारस्तत्सम्बुद्धौ, धर्म्यजीविकाज्ञापकास्तत्सम्बुद्धौ, दु ख-नाशकत्वेन रक्षकास्तत्सम्बुद्धौ (जनकादय) २.३२ पान्त्यन्नसुशिक्षाविद्यादानेन तत्सम्बुद्धौ (अ०—जनका विद्याप्रदाश्च जना) ३ ५५ विज्ञानवन्त (विद्वासो जनका) ३ ५५ २ ऋतव इव पालयितार (सज्जना) ७ १८ १ प्रजापालका (विद्वासो जना) १६ ४५. रक्षितार (जीवन्तो विद्वास) १६ ४६ पालनक्षमा (राजपुरुषा) २६ ४६ **पितरौ**=पालकौ मातापितरौ १५ ५३ माता पिता च द्वौ १६ ११ जननीजनकौ १ १२१ ५ **पितः !**=पालयितो रुद्र (सभाध्यक्ष) १ ११४ ६. पितृस्वरूप (सद्वैद्य) २.३३ १ **पिता**=प्रजापालको राजा १ १६६ १६ सर्वपालकेश्वर पालनहेतु सूर्यलोको वा २ ११ पालकोऽग्निर्विद्युद्वा १ १६० २ जगतो जनक (इन्द्र = ईश्वर) ४ १७ १७ ज्ञानप्रदानेनाऽस्तिकत्वेन वा रक्षक (विद्वान्) ३२ ६ पालयिता (सज्जन) १ १६ ४ अनूचानो-ऽध्यापक १ ८० १६ सर्वपालक ईश्वर २ ११ नित्य पालन करने वाला (जनक) आर्याभि० २ ४२, १७.२७ **पितुः**= जनकवद्वर्त्तमानस्याऽध्यापकस्य १ ११६ ८ जनकस्येश्वरस्य वा ३२ ६ मध्यलोकस्य ३४ ३२ उत्पादिकाया विद्युतं १७ ६० पालकस्य जनकस्य १ ८७ ५ **पितृभिः**=ज्ञानिभि र्ऋतुभिर्वा प्र०—त वा एते ऋतव शत० २ १३ २ अनेन पितृशब्दाद्दतवो गृह्यन्ते 'पितर इति पदनामसु पठितम्' निघ० ५ ५ अनेन ज्ञानवन्तो मनुष्या गृह्यन्ते ५ ११ **पितृभ्यः**=राज्यपालकेभ्यो वीरेभ्य १ ११६ ४ पालकेभ्यो जनकाऽध्यापकादिभ्य १६ ३६ जनकेभ्यो विद्यासुशिक्षा-दातृभ्यो वा ३५ २० पालनहेतुभ्य ऋतुभ्य प्र०—ऋतवो वै पितर शत० २ ५ २ ३२, २७. ये चतुर्विंशतिवर्ष-पर्यन्तेन ब्रह्मचर्येण विद्यामधीत्याध्यापयन्ति ते वसुसज्ञका पितरस्तेभ्य ऋ० भू० २६५, १६ ३६ **पितृभ्याम्**= जनकजननीभ्याम् ३ ७ ६ अधिष्ठातृ-शिक्षकाभ्याम् १ १११ १ **पितॄन्**=ऋतून् ८ ६० पूर्वोक्तान् (२६-३३) मन्त्रेषूक्त-गुणेभ्यो युक्तान् जनकान् विद्याप्रदांश्च २ ३४ भा०—विद्यावयोवृद्धान् पित्रादीन् १६ ६१ **पितॄणाम्**=जनकाना स्वामिना वा ६ ४६.१२ जनक-जननीनाम् २४ १८ पाल-काना विज्ञानवता विदुषा रक्षाऽनुयुक्तानामृतूना वा १ १०६ ३ **पित्रा**=पालकेनाऽऽचार्येण वा ६ ६ ३ वायुना २२ १६ **पित्रे**=विद्या-प्रकाशदानेन पालयित्रे (दिवे= प्रकाशाय) १ ७१ ५ **पित्रोः**=द्यावापृथिव्यो ३ ५ ८ वाय्वाकाशयो १ १६० ३ जनकजन्योः ३ २६ ६ माता-पित्रोरिव विद्याऽऽचार्ययो ६ ७ ४ [पानि रक्षतीति पिता। पा रक्षणे (अदा०) ज्ञातो 'नप्तृनेष्टृत्वष्टृ०' उ० २ ६५ सूत्रेण तृजन्तो निपात्यते। माता च पिता चेति पितरौ। 'पिता मात्रा' अ० १ २ ७० सूत्रेण एकशेष। पिता पाता वा पालयिता वा नि० ४ २१ पिना=गोपिता नि० ६ १५ पितर =मनुष्या वै जागरित पितर सुप्तम् श० १२ ६ २.१. रात्रि पितर श० २ १ ३ १ तिर इव वै पितरो मनुष्येभ्य श० २ ४ २२ १. पितरो नमस्या श० १ ५ २.३ यानग्नि-रेव दहन्त्स्वदयति ते पितरोऽग्निष्वात्ता श० २ ६.१ ७ ये वा यज्वानो गृहमेधिन। ते पितरोऽग्निष्वात्ता तै० १ ६ ६ ६ अर्धमासा वै पितरोऽग्निष्वात्ता तै० १ ६ ८ ३ अथ ये दत्तेन पक्वेन लोक जयन्ति ते पितरो वर्हिषद श० २ ६ १ ७ ये वै यज्वान, ते पितरो वर्हिषद तै० १ ६ ६.६ मासा वै पितरो वर्हिषद तै० १ ६ ८ ३. तद् ये सोमेने-जाना। ते पितर सोमवन्त श० २ ६ १ ७ सोमप्रयाजा हि पितर तै० १ ६ ६ ५ इन्दव इव हि पितर। मन इव ता० ६ ६ पितृदेवत्यो वै सोम श० २ ४ २ १२ ओषधि-लोको वै पितर श० १३ ८ १ २० षड् वा ऋतव पितर श० ६ ४ ३ ८ क्षत्र वै यमो विश पितर श० ७ १ १ ४ य (अर्धमास) अपक्षीयते स पितर श० २ १. ३ १ अपक्षयभाजो वै पितर कौ० ५ ६ अपराह्ण पितर श० २ १ ३ १ अन्तभाजो वै पितर कौ० १६ ८. मर्त्या पितर श० २ १ ३ ४ अनपहतपाप्मान पितर श० २ १ ३ ४ पितृलोक पितर कौ० ५ ७ पितर प्रजापति गो० उ० ६ १५ मन पितर श० १४ ४ ३ १३ ह्रीका हि पितर तै० १ ३ १० ६ हरणभासा हि पितर तै १ ३. १० ७ ऊष्मभागा हि पितर तै० १ ३० १.० ६ देवा वा एते पितर गो० उ० १ २४ स्विष्टकृतो वै पितर गो० उ० १ २५ स्वधा वै पितृणामन्नम् श० १३.८ १ ४ पितरा युवाना (यजु० १५ ५३) वाक् च वै मनश्च पितरो युवाना श० ८ ६ ३ २२ प्राणो वै पिता ऐ० २ ३८ एष वै पिता य एष (सूर्य) तपति श० १४ १ ४ १५ असौ (द्यौ) पिता तै० ३ ८ ६ १ श० १३ १ ६ १ एष वै पिता य एष (सूर्य) तपति श० १४ १ ४ १५ त्रयो वै पितर (सोमवन्त, वर्हिषद, अग्निष्वात्ता) श० ५ ५ ४ २८ पितरो नाराशस काठ० ३४ १६ सवत्सरो वै पिता वैश्वानर

शोचिषे=पावकस्य शोचि प्रकाश इव प्रकाशो यस्य तस्मै (विदुषे जनाय) ५ २२ १. **पावकशोचे**=पावकस्याऽग्ने शोचिर्दीप्तिरिव द्युतिर्यस्य तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ३ २ ६ पवित्रप्रकाशक (परमेश्वर) ६ १५ १४ [पावकशोचिष्पदयो समान । शोचिष् ज्वलतो नाम निघ० १ १७ पावकशोचिषम्=पावकदीप्तिम् नि० ४ १४ 'पावकशोचे' पदे 'शोचि' रिनीकारान्त पद न तु सकारान्तम्]

पावकास. पवित्रकारका (मरुत्वान=बलपराक्रमप्राणिभूतगणा) १ ६४ २ पवित्रकारिका (वाच) १ १४२ ६ [पावकप्राति० जसोऽमुगागमः]

पावकेभिः पवित्रै (मरुद्भि=मनुष्यै) ५ ६०.८ [पावकप्राति० भिस ऐसादेशो न भवति 'बहुल छन्दसि' सूत्रेण]

पावीरवी शोधयित्री (विदुषी कन्या) ६ ४९ ७ [पविरिति वज्रनाम (निघ० २ २०) ततो मत्वर्थीय इरन् छान्दस । पवीरमायुध तद्वान् पवीरवान् । पवीरवत्प्राति० 'सास्य देवता' इत्यण्प्रत्यये छान्दस रूपम् । पवि शल्यो भवति यद् विधुनाति काय तद्वत् पवीरमायुधम्, तद्वान् इन्द्र पवीरवान् । ·· ···तद्देवता वाक् पावीरवी, पावीरवी च दिव्या वाक् नि० १२ ३० वाग्वै सरस्वती पावीरवी ऐ० ३ ३६]

पाशद्युम्नस्य पाशात् प्राप्त द्युम्न यशोधन येन तस्य (उत्तमजनस्य) ७ ३३ २ [पाश-द्युम्नपदयो समास । पाशमिति व्याख्यास्यते । द्युम्नम्=धननाम निघ० २ १०]

पाशम् बन्धनम् भा०—पापबन्धनम् १२ १२ धर्म्य बन्धनम् १२ ६५ बन्धन को, स० वि० १६९, अथर्व० २ ३ २४ **पाशान्**=बन्धनानि ५ २ ७ बन्धकान् (मोहादीन्) ७ ५९ ८ अधर्माचरणजन्यबन्धान् १ २४ १३ **पाशाः**=बन्धनानि २ २७ १६ **पाशैः**=बन्धनसाधनै प्र०—'पश बन्धने' इत्यस्य रूपम् १ २५ अ०—बन्धनहेतुभि किरणै १ २६ साम-दाम-दण्ड-भेदादिकर्मभि १ २६ [पश बन्धने (चुरा०) धातोर्घञ्प्रत्यय । पाश पाशयतेर्विपाशनात् नि० ४ २ वारुणो वै पाश तै० ३ ३ १० १ नैर्ऋतो वै पाश श० ७.२ १ १५]

पाशिनः बहुपाशयुक्ता व्याधा २० ५३ पाशवन्तो बन्धनाय प्रवृत्ता (जना) ३ ४५ १ [पाशमिति व्याख्यातम् । ततो भूम्न्यर्थ इनि प्रत्यय]

पाष्या पोषणयोग्यानि कर्माणि प्र०—अत्र पिष्लृ-धातोर्ण्यत्, वर्णव्यत्ययेन पूर्वस्याऽऽकार 'सुपा सुलुक्०' इत्याकारादेशश्च १ ५६ ६ [पिष्लृ सञ्चूर्णने (रुधा०) धातोर्ण्यत् । धातोरिकारस्याकारश्छान्दस । पाष्यप्राति० शेर्लोपश्छन्दसि]

पास्त्यस्य गृहे भवस्य (जनस्य) ४ २१ ६ [पस्त्यप्राति० भवार्थेऽण् । पस्त्यमिति गृहनाम निघ० ३ ४]

पाष्ठसव्याय पासुपु धूलिपु भवाय (जनाय) १६ ४५ [पासुप्राति० भवार्थेऽण् । पांसु=पसि नाशने (चुरा०) धातो 'अर्जिदृशिकम्यमिपशि०' उ० १ २७ सूत्रेण कु. प्रत्ययो दीर्घश्च]

पाष्ठसुरे प्रशस्ता पासवो रेणवो विद्यन्ते यस्मिन्नन्तरिक्षे तस्मिन् प्र०—'नग-पासु-पाण्डुभ्यश्चेति वक्तव्यम्' अ० ५ २ १०७ अनेन वार्त्तिकेन प्रशसार्थे र प्रत्यय १ २२ १७ पासवो रेणवो रजासि रमन्ते यस्मिन्नन्तरिक्षे तस्मिन् ५ १५ [पासुरिति पूर्वपदे व्याख्यातम् । तत मत्वर्थे 'नगपासुपाण्डुभ्यश्चेति वक्तव्यम्' अ० ५ २ १०७ वा० सूत्रेण र प्रत्यय]

पिकः कोकिल २४ ३९ [अपि कायति शब्दायते इति विग्रहे 'अपि' उपपदे कै शब्दे (भ्वा०) धातो क प्रत्यय]

पिङ्गलः सुन्दर वर्णयुक्त (ब्रह्मचारी) स० वि० ९३ अथर्व० ११ ५ २६ [पिजि वर्णे (अदा०) धातोर्बहु० औणादिक कल प्रत्यय]

पिङ्गाक्षम् पिङ्गे पीतवर्णेऽक्षिणी यस्य तम् (जनम्) ३० २१ पीताऽक्षम् (जनम्) ३० २१ [पिङ्ग-अक्षिपदयो समास]

पिठीनसे पिठीव नासिका यस्य तस्मै (वीरजनाय) ६ २६ ६ [पिठी-नासिकापदयो समासे नासिकाया स्थाने नस् आदेश]

पिण्वक् पिष्या ३ ३० ८ [पिष्लृ सञ्चूर्णने (रुधा०) धातोर्ण्वुडि छान्दस रूपम्]

पितरम् पालक जनक विद्वान वा १ ११४ ७ पालक सूर्यम् १ १६४ १८ परमात्मानम् १ १६४ २२ पितृवत् पालन-निमित्तम् (सूर्यम्) १ १६४ १२ पालयितार जनकमध्यापक वा प० वि० पितृवद्वर्त्तमानम् (विपश्चित=विद्वज्जनम्) ३ २६ ९ भा०—रक्षकम् (स्व=आदित्यम्) ३ ६ **पितरः**=ये पान्ति पितृवद् रक्षन्ति विद्यामुशिक्षादिदानैस्ते (अङ्गिरसः=विद्वासो जना) १ ६२ २. विज्ञानवयोवृद्धा (धर्मिष्ठा जना) ६ ७५ ९. पान्ति पालयन्ति सद्विद्यानिक्षाभ्या ये ते तत्सम्बुद्धौ (भा०—विद्वासोऽध्यापका).

विशरणगत्यवसादनेषु (भ्वा०) धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट्]

पितृषदे पितरो विद्याविज्ञापका विद्वास सीदन्ति यस्मिँस्तस्मै (राज्ञे) १ ११७ ७ ['पितृ' इत्युपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोरधिकरणे क्विप्]

पितेव यथा दयमान पिता तथा १ १०४ ६ पितृवत् २ २६ ५. जनक इव ६ ५२ ६ [पिताश्च-पदयो समास]

पित्तम् तेज १७ ६]

पित्र्या पितृषु भवा (धी =प्रज्ञा) ३ ३६ २ [पितृ-प्रातिप० भवार्थे यत्। तत स्त्रिया टाप्]

पित्र्याणि पितृभ्य आगतानि (सख्या=मित्रभाव-कर्माणि) १ ७१ १० पितृणा सेवनादीनि ७ ५६ २३ [पितृप्रातिप० आगतप्रार्थे 'पितुर्यच्च' अ० ४ ३ ७६ सूत्रेण यत्]

पित्र्यासः पितृभ्यो हिता (मर्त्ता =मनुष्या) ७ १ ६ [पितृप्रातिप० हितार्थे यत्। पित्र्यप्रातिप० जसोऽमुक्]

पित्वः अन्नादिकम् ६ २० ४ अन्नस्य ५ ७७ ४ सुरभिपानम् १६ ५६

पिद्वः मृगविशेष २४ ३२

पिनष्टि सघर्षयति १ १६१ २ [पिष्लृ सञ्चूर्णने (रुधा०) धातोर्लट्]

पिनाकम् पाति रक्षति आत्मान येन तद्धनुर्वर्मादि-कम् प्र०—'पातेर्नुक् च' उ० ४ १५ इति पातेराक प्रत्यय १६ ५१ [पा रक्षणे (अदा०) धातो 'पिनाकादयश्च' उ० ४ १५ सूत्रेणाक प्रत्यय। पिनाक प्रतिपिनष्ट्यनेन नि० ३ २१.]

पिनाकावसः पिनष्टि शत्रून् येन तत् पिनाक तेना-ऽवसो वा पिनाकस्यावसो रक्षण वा यस्मात् स (रुद्र = शूरवीर सेनाध्यक्ष) ३ ६१ [पिनाक-अवसपदयो समास.। पिनाकमिति व्याख्यातम्। अवस =अव रक्षणादिषु (भ्वा०) धातोरसच्प्रत्यय]

पिन्व पुष्णीहि सिञ्च १४ ८ सेवस्व ६.३६ ५ सुशिक्षया सिञ्च १४ १७ **पिन्वत**=सिञ्चत ५ ८३ ६ **पिन्वतम्**=सेवेथाम् १ ११८ २ तर्प्पयतम् ५ ६२ ३ सिञ्चतम् १ १५१ ६ सुखयतम् ६ ६३ ८ प्रीत्या सेवेथाम् १ ३४ ३ प्रापयतम् १ ३४ ४ **पिन्वताम्**=सुखयेताम् ६ ७० ६ **पिन्वते**=सेवते सिञ्चति वा प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ ५४ ७ प्रीणाति १ १२५ ५ सेवन्ते ५ ८३ ४ **पिन्वथ**=प्रीणयतम् ५ ६२ २ सेवेथाम् १ ११२ ३ **पिन्वध्वम्**=सेवध्वम् ७ ३४ ३ **पिन्वन्त**=सिञ्चन्ति ७ ३४.३. **पिन्वन्ति**=सेवन्ते सिञ्चन्ति वा १ ६४ ६ प्रीणन्ति ५ ५४ ८ **पिन्वसि**=सेवसे १.१२६ ३ ददासि ७.५ ८ **पिन्वस्व**=तृप्नुहि भा०—सुख लभस्व ३८ ४. सन्तुष्टो भव ३८ ४ स्वतन्त्रतया सर्वेषु पुष्टिमन प्रसन्नान् कुरु ऋ० भू० १५२, ३८ १४ यथावत् पुष्ट कर आर्याभि० २ ३१, ३८ १४ समर्थ कर पुष्ट और बल से युक्त कर, आर्याभि० २ ३१, ३८ १४. [पिवि सेवने सेचने च (भ्वा०) धातोर्लोट्। अन्यत्र लङ् अपि]

पिन्वमानम् सिञ्चमानम् (समुद्रम्=अन्तरिक्षमिव-सागरम् १३.२ **पिन्वमानः**=सिञ्चन् (वाजी=वेग-वानश्व) १७ ६५ सेवमान (अग्नि =जातप्रज्ञो जन) २६.१ प्रसादयन् (विद्वज्जन) ४ ५८ ७ [पिवि सेवने सेचने च (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

पिन्वमाना सयुक्ता (सरस्वती=नदी) ६ ५२.६ सिक्ता सेविता (गीता=काष्ठपट्टिका) १२ ७० **पिन्व-माना**:=सेवमाना प्रीतिहेतव (गुदा =गुह्येन्द्रियाणि) प्र०—पिवि सेवने सेचने च १६ ८६ सिञ्चमाना प्रीणन्त्य (नद्य) ७ ५० ४ सिञ्चन्त्य (सिन्धव =नद्य) ६ ५२ ४ **पिन्वमाने**=सेवन्त्यौ (नद्यौ) ३ ३३ २. [पिवि सेवने सेचने च (भ्वा०) धातो शानच्। तत स्त्रिया टाप्]

पिपर्त्तन पूरयन्तु १ १६६ ६ पिपृत, विद्याभि सेवया वा पूर्ण कुरुत १ १५६ ३. पालयन्तु १ १०६ १ [पृ पालन-पूरणयो (जु०) धातोर्लोट्। तप्रत्ययस्य तनबादेशश्छान्दस]

पिपर्त्ति पुष्टान् प्रसन्नान् करोति ऋ० भू० २३५, प्रपिपूर्त्ति १ १६ ४ पूर्ण करोति १ १५२ ३ तृप्त कर देता है स० वि० ८० अथर्व० ११ ५ ४ **पिपर्त्तु**=पालयतु पूरयतु वा १८ ५७ **पिपर्षि**=पालयसि, सद्गुणै पूरयसि वा ६ १५ ११ [पृ पालनपूरणयो (जु०) धातोर्लट्। अन्यत्र लोट्]

पिपिन्वथुः पिपूर्त्तम् १ ११२ १२. (पिवि सेवने सेचने च (भ्वा०) धातोर्लिट्]

पिपिशे पिश्यात् २ ३३ ६ पिनष्ट्यवयव इव वर्त्तते ६ ४६ ३ आश्रीयते ५ ५७ ६ **पिपिश्रे**=स्थूलाऽवयवानि कुर्वन्ति ५ ६० ४ [पिश अवयवे (तुदा०) धातोर्लिट्। 'पिपिश्रे'। प्रयोगे 'इरयो रे' सूत्रेण 'रे' आदेश। व्यत्ययेनात्मनेपदम्]

पिपिशे पिष्ट प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ ३२ ६ [पिष्लृ सञ्चूर्णने (रुधा०) धातोर्लिट्। व्यत्येनात्मनेपदम्। पकारस्य शकारो वर्णागत्ययेन]

प्रजापति श० १५ १ १६]

पितरा मातापितृवद्वर्त्तमाने (भूमिसूर्यौ) १ १५६ २ विज्ञानवन्तावध्यापकोपदेशकौ ४ ३५ ५ सर्वथा पालकौ ४ ३४ ६ शरीरात्मपालनहेतू (अश्विनौ=जलाग्नी) १ २० ४१. [पितृप्राति० प्रथमाद्विवचने 'सुपा सुलुग्०' इत्याकारादेश]

पितरामातरा पिता च माता च ते (भा०—विद्वांसौ मातापितरौ) प्र०—अत्र 'पितरा-मातरा च छन्दसि' अ० ६ ३ ३३ इति पूर्वपदरयाऽऽनङ्, उत्तरपदस्याऽऽकारादेशश्च निपात्यते ६ १६ [पितृ-मातृपदयो समासे 'पितरा-मातरा च छन्दसि' अ० ६ ३ ३३ सूत्रेण पूर्वपदस्य अराड् आदेश उत्तरपदस्याकारादेशश्च निपात्यते]

पितरेव जननीजनकाविव ३ ५८ २ यथा जनक-जनन्यौ तथा (राजाऽमात्यौ) ४ ४१ ७ [पितरा-इवपदयो समास]

पितामहेभ्यः ये पितृणा पितरस्तेभ्य १६ ३६ ये चतुश्चत्वारिंशद्-वर्षपर्यन्तेन ब्रह्मचर्येण विद्या पठित्वा पाठ-यन्ति ते ऋ० भू० २६६, १६ ३६ [पितृप्राति० 'ताभ्या पितरि डामहच् मातरि पिच्च' अ० ४ २ ३६ सूत्रेण डामहच्-प्रत्यय]

पितुभाजः अन्नस्य विभाजका (नर =विवाहित-जना) १ १२४ १२ उत्तमाऽन्नसेविन (नर =नेतारो जना) ६ ६४ ६ [पितूपपदे भज सेवायाम् (भ्वा०) धातो-रण्प्रत्यय । पितुरित्यन्ननाम निघ० २ ७]

पितुम् अन्नम् प्र०—पितुरित्यन्ननामसु पठितम् निघ० २ ७, ३ ३७ अन्नादिकम् १२ ६५ सुसस्कृतमन्नम् १ ६७ ७ **पितो** !=हे पालकाऽन्नदात (ईश्वर) १ १८७ ७ अन्नव्यापिन् पालकेश्वर १ १८७ ११ पालक (अन्न) १ १८७ २ पेयम् (अन्नम्) १ ८७ २ [पा रक्षणे (अदा०) धातोर्वाहु० औणादिक-तुन् प्रत्यय इकारादेशश्च बहुलवचना-देव। पितुरित्यन्ननाम पातेर्वा पिवतेर्वा प्यायतेर्वा नि० ६ २४ अन्न वै पितु श० १ ६ २ २० दक्षिणा वै पितु ऐ० १ १३]

पितुमत् सुसस्कृतमन्नाद्यम् (वच) १ १०११ [पितु-प्राति० प्रशसायाम् मतुप् । पितुरिति व्याख्यातम्]

पितुमतीम् प्रशस्ताऽन्नयुक्ताम् (ऊर्ज=नीतिम्) १ ११६ ८ [पितुरित्यन्ननाम निघ० २ ७ तत प्रशसाया मतुवन्तान् ङीप् । पितुमतीम्=अन्नवतीम् नि० ६ ३६]

पितुमतीव प्रशसित- बहुन्नाद्यैश्वर्ययुक्तेव (समत्= सम्राट्-सभा) ४ १ ८ [पितुमती-इवपदयो समास । पितुमतीति व्याख्यातम्]

पितुमान् बहूनि पितवोऽन्नादीनि विद्यन्ते यस्मिन् स (पन्था =मार्ग) ३ ५४ २१ [पितुरिति व्याख्यातम् । ततो भूम्यर्थे मतुप्]

पितुमानिव यथाऽन्नादियुक्त प्रासादस्तथा विद्यादि-सम्पन्नो विद्वान् १ १४४ ७ [पितुमान्-इवपदयो समास]

पितुषणिः स्वार्थी (दुर्जन) प० वि० [पितुरित्यन्न-नाम निघ० २ ७ तदुपपदे पण सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' अ० ३ २ २७ सूत्रेण इन्-प्रत्यय]

पितृकृतस्य जनककृतस्य (एनस =विरोधाचरणस्य) ८ १३ परमविद्यायुक्त जन के किए (एनस =पाप से) आर्याभि० २ १६, ८ १३ [पितृ-कृतपदयो समास]

पितृतमः अतिशयेन पालक (इन्द्र =ईश्वर) ४ १७ १७ [पितृप्राति० अतिशायने तमप्]

पितृमते पितर ऋतवो नित्ययुक्ता विद्यन्ते यस्मिन् तस्मै (सोमाय=ससाराय), प्र०—अत्र नित्ययोगे मतुप् 'ऋतव पितर' शत० २ ३ ४ २४, २ २६ पितर पालका विज्ञानिनो विद्यन्ते यस्मिँस्तस्मै (भा०—विदुषे जनाय) ३८ ६ [पितृप्राति० नित्ययोगे मतुवन्ताच्चतुर्थी । सवत्सरो वै सोम पितृमान् तै० १ ६ ८ २]

पितृवित्तस्य जनकभुक्तस्य (राय =धनस्य) १ ७३ ६

पितृवित्तः=पितृभ्योऽध्यापकेभ्यो वित्त प्रतीतो विज्ञात (रयि =निधिसमूह) १ ७३ १ [पितृ-वित्तपदयो समास । वित्त =विद ज्ञाने (अदा०) धातो, विदॢ लाभे (तुदा०) धातोर्वा क्त]

पितृश्रवणम् पितरो ज्ञानिनो श्रूयन्ते येन तम् (धेनु:= वाणीम्) १ ६१ २० पितु सकाशाच्छ्रवण यस्य तम् (भा०—पुरुषज्ञानम्) ३४ २१ ['पितृ' इत्युपपदे श्रु श्रवणे (भ्वा०) धातो करणे ल्युट्। पितृ-श्रवणपदयो समासो वा]

पितृषदनम् यथा विद्यावन्तो ज्ञानिन सीदन्ति यस्मिँस्तथा (सुशिक्षिताना स्थानम्) ५ २६ यथा विद्वत्स्था-नम् (धाम) ६ १ [पितृ-सदनपदयो समास । सदनम् षदॢ विशरणगत्यवसादनेषु (भ्वा०) धातोरधिकरणे ल्युट्]

पितृषदनाः यथा पितृषु ज्ञानिषु सीदन्ति तथा (लोका =सर्व-जना) ५ २६ भा०—विद्यानिष्णाता (लोका =न्यायदृष्ट्या विद्वाम) प्र०—पितर इति पद-नामसु पठितम् निघ० ५ ५, ६ १ ['पितृ' इत्युपपदे षदॢ

पुष्टि =पुष पुष्टौ (क्र्या०) धातो स्त्रिया क्तिन्]

पुष्टिम्भराय शरीराऽऽत्मबलयुक्ताय (शिष्याय) ४ ३ ७ ['पुष्टि' इत्युपपदे डुभृञ् धारणपोषणयो (जु०) धातो 'फलेग्रहिरात्मम्भरिश्च' अ० ३ २ २६ सूत्रेण (चकारस्यानुक्तसमुच्चयार्थत्वात्) इन्-प्रत्यय पूर्वपदस्य च मुमागम]

पुष्टिवर्धनम् पुष्टे शरीरात्मबलस्य वर्द्धनस्तम् (त्र्यम्बक=उक्तार्थं रुद्र जगदीश्वरम्) प्र०—अत्र नन्द्यादित्वाल्ल्यु प्रत्यय ३ ६० य पुष्ट्या वर्धयति तम् (इन्द्र=परमैश्वर्यम्) २८ ३२ य पुष्टि वर्धयति तम् (त्र्यम्बक=रुद्र परमेश्वरम्) ७ ५९ १२ **पुष्टिवर्धनः**=शरीरात्मपुष्टेर्वर्धयिता (ईश्वरो विद्वान् वा) १ ९१ १२ वर्द्धयतीति वर्द्धन, पुष्टेर्वर्द्धन पुष्टिवर्धन (अग्नि =पूर्वोक्तो भौतिक) ३ ४० पुष्टि शरीरात्मबल धातुसाम्यञ्च वर्द्धयतीति (परमात्मा) ३ २९ य शरीरात्मनो पुष्टि वर्धयतीति (ब्रह्मणस्पति =जगदीश्वर) १ १८ २ शरीर, इन्द्रिय, मन और आत्मा की पुष्टि का वढाने वाला (ईश्वर) आर्याभि० १ ३८, ऋ० १ ६ २१ १२ [पुष्टि-वर्धनपदयो समास । पुष्टिरिति व्याख्यातम् । वर्धन =वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि 'अनुदात्तेतश्च हलादे' अ० ३ २ १४९ सूत्रेण युच्]

पुष्टिवर्धना यौ पुष्टि वर्धयतस्तौ (इन्द्राग्नी=वाय्वग्नी) २१ २० [पुष्टिवर्धनम् इति व्याख्यातम् । तत प्रथमाद्विवचनस्य 'सुपा सुलुग्०' इत्याकारादेश । पुष्टिवर्धनम्=पुष्टिकारकम् नि० १३ ३५]

पुष्टीः पोषणानि २ १२ ५ [पुष्टिप्राति० द्वितीयाबहुवचनम् । पुष्टि =पुष पुष्टौ (भ्वा०) धातो क्तिन्-प्रत्यय]

पुष्णः प्रजापोपकस्य (विदुषो जनस्य) १ १३८ १ [पुष पुष्टौ (भ्वा०) धातोर्वाहु० औणा० कनिन्]

पुष्पम् पोषितु योग्यम् (विषयुक्त शरीरावयवम्) १ १९१.१२ [पुष्प विकसने (दिवा०) धातोरच् । पुष्प पुष्पते नि० ५ १४]

पुष्पवती श्रेष्ठानि पुष्पाणि यासा ता (ओषधी) ११.४८. प्रशस्तानि पुष्पाणि यासा ता (ओषधी =सोमादीन्) ११ ७७ [पुष्पप्राति० प्रशसाया मतुवन्तात् स्त्रिया डीप्]

पुष्पिणी बहुपुष्पा (ओषधय) १२ ८९ बहूनि पुष्पाणि यासु ता (अवनी =पृथिवी) २ १३ ७ [पुष्प व्याख्यातम् । पुष्पप्राति० भूम्न्यर्थे इनि ,। तत स्त्रियां डीप्]

पुष्यतम् पालन पोषण करो स० वि० १३९, अथर्व० १४ २ ३७ **पुष्यति**=पुष्ट करोति १ ६५ १३ पुष्टो भवति १ ८३ ३. **पुष्यन्ति**=आनन्दन्ति १ ८१.९. **पुष्यसि**=पोषयसि १ ९४ ६ **पुष्यसे**=पुष्टो भवे प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम्, लेट्-प्रयोगोऽयम् ४ ८ पुष्टो भवसि ५ ५० १ **पुष्यात्**=पुष्टङ्कुर्यात् २० ४७. पुष्टि कुर्यात् ५ ३७ ५ पुष्ट भवेत् ४ २१ १ **पुष्यास्म**=पुष्टा भवेम २६ १९ **पुष्येम**=पुष्टा भवेम १ ६४ १४ [पुष पुष्टौ (दिवा०) धातोर्लोट् । अन्यत्र लेटि, लटि, लङि च रूपाणि]

पुष्यता पुष्टिमाचरता (जनेन) ५.३४ ५. **पुष्यन्**=पुष्यन्तौ (स्त्रीपुरुषौ) प्र०—अत्र विभक्ति-लुक् २.२७.१५ पुष्ट कुर्वन् (जन) ४ २. [पुष पुष्टौ (दिवा०) धातो शतृ]

पुष्यन्ती पुष्ट कारयित्री (विट्=उत्तमा प्रजा) ७ ५६ ५ [पुष पुष्टौ (दिवा०) धातो शत्रन्तान् डीप्]

पुष्यसे पुष्टये ७.५७ ५.

पुंश्चली या पुंभिश्चलितचित्ता व्यभिचारिणी (स्त्री) ३० २२

पुंश्चलूम् पुभि सह चलितचित्तां व्यभिचारिणीम् (स्त्रीम्) ३० ५

पुसः पुरुषस्य ७ ६ १ पुरुषान् १.१६४.१६ पुस्त्वयुक्तान् पुरुषार्थिन (पुत्रान्) २५ ४५ [पा रक्षणे (अदा०) धातो 'पातेर्डुमसुन्' उ० ४ १७८ सूत्रेण डुमसुन्]

पूतदक्षम् पूत पवित्र, दक्ष वल यस्मिँस्तम् (मित्र=सूर्यम्) प्र०—दक्ष इति वलनामसु पठितम् निघ० २ ९, १ २ ७ पवित्रवलम् (मित्रजनम्) ३३ ५७ **पूतदक्षः**=पवित्र दक्षो वल यस्य स (विद्वान् जन) ३ १.३ [पूतदक्षपदयो समास । पूत =पूञ् पवने (क्र्या०) धातो क्त । दक्ष वलनाम निघ० २.९]

पूतदक्षसा पूत पवित्र दक्षो वल ययोस्तौ (अध्यापकोपदेशकौ) ५ ६६ ४ पवित्र वल याभ्यान्तौ (प्राणोदानवायू) प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश १ २३ ४ [पूतदक्षस्पदयो समासे प्रथमाद्विवचनस्याकारादेश. 'सुपा सुलुक्०' सूत्रेण]

पूतनाः शत्रुसेना ३ २४ १

पूतबन्धनी या पूतान् पवित्रान् गुणान् बध्नाति गृह्णाति सा (मति =प्रज्ञा) ५ ४४ ९ [पूत-बन्धनीपदयो.

पिपिष्वती पिपीपि बहवोऽवयवा विद्यन्ते यस्या सा (रात्रि=दानम्) १ १६८ ७ [पिपिप्प्राति० भूम्न्यर्थे मतुवन्तात् ङीप्। पिपिप्=पिश अवयवे (तुदा०) धातोश्छान्दस रूपम्]

पिपीळे पीडयति ४ २२ ८ [पीड अवगाहने (चुरा०) धातोर्लिट्। 'अनित्यण्यन्ताश्चुरादय' इति णिचोऽभाव]

पिपीषति सोमादिरसान् पातुमिच्छति प्र०—अत्र पीड् धातो सन् व्यत्ययेन परस्मैपदञ्च १ १५ ६ [पीड् पाने (दिवा०) धातोरिच्छायामर्थे सन्नन्ताल्लट्। व्यत्ययेन परस्मैपदम्]

पिपीषते पातुमिच्छते (विदुषे=आप्ताय विपश्चिते) ६ ४२ १ [पीड् पाने (दिवा०) धातोरिच्छायामर्थे सन्नन्ताच् छतृप्रत्यय]

पिपीषवः *पातुमिच्छव (नरा=नायका राजजना)* ७ ५६ ४ [पीड् पाने (दिवा०) धातोरिच्छायामर्थे सन्नन्तात् 'सनाशसभिक्ष उ' इति सूत्रेण उ प्रत्यय]

पिपृक्त सम्यक् प्राप्नुत ३ ५४ २१ **पिपृग्धि**=प्रीणीहि १६ ५ [पृची सम्पर्चने (अदा०) धातोर्लोट्। विकरणव्यत्ययेन शप स्थाने श्लु]

पिपृत पूर्णान् कुरुत ५ ३४ व्याप्नुत ३३ ४२ **पिपृतम्**=पूरयेताम् ६ ६० १२ पूरयतम् ७ ६० १२ पालयत प्र०—अत्र पुरुषव्यत्यय ३ २६ ६ प्रपिपूर्त्तम् १ ६३ १२ **पिपृताम्**=प्रपिपूर्त्त प्र०—अत्र लडर्थे लोट् १ २२ १३ पालयतम् १३ ३२ पिपूर्त्त ८ ३२ **पिपृहि**=पालय ७ १६ १०. पूर्ण कुरु ३ ३१ २० [पॄ पालनपूरणयो (जु०) धातोर्लोट्]

पिपेश पिशत्यवयवान् करोति १ ६८ ५ [पिश अवयवे (तुदा०) धातोर्लिट्]

पिप्पका पक्षिणी २४ ४०

पिप्पलम् उदकमिव निर्मल फल कर्मफल वा प्र०—पिप्पलमित्युदकनाम निघ० १ १२, १ १६४ २२ परिपक्वफल पापपुण्यजन्य सुखदुःखात्मक भोग वा १ १६४ २०. फलभोगम् ५ ५४ १२ पापपुण्य रूप फल को स० प्र० २८३, १ १६४ २० [पिप्पलम् उदकनाम निघ० १ १२]

पिप्यत् प्राप्नुत २ ३४ ६ **पिप्यतम्**=प्यायतो वर्द्धयत २ ३६ ६ वर्धयेतम् ५ ७१ २ **पिप्यताम्**=वर्धयेताम् ६ ५० १२ **पिप्यथुः**=वर्द्धेथाम् प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ११६ २२ वर्धयेतम् १ ११६ ६ वर्धयत ६ ६२ ७ **पिप्यु.**=वर्धन्ते ६ ६२ ७ वर्द्धयेयु ७ २३ ४ [ओप्यायी वृद्धौ (भ्वा०) धातोर्लङि छान्दस पीभाव। अन्यत्र लिटि 'लिड्यडोश्च' इति पी-भाव। व्यत्ययेन परस्मैपदम्]

पिप्युषी पानकर्त्री (अन्तर्वेला) २ १३ १ वृद्धा (धेनु=गौ) २ १६ ८ प्याययन्ती (वृष्टि) ५ ७३ ८ **पिप्युषीम्**=प्रवृद्धा, वर्धयित्री वर्द्धयती वा (**धेनुं**=वाणीम्) २ ३२ ३ [पीड् पाने (दिवा०) धातोर्लिट क्वसु। स्त्रिया ङीप्। ओप्यायी वृद्धौ (भ्वा०) धातोर्वा लिट क्वसु स्त्रिया ङीप् च]

पिप्रति पूरयन्ति ६ ४८ ५ [पॄ पालनपूरणयो (जु०) धातोर्लट्]

पिप्रती सर्वानन्द प्रपूरयन्त्यौ (द्यावापृथिव्यौ) ४ ५६ ७ [पॄ पालनपूरणयो (जु०) धातो शत्रन्तात् ङीप्। छन्दसि पूर्वसवर्णदीर्घ]

पिप्रतोः यौ पिपूर्त्तस्तयो (अश्विनो=सभासेनेशयो सकाशात्) १ ४६ १२ [पॄ पालनपूरणयो (जु०) धातो शतृप्रत्ययान्ताद् ओस्]

पिप्रयत् प्रीणीयात् ७ १७ ४ **पिप्रयः**=प्रीणासि २ ६ ८ **पिप्रिये**=प्रीणाति ३ ५१ ३ **पिप्रीहि**=प्राप्नुहि ५ ३३ ७ [प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोर्लट्। छान्दस द्वित्व शप् च व्यत्ययेन। अन्यत्र लिट्। अपरत्र लोटि शप श्लु]

पिप्रियाणाः प्रियमाणा. (विद्वज्जना) ७.५७ २ [प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोर्लिट कानच्]

पिप्रीषति कमितुमिच्छति ४ ४ ७ [प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोरिच्छायामर्थे सन्नन्ताल् लट्]

पिप्रुम् व्यापनशीलम् (शम्बर=मेघम्) ६ १८ ८ उदरम्भरम् (मनुष्यम्) प्र०—अत्र पॄ-धातोर्बाहुलकादौणादिक कु प्रत्यय सन्वद्भावश्च १ १०१ २ व्यापकम् (शत्रूणा बलम्) ४ १६ १३ प्रपूरकम् (वृत्र=मेघ शत्रु वा) १ १०३ ८ पालकम् (राजानम्) २ १४ ५ **पिप्रोः**=न्यायपूर्त्ते कर्त्री (न्यायाधीशयो) १ ५१ ५ [पॄ पालनपूरणयो (जु०) धातोर्बाहु० औणा० कु प्रत्यय सन्वच्च]

पिब पिबति गृह्णाति प्र०—अत्र व्यत्ययो लडर्थे लोट् १ १५ ५ प्र०—अत्र पुरुष-व्यत्यय १ १४ १० सेवस्व ७ ३७ पिवत्यन्तकरोति प्र० अत्र व्यत्ययो लडर्थे लोट् च १ २३ १ धारणशक्त्या गृहाण १ १० ११ **पिवत्**=पिबति ५ २६ ७ **पिवत**=पिबन्ति प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ १५ २ **पिवतम्**=रक्षतम्

पूर्पतिम् पुरा पालकम् (सभेशम्) १ १७३ १० [पुर्-पतिपदयो समास । 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घ]

पूर्भित् पुरा भेत्ता (इन्द्र =राजपुरुष) ३ ३४ १ **पूर्भिदम्**=शत्रूणा नगराऽभिदारकम् (इन्द्र=राजानम्) ३ ५१ २ [पुर् इत्युपपदे भिदिर् विदारणे (रुधा०) धातो कर्त्तरि क्विप्]

पूर्भिद्ये शत्रूणा पुराणि भिद्यन्ते यस्मिन् सङ्ग्रामे तस्मिन् १ ११२ १४

पूर्भि. पूर्णाभि पालनसमर्थाभि क्रियायुक्ताभिरन्न-मयादिभि (क्रियाभि) १.५८ ८ पूरणपालनसुखयुक्तैर्नगरै १ १६६ ८ नगरै ५ ६६ ४ **पूर्षु**:=पुरीषु २ ३५ ६ **पू** =पुररूपा (पृथ्वी) १ १८९ ८ नगरीव रक्षिका (मही=राज्ञी) ७ १५ १४ [पॄ पालनपूरणयो (जु०) धातो क्विप्प्रत्यय]

पूर्येथाम् अ०—पूर्णे कुर्यातम् ५ २८ [पॄ पालन-पूरणयो (जु०) धातोर्लिङ् । 'बहुल छन्दसि' इति शपो लुक्]

पूर्व-ऋषयः येऽधीतवन्तो वेदार्थविदो विद्वास १ ४८ १४ [पूर्व-ऋषिपदयो समास]

पूर्वकृत् पूर्व करोतीति पूर्वकृत् (इन्द्र =सूर्य) २० ३६ [पूर्वोपपदे डुकृञ् करणे (तना०) धातो कर्त्तरि क्विप्]

पूर्वचितः पूर्वे प्राप्तविज्ञानादिभिर्वृद्धा (भा०—पूर्व-वृद्धजना) २७ ४ [पूर्वोपपदे चिञ् चयने (स्वा०) धातो कर्त्तरि क्विप् । तुगागम]

पूर्वचित्तये पूर्वा चाऽसौ चित्तिश्चयन च तस्यै १ १५९ ३. पूर्वे कृतचयनाय १ ११२ १ पूर्वेषा सज्ञानाय सज्ञापनाय वा १.८४ १२ **पूर्वचित्तिम्**=पूर्वा चित्तिश्चयन यस्य तम् (अग्नि=विद्युतम्) १३ ४३ **पूर्वचित्तिः**=पूर्वा प्रथमा चित्ति सज्ञान यस्या सा (अप्सरा) १५ १९ पूर्वा चाऽसौ चित्तिश्च प्रथमा स्मृतिविषया (द्यौ =वृष्टि) २३ ११. प्रथम चयनम् भा०—प्रथमा परिणति (द्यौ = अतीव सूक्ष्मा विद्युत्) २३ ५४. पूर्वस्मिन्नन्नादौ सञ्चयना-ऽऽख्या (द्यौ =विद्युत्) २३ ५३ [पूर्व-चित्तिपदयो समास । चित्ति =चिती सज्ञाने (भ्वा०) स्त्रिया क्तिन्]

पूर्वजाय पूर्वं जाताय ज्येष्ठाय भ्रात्रे, ब्राह्मणाय वा १६ ३२ [पूर्वोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड प्रत्यय]

पूर्वजे पूर्वस्माज्जाते (द्यावापृथिवी=भूमिविद्युतौ) ७ ५३ २ [पूर्वजप्राति० स्त्रिया टाप्]

पूर्वतराम् अतिशयेन पूर्वाम् (उषस=प्रभातसमयम्) १ ११३ ११ [पूर्वप्राति० अतिशायने तरबन्तात् स्त्रिया टाप्]

पूर्वथा पूर्वे प्रकारै १ १३२ ४ पूर्वमिव ५ ४४.१ पूर्वाणि (ब्रह्माणि=अन्नानि धनानि वा) १ ८० १६ पूर्वैरिव (शिल्पिभिरिव) ३ २९ १ पूर्वा इव ५ ८० ६ पूर्वेषा योगिनामिव ७ १२ पूर्व इव प्र०—अत्र प्रयत्न-पूर्वेत्याकारकेण योगेनेवार्थे थाल् प्रत्यय १ ९२ २ [पूर्व-प्राति० इवार्थे 'प्रत्नपूर्वविश्वेमात् थाल् छन्दसि' अ० ५ ३ १११ सूत्रेण थाल्प्रत्यय । पूर्वथा=पूर्व इव नि० ३ १६]

पूर्वपाः य पूर्वान् पाति स (विद्वान् जन) ४ ४६ १ [पूर्वोपपदे पा रक्षणे (अदा०) धातो कर्त्तरि क्विप्]

पूर्वपीतये पूर्व पीति पान सुखभोगो यस्मिन् तस्मा आनन्दाय १ १९ ९. पूर्वस्य पानाय १.१३५ १ पूर्वेषा पानायेव १ १३४ १ पूर्वेषा पीति पान तस्यै १ १३४ १. [पूर्व-पीतिपदयो समास । पीति =पा पाने (भ्वा०) धातो स्त्रिया क्तिन् । पूर्वपीतये पूर्वपानाय नि० १० ३६]

पूर्वपेयम् पूर्वै पातु योग्यम् (अन्धस =अन्नम्) १.१३५.४ [पूर्व-पेयपदयो समास । पेयम्=पा पाने (भ्वा०) धातोर्यत्]

पूर्वभाजम् पूर्वैर्भजनीयम् (बृहस्पतिं=सूर्यम्) ४ ५० ७ **पूर्वभाजः**=ये पूर्वान् भजन्ति ते (कवय = मेधाविजना) ५ ७७ १. [पूर्वोपपदे भज सेवायाम् (भ्वा०) धातो 'भजो ण्वि ' इति ण्वि]

पूर्वम् प्रथमम् (धार्मिक जनम्) ६.४७ १५ प्राक् १ ३४ १० पुरस्सर पूर्णम् (ब्रह्म) ४० ४ **पूर्वस्य**=पूर्णस्य (पितु =विद्युत) १७ ६० **पूर्वः**=शुभगुणै पूर्ण (कण्व =मेधावी जन) १ १३९ ९. अर्वाग् वर्त्तमान (सूर्य) १ ६० २ पालक प्रथम (सूर्य) ३ ३८ ५ पूर्वविद्य (प्राचीनो विद्वान्) ३ १७ ५. **पूर्वाणि**=सनातनानि (अपासि=कर्माणि) ४ १९ १० प्राचीनानि (साधनानि) ५ ३१ ६ **पूर्वे**=सम्मुखे वर्त्तमाने (ससारे) १.१२४.५. पूर्वस्मिन् (काले) २२ २ **पूर्वेभ्यः**=अधीतपूर्वविद्येभ्य (विद्वज्जनेभ्य) १ १७५ ६ कृतयोगाभ्यासपुरस्सरेभ्य (जनेभ्य.) १ ७६ ६ **पूर्वेषाम्**=अतीतानां विदुषाम् (जना-नाम्) ३४ ४९ [पूर्व पूरणे (भ्वा०) धातोरच्प्रत्यय]

समास । वन्धनी=वन्ध वन्धने (क्रया०) धातोर्ल्युडन्तान् ङीप्]

पूतवन्धू पूता पवित्रा वन्धवो ययोस्तौ (अध्यापकोपदेशकौ) ६.६७ ४ [पूत-वन्धुपदयो समास]

पूतभृत् येन पूत विभर्त्ति तच्छुद्धिकर शूर्पादिकम् १८ २१ [पूतोपपदे डुभृञ् धारणपोषणयो (जु०) धातो क्विप्। वैश्वदेवो वै पूतभृत् श० ४ ४ १ १२]

पूतम् पवित्रम् (कर्म) ४ १ १९ शुद्धो निर्मलो वा (सोम=सोमलताद्योषधीना गणो रसो वा) १९ ३ **पूताय**=पवित्रकरणाय ३९ २ [पूञ् पवने (क्रया०) धातो क्त]

पूतासः शुद्धा शोधिताश्च(सुता=मूर्त्तिमन्त पदार्था) १ ३.४. पवित्रा (पदार्था) २० ८७ [पूतप्राति० जसोऽसुगागम]

पूताः पवित्रकारिका (गिर) १ ७९ १० [पूतप्राति० स्त्रिया टाप्प्रत्यय]

पूतेव पवित्रेव (स्वधिति=वज्र इव) ७ ३ ९ [पूता-इवपदयो समास]

पूयमानः पवित्रीकृत (शुक्र=वीर्यसमूह) ८ ५७ [पूञ् पवने (क्रया०) धातो कर्मणि शानच्]

पूयमानाः पवित्रा सत्य (धेना=वाच) १७ ९४. भा०—पवित्रीभूता (धेना) १३ ३८ पवित्रता कुर्वाणा (धेना=विद्यायुक्ता वाच') ४ ५८ ६ [पूयमानप्राति० स्त्रिया टाप्। पूयमान व्याख्यातम्]

पूरवः मनुष्या ६.२०.१० हे जीवो स० प्र० २३८, १० ४८.५ **पूरवे**=धार्मिकाय मनुष्याय प्र०—पूरव इति मनुष्यनाम निघ० २ ३, ४.२१ १० प्रपूरणाय सुखाय १ ६३ ७ अल साधनाय मनुष्याय १ १३० ७ **पूरुम्**=पालक सेनापतिम् ७ ८ ४ पालक धारक वा (सत्पुरुषम्) ७ १९ ३ पूर्णप्रज्ञ मनुष्यम् ७ १८ १३ पूर्णवल सेनाध्यक्षम् १२ ३४ **पूरुः**=मनुष्य ४ ३८ ३ मरणशीलो मनुष्य ५ १७ १. **पूरौ**=पूर्ण-वले (जने=मनुष्ये) ६.४६ ८ [पूरव=पूरयितव्या मनुष्या नि० ७ २२ पूरव मनुष्यनाम निघ० २.३]

पूरुष प्रयत्नशील (सुसन्तान) १२ ७८ पुरि देहे शयान देहधारक वा (भिषक्) १२ ८२ **पूरुषम्**=सर्वत्र पूर्ण परमात्मानम् ३५.४ अन्नादिना पूर्ण देहम् १२ ७९ **पूरुषः**=परिपूर्ण परमात्मा ३१ ५ पुमान् १२ ९१ [पुरुष इति व्याख्यातम्। 'अन्येषामपि दृश्यते' इति दीर्घ।

पूरुषघ्नम् पुरुषाणा हन्तारम्(प्राणिनम्) १ ११४ १० [पुरुषघ्न व्याख्यातम्। 'अन्येषामपि दृश्यते' इति दीर्घ]

पूरुषत्वता उत्तमा पुरुषा विद्यन्ते यस्मिँस्तेन (सत्कर्मणा) ४ ५४ ३ ['पुरुषत्वता' व्याख्यानम्। 'अन्येषामपि दृश्यते' इति दीर्घ]

पूर्णगभस्तिम् पूर्णा गभस्तयो रश्मयो यस्य सूर्यस्य तद्वद् वर्त्तमानम् (नरम्) ७ ४५ ४ [पूर्णा-गभस्तिपदयो समास। गभस्तय रश्मिनाम निघ० १ ५]

पूर्णतरम् अतिशयेन पूर्णाऽऽभरणादिकम् १८ १० पूर्णप्राति० अतिशायने तरप्]

पूर्णवन्धुरः य पूर्णश्चाऽसौ वन्धुरश्च स, पूर्णाय जगतो वन्धुरो वन्धनहेतुर्वा (इन्द्र=जगदीश्वर सूर्यो वा) ३ ५२ **पूर्णवन्धुरैः**=पूर्णै सत्यै प्रेमवन्धनैर्युक्त (इन्द्र=सेनाध्यक्ष) १ ८२ ३ [पूर्ण-वन्धुरपदयो समास। वन्धुर=वध्नाति मार्दवेनेति विग्रहे वन्ध वन्धने (क्रया०) धातो 'मदगुरादयश्च' उ० १ ४१ सूत्रेण उरच्]

पूर्णम् समग्रशस्त्राऽस्त्रसामग्री-सहितम् (रथम्) १ ८२ ४. अलङ्कारि (कर्म्म) १८ १०. [पॄ पालनपूरणयो (जु०) धातोर्वाहु० नक्-प्रत्यय। सर्व वै पूर्णम् श० ४ २.२.२. सर्वमेतदयत्पूर्णम् श० ९ २ ३ ४३ पूर्णमित्युदकनाम निघ० १ १२ पूर्णो एष यत् सवत्सर जै० २ ३९३ पूर्ण प्रजापति तै० स० ५ १ ९ १]

पूर्णा पूर्णौ (गभस्ती=हस्तौ) ७ ३७ ३ [पूर्णप्राति० प्रथमाद्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश]

पूर्णा परिपूर्णा अ०—होतव्यद्रव्येण पूर्णा (दर्वि) ३ ४९ [पूर्णप्राति० स्त्रिया टाप्]

पूर्तम् पूर्त्तिकरम् (सत्याचारम्) ६ १६ १८ पूर्णा सामग्रीम् १८ ६४ ऐश्वर्यादि की पूर्णता स० वि० २१०, अथर्व० ९ ६ ३ १ मनसा वाचा कर्मणा सम्यक् पुरुषार्थेनैव सर्ववस्तुसम्भारैश्चोभयाऽनुष्ठानपूर्त्तिम् ऋ० भू० १०५, अथर्व० १२ ५ १० यज्ञ की सामग्री पूरी करना स० वि० १४५, अथर्व० १२ ५ १० [पॄ पालनपूरणयो (जु०) धातो क्त। 'न ध्याख्यापॄ०' इति निष्ठानत्वनिषेध]

पूर्धि पूरय ७ २४ ६ पिपूर्त्ति प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् 'श्रुशृणुपॄ०' इति हेर्धि। १ ३६ १२ प्रीणीहि, सर्वाणि सुखानि सम्प्राप्नुहि १ ४२ ९ [पॄ पालनपूरणयो (जु०) धातोर्लोट्। 'बहुल छन्दसि' सूत्रेण शपो लुक्। पूर्धि याच्ञाकर्मा निघ० ३ १९ पूर्द्धि पूरय देहीति वा नि० ४ ३]

१ १ २ पूर्वकालाऽवस्थास्थै कारणस्थै प्राणै (ऋषिभि.) ऋ० भू० ७८, १ १ २. विद्या पढे हुए प्राचीन (ऋषियो) से आर्याभि० १ ४, ऋ० १ १ १ २ [पूर्वप्राति० तृतीया-बहुवचने भिस स्थाने 'बहुल छन्दसि' इति ऐस् न भवति]

पूर्वौ प्रथमाऽधीतविद्यौ (अध्यापकोपदेशकौ) ५ ६५.३ [पूर्वप्राति० प्रथमाद्विवचनम्]

पूर्व्य पूर्वैर्विद्वद्भि कृतो विद्वान् तत्सम्बुद्धौ (अग्ने=विद्वज्जन) २ २ ६ **पूर्व्यम्**=पूर्वै कृत निष्पादितम् (पाथ=अन्नमुदक वा) ३ ३१ ६ पूर्वैर्योगिभि प्रत्यक्षीकृतम् (ब्रह्म=बृहद्व्यापकमीश्वरम्) ११ ५ पूर्व लब्धम् (पाथ=अन्नम्) ३३ ५६ पूर्वैर्विद्वद्भिरुपदिष्टम् (वचः=वचनम्) ३ १० ५ पुरातन सनातनम् (ब्रह्म) ऋ० भू० १५७, ११ ५ पूर्वम् (वाज=वेगम्) ४.१६ ८ पूर्वै राजभि कृतसत्कारम् (राजानम्) ५ ३५ ६ सनातन (वसु=ज्ञानादि धन को) स० प्र० २३८, १० ४६ १ **पूर्व्यः**=पूर्वै साक्षात्कृत (जगदीश्वर) १ ७४ १. पूर्वै कृतविद्य (विद्वज्जन) ३३ ४ पूर्वेषु विद्वत्सु कुशल (अग्निरिव विद्वान्) ३ ११ ३ सबसे पूर्व विद्यमान (ईश्वर) स० प्र० २३८, १० ४८.१ **पूर्व्यान्**=पूर्वैर्निष्पादितान् (सोमान्=सोमैश्वर्यादियुक्तान् रसान्) ३ ३६ ३. **पूर्व्याय**=पूर्वेषु कुशलाय (जनाय) ४ ४४ ३ पूर्वैर्विद्वद्भि सुशिक्षया निष्पादिताय (विद्यार्थिजनाय) १ १५६ २ पूर्वेषु लब्धविद्याय (विदुषे जनाय) ५ १५ १ पूर्वेषु भवाय (जनुषे=जन्मने) ५ ४५ ३ **पूर्व्याः**=पूर्वेषु कुशला (विद्वासो जना) ३ ५४ ४ पूर्वैर्विद्वद्भि सेविता (निविद=वाच) २ ३६ ६ **पूर्व्यम्**=पूर्वैर्योगिभि प्रत्यक्षीकृतम् (ब्रह्म) ६ ४४ १३ पूर्वलब्धम् (पाथ=अन्नम्) ३३ ५६ **पूर्व्याणि**=पूर्वैर्विद्वद्भि कृतानि (कर्माणि) १ ११७ २५ पूर्वै साक्षात्कृतानि (धामानि=जन्मनामस्थानानि) ४ ५५ २ पूर्वनिर्मितानि वस्तूनि ६ ४ ३ (पूर्वप्राति० कृतार्थे कुशलार्थे लब्धार्थे वा यत् प्रत्ययश्छान्दस पूर्व्यमिति पुराणनाम निघ० ३ २७ पूर्वप्राति० वा 'पूर्वै कृतमिनयौ च' अ० ४ ४.१३३ सूत्रेण कृतार्थे य. प्रत्यय]

पूर्व्या पूर्वै कृतेषु कुशलौ (राजामात्यौ) ४ ४४ ५ [पूर्वप्राति० कृतार्थे कुशलार्थे वा यत्। पूर्व्यप्राति० प्रथमा-बहुवचनस्याकारादेश 'सुपा सुलुक्' सूत्रेण]

पूर्व्या पूर्वै कृतानि (विद्याप्रचाररूपाणि कार्याणि) १ ११७ ४ प्राचीनानि (कृतानि=कर्माणि) २ ११ ६ पूर्वै राजभि. कृतानि (व्रतानि=कर्माणि) ७ ६ २ [पूर्वप्राति० कृतार्थे 'पूर्वै कृतमिनयौ च' इति य.। तत. शेलोपश्छन्दसि]

पूर्व्या पूर्वैर्विद्वद्भिर्निष्पादिता (सुन्दरी स्त्री) ३ ३६.२ **पूर्व्याभिः**=पूर्वै सेविताभि (गीर्भि) ६.४४.१३. [पूर्व्यमिति व्याख्यानम्। तत. स्त्रिया टाप्]

पूर्व्यासः पूर्वैराप्तै सेविता (पन्थाः=मार्गा.) ३४ २७. [पूर्व्यमिति व्याख्यातम्। ततो जसोऽनुनागम]

पूर्व्येभिः पूर्वेषु साधुभि (रतोभेभि=प्रशसितै कर्मभि.) ३ ३२ १३ पूर्वै कृतै (विज्ञानादिभि) १ ११७ १४. [पूर्व्यमिति व्याख्यातम्। ततो भिस ऐसादेशो न भवति 'बहुल छन्दसि' सूत्रेण]

पूषणम् पुष्ट्यौषध्यादिसमूहप्रापक चन्द्रलोकम् प्र०—पूषेति पदनामसु पठितम् निघ० ५ ६. अनेन पुष्टिप्राप्त्यर्थश्चन्द्रो गृह्यते १ १४ ३ पुष्टिकरमोषधिगणम् ७.४४ १ पोषकम् (विद्वज्जनम्) १ १८६.१०. पुष्टिकर्त्तारम् (ईश्वरम्) ३३ ४६ पुष्टिकर भोगम् ३४ ३४ पुष्टिम् २५ ३ शरीराऽऽत्मनो पोषयितारम् (सेनाध्यक्षम्) १ १०६ ४ सभासेनाध्यक्षम् १ ४२ १० **पूषन्**=विद्याशिक्षाभ्या पुष्टिकर्त्त (विद्वज्जन) १ ६० ५ पोषक (शिष्य जन) १ १८४ ३ पालक (राजन्) ६ ५४.६ भूमिरिव पुष्टियुक्त (विद्वज्जन) ६ ५८ ३ पुष्टिकारक (अ०—परमेश्वराऽऽप्त-विद्वज्जन वा) ३४ ४१ हे वृद्धिकारक पुरुष स० वि० १३६ अथर्व० १४ २ ३८. पोषयतीति पूषा सूर्यलोक प्र०—अत्राऽऽन्तर्गतो णिच् 'श्वन्नुक्षन्पूषन्-प्लीहन्' उ० १ १५६ अनेनाऽय निपातित १.२३ १३ **पूषा**=य स्वाभिव्याप्त्या सर्वान् पदार्थान् पोषयति स परमेश्वर १.२३ १४ पुष्टिकर्त्ता (परमेश्वर.) ऋ० भू० २०२, ऋ० ८.१ २३.५ पुष्टिकरो दुग्धादि ५ ५१ ११ पुष्टिकरब्रह्मचर्यादिव्यवहार ७ ३५ ६ पोषको वैद्य १० ६. भूमिवत् पुष्ट पुष्टिकर्त्ता वा (युवा नर) ६ ५८ ४. भूमिरिव पोषिका (स्त्री) ३८ ३ चन्द्र इव सर्वस्य पोषक (भा०—सर्वस्य पालको राजा) ६ ३२ पोषणप्रद (ईश्वर) आर्याभि० २ ५०, २५ १८ **पूष्णः**=पृथिव्या प्र०—'पूषेति पृथिवीनामसु पठितम्' निघ० १ १, ६ ६ पुष्टिकर्त्र्या भूमे १४ २५ पूर्णबलस्य (पुरुषस्य) २० ३ पुष्टिनिमित्तस्य प्राणस्य ६ १ पुष्टिकरस्याऽऽदित्यस्य ६ १८ सोमाद्योषधिगणस्य ६ ३० पुष्टिकर्त्तुर्वैद्यस्य ६ ३८ पुष्टिकारिकाया पृथिव्या ५ २२ पुष्टिमतो वीरस्य ५ २६ पुष्टे २५ २७ पुष्टिकर्त्र्या (विद्युत) ११ ६ पुष्टिहेतो समानस्य वायो

पूर्वया पूर्वे. स्वीकृतया (निविदा=वेदवाचा) २५.१६. सनातन्या (वेदवाण्या) १८९३ प्राचीनया (वेदवाचा) १९६२ **पूर्वाम्**=प्राचीम् (प्रदिशम्) १९५३ **पूर्वा**=प्रथमा भा०—पूर्वभाविनी (उषा) ३३९३. पूर्णाऽग्रस्था वा (विद्युत्) ६५९६ **पूर्वासाम्**=ज्येष्ठानाम (उपसाम्) ११२४९ **पूर्वासु**=प्राचीनतमासु सनातनीषु प्रजासु ३५५५ **पूर्वाः**=अतीता (उपस) १४४१० **पूर्वे**=प्रथमतो वर्त्तमाने (द्यावापृथिवी=प्रकाशभूमीव सगते) १७२५. [पूर्वा=पुराणनाम निघ० ३२७ पूर्वप्राति० स्त्रिया टाप्]

पूर्वयावा प्राचीनराजनीतिं प्राप्त (इन्द्र=सर्वाधीशो जन) ३३४२ (पूर्वोपपदे या प्रापणे (अदा०) धातो र्वनिप् प्रत्यय]

पूर्ववत् यथा पूर्वे विद्वासो विद्यादानार्थं गच्छन्ति तद्वत् १३११७ [पूर्वप्राति० तुल्यार्थे वति प्रत्यय]

पूर्वसूनाम् या पूर्वमपत्यानि सूयन्ते तासाम् (स्त्रीणाम्) २३५५ प्रथम प्रसूत हुई स्त्रियो का स० वि० १०४, २.३५.५ [पूर्वोपपदे षूङ् प्राणिगर्भविमोचने (अदा०) धातो क्विप्]

पूर्वहूतिम् पूर्वा हूतिराह्वान यस्य तम् (पतिम्) १२२२ **पूर्वहूतौ**=पूर्वेषा सत्कर्त्तव्याना वृद्धानामाह्वाने ६६४५ पूर्वेषा हूति प्रशसा यस्मिन् येन वा तस्याम् (शिल्पविद्यायाम्) ७३५५ पूर्वेषा विद्यावृद्धाना हूतिराह्वान यस्मिन् गृहाश्रमे तस्मिन् ११२३२ पूर्वैर्विद्वद्भि कृताया स्तुतौ ७३९२ [पूर्व-हूतिपदयो समास। हूति=ह्वेञ् स्पर्द्धाया शब्दे च (भ्वा०) धातो स्त्रिया क्तिन्। पूर्वहूतौ=पूर्वस्यामभिहूतौ नि० ५२७]

पूर्वहूतौ पूर्वै. शब्दितौ (वायुसूर्यौ) ३३४४ पूर्वै शिष्टैर्विद्वद्भिराहूतौ (श्रेष्ठौ मनुष्यौ) ८५९ [पूर्व-हूतपदयो समास। हूत.=ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो. क्त.]

पूर्वः पूर्वः आदिम आदिम (यजमान=सज्जन) ५७७२ [पूर्व पदस्य वीप्साया द्वित्वम्]

पूर्वा पूर्वौ (राजसेनाध्यक्षौ) ४३८१ [पूर्वप्राति० प्रथमाद्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश]

पूर्वानिव यथा पूर्वास्तथा वर्त्तमानान् (सखीन्) ५.५३.१६ पूर्वान्-इवपदयो समास]

पूर्वासः अस्मत्तो वृद्धा (पितर=प्रजाशोधका जना) १९६८ [पूर्वप्राति० जसोऽसुगागम]

पूर्वी पूर्व्यौ (मातरा=मातापितरौ) ७२५ [पूर्वी प्राति० प्रथमाद्विवचनस्य पूर्वसवर्णदीर्घ]

पूर्वी पूर्व्य सनातन्य (रातय=दानानि, ऊतय=रक्षणादीनि) प्र०—अत्र 'सुपा सुलुक्०' इति पूर्वसवर्णदेश १११३ पूर्वभूता प्रजा १७०१ प्राक्तनैर्धार्मिकै प्राप्तशिक्षा (प्रजा) ८४६ [पूर्वीप्राति० प्रथमावहुवचनस्य पूर्वसवर्णदीर्घ]

पूर्वीभिः पुरातनीभि (शरद्भि) १८६६ प्राचीनाभि प्रजाभि सह ५५६४ **पूर्वीषु**=प्राचीनासु प्रजासु ५३५६ **पूर्वीः**=प्राचीना सनातनी प्रजा १५६१ प्रागुत्पन्ना प्रजा ६.३९४ पूर्वे स्थिता (अप=जलानि) ७२१३ पूर्वेणेश्वरेण कृता (प्रजा) ३१५३ पूर्व वर्त्तमाना प्रजा. ३७९ 'पूर्वैर्न्यायाधीशै. प्रापिता (विश=प्रजा) १७२४ पूर्णा वह्वचो विद्या ३५२ पूर्वै प्राप्ता (इष=इच्छा) ३३०१८ पूर्वं सम्पादिता (आहुतय) ३४५ पुरातनी (गिर) १५९४ पूर्व प्राप्ता (इष=प्रजा) ११८१६ प्राचीना वेदोदिता (प्रणीतय=प्रकृष्टा नीतय) ६४५३ पूर्वतनी (उषस=प्रभातवेला) ४१९८ पूर्वंभूता (चर्षणी=मनुष्यादिप्रजा) ३४३२ पूर्वेषा सम्वन्धिनी (पुर) १६३२ प्राचीना पितापितामहादिभ्य प्राप्ता (विश=विदुषी प्रजा) ७३१० पुरातन्य (ऊतय=रक्षा) ७२६४ पूर्वैर्विद्वद्भि सुशिक्षयोत्तमा कृता (तविषी=सेना) २०४७ पूर्व वर्त्तमान (शरद=शरद् ऋतुओ को) स० प्र० ११०, १.१७९१ पूर्णसुखान् (इष=अन्नादीन्) ६३९५ [पूर्वीशब्दस्य रूपाणि]

पूर्वे पूर्व विद्या अधीतवन्तोऽनूचाना विद्वास १६२२ पूर्वजा (पितर=ज्ञानिनो जनका) १९५१ प्रथमजा (पितर) ३५५२ इत पूर्वसम्भवा (देवा=विद्वास) ३११६ पूर्णविद्यया सर्वस्य पोषका (विद्वज्जना) १७२८ अधीतपूर्णविद्या (देवा.=विद्वासो जना) १७२९ शुभगुणै पूर्णा (मेधाविनो जना) ११३९९ प्राक्तना जना १३३१ प्राचीना (विद्वास) ५२५२ आदिमा (आप्ता पुरुषा) ६१९४ [पूर्वप्राति० प्रथमावहुवचनम्। 'पूर्वपरावर०' अ० ११३४ सूत्रेण सर्वनामसज्ञा]

पूर्वेभिः अधीतविद्यैर्वर्त्तमानै प्राक्तनैर्वा विद्वद्भि. (ऋषिभि=कारणस्थै प्राणै) ११२ ये वेदादिशास्त्राण्यधीत्य विद्वासो भूत्वाऽध्यापयन्ति ते प्राचीनास्तै ऋ० भू० ७५, ११२ प्रथमोत्पन्नै (ऋषिभि) ऋ० भू० ७७,

पृक्षयामेषु पृच्छ्यन्ते ये ते पृक्षास्तेपामिमे यामास्तेषु (जिज्ञासुषु) प्र०—अत्र पृच्छधातोर्बाहुलकादौणादिक क्स प्रत्यय १ १२२ ७ [पृक्ष-यामपदयो समास । पृक्ष·= प्रच्छ ज्ञीप्सायाम् (तुदा०) धातोर्बाहु० क्स]

पृक्षासः आर्द्रीभूता (विद्वासो जना) ३ ७.८ सम्पर्का (व्रतपा=विद्वज्जना) ३.४ ७ सम्बद्धा (वायुजलविद्युत) ४ ४५ १ ससिक्ता· (सूर्यकिरणा) ४ ४५ २ [पृक्ष इति व्याख्यातम् । ततो जसोऽसुगागम]

पृक्षुधः प्रकर्षेण क्षोधितु भोक्तुमिष्टा (वीरुध.= लता) प्र०—क्षुध बुभुक्षायाम्, अत कर्मणि क्विप्, पृषोदरादित्वात् पूर्वसम्प्रसारणञ्च १.१४१ ४ [प्र+क्षुध बुभुक्षायाम् (दिवा०) धातो कर्मणि क्विप् । पूर्वपदस्य सम्प्रसारण च पृषोदरादित्वात्]

पृङ्क्त बध्नीत, ससर्ग कुरुत १६ ११ **पृङ्क्तम्**= सम्बध्नीतम् ६.६८ ८ सयोजयतम् २ ३७ ५ स्पर्श कुरुतम् ६ ४ सम्पृङ्क्तम् १ १०६ ४ **पृङ्धि**=सम्बधान २ २४ १५ [पृची सम्पर्के (रुधा०) धातोर्लोट्]

पृचः कामना ५ ७४ १० [पृची सम्पर्के (रुधा०) धातो कर्मणि क्विप्]

पृचीमहि सम्बध्नीयाम १ १२६ ७ [पृची सम्पर्के (रुधा०) धातोर्लिङ् । व्यत्ययेनात्मनेपदम्]

पृच्छ सन्देहान् दृष्ट्वोत्तराणि गृहाण १ ४४. **पृच्छत**=प्रश्नो को पूछो आर्याभि० २ ३६, १७ २० **पृच्छम्**=पृच्छामि २३ ५७ **पृच्छसे**=पृच्छ (अत्र लेट्) ३३ २७ **पृच्छै**=पृच्छेयम् ४ १८ २ [प्रच्छ ज्ञीप्सायाम् (तुदा०) धातोर्लोट् । अन्यत्र लड् लेट् च । लडि अटोऽभाव ।

पृच्यताम् सम्बध्यताम् २० २७ **पृच्यते**=सम्बध्यते ३ ३४ सयुज्यते १ १०३ १ **पृच्यन्ताम्**=परिपच्यन्ताम् १० ४ मेल्यन्ता पृच्यन्ते वा युक्त्या वैद्यकशास्त्ररीत्या १ २१ [पृची सम्पर्के (रुधा०) धातो कर्मणि लोट् ।

पृञ्चता सम्पर्चकौ (नरौ) १ ४७ ८. [पृची सम्पर्के (रुधा०) धातो शतृप्रत्यय]

पृञ्चतीः स्पर्शयन्त्य (अम्बय=रक्षणहेतव आप) प्र०—अत्र 'सुपा सुलुक्०' इति पूर्वसवर्णादेशोऽन्तर्गतो ण्यर्थश्च १ २३ १६ [पृची सम्पर्के (रुधा०) धातो शत्रन्तान् ङीप्]

पृञ्चते सम्बध्नाति १ १२८ ५ **पृञ्चन्ति**=सम्बध्नन्ति ५ ७४ १० **पृञ्चीत**=सम्बध्नीत १ ४० ८ [पृची सम्पर्के (रुधा०) धातोर्लेट् । अन्यत्र लिङ् । 'पृञ्चते' प्रयोगे व्यत्ययेनात्मनेपदम्]

पृण पूरयति ३ १७ पूरय प्र०—अत्राऽन्तर्भावितणिजर्थ ५ २७ योजय ६ २१ तर्पय १२ ५४. सुखय १५ ५६ पिपूर्द्धि १५.५६ **पृणत**=तृप्यत २ १४.१० पूरयत २ १४.११ **पृणताम्**=सुखयतु ३ ५० १. **पृणति**=सुखयति ३ ३६ ६. **पृणते**=पालयति ७ ३२.८ **पृणध्वम्**=पालयध्वम् ३.३३ १२ पूर्यत ७.१६ ११ पूरयध्वम् १ १६२ ५ सुखयत २५.२८ **पृणन्ति**= सुखयन्ति २.३५ ३. पूरयन्ति ५ ८५.६ पिपुरति ३३ १३. सुखयेयु· १ ५२ ४ पालयन्ति विद्या पूरयन्ति वा ५ ११ ५ **पृणस्व**=प्रीणीहि प्रीणय वा ५.१६. सुखय ६ ४१ ४. सुखी भव १७ ७६ **पृणात्**=पालयेत् ६.४७ १५ तर्पयेत् २ ३०.७ **पृणाति**=पालन करता है स० वि० ८०, अथर्व० ११ ५ ४ विद्या-सुशिक्षा-सस्कृताऽन्नाद्यै स्वय पुष्यति सन्तानान् पोषयति च १.१२५ ५ प्रसन्नान् करोति ऋ० भू० २३५, अथर्व० ११ ३ ५ ४ **पृणातु**=सुखयतु २३ ४३ [पृ पालनपूरणयो (क्रया०) धातोर्लोट् । पृण प्रीणने (तुदा०) धातोर्वा लोट् । अन्यत्र लट् लड् च । पृणाति दानकर्मा निघ० ३ २०]

पृणक् पृणक्ति ६ २० ६ **पृणक्तु**=सम्पर्क करोतु १.८४.१ सम्बध्नातु ४ ३८ १० **पृणक्षि**=सयुनक्षि १ ८३ १. सम्बध्नासि १२ १०७ [पृची सम्पर्के (रुधा०) धातोर्लङ् । अडभाव । अन्यत्र लोट् लट् च]

पृणध्यै सुखयितुम् ६ ६७ ७ [पृण प्रीणने (तुदा०) धातोस्तुमर्थे कध्यै प्रत्यय]

पृणतः विद्यादिभि प्रपूरकस्य (विदुष) १.१६८ ७. पालकस्य विद्यादिभि प्रपूरकस्य वा १.१६८ ७. पालयत पुष्टान् प्राणिन १ १२४ १० **पृणते**=सुखयते (प्रजाजनाय) ६ २८ २ **पृणन्**=पालयन् (विद्वज्जन) ७ ३२.८ **पृणन्तम्**=पुष्यन्तम् (पुत्रम्) १ १२५.४. **पृणन्तः**=स्वं स्वकीयाँश्च पुष्यन्त (जना) १ १२५ ७ सुखयन्त (रसा) २ ११ ११ [पृण प्रीणने (तुदा०) धातो· शतृप्रत्यय]

पृणानः पूर्व कुर्वन् भा०—रक्षन् (जनः) २० ४५ [पृ पालनपूरणयो (क्रया०) धातो शानच्]

पृणीत प्रपूरयन्ति प्र०—अत्र व्यत्ययो लडर्थे लोडन्तर्गतो ण्यर्थश्च १ २३ २१ **पृणेथाम्**=प्रपूरयेतम् ६ ६६ ७ **पृणैथे**=पूरयतम् ७ ६१ २ [पृ पालनपूरणयो (क्रया०) धातोर्लोट्]

पृणीतन अलङ्कुरुत ५ ५ ५ [पृ पालनपूरणयो

२ ११ पुष्टिहेतोर्वायो प्र०—वृषा पूषा शत० २ ५ १ ११, १ २४ पोषकस्य वायोर्वारणपोषणाभ्यामिव ६ ३०. **पूष्णा**=पृथिव्या प्र०—पूषेति पृथिवीनाम निघ० १ १, १० ३० पुष्टेन स्वीकीयेन सैन्येन ११ १५ **पूष्णे**=पुष्टिकरणाय ४ ७ पुष्टिकराय (पुरुषाय) ३८ १५ पोषणाय १ १२२ ५ प्राणपशुपालनाय १० ५ पोषकाय (शिष्याय) ४ ३.७ पुष्टिकर्त्रे (भा०—वायुशुद्धये) २२ २० पुष्टाय (पदार्थाय) २२ २० [पूष पुष्टौ (क्वचिद् वृद्धौ पाठ) (भ्वा०) धातो 'श्वनुक्षन्पूषन्०' इति कनिन्। पूषा पृथिवीनाम निघ० १ १ पदनाम निघ० ५ ६ पूषेत्यपर सोऽदन्तक। 'अदन्तक पूषा' इति च ब्राह्मणम् नि० ६ ३१ पूषा स शौद्र वर्णमसृजत पूषणमिय (पृथिवी) वै पूषेय हीद सर्वं पुष्यति यदिद किं च श० १४.४ २ २५ अय वै पूषा योऽय पवतेऽएष हीदं सर्वं पुष्यति श० १४ २ १ ६ पूषाऽपोपयत् तै० १ ६ २ २ पुष्टिर्वै पूषा तै० २ ७ २ १ असौ वै पूषा योऽसौ (सूर्य) तपति कौ० ५ २ अन्न वै पूषा कौ० १२ ८ पशवो वै पूषा श० १३ १ ८ ६ पूषा वै पशूनामीष्टे श० १३ ३ ८ २ पूषा विशा विट्पति तै० २ ५ ७ ४ प्रजनन वै पूषा श० ५ २ ५ ८ पूषा वै पथीनामधिपति श० १३ ४ १ १४ पूषा वै श्लोण्यस्य भिषक् तै० ३ ९ १७ २ (श्रिय) भगम् योषा वै सरस्वती वृषा पूषा श० २ ५ १ ११ पूषा वै देवाना भागदुघ श० ५ ३ १ ९ इय पृथिवी वै पूषा मै० २ ५ ५ ३ श० ६ ३ २ ८ पूषा भग भगपति श० ११ ४ ३ १५ पूषा विश्ववेदा मै० २ ६ ९ पूषा पूषा वै श्लोण्यस्य भिषक् तै० ३ ९.१७ २ पूषा हि सनीनामीशे काठ० २३ ६ पूष्णे एकादशकपाल मै० २ ६ १३ पूष्णे करम्भ तै० १ ५ ११ १३ श० ४ २ ५ २२ प्रतिष्ठ पूषा तै० स० ५ ३ ४ ४ [योषा वै सरस्वती वृषा पूषा श० २ ५ १ ११रेवती नक्षत्र, पूषा देवता तै० स० ४ ४ १० ३]

पूषणा सर्वेषा पोषकम् (सज्जनम्) ६ ५७ १. [पूषणमिति व्याख्यातम्। 'सुपा सुलुक्०' इत्याकारादेश]

पूषण्वते बहव पूषण पुष्टिकरा विद्यन्ते यस्य तस्मै (राज्ञे) ३ ५२ ७. बहव पूषण. पुष्टिकर्त्तारो गुणा विद्यन्ते यस्मिँस्तस्मै (इन्द्राय=धनाय) १ १४२ १२ **पूषण्वन्तम्**=बहुपुष्टियुक्तम् (इन्द्र=स्वकीय जीवस्वरूपम्) २८ २७ **पूष्णवन्तः**=बहव पूषणो विद्यन्ते येषान्ते (ऋभव = मेधाविसज्जना) ३ ५४ १२ **पूषण्वान्**=पूषण पुष्टिकरा गुणा विद्यन्ते यस्मिन् स (अग्नि =जन) २१ १५ अरिशक्तिनिरोधको वीर (सेनाध्यक्ष) १ ८२ ६ [पूषणमिति व्याख्यातम्। पूषन्प्राति० भूम्न्यर्थे मतुप्]

पूषरातयः पुष्टे राति दान येषा ते (मरुद्गणा = मनुष्याणा समूहा.) २ ४१ १५ पूष्ण सूर्याद्रातिर्दान येषान्ते (मरुद्गणा) १ २३ ८ [पूषन्-रातिपदयो समास। 'पूषन्' इति व्याख्यातम्। राति =रा दाने (अदा०) धातो स्त्रिया क्तिन्]

पूषेव पुष्टिकर्त्ता सूर्य इव १ १८१ ९ भूमिरिव ६ ६१ ६ [पूषा-इवपदयो समास]

पृक्षप्रयजः ये पृक्षेण शुभगुणैरार्द्रीभावेन प्रयजन्ति ते (विद्वासो जना) ३ ७ १० [पृक्षोपपदे प्रपूर्वाद् यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो क्विप्। पृक्षमिति व्याख्यास्यते]

पृक्षम् सुखै सेचकम् (विद्वासम्) १ १२९ २ सम्पृक्तारम् (न्यायाधीशम्) १ १२७ ५ अन्नम् ६ ६२.४ सेचनीयम् (क्षेत्रम्) २ ३४ ३ **पृक्षस्य**=सर्वत्र सम्बद्धस्य सम्पृक्तस्य (विदुषो जनस्य) ६ ८ १ **पृक्षः**=सम्पर्के ४ ४४ २ **पृक्षाय**=सेचनाय २ १३ ८ **पृक्षाः**=सम्पर्चनीया (प्रजाजना) ६ ३५ ४ **पृक्षे**=सम्पर्के १ १८३ २ पृचन्ति सयुञ्जन्ति यस्मिन् (आणौ=सङ्ग्रामे) १ ६३.३ जलादिभि सिक्ते (पृथिवीमण्डले) २ ३४ ४ [पृची सम्पर्के (रुधा०) धातोर्वाहु० औणा० क्स प्रत्यय। पृषु सेचने (भ्वा०) धातोर्वा क्स]

पृक्षः सम्पर्का ५ ७३ ८ सम्बन्धिन (जना) ४ ४३ ५ सम्पर्चनीया (प्रजाजना) ६ ३५ ४ [पृक्ष इति व्याख्यातम्। वचनव्यत्यय]

पृक्षः सम्पर्चनीयमन्नम् ७ ३६ ५ सम्पृक्तम् (शर्ध = बलम्) २ १ ६. विद्यासम्पर्चनम् २ १ १५ पृङ्क्ते येन तत् (अ०—विद्यासम्पर्कम्) प्र०—अत्र पृचीधातो (सर्वधातुभ्योऽसुन्' वाहुलकात् सुडागमश्च १.३४ ४ सुखसम्पर्कनिमित्त विज्ञानम् १ ४७ ६ सस्पृष्टव्यमन्नादिकम् ४ २३ ९ ज्ञापयितुमिष्टमन्नम् १ १७८ ४ प्रष्टव्यम् (वपु =सुन्दर रूपम्) १ १४१ २ [पृची सम्पर्के (रुधा०) धातोरौणादिकोऽसुन् बहुलवचनाच्च सुडागम। पृक्ष इत्यन्ननाम निघ० २ ७ पृक्षे इति सग्रामनाम निघ० २ १७]

पृक्षः या पृचन्ते विद्यासम्पर्कं कुर्वन्ति ताः पुत्र्य १ ७१ ७ सम्प्राप्तव्या (इप =अन्नाद्या) ६ ६३ ७ [पृची सम्पर्के (रुधा०) धातोर्वाहु० औणा० क्स। लिङ्गवचनयोश्च व्यत्यय]

सप्रसारणं च' उ० १ १३७ सूत्रेणाजि. प्रत्यय]

पृथिम् विशालबुद्धिम् (सेनापतिम्) १ ११२.१५. [पृथ प्रक्षेपे (चुरा०) धातोर्बाहु० श्रीणा० इनि. प्रत्ययो गुणाभावश्च । प्रथ प्रख्याने (भ्वा०) धातोर्वा इन् । बहुलवचनात् सम्प्रसारणञ्च]

पृथिवि भूमिरिव पृथुविद्ये (देवि—विद्यायुक्ते पत्नि) ११ ६९ पृथुशुभगुणलक्षणे (मात —मान्यकर्त्रि जनने) १० २३ भूमिवत् क्षमाशीले (राज्ञि) ३ ५.४ ४ भूमिरिव वर्त्तमाने स्त्रि ३५ २१ विस्तीर्णा सती विशालगुणवती भूमि प्र०—अत्र पुरुषव्यत्यय १ २२ १५ विस्तृताया भूमे अ०—देवयज्ञाधिकरणाया प्र०—अत्र व्यत्यय १ २५ **पृथिवी**=भूमि ३३ ४२ अन्तरिक्षम् १ १०२ २ भूमिवद्वर्त्तमाना विदुषी स्त्री १२ ६१. विस्तीर्णा भूमि १ ८९ ४ भूमिरिव क्षमा ३ ५.४ १९ अवनिरिव (माता) १ १९१ ६ विस्तृतशीला क्षमाधारणादिशक्तिमती (स्त्री) ८ ३२ अप्रकाशगुणाना पृथिव्यादीना समूह १ २२ १३ विस्तृत (वसो=यज्ञ) १ २ पृथुसुखदात्री विद्या २ १० पृथुसुखनिमित्ता (अ०—विद्या) २ १० भूमिरिव सुखप्रदा (विदुषी प्रजापालिका राज्ञी) १३ १७ पृथुसुखकारिणी (ब्रह्मचारिणी कुमारिका) ११ ५८ विस्तीर्णा भूमि २५ १७ **पृथिवीम्**=भूमिराज्यम् ६ २ भूमि तत्स्थ पदार्थसमूह वा ५ १३ पृथिव्यादिकम् १२ ५ प्रकाशरहित भूगोलादिकम् १३ ४ भूमिमन्तरिक्ष वा ६ ४७ २९ भूमितलम् १२ ३९ विस्तीर्णाम् भा०—महतीम् (नावम्) २१ ६ प्रकाशरहित लोकलोकान्तर पदार्थ का स० प्र० ३१३ विस्तृता भूमि तत्स्थ प्राणिसमूहञ्च १ १७. विस्तृतप्रजायुक्ताम् (भूमिम्) १ २८ स्वराज्यभूमिम् १३ १९ अन्तरिक्ष भूमि वा ३.३० ११ प्र०—पृथिवीत्यन्तरिक्षनामसु पठितम् निघ० १ ३, ५ १६ अन्तरिक्षस्थानन्यारलोकान् १ ६७ ३ **पृथिव्या**=भूगर्भविद्यया १५ ६ भूम्या सह ७ १३ **पृथिव्याम्**=विस्तृताया भूमौ ५ ९ अन्तरिक्षे भूमौ वा ७.५ २ स्वराज्ययुक्ताया भूमौ १ १०० १८. बहुसुखप्रदायाम् १.२५ बहुपदार्थप्रदायाम् (भूमौ), बहुप्रजायुक्तायाम् (भूमौ) १.२६ पृथिवी मे स० वि० ९३, अथर्व० ११ ५ २६ **पृथिव्याः**=अन्तरिक्षस्याऽवकाशस्य मध्ये प्र०—पृथिवीत्यन्तरिक्षनामसु पठितम् निघ० १ ३, ४ ३० भूमेरन्तरिक्षाद्वा ६ ४७ २७ विस्तृताया भूमेः १ ८० १ भूम्यादे पदार्थमात्रस्य ७ ६० ७ विस्तृतस्याकाशस्य १ ५२ १३ भूम्यादेश्च जगत ८ ५२ पृथिवीमारभ्य प्र०—पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसङ्ख्यानम् अ० २ ३.३८ अनेन वार्तिकेन पञ्चमी १ २२.१६. प्रकाशरहितस्य पृथिव्यादेर्जगत. ३ १२. विस्तीर्णाया भूमे ३ ४ १५ भूम सकाशात् ५.१९. पृथिवीलोकस्थाऽन्तरिक्षस्थेषु पृथिवीशब्दस्य प्र०—'पृथिवीत्यन्तरिक्षनाम' निघ० १.३. पदनामसु च निघ० ५ ३ अनेन सुखपालिकेषु भोगराज्य सूचना १.३३.१०. **पृथिव्यै**- भूमिराज्याय ६.१ विस्तृतायैभूमये ६ १९ पृथिव्या प्र०—अत्र पञ्चम्यर्थे षष्ठी २३ ४३ पृथिवीसद वर्त्तमानायै स्त्रियै ४ ३ ५. भूमिराज्यप्राप्तय ३.५.२. अन्तरिक्षाय भूमेर्वा ५.५९.१ पृथिव्याम् प्र०—अत्र 'सुपा सुलुक्०' इति सप्तमी-स्थाने षष्ठी १ २६ विस्तृतायां पृथिव्यै २२.२९ पृथिवीस्थपदार्थेभ्यश्च ५ २९ [प्र: प्रख्याने (भ्वा०) धातो 'प्रथे. सिवनृप्रत्ययस्य सम्प्रसारणं च' उ० १.१५० सूत्रेण सिवनृप्रत्यय सम्प्रसारणं च। पृथिवी अन्तरिक्षनाम निघ० १ ३ पदनाम निघ० ५ ३ पृथ्वी पृथिवीनाम निघ० १.१ पृथ्वी द्यावापृथिवीनाम निघ० ३ ३० प्रथनात् पृथिवीत्याह. नि० १ १४. पृथिवी वा अन्नाना धारयित्री श० ६ १४ परिमण्डल (=गोलाकार) उ वा अयम् (पृथिवीम्—) लोक श० ७ १ १ ३७ सगुप्तो सीमा (पृथिवी) अभित पिन्वते श० ७ ४ १ ९ पृथिव्यस्यप्सु मिता तै० ३.११.१ ६ अप्रथा पृथिवी तै० स० २ १ २.३ अग्निगर्भा पृथिवी श० १४ ६ ७ २१ अयन्मयी पृथिवी गो० २ २ ९ शान्तेयी पृथिवी जै० ३ १८६. ता० १५ ४ ८ इय वा अग्निहोत्रस्य वेदि मै० १ ८ ७. इय विश्वधाया काठ० ३१ २ इय वाजस्य सर्वस्य प्रतिष्ठा श० ४ ५.२.१५. इय वै माता तै० ३.८ ९ १ श० १३ १.६ १ इय वै यज्ञायज्ञीयम् जै० १ १७३ इय वै रथन्तरम् ता० ६.८ १५ श० ५ ५ ३ ५ आधार विष्णु पृथिवीमभितो मयूरै तै० स० १ २ १३ २ पृथिव्यामिमे लोका. प्रतिष्ठिता जै० उ० १ २ ३ २]

पृथिविष्ठाः ये पृथिव्या तिष्ठन्ति ते (विद्वानो जना) ७ १८ २३ ['पृथिवी' इत्युपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क प्रत्यय । पूर्वपदस्य 'इयापो०' अ० ६ ३ ६३ सूत्रेण ह्रस्व]

पृथिविसदम् पृथिव्या गच्छन्तम् (इन्द्र=सम्राजम्) प्र०—अत्र 'इयापो सज्ञाछन्दसोर्बहुलम्' अ० ६ ३ ६३ इति पूर्वपदस्य ह्रस्व ९२ ['पृथिवी' इत्युपपदे षदॢ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्]

पृथिवी विस्तीर्णे (द्यावाक्षामा=सूर्यभूमी) ३ ८ ८ [पृथिवीति व्याख्यातम्। तत प्रथमाद्विवचनस्य पूर्वसवर्णदीर्घ]

(क्रया०) धातोर्लोट् । तप्रत्ययस्य तनवादेशश्छान्दस]

पृतनाज्ये पृतनाया सेनाया सङ्ग्रामे ३ ३७ ७ **पृतनाज्येषु**=सङ्ग्रामेषु ३ ८ १० [पृतनाज्यम्=सग्रामनाम निघ० २ १७ पृतनाज्यमिति सग्रामनाम, पृतनानाम अजनाद्वा जयनाद्वा नि० ९ २४]

पृतनायतः आत्मन पृतना सेनामिच्छत (भा०—शत्रून्) १२ ९९ **पृतनायन्तम्**=आत्मन पृतना सेनामिच्छन्तम् (मर्त्यं=मनुष्यम्) १ १६९ ७ [पृतनापदाद् आत्मन इच्छाया क्यजन्ताच्छतृ प्रत्यय । पृतना मनुष्यनाम निघ० २ ३ संग्रामनाम निघ० २ १७]

पृतनायून् पृतनासु सेनासु पूर्णमायुर्येषा तान् (अदेवान्=अविदुषो जनान्) ३ १ १६ सेना कामयमानान् (राजपुरुषान्) ७ १ १३ [पृतना-आयुपदयो समास । अथवा पृतनापदाद् आत्मन इच्छाया क्यजन्तात् 'क्याच्छन्दसि' सूत्रेण उ प्रत्यय । पृतना मनुष्यनाम निघ० २ ३]

पृतनाषहः ये पृतना शत्रुसेना सहन्ते ते (उत्तमाऽमात्या) ४ ४५ ८ [पृतनोपपदे पह मर्षणे (भ्वा०) धातो कर्त्तरि क्विप्]

पृतनाषाट् पृतना नृसेना सहते येन स (मद·=ओषधिसार) १ १७५ २ य पृतना सहते स (इन्द्र = सेनापति) १७ ३९ **पृतनाषाहम्**=य पृतना सेना सहते तम् (शुष्म=बलम्) ६ ७२ ५ [पृतनोपपदे पह मर्षणे (भ्वा०) धातो 'छन्दसि सह ' अ० ३ २ ६३ सूत्रेण ण्वि प्रत्यय]

पृतनाषाह्याय ये मनुष्या पृतना सहन्ते ते पृतना साहस्तेषु साधवे (शवसे=बलाय) १८ ६८ पृतना सह्या येन तस्मै (शवसे) ३ ३७ १ ['पृतनापाट्' इति व्याख्यातम्, तत 'तत्र साधु' रिति यत् । पृतना-सह्यपदयोर्वा समास । छान्दसो दीर्घ]

पृतनासु मनुष्येषु, प्र०—पृतना इति मनुष्यनाम, निघ० २ ३, १ १३१ ५ शूरवीर-मनुष्यसेनासु ७ ५६ २२ वीरसेनासु ३ ४९ २ राजसेनाकार्येषु ऋ० भू० १९९, ऋ० १ ८ २१ १० स्वेषा शत्रूणा वा सेनासु १ १०२ ९ **पृतनाः**=बल-सुशिक्षाऽन्विता वीरमनुष्यसेना ९ ३७ स्वसेना मनुष्यान्वा ७ २० ३ वीरसेना ३ ३४ ४ [पृतना मनुष्यनाम निघ० २ ३ सग्रामनाम निघ० २ १७ युधो वै पृतना श० ५ २ ४ १६]

पृतनाहवेषु सेनाभि प्रवृत्तेषु युद्धेषु १ १०९ ६ [पृतना-आहवपदयो. समास । आहव =आङ्पूर्वाद ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो 'आडि युद्धे' इति अप्]

पृतन्यतः आत्मन पृतनामिच्छत शत्रून् ससेनान् प्र०—पृतना-शब्दात् क्यच् 'कव्यध्वर पृतनस्यर्चि लोप' अ० ७ ४ ३९ अनेन ऋचि=ऋग्वेद एवाऽऽकारलोप' १ ८ ४ पृतना मनुष्यास्तानिवाऽऽचरत. (मनुष्या.) १ १३२ १ आत्मन पृतना सेनामिच्छन्त (शत्रून्) १८ ७० आत्मन पृतनामिच्छतो जनस्य भा०—वीरसेनस्य ११ २० [पृतनापदाद् आत्मन इच्छायामर्थे क्यजन्ताच् छतृप्रत्यय । 'कव्यध्वरपृतनस्य०' इति क्यचि आकारलोप]

पृतन्यव. युद्धायाऽऽत्मन पृतना सेनामिच्छव (भा०—शत्रव) १५ ५१ **पृतन्युम्**=पृतना सेनामिच्छतीव पृतन्यति, पृतन्यतीति पृतन्युस्तम् (वृत्रमिव शत्रुम्) प्र०—'कव्यध्वरपृतनस्यर्चि लोप अ० ७ ४ ३९, १ ३३ १२ **पृतन्यून्**=आत्मन पृतना सेनामिच्छून् (राजप्रजाजनान्) ४ २० १ [पृतनापदाद् इच्छायामर्थे क्यजन्ताद् उ प्रत्यय 'क्याच्छन्दसि' सूत्रेण । क्यचि आकारलोप 'कव्यध्वर०' इति]

पृतन्यसि आत्मन पृतना सेनामिच्छसि १ ५४ ४ **पृतन्यात्**=आत्मन पृतना सेनामिच्छेत् ८ ५३ [पृतनापदाद आत्मन इच्छायामर्थे क्यजन्ताल् लट् । अन्यत्र लिङ्]

पृत्सु सङ्ग्रामेषु प्र०—पृत्सिवति सङ्ग्रामनामसु पठितम् निघ० २ १७, ६ २९ पृतनासु प्र०—पदादिषु मास्पृत्स्नूनामुपसङ्ख्यानम् अ० ६ १ १६३ इति वार्त्तिकेन पृतना-शब्दस्य पृदादेश १ ६४ १४ स्पर्द्धमानेषु सङ्ग्रामेषु ३ ४९ ३ वीरमनुष्यसेनासु ६ ४४ १८ [पृत्सु इति सग्रामनाम निघ० २ १७ पृतनाप्राति० सप्तमीबहुवचने परे 'पदादिषु मास्पृत्स्नूनामुपसख्यानम्' अ० ६ १ ६३ वा० सूत्रेण पृतनास्थाने पृदादेश]

पृत्सुतिः वीरसेना १ १६९ २ **पृत्सुतीः**=या सम्पर्ककारकाणा सुतय ऐश्वर्यप्रापिका सेनास्ता प्र०—अत्र पृची धातो क्विपि वर्णव्यत्ययेन तकार, तदुपपदादैश्वर्यार्थात् सु-धातो सज्ञाया क्तिच् प्रत्यय १ ११० ७]

पृत्सुतूर्षु पृत्सु पृतनासु सेनासु त्वरमाणेषु हिसकेषु (शत्रुषु) ३ ३७ ७ [पृतना-तूर्पदयो समासे पूर्वपदस्य पृदादेश सप्तम्याश्चालुक् । तूर्=त्वरा सम्भ्रमे (भ्वा०) धातो कर्त्तरि क्विपि 'ज्वरत्वर०' इति वकारस्योपधायाश्च स्थाने ऊठ्]

पृथक् विभागेन ऋ० भू० १५८, १२ ६७ [पृथक्= प्रथते नि० २ ५ प्रथ प्रख्याने (भ्वा०) धातो 'प्रथे कित्

पृथ्वीः=भूमीः ७ ३४ ३. [प्रथ प्रख्याने (भ्वा०) धातो 'प्रथे पिवन्पवन्प्वन् सप्रसारण च' उ० १ १५० सूत्रेण प्वन्प्रत्यय सम्प्रसारणञ्च]

पृथ्वी विस्तीर्णे (द्यावापृथिवी=भूमिसूर्यौ) ६.७० १ भूम्यन्तरिक्षे ४ २३ १० पृथ्वीति व्याख्यातम्। तत प्रथमाद्विवचनस्य पूर्वसवर्णदीर्घ]

पृदाकुः मूढवदभिमानी व्याधवद्वा हिंसक (विद्वज्जन) ६ १२ कुत्सितवाक् (अहि=विषधर) ८ २३ सर्प्प २४ ३३ [पर्द कुत्सिते शब्दे (भ्वा०) धातो 'पर्देर्नित् सम्प्रसारणमलोपश्च' उ० ३ ८० सूत्रेण काकु प्रत्यय सम्प्रसारणमकारलोपश्च]

पृशनायुवः आत्मन स्पर्शमिच्छन्त्य (धेनव=किरणा गावो वाचो वा) प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति सलोप १ ८४ ११ [पृशनपदाद् आत्मन इच्छाया क्यजन्ताद् उ प्रत्यय। स्त्रियामूङ्। पृशनम्=स्पृश सस्पर्शने (तुदा०) धातोश्छान्दस रूपम्]

पृशन्यः पर्शिता (देव=सूर्य) १ ७१ ५

पृश्नयः प्रष्टव्या (पशव) २४ १४ विचित्रचिह्ना (प्राणिन) २४ १५ या स्पृशन्ति ता (धेनव=किरणा गावो वाचो वा) प्र०—अत्र 'घृणिपृश्नि०' उ० ४ ५४ अनेनाऽय निपातित १ ८४ ११ सुपर्णास्तन्वङ्ग्य (भा०—स्वमदृश्य रूपगुणसम्पन्ना स्त्रिय) प्र०—अत्र स्पृशधातोर्नि प्रत्यय सलोपश्च १२ ५५ प्रष्ठ्य (विश=प्रजा) १५ ६०. **पृश्निम्**=सूर्यम् १ १६० ३ अन्तरिक्षम् ५ ५२.१६ आकाशम् १ १६४ ४३ **पृश्निः**=स्पर्ष्टव्य (पशु पक्षी वा) २४ ४ अन्तरिक्षमवकाश ७ ३५ १३ अन्तरिक्षमिव गम्भीराशयोऽक्षोभ. (धीर=मेधावी विद्वान्) ७ ५६ ४ अन्तरिक्षमिव बुद्धि ५ ६० ५ विचित्रवर्ण सूर्य १७ ६० अन्तरिक्षस्था (यज्ञे कृताऽऽहुति) प्र०—पृश्निरिति साधारणनामसु पठितम् निघ० १ ४, २ १६ आदित्य इव १ १६८ ९ अन्तरिक्षे प्र०—अत्र 'सुपा सुलुक्०' सप्तम्येकवचने प्रथमैकवचनम् ३ ६ जल के सहित सूर्य स० प्र० ३१३, ३ ६ **पृश्नेः**=अन्तरिक्षस्य मध्ये ६ ६ ४ [पृश्निरिति पृश्निगर्भा पदे द्रष्टव्यम् अन्न वै देवा पृश्नीति वदन्ति ता० १२ १० २४ अन्न वै पृश्नि श० ८ ७ ३ २१ द्यु (पृथिवी) वै पृश्नि तै० १.४.१ ५ त्रय पृश्नय सर्वदेवत्या काठ० ४९ १०. पृश्नयो मारुता मै० ३ १३ १२ पृश्नियै पयसो मरुतो जाता तै० स० २ २ ११ ४ पृश्नियै प्रियङ्गव तै० स० २ २ ११ ४ वाग्वै पृश्नि काठ० ३४ १ व्याघ्रम्प वै पृश्नि मै ४ २.२४ यत् पृश्निस्तेन मारुत तै० स० २ १ ३.३ मारुती पृश्नि पष्ठौही गर्भिणी मै० २ ६ १३]

पृश्निगर्भाः पृश्निमन्तरिक्ष गर्भो येषा ते पृश्निगर्भा (लोका) ७ १६ [पृश्नि-गर्भपदयो समास। पृश्नि=स्पृश सस्पर्शने (तुदा०) धातो 'घृणिपृश्नि०' उ० ४ ५२. सूत्रेण नि प्रत्यय सलोपश्च निपात्यते। पृश्नि साधारणनाम निघ० १ ४ पृश्निगर्भाः प्राप्तवर्णगर्भा आप इति वा नि० १० ३९ पृश्निरादित्यो भवति प्राञ्नुत एन वर्ण इति नैरुक्ता सस्पृष्टा रसान्। सम्पृष्टा भास ज्योतिषा सस्पृष्टो भासेति वा। अथ द्यौ सस्पृष्टा ज्योतिर्भि पुण्यकृद्भिश्च नि० २ १४]

पृश्निगावः पृश्निवदन्तरिक्षवद् गावो येषान्ते (नियत=निश्चिद्गतयो वायव) ७ १८ १० [पृश्निगोपदयो समास। पृश्निपदं व्याख्यातम्]

पृश्निगुम् अन्तरिक्षे गन्तारम् (यानम्) १ ११२ ७ [पृश्निपद व्याख्यातम्। तदुपपदे गम्लृ गतौ (भ्वा०) धातो 'डुप्रकरणे मितद्वादिभ्य उपसख्यानम्' अ० ३ २.१८० वा० सूत्रेण डु प्रत्यय]

पृश्निनिप्रेषितासः पृश्नावन्तरिक्षे नितरा प्रेषिता यैस्ते (नियत.=निश्चिद्गतयो वायव) ७ १८ १० [पृश्निनिप्रेषितपदयो. समासे जसोऽमुगागम। निप्रेषित=नि+प्र+इष गतौ (दिवा०) धातोः क्त]

पृश्निमातरः पृश्निराकाशमन्तरिक्ष मातोत्पत्तिनिमित्त येषा ते (मरुत=शिरपव्यवहारप्रापका वायव) प्र०—पृश्निरिति साधारणनामसु पठितम् निघ० १ ४, १ २३ १० आकाशादुत्पद्यमाना (मरुत=वायव) उव १.८९ ७ पृश्निरन्तरिक्ष माता येषा वायूना त इव १ ८५ २ अन्तरिक्षमातर (वायव) ५ ५७.३ [पृश्नि-मातृपदयो समास। पृश्निरिति व्याख्यातम्। पृश्निमातरो हि मरुत मै० २ ५ ७ मरुत पृश्निमातर इति वा आहु जै० २ १७६]

पृश्न्याः अन्तरिक्षे भवा सृष्टय ६ ४८ २२ पृश्नावन्तरिक्षे भवम् (ऊध.=पयोऽधिकरणम्) २ ३४ १० अन्तरिक्षस्य मध्ये २ २ ४ [पृश्निप्राति० भवार्थे यत्। पृश्निरिति व्याख्यातम्]

पृषतः स्थूलान् (पदार्थान्) २४ ११ मृगविशेष २४ ४० [पृषु सेचने (भ्वा०) धातो 'वर्त्तमाने पृषद्बृहन्०' उ० २ ८४ सूत्रेण अतिप्रत्यय शतृवच्च कार्यम्]

पृषतान् मृगविशेषान् २४ २७ [पृषु सेचने (भ्वा०)

पृथिवीद्यावा भूमिविद्युतौ ३ ४६.५

पृथु विस्तीर्णम् (ऋय =तेज) प्र०—'प्रथिम्रदिभ्रस्जा सम्प्रसारणं सलोपश्च' उ० १ २८ इति प्रथधातो कु प्रत्यय सम्प्रसारणञ्च १.१०१७ विस्तीर्ण प्रख्यात वा (सद्म=गृहम्) ५ ८७७ सर्वर्त्तुस्थानाऽवकाशयोगेन विशालम् (छर्दि =गृहम्) १ ४८ ५ नानाविद्यासु विस्तीर्णम् (श्रव =सुवर्णादिधनम्) १ ६ ७ अतिविस्तीर्णम् (यान= रथ) ऋ० भू० १६६ **पृथूनि**=विस्तीर्णानि (सुखानि) ६ ६ २ [पथ प्रख्याने (भ्वा०) धातो 'प्रथिम्रदिभ्रस्जा सम्प्रसारणम्०' उ० १ २८ सूत्रेण कु प्रत्यय सम्प्रसारणञ्च। पृथु महान्तं लोकम् नि० १२ २२]

पृथुः विस्तृतमुख (अर्वा=विज्ञानयुक्त पुत्र) ११ ४४ विस्तीर्णपुरुषार्थ (अग्नि =राजा) ४ २ १३ अतीव विस्तृतो व्यापक परमेश्वर ऋ० भू० १६२, अथर्व० १३ ४ ५२ विस्तीर्णबल (इन्द्र विद्याप्रकाशको राजा) २ २१ ४ महान् (अग्नि =विद्युत्) १० २६ **पृथू**=विस्तीर्णौ (गभस्ती= हस्तौ) ६ १६ ३ [पृथुरिति व्याख्यातम्। अदो वै पृथु यस्मिन् देवा श० १ ४.१ २७ श्रोत्र वै पृथु श्रवाय्यम् श० १ ४ ३ ४]

पृथुज्रयम् विस्तीर्णं बहुगतिम् (रथ=रमणीय यानम्) ४ ४४ १ **पृथुज्रयाः**=पृथुस्तीव्रो ज्रयो वेगो यस्य स (सर्वबलाध्यक्षो राजा) ३ ४६ २ [पृथु-ज्रयपदयो समास । पृथुरिति व्याख्यातम् । ज्रय =जि अभिभवे (भ्वा०) धातोरच्प्रत्यय । अन्यत्र औणादिकोऽसुन्। पृथुज्रया पृथुजव नि० ५ ६]

पृथुज्रयी बहुवेगा (असुर्येव=असुषु प्राणेषु भवा विद्युदिव) १ १६८ ७ [पृथुज्रय व्याख्यातम्। तत स्त्रिया ङीप् गौरादित्वात्]

पृथुपाजसः बहुबला (अश्वा =व्याप्ता किरणा) ३.६१ २ **पृथुपाजसा**=विस्तीर्णबलेन (रथेन=रमणीयेन यानेन) ४.४६ ५. **पृथुपाजसे**=बलाबलाय (गातवे= स्तावकाय जनाय) ३ ३ १ **पृथुपाजाः**=बृहद्-बल (विप्र =मेधाविजन) ३ ५ १ विस्तीर्णबल (अग्नि = वह्नि) ३ २ ११ पृथु विस्तीर्णं पाजो बल यस्य स (अग्नि =वह्नि) ३ २७ ५ [पृथु-पाजस्पदयो समास । पाज =अन्ननाम निघ० २ ७ बलनाम निघ० २ ६ पा रक्षणे (अदा०) धातो 'पातेर्बले जुट् च' उ० ४ २०३. सूत्रेण असुन्]

पृथुपाणिः पृथवो विस्तीर्णा पाणिरिव किरणा यस्य स (सविता=जगदीश्वर) २.३८ २ [पृथु-पाणिपदयो समास । पाणि =पण व्यवहारे स्तुतौ च (भ्वा०) धातो 'अशिपणायोरुडाय्यलुकौ च' उ० ४ १३३ सूत्रेण इण् आयप्रत्ययस्य च लुक्]

पृथुप्रगाणम् पृथूनि प्रकृष्टानि गानानि स्तवनानि यस्मिँस्तम् (अ०—स्वस्वभावाख्य गृहम्) ३.५ ७ [पृथु-प्रगानपदयो समास]

पृथुप्रगामा पृथुभिर्विरतृतैर्यानैः प्रकृष्टो गामो गमन यस्य स (सूनु =कार्यकारी सन्तान) प्र०—अत्र 'सुपा सुलुक्०' इति विभक्तेराकारादेश १ २७ २ [पृथु-प्रगामपदयो समास । विभक्तेराकारादेशश्छान्दस । प्रगाम = प्र+गम्लृ गतौ (भ्वा०) धातोर्घञ्]

पृथुबुध्नः पृथु विस्तीर्णं बुध्नमन्तरिक्ष निवासार्थं यस्य स (मेघ) प्र०—बुध्नमन्तरिक्ष बद्धा अस्मिन् धृता आप इति नि० १० ४४, १ १४ विस्तीर्ण-प्रबन्ध (अग्नि = विद्वान् जन) ४ २ ५ पृथु महद् बुध्न मूल यस्य स (ग्रावा=पाषाण) १ २८ १ [पृथु-बुध्नपदयो समास । बुध्न =बन्धबन्धने (क्र्या०) धातो 'बन्धे ब्रधिबुधी च' उ० ३ ५ सूत्रेण नक् प्रत्ययो धातोश्च बुधादेश । बुध्नमन्तरिक्ष बद्धा अस्मिन् धृता आप इति वा । इदमपीतरद् बुध्नमेतस्मादेव बद्धा अस्मिन् धृता प्राणा इति नि० १० ४४]

पृथुबुध्नासः विस्तीर्णाऽन्तरिक्षा (अ०—जनास्त्रियश्च) १ १६६ ६ [पृथुबुध्न इति व्याख्यातम्। ततो जसोऽमुगागम]

पृथुयामन् बहुप्रापक (ऋष्वे=महागुणयुक्त विद्वज्जन) ६ ६४ ४ [पृथूपपदे या प्रापणे (अदा०) धातोर्मनिन्-प्रत्यय]

पृथुश्रवसः पृथूनि विस्तृतानि श्रवास्यन्नानि यासा ता (अरातीः =शत्रुसेना) १ ११६ २१ [पृथु-श्रवस्पदयो समास । श्रवस्=अन्ननाम निघ० २ ७ धननाम निघ० २ १०]

पृथुष्टुके पृथुविस्तीर्णा ष्टुका स्तुति केशभार कामो वा यस्या तत्सम्बुद्धौ, महास्तुते, पृथुकेशभारे, पृथुकामे वा (देवि=कुमारि) ३४ १० विस्तीर्णजघने (सिनीवालि= विद्वत्कुलस्य कन्ये) २ ३२ ६ [पृथु-ष्टुकापदयो समास । ष्टुका=स्त्यै सघाते (भ्वा०) धातोरौणादिको डुकन्-प्रत्यय.। पृथुष्टुके पृथुजघने, स्तुक स्त्यायते सघात पृथुकेशस्तुके पृथुस्तुके वा नि० ११ ३२]

पृथ्वी भूमि १ ६५ ३ **पृथ्वीम्**=भूमिम् १३ ६

१० १६ **पृष्ठे**=उपरि अ०—पृष्ठोपरि ३ ५ परभागे १ १६४ १० पश्चाद्भागे २६ ४२ ज्ञीप्सिते (लोके=द्रष्टव्ये स्थाने) १५ ५० सेचके भागे १५ ११ तले १३ २४ [पृष्ठ स्पृशते सस्पृष्टमङ्गै नि० ४ ३ स्पृश सस्पर्शने (तुदा०) धातो 'तिथपृष्ठगूढयूथप्रोथ' उ० २ १२ सूत्रेण थक्प्रत्यय आदे सकारस्य च लोपो निपात्यते। प्रच्छ ज्ञीप्सायाम् (तुदा०) धातोर्वा रूपम्। पृपु सेचने (भ्वा०) धातोर्वा रूपम्। पृष्ठानि=पृष्ठैर्वै देवा स्वर्गं लोकमस्पृक्षन् कौ० २४ ८ स्वर्गो लोक पृष्ठानि ता० १६ १५ ६ तदाहुर्नाना लोकानि पृष्ठानि ता० १६ १५ ६ एतानि खलु वै सामानि यत्पृष्ठानि तै० १ ८ ८ ३ स्वराणि पृष्ठानि भवन्ति कौ० २४ ८ सर्वाणि हि पृष्ठानीन्द्रस्य निष्केवल्यानि ता० ७ ८ ५. पिता वै वामदेव्य पुत्रा पृष्ठानि ता० ७ ६.१ आत्मा वै पृष्ठानि कौ० २५ १२ ऋतवो वै पृष्ठानि श० १३ ३ २ १ सप्त पृष्ठानि श० ६ ५ २ ८ अन्न पशव पृष्ठानि ता० १६ १५ ८ वीर्यं वै पृष्ठानि ता० ४ ८ ७ तेजो ब्रह्मवर्च्चस श्रीर्वै पृष्ठानि ऐ० ६ ५ एषा ह वा उत्तरावती श्रीर्यत्-पृष्ठानि जै० २ ४२५ ऐन्द्राणि पृष्ठानि काठ० ३४ १६ ओज एव वीर्य पृष्ठानि तै० स० ७ ३ ५ ३ चक्रियौ पृष्ठानि मै० ४ ७ ३ पृष्ठानि वै यज्ञस्य दोह काठ० ३३ ८ यज्ञो वै पृष्ठानि काठ० ३२ ६]

पृष्ठयज्वने य पृष्ठेन यजति तस्मै (विदुषे जनाय) ५.५४.१ [पृष्ठ-यज्वन्पदयो समास। यज्वन्=यज देव-पूजादिषु (भ्वा०) धातो 'सुयजोर्ङ्वनिप्' अ० ३ २ १०३ सूत्रेण ङ्वनिप्प्रत्यय]

पृष्ठीः पृष्ठदेश पश्चाद्भाग प्र०—अत्र 'सुपा सुलुक्०' इति सो स्थाने सु २० ८

पृष्ठेव पृष्ठानीव ४ २ ११ [पृष्ठा-इव पदयो समास। पृष्ठा=पृष्ठप्राति० शेर्लोपश्छन्दसि]

पृष्ठ्येन पश्चाद्भवेन सुखेन ४ २० ४ पृष्ठे भवेन दिनेन ४ ३ १० [पृष्ठप्राति० भवार्थे यत्। पृष्ठमिति व्याख्यातम्। पृष्ठ्य =(आङ्गिरसा) सर्वे पृष्ठ्यै स्वर्ग लोकमभ्यस्पशन्त यदभ्यस्पशन्त तस्मात् स्पश्यस्तं वा एत स्पश्य सन्त पृष्ठ्य इत्याचक्षते परोक्षेण गो० पू० ४ २३ पिता वा अभिप्लव पुत्र पृष्ठ्य गो० पू० ४ १६ पृष्ठ्यानि—श्री पृष्ठ्यानि कौ० २१ ५ पशव पृष्ठ्यानि कौ० २१ ५]

पेचे पचति ४ १८ १३ [डुपचप् पाके (भ्वा०) धातोर्लिट्]

पेतथुः पतेतम् १.१८२ ५ [पत्लृ गतौ (भ्वा०) धातोर्लिट्]

पेत्वः पतनशील (कृष्ण पशु) २६ ५८ शीघ्रगामी (पशु) २६ ५६ **पेत्वेन**=प्रापणेन ७ १८ १७ [पत्लृ गतौ (भ्वा०) धातो पा पाने (भ्वा०) धातोर्वा 'अन्येऽपि दृश्यन्ते' उ० ४ १०५ सूत्रेण उत्वन्। पतते तस्य लोप]

पेदवे गमनाय प्र०—अत्र पद-धातोरौणादिक उ० प्रत्यय वर्णव्यत्ययेनाकारस्य एकारश्च १ ११७ ६ प्राप्तु गन्तु वा १ ११६ १०. गमनाऽऽगमनाय १ ११८ ६ परमोत्तमव्यवहारसिद्धि-प्रापणाय ऋ० भू० १६६ [पद गतौ (दिवा०) धातोरौणादिक उ प्रत्यय। धातोरकारस्य एकारो वर्णव्यत्ययेन]

पेयाः पिवे ५ २६ ३ [पा पाने (भ्वा०) धातोर्लिङ्]

पेरुके पालके (कर्मणि) ६ ६३ ६ [पेरुप्राति० स्वार्थे कन्। पेरुरिति व्याख्यास्यते]

पेरुम् पूरकम् (स्तुत्य जनम्) ५ ८४ २ **पेरुः**=पाता (विद्वज्जन) १ १५८ ३ पारयिता (नपात्=नौ) ७ ३५ १३ रक्षक (शिष्यो जन) ६.१० [पीङ् पाने (दिवा०) धातो 'मीपीभ्या रु' उ० ४ १०१ सूत्रेण रु प्रत्यय। पॄ पालनपूरणयो (जु०) धातोर्वा रु प्रत्यय। धातोर्गुणे रपरत्वे च अकारस्य एकारादेशो वर्णव्यत्ययेन]

पेशलम् उत्तमाऽङ्गवत् (वपु=शरीरमुदक वा) १६ ८३ [पिश अवयवे (तुदा०) धातोरौणादिक कल् प्रत्यय]

पेशसा रूपेण २० ४१ **पेशः**=रूपम् १६ ८६ सुरूपम् ७.४२ १ सुन्दर रूप हिरण्यञ्च प्र०—पेश इति रूपनाम निघं० ३ ७ हिरण्यनाम निघ० १ २, ४ ३६.७ हिरण्यादिधनम् श्रेष्ठ रूप वा १ ६ ३ **पेशांसि**=रूपाणि १ ६२ ४ [पेश रूपनाम निघ० ३ ७ हिरण्यनाम निघ० १.२ पेश इति रूपनाम पिंशतेर्विपिशित भवति नि० ८ ११]

पेशस्कारीम् रूपकर्त्रीम् (व्यभिचारिणी स्त्रीम्) ३० ६ [पेशस् उपपदे डुकृञ् करणे (तना०) धातोरण्। तत स्त्रिया ङीप्। पेशस् व्याख्यातम्]

पेशस्वतीः प्रशस्तसुरूपवती (त्रिविधा वाच) २८ ३१ [पेशस्प्राति० प्रशसाया मतुवन्तात् ङीप्]

पेशितारम् विद्याऽवयवेत्तारम् भा०—विद्यान्याय-प्रकाशकम् (पुरुषम्) [पिश अवयवे (तुदा०) धातो कर्त्तरि तृच्]

धातो 'पृपिरञ्जिभ्या कित्' उ० ३ १११ सूत्रेण अतच् किच्च । पृपतो वैश्वदेव काठ० ४७ ७]

पृषती अङ्गै सुसिक्ता (पशु-जाति) २४२ **पृषतीभिः**=स्वगमनागमनवेगादिगुणै १ ६४ ८ मरुद्गतिभि २ ३६ २ वेगादिभि ५ ५८ ६ वायुगतिसदृशगतिविशिष्टाभिर्धाराभि २ ३४ ३ पर्पन्ति सिञ्चन्ति धर्मवृक्ष याभिरद्भि १ ३७ २ **पृषतीषु**=सेचनकर्त्रीपु (भा०—उत्तमासु विद्यासु) ५ ६० २ **पृषतीः**=अग्निवायुयुक्ता अप १ ८५ ५ मरुत्सम्बन्धिनीरप १ ८५ ४ सेचननिमित्ता गती ३ २६ ४ सेचनकर्त्रीरुदकधारा ५ ५७ ३ वायुजलगती ५ ५५ ६ पर्पन्ति सिञ्चन्ति याभिर्नाडीभिर्नदीभिस्ता (अ०—नाडी-र्नदीर्वा) २ १६ पर्पन्ति सिञ्चन्ति याभिस्ता शीघ्रगती मरुता धारणवेगादयोऽश्वा प्र०—पृपत्यो मरुतामित्या-दिष्टोपयोजननामसु पठितम् निघ० १ १५, १ ३९ ६ [पृपदिति शत्रन्त व्याख्यातम् । तत स्त्रिया ङीप् । पृपती गौर्धेनुर्दक्षिणा, सा हि वैश्वदेवी मै० २ ३ २ वैश्वदेवी हि पृपती काठ० १२ २]

पृषती सेक्तारौ जलगुणौ १ १६२ २१ स्थूलौ (हरी=हरणशीलावश्वौ) २५ ४४ [पृपदिति व्याख्यातम् । ततो नपुसके प्रथमाद्विवचने रूपम् । लिङ्गव्यत्यय]

पृषदश्वः पृपदिव वेगवन्तस्तुरङ्गा यस्य स (सेना-पति) १ ८७ ४ **पृषदश्वान्**=सिञ्चकानाशुगामिन पदार्थान् वा ५ ४२ १५ **पृषदश्वाः**=सिक्तजलाग्निनाऽऽशु-गामिनो महान्त (मरुत =विद्वासो मनुष्या) ७ ४० ३ पृषत पुष्ट्यादिना ससिक्ताऽङ्गा अश्वा येपान्ते (मरुत = मनुष्या) २५ २० सेनाया पृपन्तोऽश्वा येपान्ते (देवा = विद्वज्जना) १ ८९ ७ [पृपद्-अश्वपदयो समास । पृपदिति व्याख्यातम्]

पृषदश्वासः पृषत स्थूला सिञ्चिता अश्वा यैस्ते (प्राज्ञा राजजना) २ ३४ ४ पृपत पृष्टा पुष्टा अश्वा येषान्ते (देवा =विद्वज्जना) १ १८६ ८ पृषत सेचका अश्वा वेगादयो गुणा येपु ते (गन्तार =वायव) ३ २६ ६ [पृपद्-अश्वपदयो समासे जसोऽसुगागम । पृपदिति व्याख्यातम्]

पृषदाज्यम् दध्याज्यादिभोज्य वस्तु ३१ ६ पर्षन्ति सिञ्चन्ति क्षुन्निवृत्त्यादिकारकमन्नादि वस्तु यस्मिँस्तत् पृपच्चा-ऽऽज्य घृत मधुदुग्धादिकञ्च तत् (भक्ष्याऽन्नोपलक्षण वस्तु) ऋ० भू० १२३, ३१ ६ [पृपद्-आज्यपदयो समास । पृप-दिति व्याख्यातम् । आज्यम्=आङ् पूर्वादञ्जे सज्ञायामुप-सख्यानम्' अ० ३ १ १०९ वा० सूत्रेण अञ्जेराङ्पूर्वात् क्यप् । अन्न हि पृपदाज्यम् श० ३ ८ ४ ८ प्राणो हि पृष-दाज्यम् श० ३ ८ ४ ८ पय पृषदाज्यम् श० ३ ८ ४ ८ पशवो वै पृपदाज्यम् तै० १ ६ ३ २ प्राणापानौ वै पृप-दाज्यम् मै० ३ १० २ ४ प्राणापानौ वा एतौ पशूना यत् पृपदाज्यम् तै० स० ६ ३ ९ ६ ऐन्द्राग्न पृपदाज्य देवतया काठ० ३६ २]

पृषद्योनिः स्पृपतिर्वृष्टिर्योनिर्यस्या सा (गी =वाक्) ५ ४२ १ [पृपद्-योनिपदयो समास । पृपद् इति व्याख्या-तम् । योनि =यु मिश्रणेऽमिश्रणे च (अ०) धातो 'वहि-श्रिश्रुयुद्रु०' उ० ४ ५१ सूत्रेण नि प्रत्यय । योनि = परियुतो भवति नि० २ ८]

पृषद्वत् सेचकवत् ७ २ ४ [पृपत्प्राति० तुल्यार्थे वति । पृपदिति व्याख्यातम्]

पृषन्तम् विद्यादिशुभगुणान् सिञ्चन्तम् (जनम्) ४ ५० २ **पृषन्तः**=स्थूलाऽङ्गा (त्रैयम्बका =गवादय) २४ १८ [पृपु सेचने (भ्वा०) धातोरौणादिकोऽति प्रत्यय शतृवच्च]

पृष्टबन्धो य पृष्टान् जनानुत्तरेपु बध्नाति तत्सम्बुद्धौ [अग्ने=प्रकाशात्मन् विद्वन्) ३ २० ३ [पृष्ट-बन्धुपदयो समास । पृष्ट =प्रच्छ ज्ञीप्सायाम् (तुदा०) धातो क्त]

पृष्टः विदुष प्रति य पृच्छ्यते प्रष्टव्यो वा स (अग्नि =विज्ञानस्वरूप ईश्वर विद्युदग्निर्वा) १ ९८ २ सिक्त स्थित (अग्नि =सूर्य) ३३ ९२ प्रष्टु योग्य (रथ =रमणीय यानम्) ३ ४९ ४ ज्ञातुमिष्ट (अग्नि = प्रसिद्ध पावक) १८ ७३ [प्रच्छ ज्ञीप्सायाम् (तुदा०) धातो क्त]

पृष्ट्यामयी पृष्टौ पृष्ठ आमय क्लेशरूपो रोगो विद्यते यस्य स (विद्वज्जन) १ १०५ १८ [पृष्ट्यामयी= पृष्ठरोगी नि० ५ २१]

पृष्ठम् ज्ञीप्सितम् (स्व =सुखम्) १७ ६५ उपरि-भागम् १ १६६ ५ भूम्याद्यधिकरणम् ऋ० भू० १५४ अर्वाग् व्यवहार ११ २० पृथिवी आदि सब लोक का आधार आर्याभि० २ १३, १८ २९ परभागम् (नाक= मोक्षसुखम्) ३ २ १२ ज्ञातुमिच्छा १८ २९ प्रश्न शिष्ट च २२ ३३ प्रच्छनीयम् (धनम्) ४ ५ ६ पश्चाद्-भागम् १ ११५ ३ प्रच्छन्नम् ९ २१ पृष्ठभागम् १ ५८ २. आधा-रम् २३ ५० अधिकरणम् (समुद्रम्=अन्तरिक्षमिव सागरम्) १३ २ **पृष्ठात्**=समीपात् १७ ६७ उपरिभागात्

पुम्पाणां समूहे साध्य (स्त्रिय) २१४३ [पौरुषेय इति व्याख्यातम्। तत स्त्रिया 'टिड्ढाणञ्०' इति ङीप्]

पौल्कसम् पुक्कसस्याऽऽत्यजस्याऽपत्यम् प्र०—अत्र पृषोदरादित्वादभीष्टसिद्धि ३० १७

पौष्णः पूष्ण पृथिव्या अय सम्बन्धी (प्रजापति = जीव) ३६५ पूषदेवताका (श्याम पशु) २६५८ **पौष्णाः**=पुष्टिनिमित्तमेघदेवताका (श्यामा पशव) २४७ पुष्टिकरमेघदेवताका (श्यामा पशव) २४.१४ पुष्टिकर-सम्बन्धिन (कुलुङ्गाऽज-नकुलादय) २४३२ **पौष्णी**=पूषदैवत्यी (पिङ्गा=पीतवर्णा पशू) २६५६ [पूषन् इति व्याख्यातम्। तत 'माम्य देवता' इत्यण्-प्रत्यये 'अन्' अ० ६४१६७ सूत्रेण प्रकृतिभावे प्राप्ते 'पपूर्वहन्धृत-राज्ञामणि' अ० ६४१३५ सूत्रेणाकारलोप.]

पौंस्यम् पुसु साधु (बलम्) ४.३० २३. पुभ्यो हितम् (वीर्यं=पराक्रमम्) ४३०८ पुरुषार्थम् २१३१० पुरुषार्थस्य भावम् ११५५४ पुसो भावम् ११५५३ पुसो भाव कर्म बल वा १८०१० पुरुषार्थयुक्त बलम् १.१०१३ **पौंस्यानि**=वचनानि ६३६.३ **पौंस्याय**=पुसु भवाय बलाय ७३०१ **पौंस्ये**=पुसो भवे यौवने १५६३ [पौंस्यानि बलनाम निघ० २६ पौंस्ये सग्राम-नाम निघ० २१७ पुसःप्राति० भावे कर्मणि वा ष्यञ् प्रत्यय। अथवा हितार्थे साध्वर्थे भवार्थे वा यत् छान्दस]

पौंस्या पुभ्यो हितानि बलानि ४३२११ पुसो बलानि प्र०—पौंस्यानीति बलनामसु पठितम् निघ० २.६ 'शेर्लुगत्र १५६ पुसामिमानि बलानि ५५६४ पुरुषार्थ-जानि बलानि ६४६७ पुसु साधूनि बलानि ११३६८ पौंस्यमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

पौंस्येभिः उत्कृष्टै शरीरात्मबलै ११००१० पुरुषार्थै ११६५७ [पौंस्यमिति व्याख्यातम्, तत 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

प्यायताम् सर्वतो वर्धताम् ३८१८ वर्धयताम्, प्र०—अत्राऽन्तर्गतो ण्यर्थ ५.७ **प्यायध्वम्**=आप्यायामहे वा प्र०—अत्र पक्षे व्यत्यय ११ **प्यायन्ताम्**=पुष्टा भवन्तु १६३१२ **प्यायय**=वर्धय वर्धयति वा ५७ **प्यायस्व**=पुपाण ३८२१ प्यायते वा २१४ वर्धस्व वर्धयेद् वा ५७ [ओप्यायी वृद्धौ (भ्वा०) धातोर्लोट्]

प्यासिषीमहि स्तुवीमहि प्र०—अत्र 'प्यैङ् स्तुतौ' धातो 'सिवुत्सर्गश्छन्दसि' अ० ३१३४ अनेन वार्त्तिकेन सिप् प्रत्यय २१४ सर्वतो वर्द्धेमहि ३८२१ [प्यैङ् वृद्धौ (भ्वा०) धातोर्लिङ्। सिव्विकरणश्छान्दस]

प्र प्रकृष्टार्थे क्रियायोगे १ १०.११ गुणैर्यत्प्रकृष्ट तदर्थे क्रियायोगे २११ अत्यन्तम् ८३ प्रगत १०३० प्रकृष्ट-तया २.१५ प्रकृष्टम् २१२ प्रयत्नेन १७३६ अधिक आर्याभि० २११, ३४३६ [आ इत्यर्वागर्थे, प्र परेत्यस्य प्रातिलोम्यम् नि० १३ प्रेव नव्यसि पराचीव नव्यसि नि० ६२८ अन्तरिक्ष वै प्र ऐ० २४१ प्राणो वै प्र ऐ० २४०]

प्रउगम् प्रयोगार्हम् (उक्थ्यम्=उपदेष्टु योग्य वचनम्) १५११ [प्राणा प्रउगम् कौ० १४४ आति-च्छन्दस प्रउग कौ० २३६ ग्रहोक्थ वा एतद्यत्प्रउगम् ऐ० ३१]

प्रकङ्कताः प्रकृष्टपीडाप्रदाश्चञ्चला (सर्पादय) ११६१८ [प्र-कङ्कतपदयो समास। कङ्कतम्=ककि गतौ (भ्वा०) धातोर्बाहु० ऑणादिकोऽतच्]

प्रकरत् प्रकृष्टतया कुर्यात ४२६३ [प्र+डुकृञ् करणे (तना०) धातोर्लृङ्। 'कृमृदृरुहिभ्य ०' इति च्ले स्थानेऽङ्]

प्रकरितारम् विक्षेप्तारम् (पुरुषम्) ३०१२ [प्र+कृ विक्षेपे (तुदा०) धातो कर्त्तरि तृच्]

प्रकलवित् य प्रकृष्ट कलन सङ्ख्या वेत्ति स (इन्द्र=राजा) ७१८१५ [प्रकलोपपदे विद ज्ञाने (अदा०) धातो कर्त्तरि क्विप्। प्रकलविद् वणिग् भवति, कलाश्च वेद प्रकलाश्च नि० ६६]

प्रकामाय प्रकृष्टकामनासिद्धये ३०१२ [प्र-काम-पदयो समास। काम=कमु कान्तौ (भ्वा०) धातोर्घञ्]

प्रकामोद्याय य प्रकृष्टै कामैरुद्यतस्तस्मै (पुरुषाय) ३०६

प्रकुपितान् प्रकोपयुक्तान् शत्रूनिव वर्त्तमानान् (पर्वतान्=मेघान्) २१२२ [प्र+कुप क्रोधे (दिवा०) धातो क्त प्रत्यय]

प्रकृणुध्वम् प्रकुरुध्वम् ११२२४ **प्रकृण्वे**=प्रकर्ष-तया करोमि ११३८२ [प्र+डुकृञ् करणे (तना०) धातोर्लोट्। विकरणव्यत्ययेन श्नु]

प्रकृथ प्रकर्षेण कुरुथ प्र०—अत्र लोडर्थे लट् विक-रणस्य लुक् च ११११२८ [प्र+डुकृञ् करणे (तना०) धातोर्लट्। विकरणस्य लुक्]

प्रकेतम् प्रकृष्ट विज्ञानम् २१७७ **प्रकेतः**=प्रकृष्टा केत प्रज्ञा यस्य स (भा०—अध्यापक उपदेष्टा च जन)

पेषी पेष्याकार गर्भस्थ वीर्य कृतवती (युवति) ५ २ २

पैङ्गराजः पक्षिविशेष २४ ३४

पैजवनस्य वेगयुक्तस्य (नप्तु =पौत्रस्य) ७ १८ २२ क्षमाशीलस्य पुत्रस्य ७ १८ २३ क्षमाशीलाज्जातस्य पुत्रस्य ७ १८ २५ [पैजवन पिजवनस्य पुत्र । पिजवन पुन. स्पर्द्धनीयजनो वाऽमिश्रीभावगतिर्वा नि० २ २४]

पैतृमत्यम् पितृमता भावमेव ७ ४६ [पितृमत्प्राति० भावे ष्यञ्-प्रत्ययो ब्राह्मणादित्वात् । अथवा 'वाङ्-मतिपितृमता छन्दस्युपसख्यानम्' अ० ४ १ ८५ वा० सूत्रेण प्राग्दीव्यतीयेष्वर्थेषु ष्य प्रत्यय]

पैद्वः सुखेन प्रापक (वाजी=ज्ञानवान् जन) १ ११६ ६ यो यान मार्गे शीघ्रवेगेन गमयिता ऋ० भू० १६४, ऋ० १ ८ ६ १ [पैद्व अश्वनाम निघ० १ १४]

पोता पवित्रकर्त्ता (अग्नि =विद्वज्जन) ४ ६ ३ पवित्र पवित्रकर्त्ता वा (पुरोहित) १ ६४ ६ शोधक (सूर्य) २५ २ [पूञ् पवने (क्रया०) धातो कर्त्तरि तृच्-प्रत्यय.]

पोत्रम् पवित्रम् (कर्म्म) २ १ २ पवित्रकारकम् (श्रेष्ठ वस्तु) १ ७६ ४ **पोत्रात्**=पुनाति येन गुणेन तस्मात् प्र०—अत्र 'सर्वधातुभ्य ष्ट्रन्' उ० ४ १६३ इति पूञ्धातो ष्ट्रन्-प्रत्यय स्वरव्यत्ययश्च १ १५ २ पवित्रकर्त्तु (विदुषो जनात्) २ ३७ २ [पूञ् पवने (क्रया०) धातो-रौणादिक ष्ट्रन्प्रत्यय । अथवा पूञ्धातो 'हलसूकरयो पुव' अ० ३ २ १८३ सूत्रेण करणे ष्ट्रन्-प्रत्यय]

पोषम् शरीरात्मपुष्टिकारकम् (सुवीर्यं=विद्याभ्यासम्) १ ६३ २ पुष्टिम् २३ ३१. आत्मशरीरयो पुष्ट्या सुख-प्रदम् (रयिं=विद्यासुवर्णादि-सुधनम्) १ १ ३ पोषकम् (हिरण्य=तेजो सुवर्णं वा) ३४ ५० महापुष्टि करने वाले (रयिं=विद्यादि तथा सुवर्ण आदि धन को) आर्याभि० १.३ ऋ० १ १ १ ३ उत्तमाना धनाना भोगम् ३ २० **पोषस्य**=पोषकस्य जनस्य १२ ८ **पोषः**=बहुगुणयोगेन पुष्ट (पदार्थ) प्र०—भूमा वै रायस्पोष शत० ३ १ १ १२, ३ २० **पोषाय**=पुष्यन्ति प्राणिनो यस्मिन् व्यवहारे तस्मै ३ २३ पोषणकराय (पुरुषाय) ११ ७६ पुष्टिकराय (राये=धनाय) १ १४२ १० **पोषे**=पुष्टौ १७ ५४ पुष्यन्ति=यस्मिँस्तस्मिन् (यज्ञे) ५ ५ ६ पोषणे १७ ५४ **पोषेण**=पालनेन १२ ८ पोषणेन १७ ५० घृतदुग्धादिपुष्टिकारकपदार्थप्राप्त्या प० वि० । पुष्यन्ति येन तेन (पदार्थेन) ४ २२ **पोषैः**=पुष्टिकारकैराप्तविद्याजनितै-र्वोधयुक्तैर्व्यवहारै ३ ३७ उत्तम पुष्टिकारक व्यवहारो से स० वि० १४६, ३ ३७ [पुष पुष्टौ (भ्वा०) धातोर्घञ् अथवा कर्त्तरि अच्]

पोषयत् पोषयेत् ५ ६ ७ [पुष पुष्टौ (दिवा०) धातोर्णिजन्ताल् लङ्]

पोषयित्नु पोषकम् (अध्यापनासनम्) ७ २ ६. पोष-यित्री (धर्मशिक्षा) ३ ४ ६ पुष्टिकरम् (द्रव्यम्) ४ ५७.१ [पुष पुष्टौ (दिवा०) धातो 'स्तनिहृषिपुषि०' उ० ३ २६ सूत्रेण णिजन्ताद् इत्नुच् प्रत्यय । पोषयित्नु=पुष्ट पोष-यितृ नि० १० १५]

पोष्या पोषयितुमर्हाणि (वार्य्याणि=धनादीनि) १ ११३ १५ [पुष पुष्टौ (दिवा०) धातोर्ण्यत् । तत श्नेर्लोप-श्छन्दसि]

पोष्या पोषण करने योग्य पत्नी स० वि० १४७, अथर्व० १४ १ ५२. **पोष्याणाम्**=पोषितु योग्यानाम् (हरीणा=मनुष्याणाम्) ४ ४८ ५. [पुष पुष्टौ (दिवा०) धातोर्ण्यत् । तत स्त्रिया टाप्]

पोष्यावतः बहव पोष्या पोषणीया विद्यन्ते येषान्तान् (नॄन्) ५ ४१ ८ [पोष्यप्राति० भूम्न्यर्थे मतुप् । मतुप्-प्रत्यये परे दीर्घश्छान्दस]

पौञ्जिष्ठम् पुष्कसम् ३० ८

पौर पुरोर्मनुष्यस्याऽपत्य तत्सम्बुद्धौ ५ ७४ ४ **पौरम्**=पुरि भव मनुष्यम् ५ ७४ ४ **पौरः**=पुरि भव (इन्द्र =वैद्य) २ ११ ११ **पौराय**=पुरि भवाय (मनुष्याय) ५ ७४.४ [पुरव मनुष्यनाम निघ० २.३ ततो-ऽपत्यार्थेऽण् । उकारलोपश्छान्दस । अथवा पुर्-प्राति० भवार्थेऽण्]

पौरुकुत्सिम् पुरवो बहव कुत्सा शस्त्राऽस्त्रविद्या-योगा यस्य तस्याऽपत्यम् (सत्पुरुषम्) ७ १६ ३ [पुरु-कुत्स-पदयो समासे कृतेऽपत्यार्थे 'अत इञ्' इतीञ् प्रत्यय । पुरु= बहुनाम निघ० ३ १ कुत्स =वज्रनाम निघ० २ २०]

पौरुकुत्स्यस्य बहुवज्रादिशस्त्राऽस्त्रविदोऽपत्यस्य (सूरे =मेधाविनो जनस्य) ५ ३३ ८ [पुरु-कुत्सपदयो समासे कृतेऽपत्यार्थे यञ्-प्रत्यय]

पौरुषेयः पुरुषाणा समूह १५ १५ [पुरुषप्राति० समूहार्थे 'पुरुषाद् वधविकारसमूह तेनकृतेष्विति वक्तव्यम्' अ० ५ १ १० वा० सूत्रेण ढञ् । ढस्य एयादेश]

पौरुषेयीम् पौरुषेयस्य रीतिम् ७ ४ ३ **पौरुषेय्याः**= पुरुषसम्बन्धिन्या (युक्ताहारविहारक्रियाया) २१ ४४.

चिकित्सकौ) २८ ७ **प्रचेतः**=प्रकृष्ट-प्रज्ञ (विद्वज्जन) १.११३ १. प्रकृष्टविज्ञान (अग्ने=विद्वज्जन) ६ १३ ३ प्रकर्षेण प्रज्ञया युक्त (अध्यापक) ७ १७ ५ **प्रचेताः**=प्रकृष्ट चेत प्रज्ञा यस्य स, भा०—यो न मूढ (विद्वान् जन) २० ३७ य यथानान् प्रचेतयति स (अग्नि=विद्युत्) २ १० ३ प्रकृष्टज्ञचेत सज्ञानमस्य स (कवि=क्रान्तप्रज्ञो मेधाविजन) २६ २५ प्रकृष्टयुक्तो विज्ञापको वा (अग्नि=विद्वान्) ३ २५ १ यथा प्राण प्रचेतयति तथा (जगदीश्वरो विद्वान् वा पुरुष) ५ ३१ प्राज्ञ प्रज्ञापक (अग्नि=विद्वान् जन) ४ ६ २ प्रज्ञापयिता (महाविद्वज्जन) ७.४ ४ प्रकर्षण प्रज्ञापक (अग्निरिव गृहपालको मनुष्य) ७ १६ ५ प्रकृष्ट ज्ञानस्वरूप, प्रकृष्ट ज्ञान को देने वाला (ईश्वर) आर्याभि० २ १६, ५ ३१ य. प्रकृष्टविज्ञान (विश्वकर्मा=विद्वान् जन.) यया प्रकृष्टतया चेतन्ति सजानन्ति सा (वाक्) ५ ११ प्रकृष्टतया सदर्थज्ञापिका (स्त्री) ३.६१.१. [प्र-चेतस्पदयो समास । चेतस्=चिती सज्ञाने (भ्वा०) धातोरसुन् । चेत प्रज्ञानाम निघ० ३ ६ प्रचेता=प्रवृद्धचेता. नि० ८ ५. प्रचेतस=प्रवृद्धचेतस नि० ६.१६.]

प्रचेतसा प्रकृष्टतया प्रज्ञाननिमित्ते (क्षितिसूर्यौ) १ १५६.१ प्रकृष्टज्ञानौ (मित्रावरुणौ=अध्यापकोपदेशकौ) ५ ७१ २ प्रकृष्ट चेतो विज्ञान ययोस्तौ (कवी=मेधाविनौ) २८ ३० [प्र-चेतस्पदयो समासे 'सुपा सुलुक्०' इति प्रथमाद्विवचनस्याकारादेश]

प्रचेतुने प्रचेतयन्त्यानन्देन यस्मिँस्तस्मिन् (पदे=प्राप्तु योग्ये व्यवहारे) १ २१ ६ [प्र+चिती सज्ञाने (भ्वा०) धातोश्छान्दस रूपम्]

प्रचोदयन् प्रज्ञापयन् (अध्यापक) ३ २७ ७. [प्र+चुद सञ्चोदने (चुरा०) धातो शतृप्रत्यय]

प्रचोदयन्ता प्रेरयन्तौ (काम=शिक्षिपनौ जनौ) २६ ३२ [प्र+चुद् सञ्चोदने (चुरा०)+शतृ । 'सुपा सुलुग्०' इत्याकारादेश । प्रचोदयन्ता=प्रचोदयमानौ नि० ८.१२.]

प्रचोदयात् सद्गुणकर्मस्वभावेषु प्रेरयतु ३ ६२ १० भा०—अधर्माचरणान्निवर्त्य धर्माचरणे प्रेरयेत् २२ ६. प्रकृष्ट प्रेरयेत भा०—नित्य प्रवर्त्तयेत् ३ ३५ प्रेरणा करे स० वि० ७५, ३६ ३ बुरे कामो मे छुटाकर अच्छे कामो मे प्रवृत्त करे स० प्र० ५१, ३६ ३ [प्र+चुद सञ्चोदने (चुरा०) धातोर्लेट्]

प्रच्छत् प्रयत्नेन दुष्टस्वभावदूरीकरणार्थं कर्म्म १५ ५. [प्र+छद अपवारणे (चुरा०) धातो क्विप्]

प्रच्छिदम् य प्रच्छिनत्ति तम् (नरम्) ३०.१७ [प्रोपपदे छिदिर् द्वैधीकरणे (रुधा०) धातो कर्त्तरि क्विप्]

प्रच्यावयति प्रकर्षेण चालयति ७ १६ १ **प्रच्यावयन्ति**=प्रकृष्टतया प्रचालयन्ति १.६४ ३. निपातयन्ति ५.५६.४ **प्रच्यावयसि**=प्रापयसि ३ ४३.७ [प्र+च्युङ् गतौ (भ्वा०) धातोर्णिजन्ताल् लट्]

प्रच्यावयन्तः विमानादीनि यानानि प्रचालयन्त सन्त (सभाद्यध्यक्षादय) १ ८५ ४ [प्र+च्युङ् गतौ (भ्वा०) धातोर्णिजन्ताच् छतृप्रत्यय]

प्रजज्ञिवान् प्रजात सन् (अग्नि=वह्नि) ३.२ ११ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्लिट क्वसु प्रत्यय]

प्रजज्ञे प्रकृष्टतया जायताम् १.१२१.६. [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्लिट् । 'गमहन०' इत्युपधालोप]

प्रजननम् प्रजनयन्ति येन तत् (अपत्यम्) १६ ४८ प्रकटनम् ३ २६ १ **प्रजननाय**=सन्तानोत्पादनाय ३.६३ [प्र+जनी प्रादुर्भावे (दिवा०) धातो करणे ल्युट् । प्रजापति. प्रजननम् । जै० २ ६५. प्रजनन वै सोम जै० ३ १६१ प्रजनन सप्तदश काठ० २१ १ प्रजा वै पशव प्रजननम् जै २.१०८. यानि द्वादश (अक्षराणि) प्रजनन तत् जै० १ २०४ सवत्सरो वै प्रजननम् काठ० ७.१५.]

प्रजनय प्रकटय ३४ ३६ प्रकट कीजिए स० वि० १५६, ७ ४१ ३. अच्छे प्रकार से उत्पन्न कर आर्याभि० २ ११, ३४ ३६ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्तात्लोट्]

प्रजनयन् निष्पादयन्नेव (योगी) ७ १३. परमेश्वर इव प्रकटयन् (न्यायाधीशो राजा) ७ १८ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताच्छतृप्रत्यय]

प्रजभ्रुः प्रकर्षेण धरन्तु ३ ५४ १ [प्र+हृञ् हरणे (भ्वा०) धातोर्लिट् । 'हृग्रहोर्भश्छन्दसि' इति हकारस्य भकारादेश]

प्रजया सर्वेण ससारेण ८ ३६. स्वसन्तानादिना ८ १७ राज्येन सन्तानसमूहेन वा ५ २८ प्रजातया (सृष्ट्या) ३२.५ सुसन्तानाद्यया सह १ १३६ ६ सुपुत्रादियुक्तया १ ६३ ३ सुसन्तानै २० २२ सन्तानेन १२ ७ **प्रजा**=सुसन्ताना यज्ञसम्पादिका (सृष्टि) १ २३. **प्रजानाम्**=प्राणिमात्राणाम् ३४ २. उत्पन्नाना पदार्थानाम् ३७ १४. सर्वेषा व्यवहाराणाम् ३४ ५ मनुष्यादीनाम् १६ ४७ पालनीयानाम् (सन्ततीनाम्) १८ २८. **प्रजाभिः**=प्रजातै

३४ १८ प्रकृष्टप्रज्ञ (वसिष्ठ =पूर्णविद्वान् जन) ७ ३३ १२ प्रकृष्टप्रज्ञावान् प्रज्ञापक (अग्नि =स्वप्रकाशस्वरूपो जगदीश्वर) ७ ११ १ **प्रकेतेन**=प्रकृष्टेन विज्ञानेन १५.६ **प्रकेतैः**=प्रकृष्टाभि प्रज्ञाभि ७ ३३ ६ [प्र+केतपदयो. समास । केत प्रज्ञानाम निघ० ३ ६ प्रकेत =प्रकेतनम् प्रज्ञाततमम् नि० २ १६]

प्रक्रमते प्रकर्षेण प्राप्नोति १ १४४ १ [प्र=क्रमु पादविक्षेपे (भ्वा०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

प्रक्रीळान् प्रकृष्टान् विहारान् ४ ४१ ११ **प्रक्रीडेन**= उत्तमक्रीडया ३६ ६ [प्र+क्रीडृ विहारे (भ्वा०) धातोर्घञ् प्रत्यय]

प्रक्रीळिनः प्रकृष्टा क्रीळा विद्यते येषान्ते (वत्सास = सद्यो जाता वत्सा) ७ ५६ १६ [प्रक्रीडाप्राति० प्रशसायाम् इनि प्रत्यय]

प्रखादः अतिभक्षक (इन्द्र =सेनेश) १ १७८ ४ [प्र+खाद भक्षणे (भ्वा०) धातोरच् कर्त्तरि]

प्रखिदते प्रकृष्टतया क्षीणाय (जनाय) १६ ४६ [प्र+खिद दैन्ये (दिवा०) धातो शतृ । व्यत्ययेन श]

प्रगर्द्धिनः प्रकर्षोऽभिकाङ्क्षिण (श्येनस्य) ६ १५ प्रलुब्धस्य (श्येनस्य) ४ ४० ३ [प्र+गृधु अभिकाङ्क्षायाम् (दिवा०) धातोस्ताच्छील्ये णिनि]

प्रगाथाः ये प्रकर्षेण गीयन्ते ते (विद्वासो जना) १६ २४ [प्र+गाथपदयो समास । गाथ =गै शब्दे (भ्वा०) धातो 'उपिकुपिगार्त्तिभ्यस्थन्०' उ० २ ५ सूत्रेण थन् । मन प्रगाथ जै० उ० ३ १४ ३ प्राणापानौ वै वार्हत प्रगाथ कौ० १५ ४]

प्रगाय अधिक स्तुहि ६ ४० १ **प्रगायत**=प्रशसत ५ ६८ १. [प्र+गै शब्दे (भ्वा०) धातोर्लोट्]

प्रगाहमानः प्रयत्नेन विलोडन कुर्वन् (इन्द्र =सेनापति) १७.३६ [प्र+गाहू विलोडने (भ्वा०) धातो शानच्]

प्रगिरिभ्यः प्रकर्षेण शैलेभ्य १ १०६ ६ [प्र-गिरिपदयो समास]

प्रगूर्त्त उद्यच्छत १ १७३ २ [प्र+गुर्वी उद्यमने (भ्वा०) धातोर्लोट् । विकरणस्य शपो लुक्]

प्रघासिनः प्रघस्तुमत्तु शीलमेषा तान् (अ०—अतिथीन्) ३ ४४ **प्रघासी**=वहव प्रकृष्टा घासा भोज्यानि विद्यन्ते यस्य स (भा०—वह्वन्नसामर्थ्यो गृहस्थ-जन) १७ ८५ [प्र+घस्लृ अदने (भ्वा०) धातोस्ताच्छील्ये णिनि । अथवा प्र-घासपदयो समासे मतुवर्थे इनि]

प्रचक्षय प्रख्यापय १ १३४ ३ [प+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्णिजन्ताल्लोट्]

प्रचर विजानीह्यनुतिष्ठ ४ ३७ [प्र+चर गतौ (भ्वा०) धातोर्लोट्]

प्रचर्षणी सम्यक् सुख-प्रापकौ (इन्द्राग्नी=विद्युद्भौतिकाग्नी) प्र०—चर्षणिरिति पदनाम निघ० ४ २, १ १०६ ५ [प्र-चर्षणिपदयो समास । चर्षणि =चायिना नि० ८ १४]

प्रचाकशत प्रकाशते ४ ५३ ४ [प्र+काशृ दीप्तौ (भ्वा०) धातोर्णिजन्ताल्लुङ् । अडभावश्छान्दस]

प्रचातयस्व प्रकर्षेण हिंस्य हिन्धि वा ५.४ ६ प्रकृष्टतया नाश प्रापय प्र०—चनतिर्गतिकर्मा निघ० २ १४, ७ १७ [प्र+चनति गतिकर्मा (निघ० २ १४) धातोर्णिजन्ताल्लोट्]

प्रचिकितः प्राप्तविज्ञान (पित्रादिजन) १६ ५२ [प्र-चिकितपदयो समास]

प्रचिकितुः विजानन्ति ७ ११ ३ [प्र+कि ज्ञाने (जु०) धातोर्लिट्]

प्रचिकित्स रोगनिवारणायेव विघ्ननिवारणोपाय कुरु ३४ २३ [कित निवासे रोगापनयने च (भ्वा०) धातो प्रपूर्वाद् 'गुपूतिज्किद्भ्य सन्' इति स्वार्थे सन्नन्ताल् लोट्]

प्रचेकिते प्रकृष्टतया जानाति १ ५५ ३ [प्र कि ज्ञाने (जु०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

प्रचेतयति प्रकृष्टतया सम्यङ् ज्ञापयति १ ३ १२ प्रज्ञापयति २० ८६ [प्र+चिती सज्ञाने (भ्वा०) धातोर्णिजन्ताल् लट्]

प्रचेतसम् प्रकर्षेण ज्ञापयितारम् (अध्यापकम्) ७ १६ १२ प्रकर्षेण सञ्ज्ञापकम् (अग्नि=पावकम्) ३ २६ ५ प्रकृष्टं चेतो विज्ञान यस्य यस्माद् वा तम् (विद्यावन्त जनम्) १ ४४ ११ प्रकृष्टप्रज्ञायुक्तम् (विद्वासम्) ४ १ १ विविधप्रज्ञानयुक्तम् (अग्नि=विद्वाम जनम्) ४ १ १ प्रकृतप्रज्ञम् (पुरुषम्) प्र०—चेता इति प्रज्ञानाम निघ० ३ ६, १२ ११० **प्रचेतसः**=प्रकृष्ट चेत सज्ञान येभ्यस्ते (वायव) १ ६४ ८ शिक्षया प्रकर्षेण विज्ञापितान् (अश्वान्=तुरङ्गान्) २६ ५० प्रकृष्ट चेतो विज्ञान यासा ता (सेना) १ ८४ १२ प्रकृष्ट चेतो ज्ञान यस्य तस्य (परमेश्वरस्य) २ २३ २ प्रज्ञापका (विद्वज्जना) ५ ८७ ६ **प्रचेतसे**=प्रकृष्ट चेत प्रज्ञा यस्य तस्मै (महाराजाय) ७ ३१ १० **प्रचेतसौ**=प्रकृष्टविज्ञानयुक्तौ (भिषजा=

पालकस्य (ईश्वरस्य) २.२.११ प्रजाना पति पालनहेतु सूर्यस्तस्य ४.२६. विश्वभरस्य जगदीश्वरस्येव धार्मिकस्य राज्ञ ६.२१ **प्रजापतौ** —प्रजाया पालके परमेश्वरे ३५ ६ [प्रजा-पतिपदयो समास । 'पति समास एव' इति पि-सञ्ज्ञकत्वेन गुणादय । प्रजापति यज्ञनाम निघ ३.१७. प्रजापति. पाता वा पालयिता वा नि० १०.४१ तद् यदब्रवीत् (ब्रह्मा) प्रजापते प्रजा सृष्ट्वा पालयस्वेति तस्मात् प्रजा-पतिरभवत् तत् प्रजापते प्रजापतित्वम् गो० पू० १.४. एष वै प्रजापति , यदग्नि तै० १.१.५.५ यो ह वाव खलु वाय प्रजापति., स उ वेवेन्द्र तै० १.२.२.५ एष प्रजापतिर्यद्-धृदयम् श० १४.८.४.१ य प्रजापतिर्नृतन्मन जै० उ० १.३३.२ वाग्वै प्रजापति श० ५.१.५.६ स एष सवत्सर. प्रजापति षोडशकल श० १४.४.३.२२ प्रजापतिर्वै सप्तदश ता० २.१०.५ सवत्सरो वै पिता वैश्वानर प्रजापति श० १.५.१.१६ एष वै प्रत्यक्ष यज्ञो यत्प्रजापति. श० ८.३.४.३. प्रजापतिरश्वमेध श० १३.२.२.१३. एष ह प्रजाना प्रजा-पतिर्यद् विश्वजित् गो० पू० ५.१० यो ह्येव सविता स प्रजापति श० १२.३.५.१ प्राणो हि प्रजापति प्रजापति ह्येवेद सर्वमनु (प्रजायते) श० ४.५.५.१३ अन्न वा इदय प्रजापति श० ७.१.२.४ वायुर्ह्येव प्रजापति ऐ० ४.२६ अर्धं ह प्रजापतेर्वायुरर्ध प्रजापति श० ६.२.२.११ स एष वायु प्रजापति श० ८.३.४.१५ प्रजापति प्रणेता तै० २.५.७.३ प्रजापतिर्वै भूत तै० २.१.६.३ प्रजापतिर्वन्धु-तै० ३.७.५.५ प्रजापतिस्त्रातिरिक्तयो प्रतिष्ठा ऐ० ५.२४ एकविंशो वै प्रजापति ऐ० १.३० हिरण्मय प्रजापति श० १०.१.४.६ प्रजापतिर्वै हिरण्यगर्भ. श० ६.२.२.५ प्रजा-पतिर्वै ब्रह्मा गो० उ० ५.८ ब्रह्म-वै प्रजापतिर्ब्राह्मो हि प्रजापति श० १३.६.२.८ प्रजापतिर्वै चन्द्रमा. श० ६.१.३.१६ सोमो हि प्रजापति श० ५.१.५.२६ प्रजापति स्वर ष० ३.७ प्रजापति स्वरसामान कौ० २४.४ सर्वाणि छन्दासि प्रजापति श० ६.२.१.३० पाङ्क्त प्रजा-पति श० १०.४.२.२३ आनुष्टुभ प्रजापति तै० ३.३. २.१. अतिच्छन्दो वै प्रजापति कौ० २३.४,८ प्रजापतेर्वा एतदुक्थ यत्प्रातरनुवाक ऐ० २.१७ (योऽय चक्षुषि पुरुष) एष प्रजापति जै० उ० १.४३.१० प्रजापति सदस्य गो० पू० ५.४ प्रजापतिर्वाऽउद्गाता श० ४.३.२.३ प्रजापति-रुद्गीथ तै० ३.८.२.३ अथर्वा वै प्रजापति गो० पू० १.४ सत्य हि प्रजापति श० ४.२.१.२६ प्रजापतिर्वै गार्ह-पत्य कौ० २७.४ घृतञ्च वै मधु च प्रजापतिरासीत् तै० ३.३.४.१ प्रजापतिर्ह्यात्मा श० ६.२.२.१२ पुरुष प्रजा-पति श० ६.२.१.२३ एष उ एव पजापतिर्यज्ञो ऐ० २.१८ पितर प्रजापति: गो० उ० ६.१५ यद्वै नाम अद्-य प्रजापति श० ८.१.१.२ अहमेवै पशुना प्रजापति श० ५.२.५.१७ प्रजनन प्रजापति श० ५.१.३.१० य प्रजापतिरब्रवीदय कोऽहमिति यदेवै तस्यान्न प्रजायतेऽहमे वै को नाम प्रजापतिरभवन् हो वै नाम प्रजापति ऐ० ३.२१ कम् वै प्रजापति श० २.५.२.१३ स (प्रजापति.) उ वाव भुवनस्य गोपा जै० उ० ३.२.१ प्रजापतिर्वै कुरुक्षु. श० ४.१.१.४. प्रजापतिर्वै कुरून् विशतिश ६.३.१.१६ प्रजा-पतिर्वै नृमणा श० ६.७.४.३ प्रजापतिर्वै नृचक्षा श० ६.७.४.५ प्रजापतिर्वोना श० ८.५.१.३८ प्रजापतिर्वै यमदग्नि श० १३.२.२.१४ प्रजापतिर्वै चतुर्होता तै० २.२.३.५. प्रजापतिर्वै दशहोता तै० ६.२.१.१ प्रजापतिर्वै होतृणा होता तै० २.३.५.६ प्रजापतिर्वै प्रोगशस्त्रस श० ४.३.१.६. प्रजापतिरेव निधनम् जै० उ० १.५८.६ प्रजा-पतिर्वै क्षयम् श० ८.२.३.११. प्रजापतिर्वै स्तुति श० ३.१.३.२ इमे लोका प्रजापति. श० ७.५.१.२ प्रजा-पतिर्वा इमानीमान् (त्रीन्) लोकान्नचतुर्थ श० ४.६.१.४. द्यावापृथिवी हि प्रजापति श० ५.१.५.२६ प्राजापत्यो वा इदय (भू) लोक. तै० १.३.७.५ प्रजापतिर्वै पृथिव्यै जनिता श० ७.३.१.२०. सप्तविधो वा इदमे प्रजापतिर-सृज्यत श० १०.२.३.१८ स एष पुरुष प्रजापतिरभवत् । यान् वै तान् सप्तपुरुषान् एक पुरुषमकुर्वन्त्स प्रजापतिर-भवत् श० १०.२.२.१ एक उ वै प्रजापति: कौ० २६.७ प्रजापति सर्वा देवता तै० ३.३.७.३ उभयम्वैतत् प्रजा-पतिर्यच्च देवा यच्च मनुष्या श० ६.८.१.४ मानव न हि पितेव च पजापति श० ५.१.५.२६ स्प वै प्रजापति ··· नाम वै प्रजापति तै० २.२.७.१. सर्वमु ह्येवेद पजापति श० ५.१.१.४ प्रजापतिर्वै विश्वजित् कौ० २५.१२ अपरि-मितो हि प्रजापति गो० उ० १.७ उभयम्वैतत् प्रजापति-निरुक्तश्चानिरुक्तश्च परिमितश्चापरिमितश्च श० ६.५.३.७. अनिरुक्त उ वै प्रजापति कौ० २३.२,६ प्रजापतिर्वै देवा-नामन्नादो वीर्यवान् तै० ३.८.७.१ प्रजापतिर्वै देवाना वीर्य-वत्तम श० १३.१.२.५ अथ यत्पर भा (सूर्यस्य) प्रजा-पतिर्वा स श० १.६.३.१० यत्पर भा प्रजापतिर्वा स इन्द्रो वा श० २.३.१.७. प्रजापतिर्वा अमृत श० ६.३. १.१७ प्रजापतिश्चतुरित्रशो देवानाम् ता० १७.११.३ पूर्ण इव हि प्रजापति तै० २.१.२.१ प्रजापतिर्हि स्वा-राज्यम् ता० १६.१३.३ अन्तो वै प्रजापति श० ५.१. ३.१३ प्रजापतिर्विराजम् (साम) ता० १६.५.१० साहस्र.

(पशुभि) ६ ७० ३ पालनीयाभि (सन्ततिभि) ५ ४ १०. अनुकूलाभि स्त्यौरसविद्यासन्तान-मित्र-भृत्य-राज्य-पश्वादिभि ३ ३७ भा०—सभ्यसैन्य-प्रजाजनै ७ २९ पुत्रपौत्रादि उत्तमगुणवाली प्रजाओ से आर्याभि० २ ३५, ३ ३७ **प्रजाभ्यः**=उत्पन्नाभ्य सृष्टिभ्य ४ २५ स्वसन्तानेभ्य १२.७२ पालनीयाभ्य (प्राणिभ्य) ११ ३८ प्रसिद्धाभ्य (मानुषीभ्य =मनुष्यादिभ्य) ११ ४५ प्रजाताभ्यो विद्युदादिभ्य १३ ५७ **प्रजाम्**=या प्रजायते ताम् (सृष्टिम्) ४ १३ स्वसन्तानान् सरक्षणीयान् जनान् ६ ३. पुत्रपौत्रप्रभृतिम् १९ ४८ पुत्रपौत्रादिकाम् ११ २५ १. उत्तमान् सन्तानान् राष्ट्र वा ४ ३६ ९ सुसन्तानरूपाम् (सृष्टिम्) ३४ १० उत्पन्ना सृष्टिम् ५ १७ पालनीयाम् (सृष्टिम्) ९.२५ उत्पादनीयाम् (सन्ततिम्) ५ २७ सन्ततिम् २५ ७ सुसन्तानम् ११ ५८ सत्यबलधर्मयुक्ताम् (सृष्टिम्) ११ ५८ सुप्रजाताम् (सन्तानोत्पत्तिम्) ११ ५८ राज्यम् १ १७९ ६ प्रजा को स० वि० १३८, अथर्व० १४ २.३१ **प्रजायाः**=मनुष्यादिसृष्टये प्र०—अत्र चतुर्थ्यर्थे षष्ठी १.१५९ २ विद्यमानाया (सृष्टे) ३ ३९ **प्रजायै**=प्रजासुखाय ७ ५७ ६ **प्रजासु**=प्रकृतिजीवादिषु ३२ ८ जनेषु ३४.३ प्रजाओ मे स० प्र० २४७, ३४ ३. **प्रजाः**=प्रादुर्भूता पालनीया (सृष्टय) १ ४३ ९ समुत्पन्ना (सृष्टय) १ ६७ ५. मनुष्यादिसृष्टय ४ २५ जगत्स्था (सृष्टय) ४ २५ प्रजननीया (प्रजाजना.) ६ २६ प्रजा एव ७ १८. सरक्षणीया (सृष्टय) ७.१७ प्रजायन्ते यास्ता (सन्ततय) १ ९६ २ पालनीया (सन्ततय) १४ २६ तदधीनपालना (सन्ततयः) ९ २१. प्रजाता. (सर्वलोका) ३ ५५.१९. [प्र+जनी प्रादुर्भावे (दिवा०) धातो 'उपसर्गे च सज्ञायाम्' अ० ३ २ ९९ सूत्रेण ड प्रत्यय। स्त्रिया टाप्। प्रजा अपत्यनाम निघ० २ २ प्रजा वै तोकम् श० ७ ५ २ ३९. प्रजा वै सूनु श० ७ १ १ २७. प्रजा वै तन्तु ऐ० ३ ११ प्रजा वा अप्नुरित्याहु गो० पू० ५.९ प्रजा वा ऽअरी श० ३ ९ ४ २१ प्रजा वा ऽडप श० १ ७ ३ १४ प्रजा वै भूतानि श० २ ४ २ १ प्रजा वै बर्हि कौ० ५ ७, १८ १० प्रजानुरूप ऐ० ३ २३ प्रजाशस्त्रम् श० ५ २ २ २० प्रजा पशव सूक्तम् कौ० १४ ४ प्रजा वा उक्थानि तै० १ ८ ७ २ प्रजा. सतो बृहती गो० उ० ६.८ आदित्या वा इमा प्रजा ता० १८ ८ १२ द्वय्यो ह वा ऽइदमग्रे प्रजा आसु। आदित्याश्चाङ्गिरसश्च श० ३ ५.१.१३ वैश्वदेव्यो वै प्रजा तै० १ ६ २ ५ आगस्त्यो वै प्रजा श० १३ ३ ४ ५, आयास्यो वै प्रजा तै० ३ ९ ११ ४. आद्या ह्येमा प्रजा विश श० ४ २ १ १७]

प्रजवः प्रकृष्टो वेग ७.३३ ८ [प्र+जु इति सौत्रो धातु, वेगिताया गतौ। तत 'जवसवौ छन्दसि वक्तव्यौ' अ० ३ ३ ५६ वा० सूत्रेण अच्प्रत्यय]

प्रजवेते प्रगच्छत ३ ३३ १ [प्र+जु इति सौत्रो धातु। ततो लट्]

प्रजातम् उत्पन्नम् (मन) १ १६४ १८ **प्रजातः**=प्रसिद्ध उत्पन्न (पुत्र =अध्येता) १ ६९ १ [प्र+जनी प्रादुर्भावे (दिवा०) धातो क्त। धातो स्थाने जादेश]

प्रजानतीव यथा विज्ञानवती विदुषी तथा (उषा) १ १२४ ३ [प्रजानती-इवपदयो समास। प्रजानती=प्र+ज्ञा अवबोधने (क्र्या०)+शतृ+ङीप्]

प्रजानन् प्रकृष्टतया जानीयु १ ७२.१० [प्र+ज्ञा अवबोधने (क्र्या०) धातोर्लङ्। अटोऽभाव]

प्रजानन् प्रज्ञावान् सन् (सम्राट्=चक्रवर्त्ती राजा) ९ २४ प्रकृष्टतया जानन् (पति) १३ ३४ प्रकर्षेण जानन् सन् (न्यायाधीश) ३५ १ प्रकृष्टतया बुद्ध्यमानः (इन्द्र =शिल्पिजन) ३ ३५ ४ प्रकर्षेण विदन्त्सन् (अश्व = शीघ्रगामी वह्नि) २९ १० प्रकर्षता से जानता हुआ गृहस्थ जन) स० वि० १८९, अथर्व० ९ ५ १ विद्वान् (पुरुषार्थिजन) ३ २९.१६. [प्र+ज्ञा अवबोधने (क्र्या०) धातो शतृ-प्रत्यय]

प्रजापतये प्रजापालकाय (विदुषे जनाय) २२ ५ प्रजाया पालकाय (विदुषे गृहस्थाय) २२ ४ प्रजास्वामिने (राज्ञे) २४ २९ प्रजारक्षकाय (राजपुरुषाय) १८ २८ **प्रजापतिम्**=विश्वस्य पालक स्वामिनम् (परमेश्वरम्) २३ ६४ **प्रजापतिः**=प्रजापालक ईश्वर १४ ३ प्रजापालको जीव १९ ७८ प्रजापालक सूर्य २३.६३ प्रजाया स्वामी (परमेश्वर) ८ ५४ विश्वस्याऽध्यक्ष (ईश्वर) ८ ३६ सन्तानादिपालक (गृहपति) ८ १०. सर्वस्या प्रजाया स्वामित्वात् (ईश्वर) ३२ १ प्रजाया पालकोऽधिष्ठाता (परमेश्वर) ३२ ५ प्रजापालक सभेशो राजा १९ ७५ सब जगत् का पति (स्वामी) और पालन करने वाला (परमात्मा) आर्याभि० २ ४, ३२ १ सब ससार का अधिष्ठाता पालक (ईश्वर) आर्याभि० २ ५४ सकल सृष्टि की उत्पत्ति और पालन करने हारा सर्वव्यापक स्वामी परमात्मा स० वि० १८७, १९ ७७ **प्रजापते**=प्रजाया स्वामिन्नीश्वर १० २० प्रजारक्षक (राजन्) २३ ८ **प्रजापतेः**=सन्तानादिरक्षकस्य (गृहपते) ८ १० प्रजाया

प्रणव गो० उ० ३ ११. ब्रह्म वै प्रणव कौ० ११.४]

प्रणिदधात प्रणिधरत ५.२२.२. [प्र+नि+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्]

प्रणिनाय प्रकर्षेण प्रापय ३ ८ ११ यया त्व प्रणयेस्तया अ०—प्रापयति ५ ४३ [प्र=णीञ् प्रापणे (भ्वा०) धातोर्लिट्]

प्रणीतयः प्रकृष्टा नीतय ६ ४५ ३ [प्र+णीञ् प्रापणे (भ्वा०) धातो स्त्रियग क्तिन्]

प्रणीतम् प्रकृष्टतया प्रापितम् (तम.=अन्धकाररूप दुःखम्) १ ११७.१७ **प्रणीतः**=प्रकृष्टतया सम्मिलित. (अग्नि =पावक) १६ १७ [प्र+णीञ् प्रापणे (भ्वा०) धातो क्त]

प्रणीतिषु प्रकृष्टासु नीतिषु १ ११४ २ **प्रणीतिः**= प्रकृष्टा नीति ६ ४८.२० **प्रणीतौ**=प्रकृष्टायां नीतौ ३ १५ १ प्रकृष्टाया वर्म्यायां नीतौ ११ ४६ [प्र+णीञ् प्रापणे (भ्वा०) धातो स्त्रियां क्तिन्]

प्रणीती प्रकृष्टा चासौ नीतिस्तया प्र०—अत्र 'सुपा सुलुक्०' इति पूर्वसवर्णदीर्घ १ ६१ १. प्रकृष्टा नीतिम् प्र०—अत्र पूर्वसवर्णदीर्घ ७ ३५ प्रकृष्टनीत्या ७ २८ ३. [प्रणीतिप्राप्ति० तृतीयैकवचनस्य पूर्वसवर्णदीर्घच्छान्दस]

प्रणीयते प्रकर्षेण प्राप्यते ३ २७ ८ **प्रणीयन्ते**= प्रयुक्त किये जाते हैं म० वि० २०६, अथर्व० ६ ६.१५ [प्र+णीञ् प्रापणे (भ्वा०) धातो कर्मणि लट्]

प्रणुद प्रकृष्टतया दूरे क्षिप १५.१ प्रकर्षेण हिन्धि १५ २. **प्रणुदाति**=प्रकर्षेण दूरीकरोतु २ ३०. [प्र+णुद प्रेरणे (तुदा०) धातोर्लोट्। अन्यत्र लेटि आडागम.]

प्रणेतः प्रकर्षेण प्रापक (ईश्वर) ७.४१ ३ पुरुषार्थं प्रति प्रेरक (ईश्वर) ३४.३६. य सत्याऽसत्ये प्रणयति तत्सम्बुद्धौ (इन्द्र=परमैश्वर्ययुक्त जन) ३ ३०.१८. सर्वेषां नयनकर्त्ता (विद्वत्प्रिय) २.२८ ३ सत्य के उत्पादक सत्याचार मे प्रेरक (ईश्वर) म० वि० १५६, ७ ४१ ३ **प्रणेता**= प्रकृष्टतया नेता (अग्नि =पावकवद्विद्वज्जन) २.६ २. प्रेरक (अग्नि.=पावक.) ३ २३ १ **प्रणेतारः**=प्रकृष्ट न्याय कुर्वन्त (विद्वज्जना.) ७ ५७.२ प्रभावका (दिवा = वायुविद्यावेत्तृजना) १ १६६ ५ प्रेरका (मेधाविनो जना) ५ ६१ १५ [प्र+णीञ् प्रापणे (भ्वा०) धातो कर्त्तरि तृच्]

प्रणेनीः प्रकर्षेण न्यायकृत् (इन्द्र =राजा) ६ २३ ३. [प्र पूर्वान् णीञ् प्रापणे (भ्वा०) धातोर्यङ्लुगन्तान् क्विप्]

प्रणेष्यत् प्रकृष्ट नय प्राप्नुयात् प्रापयेद् वा २ २०.३. [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लृट्। 'व्यत्ययो बहुलम् इति शप्सिपौ]

प्रणोनुमः प्रकृष्टमतिज्ञयेन स्तुम., पुन पुनर्नमस्कुर्म्मः प्र०—अय 'णु स्तुतौ' इत्यस्य यङ्लुकि प्रयोग 'उपसर्गादसमासेऽपि णोपदेशस्य' अ० ८.४.१४ इति णकारादेशश्च १ ११ २ प्रकर्षेण भृशन्नमेम ७.३१.४. [प्र+णु स्तुतौ (अदा०) धातोर्यङ्लुगन्तात् लट्]

प्रण्यः प्रकृष्टा नीतिर्यासा ता (सत्स्त्रिय) ३ ३८.२ [नी=णीञ् प्रापणे (भ्वा०) धातो क्विप्। प्र-नीपदयो समास.]

प्रतक्वा यथा प्रतकति प्रकर्षेण हर्षतीति तथा (भगवान्) प्र०—अत्र 'अन्येषामपि दृश्यन्ते' इति वनिप् ५ ३२. सब का ज्ञाता, सत्यासत्यकारी जनो के कर्मो को साक्ष्य रखने वाला (ईश्वर) आर्याभि० २.१७, ५.३२. [प्र+तक हसने (भ्वा०) धातो. कर्त्तरि वनिप्]

प्रततः विस्तीर्ण. स्वरूपगुण. (प्रजासेनाध्यक्षः) ३ ३१.२०. [प्र+तनु विस्तारे (तना०) धातो क्त । 'अनुदात्तोपदेश०' इत्यनुनासिकलोप]

प्रतनु प्रकृष्टतया विस्तृणुहि १३.२० [तनु विस्तारे (तना०) धातोर्लोट्]

प्रतरणः दुःखान् प्रकृष्टतया तारक (विद्वान् जन) १ ६१ ६ य. प्रकृष्टतया दुःखानि तरति (अग्नि =अध्यापक) २ १.१२. प्रतरति दु.खानि येन स (यज्ञ) ४.३७ प्रतारक. (राजा) ६ ४७ २६ शत्रुबलस्योल्लङ्घक (वनस्पति =वनादिपालको विद्वान् राजा) २६ ५२. **प्रतरणाय**=नौकादिना परतटादर्वाचीनतटप्राप्ताय प्रापयित्रे वा (पुरुषाय) १६ ४२. [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो करणे ल्युट्। कर्त्तरि वा 'कृत्यल्युटो बहुलम्' ति ल्युट्। प्रतरण प्रतारयिता ऐ० ३ १३.]

प्रतरणी दोष और शोकादि से पृथक् रहने वाली (वरानना स्त्री) स० वि० १३८, अथर्व० १४.२ २६. **प्रतरणीम्**=प्रतरन्ति यया ताम् (विद्याम्) ५ ४६ १. [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्ल्युडन्तात् ङीप्]

प्रतरत दुःखान्युल्लङ्घयत भा०—दुःखसागरं महजत सन्तरत ३५ १०. [प्र+तॄ प्लवनसन्तरणयो. (भ्वा०) धातोर्लोट्]

प्रतरम् प्रकृष्टतया तरति प्लावयति दूरीकरोति दुःख येन तत् (आयु =जीवनम्) १ ५३ ११ प्रतरन्ति दु.ख येन

प्रजापति तै० स० ५ २ ८ ३]

प्रजापतिगृहीतया प्रजापतिर्गृहीतो यया स्त्रिया तया १३ ५४ [प्रजापति-गृहीतपदयो समास । गृहीत =ग्रह उपादाने (क्रया०)+क्त]

प्रजापतिभक्षितस्य प्रजास्वामिनेश्वरेण सेवितस्य भक्षितस्य वा (पयस =उदकस्य दुग्धस्य वा ३८.२८ [प्रजापति-भक्षितपदयो समास]

प्रजायन्ते प्रकृष्टतयोत्पद्यन्ते ३ ३६ ५ **प्रजायेमहि**= प्रकृष्टतया जायेमहि १ ९७ ४ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्लट् । अन्यत्र लङ् अडभावश्च]

प्रजावत् प्रजा विद्यन्ते यस्मिँस्तत् (ब्रह्म=धनमन्न वा) ६ १६ ३६ प्रशस्ता प्रजा भवन्ति यस्मात्तत् (आयु = अन्नम्) १ ११३.१७ वह्वच प्रजा विद्यन्ते यस्य तत् (सौभग=महदैश्वर्यम्) ५ ८२ ४ **प्रजावता**=प्रशस्ता प्रजा विद्यन्ते यस्मिँस्तेन (राधसा=विद्यासुवर्णादिधनेन) १ ९४ १५ **प्रजावतः**=प्रशस्ता प्रजा येषु तान् (वाजान्= सङ्ग्रामान्) १ ९२ ७ प्रशस्ता प्रजा विद्यन्ते यस्मिँस्तस्य (वाजस्य=अन्नादेर्विज्ञानस्य वा) ३ १६ ६ [प्रजाप्राति० प्रशसाया भूम्न्यर्थे वा मतुप्]

प्रजावती प्रजापालनतत्परा (विधवा स्त्री) ऋ० भू० २१४, अथर्व० १४ २ १८ उत्तम पुत्र-पौत्रादि से सहित (स्त्री) स० प्र० १५२, अथर्व० १४ २ १८ प्रजा को प्राप्त होने वाली (सौभाग्यप्रदा नारी) स० वि० १३९, अथर्व० १४ २ ३२. **प्रजावतीषु**=प्रशस्तप्रजायुक्तासु (रीतिषु) ७ १ ११ **प्रजावतीः**=बहुप्रजा विद्यन्ते यासु ता (उषस =प्रभातवेला) ६ २८ १ बहुप्रशसितप्रजायुक्ता (इष =अन्नादीच्छा) ६ ५२ १६ भूयस्य प्रजा वर्त्तन्ते यासु ता (अघ्न्या =गा) प्र०—अत्र भूम्न्यर्थे मतुप् १.१ प्रशस्ता प्रजा विद्यन्ते यासा ता (गा) ६ २८ ७ [प्रजा-प्राति० प्रशसाया भूम्न्यर्थे वा मतुवन्तान् ङीप्]

प्रजावतः बह्वच प्रजा उत्पन्ना विद्यन्ते येषु मासेषु तान् प्र०—अत्र भूमार्थे मतुप् १ २५ ८ **प्रजावन्तम्**= बहुप्रजायुक्तम् (रयिं=धनम्) ४ ५३ ७ बह्वच प्रजा विद्यन्ते यस्य तम् (रयिं=धनम्) ४ ५१ १० **प्रजावन्तः**= बह्वच सुसन्तानराष्ट्राख्या प्रजा विद्यन्ते येषान्ते (मनुष्या) प्र०—अत्र भूम्न्यर्थे मतुप् ३ ५६ **प्रजावान्**=सन्तानवान् (गातु =भूमि) ३ ५४ १८ बह्वच प्रजा विद्यन्ते यस्य स (परमेश्वर) ३ ५६ ३ बह्वच प्रजा विद्यन्ते यस्मिन् स (भग =ऐश्वर्यम्) ३ ३० १८ [प्रजाप्राति० भूम्न्यर्थे मतुप्]

प्रजासनि प्रजा सनति येन तत् (अपत्यम्) १९ ४८. [प्रजोपपदे पण सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसन-रक्षिमथाम्' अ० ३ २ २७ सूत्रेण इन् प्रत्यय.]

प्रजिगतः प्रकर्षेण भृश प्राप्नुत प्र०—अत्र यङन्तात् परस्य लट शतृ यङो लुक् 'वाच्छन्दसि' इत्यभ्यासस्येत्वम् १ १५० २ **प्रजिगाति**=प्रकर्षेण गच्छति ६ ६ १ प्रकृष्ट-तया प्रशसति १ ८७ ५ प्रकर्षेण स्तौति ३ २७ १ [प्रपूर्वाद् गा स्तुतौ (जु०) धातोर्यङन्ताच्छतृ । यङो लुक् च । अन्यत्र लट्]

प्रजिन्व प्रकृष्टतया प्रीणीहि ३ १५ ६ **प्रजिन्वन्**= प्रकृष्टतया तर्प्पयन्तु १ ७१ १ [प्रपूर्वाज् जिवि प्रीणनार्थे (भ्वा०) धातोर्लोट् । अन्यत्र लङ् । अडभावश्छान्दस]

प्रजिहीते प्रकर्षेण प्राप्नोति १ १६६ ५ [प्रपूर्वाद् ओहाङ् गतौ (जु०) धातोर्लट्]

प्रजुजुषुः प्रकृष्टतया सेवेरन् १ १५२ ५ [प्रपूर्वाज् जुषी प्रीतिसेवनयो (तुदा०) धातोर्लिट् । व्यत्ययेन परस्मै-पदम्]

प्रजुहोमि प्रकर्षेण क्षिपामि १ १६२ १९

प्रज्ञानम् प्रजानाति येन तद् बुद्धिस्वरूपम् (मन) ३४ ३ उत्कृष्ट ज्ञान वाला (मन =मन) स० प्र० २४६, ३४ ३ **प्रज्ञानाय**=प्रकृष्टज्ञानवर्द्धनाय भा०—प्रज्ञादानाय ३० १० [प्र+ज्ञा अवबोधने (क्रया०) धातो करणे ल्युट् । प्रज्ञान ब्रह्म ऐ० आ० २ ६]

प्रज्ञानीः प्रज्ञापिनी व्यवहारसाधिका (दिश) ऋ० भू० ५ [प्र+ज्ञा अवबोधने (क्रया०) धातोर्ल्युडन्तान् ङीप्]

प्रज्ञेषम् प्रकर्षेण जानीयाम् प्र०—जानातेर्लेटि सिपि रूपम् २० २५ [प्र+ज्ञा अवबोधने (क्रया०) धातोर्लेटि सिपि च रूपम्]

प्रणक् प्रणश्यतु प्र०—अत्र लोडर्थे लुङ् 'मन्त्रे घस-ह्वरणश०' अ० २ ४ ८० अनेन सूत्रेण च्लेर्लुक् च १.१८ ३ प्रणष्टो भवेत् २ २३ १२ प्रणाशयेत् ७ ५६ ९ [प्र+णश् अदर्शने (दिवा०) धातोर्लुङ् । 'मन्त्रे घसह्वरणश०' इति च्लेर्लुक्]

प्रणयति प्राप्नोति २ २६ ४ डालता है स० वि० २०९, अथर्व० ९ ६ १४ **प्रणयन्ति**=प्रकर्षेण प्राप्नुवन्ति १ ८३ २ **प्रणयन्तु**=प्रीणयन्तु ७ १७ **प्रणयसि**= प्रापयसि १ १२९ १ [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लट्]

प्रणवैः ओङ्कारैः १९ २५ [प्रणव =अमृत वै

प्रतिचक्ष्येव प्रत्यक्ष दृष्ट्वेव १ १२४ ८. [प्रतिचक्ष्य-इवपदयो समास । प्रतिचक्ष्येति व्याख्यातम्]

प्रतिजन्यानि प्रत्यक्षेण जनितु योग्यानि (लोक-लोकान्तराणि) ४ ५० ७ [प्रतिपूर्वाज् जनी प्रादुर्भावे (दिवा०) धातो 'तकिशसि०' वा० सूत्रेण यत्प्रत्यय']

प्रतिजन्यानि जन जन प्रति योग्यानि (धनानि) ४ ५० ६ [प्रति-जन्यपदयो समास]

प्रतिजरन्ते स्तुवन्ति ५ ८० १ [जरते अर्चतिकर्मा निघ० ३ १४]

प्रतिजागरासि प्रत्यक्ष सर्व कामो मे जागर्ती रहे स० वि० १३८, अथर्व० १४ २ ३१ [प्रति+जागृ निद्राक्षये (अदा०) धातोर्लेट् । 'लेटोऽडाटौ' इत्याडागम]

प्रतिजागृहि यजमान प्रबोधयाऽविद्यानिद्रा पृथक्कृत्य विद्याया जागरूक कुरु १८ ६१ अविद्यानिद्रा त्यक्त्वा विद्यया चेत १५ ५४ अविद्याऽन्धकारनिद्रात सर्वान् जीवान् पृथक्कृत्य विद्यार्कप्रकाशे जागृतवान् कुरु ऋ० भू० ३०५, १५ ५४ [प्रति+जागृ निद्राक्षये (अदा०) धातोर्लोट्]

प्रतिजानते प्रतिज्ञया व्यवहारस्य साधकाय (सज्जनाय) ३ ४५ ४ [प्रति+ज्ञा अवबोधने (क्रया०) धातो. शतृ]

प्रतिजूतिवर्पस प्रतीत जूतिर्वेगवद् वर्पो रूप येषा ते (राजपुरुषा) ३ ६० १ [प्रति-जूति-वर्पस्-पदाना समास जूति =जु वेगिताया गतौ (सौत्रो धातु) धातो क्तिया 'ऊतियूतिजूति०' अ० ३ ३ ९७ सूत्रेण क्तिन् उदात्तश्च निपात्यते । वर्प =रूपनाम निघ० ३ ७]

प्रतितिष्ठामि प्रतिनिधिभावेन तिष्ठामि भा०—सर्वभूत्यो भवामि २०.१० [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लट्]

प्रतिदधानेभ्यः ये शत्रून् प्रति शस्त्राणि दधति तेभ्य (सैनिकेभ्य) १६ २२ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो शानच्]

प्रतिदह प्रत्यक्ष भस्मीकुरु १५ ३७ पुन पुनर्दहति प्र०—अत्र व्यत्यय' १ १२ ५ [प्रति+दह भस्मीकरणे (भ्वा०) धातोर्लोट्]

प्रतिदीधिम प्रतीत्या प्रकाशयेम ३३ ४१ [प्रति+दीधीङ् दीप्तिदेवनयो (अदा०) धातोर्लिङ्]

प्रतिदुवस्व प्रत्यक्ष सेवस्व ५.४९ २ [प्रति+दुवस्यति परिचरणकर्मा (निघ० ३ ५) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

प्रतिदुहीयत् प्रतिपादयन् (इन्द्र =राजा) २ ११ २१ [प्रति+दुह प्रपूरणे (अदा०) धातो शतरि छान्दस रूपम्]

प्रतिदृक्षत प्रत्यक्ष दृश्यन्ते १ ४८.१३ [प्रति-दृशिर् प्रेक्षणे (भ्वा०) धातोर्लृट् । वर्णो विकरणव्यत्ययश्छान्दस । व्यत्ययेनात्मनेपद-च]

प्रतिदोषम् यथा रात्रि रात्रि प्रति सूयमन्त्रा ६.७१ ४ प्रति-जन यो दोषन्तम् प्र०—अत्रोत्तरपदलोप ३ ४ ६. रात्रि रात्रि प्रति, प्र०—अत्र राजेत्यनुवर्तमानत्वाद् दिवसस्यापि ग्रहणमस्ति प्रतिदिवसमित्यर्थ 'दोषेति रात्रिनामसु पठितम्' निघ० १ ७, १.३५.१० [प्रति-दोषापदयो समास दोषेति रात्रिनाम निघ० १.७.]

प्रतिद्रवन्ती प्रत्यक्ष जानन्ती गच्छन्ती वा (देवी=विदुषी) ५ ४१ १२ [प्रति+द्रु गतौ (भ्वा०) धातो. शतरन्तान् ङीप्]

प्रतिधत् प्रतिदधाति ४.२७.५. [प्रति+डुधाञ् धारणपोषणयो (जु०) धातोर्लेट् । विकरणव्यत्ययेन श]

प्रतिधर्ता प्रत्यक्ष धारक (त्रिवृत्=नियुत्) १५ १० प्रतीत्या धर्ता (बृहस्पति=सूर्य) १५ १४ [प्रति+धृञ् धारणे (भ्वा०) धातो कर्तरि तृच्]

प्रतिधातवे प्रतिधर्तुम् ८ २३ प्रतिधातुम् प्र०—अत्र 'तुमर्थे सेसेन०' इत्यनेन सेसेन्प्रत्यय. १ २४ ८ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातोस्तुमर्थे तवेन्-प्रत्यय]

प्रतिधिना प्रतिदधाति यस्मिंस्तेन (पृथिव्या=भूगर्भ-विज्ञानेन) १५ ६ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो 'कर्मण्यधिकरणे ये' ति कि प्रत्यय]

प्रतिधीयताम् प्रतिधीयन्ताम् प्र०—अत्र वचनव्यत्ययेनैकवचनम् ३६ ११ स्थापन करो आर्याभि० २ २३, ३६ ११ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि लोट्]

प्रतिधीयमानम् सम्यग् धियमाणम् (ज्ञानम्) १ १५५ २ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि शानच्]

प्रतिपचता प्रत्यक्ष पचतानि पक्तव्यानि (खाद्यान्नानि) २१ ६० [प्रति-पचतपदयो समासे शेलोपश्छन्दसि पचत=डुपचष् पाके (भ्वा०) धातोरौणादिक अतच्]

प्रतिपत् पद्यते विचार्यते योऽर्थविषय स पत्, पत पत प्रतीति प्रतिपत् (इन्द्र =सभासेनापति) ७ ३८ प्रतिपद्यते प्राप्यते या सा (लक्ष्मी) १५ ८ [प्रति-पत्पदयो समास । पत्-पद गतौ (दिवा०) धातो कर्मणि क्विप्]

प्रतिपदे ऐश्वर्याय १५ ८ [प्रतिपूर्वात् पद गतौ

तम् (उत्तमाऽन्नम्) ५.३४.१. प्रकर्षेण दुःखात्तारक व्यवहारम् ५.५५ ३ पाकस्य सन्तारकम् (पाचकम्) भा०—पाक-कर्त्तारम् १२ २६ प्रतरन्ति येन तत् (आयु =जीवनम्) ४ १२.६ प्रकृष्टम् (पुरुषार्थमाश्रित्य) १ ९४ ४ पुष्कलम् (आयु =जीवनम्) २ ३२.१ शत्रूणा बलोल्लङ्घनम् ६ ४७ ७ प्रतरति शत्रुबलानि येन तत्सैन्यम् १ १४१ १३ पारस्य सन्तारकम् (पाककर्त्तार जनम्) १२ २६ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो 'ऋदोरप्' इत्यप्प्रत्यय]

प्रतराम् प्रतरन्त्युल्लङ्घयन्ति शत्रुबलानि यया नीत्या ताम् १७ ५१ [प्रतर व्याख्यातम् । तत स्त्रिया टाप्]

प्रतवसः प्रकृष्टानि तवांसि बलानि सैन्यानि येषा ते (नृतमास =नायका जना) १ ८७ १ **प्रतवसे**=प्रकृष्टबलाय (वाताय=विज्ञानाय) ४ ३ ६ [प्र-तवस्पदयो समास । तवस् वलनाम निघ० २ ९]

प्रतस्थुः प्रतिष्ठन्ते २ १५ ५ [प्र+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लिट्]

प्रतारि प्रकर्षेण प्लूयते ४ १२ ६]प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो कर्मणि लुङ्]

प्रतारिषत् प्रकृष्टतया वर्द्धयेत् ४ ३९ ६ **प्रतारिषः**=सन्तारयसि ३४ ८ **प्रतारिष्टम्**=प्रकर्षेण वर्धयतम् ३४ ४७ प्रयत्नेन पारयतम् १ १५७ ४ **प्रतारीः**=प्रतारय उल्लङ्घय ६ ८ ७ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लेटि सिपि च रूपम् । 'सिव् बहुल णिद् वक्तव्य' इति वा० सूत्रेण सिपो णित्वेन वृद्धि]

प्रति आभिमुख्येन १ ४८ २ वीप्सायाम् १ १६९ ७ प्रतिनिधौ २ १ १५ क्रमार्थे १ ९२ १ योगे १ ५५ १ क्रियार्थे पश्चादर्थे १ १४ प्रत्यक्षे १५ ३७ इत्थभूताख्याने १ १९ व्याप्तौ २० ३७ प्रतीतार्थे १ २५.२० क्रियायोगे १ १६ वीप्सार्थे, अ०—पुन पुन १ १२ ५ प्राप्त्यर्थे १ ५७ ४ प्रतिवन्धने १ ८८ ६ इन्द्रियागोचरेऽर्थे अ०—इत्थभूतम् प्र०—प्रतीत्येतस्य प्रातिलोम्य प्राह नि० १ ३, १.९ ४ [अभि इत्याभिमुख्यम्, प्रतीत्यस्य प्रातिलोम्यम् नि० १ ३]

प्रतिकामम् काम काम् प्रति (सोम) ३ ४८.१ काम काम प्रतीति प्रतिकामम् भा०—प्रतिक्षण सुखम् १९ ५१ [प्रति-कामपदयो समास]

प्रतिक्षत्रे धर्मेण प्रतीते क्षत्रे विद्याधर्मप्रचारिते देशे ऋ० भू० २२०, २० १० [प्रति-क्षत्रपदयो समास]

प्रतिक्षियन्तम् प्रत्यक्ष निवसन्तम् (वायुम्) ११.२३ पदार्थ पदार्थ प्रति वसन्तम् (अग्निम्) २.१०.४ [प्रतिक्षियन्पदयो समास । क्षियन्=क्षि निवासगत्यो (तुदा०) धातो शतृप्रत्यय]

प्रतिख्यातः ख्यात ख्यात प्रतीति (वात =वाह्यो वायु) ८ ५८ [प्रति-ख्यातपदयो समास. । ख्यात =ख्या प्रकथने (अदा०) धातो क्त]

प्रतिगात् प्रत्येति १.१०४ ५ [प्रति+इण् गतौ (अदा०) धातोर्लुङ् । अटोऽभाव । 'इणो गा लुङी' ति गादेश]

प्रतिगृभाय प्रतीत्या गृहाण ६.४७ २८ प्रतिगृहाण ४ ४ १५ [प्रतिपूर्वाद् ग्रह उपादाने (क्रया०) धातोर्लोट् । 'छन्दसि शायजपि' इति श्न स्थाने शायजादेश । धातोर्हकारस्य भकारो 'हृग्रहोर्भश्छन्दसि' वा० सूत्रेण]

प्रतिगृभ्णन्ति प्रतिगृह्णन्ति २५.३७ **प्रतिगृभ्णाति**=प्रतिगृह्णाति १ ५५ २ **प्रतिगृभ्णातु**=प्रतिगृह्णाति अ०—प्रतिगृभ्णाति प्र०—अत्र हृग्रहोर्भश्छन्दसि हस्य भत्व वक्तव्यम् अ० ५ २ ३२ इति हकारस्य स्थाने भकार लडर्थे लोट् च १ १६ **प्रतिगृभ्णीत**=स्वीकुर्वीत १२ ३५ [प्रति+ग्रह उपादाने (क्रया०) धातोर्लेट् । हस्य भकारादेश । अन्यत्र लोट् लिड् चापि]

प्रतिगृह्णतः प्रतिग्रहण करने हारो (गृहस्थ जनो) को स० वि० १६७, अथर्व० ९ २.३ १६ [प्रति+ग्रह उपादाने (क्रया०) धातो शतृप्रत्यय]

प्रतिगृह्णामि प्रतिग्रहण करता हूँ स० वि० १६७, अथर्व० ९ २ ३ १५ [प्रति+ग्रह उपादाने (क्रया०) धातोर्लट्]

प्रतिगृह्य प्रत्यक्षेण दत्त्वा गृहीत्वा च १ १२५ १ [प्रति+ग्रह उपादाने (क्रया०) धातो क्त्वा । समासे क्त्वो ल्यप्]

प्रतिचक्षणाय प्रत्यक्ष कथनाय ६ ४७ १८ [प्रति+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्ल्युट् । 'बहुल सज्ञाछन्दसोरिति वक्तव्यम्' अ० २ ४ ५४ वा० सूत्रेण ल्याङ्आदेशस्य प्रतिषेध]

प्रतिचक्ष्य निषेध्य २ २४ ७ प्रत्यक्षेण प्रत्याख्याय २.२४ ६ [प्रति+चक्षिङ् व्यक्तायां वाचि (अदा०) धातो क्त्वा । समासे क्त्वो ल्यप् । 'वर्जने प्रतिषेधो वक्तव्य' इति ख्याङ् न भवति]

प्रतिचक्ष्या प्रत्यक्षेण द्रष्टु योग्या (उषा) १.११३ ११ [प्रति+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्ण्यत् । स्त्रिया टाप्]

प्रतिरः=प्रकृष्टतया प्लव दु खात्पार गच्छ ३.४० ३ **प्रतिरेत**=प्रवर्धये ७ ५८ ३ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लोट्। व्यत्ययेन शप स्थाने श। अन्यत्र लट्, लङ्, लिङ् च। 'प्रतिरते' प्रयोगे व्यत्ययेनात्मनेपदम्। प्रतिरन्तु प्रवर्धयन्तु। नि० १२ ३७ प्रतिरते=प्रवर्धयते नि० ११.६]

प्रतिरक्षन् प्रत्यक्षतया पालयन् (गृहस्थो राजजन प्रजाजनो वा) ८ २४ [प्रति+रक्ष पालने (भ्वा०) धातो शतृप्रत्यय]

प्रतिरन् प्रकर्षेण दु खात्तरन् (नमस्य =पूजितु योग्यो विद्वान्) १ ४४ ६ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो शतृ। व्यत्ययेन श]

प्रतिरवेभ्यः ये रवान् प्रति रवन्ति शब्दायन्ते तेभ्य (पुरुषेभ्य) ३८ १५ [प्रति+रु शब्दे (अदा०) धातोरच्-प्रत्यय। प्राणा वै प्रतिरवा प्राणान् हीद सर्व प्रतिरतम् श० १४ २ २ ३४]

प्रतिरूपः तदाकारवर्त्तमान (इन्द्र =जीव) ६.४७ १८ [प्रतिरूपपदयो समास। य आदित्ये (पुरुष) स प्रतिरूप जै० उ० १ ८ २ ४]

प्रतिलामि प्रत्यक्षतया स्निह्यामि २३ २४ [प्र+तिल स्नेहने (तुदा०) धातोर्लट]

प्रतिलोभयन्ती प्रत्यक्ष मोहयन्ती (स्वसेना) १७ ४४ [प्रति+लुभ गार्ध्ये (दिवा०) धातोर्णिजन्ताच्छतृ। तत स्त्रिया ङीप्। प्रतिलोभयन्ती प्रतिलोभयमाना नि० ६ ३१]

प्रतिवद प्रत्यक्षतयोपदिश १ १६ **प्रतिवदत्**=प्रतिवदेत् १ ११६.६ [प्रति+वद व्यक्तायां वाचि (भ्वा०) धातोर्लोट्। अन्यत्र लेट्]

प्रतिवस्तोः दिन दिन प्रति अ०—प्रतिदिनम् भा०—नित्यम् प्र०—वस्तोरित्यहर्नामसु पठितम् निघ० १ ६, ३ ८ [प्रति-वस्तो पदयो समास। वस्तो अहर्नाम निघ० १ ६]

प्रतिविध्य प्रतिताडय १३ १३ [प्रति+व्यध ताडने (दिवा०) धातोर्लोट्। 'ग्रहिज्या०' सूत्रेण सम्प्रसारणम्]

प्रतिवेत्तु प्रतिजानातु अ०—प्रतिजानन्तु १ १६ पश्चाद् जानातु ज्ञापयतु वा प्र०—प्रतीत्येतस्य प्रातिलोम्य प्राह नि० १ ३, १ १४ अ०—यथावज्जानन्तु १ १६ [प्रति+विद ज्ञाने (अदा०) धातोर्लोट्]

प्रतिवेदयन् स्वगुण प्रत्यक्षतया प्रज्ञापयन् (प्राज्ञो जन) १ १६२ ४ विज्ञापयन् (अज =पशुविशेष) २५ २७. [प्रति+विद ज्ञाने (अदा०) धातोर्णिजन्ताच्छतृ]

प्रतिवेशाः प्रतीता वेशा धर्मप्रवेशा येषा ते (सज्जना) ११ ७५ विरुद्ध-व्यवहारा. (असज्जना.) प० वि० प्रतिकूलाः (प्रजाजना) ऋ० भू० २६८, अथर्व० १६ ७ ७ [प्रति-वेशपदया समास। वेश =विश प्रवेशे (तुदा०) धातोर्घञ्]

प्रतिवोचे प्रतिवेदयमुपदिशेय वा ४.५ १० [प्रति+वच परिभाषणे (अदा०) धातोर्लुट्। अडभाव। व्यत्ययेनात्मनेपदम्]

प्रतिश्रवाय य प्रतिशृणोति प्रतिजानीते तस्मै (भा०—अध्यापकाय) १६ ३४ [प्रति+श्रु श्रवणे (भ्वा०) धातोरच्]

प्रतिश्रुत्कायै प्रतिज्ञाय्यै (क्रियायै) ३० १६. प्रतिश्राविकायै (ध्वन्यात्मिकायै क्रियायै) २४ ३२

प्रतिश्रृणीहि प्रतिहिन्धि ३ ३०.१७ [प्रति+श्रु हिंसायाम् (क्र्या०) धातोर्लोट्]

प्रतिष्कभे प्रतिष्कम्भते प्रतिबध्नाति शत्रून् येन कर्मणा तस्मै प्र०—अत्र सौत्रात् स्कम्भु-धातो प्रतिपूर्वात् क्विप् १.३६ २ प्रतिष्टम्भनाय पराङ्मुखतया पराजयकरणाय च ऋ० भू० १५१. शत्रुओं के वेग को थामने के लिए आर्याभि० १ २२, ऋ० १ ३ १८.२ [प्रति+स्कम्भु (सौत्रो धातु) धातो क्विप्]

प्रतिष्टोभति प्रतिबन्धेन बध्नाति १ ८८ ६ **प्रतिष्टोभन्ति**=प्रत्यक्षतया स्तुवन्ति ५ ८४ २ प्रस्तभ्नन्ति प्र०—अत्र व्यत्ययेन परस्मैपदम् १ १६८ ८. [प्रति+ष्टुभु स्तम्भे (भ्वा०) धातोर्लेट्]

प्रतिष्ठ प्रतिष्ठनि वा प०—अन्याऽन्त्यपक्षे व्यत्ययो लडर्थे लोट् च अ०—कृषयेम यज्ञ विद्या च प्रतिष्ठापय २ १३ **प्रतिष्ठत**=प्रकृष्टतया प्रतिष्ठा प्राप्नुत अ०—प्रतिष्ठध्वम् प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति नियमात् 'समवप्रविभ्य स्थ' अ० १ ३ २२ इत्यात्मनेपद न भवति १ १५ ६ **प्रतिष्ठात्**=प्रतितिष्ठति २ १५ ७ [प्र+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोट्। 'पाघ्राध्मा०' इति शिति तिष्ठादेश। 'समवप्रविभ्य स्थ.' इत्यात्मनेपद न भवति छन्दसि सर्वविधीना विकल्पनात्। 'प्रतिष्ठात्' प्रयोगे लेट्]

प्रतिष्ठा प्रतिष्ठन्ति यस्या सा (सत्क्रिया) १४ २३ **प्रतिष्ठायै**=सर्वत्र सत्काराय १५ ६४ सत्कृतये भा०—सत्काराय १३ १६ प्रतितिष्ठन्ति सत्कार प्राप्नुवन्ति यस्या तस्यै (सत्क्रियायै) २ २५ [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०)

(दिवा०) धातो सम्पदादित्वात् क्विप्]

प्रतिपप्रथे प्रत्यक्ष प्रख्याति २ २४ ११ [प्रति+प्रथ प्रख्याने (भ्वा०) धातोर्लिट्]

प्रतिपश्यति प्रत्यक्ष देखता है स० वि० २०६, अथर्व० ६.६ १ ३ [प्रति+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लट्]

प्रतिपस्थानः य प्रस्थान गमन प्रति वर्त्तते स (व्यवहार) १८ १६ [प्रति-प्रस्थानपदयो समास। प्रस्थानम्=प्र+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्ल्युट्। पापीय प्रतिप्रस्थानम् मै० ४ ६ २]

प्रतिप्रसिस्रते प्रत्यक्ष प्रसरन्ति गच्छन्ति ५ ११ [प्रति+प्र+सृ गतौ (जु०) धातोर्लट्। अभ्यासस्येत्वमात्मनेपदञ्च छान्दसम्]

प्रतिबुद्धाः प्रतीतेन ज्ञानेन युक्ता (जना) १ १६१ ५ [प्रति+बुध अवगमने (दिवा०) धातो क्त]

प्रतिभूषति प्रत्यक्षतयाऽलङ्करोति १ ४६ १२, ६ ५२ ८ [प्रति+भूष अलङ्कारे (भ्वा०) धातोर्लट्]

प्रतिभृतस्य धृत धृत प्रति वर्त्तमानस्य (भृत्यवर्गस्य) ४ २० ४ [प्रति-भृतपदयो समास। भृतम्=डुभृञ् धारणपोषणयो (जु०) धातो क्त]

प्रतिमन्वानः प्रत्यक्षेण विजानन् (परमेश्वर) २३ ५२ [प्रति+मनु अवबोधने (तना०) धातो शानच्]

प्रतिमा प्रतिमीयन्ते परिमीयन्ते सर्वे पदार्था यया सा भा०—परिमाणसाधन पदार्थतोलनार्थम् (वस्तु) १५ ६५ प्रतिमीयते यया तत्परिमापक सदृश तोलनसाधन प्रतिकृतिराकृतिर्वा ३२ ३ प्रतिमीयते यया क्रियया सा १४ १८ परिमाण, सादृश्य वा मूर्त्ति स० प्र० ४३२, ३२ ३ प्रतिनिधि प्रतिकृति, प्रतिमान तोलनसाधन, परिमाण, मूर्त्यादिकल्पनम् ऋ० भू० ३००, ३२ ३. प्रतिमीयतेऽनया सा (यया परिमाण क्रियते) ऋ० भू० १४७, ऋ० ८ ७ १८० ३

प्रतिमाम्=प्रतीयन्ते सर्वे पदार्था यया ताम् (बुद्धिम्) भा०—परिमाणम् १३ ४१ [प्रति=माङ् माने शब्दे च (जु०) धातो स्त्रियाम् 'आतश्चोपसर्गे' इति अङ्, ततष्टाप्। असौ वै लोक प्रतिमैष ह्यन्तरिक्षलोके प्रतिमित इव श० ८ ३ ३ ५]

प्रतिमानम् परिमाणसाधनम् ४ १८ ४ सादृश्य परिमाण वा १ ३२ ७ समन्तात् प्रतिमीयते परिणीयते प्रतिक्रियते येन तत् (स्व=सुखमन्तरिक्ष वा) १ ५२ १२ प्रतिमीयते यत् (जगत्) १ १०२ ८ अतिसमर्थानामुपमा १ १०२ ६ परिमाणसाधक (इन्द्र=परमेश्वरो विद्युद्वा) २ १२.६ परिमाणसाधकम् (ज्ञानम्) ३ ३१ ८ प्रतिमान अर्थात् परिमाण का कर्त्ता (ईश्वर) आर्याभि० १ १३, ऋ० १ ४.१४ १२. [प्रति+माङ् माने (जु०) धातो करणे ल्युट्]

प्रतिमिताम् प्रतिमान अर्थात् एक द्वार, कोण और कक्ष के सम्मुख दूसरे द्वार, कोण और कक्ष वाली (शाला) को स वि० १६६, अथर्व० ६ २.३ १ [प्रति+माङ् माने (जु०) धातो क्त। 'घतिस्यति०' इत्वम्। स्त्रिया टाप्]

प्रतिमिमाति प्रतिगच्छति १ १६४ २६ [प्रति+माङ् माने (जु०) धातोर्लट्। व्यत्ययेन परस्मैपदम्]

प्रतिमिमीते प्रत्यक्षतया रचयति १ १६४ २४. [प्रति+माङ् माने (जु०) धातोर्लट्]

प्रतिमुचः प्रत्यक्षतया छोडे स० वि० १६६, अथर्व० ६ २ ३ २४ [प्रति+मुच्लृ मोचने (तुदा०) धातोर्लङ्। अडभावश्छान्दस। 'शे मुचादीनाम्' इति नुमागमोऽपि न भवति, आगमशासनस्यानित्यत्वात्]

प्रतिमुचीष्ट प्रतिमुञ्चत ७ ५६ ८ [प्रति+मुच्लृ मोचने (तुदा०) धातोराशिषि लिङ्। 'छन्दस्युभयथे' ति सार्वधातुकत्वात् सलोप]

प्रतिमुच्यते प्रत्यक्षतया त्यजति ५ ८१ २ प्रकाश्यते १२ ३ [प्रति+मुच्लृ मोचने (तुदा०) धातो कर्मणि लट्]

प्रतिमुञ्चमानाः मुञ्चन्ते आभिमुख्य ये प्रतीत मुञ्चन्ते त्यजन्ति ते (असुरा=दुष्टा मनुष्या) २ ३० [प्रति+मुच्लृ मोचने (तुदा०) धातो शानच्]

प्रतिमै प्रतिमातुम् ३ ६० ४ (प्रति+माङ् माने (जु०) धातोरतुमर्थे कै प्रत्ययश्छान्दस]

प्रतिमोदध्वम् प्रत्यक्षतयाऽऽनन्दयत १२ ७७ [प्रति+मुद हर्षे (भ्वा०) धातोर्लोट्]

प्रतियन् प्राप्नुवन्ति ३ ४५ **प्रतियन्ति**=प्राप्नुवन्ति १.१८० ४. प्रापयन्ति १ ११६ २ [प्रति+इण् गतौ (अदा०) धातोर्लङ्। आटोऽभावश्छान्दस। अन्यत्र लट्]

प्रतिर प्रकृष्टतया तारय ५ ३३ सन्तारय १ ६४ १६ विस्तारय ३ १७ २ क्लेश मत होने दे आर्याभि० २ १८, ३ ५५ **प्रतिरत**=निष्पादयत ७ ५७ ५ **प्रतिरते**=प्रत्यक्ष प्लवते सन्तरति वा प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् विकरणव्यत्ययेन शश्च १ १०४ ४ **प्रतिरन्तु**=सुशिक्षया वर्द्धयन्तु १.८६ २ पूर्ण भोजयन्तु २५ १५ **प्रतिरन्ते**=प्रकृष्टतया तरन्ति उल्लङ्घयन्ति १ ११३ १६ प्रकर्षेणोल्लङ्घयन्ते ३ ५३ ७ सन्तरन्ति १ १२५ ६.

प्रतीची दिक्सोमो देवता काठ० ७२ तै० ३११५२ प्रतीची दिड् मरुतो देवता मै० १.५.४ प्रतीच्येव मह गो० १५१५ या प्रतीची सा सर्पाणाम् श० ३११७. सम्राडसि प्रतीची दिक् तै० स० ४३६२]

प्रतीचीनम् अग्मान् प्रत्यभिमुख प्राप्नुवन्तम् (राजानम्) ५४४१ अविद्यादिदोषेभ्य प्रतिकूलम् भा०—अविद्याध्वान्तौघध्वसनम् (वृजन=योगबलम्) ७१२ पश्चाद्भूतम् (विश्व=सर्व जगत्) ३५५८ **प्रतीचीनः**=पूर्वाऽभिमुख (गृह) स० वि० १६८, अथर्व० ६२३२२. [प्रतीच इति व्याख्यातम्। तत 'विभाषाञ्चेरदिक् स्त्रियाम्' अ० ५४८ सूत्रेण स्वार्थे ख प्रत्यय]

प्रतीतये सुखप्राप्ताय ज्ञानाय वा १३६२० [प्रति+इण् गतौ (अदा०) धातो स्त्रिया क्तिन्]

प्रतीत्येन प्रतीतौ भवेन (वचसा=वचनेन) ४५१४ [प्रतीतिप्राति० भवार्थे यत्। प्रतीति=प्रति+इण् गतौ (अदा०)+क्तिन्]

प्रतूर्तम् अतितूर्णम् भा०—शीघ्रम् ११२ [प्र+त्वरा सम्भ्रमे (भ्वा०) धातो क्तप्रत्यये 'ज्वरत्वर०' सूत्रेण वकारस्य उपधायाश्च स्थाने ऊठ्। प्रतूर्तम्=यद्वै क्षिप्र तत् तूर्त्तम् यत् क्षिप्रात्क्षेपीयस्तत्प्रतूर्त्तम् श० ६३.२.२.]

प्रतूर्तये सद्योऽनुष्ठानाय ११२६२ **प्रतूर्तिषु**=हनन-कर्मसु सङ्ग्रामेषु ३३६६ **प्रतूर्तिः**=शीघ्रगति १४२३ प्रकृष्टा तूर्णा गतिर्यस्य सः (पराक्रम) ६६ [प्र+त्वरा सम्भ्रमे (भ्वा०) धातो स्त्रिया क्तिन्प्रत्यये 'ज्वरत्वर०' इति सूत्रेण वकारस्योपधायाश्च स्थाने ऊठ्। सवत्सरो वाव प्रतूर्ति श० ८४.१ १३]

प्रतूर्वतः शीघ्र कर्त्तु (मित्रस्य) ५६५४ **प्रतूर्वन्**=हिसन् (स्वस्तिगव्यूति=राजा) ११ १५. [प्र+त्वरा सम्भ्रमे (भ्वा०) धातो शतरि छान्दस रूपम्। प्रतूर्वन्=(त्वरमाण) प्रतूर्वन्नेह्यपक्रामन्नशस्तीरिति पाप्मा वा अशस्तिस्त्वरमाण एह्यवक्रामन् पाप्मानमित्येत् श० ६३२७]

प्रतृदः प्रकर्षेणाऽविद्यादिदोषहिंसक (वसिष्ठो=आप्तो विद्वान् ७३३१४ [प्र+उतृदिर् हिंसानादरयो (रुधा०) धातोरिगुपधलक्षण क]

प्रत्न प्राचीन दीर्घायुष्क (राजन्) ६३६५ **प्रत्नम्**=पाक्तनम् (विद्युदाख्य वह्निम्) ३६८ पुरातनम् (सधस्थ=गर्भाशयम्) ११४८ प्राचीनम् (गृहाश्रमिणम्) ५८१ कारणरूपेणाऽनादिम् (अ०—विश्व राज्यम्) प्र०—नश्च पुरा पुराणे प्राद् वक्तव्य अ० ५४२५ इति पुराणाऽर्थे प्र०—शन्दान त्नप्-प्रत्यय. १३६४ **प्रत्नस्य**=पुरातनस्याऽनादे (पितु=जगदीश्वरस्य) १.८७५ प्राक्तनस्य (रेतस - वीर्यस्य) ३३१.१० **प्रत्नः**—प्राचीनविद्याऽध्येता (होता=गुरुदाता राजा) १११७१ प्रागधीतविद्य (मनुष्य) ६६२४ प्राक्तन (अग्नि=भौतिकमग्निम्) २.७६ **प्रत्नाय**=प्राचीनाय (इन्द्राय=सभाद्यध्यक्षाय) १६१२ [प्रप्राति० 'नश्च पुराणे प्रात्' अ० ५४२५ वा० सूत्रेण पुराणार्थे त्नप् प्रत्यय। प्रत्नम्=पुराणनाम निघ० ३२७ प्रत्न पुराण नि० १२३१ प्रत्नम्=अय वा गर्भ—ऋत्विय प्रत्न सधस्थमासदद् इत्यय वो गर्भ ऋत्वय सनातननसधस्थमासदद् इत्येतत् श० ६४४.१७ स्वर्गो लोक प्रत्न तै० स० १५७१]

प्रत्नया प्रत्न. प्राचीन इव (इन्द्र=दुष्टविदारको राजा) ६१७३ प्राक्तनाना योगिनामिव (योगिजना) ७१२ प्राचीनम् (वा=जलमिव) १.१३२३ प्राचीनेनेव (वह्निना) ५८५ प्रत्न प्राक्तन इव (वैश्वानर=पावक) ३२१२ प्रत्नमिव (वृजन=बलम्) ५४४.१ [प्रत्न व्याख्यातम्। तत इवार्थे 'प्रत्नपूर्व०' इति थाल्प्रत्यय। प्रत्नथा=प्रत्न इव नि० ३१६]

प्रत्नवत् प्रत्न प्राचीनो निधिर्विद्यते यस्मिंस्तत् (रेवत्=प्रशस्तपदार्थयुक्त द्रव्यम्) ११२४६ प्रत्न प्राचीन कारण विद्यते यस्मिंस्तद्वत् (आकाशवत्) ६६५६ प्राचीनवत् (सूर्यवत्) ६१६२१ पुरातनम् (परमात्मानम्) ६२२७ [प्रत्न व्याख्यातम्। ततो मतुप् अथवा तुल्यार्थे वति प्रत्यय]

प्रत्ना पूर्वकालीनि (विज्ञानानि) ६२१६ प्राचीनानि (वस्तूनि) ११०५५ [प्रत्न व्याख्यातम्। तत शेर्लोप-श्छन्दसि]

प्रत्नानि प्राक्तनानि (सख्या=सख्यु कर्माणि) ११०८५ [प्रत्न व्याख्यातम्]

प्रत्नाम् अनादिवर्त्तमाना पुराणीमनादिस्वरूपेण नित्याम् (द्युतम्=कारणस्था दीप्तिम्) प्र०—प्रत्नमिति पुराणनामसु पठितम् निघ० ३२७, ३१५ [प्रत्न व्याख्यातम्। तत स्त्रिया टाप्]

प्रत्नासः प्राक्तना पूर्वमधीतविद्या (विप्रा=मेधाविजना) ४५०१ प्राचीना (राजसुहृद) ६२१५ भूता

धातो· स्त्रियाम् 'आतश्चोपसर्गे' इत्यङ् । ततष्टाप् । प्रतिष्ठा ह्रस्वनाम निघ० ३ २ इमेऽउ लोका प्रतिष्ठा चरित्रम् श० ८.३ १ १० एषा वै कृत्स्ना प्रतिष्ठा यज्ज्योतिरतिरात्र । जै० २ ३१३ प्रतिष्ठा पुच्छ वयसाम् । ऐ० आ० १ ४ २ प्रतिष्ठा यज्ञायज्ञियम् मै० ३ ३ ५ प्रतिष्ठा वै रथन्तरम् ऐ० २ ४ प्रतिष्ठा वै स्विष्टकृत् ऐ० २ १० प्रतिष्ठोदरमन्नाद्यानाम् ऐ० आ० १ ५ १ याश्चतस्र प्रतिष्ठा इमा एव ताश्चतस्रो दिश जै० उ० १ ६ १ २ यत् प्रतिष्ठा त्रयस्त्रिंश इत्यन्तो हि स जै० ३ ३०६]

प्रतिष्ठितम् प्रतिष्ठित रहता हुआ स० प्र० १६, अथर्व० ११ २४ २ **प्रतिष्ठितः**=प्राप्तप्रतिष्ठ (सभेश) २० ६ **प्रतिष्ठिताः**=पाप्तप्रतिष्ठा (मनुष्या) ऋ० भू० १०२, अथर्व० १२ ५ ३ प्रतिष्ठा को प्राप्त हुए (हे स्त्री-पुरुषो) स० वि० १४३, अथर्व० १२ ५ ३ [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त । 'द्यतिस्यतिमा०' इतीत्त्वम्]

प्रतिष्ठिता प्रतिष्ठितानि (ऋग्यजु सामानि) ३४ ५ प्रतिष्ठित होते हुए (ऋग्, यजु, साम, अथर्व वेदो के ज्ञान) स० प्र० १८४, ३४ ५ [*प्रतिष्ठितमिति व्याख्यातम्* । तत शेर्लोपश्छन्दसि]

प्रतिष्ठित्यै प्रतिष्ठायै १५ १२ प्रतितिष्ठन्ति· यन्या तस्यै १५ १० [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो स्त्रिया क्तिन् । द्वाभ्या खनति प्रतिष्ठित्यै तै० म० ५ १ ४ १ द्विपाद्वै यजमान प्रतिष्ठित्यै जै० ३ २६५]

प्रतिष्ठिः प्रतिष्ठित प्रतिष्ठावान् (मज्जन) ६ १८ १२ [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोरौणा० इन् किच्च वहुलवचनात्]

प्रतिसदृक्षासः आप्तसदृशा (मनुष्या) १७ ८४ [प्रति-सदृक्षपदयो समासे जसोऽमुक् । सदृक्=समानोपपदे दृशिर् प्रेक्षणे (भ्वा०) 'दृशे क्सश्च वक्तव्य' अ० ३ २ ६० वा० सूत्रेण क्स । समानस्य सभाव]

प्रतिसदृङ् यस्त त प्रति सदृश पश्यति स (अ०—पुरुष) १७ ८१ [प्रति-सदृक्पदयो समास । सदृक्=समानोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो 'त्यदादिषु' सूत्रेण क्विन् । 'क्विन्प्रत्ययस्य कु' इति कुत्वम्]

प्रतिसर्व्याय ये प्रतीते धर्मे सरन्ति तेषु भवाय (धार्मिकाय जनाय) १६ ३३. [प्रति+सृ गतौ (भ्वा०) धातोरच् प्रत्यय । प्रतिसरप्राति० भवार्थे यत्]

प्रतिस्पशः बाधनानि १३ ११ [प्रति+स्पश बाधन-स्पर्शयो (भ्वा०) धातो. क्विप्प्रत्यय । घञर्थे को वा । वचनव्यत्यय]

प्रतिस्फुर पुरुषार्थय ४ ३ १४ [प्रति+स्फुर सचालने (तुदा०) धातोर्लोट्]

प्रतिहर्य प्रत्यक्षतया कामयस्व १ १४४.७ प्रतिकाम-यते ५ ५७ १ **प्रतिहर्यन्ति**=प्रत्यक्ष कामयन्ते १ १६५ ४. **प्रतिहर्यथ**=पुन पुनर्विजानीथ १ ४० ६ [प्रति+हर्य-धातोर्लोट् । हर्यति कान्तिकर्मा निघ० २ ६ हर्यति गतिकर्मा निघ० २ २४ प्रतिहर्यते प्रतिकामयते नि० ११ १३]

प्रतिहिताभिः प्रत्यक्षेण धृताभि (सेनाभि) १७ ३५ **प्रतिहिताः**=प्रतीत्या धृता (ऋषय =विषय-प्रापका पञ्च ज्ञानेन्द्रियाणि मनो बुद्धिश्च ३४.५५ [प्रति-हितापदयो समास । हिता=डुधाञ् धारणपोषणयो (जु०) धातो क्तप्रत्ययान्ताट् टाप् । 'दधातेर्हि' इति हिरादेश]

प्रतीकम् प्रत्येति येन तत् सैन्यम् ७ ८ १. प्रतीति-करम् (ज्योति) ७ ३६ १ येन प्रत्येति तल्लिङ्गम् २६ ३८ विजयप्रतीतिकरम् (वलम्) ७ ३ ६ [प्रति+इण् गतौ (अदा०) धातो कक्-प्रत्ययो वाहु० औणादिक । प्रतीक प्रत्यक्त भवति प्रतिदर्शनमिति वा नि० ७ ३१ मुख प्रतीकम् श० १४ ४ ३ ७]

प्रतीचः पश्चात् स्थितान् (शत्रून्) ३ ३० ६ यत् प्रत्यग् गच्छति तस्य (तमस) ११७३ ५ [प्रति+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विक्०' इति क्विन् । 'अनिदिताम्०' इति नलोपे द्वितीयावहुवचने शस्-प्रत्यये 'अच' इत्यल्लोपे 'चौ' इति दीर्घे रूपम्]

प्रतीची प्रतीचीन गच्छन्ती (उषा) १ ६२ ६ प्रत्यञ्चतीति (उषा) १ १२४ ७ पश्चिमदिशा प्राप्ता (योषा) ५ ८०.६ पश्चिमा (दिक्) १५ १२ प्रत्यञ्चति प्राप्नोति सा (उष=उषा) ३ ६१ ३ **प्रतीचीम्**= पश्चिमा दिशम् १० १२ पश्चिमा क्रियाम् ५ १२ १ पश्चिम द्वार युक्त (गृह) म० वि० १६८, अथर्व० ६ २ ३ २२ **प्रतीचीः**=पश्चिमा (दिश.) १६ ६४. प्रतीतम——— (प्रजा) ४ ३ २ प्रतिकूल वर्त्तमाना (ज्ञा [illegible]) ३ १८ १ **प्रतीच्यै**=या प्रत्यगञ्चति [illegible] पृष्ठभागा तस्यै (दिशे) २२ २४. [illegible] नम् । तत स्त्रियाम् ' [illegible] । प्रतीची अभिमुखी नि०

५ ४४.१२ [प्रति+इण् गतौ (भ्वा०) धातोर्लट्]

प्रत्यैरयतम् प्रत्यक्षतया प्रापयताम् १ ११७ २२ [प्रति+ईर गतौ (अदा०) धातोर्णिजन्तात्लङ्]

प्रत्यौहताम् प्रतीत्या वितर्केण साध्नुताम् २७ ६ [प्रति+ऊह वितर्के (भ्वा०) धातोर्लङ्। प्रत्यौहत=प्रत्यूहते नि० २ ६]

प्रत्वक्षसः प्रत्यक्षतया शत्रूणा छेत्तार (नृतमास = नायका जना) १ ८७ १ प्रत्यक्षेण सूक्ष्मकर्त्तार (मरुत = मनुष्या) ५ ५७ ४ [प्र+त्वक्षू तनूकरणे (भ्वा०) धातोरौणादिकोऽसुन्प्रत्यय]

प्रथताम् विस्तारयतु १ २२ **प्रथते**=विस्तृणोति १ १२४ ५ प्रकटयति २६ २६ **प्रथन्ताम्**=प्रख्यान्तु २ ३ ५ **प्रथन्तु**=उपदिशन्तु प्र०—अत्र व्यत्ययेन परस्मैपदम् १५ १० [प्रथ प्रख्याने (भ्वा०) धातोर्लोट्। 'प्रथते' प्रयोगे लट्। 'प्रथन्तु' प्रयोगे व्यत्ययेन परस्मैपदम्]

प्रथमच्छत् य प्रथमान् विस्तृतान् छादयति स (परमेश्वर) १७ १७ विस्तीर्ण जगत् को रच के अनन्तरूप से आच्छादित करने वाला (परमात्मा) आर्याभि० २ ३०, १७ १७ [प्रथमोपपदे छद अपवारणे (चुरा०) धातो कर्त्तरि क्विप्। प्रथम =प्रथ प्रख्याने (भ्वा०) धातो 'प्रथेरमच्' उ० ५ ६८ इति अमच्प्रत्यय]

प्रथमजम् प्रथमे वयसि ब्रह्मचर्याश्रमे वा जातम् (ओज =बलपराक्रमम्) ३४ ५१ [प्रथमोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड प्रत्यय]

प्रथमजान् प्रथमाद्विस्तीर्णात् कारणादुत्पन्नान् (पदार्थान्) २४ १६ **प्रथमजाम्**=य प्रथम जायते तम् (मेघम्) प्र०—अत्र 'जनसन०' इत्यादि अ० ३ २ ६७ अनेन जनधातोर्विट् प्रत्यय १ ३२ ३ सृष्टिकालयुगपदुत्पन्न मेघम् १ ३२ ४ यश्च प्रथमानि सूक्ष्मभूतानि जनयति त परमानन्दस्वरूप मोक्षाख्य परमेश्वरम् ऋ० भू० ८६, ३२ ११ सब महत्तत्त्वादि सृष्टि को धारण करके पालन कर रहे (ईश्वर) को स० वि० २१५, ३२ ११ **प्रथमजा**=प्रथमात्कारणाज्जाता (पूर्वोक्ता महत्तत्त्वादय) १ १६४ ३७ प्रथमे विस्तीर्णे ब्रह्मणि जाता प्रसिद्धा (ऋषय =वेदार्थविद पुरुषा) १८ ५२ य प्रथम जात स (सूर्य इव राजा) ६ ७३ १ प्रथमाद्विस्तीर्णात् कारणाज्जाता वायव १५ १२ अस्मदादौ जाता: (ऋषय =वेदविद्यापुरस्सरा परमयोगिन) १८ ५८ आदिजा (ऋषय =वायव प्राणा) १५ १४ प्रथमतो जाता वायव १५ १० आदौ जाता विद्वांस (जना) १५ ११ [प्रथमोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड प्रत्यय। प्रथमजाम्=अत्र प्रथमोपपदे जनी प्रादुर्भावे (दिवा०) धातो 'जनमनखनक्रमगमो विट्' इनि विट्। 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१ सूत्रेण नकारस्याकारादेश]

प्रथमजाम् प्रथमोत्पन्ना वेदचतुष्टयीम् भा०—धर्माचरण-वेद-योगाभ्यास-सत्सङ्गादिभि कर्मभिर्जाता शरीरपुष्टिमात्माऽन्त करणशुद्धि च ३२ ११ **प्रथमजाः**=प्रथमाज्जाता (देव्य =सत्स्त्रिय) ३७ ४ [प्रथमज इति व्याख्यातम्। तत स्त्रिया टाप्]

प्रथमभाजम् य प्रथमान् भजति सेवते तम् (देव=दातार विद्वास जनम्) ६ ४६ ६ [प्रथमोपपदे भज सेवायाम् (भ्वा०) धातो 'भजो ण्वि' अ० ३ २ ६२ सूत्रेण ण्वि। अण् प्रत्ययो वा]

प्रथमम् आदिम कार्यम् १३ ३४ आदौ (दामान=दातार जनम्) ४ ५४ २ विस्तृतमनादि (गर्भ=प्रकृत्याख्यम्) १७ ३० प्रख्यातम् (अग्नि=पावकम्) ३ २६ ५ सब कार्यों मे पहले वर्त्तमान और सब के मुख्य कारण (ईश्वर) को आर्याभि० १ ४०, ऋ० १ ७ ३ ३ विस्तृत विस्तारयितृ (ब्रह्म=सर्वेभ्यो बृहत् परमेश्वरम्) १३ ३ विस्तीर्णम् (केतु=प्रज्ञाम्) १४ १ सर्वोत्कृष्टम् (सभाध्यक्षम्) १ ७७ ३ सब जगत् के आदि-कारण (ईश्वर) को आर्याभि० २ २८, १३ ३ सर्वेष्वग्रगन्तारम् (प्रजापतिम्) १ ३१ ११ जीवनस्याऽऽदिमनिमित्तम् (अग्नि=रूपगुणम्) १ ३५ १ पुर १ १८५ १० आदिम पृथिव्या गमनम् २ १८ २ **प्रथमस्य**=विस्तीर्णस्याऽऽदिमाऽवयवस्य वा १ १२३ ६ आदिमाऽऽश्रमब्रह्मचर्यस्य ३ १५ ४ अनादि सदा मुक्त परमात्मा का स० प्र० ३३०, १ २४ २ **प्रथमः**=प्रख्यातो विद्वान् (जन) १ ८३ ५ विस्तीर्णोऽग्नि १५ २६ आदिम प्रख्यातो वा (सभेश) १ १३४ ६ सर्वस्य प्रथयिता (इन्द्र =सेनापति) प्र०—अत्र 'प्रथेरमच्' उ० ५ ६८, १ १०१ ५ जन्मादे पृथगादिम (जगदीश्वर) १२ १०२ विस्तीर्णगुणकर्मा (अग्नि) २ १० १ यज्ञक्रियायामुपास्य आदिम साधन वा (अग्नि) ३ १५ प्रख्यातिमान् (शिल्पिजन) १ १६३ २. पहिला (विवाहित पति) स० प्र० १५३, १० ८५ ४० अनादिस्वरूपो जगत कल्पादौ सदा वर्त्तमान (अग्नि = विज्ञान स्वरूप ईश्वर) १ ३१ १ कारणरूपेणाऽनादिर्वा कार्येष्वादिम (अग्नि =ईश्वर· सभाध्यक्षो वा) १ ३१ ३ अनादिस्वरूप पूर्व मान्यो वा (अग्नि =ईश्वर) १ ३१ २

(पितर =जनका) ४ २ १६ [प्रत्नं व्याख्यातम् ततो जसोऽसुक्]

प्रत्ने पुरातन्यौ (रोदसी=भूमिसूर्यलोकौ) ६.१७ ७ [प्रत्न व्याख्यातम्। तत स्त्रिया टापि प्रथमाद्विवचने रूपम्]

प्रत्यक्षम् साक्षात्कारता से स० वि० २०८, अथर्व० ९ ६ ११ [प्रति-अक्षिपदयो समासे 'अव्ययीभावे शरत्-प्रभृतिभ्य' अ० ५ ४ १०७ सूत्रेण टच्प्रत्यय]

प्रत्यख्यत् प्रकाशयति ४ १३ १ [प्रति+ख्या प्रकथने (अदा०) धातोर्लुङि 'अस्यतिवक्तिख्यातिभ्य०' इति च्ले स्थाने अङ्]

प्रत्यग्रभीत् प्रतिगृह्णाति २८ २३ [प्रति+ग्रह उपादाने (क्रया०) धातोर्लुङ्। 'हृग्रहोर्भश्छन्दसि' इति हस्य भकारादेश]

प्रत्यग्रभीष्म प्रतिगृह्णीयाम ६ ४७.२२ [प्रति+ग्रह उपादाने (क्रया०) धातोर्लुङ्। हस्य भकारश्छान्दस]

प्रत्यङ् य प्रत्यञ्चति स (जगदीश्वर) १ ५० ५ प्रतिपदार्थमञ्चति प्राप्नोति य स (देव =ईश्वर) ३२.४ य प्रत्यक्षमञ्चति प्राप्नोति स (सोम =निष्पादितौषधिरस) १९ ३ प्रत्यञ्चतीति (विद्वज्जन) १ १४४ ७ पूजितो भव (अ०—राजप्रजाजन) १० ३१. **प्रत्यञ्चम्**=पश्चात्स्थितम् (सेनाध्यक्षम्) १० ८ य प्रत्यञ्चति तम्/(अग्नि=विद्युतम्) ७ १२ १ प्रत्यञ्चन्तम् (अग्निम्) २ १० ५ प्रत्यगञ्चतीति शरीरस्थ वायुम् ११ २४ **प्रतीचः**=पश्चात् स्थितान् (जनान्) ३ ६० ६ य प्रत्यगञ्चति तस्य (तमस = अन्धकारस्य) १ १७३ ५ [प्रति+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्०' इति क्विन्प्रत्यये 'अनिदिताम्०' इति नलोपे 'उगिदचाम्०' नुमि हल्ङ्यादिसयोगान्तलोपयो 'क्विन्-प्रत्ययस्य कु' इति कुत्वे रूपम्। 'प्रतीच' प्रयोगे तु शसि भसज्ञायाम् 'अच' इत्यल्लोपे 'ची' इति दीर्घे रूपम्]

प्रत्यदर्शि प्रत्यक्षतया दृश्यते ४ ५२ १ प्रतियोक्तु दृश्यते १ ९२ ५ [प्रति+दृशिर् प्रेक्षणे (भ्वा०) धातो कर्मणि लुङ्]

प्रत्यदृक्षत प्रतिदृश्यन्ते ४ ५२ ५ [प्रति+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लुङ्। छन्दसि सर्वविधीना विकल्पनात् 'न दृश' इति क्सप्रत्ययस्य प्रतिषेधो न भवति]

प्रत्यधत्तम् प्रत्यक्षतया भरतम् १ ११६ १५ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातोर्लङ्]

प्रत्यधायि प्रतिध्रियते १ १८४ ६ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि लुङ्]

प्रत्यनुगृभ्णातु पश्चात् प्रतिगृह्णातु प्रतिगृह्णाति वा अ०—प्रत्यनुगृह्णातु प्रकृष्टतयाऽनुगत गृह्णाति प्र०—अत्र 'हृग्रहो०' इति हस्य भ., पक्षे लडर्थे लोट् च १ २० [प्रति+अनु+ग्रह उपादाने (क्रया०) धातोर्लोट्। हस्य भकारश्छान्दस]

प्रत्यन्वमदन् प्रत्यक्षतया पुनर्हृष्यन्तु १ ५२ १५ [प्रति+अनु+मदी हर्षे (दिवा०) धातोर्लङ्। व्यत्ययेन शप्]

प्रत्यपद्महि प्रत्यक्षतया व्याप्त्या प्राप्नुयाम ४ २९ [प्रति+पद गतौ (दिवा०) धातोर्लङ्। 'बहुल छन्दसि' इति शपो लुकि श्यनोऽप्यभाव]

प्रत्यभूत्स्महि प्रत्यक्षतया विजानीयाम ४ ५२ ४ [प्रति+भू सत्तायाम् (भ्वा०) धातोश्छान्दस रूपम् व्यत्ययेनात्मनेपदम्]

प्रत्यस्तम् प्रतीक्षितम् (शिर =उत्तमाङ्गम्) १० १४ [प्रति+अस्तु क्षेपणे (दिवा०) धातो क्त]

प्रत्यहन् प्रतिहन्ति १ ३२ १२ [प्रति+हन हिंसागत्यो (अदा०) धातोर्लङ्]

प्रत्यायम् प्रैतीत्या प्राप्नुयाम् प्र०—अत्र लिडर्थे लङ् १ ११ ६ [प्रति+इण् गतौ (अदा०) धातोर्लङ्]

प्रत्याश्रावः य. प्रतिश्राव्यते स (विद्वान् जन) १९ २४ [प्रति+आङ्+श्रु श्रवणे (भ्वा०) धातोर्घञ्]

प्रत्युदायन् प्रत्युदायन्ति, उद्यन्ति प्रतियन्ति वा ३ ३१ ४ [प्रति+उत्+इण् गतौ (अदा०) धातोर्लङ्]

प्रत्युष्टम् प्रतिदग्धव्यम् (रक्ष =विघ्नकारी प्राणी) १ २९ यत् प्रतीत च तदुष्ट दग्ध च तत् (रक्ष =रक्षस्वभावो दुष्टो मनुष्य) १ ७ नित्य प्रजापालनाय तापनीय (रक्ष =परसुखासहो मनुष्य) १ २९ [प्रति+उप दाहे (अदा०) धातो क्त]

प्रत्युष्टाः प्रत्यक्षतया उष्टा दग्धव्यास्ते (अरातय = शत्रव) १ ७ प्रत्यक्ष ज्वालनीया (अरातय =परसुखासीढारो मनुष्या) १ २९ प्रतिदग्धव्या (अरातय) १ २९ [प्रति+उप दाहे (भ्वा०) धातो क्त]

प्रत्येतन प्रतीर्तिं कुरुत ६ ४२ ४ [प्रति+आङ्+इण् गतौ (अदा०) धातोर्लोट्। तप्रत्ययस्य तनवादेश]

प्रत्येति प्रतीत प्रापयति ८ ४ प्रत्यक्ष प्राप्नोति ३३ ६८ प्रतीत प्राप्नोति प्रापयति वा प्र०—अत्राऽन्तर्गतो ण्यर्थ १ १०७ १ प्रत्यक्ष प्राप्नोति विजानाति वा

प्रदधन्युः प्रधरन्त प्र०—अत्र 'नाच्छन्दसि' इति नुडागमो यानुडभाव ४ ३ १२ [प्र+डुधाञ् धारणपोषणयो (जु०) धातोर्लिङि छान्दस रूपम्]

प्रदधिरे प्रकर्षेण दधति १ १५१ २ [प्र+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट्]

प्रदरान् उदराऽवयवान् २५ ७ [प्र+दॄ विदारणे (क्रया०) धातोरप् प्रत्यय 'कृदोरप्' इति]

प्रदशस्यतम् प्रकृष्टतया दत्तम् १ १५८ १ [प्र+दाशृ दाने धातोर्लोट्। धातोर्हल्यवच्छान्दस। विकरणव्यत्ययेन द्विविकरणता]

प्रदातारम् प्रकृष्टतया दानशीलम् (पुरुषम्) ७ ४६ [प्र+डुदाञ् दाने (जु०) धातो कर्तरि तृच्। ताच्छील्ये तृन् वा]

प्रदातुः प्रकृष्टतया शोधयतु (विदुषो जनस्य) प्र०—'दैप शोधने' इत्यस्य रूपम् १ १३ ११ [प्र+दैप् शोधने (भ्वा०) धातो कर्त्तरि तृच्]

प्रदिवः प्राचीन (अग्नि=विद्युत्) ४ ७ ८ [प्रदिव पुराण नि० ८ १८ प्रदिव पुराणनाम निघ० ३ २७]

प्रदिवः प्रकृष्टप्रकाशस्य (परमेश्वरस्य) ६ ६२.८ प्रकृष्टा द्यौ प्रकाशो येषा ते (प्रियाचारा जना) ३ ४३ १ प्रकृष्टान् विद्याविनयप्रकाशान् ३ ३८ ५ सुप्रकाशान् (लोकान्) ४ ६ ४ प्रकर्षेण कमनीयान् (मधोन=धनाढ्यान् जनान्) ६.४४ १२ प्रकृष्टा द्यौ प्रकाशमाना विद्या येषान्ते (सोमा=पदार्था) ३ ३६ २ प्रकर्षण विद्याविनयप्रकाशस्य ३.४७ २ प्रकृष्ट सूर्यात् १ १०९ ६ प्रकर्षेण विद्यादिसद्गुणान् कामयमानान् (मेधाविजनान्) ४ ३४ ३ प्रकृष्टा द्यौ, प्रकाशिता विद्या २ ३ १ प्रकृष्टस्य न्यायप्रकाशस्य १ ५३ २ प्रकृष्टद्युतिमत (विदुषो जनस्य) १ १४१ ३

प्रदिवा=प्रकृष्टप्रकाशवता (केतुना=प्रज्ञया) ५ ६० ८

प्रदिवि=प्रद्योतनात्मकेऽग्नौ ५ ६२ ४ प्रकृष्टाया कामनायाम् ६ २१ ८ प्रकृष्ट-प्रकाशे ३ ४६ ४ प्रकर्षेण कमनीये व्यवहारे ६ ४१ ३ [प्र+दिव्पदयो समास। दिव्=दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु (दिवा०) धातो क्विप्। प्रदिव=पूर्वेष्वप्यहःसु नि० ४ ८]

प्रदिशम् प्रकृष्टा दिशम् १७ ६६ दिशोपदिग्युक्त देशम् २ ४२ २ प्रदिश्यते सर्वैर्जनैस्ताम् (दिशम्) १ ६५ ३

प्रदिशः=दिक्प्रदिक्स्याच्छन्दून् ६ ७५ २ दिशोपदिश ३६ प्रकृष्टगुणयुक्ता दिश २७ १ आग्नेयाद्या उपदिश ३२ ११ ऐशान्यादि उपदिशाएँ, ऊपर नीचे आर्याभि० २ १०, ३२ ११ दिशो विदिशश्च २५ १२ अभ्यन्तरदिश ६ १६ प्रकृष्टा दिश १८ ३६ पूर्वाद्या ऐशान्याद्या वा ७.३५.८. या. प्रदिश्यन्ते ता १८ ६२ उपदिशाओ को न० वि० २१५, ३२ ११ **प्रदिशा**=उपदिशा २० ३६ प्रदेशेन ज्ञानमार्गेण प्र०—अत्र 'घञर्थे कविधानम्' इति क 'सुपा सुलुक्०' इत्याकारादेशश्च १ १०१ ७. वेदादिशास्त्रप्रदेशेन निर्देशेन प्रमाणेन २६ ३२ प्रकृष्टया दिशा निर्देशेन २६ २६ आज्ञया १ १६४ ३६ **प्रदिशि**=प्रदिशन्ति यया तस्याम् (वाचि=वाण्याम्) २६ ३६ उपदिशि २ १२ ७ [प्र-दिश्पदयो समास। दिश=दिश अतिसर्जने (तुदा०) धातो 'ऋत्विक्०' इत्यादिना कर्मणि क्विन् निपात्यते। प्रदिशाप्रयोगे-प्रपूर्वाद् दिश अतिसर्जने (तुदा०) धातो 'घञर्थे कविधानम्' ति क प्रत्यय, तृतीयैकवचनस्य चाकारादेश। प्रदिशो दिगाश्रयाणि भूतानि नि० ११ ३७]

प्रदिशमानः प्रकर्षेणोपदिशन् (भा०=गुरुजन) प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् ३ ३१ २१ [प्र+दिश अतिसर्जने (तुदा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

प्रदिशा प्रकर्षेण बोधयन्ती (देवी=देदीप्यमानौ विद्वांसौ) २६.७ [प्र+दिश अतिसर्जने (तुदा०) धातो 'घञर्थे कविधानम्' ति क। 'सुपा सुलुग्०' इत्याकारादेश]

प्रदिष्टाः या प्रदिश्यन्ते ता (दिश=पूर्वाद्या) ३ ३० १२ [प्र+दिश अतिसर्जने (तुदा०) धातो क्त]

प्रदीध्याना प्रदीप्यमाना (उषा) १ ११३ १०. [प्र+दीधीङ् दीप्तिदेवनयो (अदा०) धातो शानच्, गतस्त्रिया टाप्]

प्रदृप्तिः प्रकृष्टो मोह. ६ ३ २ [प्र+दृप हर्षमोहनयो. (दिवा०) धातो स्त्रिया क्तिन्]

प्रदोधुवत् प्रकृष्टतया कम्पयन् (इन्द्र=वैद्य) २ ११ १७ [प्र+धूञ् कम्पने (क्रया०) धातो शतृप्रत्यय। 'बहुल छन्दसी' ति शप श्लु। यङ्लुगन्ताद्वा शतृ]

प्रदोषम् रात्र्यारम्भे १ १६१ ५ [प्र+दोषापदयो समास। दोषा रात्रिनाम निघ० १ ७]

प्रधनस्य प्रकृष्टस्य धनस्य १ १६६ २ **प्रधने**=प्रकृष्टानि धनानि यस्मात्तस्मिन् (आजा=सङ्ग्रामे) १ ११६ २ [प्र+धनपदयो समास। प्रधन इति सङ्ग्रामनाम, प्रकीर्णान्यस्मिन् धनानि भवन्ति नि० ६ २१]

प्रधयः धारिका धुर १.१६४ ४८ **प्रधीन्**=चक्रस्थानि तीक्ष्णानि कीलकानीव वर्त्तमानान् जगत्कण्टकान्

आदिम साधक (विद्वान् जन) ७ ४४ ४ **प्रथमाः**=आदिमा पृथिव्यादयोऽष्टौ वसव २० १२. पृथुबुद्धय. (विद्वांसो जना) २ ३४ १२ प्रख्याता आदिमा (विप्रा=धीमन्तो जना) ४ २ १५ [प्रथ प्रख्याने (भ्वा०) धातो 'प्रथेरमच्' उ० ५ ६८ सूत्रेण अमच्प्रत्यय। प्रथम इति मुख्यनाम, प्रथमो भवति नि० २ २२ प्रथमम्=परमम् नि० ३ ७]

प्रथमश्रवस्तमः अतिशयेन प्रथम श्रव श्रवणमन्न वा यस्मात् स (रयि=श्री) ४ ३६ ५ [प्रथम-श्रवस्पदयो समासे अतिशायने तमप्। श्रवम् अन्ननाम निघ० २ ७ धननाम निघ० २ १०]

प्रथमा विस्तारकौ (विद्वांसौ स्त्रीपुरुषौ) ३ ४ ७ आदिमौ विद्याबलविस्तारकौ (कवी=अध्यापकोपदेशकौ) १ १८८.७ प्रख्यातौ (विद्वद्भुपदेशकौ) ३.७ ८ [प्रथमप्राति० 'सुपा सुलुक्०' इति सूत्रेण प्रथमाद्विवचनस्याकारादेश]

प्रथमा आदिमा (क्रिया) २५ ६ विस्तृताऽऽदिमा (उषा) १ ११३ ८ प्रख्याता (वैद्या स्त्री) ३३ ५६ [प्रथमप्राति० स्त्रिया टाप्। प्रथम इति व्याख्यातम्]

प्रथमा प्रख्यातानि (धर्म=धर्माणि) ३ १७ १ आदिमानि (असुर्याणि=मेघादीनामिमानि चिह्नानि) ४ ४२ २ [प्रथम-प्राति० शेर्लोपश्छन्दसि]

प्रथमानम् प्रख्यातम् (यानम्) २६ ४. [प्रथ प्रख्याने (भ्वा०) धातोश्शानच्]

प्रथमानि अनादिभूतानि मुख्यानि (धर्माणि) भा०—अनादिकालीनधर्माणि ३१ १६ आदिमानि ब्रह्मचर्याख्यानि १ १६४ ४३ ब्रह्मचर्य-विद्याग्रहण-दानादीनि ६ ७२ १ [प्रथम व्याख्यातम्। ततो नपुंसके प्रथमावहुवचनम्]

प्रथमानाः प्रख्याता (पुरुषा) २० ४० [प्रथ प्रख्याने (भ्वा०) धातो ताच्छील्यादिषु चानश्]

प्रथयन् विस्तारयन् (परमेश्वर) ४ ५३ २ ,प्रकटीकुर्वन् (अग्न्यादिपदार्थविद्यो मनुष्य) ३ १४ ४ **प्रथयन्तः**=प्रख्यापयन्त (विप्रा=मेधाविजना) ५ ४३ ७ [प्रथ प्रख्याने (भ्वा०) धातोर्णिजन्ताच्छतृप्रत्यय]

प्रथयस्व विस्तारय १२ १०९ [प्रथ प्रख्याने (भ्वा०) धातोर्णिजन्ताल्लोट्]

प्रथस्व प्रख्याता भव १३ १७ विस्तारय १ २२ प्रख्याहि ५ ५ ४ विस्तृतमुखो भव ११ २६ प्रख्यातो भव १३ २ [प्रथ प्रख्याने (भ्वा०) धातोर्लोट्]

प्रथस्वतीम् बहु प्रथ प्रख्याति प्रशसा विद्यते यस्यां ताम् (सती स्त्रियम्) १५ ६४. प्रथा प्रख्याता कीर्त्तिर्विद्यते यस्यास्ताम् (विदुषी प्रजापालिका राज्ञीम्) १३ १७. उत्तमविस्तीर्णविद्यायुक्ताम् (स्त्रीम्) १४ १२ [प्रथस्=प्रथ प्रख्याने (भ्वा०) धातोरौणा० असुन्। प्रथस्-प्राति० प्रशसाया भूम्न्यर्थे वा मतुवन्तात् ङीप्]

प्रथः सर्वजगत्-प्रसारक (ईश्वर) ऋ० भू० १६८ [प्रथ प्रख्याने (भ्वा०) धातो कर्त्तरि अच्]

प्रथानाम् विस्तीर्ण-सौन्दर्य-प्रख्याताम् (भार्याम्) ६ ६४ ३ **प्रथाना**=प्रथते तरङ्गैः शब्दायमाना (सिन्धु=नदी) १ ९२ १२ पक्षिशब्दैः शब्दायमाना (उषा) १ ९२ १२ [प्रथ प्रख्याने (भ्वा०) धातो शानच्प्रत्ययान्ताट् टाप्। 'आने मुग्' इति न भवत्यागमशासनस्यानित्यत्वाच्छान्दसत्वाद्वा]

प्रथिना पृथोर्भावस्तेन (अ०—सुविस्तृतेन स्वप्रकाशेन) प्र०—पृथुशब्दादिमनिच् 'छान्दसो वर्णलोपो वा' इति मकारलोप १ ८ ५ [पृथुप्राति० भावे कर्मणि वा 'पृथ्वादिभ्य०' अ० ५ १ १२२ सूत्रेणेमनिच्। मकारलोपश्छान्दस। 'र ऋतोहलादेर्लघोरि' ति ऋकारस्य रेफादेश.]

प्रथिमा पृथोर्भाव (विस्तीर्णपदार्थसमूह) १८ ४ [पृथुप्राति० भावे इमनिज् इति पूर्वपदे व्याख्यातम्। पृथु महान्तम् नि० १२ २३]

प्रथिष्ट प्रथते ५ ५८ ७ [प्रथ प्रख्याने (भ्वा०) धातोर्लुङ्। अडभावश्छान्दस]

प्रथुयामन् बहुप्रापक (विवाहितजन) ६ ६४ ४ [प्रथूपपदे या प्रापणे (अदा०) धातो कर्त्तरि मनिन्]

प्रदक्षिणित् य प्रदक्षिणामेति स (शिल्पिजन) प्र०—अत्र व्यत्ययेनैकवचनम् २ ४३ १ य प्रदक्षिणमेति गच्छति स (जन), प्र०—अत्र इण्-धातो क्विप् 'छान्दसो वर्णलोपो वा' इत्यन्त्यस्याऽकारलोप ३ १९ २ य प्रदक्षिणां नयति स (विद्वान् जन) ५ ६० १ य प्रदक्षिणमेति स (आपूर्ण कलश) प्र०—अत्र शकन्ध्वादेराकृतिगणत्वात् पररूपमेकादेश ३ ३२ १५ या प्रदक्षिणमेति सा (घृताची=रात्रि) प्र०—अत्र 'वाच्छन्दसि' इत्यलोप ४ ६ ३ दक्षिणेन पार्श्वेनैति गच्छतीति (विद्वान् जन) ५ ३६ ४ [प्रदक्षिणोपपदे इण् गतौ (अदा०) धातो कर्त्तरि क्विप्। शकन्ध्वादित्वात् पररूप छान्दसो वर्णलोपो वेत्याकारलोप]

प्रदद्रिरे विदीर्णान् कुर्वन्ति भा०—विदृणन्ति प्र०—व्यत्ययेनाऽऽत्मनेपदम् ३३ ७० [प्र+दृ विदारणे (क्र्या०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

पादपूरणे' अ० ८ १ ६ इति द्वित्वम् १ ४० ७ प्र०—अत्र पादपूरणाय द्वित्वम् १ १२९ ८ [प्र-पदस्य पादपूरणे द्वित्वम्। आ इत्यर्वागर्थे प्र परेत्येतस्य प्रातिलोम्यम् नि० १ ३]

प्रप्रधेहि अतिप्रकृष्टतया धेहि ११ ८३ [प्र+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्। प्र-पदस्य पादपूरणे द्वित्वम्]

प्रप्रपिब प्रकृष्टतया पिब ५ ३८ प्रकृष्टमिव पिब ५ ४१ [प्र+पा पाने (भ्वा०) धातोर्लोट्]

प्रप्रणीतन अतिप्रकर्षेणाऽलङ्कुरुत ५ ५ ५ [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लोट्। तप्रत्ययस्य तनादेश-श्छान्दस]

प्रप्ररोचते अतिप्रकर्षेण प्रकाशते १२ ३४ [प्र+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लट्]

प्रप्रविवाय अतिप्रकर्षेण दूर गमयति ७ ६ ३ [प्र+वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (अदा०) धातोर्लिट्]

प्रप्रशसिषम् अतिप्रकर्षेण प्रशसेयम् २७ ४२ [प्र+शसु स्तुतौ (भ्वा०) धातोर्लुङ। अडभावश्छान्दस]

प्रप्राऽतियन्ति अतिप्रकर्षेण गच्छन्ति ३ ९ ३ [प्र+अति+इण् गतौ (अदा०) धातोर्लट्। 'इणो यण्' इति यणादेश]

प्रप्रुथ्य प्रपूर्य्य ३ ३२ १ [प्र+प्रोथृ पर्याप्तौ (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्। धातोरो-कारस्य ह्रस्वश्छान्दस]

प्रप्रोथाय अत्यन्त पर्याप्ताय (पदार्थाय) २२ ७ [प्र+प्रोथृ पर्याप्तौ (भ्वा०) धातोर्घञ्]

प्रप्लुतः प्रकृष्टगुणैः प्राप्त (समुद्र=अन्तरिक्षम्) ८ ५९ [प्र+प्लुङ् गतौ (भ्वा०) धातो क्त]

प्रफर्व्यम् प्रफर्वितु गमयितु योग्यम् (रथवाहनम्=रथवहनसाधनम्) १२ ७१ [प्र+फर्व गतौ (छान्दसो धातु) धातोर्ण्यत्]

प्रबभसत् प्रकर्षेण प्रदीप्येत् प्रभर्त्सेत् ४ ५ ४ [प्र+भृञ् भर्त्सनदीप्त्यो (जु०) धातोर्लेट्]

प्रबुधाय प्रकृष्टज्ञानवते (जनाय) २२ ७ **प्रबुधे**=जागरिते (समये) ४ १४ [प्र+बुध अवगमने (भ्वा०) धातोरिगुपधलक्षण कर्त्तरि क। 'प्रबुधे' प्रयोगे घञर्थे क प्रत्यय]

प्रबुध्यस्व प्रकृष्ट-ज्ञान और उत्तम व्यवहार को यथावत् जान म० वि० १४०, अथर्व० १४ २ ७५ [प्र+बुध अवगमने (दिवा०) धातोर्लोट्]

प्रबोधयन्ती प्रकृष्टतया जागरणं प्रापयन्ती (उषा) १ ११३ १४ जागरयन्ती (उषा=प्रभातवेला) ४ १४ ३ **प्रबोधयन्तीः**=जागरयन्त्य (उषस=प्रभाता) ४ ५१ ५ [प्र+बुध अवगमने (दिवा०) धातोर्णिजन्ताच्छ-त्रन्ताच्च ङीप्]

प्रब्रवाम प्रकृष्टतयोपदिशेम ४.५८ २ प्रकर्षेणा-ऽध्यापयेमोपदिशेम वा भा०—वेदानध्यापयेम सत्य-मुपदिशेम ३६ २४ **प्रब्रवीत्**=प्रकृष्टतया ब्रूयात् १ १६१ १३ **प्रब्रवीषि**=प्रकर्षेणोपदिशति ४ ४२ ७ [प्र+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लङ्। अडभाव-श्छान्दस.। 'बहुल छन्दसी' ति शपो लुङ् न। अन्यत्र लडि शपो लुक् 'ब्रुव ईट्' इतीडागम। 'प्रब्रवीषि' प्रयोगे लट्]

प्रब्रुवाणः य प्रकर्षेण वाचयत्युपदेशयति वा स (अध्यापक उपदेशको वा) १ ५५ ४ प्रकृष्टतया वदन् (उपदेशक) २ ४२ १ [प्र+ब्रूञ् व्यक्तायां वाचि (अदा०) धातो शानच्]

प्रब्रूहि प्रत्यक्ष कथय १ ६१ १३ [प्र+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर् लोट्]

प्रभञ्जन् य प्रभग्नान् करोति स भा०—हिंसन् (बृहस्पति=सेनापति) १७ ३६ [प्र+भञ्जो आमर्दने (रुधा०) धातो शतृप्रत्यय.]

प्रभर प्रकृष्टतया धर १ ६१ १२ **प्रभरत**=प्रकर्षेण दधाति ४ २६ ४ प्रधरत ३ १० ५ **प्रभरध्वम्**=प्रकृष्टतया धरत ३४ १७ प्रधरध्वम् १ १२२ १. **प्रभरध्वे**=प्रकृष्टतया धरत ५ ५९ ४ **प्रभरन्त**=प्रभरन्ति २ १३ २ प्रदधति १ १७३ ४ **प्रभरामहे**=प्रकृष्टतया पुष्येम २ २० १ प्रकर्षेण धरामहे १६ ४८ **प्रभरे**=प्रकृष्टतया धरे १ ५७ १ प्रकर्षेण धरामि ५ १२ १ [प्र+भृञ् भरणे (भ्वा०) धातोर्लोट्। अन्यत्र लड्लटावपि]

प्रभर्ता प्रकृष्टाना विद्याना धर्त्ता (इन्द्र=सेनेश.) १ १७८ ३ [प्र+भृञ् भरणे (भ्वा०) धातो कर्त्तरि तृच्]

प्रभर्त्ति प्रकृष्टतया विभर्त्ति प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् १ १७३ ६ [प्र+भृञ् भरणे (भ्वा०) धातोर्लट्। 'बहुल छन्दसी' ति शपो लुक्]

प्रभर्त्तुम् प्रकर्षेण धर्त्तुम् ३ ४८ १ [प्र+भृञ् भरणे (भ्वा०) धातोस्तुमुन्]

दुष्टान् ४ ३० १५ [प्र+डुधाञ् धारणपोषणयो (जु०) धातो 'उपसर्गे वो कि' अ० ३ ३ ९२ सूत्रेण कि प्रत्यय । प्रधि प्रहितो भवति नि० ४ २७]

प्रधाक् प्रकृष्टतया दहेत् प्र०—अत्र 'मन्त्रे घसह्वर०' इत्यादिना लेर्लुग् 'बहुल छन्दसि' इत्यडभाव १ १५८ ४ [प्र+दह भस्मीकरणे (भ्वा०) धातोर्लुङ् । मन्त्रे घसह्वर०' इति लेर्लुक् अटोऽभावश्च]

प्रधीव यथा सर्वस्य धर्त्री ग्थाऽवयवा २ ३९ ४ [प्रधी-इवपदयो समास । प्रधी=प्रधिप्राति० ङीप्]

प्रनक्षन्त प्रकर्षेण व्याप्नुवन्तु ७ ४२ १ [प्र+नक्षनि व्याप्तिकर्मा निघ० २ १८ धातोर्लङ् अटोऽभावश्च]

प्रनय प्रकृष्टतया प्राप्नुहि १२ २६ [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लोट्]

प्रपत प्रपातय १२ ८७ [प्र+पत्लृ गतौ (भ्वा०) धातोर्लोट्]

प्रपथिन् प्रकृष्ट पन्था विद्यते यस्य तत्सम्बुद्धौ (राजन्) ६ ३१ ५ [प्र—पथिन्पदयो समास]

प्रपथिन्तमम् अतिशयेन प्रकृष्टपथगामिनम् (इन्द्र = सेनेशम्) १.१७३ ७ [प्र-पथिन्पदयो समासेऽतिशायने तमप् । 'नाद् घस्य' अ० ८ २ १७ सूत्रेण नुडागम]

प्रपथेषु प्रकृष्टेषु सरलेषु मार्गेषु १ १६६ ९ [प्र-प्रथिन्पदयो समासे 'ऋक्पूर०' इति समासान्तोऽकार]

प्रपथ्याय प्रकृष्टेषु धर्मपथिषु साधवे (जनाय) १६ ४३ प्रकर्षेण पथ्यकरणाय २२ २० [प्रपथमिति पूर्वपदे व्याख्यातम् । तत साध्वर्थे यत्]

प्रपदैः प्रकृष्टै पदैर्गमनै ६ ७५ ७ प्रकृष्टै पारगमनै २९ ४४ [प्र+पद गतौ (दिवा०) धातोर् 'घञर्थे कविधानम्' इति भावे क]

प्रपद्यस्व प्राप्नुहि १७ ४५ **प्रपद्ये**=प्राप्नोमि ३ ४३ प्राप्नुयाम् ३३ १ यथावत् प्राप्त होऊ आर्याभि० २ ४९) ३ ४३ प्राप्त होता हूँ स० वि० १४७, ३ ४३ प्राप्नोमि ऋ० भू० २४०, ३ ४३ [प्र+पद गतौ (दिवा०) धातोर्लोट्]

प्रपश्यन् प्रकर्षेण समीक्षन्ते १ १७४ ६ [प्र+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लङ् । अटोऽभावश्छान्दस]

प्रपा जलपान स्नान आदि का स्थान स० वि० १४२, अथर्व० ३ ३० ६ [प्र+पा पाने (भ्वा०) धातो 'घञर्थे कविधानम्' अ० ३ ३ ५८ वा० सूत्रेण क । स्त्रिया टाप्]

प्रपितामहेभ्यः ये पितामहाना पितरस्तेभ्य १९ ३६ येऽष्टाचत्वारिंशद्वर्षप्रमितेन ब्रह्मचर्येण विद्यापारावार प्राप्याऽध्यापयन्ति ते आदित्याख्या. प्रपितामहास्तेभ्य ऋ० भू० २९६, १९ ३६ [प्र—पितामहपदयो समास । पितामह =पितृप्राति० 'नाम्या पितरि डामहच्' अ० ४ २ ३६ वा० सूत्रेण पितरि डामहच्]

प्रपित्वम् प्रकृष्ट प्रापणम् ३ ५३ २४ प्राप्तिम् ५ ३१ ७ **प्रपित्वे**=प्राप्तव्ये समये स्थाने वा १.१०४ १ उत्तरस्मिन् (उत्तरायणे) १ १३० ९ पदार्थानां प्रापणे ३४ ३७ प्राप्तौ ६ ३१ ३ प्रकृष्टप्राप्ते (दिवसे) ४ १६ १२ प्रकर्षेण प्राप्ते समये १ १८९ ७ प्रकर्षेणैश्वर्यस्य प्राप्तौ ७ ४१ ४ प्रकर्षता उत्तमता की प्राप्ति मे स० वि० १५६, ७ ४१ ४ [प्रपित्वेऽभीक इत्यामन्त्रस्य । प्रपित्वे प्राप्ते नि० ३ २०. प्रपित्वे उत्तराणि पदानि निघ० ३.२९.]

प्रपिन्वध्वम् प्रकृष्टतया सेवध्वम् ३ ३३ १२ [प्र+पिवि सेवने सेचने च (भ्वा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

प्रपिस्पृशति प्रकर्षेणाऽत्यन्त स्पृशति ६ ४९ १२ [प्र+स्पृश सम्पर्शने (तुदा०) धातोश्छान्दस रूपम्]

प्रपीताः प्रकर्षेण पीता वृद्धा (उषास =प्रभाता) ३४ ४० प्रकर्षेण पीता वर्धयित्र्य (विदुष्य स्त्रिय) ७ ४१ ७ [प्र-पीतापदयो समास । पीता =ओप्यायी वृद्धौ (भ्वा०) धातो क्त । 'प्याय पी' इति पीभावे स्त्रिया टाप्]

प्रपीनम् प्रकृष्टतया स्थूलम् (स्तनम्=दुग्धाधारम्) १७ ८७ [प्र-पीनपदयो समास । पीनम्=ओप्यायी वृद्धौ (भ्वा०) धातो क्त । 'प्याय पी' इति पीभावे 'ओदितश्च' इति निष्ठानत्वम्]

प्रपीनाम् प्रवृद्धाम् (सुमतिं=प्रज्ञाम्) १७ ७४ [प्रपीन व्याख्यातम् । स्त्रिया टाप्]

प्रपीपय प्रकर्षेण वर्द्धय ३ १५ ६ **प्रपीपयन्त**= प्रकृष्टतया वर्द्धयन्ति १ १८१ ६ (प्र+ओप्यायी वृद्धौ (भ्वा०) धातोर्यङ्लुगन्ताल्लोट् । व्यत्ययेन शप् । अन्यत्र लङ्यटोऽभाव]

प्रपृञ्चती प्रकृष्टा चाऽसौ पृञ्चती चार्थसम्बन्धेन सकलविद्यासम्पर्क-कारयित्री शब्दोच्चारणसाधिका (वेना= वेदचतुष्टयी वाक्) १ २ ३ [प्र—पृञ्चतीपदयो समास । पृञ्चती=पृची सम्पर्के (रुधा०) धातो शतृन्तात् ङीप्]

प्रप्र अतिप्रकर्षम् ७ ८ ४ अतिप्रकृष्टे १ १३८ १ अतिप्रकर्षेण ३ ९ ३ प्रत्यर्थे प्र०—अत्र 'प्रसमुपोद

प्रमा श० ८ ३ ३ ५ प्रमोपपदे गदी देवशब्दे (चुरा०) धातोरच् कर्तरि नुम् छान्दस । प्रमिण=अन्तरिक्षे गन्दस्य गर्जनशीलस्येत्यर्थ । मगन्द कुसीदी, माङ्गदो मामागमिष्यतीति च ददाति, तदपत्य प्रभगन्दोऽत्यन्तकुसीदिकुलीन नि० ६ ३२]

प्रमतिम् प्रकृष्टा प्रज्ञाम् ४ १६ १८ प्रकृष्ट ज्ञानम् १ ७१ ७ **प्रमतिः**=प्रकृष्टा चाऽसौ मतिश्च प्रमति १ १०६ १ प्रकृष्टा गति २ २६ २ प्रकृष्टा वुद्धि १ ६४ १ [प्र-मतिपदयो समास । मति =मन ज्ञाने (दिवा०) धातो क्तिया क्तिन् । 'गन्त्रे वृषेषपचमन०' इत्युदात्त]

प्रमतिः प्रकृष्टा मतिर्ज्ञान यस्य स (सर्वमङ्गलकारक सभाध्यक्ष) १ ३१ ६ प्रकृष्टप्रज्ञ (वरतमोऽध्यापक) ७ २६ ४ प्रकृष्टा मतिर्भान यस्य स (अग्नि =सभाध्यक्ष) १ ३१ १०. [प्र-मतिपदयो समास । मतिरिति व्याख्यानम् । मतय =मेधाविनाम । निघ० ३ १५]

प्रमत्या प्रकृष्टा मतिर्मनन यस्या तया (देन्या सेनया १ ५३ ५ [प्र-मतिपदयो समास]

प्रमदे प्रमादाय ३० ६ [प्र+मदी हर्षे (दिवा०) धातो 'प्रमदसमदौ हर्षे' अ० ३ ३ ६८ सूत्रेण अप्प्रत्ययो निपात्यते]

प्रमन्द प्रशमय ६ १८ ६ **प्रमन्दते**=प्रकर्षेणानन्दयति १२ ६४ [प्र+मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु (भ्वा०) धातोर्लेट् । अन्यत्र लट्]

प्रमन्दुः प्रकृष्टमानन्दमाप्नुवन्ति ७ ३३ १ [प्र+मदि स्तुतिमोदादिषु (दिवा०) धातोर्लिट् । 'वा छन्दसीति' द्वित्व न भवति]

प्रमन्महे याचामहे प्र०—मन्मह इति याच्ञाकर्मा निघ० ३ १६, ३४ १६ प्रकृष्टतया मन्यामहे याचामहे वा १ ६२ १ [मन्महे याच्ञाकर्मा निघ० ३ १६]

प्रमहसः प्रकृष्टस्य महत (राज्ञ) ५ २८ ४ [प्र—महस्पदयो समास महस्=मह पूजायाम् (भ्वा०) धातोरीणा० असुन् । मह =महन्नाम निघ० ३ ३]

प्रमा प्रमाण यथार्थविज्ञानम् १५ ६५ यया प्रमीयते सा प्रज्ञा १४ १८ यथार्थज्ञान यथार्थज्ञानवान् तत्साधिका वुद्धि ऋ० भू० ४७ [प्र+माङ् माने शब्दे च (जु०) धातो स्त्रियाम् 'आतश्चोपसर्गे' इत्यङ् । ततष्टाप् । अन्तरिक्षलोको वै प्रमा, अन्तरिक्षलोको अग्मात्लोकात् प्रमित एव श० ८ ३ ३ ५]

प्रमिनतः प्रकर्षेण हिंसन (वेशस्य=प्रवेशस्य) ४.३ १३. [प्र+मिनाति वधकर्मा (निघं० २ १६) धातोर्लट्]

प्रमिनती प्रकृष्टतया हिंसन्ती (उषा) १ ६२.११ [प्र+मिनाति वधकर्मा (निघ० २ १६) धातो शत्रन्तान् ङीप्]

प्रमिनन्ति परिमातु शक्नुवन्ति १ २४ ६ प्रकर्षेण हिंसन्ति ४ ५ ४ [प्र+मिनाति वधकर्मा (निघ० २ १६) धातोर्लट्]

प्रमिमय प्रक्षिपेयम् २ २६ ५ [प्र+डुमिञ् प्रक्षेपणे (स्वा०) धातोर्लिट् । 'मिनातिमिनोतिदीङा ल्यपि च' इति प्राप्तमात्व न भवति छान्दसत्वात्]

प्रमिमीतः प्रजनयत ५ ७६.२. [प्र+माङ् माने शब्दे च (जु०) धातोर्लट् । व्यत्ययेन परस्मैपदम्]

प्रमियम् प्रहिंसितुम् ४ ५५ ७ [प्र+मिनाति वधकर्मा (निघ० २ १६) धातोश्छान्दस रूपम्]

प्रमिये मरण प्राप्नुयाम् ४ ५४ ४ [प्र+मिनाति वधकर्मा (निघ० २ १६) धातोश्छान्दस रूपम्]

प्रमीनती प्रकृष्टतया हिंसन्ती (उषा) १ १२४ २ [प्र+मीङ् हिंसायाम् (क्र्या०) धातो शत्रन्तान् ङीप्]

प्रमीयसे प्रकर्षेण म्रियसे ५ ७६ १० [प्र+मीङ् हिंसायाम् (क्र्या०) धातो कर्मणि लट्]

प्रमुञ्च प्रकृष्टतया त्यज १६ ६ [प्र+मुच्लृ मोचने (तुदा०) धातोर्लोट् । 'शे मुचादीनाम्' इति नुम्]

प्रमुञ्चन् प्रकर्षेण मुक्ता कुर्वन् (अग्नि =राजा) २७ ७ प्रकृष्टतया हापयन् (विद्वान् पति) १.१४० ८ [प्र+मुच्लृ मोचने (तुदा०) धातो शतृ]

प्रमुदः प्रकृष्ट प्रसन्नताए स० वि० १६७, ६ ११३ ११ **प्रमुदा**=प्रकृष्टेन हर्षेण ३६ ६ **प्रमुदे**=प्रकृष्टाऽऽनन्दाय ३० १० [प्र+मुद हर्षे (भ्वा०) धातो सम्पदादित्वाद् भावे क्विप्]

प्रमुदितः प्रकृष्टत्वेन हर्षित (पुत्र) १६ ११ [प्र+मुद हर्षे (भ्वा०) धातो क्त]

प्रमुमुग्धि प्रमोचय २१ ३ प्रकृष्टतया मुञ्च पृथक्कुरु ४ १ ४ [प्र+मुच्लृ मोचने (तुदा०) धातोर्लोट् । 'वहुल छन्दसी' ति शप श्लु]

प्रमुषायति प्रकृष्टतया चोरयति ५ ४४ ४ [मुष स्तेये (क्र्या०) धातो प्रपूर्वाण् णिजन्तात् लट् । गुणाऽभावश्छान्दस]

प्रमृक्ष. प्रकृष्टतया सिञ्च ४ ३० १३ [प्र+मृपु सेचने (भ्वा०) धातोर्लुङ् । अडभावश्छान्दस । क्सो विकरण]

प्रभर्मणि प्रकर्षेण बिभर्त्ति राज्यादीन् यस्मिँस्तस्मिन् (विदुषि राजनि) १७९७ (प्र+भृञ् भरणे (भ्वा०) धातोर्मनिन्प्रत्यय]

प्रभवति प्रकृष्टतया वर्त्तते १५५४ [प्र+भू सत्तायाम् (भ्वा०) धातोर्लट्]

प्रभवन्तम् उत्पद्यमानम् (पृष्ठम्=आधार) २१३४ [प्र+भू सत्तायाम् (भ्वा०) धातो शतृप्रत्यय]

प्रभवः उत्पत्ति २३८५ [प्र+भू सत्तायाम् (भ्वा०) धातो 'ऋदोरप्' इति अप्प्रत्यय]

प्रभासि प्रदीप्यसे ११२१७ [प्र+भा दीप्तौ (अदा०) धातोर्लट्]

प्रभिन्दन् यथा शत्रुदल विदारयँस्तथा (अग्नि = पापिना दग्धा वीरसेनापति) ५३७ [प्र+भिदिर् विदारणे (रुधा०) धातो शतृप्रत्यय]

प्रभु उत्तमप्रभावकारकम् (राध =धनम्) १.९५ समर्थम् (भा०—ब्रह्म) २२४१० [प्र+भू सत्तायाम् (भ्वा०) धातो 'विप्रसभ्यो ड्वसज्ञायाम्' अ० ३२१८० सूत्रेण डु प्रत्यय]

प्रभुञ्जती प्रकृष्ट पालन कुर्वती (उषा) १४८५ [प्र+भुज पालनाभ्यवहारयो (रुधा०) धातो शत्रन्तान् ङीप्]

प्रभुवत् प्रकृष्टतया भवेत् प्र०—अत्र लेट् १११९७ [प्र+भू सत्तायाम् (भ्वा०) धातोर्लेट् । विकरणव्यत्ययेन श]

प्रभुः समर्थ (ईश्वर) ११८८९ सर्वसामर्थ्ययुक्त सर्वशक्तिमान् (परमात्मा) स० प्र० ४२३, ९८३१ [प्र+भू सत्तायाम् (भ्वा०) धातो 'विप्रसभ्यो ड्वसज्ञायाम्' अ० ३२१८० सूत्रेण डु प्रत्ययस्ताच्छील्ये यज्ञ इव प्रभूर्भूयासम् ऐ० आ० ५११]

प्रभूतम् पुष्कलम् (रत्न=सुवर्णहीरकादिकम्) ३५४३ [प्र+भू सत्तायाम् (भ्वा०) धातोरौणादिक क्त]

प्रभूती समर्थौ (राजाऽमात्यौ) ४४१७ [प्र+भू सत्तायाम् (भ्वा०) धातो स्त्रिया क्तिन् । तत द्विवचनम्]

प्रभूती बहुत्वेन (अभिमानेनाऽज्ञानेन वा) ४५४३ [पूर्वपदे द्रष्टव्यम्]

प्रभूतौ बहुत्वे (भावे) ३१९३ [प्र+भू सत्तायाम् (भ्वा०) धातो सज्ञाया क्तिच् । तत सप्तमी]

प्रभूवरीः प्रभुत्वयुक्ता (वाच) २३३५ [प्र+भू सत्तायाम् (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते 'अ ३२७५ सूत्रेण क्वनिप् । तत स्त्रिया 'वनो र च' अ० ४१७ सूत्रेण ङीप् रेफश्चान्तादेश]

प्रभूवसो प्रभु सर्वसमर्थश्च वसु सुखेषु वासप्रदश्चासौ तत्सम्बुद्धौ (इन्द्र=जगदीश्वर) १५७४ य समर्थश्चाऽसौ वासयिता च तत्सम्बुद्धौ (इन्द्र=राजन्) ७२२२ [प्रभु—वसुपदयो समास । पूर्वपदस्य दीर्घश्छान्दस]

प्रभूषतः प्रकृष्टतयाऽलङ्कुरुत ११५९१ [प्र+भूष अलङ्कारे (भ्वा०) धातोर्लट्]

प्रभूषन् अलङ्कुर्वन् (अद्वितीय ब्रह्म) ३५५.१ [प्र+भूष अलङ्कारे (भ्वा०) धातो शतृ]

प्रभूः समर्थ (अग्नि =सूर्यरूप) २२१९ [प्र+भू सत्तायाम् (भ्वा०) धातो कर्त्तरि क्विप्]

प्रभृतम् प्रकर्षेण धृतम् (तृण=घासविशेषम्) २५३१ **प्रभृतस्य**=प्रकर्षेण धारकस्य पोषकस्य वा (वचस) १२४२ **प्रभृतः**=प्रकर्षेण हवनादिना पोषित (अद्रि) ३३७८ **प्रभृताः**=प्रकृष्टतया धृता (अ०—विद्वासो जना) ११५१.१२ [प्र+भृञ् भरणे (भ्वा०) धातो क्त]

प्रभृता प्रकर्षेण धारणे पोषणे वा ५३२५ [प्रभृत व्याख्यातम् तत 'सुपा सुलुक्०' इति सप्तम्या आकारादेश]

प्रभृतिम् प्रकृष्टा धारणा पोषण वा २२४१ **प्रभृतौ**=प्रकृष्टधारणे ५३२७ प्रकृष्टतया धारणे ७३८२ [प्र+भृञ् भरणे (भ्वा०) धातो स्त्रिया क्तिन्]

प्रभृथस्य प्रकर्षेण म्रियमाणस्य (आयो =जीवनस्य) ५४१९ **प्रभृथे**=प्रकृष्टे पालने २३४११ प्रकर्षेण धारिते जगति ७४०५ शुद्धकरणे व्यवहारे ५४१४ **प्रभृथेषु**=प्रकर्षेण धर्त्तव्येषु (धर्मेषु) ५.३३५ [प्र+डुभृञ् धारणपोषणयो (जु०) धातोर्बाहु० औणादिक थक्प्रत्यय । प्रभृथस्य=प्रभृतस्य नि० ११४९]

प्रभेदति प्रकृष्टतया भिनत्ति ५८६१ [प्र+भिदिर् विदारणे (रुधा०) धातोर्लट् । विकरणव्यत्ययेन शप्]

प्रम्रियन्ते प्रकृष्टतया म्रियन्ते ११४४ [प्र+भृञ् भरणे (भ्वा०) धातो कर्मणि लट्]

प्रम्वी समर्था (भा०—त्रिगुणात्मिका मात्रा) ११८८५ [प्रभुरिति व्याख्यातम् । तत स्त्रियाम् 'ओतो गुणवचनात्' इति ङीष्]

प्रमगन्दस्य य कुलीनो मा गच्छति स तस्य (सज्जनस्य) ३.५३१४ [प्रमीयते प्रकृष्ट निर्मीयते यस्मिन् मेघ प्रमा=अन्तरिक्षम् । अन्तरिक्षलोको वै

क्त । ततश्छेलोपश्छन्दसि]

प्रयतान् सुशिक्षितान् (अश्वान्=तुरङ्गान्) १ १२६ २ **प्रयताः**=प्रयतमाना (गाव =धेनव) ५ ३३ १० [प्र+यमु उपरमे (भ्वा०) धातो क्त । ततो द्वितीया]

प्रयतानि प्रयत्नेन साधितानि (हवींषि=अन्नादीनि) १६ ५६ [प्र+यती प्रयत्ने (भ्वा०) धातो क्त. । तलोपश्छान्दस । यमु उपरमे (भ्वा०) धातोर्वा प्रोपसर्गात् क्तः]

प्रयतासु नियतासु (अ०—वृष्टिषु) १ १६६ ४ [प्र+यमु उपरमे (भ्वा०) धातो क्तान्ताट् टाप् स्त्रियाम्]

प्रयति प्रैति प्रकृष्ट ज्ञान ददातीति प्रयत् तस्मिन् (अध्वरे=यज्ञे) प्र०—'इण् गतौ' इत्यस्माल्लट स्थाने शतृ-प्रत्यय १ १६ ३ प्रयतन्ते यस्मिँस्तत्र (यज्ञे=सङ्गन्तव्ये यज्ञादिव्यवहारे) २८ १४ प्रयत्नसाध्ये (यज्ञे) ६ १० १ **प्रयत्सु**=प्रयत्नसाध्येषु वर्त्तमानेषु (अध्वरेषु=यज्ञेषु) २७ १४ **प्रयद्भ्यः**=प्रयत्न कुर्वद्भ्य (मरुद्भ्य = मनुष्यादिभ्य) ५ ५४ ६ **प्रयन्तम्**=प्रयत्न कुर्वन्तम् (विद्वास जनम्) ५ ६४ २ [प्र+इण् गतौ (अदा०) धातो शतृप्रत्यये 'इणो यण्' इति यणादेश । यती प्रयत्ने (भ्वा०) धातोर्वा प्रोपसर्गात् क्विप्]

प्रयति प्रकृष्ट सुखमेति येन तस्मिन् (अध्वरे=अहिंसनीये यज्ञे) प्र०—अत्र 'कृतो बहुलम्' इति करण-कारके कृत् ४ ५ प्रयत्यते जनैर्यस्तस्मिन् (यज्ञे) प्र०—'कृतो बहुलम्' अ० ३ ३ १३ इति वार्त्तिकेन कर्मणि क्विप् ८ २० प्रयतन्ते यस्मिँस्तत्र (यज्ञे=सङ्गन्तव्ये यज्ञादिव्यवहारे) २८ १४ [प्र+यती प्रयत्ने (भ्वा०) धातो 'कृतो बहुलम्' इति कर्तृभिन्नकारकेष्वपि क्विप्]

प्रयतिम् प्रयतन्ते यया ताम् (सभाम्) १ १२६ ५ **प्रयतिः**=प्रयतन्ते यया सा (त्वक्) २० १२ प्रयतते येन स (भा०—यज्ञ) प्र०—अत्र 'सर्वधातुभ्य०' इत्यौणादिक इ-प्रत्यय १८ १ प्रयतनशील (रश्मि =किरणो दीप्ति) ३३ ७४ [प्र+यती प्रयत्ने (भ्वा०) धातोरौणादिक इ प्रत्यय]

प्रयती प्रयत्यै प्रदानाय प्र०—अत्र प्रपूर्वाद् यमधातो क्तिन्, तस्माच्चतुर्थ्येकवचने 'सुपा सुलुक्०' इतीकारादेश. १ १०६ २ [प्र०+यमु उपरमे (भ्वा०) धातो स्त्रिया क्तिन् । ततश्चतुर्थ्या स्थाने 'इयाड् इयाजीकाराणामुपसख्यानम्' अ० ७ १ ३६, वा० सूत्रेण ईकारादेश । प्रयतीप्रदानेव नि० ६.६]

प्रयत्येतन प्रनीतिं कुरुत ६ ४२ २ ['प्रयति' उपपदे इण् गतौ (अदा०) धातोर्लोट् । तस्य तनवादेश]

प्रयन् प्रकृष्टतया गच्छन् (गौ =पृथिवीगोल) ३ ६ [प्र+इण् गतौ (अदा०) धातो. शतृ-प्रत्यय]

प्रयन्त प्रयच्छत प्र०—अत्र शपो लुक् ३३.४८ [प्र+यमु उपरमे (भ्वा०) धातोर्लोटि शपो लुक्]

प्रयन्तम् प्रयत्न कुर्वन्तम् (सूर्यम्) १ १५२ ४ [प्र+इण् गतौ (अदा०) धातो शतृप्रत्यय]

प्रयन्तः प्रकृष्टनियमकर्त्त (परमेश्वर विद्वन्वा) १ ७६ ४ **प्रयन्ता**=प्रकर्षेण नियन्ता (इन्द्र =राजा) ७ १६ १ प्रकर्षेण यमनकर्त्ता सन् (इन्द्र =सर्वाधीश) १ ५१ १४ [प्र+यमु उपरमे (भ्वा०) धातो कर्त्तरि तृच्]

प्रयन्तारा प्रयच्छन्ति याभ्या तौ (पाणी=बाहू) ४ २१ ६ [प्र+यमु उपरमे (भ्वा०)+तृच् । 'सुपा सुलुग्०' इत्याकारादेश]

प्रयन्ति प्रकृष्टतया गच्छन्ति १ ६७ ५ प्रकर्षेण प्राप्नुवन्ति ३.४० ४ **प्रयन्तु**=प्रकृष्टतया गच्छन्तु ७ ३४ १८ **प्रयन्धि**=प्रयच्छ ३.३६ ६ [प्र+इण् गतौ (अदा०) धातोर्लट् । अन्यत्र लोट् । 'प्रयन्धि' प्रयोगे प्रोपसर्गाद् यमु उपरमे (भ्वा०) धातोर्लोटि शपो लुकि च रूपम्]

प्रयम्यमानान् प्रकर्षेण प्रापितनियमान् (व्यवहारान्) ३ ३६ २ [प्र+यमु उपरमे (भ्वा०) धातो कर्मणि शानच्]

प्रययुः प्रकृष्टतया प्राप्नुवन्ति ५ ५३ १२ प्रयान्ति ४ १६ ५ [प्र+या प्रापणे (अदा०) धातोर्लिट्]

प्रयवयन् प्रकर्षेण सयोजयन् विभाजयन् वा (अ० राजा) ३ ४८ ३ [प्र+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्णिजन्ताच्छतृ । वृद्धचभावश्छान्दस]

प्रयष्टे प्रकर्षेण यष्टुम् ३ ७ १ [प्र+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोश्छान्दस रूपम्]

प्रयसः कमनीयस्य (अन्धस =अन्नस्य) २ १६ १ **प्रयसा**=येन प्रीणन्ति तृप्यन्ति कामयन्ते वा शिष्टान् विदुष शुभान् गुणान् तेन (अन्नेन) सह १ ७१ ३ प्रयत्नेन ३ ५४ ३ प्रीतेन (प्रयत्नेन) ४ ५ ६ **प्रयसे**=प्रयतमानाय (वरुणाय=उत्तमाय व्यवहाराय) ५ ६६ १ [प्र+यसु प्रयत्ने (दिवा०) धातो विवप्, 'कृतो बहुलम्' इति वार्तिकेन]

प्रयस्ता प्रेरिता (उखा=पाकस्थाली) ३ ५३ २२ [प्र+यसु प्रयत्ने (दिवा०) धातो क्त । तत स्त्रिया टाप्]

प्रयस्वतीः प्रयो बहुविध तर्प्पण विद्यते यासु ता.

प्रमृण प्रकर्षेण वाधस्व ६ ४४ १७ प्रकृष्टतया हिन्धि ४.१६ १२. [प्र+मृण हिंसायाम् (तुदा०) धातोर्ल्लोट्]

प्रमृणन् प्रकर्षेण हिसन् (इन्द्र =सैनिकजन) ३ ३० ६ **प्रमृणन्तम्**=प्रकृष्टतया शत्रून् हिंसन्तम् (इन्द्र=सेनापतिम्) १७ ३८ [प्र+मृण हिंसायाम् (तुदा०) धातो शतृप्रत्यय]

प्रमृणः ये प्रकृष्टतया मृणन्ति हिंसन्ति तान् (शत्रुसेनाजनान्) १७ ३६ [प्र+मृण हिंसायाम् (तुदा०) धातो कर्त्तरि क्विप्]

प्रमृणीहि प्रकर्षेण हिन्धि १३ १३

प्रमृशाय प्रकृष्टविचारशीलाय भा०—सुविचाराय (जनाय) १६ ३६ [प्र+मृश आमर्शने (तुदा०) धातोरिगुपधलक्षण कर्त्तरि क]

प्रमृषन्त प्रकृष्टतया सहन्ते ७ १८ २१ [प्र+मृष तितिक्षायाम् (दिवा०) धातोर्लङ्। विकरणव्यत्ययेन श। अटोऽभाव]

प्रमृषे सुखै सयोजये ३ ६ २ [प्र+मृष तितिक्षायाम् (दिवा०) धातोर्लट्। व्यत्ययेन श। धातूनामनेकार्थत्वेन मिश्रणेऽपि। प्रमृषे=प्रमृष्यते नि० ४ १५]

प्रमोदाः प्रकृष्टा आनन्दयोगा भा०—पराऽऽनन्दा २० ६ [प्र=मुद हर्षे (भ्वा०) धातोर्घञ्]

प्रमोषीः प्रकृष्टतया स्तेनये: १ १०४ ८ प्रकर्षेण चोरये २१ २ प्रकृष्टतया मुष्णीयात् खण्डयेत् प्र०—अत्र लिङर्थे लुङ् ४ २३ प्रकर्षेण पृथक्कुरु प० वि० अ०—खण्डन कुर्य्यात् ४ २३ प्रत्यक्ष चुरा और चुरवा आर्याभि० १ ४६, ऋ० १ ७ १६ ८ [प्र+मुष स्तेये (क्रचा०) धातोर्लुङ्]

प्रम्लोचन्ती प्रकृष्टतया सर्वानोपध्यादिपदार्थान् म्लोचयन्ती (दीप्ति) १५ १७ [प्र+म्लुचु गत्यर्थे (भ्वा०) धातो शत्रन्तान् ङीप्]

प्रय इव यथा प्रीतमन्नम् १.६१ २ [प्रय-इवपदयो समास। प्रय=अन्ननाम निघ० २ ७ उदकनाम निघ० १ १२]

प्रयक्षतमम् अत्यन्तपूजनीयम् (कर्म्म) १ ६२ ६ [प्रयक्षपदयो समासेऽतिशायने तमप्। यक्ष=यजधातोरौणा० स प्रत्यय]

प्रयक्षन् प्रकृष्टतया यजन्ते २ ५ १ **प्रयक्षन्त**=प्रकृष्टतया गोपत हिंस्त १ १३२ ५ [प+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्लङ्। अडभाव। विकरणव्यत्ययेन सिप्]

प्रयक्षे प्रकर्षेण यष्टु सङ्गन्तुम् ३ ३१ ३ [प्र+यज-देवपूजासगतिकरणदानेषु (भ्वा०) धातोस्तुमर्थे से प्रत्यय]

प्रयच्छतु प्रकृष्टतया ददातु ६ २६ **प्रयच्छन्ति**=प्रकृष्ट ददति ३ ३३ [प्र+दाण् दाने (भ्वा०) धातोर्लट्। शिति प्रत्यये 'पाघ्रा०' इत्यादिना यच्छादेश]

प्रयज प्रकर्षेण सङ्गच्छव ३ १७ ५ **प्रयजे**=प्रकृष्टतया सङ्गच्छेयम् २ ६ ३ प्रकर्षेण सङ्गच्छे १७ ७५ [प्र+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्लोट्]

प्रयज्यवः प्रकर्षेण यज्ञसम्पादका (अमात्यजना) ६ ४८ २० प्रकर्षेण सङ्गन्तार (मरुत=गृहस्थिजना) ७ ५६ १४ प्रकृष्टयज्यव सङ्गन्तारो मनुष्या ५ ५५ १ प्रकृष्ट यज्यवो येषा तत्सम्बुद्धौ (मरुत=सभाध्यक्षादय) १ ८६ ७ प्रकृष्टो परोपकाराख्यो यज्ञो येषा राजपुरुषाणा तत्सम्बुद्धौ १ ३६ ६ **प्रयज्यवे**=प्रयजन्ति येन तस्मै (धीमते जनाय) ५ ८७ १ **प्रयज्यो**=यो यत्नेन यष्टु सङ्गन्तु योग्यस्तत्सम्बुद्धौ (परमेश्वर) ६ २१ १० य प्रकर्षेण यजति तत्सम्बुद्धौ (यजमान कवे) ६ ४६ ४ य प्रयजति तत्सम्बुद्धौ (अग्ने=विद्वन् जन) ३ ६ २ प्रकर्षेण यजकर्त्त (देव=विद्वज्जन) ६ २२ ११ **प्रयज्योः**=प्रयोक्तु योग्यस्य अत्यस्य=अश्वस्य) १ १८० २ [प्र+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो 'यजिमनिशुन्धि०' उ० ३.२०. सूत्रेण युच्प्रत्यय। प्रयज्युम्=प्रततयज्यम् नि० ५ २.]

प्रयतदक्षिणम् प्रयता प्रयत्नेन दत्ता दक्षिणा यस्मात्तत् (वसु=धनम्) ६ ५३ २ प्रयता प्रकृष्टतया यता विद्याधर्मोपदेशरूपा दक्षिणा येन तम् (नर=विनयाभियुक्त मनुष्यम्) १ ३१ १५ [प्रयता-दक्षिणापदयो समास। प्रयता=प्र+यमु उपरमे (भ्वा०) धातो क्त, ततष्टाप्। दक्षिणा दक्षते समर्द्धयतिकर्मणो व्यृद्ध समर्द्धयतीति नि० १ ७]

प्रयतम् प्रयत्नसाध्यम् (विजयम्) ४ २७ ५ प्रयत्नेन सिद्धम् (यज्ञम्) ३ ३५ १०. **प्रयतस्य**=प्रयत्न कुर्वत (जीवस्य) ४ ५ १० **प्रयतः**=प्रयतमाना (भा०—अध्यापका) ४ १५ ८ **प्रयता**=प्रयत्नेन ५ ३० १२ [प्र+यती प्रयत्ने (भ्वा०) धातो क्त। 'छान्दसो वर्णलोपो वा' इति तलोप। अथवा यमु उपरमे (भ्वा०) धातो क्त]

प्रयता प्रकर्षेण दत्तानि (धनानि) ५ ३४ ४ प्रयत्नेन साधितानि (हवीषि=अन्नानि) १६ ६६ प्रयत्नसाध्यानि (द्रव्याणि) ५ ४२ ३ [प+यमु उपरमे (भ्वा०) धातो

प्रयुच्छसि अत्यन्त प्रमाद्यसि ८ ३ [प्र+युच्छ प्रमादे (भ्वा०) धातोर्लट्]

प्रयुज्यताम् प्रयुक्तो भवतु ७ ४२ १ [प्र+युजिर् योगे (रुधा०) धातो कर्मणि लोटि द्यन्त्रभ्यः [पा० ३ १ ६७] इति श्यन्]

प्रयुञ्जती प्रयोगं कुर्वती (माता) ५ ८७ १ [प्र+युजिर् योगे (रुधा०) धातो शतरि ङीप्]

प्रयुञ्जते अभ्यस्यन्ति १ ४८ ४ [प्र-युजिर् योगे (रुधा०) धातोर्लट्। 'प्रोपाभ्यां युजेरयज्ञपात्रे' [अ० १ ३ ६४ सूत्रेणात्मनेपदम्]

प्रयुतम् दश लक्षाणि (निख ८-दुग्धाढ्यो गात इव (प्र०—प्रयुतमिति कोटेरुपलक्षकम् १७ २, प्रयुत्सट्न्याकम् (शत्रुसैन्यम्) ६ १८ वह्निरूपम् (अग्नि—मेघम्) ५ ३२ २ [अयुत नियुत प्रयुत तत्तत्स्थानम् नि० ३ १०]

प्रयुतः विभक्त सन् मिलितः (राजा=प्रातःसवन सूर्यः) ३ ५५ ४. [प्र+यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्त]

प्रयुतम् अनड्वत्यवोधाम् (नियुत्-वाचम्) ३ ५७ १ [प्रयुत व्याख्यातम्। ततष्टाप्]

प्रयुधः ये प्रकर्षेण युध्यन्ते ते (नर=नायका जनाः) ५ ५६ ५ [प्र+युध सम्प्रहारे (दिवा०) धातो कर्तरि क्विप्]

प्रयुयुधुः प्रकृष्टतया सङ्ग्राम कुर्युः ५ ५६ ५ [प्र+युध सम्प्रहारे (दिवा०) धातोर्लिट् व्यत्ययेन परस्मैपदम्]

प्रयै प्रयातुम् १ १४२ ६ [प्र+या प्रापणे (अदा०) धातोस्तुमर्थे 'प्रयै रोहिष्यै अव्यथिष्यै' [अ० ३ ४ १० सूत्रेण कै-प्रत्ययो निपात्यते]

प्रयोभिः कमनीयैर्गुणैः (अ०—पदार्थैः सह) ७ ८ कमनीयैर्गुणैः कर्मस्वभावैः ३ ३५ ६ तृप्तिकरैरन्नादिभिः पदार्थैः सह प्र०—'प्रीञ् तर्पणे कान्तौ च' [अस्मादादीनादिकोऽसुन् प्रत्यय १ २४ [प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोरीणा० असुन्प्रत्यय]

प्रररक्षे प्रकर्षेणाऽतिरिणक्ति ६ १८ १२]

प्रराध्यम् प्रकर्षेण साद्धुं योग्यम् (श्रुत=ज्ञानम्) ५ ३६ ३ [प्र+राध संसिद्धौ (स्वा०) धातोर्ण्यत्]

प्रविक्वा यः सर्वा प्रजा प्रकृष्टतया निर्गमे व्याप्तवान् सन् (इन्द्र=जगदीश्वरः) १ १०० १५ प्रकृष्टता से इनमें व्यापक होके इनसे अतिरिक्त=विलक्षण भिन्न ही परिपूर्ण हो रहा (जगदीश्वर) आर्याभि० १ ३२, ऋ० १ ३ १० १५ [प्र+निर्गिर् निरसने (रुधा०) निर्गमे (भ्वा०) धातोर्वा क्विप्। ग्रहवृदा० [पा० ३ २ १५८] इति सम्प्रसारणम्]

प्रविविचे प्रकृष्टतयाऽजनयत् पृथक्कृतवान् ७ ८२ ३ प्रकृष्टया विद्यानि प्रापि० कराते १ ६१ ६ प्रविविक्षन् १ १७८ २५ अतिरिच्यते ३ ४६ ३ अतिरिक्तो भवति ६ ३० १. प्रकृष्टया विद्यानि १ ५८ ५ [प्र+निर्गिर् विरसने (रुधा०) धातोर्लिट्]

प्रवीयते प्रकृष्टतया निर्गच्छति ५ ७८. [प्र+वीङ् क्षरण (क्र्या०) धातोर्लट्। अत्र सोपसर्गेभ्यो धातुभ्यो गत्यर्थेभ्यः। सीयते गतिकर्मा निघ० २ १४]

प्रवृज प्रकर्षेण भक्तिम् १ १०२ ५ प्रभाग, स्वा करके नष्ट कर ८ आर्याभि० १ ८३, ऋ० १ ३ १४ ४

प्रवृजन्ति=आभजन्ति ५ ७ १० [प्र+वृजी भक्तौ (तुदा०) धातोर्लट्। अन्यत्र सदृ]

प्रवृद्धुः प्रादुर्भवेयुः ८ २४ ३ [प्र+वृद्ध बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लिङ्]

प्रवेके प्रकृष्टा वेगा यस्मिन्नस्मिन् व्यवहारे ३ ३० १६ [प्र+वेग गतौ. सम्भाने। वेगा=वेगवत्यः शङ्कायाम् (भ्वा०) धातोर्यत्। सप्तम्यर्थे विषयाम्]

प्रवेचनम् प्रकृष्टतया वेचन पृथक्त्व त्यागम् १ १७ ६ [प्र+निर्गिर् विरेचने (रुधा०) धातोर्ल्युट्]

प्रवेजयत् प्रकर्षेण कम्पयते ४ २२ ३. [प्र+वेजृ गतिकर्मा (निघ० २ १४) धातोर्णिजन्माल्लट्]

प्रवोचि प्रकृष्टतया जगति प्रकाशयत १ १२१ ६ [प्र+वच दीप्तावभिप्रीतौ च (भ्वा०) धातो कर्मणि लुङ्]

प्रवोहन्ती प्रकृष्टतया वर्धमाना (दूर्वा दूर्वावल्लीमानौषधिः) १३ २० [प्र+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो शतरि ङीप्]

प्रवक्षणाः नद्यो ऋ० भू० २८३, १ ३२ १ [प्र+वह प्रापणे (भ्वा०) धातोर्युच्। स्त्रियां टाप्]

प्रवक्ष्याम. प्रवदिष्यामः २५ २४ [प्र+वच परिभाषणे (अदा०) धातोर्लृट्]

प्रवणे प्रवन्ते गच्छन्ति वीरा यस्मिन् तस्मिन् (रणे=सङ्ग्रामे) १ ११६ ३ निम्नप्रवाहे १ १०४ ३ निम्ने देशे ५ ३ ४४ निम्नमार्गे १ ५२ ५ गमने १ ५२ ६ **प्रवणेषु**=निम्नमार्गेषु १ ५४ १० [प्रुङ् गतौ (भ्वा०) धातोरधिकरणे ल्युट्। प्रवते गतिकर्मा निघ० २ १४.]

(विश =प्रजा) ३.६३ [प्रयस्प्राति० भूम्न्यर्थे मतुवन्तान् ङीप्। प्रयस् इति व्याख्यास्यते]

प्रयस्वन्तः प्रयतमाना (जना) ३५२६ बहुप्रयत्नशीला (राजप्रजाजना) ११३०१ प्रशस्तानि प्रयासि प्रज्ञानानि विद्यन्ते येषा ते (मानुषास =१६०३ **प्रयस्वान्**=प्रयत्नवान् (मर्त्त =मनुष्य) ३५६.२. [प्रयस्प्राति० प्रशसाया मतुप्। प्रयस्=प्र+यसु प्रयत्ने (दिवा०) धातो क्विप्]

प्रयंसत् प्रकर्षेण नियच्छेत् १६६८ प्रेरयेत् ११६०३ **प्रयंसि**=प्रकृष्टतया यच्छसि १६१२ प्रकर्षेण प्राप्नोपि नियच्छसि वा ५३६४ [प्र+यमु उपरमे (भ्वा०) धातोर्लेट्। 'प्रयसि' प्रयोगे लटि शपो लुक्]

प्रयः प्रीणाति य स (शिल्पि-जन) प्र०—अत्रौणादिकोऽसुन्-प्रत्यय ११११ प्रियमाण स्थानम् ११८४ कमनीयम् (वस्तु) ४४६३ प्रीयते काम्यते यत्तत्सुखम् १३१७ प्रीणन्ति तृप्यन्ति येन तदन्नम् १४५८ प्रीतिम् ११३४१ प्रीतिकारक वच ११३२३ तृप्तिकारकमन्नम् १६११ अन्नादिकम् ६६३७ अतीव प्रियम् (भा०—सुखम्) ५५१७ [प्रीञ् तर्पणे कान्तौ च (क्रया०) धातोरौणादिकोऽसुन् प्रय अन्ननाम निघ० २७ उदकनाम निघ० ११२]

प्रयाजेभिः प्रयजन्ति यैरतै (कर्म्मभि) १६१६ [प्र+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्घञ्। 'प्रयाजानुयाजौ यज्ञाग' अ० ७३६२ सूत्रेण कुत्वाभावो निपात्यते। 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति। अथ किन्देवता प्रयाजानुयाजा आग्नेया इत्येके। छन्दो देवता इत्यपरम्। ऋतुदेवता इत्यपरम्। पशुदेवता इत्यपरम् प्राणदेवता इत्यपरम्। आत्मदेवता इत्यपरम् आग्नेया इति तु स्थिति। भक्तिमात्रमितरत् नि० ८२२. प्रजया ह वै नामैतद् यत्प्रयाजा इति श० १५३१ ते (प्रयाजा) वाऽआज्यहविषो भवन्ति श० १५३४ ऋतवो ह वै प्रयाजा तस्मात् पञ्च (प्रयाजा) भवन्ति, पञ्च ह्यृतव श० १५३१ प्रयाजा प्राञ्चो हूयन्ते तद्धि प्राणरूपम्। श० ११२७२७ य इमे शीर्षन्प्राणास्ते प्रयाजा ऐ० ११७ प्राणा वै प्रयाजा ऐ० १११ रेत सिच्य वै प्रयाजा कौ० १०३. पशवो वै प्रयाजा कौ० ३४ वसव प्रयाजेषु काठ० ३४१६ यज्ञमुख वै प्रयाजा वीर्य वै प्रयाजा मै० १७३ पञ्च प्रयाजा। इमऽएवास्य ते शीर्षण्या पञ्च प्राणा श० ११२६४ एकादश प्रयाजा मै० ११०८]

प्रयाणम् गमनम् ४४६७ प्रयान्ति सर्वाणि सुखानि येन तत् प्रकृष्ट प्राणम् ११६ प्रकृष्ट प्रापणम् १२३ यात्राम् ५४६२ प्रकर्षेण याति गच्छति येन तत् (महिमानम्) ५.८१३ [प्र+या प्रापणे (अदा०) धातोर्ल्युट्]

प्रयातन प्राप्नुवन्तु ११६५१३ [प्र+या प्रापणे (अदा०) धातोर्लोट्। तप्रत्ययस्य तनबादेश]

प्रयातु प्रकृष्टतया गच्छतु २६८ **प्रयाथः**=प्रकर्षेण गच्छथ ११८०६ **प्रयासि**=प्रकृष्ट प्राप्नोपि प्रापयति वा अ०—प्रापयसि प्र०—अत्र पक्षे व्यत्यय ३५२ **प्रयाहि**=प्रयाण कुरु ६३२४ प्रकृष्टतया प्राप्नुहि १२३२ प्रकर्षेण गच्छ ११६६ [प्र+या प्रापणे (अदा०) धातोर्लोट्। 'प्रयाथ' प्रयोगे तु लट्]

प्रयाभिः कमनीयाभि (नियुद्भि =नियतैर्गुणै) २७२७ [प्रीञ् तर्पणे कान्तौ च (क्रया०) धातोरौणादिकोऽकार। तत स्त्रिया टाप्]

प्रयामनि प्रयाणे १११६३ [प्र+या प्रापणे (अदा०) धातोरौणादिको बहुलवचनान् मनिन्]

प्रयाः ये सद्य प्रयान्ति ते (जना) ३२६१५ [प्र+या प्रापणे (अदा०) धातो कर्त्तरि क्विप्]

प्रयांसि प्रीतानि कान्तानि वस्तूनि १८६७ प्रियतमानि (वस्तूनि) ६१६४४ कमनीयानि (वस्तूनि) ११६६३ कमनीयान्यन्नादीनि ३११७ कमनीयानि विज्ञानादीनि ३४१८ [प्रीञ् तर्पणे कान्तौ च (क्रया०) धातोरौणादिकोऽसुन्]

प्रयुक्त प्रयुज्यते यस्मैस्तत् कर्म ६१११ [प्र+युजिर् योगे (रुधा०) धातो क्तच् प्रत्यय]

प्रयुक्तिः प्रकृष्टा युक्तिर्यस्य. स (विद्वान् जन) ११५३२ **प्रयुक्तिषु**=प्रकृष्टेषु योजनेषु ११५१८. [प्र-युक्तिपदयो समास। युक्ति =युजिर् योगे (रुधा०) धातो स्त्रिया क्तिन्]

प्रयुग्भ्यः ये प्रयुञ्जते तेभ्य (भा०—दुष्टेभ्यो जनेभ्य) ३०८ ये प्रयुञ्जन्ति तेभ्य (दुर्जनेभ्य) ३८८ **प्रयुजम्**=व्यवहारेषु प्रयुक्तम्, य सर्वान् युनक्ति त सम्प्रयुक्त वा (अग्नि=योगाभ्यासजनिता विद्युतम्) ११६ **प्रयुजः**=प्रकर्षेण युञ्जन्ति ते (राजान) ११८६६ **प्रयुजे**=या धर्मक्रिया प्रकृष्टैर्गुणैर्युनक्ति, योजयति वा तस्यै ४७ [प्र+युजिर् योगे (रुधा०) धातो. 'मत्स्त्रिपद्रुहदुह०' अ० ३२६१ सूत्रेण क्विप्]

(जन्म) १ १५१ ३ प्रवक्तु योग्यम् (वीर्य=बलरूप कर्म) ३.३३.७ प्रकृष्टतया वक्तु योग्यं यथा स्यात् तथा (पन्था'=वेदप्रतिपादितो मार्ग) १ १०५ १६. [प्र+वच परिभाषणे (अदा०) धातोर्ण्यत्]

प्रवाच्यः प्रवक्तु योग्य (विद्यार्थिजन) ४ ३६.५ [प्र+वच परिभाषणे (अदा०) धातोर्ण्यत्]

प्रवाच्या प्रकृष्टतया वक्तु योग्या (मेना=वाणी) १.५१ १३ [प्रवाच्य इति व्याख्यातम्। तत स्त्रिया टाप्]

प्रवाच्या प्रकर्षेण वक्तु योग्यानि (राज्यानि) ४ २२ ५. [प्रवाच्य-प्रातिः शैलोपश्छन्दसि]

प्रवावृजे प्रकृष्टतया व्रजति गच्छति ३३ ४४ प्रव्रजति ७ ३६ २ [प्र+व्रज गतौ (भ्वा०) धातोर्लिट्। तुजादित्वादभ्यासस्य दीर्घ। धातो रेफस्य ऋकारश्छान्दस.]

प्रवावृते प्रवर्त्तते १.१६१.१५. [प्र+वृतु वर्त्तने (भ्वा०) धातोर्लिट्। तुजादित्वादभ्यासस्य दीर्घ]

प्रवाहणः यथा वायुर्महानदो वा तथा (जगदीश्वरो विद्वान्वा) ५ ३१ स्व-स्व नियमपूर्वक चलाने वाला तथा सब का निर्वाह करने वाला (ईश्वर) आर्याभिः २.१६, ५ ३१ [प्र+वह प्रापणे (भ्वा०) धातोर्णिजन्तात् 'कृत्यल्युटो बहुलम्' इति ल्युट्]

प्रवाह्याय ये प्रवोढुं योग्यास्तेषु मानवे (जनाय) १६ ४३ [प्र+वह प्रापणे (भ्वा०) धातोर्ण्यत्। तत 'तत्र साधु' रिति यत्]

प्रविवते प्रकर्षेण चलितव्ये (अध्वनि=मार्गे) ६ ५० ५

प्रविगृह्णन्ति प्रविग्राहयन्ति प्र०—अत्र णिज्लोप. १.१६२ १५ [प्र+वि+ग्रह उपादाने (क्रया०) धातोर्णिजन्ताल्लट्। णिचो लोपश्छान्दस। 'ह्मग्रहोर्भश्छन्दसि' इति वा० सूत्रेण धातोर्हकारस्य भकार]

प्रविरिरते प्रविवर्धयति ७ ५६ २. [प्र+वि+तृ प्लवनतरणयो (भ्वा०) धातोर्लट्। व्यत्ययेन श-प्रत्यय आत्मनेपदञ्च। तिरते प्रवर्धयते नि० ११ ६]

प्रविदा प्रकृष्टविज्ञानेन ३ ७.६ [प्र+विद ज्ञाने (अदा०) धातो. 'कृतो बहुलम्' इति भावे क्विप्]

प्रविद्धम् प्रकर्षेण व्यथितम् (तौग्र्य=बलदातृषु भव जनम्) १ १८२ ६ [प्र+व्यध ताडने (तुदा०) धातो क्तः। 'ग्रहिज्या०' इति सूत्रेण सम्प्रसारणम्]

प्रविद्वान् प्रकर्षेण वेत्तीति प्रविद्वान् (मर्त्त=मनुष्य) १.१४७.५. प्रकृष्टो विद्वान् (पूर्णो विद्वज्जन) ७ ३३ १२ [प्र+विद ज्ञाने (अदा०) धातो शतृ। 'विदे शतुर्वसुरिति वसुरादेशः]

प्रविन्दसे प्रकृष्टतया लभसे २ १३ ११. [प्र+विद्लृ लाभे (तुदा०) धातोर्लट्। शे मुचादीनाम्' इति नुम्]

प्रविवचिम प्रकृष्टतया विशेषेण वदामि प्र०—अत्र 'वाच्छन्दसि' इति कुत्वम् १ १६७ ७. [प्र+वि+वच् परिभाषणे (अदा०) धातोर्लट्। कुत्व छान्दसम्]

प्रविश प्रवेश कर स० वि० १३८, अथर्व० १४.२.२६. **प्रविशन्ति**=प्रविष्ट होने (डूबते) हैं, महाक्लेश भोगते हैं स० प्र० ३०६, ४० ६ [प्र+विश प्रवेशने (तुदा०) धातोर्लोट्। अन्यत्र लट्]

प्रविशत् प्रवेश कुर्वत् सत् (इन्द्रियम्=उपस्थ पुरुषलिङ्गम्) १६.७६ [प्र+विश प्रवेशने (तुदा०) धातो शतृ-प्रत्यय]

प्रविष्टः प्रवेश कुर्वाण सन् (अग्नि=विद्वान् मनुष्य) ५ ४ (प्र+विश प्रवेशने (तुदा०) धातो क्त.]

प्रविहि प्राप्नुहि प्र०—अत्र विकरणव्यत्ययेन ह्रस्वम् २.२६ २ [प्र+वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (अदा०) धातोर्लोट्। धातोर्ह्रस्वश्छान्दस]

प्रवीता कमिता (विद्वज्जन) ३४ १४ प्रकर्षेण व्याप्ता विद्युत् ३ २६ ३ [प्र+वी गतिव्याप्तिप्रजनादिषु (अदा०) धातो क्तान्तात् स्त्रिया टाप्। यद्वा वी धातो प्रोपसर्गात् कर्त्तरि तृच्। गुणाऽभावश्छान्दस। वेति कान्तिकर्मा निघ० २.६]

प्रवीयः प्रकृष्टतया व्याप्नुय १ १५१ ३. [प्र+वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लट्]

प्रवीरः प्रकृष्टश्चाऽसौ वीरश्च (इन्द्र=सेनापति) १७ ३७. [प्र-वीरपदयो समास.। वीरो वीरयत्यमित्रान् वेतेर्वा स्याद् गतिकर्मणो वीरयतेर्वा नि० १ ७]

प्रवृक्तम् प्रवर्जितम् (नौकादिकम्) १ ११६ २४. **प्रवृक्तः**=शरीरात् पृथग्भूत. (प्रजापति=जीव) ३६ ५. [प्र+वृजी वर्जने (रुधा० अदा०) धातो क्त]

प्रवृजे प्रवृजते यस्मिंस्तस्मिन् (न्यायालये) ५ ३० १५. [प्र+वृजी वर्जने (रुधा०) धातोर्घञर्थे क प्रत्यय]

प्रवृञ्जते प्रकर्षेण त्यजन्ति ७ २.४ **प्रवृञ्जे**=प्रकृष्टतया छिनद्मि १ ११६ १. [प्र+वृजी वर्जने (रुधा०) धातोर्लट्। व्यत्ययेनात्मनेपदम्]

प्रवृणे स्वीकरोमि ३ १६.१. [प्र+वृञ् वरणे (स्वा०) धातोर्लट्। विकरणव्यत्ययेन श्ना]

प्रवृत् य प्रवर्त्तते स (सत्पुत्र) ३ ३१ ३ यत् कार्य-

प्रवणेभिः गमनादिभि ३ २२ ४ [प्रवणमिति व्याख्यातम् । ततो भिस ऐसादेशो न भवति 'बहुल छन्दसि' सूत्रेण]

प्रवतम् निम्न स्थलम् ५ ३१ १ **प्रवतः**=अधोमार्गान् ४ १६ ३ निम्नदेशान् ४ १७ ७ प्रवण प्राप्तान् वाणानिव १ १४४ ५. नम्रान् (निम्नदेशान्) ६ ४७ १४ निम्नान् (देशान्) ७ ३२ २७ अधस्ताद् वर्त्तमानान् (लोकान्) ४ २२ ४ गमनाऽर्हान् (देशान्) ७ ५० ४ **प्रवता**=निम्न-मार्गेण ३.५ ८ अर्वाचीनेन मार्गेण ३ ३० ६ **प्रवताम्**=गच्छताम् (अपा=जलानाम्) २ १३ २ **प्रवत्सु**=निम्नासु (भूम्यादिषु) ६ ४७ ४ **प्रवद्भिः**=ये नीचमार्गे प्रवन्ते प्लवन्ते तैः (अ०—मार्गे) १ ३३ ६ **प्रवद्भ्यः**=प्रयत्न कुर्वद्भ्य (मरुद्भ्य=मनुष्यादिभ्य) ५ ५४ ६ ['प्र' इत्युपसर्गाद् अव रक्षणगत्यादिषु (भ्वा०) इति धात्वर्थे 'उपसर्गाच्छन्दसि धात्वर्थे अ० ५ १ ११८ सूत्रेण वति प्रत्यय । यद्वा प्रोपसर्गाद् गत्यर्थकावधातो शतृप्रत्यये धातोरकारस्य लोपे रूपम् । प्रवत उद्वतो निवत इत्यवति-कर्मा नि० १० २० प्रवत गतिकर्मा० निघ० २ १४ सवत्सरो वै प्रवत शश्वतीरप ता० ४ ७ ६]

प्रवतः नम्रत्वादिगुणप्रदानाम् (विद्वज्जनानाम्) ७ ३७ ५. [प्रवतमिति पदे द्रष्टव्यम्]

प्रवतेव निम्नस्थलेनेव ४ ३८ ३ [प्रवता-इवपदयो समास]

प्रवत्वति प्रवणदेशयुक्ते ! (पृथिवि=भूमे !) ५ ८४ १ **प्रवत्वती**=निम्नदेशयुक्ता (पृथिवी) ५ ५४ ६ प्रवणवती (द्यौ=प्रकाश) ५ ५४ ६ **प्रवत्वतीः**=निम्नगामिनी (वर्षा) ५ ५४ ६ [प्रवत्प्रातिः मतुवन्तान् ङीप् । प्रवत्वति प्रवणवति नि० ११ ३३]

प्रवत्वन्तः प्रवणशीला (पर्वता=मेघा) ५ ५४ ६ **प्रवत्वान्**=प्रशस्ता प्रवतो वेगादयो गुणा विद्यन्ते यस्मिन् स (रथ=यानम्) १ १८१ ३ [प्रवत्प्रातिः प्रशसाया मतुप्]

प्रवदाति प्रवदेत् ७ ३३ १४ [प्र+वद व्यक्तायां वाचि (भ्वा०) धातोर्लिङर्थे लेट्]

प्रवदामसि प्रकृष्टतया वदाम अ०—उपदिशामो वा १ ८७ ५ [प्र+वद व्यक्तायां वाचि (भ्वा०) धातोर्लट् । 'इदन्तो मसि' इति मस इदन्तता]

प्रवद्यामना प्रकृष्ट याति गच्छति यस्तेन (रथेन) १.११८ ३ [प्रवद् उपपदे या प्रापणे (अदा०) धातो कर्त्तरि मनिन् । 'अल्लोपोऽन.' इति लोपस्तु न भवति छान्दसत्वात् । प्रवत्=प्र' उपसर्गाद् 'उपसर्गाच्छन्दसि धात्वर्थे' इति वति । प्रवतमिति व्याख्यातम्]

प्रवन्त गच्छन्तु ४.५८ ८ गच्छन्ति प्र०—अत्र लङ्यड-भाव १७ ६६ [प्रुङ् गतौ (भ्वा०) धातोर्लङ । अडभाव]

प्रवन्तवे प्रविभाग कर्त्तुम् १ ११३१ ५ [प्र+वन सम्भक्तौ (भ्वा०) धातोस्तुमर्थे तवेङ् प्रत्यय]

प्रवया कान्तिमता (अह्ना=अहर्विद्यया) १५ ६ [प्र+वी गतिव्याप्तिप्रजनकान्त्यादिषु (अदा०) धातो-श्छान्दस रूपम्]

प्रवयाः य प्रकर्षेण व्याप्नोति स (जगदीश्वर) २ १७ ४ [प्रवया पुराणनाम निघ० ३ २७ प्रपूर्वकाद् वय गतौ (भ्वा०) धातोरौणादिकोऽसुन्प्रत्यय]

प्रवर्त्तमानकः प्रकृष्टतया वर्त्तमान (नकुल) १ १६१ १६ [प्र+वृतु वर्त्तने (भ्वा०) धातो शानच् । प्रवर्त्तमान-प्रातिः स्वार्थे कन्]

प्रवर्धयन्ति प्रकृष्टतयोन्नयन्ति १ ५४ ८ [प्र+वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताल्लट्]

प्रववाच प्रकृष्टतयोक्तवान् १ ६७ ४ [प्र+वच परि-भाषणे (अदा०) धातोर्लिट् । 'लिट्यभ्यासस्य०' इति प्राप्त सम्प्रसारण न भवति छान्दसत्वात्]

प्रववृधे प्रकर्षेण वर्धते ३ ५ २ [प्र+वृधु वृद्धौ (भ्वा०) धातोर्लिट्]

प्रवसथानि प्रवासान् २ २८ ७ [प्र+वस निवासे (भ्वा०) धातोर्बाहु० औणादिकोऽथ प्रत्यय]

प्रवसन् प्रवास कुर्वन् (अ०—अतिथि) ३ ४२ परदेश को गया हुआ मनुष्य म० वि० १४६, ३ ४२ [प्र+वस निवासे (भ्वा०) धातो शतृ-प्रत्यय]

प्रवहत प्रकृष्टतया वहन्ति प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ २३ २२ अ०—अपनयत ६ १७ **प्रवहन्ति**=प्रकर्षेण प्राप्नुवन्ति ४ २ [प्र+वह प्रापणे (भ्वा०) धातो-र्लोट् । अन्यत्र लट्]

प्रवा गमयितारौ (अश्विना=वायुसूर्याविव शिल्पिनौ) १ ३४ ८ [प्रुङ् गतौ (भ्वा०) धातोरच् कर्त्तरि । तत 'सुपां सुलुग्०' इत्याकार]

प्रवाचनम् उपदेशनम् ४ ३६ १ [प्र+वच परि-भाषणे (अदा०) धातोर्णिजन्ताल् ल्युट्]

प्रवाच्यम् प्रकर्षेण वक्तु योग्य शास्त्रम् १ ११७ ८ अध्यापनोपदेशार्थं विद्याज्ञापक वच. १ १०५ १० प्रवक्तुमर्हम्

आर्याभि० २.४८, २५.१३ **प्रशिषः**=प्रकृष्टानि शासनानि १.१४५.१ **प्रशिषा**=प्रशासनेन १०.२१ शिक्षा ने सं० वि० १२१, अर्च० १४.१५३. [प्र+शासु अनुशिष्टौ (अदा०) धातो क्विप्। 'शासो न संहितायाम्' अ० ६.४.३४ वा० सूर्योत्वम्। 'शासिवसिघसीनाञ्च' इति षत्वम्। प्रशिष प्रशासायाम् (क्र्यादिः) तै० सं० ५.७.१८.१]

प्रश्नविवाकम् य प्रश्नान् विवेचयति तम् भा०—प्रश्नोत्तरविवेचकम् (प्रतिष्ठितजलम्) ३०.१० [प्रश्नोत्तरद विपूर्वाद् वच परिभाषणे (अदा०) धातोर्णप्रत्ययः]

प्रश्निनम् प्रश्नान्. प्रश्ना विद्यन्ते यस्य तम् (सज्जनम्) ३०.१० [प्रश्न-अर्शआदि० मत्वर्थे इनि० प्रत्ययः। प्रश्नः=प्रच्छ जीप्सायाम् (तुदा०) धातो 'यजयाचयतविच्छप्रच्छरक्षो नङ्' अ० ३.३.९० सूत्रेण नङ्प्रत्ययः]

प्रश्रवसः प्रकृष्टं श्रवणमन्नं वा यस्मात् (मनुष्यात्) ५.४१.१६. [प्र-श्रवस्+पञ्चमी समासः। श्रवः अन्ननाम निघ० २.७ धननाम निघ० २.१०]

प्रष्टिभिः प्रश्नैः १.१००.१७ **प्रष्टिः** पृच्छन्ति जीप्सन्त्यनेन स (अग्नेर्वैश्वानरादिगुणसमूहः) १.३९.३ [प्रच्छ-जीप्सायाम् (तुदा०) धातोर्वाहु० औणादिकक्तिन् प्रत्ययः.]

प्रष्टिमतः प्रष्टयोऽज्ञीप्सा विद्यन्ते येषु तान् (रथान्) ६.४७.२४ [प्रष्टिप्राप्तिः मतुप्]

प्रष्णुवन्ति प्रकृष्टतया स्नेहयन्ति १.१६८.८. [प्र+ष्णु प्रस्रवणे (अदा०) धातोर्लट्]

प्रसक्षत् प्रसह्य कुर्यात् ४.१२.१ [प्र+षह्ल गतौ (भ्वा०) धातोर्लेट्]

प्रसत्तः प्रसन्नः (विद्वज्जनः) ५.६०.१. [प्र+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोः क्त। सत्वाऽभावश्छान्दसः]

प्रसद्य प्रगत्य १२.३८ [प्र+षद्लृ (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

प्रसन्ता विभाजकौ (अश्विना=द्यावाऽन्तरिक्षौ) ६.६२.१. [प्र+षण् सम्भक्तौ (भ्वा०) धातो तृच्। 'सुपा सुलुग्०' इत्याकारादेशः]

प्रसर्गे प्रकृष्ट उत्पादने १.१२१.४ [प्र+सृज (तुदा०) धातोर्घञ्प्रत्ययः]

प्रसर्पथ अ०—विजानीत १२.८६ **प्रसर्पामि**=प्रगत्य चलामि १०.३० [प्र+सृप्लृ गतौ (भ्वा०) धातोर्लोट् थप्रत्ययस्य तादेशो न छान्दसत्वात्]

प्रसर्वाणस्य प्रसर्वणं भूमौ यस्य तस्य (मनुष्यस्य) ५.१२.६. **प्रसर्वाग** प्रसर्वणं भूमौ गच्छन्तु (गावः) ५.८३.३ [प्र+सृ गतौ (भ्वा०) धातोरौणादिकः वनिप्। प्रसर्वस्य गमनमिव गमनं यस्य तत्]

प्रसर्वति प्रकर्षेण प्राप्नुयात् ८.३.१ **प्रसर्वे** प्रकर्षेण ३.३५.५ [प्र, सृ गतौ (भ्वा०) धातोर्विप्। प्रसर्वस्य गमनमिव गमनं यस्य तत्]

प्रसवम् प्रसूयते यस्मात् तं प्रसवम् ३.३६.६ प्रसूतिमेव प्रसवम् ३.३३.२ **प्रसवः**=सकाशात् ३.३३.४ प्रसूः (समाट्=सम्राज्ञी माता) ३.३८ प्रसोषम् १८.१ उत्पादकः (इन्द्र -पतिरेवास्य) १.७३.१ य प्रसोता (सविता - विद्वान् सभाध्यक्षः) ६.३५. प्रसोमसुवः (सोमसम्पादकः) ६.३३. प्रसवैश्वर्यमसुवः ६.६१ **प्रसवाय** उत्पादनाय भा०—धारणपोषणाय (मनुष्याय) २२.३२. प्रसवाय सकलैश्वर्योत्पादनाय च १८.२८. **प्रसवे**=प्रसूयतेऽस्मिन् जगति १०.६ एतस्मिन् ६.५ सूत्रे ५.२२ उत्पत्तिरूपे संसारे ४.१८ उत्पादने १८.३०. उत्पत्तौ ३३.२६ उत्पद्यतेऽस्मिन् जगति २.११ निष्पन्नैश्वर्ये ११.६. प्रसूयते प्राणिनोऽस्मिन् संसारे तस्मिन् २२.१ प्रकृष्टैश्वर्योत्पत्तौ सत्यां यस्मिन्नस्मिन् संसारे १.३१ प्रेरणे ऐश्वर्यप्राप्तौ वा १.२४ उत्पत्तौ ६.३०. पदार्थे विद्यमानेऽस्मिन् संसारे (जगति) ६.६. प्रजायाम् ऋ० भू० २१७, २०३ प्रकृष्टतया सुवन्ति प्रेरयन्ति सोमं यस्मिन् तस्मिन् १.१०२.६ उत्पत्तिधर्मके (संसारे) ३८.१ सवितृप्रसूतोऽस्मिन् जगति १.१० **प्रसवेन**=प्रेरणेन १०.२१. प्रकृष्टतया सुवन्ति विजानन्ति प्रेरयन्ति यस्मिन्, ऐश्वर्यार्थमुत्पादितेन, उत्पादनेन, प्रकृष्टैश्वर्येण सह वा २.१५ [षू प्रेरणे (तुदा०) षूङ् प्राणिगर्भविमोचने (अदा०) षूङ् प्राणिप्रजनने (क्रियां०) धातोर्वा 'ऋदोरप्' इति ल्युट्-प्रत्ययः। प्र-सवपदयो समासः। प्रसवाय सावित (पशु) मं० २.४२ सविता त्वा प्रसवाना सुवताम् सं० स० १.८.१०.१. सविता प्रसवानामीशे कौ० ५.२]

प्रसविता उत्पादकः (सविता=जगदीश्वरः) ४.५३.६ **प्रसवित्रा**=सकलचेष्टोत्पादकेनैव शुभकर्मणा १०.३० [प्र+षू प्रेरणे (तुदा०) धातो कर्त्तरि तृच्। षूङ् अभिषवे धातोर्वा तृच्। सविता सर्वस्य प्रसविता नि० १०.३२. आदित्योऽपि सवितोच्यते नि० १०.३२]

प्रसस्रुः प्रकृष्टतया स्रवन्ति ५.५३.७ [प्र+सृ गतौ (भ्वा०) धातोर्लिट्]

प्रसाहम् प्रकर्षेण सोढारम् (सज्जनम्) ६.१७.४.

रूपेण प्रवर्त्तते तस्य ज्ञाता (विद्वान् मनुष्य) १५ ९ [प्र+वृतु वर्त्तने (भ्वा०) धातो कर्त्तरि क्विप्]

प्रवृद्ध महोत्तमगुणविशिष्ट (इन्द्र=शत्रूणा दारयितो राजन्) १ ३३ ३ अतिशयेन विद्यया प्रतिष्ठित (ईश्वर) १.१६५ ९ सर्वेभ्यो महन् (ईश्वर) ३३ ७९ [प्र+वृधु वृद्धौ (भ्वा०) धातो क्त]

प्रवृह प्रकर्षेण पृथक् कुरु ६ ४४ ११ [प्र+वृह उद्यमने (तुदा०) धातोर्लोट्।

प्रवृहतात् प्रवर्द्धयन्तु १ १७४ ५ [प्र+वृह उद्यमने (तुदा०) धातोर्लोट्। 'तुह्योस्तातङ्०' इति आशिषि तातङ्]

प्रवेतु प्रकृष्टतया व्याप्नोतु प्राप्नोतु ७ ४२ १ [प्र+वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लोट्]

प्रवेपनी गच्छन्ती (भा०—व्यवहारधनविद्योन्नति) ५ ३४ ८ [प्र+टुवेपृ कम्पने (भ्वा०) धातोर्ल्युडन्तात् ङीप्]

प्रवेपयन्ति प्रकर्षेण कम्पयन्ति ३ २६ ४ [प्र+टुवेपृ कम्पने (भ्वा०) धातोर्णिजन्तात्लट्]

प्रवोच उपदिशामि ६ ५९ १. **प्रवोचत्**=उपदिशेत् ३ ५४ ५ प्रोच्यात् ४ ५ ३ **प्रवोचति**=उपदिशति ५ २७ ४ **प्रवोचम्**=प्रकृष्टतया कथयेयम् अ०—आश्रये ५ १८ प्रकर्षेण वदेयम् २ २१ ३ प्रकृष्टतया वच्मि २ १५ १ उपदिशेयम् ५ ८५ ५ **प्रवोचाम**=उपदिशेम ४ ३२ १०. **प्रवोचेत्**=गुणकर्मस्वभावत उपदिशेत् ३२ ९ [प्र+वच परिभाषणे (अदा०) धातोर्लुङ्। अडभावश्छान्दस। 'प्रवोचेत्' पदे लिङ्। विकरणव्यत्ययेन अङ्। प्रवोचम्=मुब्रवीमि नि० ११ ३९]

प्रवोढृन् प्रकृष्टतया वहत (जनान्) २ १५ ४ [प्र+वह प्रापणे (भ्वा०) धातो तृच्]

प्रव्राजे प्रव्रजन्ति यस्मिँस्तस्मिन् देशे ७.६० ७ [प्र+व्रज गतौ (भ्वा०) धातोर्घञ्]

प्रशस्त प्रशसनीय (अ०—राजन्) १ ३६ ९ श्लाघ्य (अग्ने=विद्वत्तमाध्यापक) ११ ३७ **प्रशस्तम्**=उत्तमम् (गृहपतिम्) ७ १ १ उत्कृष्टम् (रयिं=राज्यश्रियम्) २०.७९. श्रुष्टतमम् (वह्निम्) १ ६० १ **प्रशस्तः**=अत्युत्कृष्ट (न्यायाधीशो जन) २ २७ १२ श्रेष्ठ (अ०—मनुष्य) १ ६६ २ उत्तम (विद्वज्जन) १ १८० ८ [प्र+शसु स्तुतौ (भ्वा०) धातो क्त प्रत्यय औणादिक]

प्रशस्तयः सत्कीर्त्तय ६ ४५ ३ प्रशसनीया. प्रजा १५ ३९ प्रशसा १५ ३८ **प्रशस्तये**=उत्कृष्टतायै १.१७४ ४ प्रशसायै ५ ३८ ४ प्रशसनाय १ ७४ ६ प्रशंसनीयसुखाय १ २१ ३ उत्कर्षाय १.२३ १९ प्रशस्ताय (रथवते सज्जनाय) १ १२२.११ **प्रशस्तिभिः**=प्रशसिताभि. क्रियाभिः १ १४८ ३ प्रशसनीयाभि धर्म्याभि क्रियाभि ६ १५.२. प्रशसाभि ५ ९ ६ **प्रशस्तिम्**=श्रैष्ठ्यम् २ ४१.१६ प्रशस्तव्यवहारम् १ ७० ५ प्रशसिताम् (वाचम्) ७.२२.३. प्रशसाम् ५ ५७ ७ **प्रशस्तिषु**=गुणाना प्रशसासु ९.६. [प्र+शसु स्तुतौ (भ्वा०) धातो स्त्रिया क्तिन्]

प्रशस्ता श्रेष्ठौ (विद्वासौ जनौ) ५.६८ २. [प्रशस्त इति व्याख्यातम्। तत 'सुपा सुलुक्०' इत्याकारादेश]

प्रशस्ताम् उत्तमाम् (विय=प्रज्ञाम्) ७ १.१०. [प्रशस्त-प्राति० स्त्रिया टाप्]

प्रशस्तिकृत् प्रशसा विधात्री (स्त्री) १ ११३.१९. ['प्रशस्ति' इत्युपपदे डुकृञ् करणे (तना०) धातो क्विप्]

प्रशस्यते प्रशस्तो जायते २ ८ ३ [प्र+शसु स्तुतौ (भ्वा०) धातो. कर्मणि लट्]

प्रशस्यः सर्वत्र स्तुति करने योग्य (ईश्वर) आर्याभि० १ २९, ऋ० ५ ८ ३५ २ [प्र+शसु स्तुतौ (भ्वा०) धातो 'शसिदुहिगुहिभ्यो वेति वक्तव्यम्' अ० ३ १ १०९ वा० सूत्रेण क्यप्]

प्रशंसत प्रस्तुवीत तद्गुणान् प्रकाशयत प्र०—अत्राऽन्तर्गतो ण्यर्थ १ २१ २ **प्रशसात्**=प्रशसेत् ४ २ ८ **प्रशंसामः**=प्रकृष्टतया स्तुम १ ६० ५ **प्रशंसिषः**=प्रशसे १ ८४ १९ प्रशम प्र०—लेड्-मध्यमैकवचने ६ ३७ [प्र+शसु स्तुतौ (भ्वा०) धातोर्लोट्। अन्यत्र लेट् लट् च]

प्रशासत् प्रशासन कुर्वन् सन् (अ०—अहोरात्र) १ ९५ ३ [प्र+शासु अनुशिष्टौ (अदा०) धातो शतृ-प्रत्यय]

प्रशास्ता धर्म-सुशिक्षोपदेशप्रचारक (पुरोहितो जन.) १ ९४ ६ प्रशासनकर्त्ता (विद्वान् जन) २ ५ ४ **प्रशास्त्रोः**=सर्वस्य प्रशासनकर्त्रो (सभासेनेशयो) १० २१. [प्र+शासु अनुशिष्टौ (अदा०) धातो कर्त्तरि तृच्]

प्रशास्त्रम् प्रशासनम् २ १ २ [प्र+शासु अनुशिष्टौ (अदा०) धातोर्बाहु० औणादिक ष्ट्रन्प्रत्ययः]

प्रशिक्षति प्रकर्षेण विद्या गृह्णाति ग्राहयति वा प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ५९ २ [प्र+शिक्ष विद्योपादाने (भ्वा०) धातोर्लट्। व्यत्ययेन परस्मैपदम्]

प्रशिषम् प्रशासनम् भा०—कृता मर्यादा २५ १३. प्रत्यक्ष सत्यस्वरूप शासन और न्याय अर्थात् शिक्षा को स० वि० ५, २५ १३. अनुशासन शिक्षा, मर्यादा को

[प्र+पह मर्षणे (भ्वा०) धातोरण्प्रत्यय]

प्रसितयः प्रकृष्टानि प्रेमबन्धनानि ७ ३२.१३ **प्रसितिम्**=बन्धन जालम् १३.६ प्रकृष्ट सिनोति बध्नात्यनया ताम् (बन्धनरूपाम्) १.२० प्रबद्धाम् (पृथिवी=भूमिम्) ४ ४.१ भा०—अनेकविध पाशम् प्र०—प्रसयनात्तन्तुर्वा जाल वा नि० ६ १२, १३ ६ **प्रसितिः**=प्रकर्ष बन्धनम् ७.३ ४. प्रबन्ध १८ १ प्रकृष्ट बन्धनम् १८ १ **प्रसितौ**=प्रकर्षेण बन्धने ७ ४६ ४ **प्रसित्यै**=प्रकृष्टा चाऽसौ सिति-बन्धन यस्या तस्या (दुखप्रदाया क्रियाया) प्र०—अत्र पञ्चम्यर्थे चतुर्थी २ २० [प्र-सितिपदयो समास । सिति = षिञ् बन्धने (क्रया०) धातो स्त्रिया क्तिन् । प्रसिति प्रसयनात् तन्तुर्वा जाल वा नि० ६ १२]

प्रसितस्य बद्धस्य (वे =पक्षिण) ४ २७ ४. [प्र+षिञ् बन्धने (क्रया०) धातो क्त]

प्रसिन्धुभ्यः प्रकृष्ट समुद्रेभ्य १ १०६ ६ [प्र-सिन्धु-पदयो समास । सिन्धु =स्यन्दू प्रस्रवणे (भ्वा०) धातो 'स्यन्दे सम्प्रसारण धश्च' उ० १ ११ सूत्रेण उ प्रत्यय]

प्रसिसर्त्ति प्रकृष्टतया गच्छति २ ३८ २ [सिसर्ति गतिकर्मा निघ० २ १४]

प्रसिसृतम् प्राप्नुतम् २१ ६ [प्र+सिसर्ति गतिकर्मा (निघ० २ १४) धातोर्लोट्]

प्रसिस्रते प्रसरन्ति २ ११ ३ [सिस्रति गतिकर्मा (निघ० २ १४) धातो प्रोपसर्गाल्लट्। व्यत्ययेनात्मनेपदम्]

प्रसीषधाति प्रकृष्टतया साध्नुयात् भा०—प्रददाति ३४.५२. प्रसाधयति ६ ४६ ८ [प्र+साध ससिद्धौ (स्वा०) धातोर्लेटि छान्दस रूपम्]

प्रसुतिर प्रकर्षेण शोभनतया सन्तारय प्र०—तरते-विकरणव्यत्ययेन श 'ऋत इद्धातो ' इतीकार १ १० ११ [प्र+सु+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लोट्। विकरणव्यत्ययेन श । सवितु प्रसूति (पत्नी) तै० आ० ३ ६ २]

प्रसुधक्षि प्रकृष्टतया सुष्ठु दहसि १ ७६ ३ [प्र+सु+दह भस्मीकरणे (भ्वा०) धातोर्लट्। 'बहुल छन्दसी' ति शपो लुक्]

प्रसुभरे प्रकर्षेण सुष्ठु धरामि ५ ४२ १३ [प्र+सु+भृञ् भरणे (भ्वा०) धातोर्लट्]

प्रसुव प्रेरय १८ ६७ प्रेर्व ६ १ [प्र+षू प्रेरणे (तुदा०) धातोर्लोट्]

प्रसुवन् प्रसुवन्ति यस्मिँस्तदैश्वर्य्यम् ७ ४५ १ उत्पादयन् (सविता=सूर्य) २१.२१ [प्र+षू प्रेरणे (तुदा०) धातो. शतृप्रत्यय । षु प्रसवैश्वर्ययो (भ्वा०) धातोर्वा शतृ । व्यत्ययेन श प्रत्यय]

प्रसुवाति प्रेरयेत् ५ ८२ ६. प्रकाशयति ऋ० भू० १५७, [प्र+षू प्रेरणे (तुदा०) धातोर्लेट्]

प्रसूतः प्रेरित (जन) १० ३०. उत्पन्न. सन् धर्म-सभाऽधिकृत उपदेशक) ३ ५४ १६ [प्र+षू प्रेरणे (तुदा०) धातो क्त]

प्रसूता प्रेरिता सती (सेना) २६ ४८ उत्पन्ना (रात्री) १ ११३ १ [प्र+षू प्रेरणे (तुदा०) धातो क्तान्ताट् टाप् स्त्रियाम्]

प्रसूरयः प्रकर्षेण मेधाविनो विद्वास १ ६७ ३ [प्र-सूरिपदयोः समास । सूरि स्तोतृनाम निघ० ३ १६]

प्रसूवरीः सुखप्रसाविका (ओषधी =सोमादीन्) १२ ७७ [प्र+षूङ् प्राणिप्रसवे (दिवा०) धातो क्वनिप् । 'वनो रचे' नि ङीप् स्त्रियाम्, रेफश्चान्तादेश]

प्रसूषु प्रसूयन्ते यास्तासु (नवासु=प्रजासु) १ ६५ १० येभ्यो ये वा प्रसूयन्ते तेषु (कार्यकारणद्रव्येषु) १ ६७ ५ **प्रसूः**=या प्रसूतमुत्पादयति सा (वृत्ति) १८ ७ **प्रस्वः**=या प्रसूयन्ते ता ओषधय ७ ३५ ७ प्रसावित्री (अवनी = पृथिवी) २ १३ ७ [प्र+षूङ् प्राणिप्रसवे (दिवा०) धातो क्विप्]

प्रस्कण्वस्य प्रकृष्टश्चाऽसौ कण्वो मेधावी च तस्य (विद्वज्जनस्य) १ ४४ ६ [प्र-कण्वपदयो समास । कण्व मेधाविनाम निघ० ३ १५ 'प्रस्कण्वहरिश्चन्द्रावृषी' अ० ६ १ १५३ सूत्रेण सुडागम । प्रस्कण्व —कण्वस्य पुत्र कण्वप्रभवो यथा प्राग्रम् । नि० ३ १७]

प्रस्तरेण आसनेन १८ ६३ [प्र+स्तृञ् आच्छादने (क्रया०) धातो 'ऋदोरवि' त्यप् । यज्ञो वै प्रस्तर श० ३ ४ ३ १६ यजमाना वै प्रस्तरः श० १८ १ ४ ४ क्षत्र वै प्रस्तर श० १ ३ ४ १० अय वै स्तुप प्रस्तर । श० १ ३ ३ ७]

प्रस्तरेष्ठाः शुभे न्यायाविद्याऽऽसने तिष्ठन्ति ते (देवा =विद्वासो दिव्या पदार्था वा) प्र०—तत्पुरुषे कृति बहुलम्, अ० ६ ३ १४ इति सप्तम्या अलुक् २ १८. [प्रस्तरमिति व्याख्यातम्। तदुपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क प्रत्यय । समासे सप्तम्या अलुक्]

प्रस्तवते प्रकृष्टतया स्तौत्युपदिशति प्र०—अत्र 'बहुल छन्दसि' इति शपो ह्यलुक् ५ २० [प्र+ष्टञ् स्तुतौ

प्राणम् प्राणिति येन त जीवनहेतुम् ६ १४ शरीरस्थ वायुमिव प्रजाजनम् ६ ३१ बलयुक्त जीवनम् १३ ५४ नाभेरूर्ध्वगामिनम् (वायुम्) १४ ८ प्राण को आर्याभि० २.५, ३६ १ **प्राणः**=सर्वशरीरगामी वायु १ ६६ १ जीवनहेतु (वायु) १८ २२ येन प्राणिति स (प्राणवायु) १३ ५४ प्राणादिवायु २०.५ शरीरधारक (प्राणवायु) ४ १५ शरीरस्थो वायुविशेष ६ २० जीवनहेतुर्बलकारी (वायु) ६ २१ योगसिद्धबलयुक्त (वायुविशेष) ७ ४७ हृदिस्थो वायु १८ २ जीवनमूलो वायु २२ ३३ जीवननिमित्त (प्राणादिवायु) ३१ १२. शरीराद् बाह्यदेश यो वायुर्गच्छति स ऋ० भू० १०४, अथर्व० १२.५ ६ **प्राणात्**=ब्रह्माण्ड-शरीरयोर्मध्य ऊर्ध्वगमनशीलात् (वायो) ३ ७ **प्राणाय**=धनञ्जयगमनाय ३६ ३ शरीरस्याऽवयवान् जगत्प्राणो गमनाय ३६ ३ प्रकृष्टमन्यते जीव्यते येन तस्मै जीवनधारणहेतवे बलाय १ २० जीवनसुखाय १५ ६४. प्राणिति जीवयतीति प्राणो हृदयस्थो वायुस्तस्मै ७.२७ य आभ्यन्तराद् बहिर्नि सरति तस्मै (वायवे) २२ २३. प्राणिति सुख येन तस्मै (वायवे) १३ २४ प्राणपोषणाय २३ १८ सब शरीर और इन्द्रियो के वशी प्राण के समान सब जगत् के वशी परमेश्वर के लिए स० प्र० १६, अथर्व० ११.२४ २. **प्राणा.**=जीवसाधना (वायव) १७ ७१ **प्राणेन**=जीवनेन २० ८० बलेन ६ १८ **प्राणेभ्यः**=जीवनहेतुभ्य (वायुभ्य) ३६ १ [प्र+अन प्राणने (अदा०) धातो 'हलश्चे' ति करणे घञ्। प्राण यद्वै प्राणेनान्नमात्मन् प्रणयते तत्प्राणस्य प्राणत्वम् श० १२ ६ १ १४ प्रेति वै प्राण एति उदान श० १ ४ १ ५ प्राणो वा ऽग्नर्क श० १० ४ १ २३ प्राणो वै सविता ऐ० १ १६ प्राणो वै सावित्रग्रह कौ० १६ २ प्राण सोम श० ७ ३ १ २ चन्द्रमा वै प्राण जै० उ० ४ २२ ११ प्राणोऽमृत तद्वचग्ने रूपम् श० १० २ ६ १८ वायुर्वै प्राण कौ० ८ ४ यो वै प्राण स वात श० ५ २ ४ ६ प्राणो मातरिश्वा ऐ० २ ३८ प्राणो वनस्पति कौ० १२ ७ य प्राण स वरुण. गो० उ० ४ ११ प्राजापत्य प्राण तै० ३ ३ ७ २ प्राणा इन्द्रियाणि ता० २.१४ २ प्राणो वै यज्ञस्योद्गाता श० १४ ६ १ ८ प्राण सामवेद श० १४ ४ ३ १२ प्राणो भरत ऐ० २.२४. प्राणो बृहत् ता० ७ ६ १४ प्राणो वाचस्पति श० ६ ३ १ १६ वाग्वाऽउद कर्म प्राणो वाचस्पति श० ६ ३ १ १६ वाक् च वै प्राणश्च मिथुनम् श० १ ४ १ २ तस्या (वाच) उ प्राण एव रस जै० उ० १ १ ७ प्राणा दीक्षा तै० ३ ८ १०.२ प्राणा पशव तै० ३ २ ८ ६ प्राणा मनुष्या. श० १४ ४.३ १३. उपाꣳश्वायतनो वै प्राण श० १० ३ ५ १५. त्रय इमे पुरुषे प्राणा श० १ ३ ५ १३ स वा अय त्रेधा विहित प्राण, प्राणोऽपानो व्यान इति कौ० १३.६ पञ्चधा विहितो वा ऽअय शीर्षन्प्राणो मनो वाक् प्राणश्चक्षु श्रोत्रम् श० ६ २.२ ५ षड् वा ऽइमे शीर्षन् प्राणा श० १२ ६ १ ६. षड्ढि प्राणा श० ६ ७ १ २० सप्त शिरसि प्राणा ता० २ १ ४ २ सप्त वै शीर्षन् प्राणा ऐ० १ १७ अष्टौ प्राणा श० ६ २ २ ६ नव प्राणा श० ६ ३.१ २१ नव वै प्राणा सप्त शीर्षन् नवाञ्चौ द्वौ श० ६ ४ २ ५ नव वै पुरुषे प्राणा नाभिर्दशमी तै० १ ३ ७ ४. दश प्राणा श० ६ ३ १ २१ दश वा ऽइमे पुरुषे प्राणा आत्मैकादशो यस्मिन्नेते प्राणा प्रतिष्ठिता श० ३ ८ १ ३ द्वादशेमे पुरुषे प्राणा गो० पू० ५ ५ त्रयोदशेमे पुरुषे प्राणा नाभिस्त्रयोदशी श० १२ ३ २ २ एतावन्त (त्रीणि च शतानि षष्टिश्च) एव पुरुषस्य प्राणा गो० पू० ५ ५ को हि तद्वेद यावन्ते इमेऽन्तरात्मन् प्राणा श० ७ २ २ २० बहुधा ह्येवैष निविष्टो यत्प्राण जै० उ० ३ २ १ ३ तस्मात् सर्वे प्राणा प्राणोदानयोरेव प्रतिष्ठिता श० १२ ६ १ १० प्राणो वै हृदयमतो ह्ययमूर्ध्व प्राण सचरति श० ३ ८ ३ १५ प्राणो हृदये (श्रित) तै० ३ १० ८ ५ तस्मादयमात्मन् प्राणो मध्यत श० ७ ३ १ २ नासिके ऽउ वै प्राणस्य पन्था श० १२ ६ १ १४ बहिर्हि प्राण ता० ७ ६ १४ प्राणो वै ज्येष्ठश्च श्रेष्ठश्च श० १४ ६ २ १ प्राणा वै समिध ऐ० २ ४ लेखासु हीमे प्राणा श० ७ २ २ १८ शिरो वै प्राणाना योनि श० ७ ५ १ २२ प्राणो हि रेतसा विकर्त्ता श० १३ ३ ८ १ प्राणो रेत ऐ० २ ३८ अध्रुव वै तद् यत्प्राण. श० १० २ ६ १६ प्राणा वै रुद्रा जै० उ० ४ २ १ ६ प्राणो वा उपाꣳशु मै० ४ ५ ५ प्राणो वै वसिष्ठ ऋषि श० ८ १ १ ६ प्राणो वै वाक् मै० ३ २ ८ प्राणो वै स्वर ता० २४ ११ ६ प्राणो वै हिकार मै० ४ ६ ४]

प्राणाऽपानौ प्राणश्चाऽपानश्च तावुच्छ्वास-नि श्वासौ ३६ १ प्राण कि जिसमे ऊर्ध्व चेष्टा होती है और अपान कि जिसमे नीचे की चेष्टा होती है, ये दोनो आर्याभि० २ ५, ३६ १. प्राण दीर्घ-जीवन, अपान दु खो, क्लेशो का नाश स० वि० ८०, अथर्व० ११ ५.२४ [प्राण-अपानपदयो समास तौ मित्रावरुणौ प्राणापानौ जै० १ १०६ प्राणापानौ देव (ब्रह्म) गो० १ २ ११ प्राणो वै मित्रोऽपानो वरुण काठ० २१ १]

प्राणायनः प्राणा निर्वृत्ता यस्मात् स (वसन्तः= य सुगन्धादिभि वासयति) १३ ५४ [प्राण-अयनपदयो

इति नदीनाम निघ० १ १३, ४ १९ ७ [प्र-अग्रुवपदयो समास । अग्रुव नदीनाम निघ० १ १३]

प्राघर्मसत् य प्रकृष्ट समन्ताद् घर्म प्रताप सनति स (सूर्य इव राजा) ६ ७३ १ [प्र+आङ्+घर्म इत्युपपदे षण सभक्तौ (भ्वा०) धातो क्विप् । नस्य तश्छान्दस]

मन्द्रम् प्रशसनीयम् (सोमम्=ऐश्वर्यम्) ४ २६ ६ आनन्दप्रदम् (अतिथि=सत्योपदेशक जनम्) ४ २ ७ **मन्द्रस्य**=आनन्दत आनन्दयत (वचनस्य) ६ ३६ १ आनन्दप्रदस्य (विदुप पुरुषस्य) ३ ६ ७ **मन्द्रः**= प्रशसित (होता=विद्यादाता जन) १.१४१ १२ आनन्दित (अग्नि =विद्यार्थिजन) ५ ११ ३ आनन्दप्रद आनन्दित (अग्नि =परमात्मा) ४ ६ ५ कमनीयो हर्षयिता (वेधा = मेधाविजनः) ३ १४ १ आह्लादक (अग्नि =विद्वज्जन) ३ १० ७ स्तुत आनन्दप्रद (राजा) ३३ ६४ स्तोतुमर्हो धार्मिक (सज्जन) प्र०—अत्र 'स्फायितञ्चिवञ्चि०' उ० २ १३ इति रक्प्रत्यय १ २६ ७ पदार्थप्रापकत्वेन हर्षहेतु (राजदूत) १ ३६ ६ **मन्द्राः**=आह्लादयितार (उपदेशका जना) १ १२२ ११ **मन्द्रैः**=प्रशसितै (हरिभि =अश्वै) २० ५३ आनन्दप्रदै (हरिभि = अश्वै किरणैर्वा) ३ ४५ १ [मदि स्तुत्यादिपु (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ इति रक्]

मन्द्रया विज्ञानानन्दप्रदया (वाण्या) ५ २६ १ प्रशसितयाऽऽनन्दप्रदया (जिह्वया=वाचा) ७ १६ ६ आह्लादकामना विज्ञानप्रदया स्तुत्या १ ७६ ५. आनन्दसाधिकया (जिह्वया=सत्यप्रियया वाचा) १७.८ **मन्द्रा**=आनन्दप्रदा (अग्नेर्ज्वाला) १ १०० १६ **मन्द्राभिः**=आनन्दकारिकाभि (जिह्वाभि =वाग्भि) ६ १६ २ [मन्द्रमिति व्याख्यातम् । तत स्त्रिया टाप् । मन्द्रा वाङ्नाम निघ० १.११]

मन्द्रा आनन्दप्रदानि हवीपि २७ १५ [मन्द्र-प्रातिο शेर्लोपश्छन्दसि]

मन्धातारम् यानेन सद्यो दूरदेश गमयितार मेधाविनम् १ ११२ १३ [मन्धाता मेधाविनाम निघ० २ १५]

मन्म मन्तव्य विज्ञानम् ७ १० २ विज्ञानजनक शास्त्रम् १ १३१ ६ मन्तु योग्य ज्ञानम् १.१२६ ६ ज्ञातु योग्यम् (ज्ञानम्) १ १२६ ६ ज्ञानोत्पादक कारणम् ५ १२ २ मन्तव्यम् (अनेकविध सुखम्) २ १६ ८ मन्तव्य वेदोक्त ज्ञानम् १ १२० ३ **मन्मना**=येन मन्यते विजानाति तेन (मनसा=विज्ञानेन) १८ ७५ मन्यते जानाति येन तेन (ज्ञानेन) १ १४० १ विज्ञानवता (मनसा=चित्तेन) ३ १४ ५ **मन्मभिः**=ज्ञानविशेषै सह ३ ११ ८ मन्यन्ते जानन्ति यैस्तै (भा०—गुणप्रकाशै विद्यासाक्षात्कारै) प्र०—अत्र सर्वधातुभ्यो मनिन् उ० ४ १४५ इति मनिन्-प्रत्यय. ३ ५३ विद्वद्भि ४ ३ १५ विज्ञानैर्मन्यमानैर्वा (विप्रेभि =विपश्चिद्भि) १ १२७ २ **मन्मानि**= विज्ञानानि १.१६५ १३ मन्तव्यानि विज्ञानानि ७ ६१ २ यानानि २६ २६ [मन ज्ञाने (दिवा०) धातोरौणादिको मनिन् । मन्म मन नि० ६ २२ मन्म मननानि नि० १० ४२ मन्मभि मननीयै नि० १० ५]

मन्मनः मम मन १ १४०.११ [अस्मद्-मनस्-पदयो समास । 'प्रत्ययोत्तरपदयोश्च' इति अस्मदो मादेश]

मन्मनाम् मन्यमानाम् (प्रज्ञाम्) १ १५१ ६

मन्मसाधनः यो मन्मानि विचारयुक्तानि कार्याणि साधयति स (परमेश्वर) १ ६६ ६. मन्म विज्ञान साधन यस्य स (विद्वज्जन) १.१५१ ७ [मन्म इति व्याख्यातम् । तदुपपदे साध ससिद्धौ (स्वा०) धातोर्ल्युट् । 'कृत्यल्युटो बहुलम्' इति कर्त्तर्यपि ल्युट्]

मन्महे विजानीम ५ ५८ ३ मन्यामहे याचामहे वा १ ६२ १ [मन ज्ञाने (दिवा०) धातोर्लट् । 'बहुल छन्दसि' सूत्रेण शपो लुकि श्यनोऽप्यभाव । मन्महे याच्ञाकर्मा निघ० ३ १६]

मन्यत मन्येत ४ १७ ४ मन्यसे ४.१७.१. **मन्यताम्**=विज्ञापयतु स्वीकुरुताम् ४ २० स्वीकरोतु स्वीकार-

कारिका (ऊतय =रक्षणादिक्रिया) १ ९१ ९ सुखस्य भावयितार (वैद्या) १ ८९ ४ या मय सुख भावयन्ति ता (आप =सत्स्त्रिय) प्र०—मय इति सुखनाम निघ० ३.६, ३६ १४ **मयोभुवा**=सुख भावुकेन (अवसा=अन्नादिना) ६ ७६ ५ सुखसाधकेन (अवसा=रक्षणादिना) ५ ७७ ५ या मय सुख भावयति तया सत्यप्रियमङ्गलकारिण्या (वाचा=वेदवाण्या) प्र०—अत्राऽन्तर्गतो ण्यर्थ 'क्विप् चे' ति क्विप् ३ ४७ **मयोभूः**=मय सुख भावयन् (स्वस्तिगव्यूति =राजा) ११ १५ यो मय आनन्द भावयति स भा०—सुखकारी (विद्वज्जन) १८.४५ सुख भावुक (विद्वज्जन) १८ ४५ मय सुख भावयति या सा (ऊति =नीति) १ ११७ १९. [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्। मयोभुव सुखभुव नि० ९ २५]

मयोभुवा सुख भावयितारौ (अश्विनौ=वाय्वग्नी) १ ९२ १८. सुख भावुकौ (अश्विनौ=अध्यापकोपदेशकौ) ५ ४२ १८ ['मयोभू' रिति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

मयोभुः सुख भावुक (राजा) ६ ५२ ६ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातोर्डु]

मयोभून् मय सुख भावुकान् (सुवीरान्) १ ८४ १६ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्। मयोभून्=सुखभूनि नि० १३ ३९]

मराति म्रियते १ १९१ १० **मराम**=म्रियेमहि १ १९१ १० **मरामहे**=अकालमृत्यु क्षणभङ्गुर-देहे प्राप्नुयाम प्र०—अत्र विकरणव्यत्यय १ ९१ ६ [मृङ् प्राणत्यागे (तुदा०) धातोर्लेट्। विकरणव्यत्ययेन शप् परस्मैपद च। अन्यत्र लडपि। मरते=म्रियते नि० ११ ३८]

मरीचयः किरणा प्र०—'मृकृणिभ्यामीचि' उ० ४ ७०, १९ ३९ **मरीचीः**=किरणान् २५ ९ [मृङ् प्राणत्यागे (तुदा०) धातो. 'मृकृणिभ्यामीचि' उ० ४ ७० सूत्रेण ईचि। मरीचि एता वाऽआप स्वराजो यन्मरीचय श० ५ ३ ४.२१ सूर्यस्य मरीचि (पत्नी) तै० आ० ३ ९ २]

मरीचिपेभ्यः रश्मिभ्य ७ ६ किरणरक्षितृभ्य (देवेभ्य =वाय्वादिभ्य) उव ७ ३ ['मरीचि' इत्युपपदे पा रक्षणे (अदा०) धातो क। मरीचिपा. रश्मिनाम निघ० १ ५]

मरुतः वायव प्र०—'मृग्रोरुति' उ० १ ९४ इति मृङ्-धातोरुतिप्रत्यय मरुत इति पदनामसु पठितम् निघ० ५ ५ अनेन गमनागमनक्रियाप्रापका वायवो गृह्यन्ते १.१५ २. सभाद्यध्यक्षादयो मनुष्या १ ८७ २ मरणधर्माण (मर्या.=मनुष्या) ३ ५४ १३ विद्वासो मनुष्या ५ ५८ ६ सुशिक्षिता मानवा ५ ५८ ४ मननशीला (मनुष्या) ५ ५९ ४ मरणधर्माणो मनुष्यास्तत्सम्बुद्धौ १ ८५ १२ पुरुषार्थिनो मनुष्या ५ ५४ १४ शिल्पिनो मनुष्या ५ ६३.५. विद्वत्तमा (जना) १ १६५ १५ मरुद्वत्सुचेष्टा (जना) १ १६६ ६. महाबलिष्ठा (जना) १ १६७ ९ ब्रह्माण्डस्था अन्ये वायव १८ १७ हिरण्यानि रूपाण्यृत्विजो विद्वासश्च (गृहस्था) ८ ३१. मरणधर्मयुक्ता (विद्वासो जना) २ ३४.१. मरणधर्मस्य (देवस्य=विदुषो जनस्य) ६ ४८ २० उत्तमा मनुष्या ६ ६६ ८ परीक्षका विपश्चित १ ८६.२. प्राणादय १ ५२ ९ प्राण इव प्रिया सभासद १ १७१ ४ प्राणवायुवत्प्रिया (विद्वज्जना) २ ३४ ७ वायव इव व्याप्तविद्या मनुष्या ७.५७ ७. वायव इव वेगबलयुक्ता (धार्मिका विद्वज्जना) ३ ३२.४ वायुवद् बलिष्ठा शूरवीरा १७ ४० पवना १ १०७ २ सूक्ष्माऽवयवा १ ११६१ १४ वायव इव ज्ञानयोगेन शीघ्र गन्तारो मनुष्या १ ८५ ६ युक्त्या सेविता वायव १ ६४ १३ वायुवच्छीघ्रगमनकारिणो जना १ ३८ ३ योगाभ्यासिनो व्यवहारसाधका वा जना १.३८ ११ प्राण इव नेतार (मनुष्या) ७ ५९ १ शरीरत्यागहेतव (वायव) १ ६४ ६ वायुविद्यावेत्तार (जना) १ १६९ ५ प्राण इव प्रियाचरणा (मनुष्या) ५.५५ ४ मरणशीला (मनुष्या) ५ ५७ ८ ज्ञानक्रियानिमित्तेन शिल्पव्यवहारप्रापकान् (वायून्) प्र०—मरुत इति पदनामसु पठितम् निघ० ५ ५ अनेन प्राप्त्यर्थो गृह्यते १ २३ १० मननशीलान् मनुष्यान् ३३ ४९. विदुषाऽतिथीन् अ०—ऋत्विज भा०—यज्ञसम्पादका मनुष्या ३ ४४. **मरुताम्**=विदुषाम् (जनानाम्) १८ ४५. मनुष्याणा वायूना वा ५ ५३ १ पशूनाम् १४ २५ ऋतावृतौ यजता विदुषाम् १ ११४ ६ प्राणानामृत्विजा वा १० २३. पूर्णविद्यावलयुक्ताना पुरुषाणाम् १७ ४१ प्राणादि पवनो के आर्याभि० १.२७, ऋ० ५ ३ २७ २५ **मरुत्सु**=मनुष्येषु ४ १ ३ स्तावकेषु (जनेषु) १ १४२ ८ **मरुद्भिः**=वायुभिरिव स्वमित्रै सह ३ ४७ ४ प्राणैरिव वर्त्तमानै श्रेष्ठैर्जनै सह १ १३६ ७ दिव्यगुणैर्देवै सह १ १९ ६ धनञ्जयाख्यै सूक्ष्मै १ १९ ८ अनेकविधैर्निमित्तभूतैर्वायुभि १ १९ ९ उपर्यधोगमनशीलैर्वायुभि १.१९ ७. प्राप्तहेतुभि सह १ १९ ५. विद्वद्भि पवनैर्वा १ १०७ २ **मरुद्भ्यः**=पश्वादिभ्य प्रजाभ्य ३० ५ वायुवद् वर्त्तमानेभ्यो मनुष्येभ्य २४.१६ वायूनामाधारवलाकर्षणेभ्य १ ८५ ८ मनुष्येभ्य

[मदि स्तुतिमोदादिषु (भ्वा०) धातोर्लिटि क्वसु। ततो डीप्]

ममहन्त सत्कुर्वन्तु प्र०—अत्र 'तुजादीनाम्०' इत्यभ्यासदैर्घ्यम् ७ ५२ २ **ममहन्ताम्**=वर्धन्ताम् प्र०—व्यत्ययेनाऽत्र शप श्लु १ ९४ १६ सत्कारेण वर्धयन्ताम् १ १०० १९ सत्कारहेतवो भवन्तु १ ९६ ९ **ममहस्व**=भृश सत्कुरु ३ ५२ ६ **ममहे**=मह्यति प्र०—अत्र 'मह पूजायाम्' इत्यस्माल्लटि 'बहुल छन्दसि' इति श्लुविकरणो व्यत्ययेनाऽऽत्मनेपद तुजादित्वाद् दीर्घ १ ६५ १३ सत्कुर्याम् ५ २७ १ **ममुः**=मान कुर्वन्ति १ ११०.५ [मह पूजायाम् (भ्वा०) धातोर्लङ्। व्यत्ययेन श्लुरात्मनेपदञ्च। अन्यत्र लोटि लटि च रूपाणि]

ममाते मिमाते परिच्छिन्त प्र०—अत्र 'बहुल छन्दसि इत्यभ्यासेत्वप्रतिषेध ३ ३२ ७ **ममिरे**=निर्मिमते ७ २१ ७ मिमीते १ ५७ ५ व्याप्नुवन्ति ५ ५५ २ निर्मिमीरन् ३ ३८.३ मिनुयु २९ १९ **ममे**=सृजति ५ ८५ ५ मिमीते १ ५७ ५ मापयति १ १६० ४ [माङ् माने शब्दे च (जु०) धातोर्लट्। 'बा छन्दसी' त्यभ्यासेत्वप्रतिषेध। अन्यत्र लिट्]

ममृड्युः सुखयन्ति ४ १८ ८ [मृड सुखने (तुदा०) धातोर्लिटि छान्दस रूपम्]

ममृवान् मृत सन् १ ११६ ३ योगक्षेमविरह ऋ० भू० १८९, १ ११६ ३ [मृङ् प्राणत्यागे (तुदा०) धातोर्लिट क्वसु]

मम्नाते अभ्यासाते ७ ३१ ७ [म्ना अभ्यासे (भ्वा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्। कर्मणि वा रूपम्]

मम्रुषीः=म्रियमाणा (स्त्रिय) १ १४० ८ [मृङ् प्राणत्यागे (तुदा०) धातोर्लिट क्वसु। तत स्त्रिया डीप्]

मय इव सुखमिव १ १७५ ६ [मय-इवपदयो समास]

मयः ऐहिक सुखम् १८.८ सुखकारी (अग्नि=भौतिक सूर्यरूप) २२ १९ सुख सुखविशेषो वा ७ ४७ [मय इति सुखनाम निघ० ३ ६ यद्वै शिव तन्मय तै० २ २ ५ ५]

मयन्दम् यन्मय सुख ददाति तम् (छन्दः=विद्याधर्मशमादिकर्म) १४ ९ ['मयम्' इत्युपपदे डुदाञ् दाने (जु०) धातो क। मयन्दम्=यद्वा अनिरुक्त तन्मयन्दम् श० ८ २ ३ १३]

मयस्कराय य सर्वेषा प्राणिना मय सुख करोति तस्मै (परमेश्वराय सेनाधीशाय वा) १६ ४१ मन, इन्द्रिय, प्राण और आत्मा को सुख करने वाले (ईश्वर) के लिए आर्याभि० २ २६, १६ ४१ सुखकारकाय प० वि० [मयस्-उपपदे डुकृञ् करणे (तना०) धातो 'कृञो हेतुताच्छील्यानुलोम्येषु' अ० ३ २ २० सूत्रेण ट। मयस् सुखनाम निघ० ३ ६]

मयुम् जाङ्गलम् (पशु=चतुष्पाद गवादिकम्) १३ ४७. शस्यादिहिंसकम् पशुम् १३ ४७ **मयुः**=किन्नर २४ ३१ [डुमिञ् प्रक्षेपणे (भ्वा०) धातो 'भृमृशीङ्तृ०' उ० १ ७ सूत्रेण उ]

मयूखैः ज्ञानप्रकाशादिगुणै रश्मिभिर्वा प्र०—मयूखा इति रश्मिनामसु पठितम् निघ० १ ५, ५ १६ [माङ् माने शब्दे च (जु०) धातो 'माङ ऊखो मय च' उ० ५ २५ सूत्रेण ऊखो मयादेशश्च। मयूखा रश्मिनाम निघ० १ ५]

मयूररोमभिः मयूराणा लोमानीव लोमानि येषान्तै (हरिभि=अश्वै किरणैर्वा) ३ ४५ १ मयूरस्य रोमाणीव रोमा येषान्तै (हरिभि=अश्वै) २० ५३ [मयूररोमन्-पदयो समास]

मयूर्यः मयूराणा स्त्रिय १ १९१ ४ [मयूरप्राति० स्त्रिया डीप्। प्रथमाबहुवचने रूपम्। मयूर=मीञ् हिंसायाम् (क्र्या०) धातो 'मीनातेरूरन्' उ० १ ६७ सूत्रेण ऊरन्]

मयोभवाय मय सुख भवति यस्मात्तस्मै (परमेश्वराय सेनाधीशाय वा) १६ ४१ सर्वोत्तमसौख्यप्रदाय (ईश्वराय) प० वि० सासारिक सुख के करने वाले (ईश्वर) के लिए आर्याभि० २ २६, ३६ ४१ [मयस्उपपदे भू सत्तायाम् (भ्वा०) धातो 'ऋदोरप्' इत्यप्]

मयोभु मय सुख भवति यस्मात्तत् (सज्ज्ञानम्) २ २७ ५ परमसुख भवति यस्मात्तत् (भेषजम्=औषधम्) १ ८९ ४ सुख भावुकम् (ब्रह्म=जगदीश्वरम्) ५ ४२ २ सुखकारि (भेषजम्=औषधम्) २५ १७ **मयोभुना**=यो मयासि सुखानि भावयति तेन (राया=धनेन) ३ १९.६ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो 'डुप्रकरणे मितद्रवादिभ्य उपसख्यानम्' अ० ३ २ १८० वा० सूत्रेण डु]

मयोभु सुख भावुकानि (भेषजा=रोगनिवारकौषधानि) २ ३३ १३. ['मयोभु' इति व्याख्यातम्। तत शे 'सुपा सुलुक्०' इति लुक्]

मयोभुवम् सुखकारकम् (देव=विद्वास जनम्) १ १३८ २. सुख भावुकम् (विदुष जनम्) १ १३८.१ **मयोभुव.**=सुख भावुका (मनुष्या) ५ ५८ २ सुख-

मरुद्वृधः मनुष्यैर्वर्धमानान् (भा०—वनैश्वर्योपायान्) ३.१३ ६ [मरुदुपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप्। मरुद्वृध =सर्वा नद्य, मरुत एना वर्धयन्ति नि० ६ २४]

मरुन्नेत्राः मरुति ब्रह्माण्डस्थे वायौ नेत्र नयन येषा ते (देवा =सर्वेभ्य सुखदातारो विद्वज्जना) ६ ३६ **मरुन्नेत्रेभ्यः**=मरुतामृत्विजा प्रजास्थाना सज्जनाना वा नेत्रमिव नायकत्व येषा तेभ्य (देवेभ्य =दिव्यन्याय-प्रकाशकेभ्यो विद्वद्भ्य) ६ ३५ [मरुत्-नेत्रपदयो समास। मरुत इति व्याख्यातम्। नेत्रम्=णीञ् प्रापणे (भ्वा०) धातोरौणा० ष्ट्रन्। ये देवा पञ्चात्सदो मरुन्नेत्रा मै० २ ६ ३]

मर्कटः वानर २४ ३० [मर्क इति सौत्रो धातु। ततो वाहु० औणा० अटन्]

मर्कः मृत्युनिमित्त खल्वन्यायकारी (दुर्जन) ७ १८ मरणदु खदो दुर्नय ७ १७ **मर्काय**=मृत्युनिमित्ताय वायवे अ०—दुष्टाना प्रशमनाय श्रेष्ठव्यवहारस्थापनाय ७ १६ [मर्च इति सौत्रो धातु चेष्टायामर्थे। तत 'इण्-भीकापा०' उ० ३ ४३ इति कन्]

मर्चयति शब्दयति १ १४७ ५ उच्चरति १ १४७ ४. वाधते ५ ३ ७ **मर्चयात्**=सुमार्गे नयेत् २ २३ ७ [मर्च शब्दार्थे (चुरा०) धातोर्लट्। अन्यत्र लिड्]

मर्जयध्वम् शोधयत ७.२ ४ **मर्जयन्त**=शोधयन्तु ५ ३.३ शोधयन्ति १ ६१ २. घर्षणादिना शोधयन्तु ७ ३.५ **मर्जयेम**=शोधयेम ४ ४ ८ [मृजू शौचालङ्क-रणयो (चुरा०) धातोर्लोट्। अन्यत्र लडि लिडि च रूपाणि। वृद्धचभावश्छान्दस]

मर्जयन्तः शोधयन्त (गोतमासो जना) १ ६० ५. [मृजू शौचालकरणयो (चुरा०) धातो शतृ। वृद्धचभाव। मर्जयन्त गमयन्त नि० १२ ४२]

मर्डिता सुखप्रदाता (धार्मिको मनुष्य) १ ८४ १६ सुखयिता (इन्द्र =ईश्वर) ४ १७ १७ **मर्डितारम्**= सुखकरम् (इन्द्र=राजानम्) ४ १८ १३ [मृड सुखने (तुदा०) धातो कर्त्तरि तृच्। मर्डिता सुखयिता नि० १३ २८]

मर्त्त मरणधर्मयुक्त (मनुष्य) ५ ६६ १ **मर्त्तम्**=मनु-ष्यम् १ १३६ ५ **मर्त्तस्य**=मरणधर्मसहितस्य प्राणि-जातस्य १ ६२ १०. मननशीलस्य नरस्य ६ २८ ४ **मर्त्ता**=मनुष्य ४ ८ **मर्त्ताः**=अविद्वासो मनुष्या ४ १७ १६ मरणधर्माणो मनुष्या ३ ६ ६. साधारण-मनुष्या १ १०० १५ **मर्त्तेषु**=मरणधर्मेषु कार्येषु ५ १८ १ [मर्त्त इति मनुष्यनाम निघ० २ ३ मृड् प्राण-त्यागे (तुदा०) धातो 'हसिमृग्रिण्० 'उ० ३ ८६ सूत्रेण तन्]

मर्त्तभोजनम् मर्त्तेभ्यो मनुष्येभ्यो भोजन मर्त्तानां पालन वा १ ८१ ६ मर्त्तेभ्य इद भोजनम् ७ ३८ २. मर्त्तानां मनुष्याणा भोज्य वस्तु १ ११४ ६. [मर्त्त-भोजन-पदयो समास। भोजनम्=भुज पालनाभ्यवहारयो (रुधा०) धातोर्ल्युट्]

मर्त्तभोजना मर्त्तानां मनुष्याणा भोजनानि पाल-नानि ७ १६ ४ [मर्त्त-भोजनपदयो समासे शेर्लोपश्छन्दसि]

मर्त्तासः शरीरयोगेन जन्म-मरणसहिता (मनुष्या) २ १.१४ मननशीला मनुष्या. ३ ६ १ मरणधर्माण (मनुष्या) १ १०५ १६ [मर्त्तप्राति० प्रथमावहुवचने जसो ऽसुक्]

मर्त्यकृतम् साधारणमनुष्याऽऽचरितम् (एन = दुष्टाचरणम्) ८ २७ मर्त्यैराचरितम् (एन =पापम्) २० १८ अनित्यदेहेन निष्पादितम् भा०—अज्ञानादनुष्ठितम् (एन =पापम्) ३ ४८ [मर्त्य-कृतपदयो समास]

मर्त्यम् प्रजास्थ मनुष्यम् ६ ३७ पृथिव्यात्मक लोकम् ऋ० भू० १४२, ३३ ४३ मनुष्य-लोकम् ऋ० भू० १४२, ३३ ४३ मनुष्यशरीरधारिणम् (शत्रुम्) ५ ३५ ५ नाशसहित कार्य्यम् ३४ ३१ मनुष्यादिप्राणिजातम् ३३ ४३ विद्वास मनुष्यम् १.१८ ५ कर्म्म, प्रलयप्राप्तिव्यवस्थया कालव्यवस्थया वा मरणधर्मयुक्त प्राणिनम् १ ३५.२ **मर्त्यस्य**=साधारणमनुष्यस्य ६ ४८ २० मरणधर्मकस्य विश्वस्य मनुष्यस्य ऋ० भू० १३०, ३१ १७ अविदुष. (पुरुषस्य) २ ७ २ पीडितस्य मनुष्यस्य मर्त्तस्य ७ २५ ३. **मर्त्यः**=सुशिक्षितो धार्मिको भृत्यो मनुष्य १ ८३ १. अविद्वान् मनुष्य १ १६ २ **मर्त्यान्**=मरणधर्मान् मनुष्यादीन् ४ ५८ ३ **मर्त्यानाम्**=अविदुषाम् (जनानाम्) ४ १२ ५ मरणधर्माणा शत्रूणाम् ५.४ १ विद्याविज्ञानरहि-ताना मनुष्याणाम् ऋ० भू० २०५, १६ ४७ **मर्त्याय**= मरणधर्माय (मनुष्याय) ४ १२ ३ मनुष्यसुखाय ५ ४१ ७. नराय पतये १ १२४ १२ मनुष्य के लिए मं० वि० १०५, ५ ४१ ७ **मर्त्ये**=मर्त्यलोके ३ २ ६ **मर्त्येन**=मरण-धर्मेण शरीरेण १ १६४ ३० मरणधर्मसहितेन शरीरादिना १ १६४ ३८ **मर्त्येषु**=नश्यमानेषु पदार्थेषु १ ७७ १. मरणधर्मेषु मनुष्येषु कार्येषु वा ४ १६ **मर्त्यैः**=अविद्वद्भि-र्मनुष्यै २० १८ मृत्युधर्मै (मनुष्यै) ८ २७ मरणधर्मै

५५११ प्राण इव प्रियेभ्य (भा०—विद्वज्जनेभ्य) २४१६ [मृङ् प्राणत्यागे (तुदा०) धातोः 'मृग्रोरुति' उ० १६४. सूत्रेण उति। मरुत ऋत्विङ्नाम निघ० ३१८ पदनाम निघ० ५५ मरुत् हिरण्यनाम निघ० १२ मरुत् रूपनाम निघ० ३.७ मरुतो मितराविणो वा मितरोचिनो वा महद् द्रवन्तीति वा नि० ११ १४ मरुतो रश्मय ता० १४.१२६ युञ्जन्तु त्वा मरुतो विश्ववेदस इति युञ्जतु त्वा देवा इत्येवैतदाह श० ५१४६ गणशो हि मरुत ता० १६१४२ मरुतो गणाना पतय तै० ३११४२ सप्त सप्त हि मारुता गणा श० ६३१२५ मारुत सप्तकपाल (पुरोडाश) ता० २१ १० २३ मरुतो वै देवाना भूयिष्ठा ता० १४ १२ १. मरुतो ह वै देवविशो ऽन्तरिक्षभाजना ईश्वरा कौ० ७८. अहुतादो वै देवाना मरुतो विट् श० ४५२१६ मरुतो वै देवानामपराजितमायतनम् तै० १४६२ अप्सु वै मरुत श्रित गो० उ० १२२ आपो वै मरुत ऐ० ६३० पक्तिश्छन्दो मरुतो देवताष्ठीवन्त श० १०३२१० मरुत् स्तोमो वा एप (षोडशस्तोम) ता० १७१३ ओजो वै वीर्यं मरुत जै० ३३०६ कीनाश (कृषी कर्मकरा) आसन्मरुत सुदानव तै० २४८७ चत्वारिंशन्मरुतो देवा जै० १३४ मरुतो गणाना पतय तै० ३११४२ वीर्यं मरुत जै० १३०३]

मरुत्तंना अतिशयेन विद्वद्युक्तौ (अश्विना=अध्यापकोपदेशकौ) ११८२२ [मरुत्प्राति० अतिशायने तमप्। ततो द्विवचनस्याकारश्छान्दस]

मरुत्वतः प्रशसितविद्वद्युक्तस्य (राज्ञ) ५४२६

मरुत्वते=मरुतो वहवो मनुष्या कार्यसाधका विद्यन्ते यस्य तस्मै (शिल्पिजनाय) ३३५७. प्रशस्तानि मरुदस्त्राणि विद्यन्ते यत्र तस्मै (इन्द्राय=रणाय) ७३८ प्रजासम्बन्धाय प्र०—अत्र सम्बन्धे मतुप् 'भय' इति मस्य वत्वम् ७३५ प्रशसितप्रजायुक्ताय (इन्द्राय=सभापतये) ७३६ प्रजापालनसम्बद्धाय (राज्यैश्वर्याय) ७३८ प्रशसिता मनुष्या यस्मिन् तस्मै (विद्युद्रूपाग्नये) ५८७१ **मरुत्वन्तम्**=प्रशस्तप्रजायुक्तम् (इन्द=सम्राज प्रजापतिम्) ७३६ प्रशस्ता मरुतो मनुष्या विद्यन्ते यस्य तम् (इन्द्र=परमैश्वर्यवन्त राजानम्) ३४७५ सर्वप्राणियुक्तमृत्विग्युक्त वा (इन्द्र=जगदीश्वर सभाध्यक्ष वा) ११०१३ प्रशस्ता मरुतो विद्यावन्त ऋत्विजोऽध्यापका विद्यन्ते यस्मिँस्तम् (अ०—अध्यापकम्) ११०११ मरुत सम्बन्धिनो विद्यन्ते यस्य तम् (इन्द्र=विद्युतम्) प्र०—अत्र सम्बन्धार्थे मतुप् 'तसौ मत्वर्थे' अ० १४१६ इति भत्वाज्जश्त्वाऽभाव १२३७

मरुत्वः=प्रशस्तविद्यायुक्त (विद्वज्जन) ११०१८. प्रशसितधनयुक्त (इन्द्र=राजन्) ३५१७ मरुत प्रशस्ता धर्मसम्बद्धा. प्रजा यस्य तत्सम्बुद्धौ (इन्द्र=सम्राट्) ७.३५.

मरुत्वान्=मरुतो वहवो वायवो विद्यन्ते यस्मिन् स (सूर्य) ६४७५ प्रशस्ता मरुत प्रजा सेना वा विद्यन्ते यस्य स (इन्द्र=शत्रुजित् सेनापति) ७३८ प्रशस्तवायुमान् (इन्द्र=सूर्य) १८०.११ यस्य सृष्टौ सेनाया वा प्रशस्ता वायवो मनुष्या वा विद्यन्ते स (इन्द्र=परमेश्वर. सभाध्यक्षो वा) ११००२ प्रशस्तरूपवान् (इन्द्र=विद्युदादिरूपोऽग्नि) ३४६ मनुष्यादिबहुप्रजायुक्त (वैद्यो जन) २.३३६ अत्यन्त बलवान् (इन्द्र=परमात्मा) आर्याभि० १३२ ऋ० १७१० १५. [मरुत्-प्राति० सम्बन्धार्थे प्रशसाया भूम्न्यर्थे वा मतुप्। 'भय' इति मतुपो मस्य वत्वम्। 'तसौ मत्वर्थे' इति भत्वाज्जश्त्व पदकार्य न भवति। मरुत्वान्=मरुद्भिस्तद्वान् नि० ४८]

मरुत्वती प्रशस्तरूपयुक्ता (राज्ञी) २३०८ प्रशस्ता मरुतो मनुष्या विद्यन्ते यस्या सा (वाणी=सकलविद्यायुक्ता वाक्) ७३१८ **मरुत्वतीः**=मनुष्यादिप्रजासम्बन्धिनी (अप=जलानि) १८०४ [मरुत्-प्राति० मतुवन्तात् स्त्रिया ङीप्]

मरुत्वतीयम् वहवो मरुतो व्याख्यातारो मनुष्या विद्यन्ते यस्मिँस्तत्र भवम् (उक्थ=वाच्यम्) १५१२ [मरुत्-प्राति० भूम्न्यर्थे=मतुप्। तत 'सास्य देवता' इत्यर्थे 'द्यावापृथिवी शुनासीर०' अ० ४२३२ सूत्रेण छ। छस्येयादेश। छन्दसि भवार्थेऽपि]

मरुत्वतीयाः मरुता सम्बन्धिनो व्यवहारा १८.२० [मरुत्वत्-प्राति० भवार्थे छ। मरुद्वतीयम्—(शस्त्रम्) पवमानोक्थ वा एनद् यन् मरुत्वतीयम् ऐ० ८१ तदेतद् वार्त्रघ्नमेवोक्थ यन्मरुत्वतीयमेतेन इन्द्रो वृत्रमहन्। कौ० १५२ तदेतत् पृतनाजिदेव सूक्त यन्मरुत्वतीयमेतेन ह इन्द्र पृतना अजयत् कौ० १५३ वज्रो वै मरुत्वतीया (ग्रहा.) मै० ४६८]

मरुत्स्तोत्रस्य मरुता वेगादिगुणै स्तुतस्य (वृजनस्य=व्यवहारस्य) ११०१११ [मरुत्-स्तोत्रपदयो समास]

मरुद्गण मरुता मनुष्याणा वायूना वा गण समूहो वा यस्य तत्सम्बुद्धौ भा०—न्यायाधीश (इन्द्र=राजन्) ३३६५ **मरुद्गणः**=मरुतामुत्तमाना मनुष्याणा गण. समूहो यस्य स (इन्द्र=राजा) ६५२११ **मरुद्गणाः**=मरुता मनुष्याणा समूहा २४११५ [मरुत्-गणपदयो समास]

क्विप्-प्रत्यये पृषोदरादित्वाद् रूपसिद्धि]

मलिम्लुचाय स्तेनाय प्र०—मलिम्लुच इति स्तेननाम निघ० ३ २४, २२ ३० [मलिन्-उपपदे म्लुचु गत्यर्थे (भ्वा०) धातो क]

मशर्शारस्य यो मशान् दुष्टान् शब्दान् शृणाति हिनस्ति तस्य (राज्ञ) प्र०—अत्र पृषोदरादिना पूर्वपदस्य रुगागम १ १२२ १५ [मशोपपदे शॄ हिंसायाम् (क्र्या०) धातोरण्]

मस्तिष्केण शिरस्थमज्जातन्तुसमूहेन २५ २ [मस्त मस्तकम् इष्यति स्वाधारत्वेन प्राप्नोतीति विग्रहे मस्तोपपदे इषु गतौ (दिवा०) धातो क । पृषोदरादित्वाद् रूपसिद्धि]

महत् पुष्कलम् (वीर्यं=पराक्रमम्) २ १७ ३. सर्वेभ्यो वृहत् (चेतनमात्रस्वरूप ब्रह्म) ३ ५५ ५ पूज्य वृहत् (यश) ३२ ३ विस्तीर्णम् (आवपन=क्षेत्रम्) २३ ६ वडे (असुरत्वम्=चेतनमात्र ब्रह्म) स० प्र० ११०, ३ ५५ १६ वडा (यश=धर्मयुक्त कामो का करना) स० प्र० ४५५, ३२ ३ महोत्तमगुणविशिष्टम् (पौंस्य=पुरुषार्थयुक्त वलम्) १ १०१ ३ **महान्ति**=विज्ञानादीनि ५ ५६ ४ [महत् उदकनाम निघ० १ १२ महत् महन्नाम निघ० ३ ३ महति पूजयति पूज्यते वा तन्महदिति विग्रहे मह पूजायाम् (भ्वा०) धातो 'वर्त्तमाने पृषद्वृहन्महत्'० उ० २ ८४ सूत्रेण अति । महान् कस्मान् मानेनान्याञ्जहातीति शाकपूणि । महनीयो भवतीति वा नि० ३ १३ महद्वा अन्तरिक्षम् ऐ० ५ १८,१६ अन्तो वै महत् ऐ० ५ २, १२ एष ह वै महान् देवो यद्यज्ञ गो० १ २ १६.]

महतः पूज्यस्य व्यापकस्य वा (सत्यस्य=जगदीश्वरस्य) २ १५ १ पूजनीयस्य (राज्ञ) ४ २२ ५ प्रवलान् (शत्रून्) १ १७८ ५ आकाशादे २० ३२ **महति**=विशाले (सधस्थे=सहस्थाने) ११ १८ व्यापकत्वादिमहागुणविशिष्टे (अन्तरिक्षे=अन्तरिक्षस्य आकाशे) १६ ५५ **महते**=वृहते पूजिताय वा (इन्द्रियाय=धनाय) १ १०४ ६ वहुविधाय (धनाय) १.१०४ ७ वडे (क्षत्राय=चक्रवर्त्ति राज्य के लिए) स० प्र० १८३, ६ ४० विशिष्टाय पूज्यतमाय (सौभगाय=सुष्ठु ऐश्वर्याणां भावाय) ५ ४३ सत्कर्त्तव्याय (क्षत्राय=क्षत्रियकुलाय) १० १८ **महत्सु**=महाप्रवलेषु (आजिषु=सङ्ग्रामेषु) १.८१ १ **महद्भिः**=महागुणैः (राजप्रजाजनैः) ४ ४१ २ महासुखकारकैर्गुणैः १.७२ ६ महागुणविशिष्टैः (वाजेभिः=सत्यैः) ४ २२ ३. **महद्भ्यः**=महागुणेभ्यो विद्यावयोभ्यो वृद्धेभ्यः पूज्येभ्यः (राजपुरुषेभ्यः) १६ २६ **महद्भ्याम्**=पूज्याभ्याम् (पित्राचार्यादिभ्याम्) ३ ७ ६ **महान्**=सर्वोत्कृष्ट पूज्यतमश्च (इन्द्रः=भगवान् जगदीश्वर) ७ ३६ महागुणकर्मस्वभाव (इन्द्रः=ईश्वर) ७ ४० महाशयः (इन्द्रः=राजा) ६ ४५ १३ सर्वेभ्यो ज्येष्ठः (विद्युद्रूपोऽग्निः) ३८.२२ सर्वेभ्यो वरीयान् सर्वैः पूज्यश्च (ईश्वरः) १३.२ गुणैर्महत्त्वयुक्तः (वरः) १ ५६ ३ पूज्यतमो महाशयः (इन्द्रः=ऐश्वर्यवान् विद्वज्जनः) ३ ३६ ५ सर्वोत्कृष्टः (सेनापतिः) १ ८१ ४ सर्वेभ्यो महत्तमः (इन्द्रः=परमेश्वरः) १ ४.१० सर्वोत्कृष्टः ईश्वरः सूर्यलोको वा परिमाणेन महत्तमः १ ६ १ सर्वथाऽनन्तगुणकर्मस्वभावसामर्थ्येन युक्तः (इन्द्रः=सर्वजगद्राजः) १ ८ ५ महत्त्वपरिमाणतः सर्वेभ्योऽधिकः (वेदविद् आप्तो विद्वज्जनः) ३ ५३ ६. महत्त्वादिगुणविशिष्टः (ईश्वरः) ३३ ३६ पूजनीयतमः (राजा) ३३ ६५ व्याप्तः सन् (परमात्मा) ३ ५५ ६ अतिविस्तीर्णः (अग्निः=विद्युत्) ४ ७ ७ व्याप्त्यादिमहागुणविशिष्टः (कविः=कालः) १ ६५ ४ महत्त्वपरिमाणः (अग्निः=सूर्यलोकः) ३ ६ ४ **महान्तम्**=विद्यावयोवृद्धं जनम् प० वि० । १ ११४ ७ वृद्धतमम् (परमेश्वरम्) ऋ० भू० १३१, ३१ १८ महागुणविशिष्टं पूज्यं जनम् १६ १५ महत्परिमाणम् (कोशः=मेघम्) ५ ८३ ८ वडो से भी वडे (ईश्वर) को आर्याभि० २ ८, ३१ १८ **महान्तः**=परिमाणेनाऽधिकाः (विद्वांसो=जनाः) १ १६६ ११ [महदिति व्याख्यातम् । 'महान्' इत्येवमादौ 'सान्तमहत संयोगस्ये' ति दीर्घः । प्रजापतिर्वाव महान् ता० ४ १०.२ अग्निर्वै महान् जै० उ० ३ ४ ७ प्राण एव महान् श० १० ४ १ २३]

महय पूजयोपकुरु वा १ ५२ १ **महयसे**=सत्क्रियसे ६ १५ २ **महयन्**=सत्कुर्वन्ति ७ ४२ ३ **महयन्तः**=पूजयेयुः ३ ३ ३ **महेत्**=पूजयेत् १.१११ ३ **महेम**=सत्कुर्याम ७ २ ३ [मह पूजायाम् (भ्वा०) धातोर्णिजन्ताल्लोट् । अन्यत्र लट् लङ् च । 'महेत्' इत्यादौ लिङ् मह पूजायाम् इति चुरादावपि । महयति अर्चतिकर्मा निघ० ३ १४]

महयते महते (रायेः=धनाय) ७ ३२ १६ **महयन्**=सत्कुर्वन् (प्रजाजनः) १ ५४ २ **महयन्तम्**=सत्कर्त्तव्यम् (कामम्) १ १७८ १ **महयन्तः**=महानिवाऽऽचरन्तः (प्रजाजनाः) ४ १७ १८ पूजयन्तः (विद्वांसो जनाः) ५ ३१ ४ [मह पूजायाम् (चुरा०) धातो शतृ । महत्प्राति० वा 'उपमानादाचारे' सूत्रेणाचारे क्यजन्ताच्छतृ]

शरीरै ३४८ [मर्त्य इति मनुष्यनाम निघ० २.३ अनात्मा हि मर्त्य श० २२२८ मर्त्यान्=मनुष्यान् नि० १३७]

मर्त्यत्रा मर्त्येषूपदेशका (जना) ७५२१ मर्त्येषु मनुष्येषु ६६२८ [मर्त्यप्राति० 'देवमनुष्यपुरुषपुरुमर्त्येभ्य०' अ० ५४५६ सूत्रेण सप्तम्यन्तात् त्रा प्रत्यय]

मर्त्यासः मनुष्या १.११३११ [मर्त्यप्राति० प्रथमा बहुवचने जसोऽमुक्]

मर्त्येषितः मर्त्यै सेनास्थैरितरैश्चेषितो विजय १.३६८. [मर्त्य-इषितपदयो समास। इषित=इषु इच्छायाम् (तुदा०) धातो क्त]

मर्धतः हिंसत ६६०४ **मर्धति**=हिंसति ७५६४ **मर्धन्ति**=योधयन्ति ११६६२ हिंसन्ति ३.५४१४ **मर्धिषत्**=अभिकाङ्क्षेत् ७३२५ **मर्धिष्टम्**=हिंस्तम् ३३८८ **मर्धीः**=अभिकाङ्क्षे ७२५४ उन्दिनान् कुरु ४.२०१० [मृधु उन्दने (भ्वा०) धातोर्लेट्। धातूनामनेकार्थकत्वादत्र हिंसने। अन्यत्र लेट् लुङ् च]

मर्म जीवननिमित्तम् १६१६ गुह्याऽवयवम् ५३२५. यस्मिन् प्रहते म्रियते तत् ३३२४ **मर्माणि**=शरीरस्थान् जीवनहेतूनवयवान् ६७५.१८ यानि ताडितानि सन्ति सद्यो मरणजनकान्यङ्गानि १७४६ [मृङ् प्राणत्यागे (तुदा०) धातोर्मनिन्। 'कृतो बहुल वे' ति वार्तिकेन कर्तृभिन्ने कारकेऽपि मनिन्]

मर्मर्त्तु भृश प्राप्नोतु २२३६ मृङ् प्राणत्यागे (तुदा०) धातोर्यङ्लुगन्ताल्लोट्]

मर्मृजत शुद्धा भूत्वा शोधयन्ति ४११४ **मर्मृजतः**=भृश शोधयत ४२१६ **मर्मृजन्त**=अत्यन्त मार्जयन्तु शोधयन्तु १.१३५५ [मृजू शौचालकरणयो (चुरा०) धातोर्यङ्लुगन्ताल्लोट्। अन्यत्र लटि लडि च रूपाणि]

मर्मृजेन्यः अत्यन्तमलङ्करणीय (विद्वान् राजा) ११८६७ भृश शोधक (अग्नि) २१०१. [मृजू शौचालकरणयो (चुरा०) धातोर्यङ्लुगन्तात् कृत्यार्थे केन्य]

मर्मृजमा भृश शुद्ध शोधयिता (अग्निः=वैद्यराजो विद्वान्) ३१८४ [मृजू शौचालकरणयो (चुरा०) धातोर्यङ्लुगन्तान् मनिन्]

मर्मृज्यते अतिशयेन शुद्ध्यते १६५८ **मर्मृज्यन्ते**=शोधयन्ति ४१५६ [मृजू शौचालकरणयो (चुरा०) धातो क्रियासमभिहारे यङन्ताल् लट्]

मर्मृज्यमानाः भृश शुद्धा (युवतय=स्त्रिय) २३५४. उत्तम ब्रह्मचर्यव्रत और सद्विद्याओं से अत्यन्त युक्त (युवतिया) स० वि० १०४, २.३५४ [मृजू शौचालकरणयो (चुरा०) धातोर्यङन्ताच्छानच्। तत स्त्रिया टाप्]

मर्मृशत् अतिशयेन सहमान (मज्जन) ११४०५ भृश विचारयन् (विद्वज्जन) ३.३८१ [मृश आमर्शने (तुदा०) धातोर्यङ्लुगन्ताच्छतृ]

मर्य इव यथा मनुष्य १६११३ प्राप्त होने वाले पति के समान स० वि० १३६, अथर्व० १४२३७

मर्या इव=यथा विद्वांसो मनुष्या ५५६३. [मर्य-इव-पदयो. समास]

मर्यः मनुष्य ४२०५. मरणधर्मा मनुष्य १.१६३८. पतिर्मनुष्य ११११५२ **मर्याः**=मरणधर्माण (नर=नेतारो जना) ५५३३ मरणधर्मशीला मनुष्यास्तत्सम्बोधने प्र०—मर्या इति मनुष्यनामसु पठितम् निघ० २३, १.६३ मरणधर्मका (वायव) १६४२ [मर्य इति मनुष्यनाम निघ० २३ मर्यो मनुष्यो मरणधर्मा नि० ३१४ मर्या इति मनुष्यनाम। मर्यादाभिधान वा स्यात् नि० ४२]

मर्यकम् मर्यम् (अपत्यम्) ५२५ [मर्य-प्राति० स्वार्थे कन्]

मर्यश्रीः मर्याणा श्री शोभा यस्मात् स (अग्नि=पावक) २१०५ मर्याणा मनुष्याणा श्रीरिव ११२४ (मर्य-श्रीपदयो समास]

मर्यादायै न्यायाऽन्यायव्यवस्थायै भा०—प्रश्नोत्तरकरणसामर्थ्याय ३०१० [मर्यादा=मर्यैरादीयते। मर्यादा-मर्यादिनोर्विभाग नि० ४२]

मर्यासः मनुष्या ५६१४ [मर्यप्राति० जसोऽमुक्]

मर्षिष्ठाः विनाशये १७११० [मृङ् प्राणत्यागे (तुदा०) धातोर्लिङ्]

मलम् अशुद्धिकरम् अ०—अविद्यारूपम् ६१७ [यन् मृज्यते शोध्यत इति विग्रहे मृजू शौचालकरणयो (चुरा०) धातो 'मृजेष्टिलोपश्च' उ० १११० सूत्रेण कल धातोष्टिलोपश्च]

मलादिव यथा मलिनताया २०२० [मलाद्-इव पदयो समास]

मलिम्लवः ये मलिना सन्तो म्लोचन्ति गच्छन्ति ते (स्तेनास=गुप्ताश्चौरा) ११७६ **मलिम्लून्**=मलिनाचारान् सिंहादीन् भा०=गवादिहिंसकान् पशून् पुरुषान् वा ११७८ [मलिन्-उपपदे म्लुचु गत्यर्थे (भ्वा०) धातो

वलादिगुणविशिष्टमनीकम्) १ ५७ ६ महत्तमम् (सिन्धु= समुद्रम्) २ ११ ६ महान्त महाशय सर्वाऽध्यक्षम्) ६ २६.१ [महत्-प्राति० पदुचा बहुवचने 'छान्दसो वर्णलोपो वे' ति तलोपे रूपम्]

महामनसाम् महान्ति मनासि विज्ञानानि येषा तेषाम् (देवाना=विद्वत्पुरुषाणाम्) १७ ४१ [महत्-मनस्पदयो समास]

महारथः महान्तो रथा वीरा वा यस्य स (राजन्य = राजपुत्र) २२ २२ [महत्-रथपदयो. समास]

महावदूरिणा महावर्णयुक्तेन (पदा=पादेन) १.१३३.२. [महत्-वद्वरिपदयो समास]

महावधः महान् वधो नाशन येन स' (महारोग) ५.३४ २ **महावधात्**=महतो हननात् ५ ८३ २. [महत्-वधपदयो समास। वध =हन हिंसागत्यो (अदा०) धातो 'हनश्च वध' अ० ३ ३ ७६. सूत्रेणाप् वधादेशश्च। महावधात्=महान् ह्यस्य वध नि० १० ११ वध. वलनाम निघ० २ ६ वज्रनाम निघ० २ २०]

महावीरम् महांश्चासौ वीरश्च तमिव महाकर्पण-प्रकाशादिना युक्त सूर्यलोकम् १ ३२ ६ **महावीरस्य**= महांश्चासौ वीरश्च तस्य (सेनापते) १६ १४. [महत्-वीरपदयो. समास]

महावैलस्थे महागर्त्तयुक्ते (स्थाने) १ १३३.३. [महत्-वैलपदयो समास। ततो महावैलोपपदे तिष्ठते क। वैलम्=विल-प्राति० स्वार्थेऽण्]

महावैश्वदेवः महता विश्वेषा सर्वेषामय व्यवहार' १८ २० [महत्-वैश्वदेवपदयो समासः। वैश्वदेव =विश्व-देव-प्राति० स्वार्थेऽण्। देव =दिवु क्रीडाविजिगीषाव्यव-हारादिषु (दिवा०) धातोर्घञ्]

महाव्रातः महान्तो व्राता व्रतेषु कुशला जना सखायो यस्य स (इन्द्र =परमैश्वर्ययुक्तो जन) ३ ३०.३ [महत्-व्रातपदयो समास। व्रात =व्रतप्राति० कुशलार्थेऽण्। व्रतमिति कर्मनाम वृणोतीति सत नि० २ १३]

महासेनासः महती सेना येषान्ते (वीरजना.) ७ ३४ १६ [महतीसेनापदयो. समास। ततो जसोऽमुक्]

महि पूज्य महत् (श्रव =श्रवणम्) १२ १०६ महत् पूजितम् (जात=विज्ञानम्) १ १५६ २. महत्तम पूजनीयम् (शर्म=सुख गृह वा) १ ६३ ८. महासुखप्रद पूज्यतमम् (क्षत्रम्) १ ५४ ११ महागुणविशिष्टम् (क्षत्रम्=राज्यम्) १ ५४ ८ महत् (नम =अन्नम्) १ ६२ २ महान्तम् (श्रेष्ठ-जनम्) ४ ३ १४ महान् (वृद्धो जन) ५ ६० ३ महते पूजिताय (पूरवे=मनुष्याय) १.१३० ७ महान्त. (अर्चय = दीप्तय') ५.६ ७ [महि महत् नि० ११ ६ महि=मह पूजायाम् (भ्वा०) धातोरौणा० इन्]

महिकेरवः महयो महान्त केरव. कारव शिल्पविद्या-साधका येषान्ते (प्रियमेधा =महाविद्वासो जना) प्र०— अत्र कृञ्-धातोरुण् प्रत्ययो वर्णव्यत्ययेनाकारस्य एकारश्च १ ४५.४ [महि-केरुपदयो समास। 'महि' व्याख्यातम्। केरु.=करोतेरुण्, वर्णव्यत्ययेनाकारस्य एकार]

महिक्षत्री महत्क्षत्र ययोस्ती (अध्यापकोपदेशकौ) ५ ६८ १ [महि-क्षत्रपदयो समास। क्षत्रम् धननाम निघ० २ १०]

महित्वनम् महिमानम् ५ ५५.४. महत्वम् (वीर्य= सामर्थ्यम्) ५ ५४.५ महत्त्वम् ४ ३६ ३ महिमा २ २३.४ **महित्वना**=महिम्ना प्र०—महित्वनेनेति प्राप्ते 'वा छन्दसि सर्वे विधयो भवन्ति' इति विभक्तेराकारादेश। समीक्षा—अत्र सायणाचार्येण व्यत्ययेन नाभाव कृत सोऽशुद्ध. १ ८५ ७ महत्त्वेन ५ २ ६ स्वमहिम्ना प्र०— अत्र बाहुलकादौणादिक इत्वनि प्रत्यय ११ ६ [मह पूजा-याम् (भ्वा०) धातोर्बाहु० औणा० इत्वनि। 'महित्वना' प्रयोगे महित्वन्-प्राति० टास्थान आकारादेश]

महित्वम् महेर्महतो भावम् १ ११६ १ महत्वम् १ ५६ ६ महागुणस्वभावम् (प्रभावम्) १ ५६ ४ महत्त्वम् ७.४० ५ मह्यते पूज्यते सर्वैर्जनैरिति महिस्तस्य भाव प्र०—अत्रौणादिक 'सर्वधातुभ्य इन्' इति इन्प्रत्यय ततो भावार्थे त्व-प्रत्यय. १ ८५ महिमानम् ३३.३७ महिमा १ १३८ १ पूज्यत्व महागुणविशिष्टत्व परिमाणेनाधिक-त्वञ्च १ ६१ ६ [महि-प्राति० भावे त्व। महि =मह-पूजायाम् (भ्वा०) धातोरौणा० इन्। महित्वम्=माहा-भाग्यम् नि० ७ २३]

महित्वा महत्त्व प्राप्य ५ ५८ ३ प्रशसय्य १.१०६ ६. सत्कृत्य १ ६७ ५ पूजितो भूत्वा १ ६८ १ सत्कार को प्राप्त होकर स० वि० १३६, अथर्व० १४ २ ३२ पूजयित्वा ४ ४२ ३ सत्कार प्राप्य ७ २०.४ महत्या व्याप्त्याऽभिव्याप्य १ ५२.१३ [मह पूजायाम् (भ्वा०) धातो' क्त्वा]

महित्वा स्वमहिम्ना २३ ३ महागुणवत्त्वेन प्र०— अत्र 'सुपा सुलुक्०' इत्याकारादेश १ ६१ २ महत्त्वेन पूज्येन १ १६४.२५ अपनी अनन्त महिमा से स० वि० ५, २३ ३. ['महिन्दम्' इति व्याख्यातम्। ततो विभक्तेराकारादेश]

महयमानः पूज्यमान (अग्नि॰=आप्तो विद्वज्जन) ३ २५ ५ [मह पूजायाम् (चुरा॰) धातो शानच्]

महयामसि पूजयाम ३ ३७ ४ [मह पूजायाम् (चुरा॰) धातोर्लट्। 'इदन्तो मसि' रितीदन्तता मस्प्रत्ययस्य]

महसा महता (बलेन) १ १६२ १७ महत्त्वेन २५ ४०. बड़े प्रेम से स॰ वि॰ १४०, अथर्व॰ १४ २ ४३. **महसे**=महते (व्यवहाराय) ३० १९ पूजनाय ३० २० **महः**=महस्त्वयुक्त पूज्य वस्तु १८ ५ महत्सुखम् २ ३२ १ महद्विज्ञानम् ६ २९ १ महिमा १ १९.२ महान्तम् भा॰—सत्यम् (धर्माणम्) ३४ ७ महत् (अनीक=विजयमान सैन्यम्) ४ १२ २ महसे (सूर्याय=परमेश्वराय) सूर्यलोकाय वा) प्र॰—अत्र 'सुपा सुलुक्॰' इति डेर्लुक् ४ ३५ महता (शर्मणा=गृहसम्बन्धिसुखेन) प्र॰—अत्र 'सुपा सुलुक्॰' इति विभक्तेर्लुक् १ २२ ११ महान्ति पूजनीयानि (वपूंषि=रूपवन्ति शरीराणि) ३ ५७ ३ महते (सख्याय=मित्रत्वाय) ४ ३१ ११ पूज्यवेदशास्त्रबोधयुक्ता (वाड्) २० ६ महतीम् (धिय=प्रज्ञाम्) १ १०२ १ महान् पूजनीय (देव=परमात्मा) ४ ५८ ३ महत्तरम् (भा॰—महान्तमानन्दम्) ३ ४६ कीर्त्तियोगान्महत् (नाम=प्रख्यातिम्) ६ ४४ ८ महत्तत्वात् अ॰—अव्यक्तात् ५ १९ महत् (अर्ण=शब्दसमुद्रम्) प्र॰—अत्र 'सर्वधातुभ्योऽसुन्' इत्यसुन् प्रत्यय १ ३ १२ अ॰—महासि क्रियासिद्धिकराणि (वस्तूनि) ३ २० महति (वुन्ने=अन्तरिक्षे) ४ १ ११ महागुणसमूहम् ३ २० महान् (अध्यापक) १ १९० ८. महागुणविशिष्टस्य (नृम्णस्य=धनस्य) १ ५५ ३ **महांसि**=महान्ति सैन्यानि ५ २८ ३ तेजांसि ३३ १२ **महोभिः**=महद्भिर्गुणकर्मस्वभावैः ३ ४६ वृहद्भिर्गुणैः ५ ६२ ३ सुपूजितैर्गुणैः २० ४० सत्कारैः ७.३७ १. [मह पूजायाम् (भ्वा॰) धातोरौणादिकोऽसुन्। मह उदकनाम निघ॰ १ १२. महन्नाम निघ॰ ३ ३ महो महत नि॰ ९ २५ पशवो वै महस्तस्माद् यस्यैते बहवो भवन्ति भूयिष्ठमस्यकुले महीयन्ते श॰ ११ ८ १ ३ यज्ञो वै देवाना मह श॰ १ ९ १ ११ अध्वर्युरेव मह गो॰ पू॰ ५ १५ यजुर्वेदो मह श॰ १२ ३ ४ ९ वायुर्मह श॰ १२ ३ ४ ८ प्राणो मह श॰ १२ ३ ४ १० प्रतीच्येव मह गो॰ पू॰ ५ १५ सुवर्गो वै लोको मह तै॰ ३ ८ १८.५ रुद्रा एव मह॰ गो॰ पू॰ ५ १५ ग्रीष्म एव मह गो॰ पू॰ ५ १५ त्रिष्टुबेव मह गो॰ पू॰ ५ १५ पचदश एव मह गो॰ पू॰ ५ १५]

महस्वन्तः महासि पूजनानि सत्करणानि विद्यन्ते येषा ते (सोमा=सभासद पुरुषा) २१ ४२ [महस् इति व्याख्यातम्। तत प्रशसाया मतुप्]

महाकुलः महत्कुल यस्य स (विद्वज्जन) १.१६१.१ [महत्-कुलपदयो समास]

महागयम् महान्तो गया गृहाणि, प्रजा धन वा यस्य तम् (विद्वास जनम्) प्र॰—गयमिति गृहनाम निघ॰ ३ ४ 'अपत्यनाम' निघ॰ २ २. धननाम च निघ॰ २ १०, २६ ९. [महत्-गयपदयो समास]

महाञ्जिः महागति २४.४ [महत्-अञ्जिपदयो समास.। अञ्जि=अञ्जू (गत्यर्थे) धातोरौणा॰ इन्]

महादेवम् महांश्चाऽसौ देवश्च त परमात्मानम् ३९ ८ **महादेवस्य**=महतो विदुष (पुरुषस्य) ३९ ९. [महत्-देवपदयो समास। 'आन्महत समानाधिकरणजातीययो' अ॰ ६ ३ ४६. सूत्रेणाकारादेशो महत। देवाश्च महादेवा॰ तै॰ आ॰ १ ९ ३]

महाधने महान्ति धनानि प्राप्नुवन्ति यस्मिँस्तस्मिन् सङ्ग्रामे ७ ३२ २५ महान्ति धनानि यस्मात्तस्मिन् सङ्ग्रामे प्र॰—महाधन इति सङ्ग्रामनामसु पठितम् निघ॰ २ १७, १७ ५ युद्ध मे आर्याभि॰ १ २४, ऋ॰ ५ ३ २१ २५ [महत्-धनपदयो समास। महाधने सग्राम नाम निघ॰ २ १७]

महानाम् महता पूज्यानाम् (देवाना=विदुषा जनानाम्) १.१८७ ६ [महत्-प्राति॰ षष्ठ्या बहुवचनम्। छान्दसो वर्णलोपो वे' ति तलोप]

महानाम्न्यः महन्नाम यासा ता भा॰—महाकीर्त्तय (वाच) २३ ३५ [महत्-नामन्पदयो समासे स्त्रिया ङीवन्तात् प्रथमाबहुवचनम्]

महानि पूजनीयानि बृहत्तमानि (कृतानि=कर्माणि) २.११ ६ महान्ति (व्रता=शीलानि) ३ ६ ५ महान्ति पूज्यानि (करणानि=कर्माणि) २ १५ १ [महत्-प्राति॰ नपुसके प्रथमाबहुवचने रूपम्। तलोपश्छान्दस]

महान्ता महागुणौ (इन्द्राग्नी=वाय्वग्नी) प्र॰—अत्र 'सुपा सुलुक्॰' इत्याकारादेश १ २१ ५ महान्तौ पूजनीयौ (अश्वा=तुरगौ महान्तौ जनौ वा) ६ ६७ ४ [महत्-प्राति॰ द्विवचनस्य 'सुपा सुलुक्॰' इत्याकारादेश]

महाम् महताम् (पुरुषाणाम्) प्र॰—अत्र 'छान्दसो वर्णलोपो वा' इति तलोप ४ ५ ९ महान्तम् (अग्निम्) प्र॰—अत्र 'वाच्छन्दसि' इति नकारतकारलोप सवर्णदीर्घत्वेनाऽस्य सिद्धि ३ २ ३ पूज्यं (नेतापतिम्) १ ११२ १४ पूजनीयम् (इन्द्र=राजानम्) ३ ४९ १ पूज्यतमम् (उरु=

सूत्रेण तृच्। रक्तस्रादित्वाट्टाप्न। मातर नदीनाम निघ० १ १३ माता अन्तरिक्षम्, निर्मीयन्तेऽस्मिन् भूतानि नि० २ ८]

मातरा जलाऽग्नी ३ ७ १ मातृवन्मान्यकर्त्र्यौ (रोदसी=भूमिसूर्यलोकौ) ६ १७ ७ मानकारकौ (अध्यापकोपदेशकौ) १ १२२ ४ मातरौ धातृजनन्यौ १ १४० ३. मातापितरौ १२ १०७ मान्यप्रदे (रात्रिदिने) ५ ५ ६ मानयित्र्यौ (नक्तोषासा=रात्रिदिने) १ १४२ ७ मान्यकर्त्तारौ मातापितरौ १ ५५ ३ जनकजनन्यौ ३ १ ७ जनकौ ७ ७.३ मातापितृरूपौ राजप्रजाजनौ अ०—द्यावाभूमी ४ २२ ४ मातृवद्वर्त्तमाने (धेनू=दुग्धदात्र्यौ गावौ) २८ ६ [मातृ-प्राति० द्विवचनस्याकारादेश 'सुपा सुलुक्०' इति सूत्रेण]

मातरापितरा जनकजनन्यौ ४ ६ ७ [मातृ-पितृपदयो समासे द्विवचनस्याकारादेश। पूर्वपदस्य च अराड् आदेश-श्छान्दस]

मातरिश्वा यो मातर्यन्तरिक्षे श्वसिति स वायु १ ७१ ४ प्राण १ १४१ ३ अन्तरिक्षशयान (अग्नि) ३ ५ १० आकाशे शयिता वायु १ ६० १ अन्तरिक्षे शयानो वायु १ १४८ १ यो वायौ श्वसिति स (भौतिको-ऽग्नि) ३ २९ ११ अन्तरिक्षस्थ वायु स० वि० १२२, अथर्व० १४ १ ५४ मातर्यन्तरिक्षे श्वसिति प्राणान् धरति वायुस्तद्वद्वर्त्तमानो जीव ४० ४ **मातरिश्वनः**=मातर्यन्तरिक्षे श्वसिति आश्वनिति वा तस्य वायो प्र०—'श्वन्नुक्षन्०' उ० १ १५७ अनेनाऽय शब्दो निपातित १ २ **मातरिश्वने**=अन्तरिक्षस्थाय वायवे १ १४३ २ **मातरिश्वानम्**=मातरिश्वा वायुस्तल्लक्षणम् (ईश्वरम्) १ १६४ ४६ यो मातरिश्वा वायुरिव बलवान् तम् जो वायु के समान अत्यन्त बलवान् हे उस (ईश्वर) को स० प्र० १५, १ १६४ ४६ यो मातरि वायौ श्वसिति तम् (अग्निं=विद्युदादिरूप वह्निम्) ३ २६ २ [मातरि अन्तरिक्षे श्वयति गच्छति वर्धते वेति विग्रहे 'मातरि' इति सप्तम्यन्तोपपदे टुओश्वि वृद्धौ (भ्वा०) धातो 'श्वनुक्षन्-पूषन्०' उ० १ १५९ सूत्रेण कनिन्। अथवा मातरि श्वसिति जीवयति शेते वेति विग्रहे 'मातृ' इत्युपपदे श्वस प्राणने (अदा०) धातो कनिन्-प्रत्यये निपातनाद्रूपसिद्धि। शीङ् शये (अदा०) धातोर्वा कनिन्। मातरिश्वा वायुर्मातर्यन्तरिक्षे श्वसिति मातर्याशु अनितीति वा नि० ७ २६ प्राणो मातरिश्वा ऐ० २ ३८ अय वै वायुर्मातरिश्वा योऽय पवते श० ६ ४ ३ ४]

मातवै मानाय १ १६४ २८ [माङ् माने (जु०) धातोस्तुमर्थे तवैप्रत्यय.]

मातृतमाम् अतिशयेन मातरो मातृवत्पालिका नद्य प्र०—मातर इति नदीनाम निघ० १.१३, अत्र 'सुपा व्यत्यय ३ ३३.३. **मातृतमासु**=अतिशयेन शास्त्रोक्त-शिक्षया मानकर्त्रीषु धात्रीषु १० ७ **मातृतमाः**=अति-शयेन मातर इव वर्त्तमाना (नद्य) १ १५८ ५. अतिशयेन मातृवत् कृपालव· (जनित्री=जनन्य.) ६.५०.७. [मातृ-प्राति० अतिशायने तमबन्तात् स्त्रिया टाप्]

मातृमृष्टेव विदुष्या मात्रा सत्यशिक्षाप्रदानेन शोधि-तेव (युवति) १ १२३ ११ [मातृमृष्टा-इवपदयो समास। मातृमृष्टा='मातृ' उपपदे मृजू शौचे (चुरा०) धातो क्तान्ताट् टाप्]

मात्या मतेर्भाव कर्म वा (वाक्=वक्ति यया सा) १३ ५८ [मतिप्राति० भावे कर्मणि वा ष्यञ्। तत. स्त्रिया टाप्]

मात्रया यया सर्व मिमीते तया (बुद्ध्या) १३ २ भागेन १५ ११ लेशविशेषेण १५ १० **मात्रा**=मीयते यया सा भा०—परिमाणम् २३ ४७ भा०—व्यवहारसाधक वस्तु २३ ४८ **मात्राभिः**=शब्दादिभि सूक्ष्मैर्व्यवहारा-ऽवयवै ३ ४६ ३. सूक्ष्माऽवयवै ३ ३८ ३ [माङ् माने (जु०) धातो 'हुयामाशुभसिभ्यस् त्रन्' ४ १६८ सूत्रेण त्रन्। तत स्त्रिया टाप्। मात्रा मानात् नि० ४ २५ यद्वेव मिमीते तस्मान्मात्रा श० ३ १ ४ ८]

मादनम् आनन्दनम् ७ ३१ १ [मदी हर्षे (दिवा०) धातोर्णिजन्ताल् ल्युट्]

मादयध्यै मोदयितुम् प्र०—अत्र 'मदी हर्षग्लेपनयो इति' णिजन्तादध्यै प्रत्यय ३ १३ मादयितुमानन्दयितुम् ६ २२ ३.

मादयध्वम् सुखयत ६ ५२ १७ परस्परानानन्दयत ४ ३४ ८. आनन्द प्रापयत १ ८५ ६ हर्षयत ३३ ५३ हर्षयध्वम् २ १८ **मादयन्ताम्**=आनन्दयन्तु ७ ३९ ५ आनन्दयन्ताम् ७ ५१ २. तृप्ता भूत्वाऽस्मानानन्दयन्तु २० ४६ हृष्यन्तु भा०—सुखिनो भवन्तु भावयन्तु वा २ १३ **हर्षयन्तु**=३ ४ ११ **मादयन्तु**=हर्षयन्तु ७ २३ ५ **मादयन्ते**=हर्षयन्ति १ ५९ १ **मादयस्व**=आनन्द प्रापय १ ८१ ८ हर्षयस्व १७ ८८ आनन्दयस्व २७ २८ आनन्दय हर्षितो वा भव १ १०१ ९ आनन्दानन्दय वा ६ ४१ ५ **मादयाते**=मादये हर्षयेत् ७ ४७ २ **माद-याध्वै**=आनन्दत १ १६१ ८. मादयध्वम् प्र०—लेट्

महिन महत्तम (इन्द्र=सर्वसुखप्रद राजन्) ६ २६ ८. **महिनस्य**=महत (राज्ञ) ६ ३३ ५ [मह पूजायाम् (भ्वा०) धातो 'महेरिनण् च' उ० २ ५६ सूत्रेण चकारेणानुवृत्त इनन्]

महिनः महान्त (देवा=दिव्यगुणा विद्वासो जना) ६ ५२ १५ [महिन्-प्राति० जस् महिन्=महिनि महत्युदकवतीति वा नि० ११ ३७ महिन्=मह पूजायाम् (भ्वा०) धातोरौणा० इन्]

महिना महिम्ना प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति मकारलोप १ ३२.८ महत्त्वेन १ १२२ ११ स्वस्य महिम्ना व्यापकत्वेन २७ २६. अपनी महिमा से आर्याभि० २.३२, १७ १८ **महिने**=सत्कर्त्तव्याय (राज्ञे) ७ ३१.११. [महिमन्-प्राति० टा-प्रत्यये मकारलोपश्छान्दस। महिमन्=महत्-प्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' इतीमनिच्]

महिना महती (सरस्वती=वाक्) ६ ६१ १३ [महिन-प्राति० स्त्रिया टाप्। महिनः=मह पूजाया धातोरौणा० इनन्]

महिनि पूज्ये (पृथिवि=भूमे) ५ ८४ १ [मह पूजायाम् (भ्वा०) धातोरौणा० इन्। तत स्त्रिया ङीपि सम्बुद्धौ रूपम्]

महिनी महत्यौ (द्यावापृथिवी) १ १६० २. [महिनीति व्याख्यातम्। ततो द्विवचनस्य पूर्वसवर्णदीर्घ]

महिमघस्य महन्मघ पूज्य धन यस्य तस्य (पुरुषार्थिनो जनस्य) १ १२२ ८ महि-मघपदयो. समास। 'महि' इति व्याख्यातम्। मघम्=धननाम निघ० २ १०]

महिमनः महिम्न ६ २७ ३ [महत्-प्राति० भावे पृथ्वादित्वाद् इमनिच्। तत षष्ठ्यादौ विभक्तौ अकारलोपाऽभावश्छान्दस]

महिमा महतो भाव १८ ४ महती प्रशसा ७ ४५ २ माहात्म्यम् भा०—महत्त्वम् ३१ ३ प्रशसासमूह. ७ २८ २ प्रताप ६ ५९ २ **महिमानम्**=स्तुत्यस्य, पूज्यस्य, व्यवहारस्य भावम् १ ६१ ८ उत्तमप्रतिष्ठाम् १ ८५ २ स्तुतिविषयम् (प्रयाण=प्रकृष्ट प्राणम्) ११ ६ पूज्य ब्रह्मचर्यजितेन्द्रियत्वादिशुभकर्म सरकारजन्यम् (अपत्यम्) ८ ३० स्वप्रभावम् २ १७ २ महत्त्वम् २९ २७ **महिमानः**=महत्त्वयुक्ता (देवा=विद्वासो जना) ३१ १६ पूज्यमाना (मनुष्या) ३३ ७४ पूज्या सन्त (देवा=देवगणा) ऋ० भू० १२९, ३१ १६ पूज्यता प्राप्नुवन्त (देवा=विद्वासो जना) १ १६४ ५० **महिम्नः**=महतो भावस्य सकाशात् २३ ६४ **महिम्ने**=महतो भावाय २३ २ [मह पूजायाम् (भ्वा०) धातोरौणा० अतिप्रत्यये महन्। महन्-प्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' इतीमनिच्। प्राणा हि महिमान काठ० ३७ १६ यज्ञो वै महिमा श० ६ ३ १ १८ राजा महिमा तै० ३ ९ १० १. श० १३ २ ११ २]

महिरत्न पूज्यैर्गुणै रमणीय (विद्वज्जन) १ १४१ १० [महि-रत्नपदयो समास। 'महि' इति व्याख्यातम्। रत्नम्=रमु क्रीडायाम् (भ्वा०) धातो 'रमेस्त च' उ० ३ १४ सूत्रेण न तकारश्चान्तादेश]

महिवृधे महता वर्धकाय (महाराजाय) ७.३१ १०. ['महि' इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप्]

महिव्रतः महान्ति व्रतानि धर्म्याणि कर्माणि यस्य स. (महाराज) ६ ६८ ९ **महिव्रत**=महि महद्व्रत शील यस्य तत्सम्बुद्धौ (विद्वज्जन) १ ४५.३ [महि-व्रतपदयो समास। व्रतमिति कर्मनाम वृणोतेर्ति सत नि० २ १३]

महिष पूजनीयतम (महाराज) ३.४६ २ **महिषम्**=महान्तम् (पुत्र=सन्तानम्) ४ १८ ११ **महिषस्य**=महतो लोकसमूहस्य १ ९५ ९ **महिषः**=महान् (सूर्य) १ १२१ २ सर्वगुणैर्महान् (अग्नि) ३ ७ **महिषाणाम्**=महता पदार्थानाम् ५ २९ ८ **महिषान्**=महत (पदार्थान्) ६ १७ ११. **महिषाः**=महान्त (अमूरा=विद्वासो जना) ७ ४४ ५ महान्त पूजनीया (यजमाना) १९ ३२. [मह पूजायाम् (भ्वा०) धातो 'अविमह्योट्टिपच्' उ० १ ४५ सूत्रेण टिपच्। महिप महन्नाम निघ० ३.३ महिपा महान्त नि० ७ २६ अग्निर्वै महिप स हीद जातो महान्त्सर्वमैण्णात् श० ७ ३ १ २३ प्राणा वै महिपा श० ६ ७ ४ ५ ऋत्विजो वै महिपा श० १२ ८ १ २]

महिषा महिपाणा महता पशूनाम् ५ २९ ७ [महिप इति व्याख्यातम्। तत षष्ठ्या स्थाने आकारादेशश्छान्दस]

महिषासः पूजितगुणा महान्त (गिरय=मेघा) १ ६४ ७ [महिपप्राति० जसोऽसुक्]

महिषी महारूप-बल-शीलादियोगेन पूजनीया (युवति) ५ २ २ **महिषीम्**=महाशुभगुणाम् (पत्नीम्) ५ ३७ २ उत्तम कुल मे उत्पन्न हुई विद्या-शुभगुण-रूप-सुशीलतादियुक्त (विदुषी स्त्री) स० वि० १०५, ५ ३७ ३ [महिप इति व्याख्यातम्। तत स्त्रिया टित्त्वात् ङीप्। महिपीयैव प्रथमा वित्ता (भार्या) सा महिषी श० ६ ५ ३ १.

मनुष्य २१६१ मनुष्याऽऽकृति (पुरोहित.) १४४१० सभापतिर्मनुज १.३७४ **मानुषात्**=मानवात् २३.३. **मानुषाणाम्**=नराणाम् १ १२७.८ मानुषेषु भवानाम् (जनाना=मनुष्याणाम्) ४६५ मनुष्यजातिस्थानाम् (राज्यपालनार्हगुणानाम्) ६१६६ **मानुषाय**=मनुष्याणामस्मै (क्षयाय=गृहाय) ११२३१ **मानुषे**=मनुष्याणामस्मिन् सग्रामे ७१८.६ **मानुषेषु**=मनुष्यसम्बन्धिषु (यज्ञेषु=सत्सु कर्मसु) ७२७ युवत्याऽऽहारविहारकर्तृषु (विक्षु=प्रजासु) १६०४. अविद्वत्सु (जनेषु) ४५४३ **मानुषान्**=मनुष्यादीन् १४८७ [मनुप्राति० 'मनोर्जातावञ्यतौ पुक् च' अ० ४११६१ सूत्रेण अञ् पुगागमश्च। मनुष्यप्राति० वा भवार्थेऽण्। मानुषम्=यदब्रुवन्मेद प्रजापते रेतो दुपदिति तन्मादुषमभवत् तन्मादुषस्य मादुषत्व मादुष ह वै नामैतद् यन् मानुष तन्मादुष सन् मानुषम् इत्याचक्षते। (इद मे मादुषत्) ता० ८२१० पशवो मानुषा क० ४१६. यन्मन्द्र मानुष तत् तै० स० २५१११]

मानुषप्रधना. मनुष्याणा प्रकृष्टानि धनानि याभ्यस्ता (मरुत) १५२६ [मानुप-प्रधनपदयो समास]

मानुषा मनुष्याणामिमानि (युगा=वर्षाणि) ५५२४ मनुष्यसम्बन्धीनि (युगा=वर्षाणि वर्षसमुदितानि वा) ६१६२३ मनुष्येषु भवानि (युगानि=वर्षाणि) ११०३४ मनुष्याणा हितकारकाणि (वस्तूनि) १५१.१ मनुष्यैर्निर्मितानि (कर्माणि) ७४१ [मानुपप्राति० शेलोपश्छन्दसि। मानुपमिति व्याख्यातम्]

मानुषास. मननशीला मानवा १६०३ मनुष्या ७७४ [मानुपप्राति० जसोऽसुक्]

मानुषी मानुषाणामियम् (प्रजा) १७२८ **मानुषीणाम्**=मनुष्यसम्बन्धिनीनाम् (विशा=प्रजानाम्) ३११५ मनुष्यादिरूपाणाम् (प्रजानाम्) ५.१६ **मानुषीभ्य.**=मनुष्यादिभ्य (प्रजाभ्य) ११४५ **मानुषीषु**=मनुष्याणामिमासु (विक्षु=प्रजासु) ३५३. **मानुषीः**=मनुष्याणामिमा प्रजा ६६५१ मनुष्यसम्बन्धिन्य (प्रजा) ५८३ मानुषाणामविदुषामिमा (विश=प्रजा) १७८६ [मानुपप्राति० स्त्रिया ङीप्। मानुपम्=मनुष्यप्राति० 'तस्येदमि' त्यण्]

मानुषेभिः मनुष्यै ७३८१ [मानुषप्राति० भिस ऐस् न 'बहुल छन्दसि' सूत्रेण]

मानेभिः ये मन्यन्ते तैर्विद्वद्भि ११८४.५ [मानप्राति० भिस्। ऐस् न भवति छान्दसत्वात्]

मान्यालः जन्तुविशेष २४३८.

मान्दार्यस्य मान्दस्य स्तोतुर्मन्दनशीलमनुष्यकर्मस्वभावस्य च (कारो.=शिल्पिनो जनस्य) १.१६५ १५. प्रशस्तानन्दकारकस्य शिल्पिन ३४४८. सर्वेभ्य आनन्दप्रदस्योत्तमस्य (कारो=क्रियाकुशलजनस्य) १.१६८१० आनन्दिनो धार्मिकस्य (कारो.) ११६६.१५ [मान्द-आर्यपदयो समास.। मान्द.=मदि स्तुतिमोदमदादिषु (भ्वा०) धातोरच्प्रत्यये मन्द। तत स्वार्थिकेऽण्। मान्द.। आर्य.=ऋ गतिप्रापणयो (भ्वा०) धातो 'ऋहलोर्ण्यत्' इति ण्यत्]

मान्दाः ये जनान् मदन्त्यानन्दयन्ति त एव मान्दा (राजपुरुषा) १०४ [मान्द इति पूर्वपदे व्याख्यातम्]

मान्यमानम् मान्याना मान सत्कारो यस्मात्तम् (धार्मिक प्राज्ञम्) ७१८२०. [मान्य-मानपदयो. समास। मान्य=मान पूजायाम् (चुरा०) धातोर्ण्यत्। मान=मान+घञ्]

मान्यस्य प्रशंसितु योग्यस्य (कारो=शिल्पिजनस्य) १.१८४४. सत्कर्त्तव्यस्य (कारो=शिल्पिनो जनस्य) ३४४८ माननीयस्य योग्यस्य (शिल्पिन) १.१६५१४ सत्कर्त्तुं योग्यस्य (कारो=शिल्पिन) ११६७११ ज्ञातुं योग्यस्य (कारो) १.१६८१० [मान पूजायाम् (चुरा०) धातोर्ण्यत्]

मामकाः मदीया (जीवा) १६.४६ **मामकानाम्**=मदीयाना वीराणाम् (सत्वनाम्=प्राणिनाम्) १७४२ [अस्मद्-प्राति० शैषिकेऽण्प्रत्यये 'तवकममकावेकवचने' इति ममकादेश]

मामतेयम् ममताया प्रजाया अपत्यम् ११४७३ मम भावो ममता, तस्या इदम् (कार्यम्) ४४१३ **मामतेयः**=ममताया कुशल (लोभानुरो जन) ११५८६ [ममताप्राति० अपत्यार्थे 'तस्येदमि' त्यर्थे कुशलार्थे वा ढक्। ममता=मम+तल्। मम=अस्मद्+ङस्]

मामहन्त सत्कुर्वन्तु प्र०—अत्र 'तुजादिना०' इत्यभ्यासदैर्घ्यम् ७५२२ **मामहन्ताम्**=सत्कारेण वर्धयन्ताम् १.१००.१६ सत्कारहेतवो भवन्तु १६६.६ वर्धन्ताम् प्र०—व्यत्ययेनाऽत्र शप श्लु १६४१६ सत्कुर्वन्तु भा०—भूषका सन्ति ३३४२ **मामहे**=सत्कुर्याम् ५२७१ महयति प्र०—अत्र 'मह पूजायाम्' इत्यस्माल्लटि 'बहुल छन्दसि' इति श्लुविकरणो व्यत्ययेनात्मनेपद तुजादित्वाद् दीर्घ ११६५१३ [मह पूजायाम् (भ्वा०) धातोर्लड्। अडभाव। 'बहुल छन्दसि' इति शप श्लु। तुजादित्वादभ्यासस्य दीर्घ।

प्रयोगोऽयम् १ ३७ १४ **मादयासे**=हर्षयसे १.१०१ ८ **मादयेथाम्**=हर्षयेतम् ४.४६.६ आनन्दयतम् ४ १४ ४. आनन्दयेथाम् १ १८४ २ मादयेते हर्षयत. १ १०६ ५ **मादयेथे**=हर्षयत १ १०८ १२ **मादयैते**=सुखयेताम् ४.४१ ३ [मदी हर्षे (दिवा०) धातोर्णिजन्ताल्लोट्। अन्यत्र लट् लेट् चापि]

मादयिष्णवः हर्षनिमित्ता (इन्दव =सोमाद्योषधिगणा) प्र०—अत्र 'णेश्छन्दसि' अ० ३ २ १३७ अनेन ण्यन्तान्मदेरिष्णुच् प्रत्यय १ १४ ४ [मदी हर्षे (दिवा०) धातोर्णिजन्तात् 'णेश्छन्दसि' सूत्रेण इष्णुच् तच्छीलादिषु]

माद्भिः मासै २ २४ ५ [मासप्राति० भिस्प्रत्यये 'पदन्नोमास्०' अ० ६ १ ६३ सूत्रेण मास् आदेश। 'स्वव-स्वतवसोर्मासि उपसश्च तकारादेश इष्यते छन्दसि भकारादौ' इत्युपसख्यानात् तकारादेश]

माधवः मधुरादिफलनिमित्तो वैशाख १३ २५ **माधवाय**=वैशाखमासाय ७ ३०. [मधुप्राति० मत्वर्थे 'मधोर्ञ व' अ० ४ ४ १२६. सूत्रेण ञ.]

माधूचीभ्याम् यौ मधुविद्यामञ्चतस्ताभ्याम् (अध्यापकोपदेशकाभ्याम्) ३७ १८ [मधूपपदे अञ्चु गतिपूजनयो. (भ्वा०) धातो 'ऋत्विग्दधृग्०' इति क्विन्। 'अनिदितामि' ति नकारलोपे 'अञ्चतेश्चोपसख्यानम्' इति स्त्रिया डीपि भसज्ञाया सत्याम् 'अच' इत्यकारलोपे 'चौ' सूत्रेण पूर्वस्य दीर्घत्वे रूपम्। पूर्वस्य दीर्घश्च छान्दस]

माध्यन्दिनम् मध्ये भवम् (सवन=भोजनम्) प्र०—अत्र 'मध्योमध्य दिनण् चाऽम्मात्' इति वार्त्तिकेन मध्यशब्दो मध्यमिति मान्तमापद्यते भवेऽर्थे दिनण् च प्रत्यय ३ ३२ १ मध्ये दिने भव भोजनादिकम् ४ ३५ ७. मध्याह्ने भवम् (सवनं=आरोग्यकर होमादिकम्) १६ २६ **माध्यन्दिने**=मध्य दिने भवे (सवने=प्रेरणे) ६ ४७ ६ मध्याह्ने ५ ४० ४ [मध्यप्राति० भवार्थे 'मध्यो मध्य दिनण् चास्मात्' इति वार्त्ति० सूत्रेण दिनण्। मध्यस्य च मध्य भाव। इद (अन्तरिक्षम्) माध्यन्दिन सवनम् जै० ३ ५७ त्रैष्टुभवार्हतो वै माध्यन्दिन जै० २ ३८३ त्रिच्छन्दा माध्यन्दिन पवमान प० १ ३ मरुत्वद्धि माध्यन्दिन सवनम् ता० ६ ७ २ माध्यन्दिन सवनाना तपस्वितमम् काठ० २३ १०. रुद्राणा माध्यन्दिन सवनम् कौ० १६ १ श० ४ ३ ५.१ वाजवन्माध्यन्दिन सवनम् ता० १८ ६ ७ स्वर्गो वै लोको माध्यन्दिन सवनम् मै० ४ ८ ३ गो० २ ३ १७]

माध्वी मधुरादिगुणयुक्ता (राति =दानम्) १ १८४ ४ मधुरा नीति ४.४३ ५ **माध्वीभ्याम्**=सुनीति-योगरीतिभ्याम् ७.११२ मधुरादिगुणयुक्ताभ्या विद्यासुशिक्षाभ्याम् ३७ १८ **माध्वीः**=माध्व्य (गाव = किरणा) १ ६० ८ मधुविज्ञाननिमित्त विद्यते यासु ता. (ओषधी) प्र०—'मधोर्ञ च' अ० ४ ४ १२८ अनेन मधुशब्दाञ्ञ 'ऋत्व्यवास्त्व्य०' इति यणादेशनिपातनम् 'वाच्छन्दसि' इति पूर्वसवर्णादेश १ ६० ६. माध्व्यो मधुरगुणयुक्ता (ओषधी =ओषधय) प्र०—अत्र 'ऋत्व्यवास्त्वय०' इति मधुशब्दादण् यणादेशनिपातः १३ २७. [मधुप्राति० 'मधोर्ञ चे' ति मत्वर्थे ञप्रत्यये भवार्थे वा अण्-प्रत्यये स्त्रिया डीपि 'ऋत्व्यवास्त्व्य०' अ० ६ ४ १७५ सूत्रेण यणादेशो निपात्यते]

माध्वी माधुर्यादिगुणोपेतौ (अश्विना=अध्यापकोपदेशकौ) ४ ४३ ४ मधुरगतिमन्तौ (अश्विना=शिल्पकार्यविदौ) ५ ७५ २ मधुरादिगुणप्रापकौ (अश्विनौ=अध्यापकपरीक्षकौ) ५ ७५ १ [माध्वीति व्याख्यातम्। ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

मानम् सत्कारम् १ १०० १४ **मानस्य**=विज्ञानवतो जनस्य १ १८६ ८. परिमाण के योग मे बनाई हुई का स० वि० १६८, अथर्व० ६ २ ३ २१. **मानः**=यो मन्यते स (विद्वज्जन) ७ ३३ १३ **मानैः**=परिमाणै २ १५ ३ [माङ् माने (जु०) धातोर्ल्युट्। माने निर्माणे-नि० २ २२]

मानवस्यते मानवानात्मन इच्छते (विदुषे जनाय) १ १४० ४ [मानवपदाद् आत्मन इच्छाया क्यचि सुगागमे शतरि च रूपम्]

मानवेभ्यः मननशीलेभ्य (जनेभ्य.) ४ ५४ १ [मनुप्राति० अपत्यार्थेऽण्]

मानसः मनस ऊष्मेव वर्त्तमान (ग्रीष्म) १३ ५५ [मनस्प्राति० भवार्थेऽण्]

मानस्कृतम् मनस्कृतेषु विचारेषु कुशलम् (पुरुषम्) ३० १४ [मनस्-कृतपदयो समासे कुशलार्थेऽण्]

मानासः विचारवन्त (विद्वासो जना) १ १७१ ५ [मानप्राति० जसोऽमुक्]

मानुष मननशील (विद्वन्नुपदेशक) ३ ६ ६ मनुष्यस्वभावयुक्त (धार्मिक जन) १ ८४ २० **मानुषम्**=मनुष्याणामिदम् (स्व =सुखम्) ५ ६६ २ **मानुषस्य**=मनुष्यजातस्य १ १२१ ४ मनुष्यजातौ भवस्य (जनस्य) १ ७० १ **मानुषः**=सर्वशास्त्रमननशील (अध्यापको गुरु) ६ ८

मध्ये वर्त्तमान (विष्णु=प्रधानपुरुष) ३३४८ **मारुताय**=मरुता मनुष्याणामस्मै (स्वभानवे=स्वप्रज्ञा प्रदीप्तये) ६४८ १२ **मारुताः**=मनुष्यदेवताका (पृश्नय पशव) २४ १४ मरुद्देवताका (भा०—वायुगुणा पशव पक्षिणो वा) २४४ **मारुतेन**=मनुष्याणामनेन (शर्द्धेन=बलेन) २३१३ हिरण्यादिसम्बन्धेन (गणेन=समूहेन) प्र०—मरुदिति हिरण्यनाम निघ० १२, ३३२२ [मरुत्-प्राति० समूहार्थे 'अनुदात्तादेरञ्' अ० ४२४४ सूत्रेण अञ्। विकारार्थे 'तस्येदमि' त्यर्थे, 'सास्य देवते' त्यर्थे वा अञ्। मरुत्=हिरण्यनाम निघ० १२ रूपनाम निघ० ३७ मरुत्=मृङ् प्राणत्यागे (तुदा) धातो 'मृग्रोरुतिः' उ० १९५ सूत्रेण उति। अन्तरिक्षलोको वै मारुतो मरुता गणः श० ९४२६ मारुतम्=मेघम् नि० ११५० सप्त हि मारुतो गण श० ५४३१७ सप्त सप्त मारुता गणा मै० ३३१०, श० ९३१.२५ विष्णमारुता मै० ३३१० ये ते मारुता (पुरोडाशा) रश्मयस्ते श० ९३१२५ मारुतो हि वैश्य (वायु) मै० ३४३ काठ० ३७३ तै० २७२२ मारुतस्सप्तकपाल मै० ११०१ मारुत कल्माष काठ० ४८१ मारुत सप्तकपालम् तै० स० १८२१ एकविंशतिर्वै मारुता गणा काठ० ११११]

मारुताश्वस्य (मरुतामिवाश्वानामय तस्य (भृत्यजनस्य) ५३३९ [मारुत-आश्वपदयो समास। मरुत् प्राति० अश्वाच्चेदमर्थेऽण्]

मारुतीः मारुत्यो मरणधर्माणो मरुत्प्रधाना वा (प्रजा) ऋ० भू० १४०, ऋ० ६१६४ [मरुत्प्राति० समूहार्थेऽञ्प्रत्ययान्तात् स्त्रिया ङीप्]

मार्गारम् यो मृगाणामरिर्व्याधस्तस्याऽपत्यम् ३०१६ [मृग-अरिपदयो समासेऽपत्यार्थेऽण्]

मार्जालीय. शोधक (भगवान्) प्र०—'स्थाचतिमृजेरालज्वालञ्जालीयच' उ० १११६ अनेन सूत्रेणाऽत्र मृजूष् शुद्धौ इत्यस्मादीयच्-प्रत्यय ५३२ पाप का मार्जन=निवारण करने वाला (ईश्वर) आर्याभि० २१७, ५३२ [मृजूष् शुद्धौ (अदा०) धातो 'स्थाचतिमृजेरालज्वालञ्-आलीयच' उ० १११६ सूत्रेण आलीयच्]

मार्जाल्यः सशोधक (अतिथिर्जन) ५१८. [मृजूष् शुद्धौ (अदा०) धातोर्बाहु० औणा० आल्यन्]

मार्ज्मि शुद्धो भवामि शोधयामि वा २.१४ मार्ष्टि वा प्र०—अत्र पक्षे पुरुषव्यत्यय २७. [मृजूष् शुद्धौ (अदा०) धातोर्लट्]

मार्डीकम् मृडीकाना सुखानामिम साधकम् (रयिम्) १७९९ **मार्डीके**=सुखकरे (व्यवहारे) ४१८.१२ [मृडीकप्राति० 'तस्येदम्' इत्यर्थेऽण्। मृडीकम्=मृड सुखने (तुदा०) धातो 'मृड कीकच्कङ्कणौ' उ० ४२४ सूत्रेण कीकच्]

मार्त्तण्डः मार्त्तण्डे सूर्ये भव (वरुण=वरो जीव) प्र०—अत्र 'अन्येषामपि०' इति दीर्घ २३८८ [मार्त्तण्ड-प्राति० भवार्थेऽण्। 'अन्येषामि' ति सूत्रेण दीर्घे मार्त्ताण्ड। स (मार्त्तण्ड) वाव विवस्वान् आदित्य मै० १६१२]

मार्ष्टु पुन पुनः शुन्धन्तु ८१४ [मृजूष् शुद्धौ (अदा०) धातोर्लोट्]

मावतः मद्विधस्य (विप्रस्य=मेधाविन पण्डितस्य) प्र०—'अत्र वतुप्प्रकरणे युष्मदस्मद्भ्या छन्दसि सादृश्य उपसङ्ख्यानम्' अ० ५.२३९ अनेन वार्त्तिकेनाऽस्मच्छब्दात् सादृश्ये वतुप् प्रत्यय 'आ सर्वनाम्न' अ० ६३९१ इत्याकारादेशश्च १७२ मत्सदृशस्य (विप्रस्य=मेधाविजनस्य) ११२९.११ **मावते**=मत्सदृशाय (दाशुषे=विदुषे जनाय) १८९ [अस्मद्-प्राति० सादृश्ये 'वतुप्प्रकरणे युष्मदस्मद्भ्या छन्दसि सादृश्य उपसङ्ख्यानम्' अ० ५२३९ वा० सूत्रेण वतुप्। 'प्रत्ययोत्तरपदयोश्चे' ति मादेश.। 'आ सर्वनाम्न' इत्याकारान्तादेश]

मासकृत् मामेकवारम्, अथवैकपद्य—मासाना चार्द्धमासादीना च कर्त्ता (अरुण=विद्याप्रकाशकरणो विद्वान्) अत्र मासकृदित्येक पद निरुक्तप्रामाण्यादनुमीयते। अथ शाकल्यस्तु 'मा सकृत्' इति पदद्वयमभिजानीते ११०५१८ [मासोपपदे करोते कर्त्तरि क्विप् मासकृत्=मासाना चार्द्धमासाना च कर्त्ता नि० ५२१]

मासरम् येनाऽतिथयो मासेषु रमन्ते तत् (आतिथ्यरूप=अतिथीना भाव कर्म वाऽऽतिथ्य तद्रूप च तत्) १९१४ ओदनम् उपलक्षणमेतत् तेन सुसस्कृतमन्नमात्र गृह्यते २१३५ सस्कृतभोज्यमन्नम् २१.३८ **मासरेण**=प्रमितेन मण्डेन प्र० अत्र माङ्-धातोरौणादिक सरन् प्रत्यय २०६६ **मासरैः**=परिपक्वौषधिसस्यैः १९८२ [माङ् माने (जु०) धातोरौणा० सरन्। अथवा मासोपपदे रमु क्रीडायाम् (भ्वा०) धातोर्ड]

मासः चैत्राऽऽदि ५४५७ **मासान्**=मासानाम् प्र०—अत्र विभक्ति-व्यत्यय २४३७ [माङ् माने (जु०) धातोर्बाहु० औणा० स। मासा मानात् नि० ४.२७ मासा (सवत्सरस्य) कर्मकारा तै० ३११०३ मासा

अन्यत्र लोट् लट् च । व्यत्ययेनात्मनेपदञ्च]

मामहः पूज्यान् (सज्जनान्) २ १७ ७ [मह पूजायाम् (भ्वा०) धातोर्यङ्लुगन्तादच्]

मामहानम् दत्तवन्तम् (प्रजाजनम्) १ ११७.१७ **मामहानः**=अतिशयेन महान् पूजनीय (धर्म =अग्निहोत्रादिको यज्ञ) १७ ५५ [मह पूजायाम् (भ्वा०) धातो 'ताच्छील्यवयोवचनशक्तिषु चानश्' इति चानश् । विकरणव्यत्ययेन शप श्लु । तुजादित्वादभ्यासस्य दीर्घ. । यजमानो वै मामहान श० ६ २ ३ ६]

मामृजे मृजति शोधयति प्र०—अत्र 'तुजादीनाम्०' इत्यभ्यासदीर्घ ७ २६ ३ [मृजूष् शुद्धौ (अदा०) धातोर्लिट् । तुजादित्वादभ्यासस्य दीर्घ]

मायया प्रज्ञया २३ ५२ आडम्बरेण ५ ६३ ७ आच्छादनादिना प्रज्ञया वा ५ ६३ ३ कपटयुक्तया (वाचा) ऋ० भू० ३१७, १० ७१ ५. **माया**=प्रज्ञा ३ ६१ ७ **मायाभिः**=प्रज्ञा-विशेषव्यवहारै १ ११ ७ प्रज्ञानोपायै १ ५१ ५ गर्जनाऽन्धकारविद्युदादिवत् कपटघूर्त्तताधर्म्मादिभि १ ३३.१० **मायायै**=प्रज्ञावृद्धये ३० ७ **मायाः**=छलयुक्ता प्रज्ञा २ ११ १० कपटानि ६ ४५ ६ कपटादियुक्ता क्रिया १ ११७ ३ अन्धकाराद्या इव १ ३२ ४ **मायाम्**=प्रज्ञापिका विद्युतम् १३ ४४ मेघाम् ५ ८५ ६ [मा माने (माननिहान्तार्भाव) (अदा०) धातो 'मा छासिभ्यो य' उ० ४ १०६ सूत्रेण य । तत स्त्रिया टाप् । माया प्रज्ञानाम निघ० ३ ६ मायया वाक्प्रतिरूपया नि० १ २० मायाम्=प्रज्ञाम् निघ० ७ २७ माया प्रज्ञानानि नि० १२ १७]

मायावान् कुत्सितप्रज्ञायुक्त (दस्यु =दुष्टस्वभावो जन) ४ १६ ६ [मायाप्राति० निन्दायामर्थे मतुप्]

मायाविनम् दुष्टप्रज्ञम् (दुष्टाचारिण जनम्) २ ११ ६ [मायाप्राति० निन्दायामर्थे 'अस्मायामेधास्रजो विनि' अ० ५ २ १२१ सूत्रेण विनि]

रक्षसः दस्युचोरादीन् ३४ २६ दुष्टान् मनुष्यान् दोषान् वा १ ७६ ३ दुष्टाचारान् मनुष्यान् ५ ४२ १० दुष्टा (द्विष=व्यभिचारिणीर्वृषली) ११ ४९ परपीडकस्य (दुर्जनस्य) १ १२९ ११ राक्षस, हिंसाशील, दुष्टस्वभाव-देहधारी से आर्याभि० १ १२, ऋ० १ ३ १० १५ **रक्षसाम्**=दुष्टकर्मकारिणा प्राणिनाम् ५ २६ रक्षन्ति परार्थहननेन स्वार्थमिति रक्षासि तेषाम् (स्वार्थिजनानाम्) ६ १६ **रक्षसे**=दुष्टाना विनाशाय ५ २ ९ **रक्षः**=दुष्टकर्मकारी मनुष्य १ ८६ ९ दुर्गन्धादिदुःखजालम् १ ९ रक्ष स्वभावो दुष्टो मनुष्य १ ७ दुष्ट-व्यवहारान् प्र०—अत्र व्यत्ययेनैकवचनम् १ २१ ५ विघ्नकारी प्राणी परमुखाऽसहो मनुष्य, बन्धनेन रक्षितव्यम् १ २९ दुष्टाचारम् राक्षसम् ९ ३८ रक्षति सर्वत स्वार्थनिमित्तीभूत कर्म अ०—दुष्टस्वभाविनम् ६ १६ सर्वथा स्वार्थरक्षक परार्थहन्ता (दुष्टो जन) ६ १६ दस्युस्वभाव १ १६. दुःख निवारणीयम् १ १९ दुष्टस्वभावो जन्तु १ १४ **रक्षांसि**=दुष्टान् दोषान्वा १८ ५२ रक्षयितव्यानि (कार्याणि) ७ १५ १० दुष्टानि कर्माणि दुष्टस्वभावान् प्राणिन १ ७९ १२ हिंसकान् दस्यून् ९ १६ दुष्टाचारान् ६ १६ २९ परपीडका स्वार्थिन (असुरा) २ २९ पालयितव्यानि (अस्ना=रुधिराणि) २५ ९ अन्यान् प्रपीड्य स्वात्मानमेव ये रक्षन्ति ते (भा०—चोरा) ३४.५१ [रक्ष पालने (भ्वा०) धातो 'सर्वधातुभ्योऽसुन्' उ० ४ १८९ इत्यसुन्। रक्षो रक्षितव्यमस्माद्। रहसि क्षणोतीति वा। रात्रौ नक्षत इति वा नि० ४ १८ अग्निर्वै रक्षसामपहन्ता श० १ २ १ ६. अग्निर्वै रक्षसामपहन्ता कौ० ८ ४ अग्निर्वै ज्योतीरक्षोहा श० ७ ४ १ ३४ ते (देवा) ऽविदुः। अय (अग्नि) वै नो विरक्षस्तम. श० ३ ४ ३ ८ अग्नेर्वा ऽएतद्रेतो यद्धिरण्य नाष्ट्राणा रक्षसामपहन्ता श० १ ३ ४ ८ तत् (रक्ष.) सीसेनापजघान। तस्मात् सीस मृदु सृतजव हि श० ५ ४ १ १०. ते (देवा) एत रक्षोहण वनस्पतिमपश्यन् कार्ष्मर्य्यम् श० ७ ४.१ ३७ देवा ह वा ऽएत वनस्पतिषु रक्षोघ्न दद्दशुर्यत् कार्ष्मर्य्यम् श० ३.४ १ १६ यदापामार्गहोमो भवति रक्षसामपहत्यै तै० १.७ १ ८ अपामार्गैर्वै देवा दिक्षु नाष्ट्रा रक्षाम्यपासृजत श० ५ २ ४ १४ ब्राह्मणो हि रक्षसामपहन्ता श० १ १ ४ ६ साम हि नांष्ट्राणा रक्षसामपहन्ता श० ४ ४ ५ ६ स या वै दक्षो वदति यामुन्मत्त सा वै राक्षसी वाक् ऐ० २ ७ आपो वै रक्षोघ्नी· तै० ३ २ ३ १२ वज्रो वाऽआपस्तद्वज्रेणैवैतन्नाष्ट्रा रक्षाम्यतोऽपहन्ति श० १ ७ १.२ असृग् भाजनानि ह वै रक्षासि कौ० १० ४ रक्षसा हि स भाग. (असृग् रूप) श० १ ९ २ ३५]

रक्षस्विनः रक्षांसि दुष्टस्वभावा निन्दिता मनुष्या विद्यन्ते येषु सङ्घातेषु तान् १ १२ ५ रक्षांसि निन्दिता पुरुषा सन्ति येषु व्यवहारेषु ते प्र०—अत्र निन्दितार्थे विनि १ ३६ २० **रक्षस्विने**=पापी हिंसक दुष्टात्मा के लिए आर्याभि० १ २९ [रक्षस्प्राति० निन्दाया मत्वर्थे विनि। पुरुष पुरुषो हि रक्षस्वी तै० आ० ५ ९ ४]

रक्षिता रक्षणकर्त्ता (ईशान=ईश्वर) २५ १८ रक्षा करने मे तत्पर (ईश्वर) आर्याभि० १ १०, ऋ० १ ६ १५ ६ [रक्ष पालने (भ्वा०) धातो कर्त्तरि तृच्]

रक्षो रक्षैव १ १७४ ३ [रक्ष पालने (भ्वा०) धातोर्लोट्। वर्णव्यत्ययेनाकारस्योकारादेश]

रक्षोयुजे यो रक्षांसि दुष्टान् मनुष्यान् युनक्ति तस्मै (अधर्मात्मने जनाय) ६ ६२ ८ [रक्षमुपपदे युजिर् योगे (रुधा०) धातो क्विप्]

रक्षोहणम् रक्षसा दुष्टाना हन्तारम् (विद्वज्जनम्) २ २३ ३ यया येन धार्मिकेण पुरुषेण रक्षांसि हन्यन्ते तथा (पुरुषम्) ५ २३ **रक्षोहणः**=यथा यूय रक्षांसि दुष्टान् दस्यूवादीन् हथ तथा तान् ५ २५ **रक्षोहणौ**=यथा रक्षसा हन्तारौ प्रजासभाद्यध्यक्षौ तथाऽहम् ५ २५ यथा रक्षसा शत्रूणा हन्तारौ भवथस्तथाऽहम् ५ २५ **रक्षोहा**=यो रक्षांसि दुष्टान् हन्ति स (सूर्यो विद्वज्जनो वा) ५ २४ यो दुष्टाना रोगाणा हन्ता स (भिषक्=वैद्य) १२ ८०

वा नि० ६ ३३.]

रण्यानि रमणीयानि लोकजातानि ३ ५५ ७ रणेषु साधूनि कर्म्माणि १ ८५ १० [रमु क्रीडायाम् (भ्वा०) धातोर्यत्प्रत्यये मकारस्य नकारश्छान्दसः। रण-शब्दाद्वा साध्वर्थे यत्]

रण्वभिः रमणीयैं (धनैं) ५ ४४ १० [रमु क्रीडायाम् (भ्वा०) धातोर्वाहु० श्रीणा० व। ततो भिस ऐसादेशो न छन्दसि]

रण्वम् उपदेशकम् १ १२६ ७ शब्दायमानम् (अग्निं=पावकम्) ३ २६.१ रमणीयम् (उपदेशकम्) ६.२६ १ **रण्वः**=रमयिता (जगदीश्वर.) २ २४ ११ रमणीयस्वरूप (अग्नि =राजा) ४ १ ८ रममाण (सूनु =अपत्यम्) ६ २ ७ शब्दविद्यावित् (विद्वज्जन) १ १४४ ७ रमणीय (वाजी=अश्व) प्र०—अत्र रमधातोर्वाहुलकादौणादिको व प्रत्यय १ ६६ ३ [रमु क्रीडायाम् (भ्वा०) धातोरौणा० वहुलवचनाद् व। मकारस्य नकारो वर्णव्यत्ययेन]

रण्वया रमणीयया (गातुमत्या=प्रशस्तवाग्भूमि-युक्तया) ७ ५४ ३ **रण्वा**=या रण्वति सुख प्रापयति सा (पुष्टि) १ ६५ ३ प्रशसनीया (पुष्टि =धातुवृद्धि) २ ४४ रमणीया (पुष्टि) ४ १६ १५ (रण्वमिति व्याख्यातम्, ततष्टाप् स्त्रियाम्। अथवा रवि गत्यर्थे (भ्वा०) धातो 'गुरोश्च हल' इत्यकार। ततष्टाप्]

रण्वसन्दृक् या रण्वान् रमणीयान् पदार्थान् सन्दर्शयति सा (उषा =प्रभातवेला) ३ ६१ ५ रमणीय य सम्यक् पश्यति स (वीरपुरुष) ७ १ २१ **रण्वसन्दृशम्**=रमणीयसदृशम् (विद्वज्जनम्) ६ १६ ३७ [रण्वोपपदे सम्पूर्वाद् दृशिर् प्रेक्षणे (भ्वा०) धातो क्विन्। रण्वमिति व्याख्यातम्]

रण्विते शब्दायमाने (उपासानक्ता=रात्रिदिने) २ ३.६. [रवि गत्यर्थे (भ्वा०) धातो. क्त]

रताः ये रमन्ते ते (सम्भोगिजना) ४० ६ रममाणा ४० १२ [रमु क्रीडायाम् (भ्वा०) धातोर्वाहु० श्रीणा० क्त। 'गत्यर्थाकर्मक०' इति वा कर्त्तरि क्त]

रतिः [illegible]णम् ८ ५१ [रमु क्रीडायाम् (भ्वा०) धातो स्त्रिया क्तिन्]

रत्नधातमम् रत्नानामतिशयेन धर्त्तारम् (राजानम्) ५ ८ ३ रमणीयानि पृथिव्यादीनि सुवर्णादीनि च रत्नानि दधाति धापयतीति रत्नधा अतिशयेन रत्नधा इति रत्नधातमस्तम् (अग्निं=परमेश्वर भौतिक वा) १ १ १ रत्नानि सर्वजनैं रमणीयानि प्रकृत्यादिपृथिव्यन्तानि ज्ञान-हीरक-सुवर्णादीनि च जीवेभ्यो दानार्थं दधातीति रत्नधा अतिशयेन रत्नधा स रत्नधातमस्तम् (अग्निम्) वे० भा० न० १ १ १. रत्न अर्थात् रमणीयपृथिव्यादिको को अपने सेवको के लिए धारण करने वाले (ईश्वर) को आर्याभि० १ २, ऋ० १ १ १ १ **रत्नधातमः**=रत्नानि रमणीयानि सुखानि दधाति येन सोऽनिशयित. (स्तोम =स्तुतिसमूह) १ २० १ [रत्नवाप्राति० अतिशायने तमप्। रत्नधा=रत्नोपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्विप् कर्त्तरि। रत्न-धातमम्=रमणीयाना धनाना दातृतमम् नि० ७ १५.]

रत्नधाभिः या रत्नानि द्रव्याणि दधति ताभि (स्वपत्नीभि) ४ ३४ ७ **रत्नधाम्**=यो रत्नानि रमणीयानि विज्ञानानि हीरकादीनि भुवनानि वा दधातीति तम् (परमेश्वरम्) ४ २५ **रत्नधाः**=यो रत्नानि दधाति स (पुरुष पतिर्वा) ३८ ५. रत्नानि रमणार्थानि पृथिव्यादीनि वस्तूनि दधातीति स (विद्युदग्नि) १ १५ ३ रत्नानि रमणीयानि वस्तूनि दधाति स (सुपुत्र) १ १६४ ४६ रमणीयवस्तु धर्त्ता (विद्वज्जन) २६ २१ [रत्नोपपदे दधातेर्धातो कप्रत्ययान्ताट् टाप् स्त्रियाम्। अथवा रत्नोपपदे दधाते कर्त्तरि क्विप्]

रत्नधेभिः ये रत्नानि दधति तैं [ऋभुभि = मेधाविभिर्जनैं) ४ ३५ ७ ये रत्नानि द्रव्याणि दधति तैं (सिन्धुभि =नदीभि सुमुद्रैर्वा) ४ ३४ ८ [रत्नोपपदे डुधाञ् धारणपोषणयो (जु०) धातो क। ततश्छन्दसि भिस ऐसादेशो न]

रत्नधेयम् रत्नानि धीयन्ते यस्मिँस्तत् (पात्रम्) ४.३४ ४ रत्नानि धेयानि यस्मिँस्तत् (दुरोण=गृहम्) ४.१३ १ रत्नानि धेयानि येन तम् (जनम्) ५ ४२ ७. **रत्नधेयानि**=रत्नानि धीयन्ते येषु तानि (धनाधिकरणानि) ७.५३ ३ **रत्नधेयाय**=रत्नानि धीयन्ते यस्मिन् कोषे तस्मै ४ ३४ ११ [रत्न-धेयपदयो समास। रत्नमिति व्याख्यास्यते। धेयम्=डुधाञ् धारणपोषणयो (जु०) धातो 'अचो यत्' इति यत्]

रत्नधेया रत्नानि धनानि धीयन्ते यया तस्यैं (प्रज्ञायैं) ४ ३४ १ [रत्नधेयमिति व्याख्यातम्। ततष्टाप् स्त्रियाम्]

रत्नम् सुवर्णहीरकादिकम् ३ ५४ ३ रमन्ते जनाना मनासि यस्मिँस्तत् (वसु=उत्तमद्रव्यम्) १ ४१ ६ धनम् ३ ८ ६ रमणीय सुवर्णादिकम् १ ५३ १ रमणीय ज्ञान

११४.५१. **रजांसि**=लोकविशेषाणि ६३०३. उत्तम-मध्यम-निकृष्टानि (लोकलोकान्तराणि) ४५३५ रथानानि ३४१६ लोकानैश्वर्याणि वा ४४५७ लोकस्थानानि २३६७ पृथिव्यादीनि स्थूलानि तत्त्वानि ११६४६ **रजोभिः**=ऐश्वर्यप्रदैर्मार्गैः ६६२६ परमाणुभिर्लोकैर्वा सह ६६२२ [रञ्ज रागे (भ्वा०) धातो 'भूरञ्जिभ्या कित्' उ० ४२१७ सूत्रेणासुन् किच्च। रज =रात्रिनाम निघ० १७ पदनाम निघ० ४१ रजसी =द्यावापृथिवी-नाम निघ० ३३० रजतेर्ज्योति रज उच्यते, उदक रज उच्यते, लोका रजास्युच्यन्ते, ग्रसृगहनी रजसी उच्येते नि० ४१६ रजस =अन्तरिक्षलोकस्य नि० १२७ रजस्सु= उदकेषु नि० १०४४ इमे वै लोका रजासि श० ६३११८ द्यौर्वै तृतीय रज श० ६७४५]

रजस्तुरम् यो रजासि लोकान् तुरति त तूर्णगमना-गमनहेतुम् (मरुता गणम्) १६४१२ **रजस्तूः**=यो रज उदक तौति वर्धयति स (वीरजन) ६६६७ यो रजासि लोकान् वर्धयति स (विद्वज्जन) ६२२ ['रजस्' इत्युपपदे तुर त्वरणे (जु०) धातो क्विप्]

रजस्याय रज सु लोकेषु परमाणुषु वा भवाय (जनाय) १६.४५ [रजस्प्राति० भवार्थे यत्]

रजःशया या रज सु सूर्यादिलोकेषु शेते सा (तनू = व्याप्ति) ५८ [रजस्-उपपदे शीङ् शये (अदा०) धातो 'अधिकरणे शेते' अ० ३२१५ सूत्रेणाच्। तत स्त्रिया टाप्]

रजिम् पङ्क्तिम् ६२६६. [रञ्ज रागे (भ्वा०) धातो 'इक् कृष्यादिभ्य' इति वासूत्रेण स्त्रियाम् इक्]

रजिष्ठम् अतिशयेन ऋजु कोमलम् (पन्थाम्= पन्थानम्) प्र०—अत्र ऋजु-शब्दादिष्ठनि 'विभाषर्जो-रिछन्दसि' अ० ६४१६२ इति ऋकारस्य रेफादेश १६११ **रजिष्ठाः**=अतिशयेन रजितार (देवा =आदित्यादय) ७.५१२ **रजिष्ठैः**=अतिशयेन रजस्वलैः (मार्गैः) १७६३ [ऋजुप्राति० अतिशायन इष्ठन्-प्रत्यये 'विभाष-र्जोरिछन्दसि' अ० ६४१६२ सूत्रेण ऋजोर् ऋकारस्य रेफ। रजस्प्राति० वा अतिशायन इष्ठन रजस्-शब्दान् मतुवर्थकप्रत्ययस्य लोपश्छान्दस। रजिष्ठै =ऋतुतमै रज-स्वलतमै प्रपिष्टतमैरिति वा नि० ८१६]

रज्जुसर्जम् यो रज्जु सृजति तम् (शिल्पिजनम्) ३०७ [रज्जूपपदे सृज विसर्गे (तुदा०) धातो 'कर्मण्यण्' इत्यण्]

रज्जुः रज्जु ११६२८ [सृज विसर्गे (तुदा०) धातो 'सृजेरसुम् च' उ० ११५ सूत्रेण उ प्रत्ययोऽसुमागम आदिसकारलोपश्च। पुनर्ऋकारस्य यणादेश आगम सकारस्य जश्त्व च। अथाप्याद्यन्तविपर्ययो भवति नि० २२ वरुण्या वै यज्ञे रज्जु श० ६४३८ वरुण्या रज्जु श० १३११४ वरुण्या वा एषा यद्रज्जु श० ३२४१८]

रण उपदिश ५५१८. **रणन्**=उपदिशन्तु ४३३७ **रणन्त**=रमध्वम् ७५७५ **रणन्ति**=शब्दायन्ते ३.७.५ [रण शब्दे (भ्वा०) धातोर्लोट्। अन्यत्र लड् लट् च। रणऽशब्दाद्वाचारे क्विप् तता लडि 'रणन्त' इति रूपम्]

रणन् उपदिशन् (विद्वज्जन) ५५३१६ [रण शब्दे (भ्वा०) धातो शतृ]

रणयन् शब्दयन्तु स्तुवन्तु प्र०—अत्र लड्यडभाव ११००७ **रणयन्त**=शब्दयन्ति ४७७ रण सङ्ग्राम इवाचरन्ति ३५७.२ रमेरन् रमयेयुर्वा ६१४ शब्दयेयु ११४७१ **रणयन्तु**=शब्दयन्तु ६२८१ [रण शब्दे (भ्वा०) धातोर्णिजन्ताल्लड् अडभाव। रणप्राति० वा आचारे क्यच्-प्रत्यये छान्दस रूपम्]

रणाय सङ्ग्रामाय ३६१४ युद्धाय १६१६ **रणाः**=रममाणा (गृहस्था जना) ६२७१. [रण शब्दे (भ्वा०) धातो 'वशिरण्योरुपसख्यानम्' अ० ३३५८ वा० सूत्रेण कर्त्तरि कारके अप्। रण सग्रामनाम निघ० २१७ रमु क्रीडायाम् (भ्वा०) धातोर्वा वाहु० श्रीणा० नक्। रणाय रमणीयाय सग्रामाय नि० ४८ रणाय रमणीयाय नि० ९२७]

रणिष्टन शब्दयत २३६३ वदत २६२४ [रण शब्दे (भ्वा०) धातोर्लङ् अडभाव। तस्य तनवादेश]

रणे रणे युद्धे युद्धे १७४३ ['रणे' पदस्य वीप्साया द्वित्वम्]

रण्यति रमते ५१८१ उपदिशति प्र०—अत्र विकरणव्यत्यय १८३६ **रण्यथः**=रमयथ ५७४३ **रण्यन्ति**=रणन्ति शब्दयन्ति प्र०—अत्र व्यत्ययेन शप स्थाने श्यन् १३८२ [रण-शब्दे (भ्वा०) धातोर्लट्। विकरणव्यत्ययेन शप श्यन्]

रण्यवाचः रमणीयभाषा ३५५७ [रण्या-वाच्-पदयो समासे पूर्वपदस्य ह्रस्व। रण्या=रमु क्रीडायाम् (भ्वा०) धातो 'पोरदुपधाद्' इति यत्, ततष्टाप् स्त्रियाम्। मकारस्य नकारो वर्णव्यत्ययेन। रमु धातोर्वा वाहु० श्रीणा० डण्यनूप्रत्यय। रण्यौ रमणीयौ सग्राम्यौ

रथन्तराय यो रथं समुद्रादीस्तरति तरणे (अग्नये—पावकाय) २९.६० **रथन्तरे**=अन्तरिक्षे १.१६४.२५. **रथन्तरेण**=यत्र रथेन तरति तत्र तेन (तेजसा=सूर्यप्रकाशेन) २१ २३ [रथोपपदे तु प्लवनसन्तरणयो (भ्वा०) धातो. 'ऋदोरप्' इत्यप् । नुडागमश्छान्दस । इयं (पृथिवी) वै रथन्तरम् को० ३.५. प० २.२ ता० ६.८.१८. अ० ५ ५.३ ५ अयं वै (पृथिवी) लोको रथन्तरम् ऐ० ८.२. रथन्तरो वा अयं (भू०) लोक तै० १ १ ८ १ रथन्तरहीयम् (पृथिवी) श० १.७ २ १७ उपहूत रथन्तर सह पृथिव्या तै० ३ ५.८.१ श० १ ८.१ १९ वाग्वै रथन्तरम् ऐ० ४.२८. वाग् रथन्तरम् ता० ७.६ १७ ब्रह्मवर्चस वै रथन्तरम् तै० २ ७.१ १. ब्रह्म वै रथन्तरम् ऐ० ८.१ २ ता० ११ ४ ६ ऋग् रथन्तरम् ता० ७.६ १७. अपानो रथन्तरम ता० ७.६ १४ यद्ध्रुव तद् रथन्तर यद्दीर्घं तद् बृहत् को० ३ ५. देवरथो वै रथन्तरम् ता० ७ ७ १३ अन्न वै रथन्तरम् ऐ० ८ १ रात्रन्तरी वै रात्री ऐ० ५ ३० गायत्री वै रथन्तररय योनि ता० १५.१०.५. गायत्र वै रथन्तरम् ता० ५ १ १५. गायत्र वै रथन्तर गायत्रश्छन्द ता० १५.१०.९ एतद्वै रथन्तरस्य स्वमायतन यद् बृहती ता० ४.४ १० अग्निर्वै रथन्तरम् ऐ० ५.३०. उप वै रथन्तरम् ता० १६ ५ १४ ऐट् रथन्तरम् ता० ७ ६.१७ त्रिवृच्च त्रिणवश्च रात्रन्तरौ तावजश्चाश्वश्चान्वसृज्येता तस्मात्तौ रात्रन्तर प्राचीन प्रधूनुत ता० १०.२ ५ चतुरक्षर रथन्तरम् तै० २.१ ५ ७ प्रजनन वै रथन्तरम् ता० ७ ७ १६ यद्रथन्तर तच्छाक्वरम् ऐ० ४.१३ रथन्तरमेतत् परोक्ष यच्छम्वर्य ता० १३ २.८ यद्वै रथन्तर तद्वैरूपम् (साम) ऐ० ४ १३. रथन्तरमेतत्परोक्ष यद् वैरूपम् (साम) ता० १२ २ ५. रथन्तर ह्येतत् परोक्ष यच्छ्वैतम्(साम)ता० ७ १० ८ रथन्तर वै सम्राट् तै० १ ४ ४.९. रथन्तर साम्नाम् (प्रतिष्ठा) ता० ९ ३.४. तेजो रथन्तर साम्नाम् ता० १५.१० ६ वसन्तेनर्तुना देवा वसव रित्रवृतास्तुतम् । रथन्तरेण तेजसा । हविरिन्द्रे वयो दधु तै० २.६ १९.१ (सामवेद उवाच) रथन्तर नाम ते सामाघोरश्चाक्रूरश्च गो० पू० २ १८ श्रीरेषा यद् रथन्तरम् जै० १ ३३० समुद्र एष यद् रथन्तरम् जै० १ ३३२]

रथप्राम् यो रथानि यानानि पूर्यते तम् (वायु=पवनम्) ६ ४९ ४ यो रथान् यानानि प्राति व्याप्नोति तम् (वायु=प्राणादिलक्षणम्) ३३ ५५ [रथोपपदे प्रा पूरणे (अदा०) धातोः क्विप्]

रथप्रोतः रथो रमणीयस्तेजसमूह प्रोतो व्यापितो येन स (सेनापतिः) १५ १७. [रथ-प्रोतपदयो समास प्रोत =प्र+वेञ् तन्तुसन्ताने (भ्वा०) धातो क्त । तस्य (आदित्यस्य) रथप्रोतश्चामरश्च सेनानीग्रामण्याविति वार्षिकौ तावृतू श० ८.६ १.१८]

रथयुजम् रथेन युक्तम् (पवनम्) ५ ४१ ६. **रथयुजः**=ये रथ युञ्जते ते (शिल्पनो जना) १ १३९.४ [रथोपपदे युजिर् योगे (रुधा०) धातो क्विप्]

रथयुः आत्मनो रथमिच्छुः (इन्द्र =सर्वाऽधीशः, १ ५१ १४ रथ कामयमान (जन.) ७.२ ५ [रथपदाद् आत्मन इच्छायामर्थे क्यजन्ताद् उ । क्यचि प्राप्ते त्वस्य 'न छन्दस्यपुत्रस्य' इति निषेध.]

रथवत् प्रशस्तरथादियुक्तम् (परमैश्वर्यम्) ७ २७ ५ प्रशसितरथसहितम् (राध.=धनम्) ५.५७ ७ [रथप्राति० प्रशसायामर्थे मतुप्]

रथवते बहवो रथा विद्यन्ते यस्य तस्मै (महाशयजनाय) १ १२२ ११. [रथवदिति व्याख्यानम् । ततश्चतुर्थी]

रथवाहनम् रथान् वहन्ति गमयन्ति येन तत् [हवि =आदातव्याग्नीन्धनजलकाष्ठधात्वादि) २९ ४५ रथ वहति येन तत् (साधनम्) १२ ७१ [रथोपपदे वह प्रापणे (भ्वा०) धातोर्णिजन्ताल्ल्युट् करणे]

रथवीतिः यो रथेन व्याप्नोति मार्ग स (विद्वज्जन) ५ ६१.१९ **रथवीतौ**=रथाना गतौ ५.६१.१८ [रथवीतिपदयोः समास । वीनि =वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (अदा०) धातो स्त्रिया क्तिन् ओर्ण० वा ति किच्च]

रथस्पतिः रथस्य स्वामी ५ ५० ५ [रथ-पतिपदयो समास । सुडागमश्छान्दस]

रथस्वनः रथस्य स्वन शब्द इव शब्दो यस्य स (सेनापति.) १५ १६ [रथ-स्वनपदयो समास । स्वन = शब्दे (भ्वा०) धातो 'स्वनहसोर्वा' सूत्रेणाप् । तस्य (वायो) रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्याविति ग्रैष्मौ तावृतू श० ८ ६ १ १७.]

रथा जलस्थलाऽन्तरिक्षेषु गमयितारौ (यानविशेषौ) ७ १८ २२ [रथप्राति० 'सुपा सुलुक्०' सूत्रेणाकारादेश]

रथासः रमणीयानि यानानि भा०—रमणीया गतय २७ ३२ रमणसाधना (विमानादियानविशेषा) २ १२ ७ रमणीया (वायुवेगा) २ ४१ १ [रथप्राति० जसोऽमुक्]

रथाँ इव यथा रथानधिष्ठाय १.१३० ५ [रथान्-

साधन वा १ १४१ १० रमणीयस्वरूपम् १.५८ ७ रम्यानन्द वस्तु १ १२५ १ रमणीय जगत् २ ३८ १ [रमु क्रीडायाम् (भ्वा०) धातो 'रमेस्त च' उ० ३ १४. सूत्रेण न । तकारश्चान्तादेश । रत्न धननाम निघ० २ १०.]

रत्नवन्तम् बहूनि रत्नानि धनानि विद्यन्ते यस्मिँस्तम् (अध्वरम्=अहिंसादिलक्षण धर्म्यं व्यवहारम्) ३ २८ ५ [रत्नप्राति० भूम्न्यर्थे मतुप्]

रत्ना विद्यादिरमणीयप्रज्ञाधनानि ७ १७.७. [रत्नप्राति० शेर्लोपश्छन्दसि]

रत्निनः बहूनि रत्नानि धनानि विद्यन्ते येषु तान् (प्रजाजनान्) ७ ४० १ [रत्नप्राति० भूम्न्यर्थ इनि]

रत्निनीम् रमणीयाम् (वाचम्) १ १८२ ४ [रत्नप्राति० भूम्न्यर्थ इनिप्रत्ययान्तात् स्त्रिया ङीप्]

रत्सि रमसे ५ १० १ [रमु क्रीडायाम् (भ्वा०) धातोर्लटि शपो लुकि वर्णव्यत्ययेन च तादेशे रूपम् । परस्मैपदमपि व्यत्ययेनैव]

रथ रमणीयस्वरूप (विद्वज्जन) २९ ५४ **रथम्**=विमानादियानविशेषम् ६ ४७ २७ रमणीयस्वरूप ससारम् १ ७० ४ रमणसाधन यानम् १ ११२ २ रमणीय विद्याप्रकाश यान वा ८ ३३. रमणीय सूर्यलोकम् ६.४४ २४ रमणीय भू-समुद्राकाशयानम् १७ ३७ रमते येन तद् विमानादियानम् ५ ७५ १ रमणस्याधिकरणम् (यानम्) १ ५४ ६ रमणीय किरणम् ६ ६३ ५ ज्ञानम् १ ८२ ४ विद्याप्रकाशम् ८ ३३ **रथः**=रयते जानाति येन स रथ. अ०—विज्ञानम् ३ ३६ रमणीयो व्यवहार ६ ४९ ५. रमणाय तिष्ठति यन्मिन् स १ १२० ११ रन्तु योग्यः (यानविशेषः) १ १८३ २ रमणसाधन. २३ १४ वाहनम् १ १२३ १ गमनसाधन यानम् २ १८ १ युद्धक्रीडासाधकतम १ ११७ २ सद्यो गमयिता विमानादियानविशेष ४ ३१ १४ **रथाय**=समुद्रादिषु रमणाय १ १४० १२ विमानादियानसमूहसिद्धये १ १११ ३ **रथे**=रमणीये यान इव शरीरे ६ ४७ १९ रमणीये जगति ६ ५५ ६ गमनहेतौ रमणसाधने विमानाऽऽदौ १ १३.४ भूजलाकाशगमनार्थे याने प्र०—यज्ञसयोगाद्राजा स्तुतिं लभेत० नि० ९ ११ रथ इति पदनाम निघ० ५ ३. आभ्या प्रमाणाभ्या रथशब्देन विशिष्टानि यानानि गृह्यन्ते १ ६ २ रमयति येन तस्मिन् (याने) १ १६ २ रमणीये लोके १ ५० ८ **रथेन**=रमणहेतुना यानेन ३३ ७३ गमकेन यानेन ३३ ३३. रमणानन्दादिव्यवहारसाधक-ज्ञानतेजोरूपेण (यानेन) ऋ० भू० १४२, ३३ ४३ रम्येण स्वरूपेण १ १२३ ७ रमणीयेनानन्दस्वरूपेण प० वि० । [रमु क्रीडायाम् (भ्वा०) धातो 'हनिकुषिनीरमिकाशिभ्य क्थन्' उ० २ २ सूत्रेण क्थन् । रथ पदनाम निघ० ५ ३ रथ.=रहतेर्गतिकर्मण । स्थिरतेर्वा स्याद् विपरीतस्य रममाणोऽस्मिन्तिष्ठतीति वा, रपतेर्वा, रसतेर्वा नि० ९.११ वज्रो वै रथ तै० स० ५ ४ ११ २ काठ० २१ १२ वैश्वानरो वै देवतया रथ तै० २ २.५ ४ त वा एत रस सन्त रथ इत्याचक्षते गो० १ २ २१]

रथ इव रमणीयाऽऽकाश इव ६ ६१ १३ [रथ-इवपदयो समास]

रथकारम् विमानादिरचक शिल्पिनम् ३० ६ **रथकारेभ्यः**=ये रथान् विमानादियानसमूहान् कुर्वन्ति तेभ्य शिल्पिभ्य १६ २७ [रथोपपदे डुकृञ् करणे (तना०) धातोरण्]

रथक्षयाणि रथस्य निवासरूपाणि गृहाणि ६ ३५ १ [रथ-क्षयपदयो समास । क्षयम्=क्षि निवासगत्यो (तुदा०) धातो. 'एरच्' इत्यच्]

रथगृत्सः रथस्य प्रवेता गृत्सो मेधावीव वर्त्तमान (सारथि) प्र०—गृत्स इति मेधाविनाम निघ० ३.१५ गृत्सो मेधावी गृणाते स्तुतिकर्मण नि० ९ ५, १५ १५ [रथ-गृत्सपदयो समास । गृत्स मेधाविनाम निघ० ३ १५. गृत्स इति मेधाविनाम गृणाते स्तुतिकर्मण नि० ९ ५]

रथतुरम् यो रथेन सद्यो गच्छति तम् (शत्रुम्) ४ ३८ ३ **रथतूर्भिः**=यो रथान् विमानादियानानि तूर्वन्ति शीघ्र गमयन्ति तै (अश्वै) १ ८८ २ [रथोपपदे तुर्वी हिसायाम् (भ्वा०) धातो क्विप् । 'रात्लोप' सूत्रेण वलोप । अथवा रथोपपदे तुर त्वरणे (जु०) धातो क्विप्]

रथनाभाविव यथा रथस्य रथचक्रस्य मध्यमे काष्ठे सर्वेऽवयवा लग्ना भवन्ति तथा ३४ ५ जैसे रथ के मध्य धुरा मे स० प्र० २४७, ३४ ५ [रथनाभौ-इवपदयो समास । रथ-नाभौ=रथ-नाभिपदयो समासे कृते सप्तमी]

रथन्तरम् रथैस्तरन्ति येन तत् (साम) १० १० यद्रथै रमणीयैस्तारयति तत् (सुखम्) १३ ५४ रथै रमणीयैर्यानैस्तरन्ति येन तत् (मार्गम्) ११ ८ यदस्मिन् लोके तारक वस्त्वस्ति तत् १५ ५ रथैस्तारकम् (साम=एतद्वत कर्म) १५ १० सामस्तोत्रविशेष १८ २९ क्रियासिद्धिफलभोग शिल्पविद्याजन्य वस्तु च ऋ० भू० १५४,

रथेष्ठाम् यो रथे तिष्ठति तम् (शिल्पिनम्) ६ २१ १ रथे तिष्ठन्तम् (इन्द्र=हृद्य पतिम्) ६ २२ ५ **रथेष्ठाः**= यो रथे तिष्ठति स (युवा=प्राप्तयौवनजन) २२ २२ ये रथे तिष्ठन्ति ते (वीरजना) ६ २६ २ [रथोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो कर्त्तरि क्विप्। सप्तम्या अलुक्]

रथौजाः रथेनौजो बल यस्य स (सूर्य-रश्मि) १५ १५ [रथ-ओजस्पदयो-समास]

रथ्यम् रथेभ्यो हितमश्वमिव प्रापकम् (पतिं= जगदीश्वरम्) ७ ५ ५ रथ वोढुमर्हम् (अग्निम्) ६ ७ २ रथाय हितम् (अश्व=तुरङ्गम्) ६ ४६ २ रथस्य वोढारम् (अश्वम्) २७ ३८ रथेषु विमानादियानेषु हितम् (रयिं= श्रियम्) ६ ४६ १५ **रथ्यस्य**=रथे याने भवस्य (वातस्य= वायो.) ५ ४१ ३ रथेषु रमणीयेषु साधो (पुष्टे) ४ ४१ १० **रथ्यः**=यो रथ वहति स (सप्ति=अश्व) २ ३१ ७ रथाय हितोऽश्व ७ २१ ३ रथे साधू रथ्य सारथि भा०—सुशिक्षित सारथि ३४ ४६ बहुरथादियुक्त (मरुत=प्राणवत्प्रिया जना) ५ ५४ १३ रथस्य वोढा (इन्द्र=सभाध्यक्ष) १ १२१ १४ [रथप्राति० हितार्थे भवार्थे साध्वर्थे वा यत्। रथप्राति० वा वहत्यर्थे 'तद्वहति-रथयुगप्रासङ्गम्' अ० ४ ४.७६ सूत्रेण यत्। रथे योगाय रथ्या नि० १० ३]

रथ्यः बहुरथवन्त (अमात्यादिजना) ४ १७ २१ रमणीयबहुरथादियुक्ता (राजपुरुषा) ४ १६ ११ रथेषु साधव (तुरङ्गा) १ १४८ ३ बहवो रथा विद्यन्ते येषा ते (वीरजना) ७ ५६ २१ [रथीप्राति० जस्। रथी=रथ-प्राति० मत्वर्थे 'छन्दसीवनिपौ वक्तव्यौ' इति ईकार प्रत्यय]

रथ्या यो रथ वहति तेन (चक्रेण) १ ५३ ६ [रथ-प्राति० वहतीत्यर्थे यत्। तत 'सुपा सुलुक्०' सूत्रेण टा-स्थाने डादेश]

रथ्या रथेषु साधू (अश्विना=अध्यापकोपदेशकौ) ५ ७५ ५ [रथ्यमिति व्याख्यातम्। ततो द्विवचनस्याकारा-देशश्छान्दस]

रथ्यासः रथेषु साधव (अश्वा=तुरङ्गा) ६ ३७ ३ [रथ्यमिति व्याख्यातम्। ततो जसोऽमुक्]

रथ्येव यथा रथेषु साधू अश्वौ ७.३६ १ यथा रथाय हितावश्वौ २ ३६ २ रथेषु साधूनीव (उत्तमरथानानि) ४ १ ३ यथा रथेषु साधूनि (चक्राणि) १ १८० ४ यथा रथाय हितानि (वस्तूनि) २ ३६ ३ [रथ्या-इवपदयो समास। रथ्या=रथ्यप्राति० द्विवचनस्याकारादेश शेर्लोपो वा छन्दसि]

रथ्येव रथेषु साध्वी गतिरिव ३ ३६ ६ रथाय हितेव (ध्वनि) २ ४ ६. [रथ्या-इवपदयो समास। रथ्या= रथ्यमिति व्याख्यातम्। ततष्टाप् स्त्रियाम्]

रद विलिख १ १६६ ८ ससेध १ ६१.१२ **रदति**= विलिखति १ १६६ ६. [रद विलेखने (भ्वा०) धातोर्लोट् अन्यत्र लट्]

रदन्ता सुष्ठु लिखन्तौ (अश्विनौ=राजप्रजाजनौ) १ ११७ ११ (रद विलेखने (भ्वा०) धातो शत्रन्ताद् द्विवचनस्याकारादेशश्छान्दस.]

रदन्ती लिखन्ती (उषा=प्रातर्वेला) ५ ८० ३ **रदन्तीः**=भूमिं विलिखन्त्य (धुनय=रश्मिगतय) २ ३० २ [रद विलेखने (भ्वा०) धातो शत्रन्तान् ङीप्]

रदावसो यो रदेषु विलेखनेषु वसति तत्सम्बुद्धौ (इन्द्र=राजन्) ७ ३२.१८ [रदोपपदे वस निवासे (भ्वा०) धातोर्वाहु० औणा० उ। तत सम्बुद्धौ रूपम्। सहिताया दीर्घ]

रधम् हिंसेयम् १ ५० १३ [रध हिंसासराध्यो (दिवा०) धातोर्लङ् अटोऽभाव। व्यत्ययेन शप्]

रध्य सराध्नुहि १० २८ [रध हिंसासराध्यो (दिवा०) धातोर्लोट्]

रध्रचोदनम् धनस्य प्राप्तये प्रेरकम् (राजानम्) ६ ४४ १० [रध्र-चोदनपदयो समास। रध्रम्=रध हिंसा-सराध्यो (दिवा०) धातोर्वाहु० औणा० रक। चोदनम्= चुद सञ्चोदने (चुरा०) धातो. 'कृत्यल्युटो बहुलमि' ति ल्युट्]

रध्रचोदः यो रध्रान् सरोधकान् चुदति प्रेरयति स (इन्द्र=विद्याप्रकाशको जन) २ २१ ४ [रध्रोपपदे चुद सञ्चोदने (चुरा०) धातो 'कर्मण्यण्' इत्यण्]

रध्रतुरः हिंसकहिंसक (राजा) ६ १८ ४ [रध्रो पपदे तुर्वी हिंसार्थे (भ्वा०) धातो क्विप्। वचनव्यत्यय]

रध्रम् सराधनम् २ ३४ १५ समृद्धिमन्तम् (अदारि-द्रयम्) ७ ५६ २० **रध्रस्य**=सराध्नुवत (यजमानस्य= धनाढ्यजनस्य) २ ३० ६ हिंसकस्य (दुर्जनस्य) २ १२ ६ [रध हिंसासराध्यो (दिवा०) धातोर्वाहु० औणा० रक्]

रन् ददमानौ (वसू=अध्यापकोपदेशकौ) प्र०—दन्व-दस्य सिद्धि १ १२० ७ [डुदाञ् दाने (जु०) धातो शतृ। 'बहुल छन्दसी' नि शपो लुक्। वर्णव्यत्ययेन दस्य रेफ]

रन्त रमन्ते प्र०—अत्र लडि 'बहुल छन्दसि' इति

इवपदयो समास]

रथिनः प्रशस्ता रथा येषान्ते (नर =नायका जना) ६ ४७ २१ प्रशस्तरथयुक्ता वीरा (जना) २६ ५७ प्रशस्तरथस्य (महिमघस्य जनस्य) १ १२२ ८ **रथीनाम्**= नित्ययुक्ता रथा विद्यन्ते येषा योद्धृणा तेषाम् प्र०—अत्र 'अन्येषामपि दृश्यते' अ० ६ ३ १३७ अनेन दीर्घ १ ११ १ प्रशस्ताना वीराणाम् प्र०—अत्र 'छन्दसीवनिपौ' इतीकार १२ ५६ **रथिभ्यः**=प्रशस्ता रथा विद्यन्ते येषा तेभ्य (राजपुरुषेभ्य) २२ १६ **रथीः**=रथस्वामी (सज्जन) प्र०—अत्र 'वा छन्दसि सर्वे विधयो भवन्ति' इति सोर्लोपो न १ २५ ३ प्रशस्ता रथा यस्य सन्ति स (अग्नि =विद्वज्जन) प्र०—अत्र 'छन्दसीवनिपौ च वक्तव्यौ' अ० ५ २ १०६ अनेन रथ-शब्दान्मत्वर्थ ई-प्रत्यय १ ४४ २ बहवो रथा विद्यन्ते यस्य स (अग्नि =पावक) ३ ३ ६ बहुरथवान् (विद्वज्जन) ६ ५५ १ प्रशस्ता रथा रमणसाधनानि यानानि विद्यन्ते यस्य स (अग्नि =विद्वज्जन) १५ ४५ बहुप्रशसितरथ (अग्नि =विद्वज्जन) ६ ४८ ६ [रथप्राति० प्रशसाया नित्यसम्बन्धे वा मत्वर्थ इनि। 'रथीनाम्' प्रयोगे छान्दस दीर्घत्वम्। अथवा=रथप्राति० मत्वर्थे 'छन्दसीवनिपौ' वक्तव्यौ' अ० ५ २ १०६ वा० सूत्रेण ईकार प्रत्यय]

रथिनीः बहवो रमणसाधका रथा विद्यन्ते यासु ता (इष =सेना) प्र०—अत्र भूम्न्यर्थे इनि 'सुपा सुलुक्०' इति पूर्वसवर्णादेशश्च १ ६ ८ [रथप्राति० भूम्न्यर्थ इनि। तत स्त्रिया डीप्, तत शस पूर्वसवर्णदीर्घश्छान्दस।

रथियन्तीव आत्मनो रथिन इच्छन्तीव सेना १ १६६ ५ [रथिन्-शब्दाद् आत्मन इच्छायामर्थे क्यजन्ताच् छतरि डीपि रथियन्तीति रूपम्। रथियन्ती-इवपदयो समास]

रथिरम् यो रथिषु रमते तम् (राजानम्) ७ ७ ४ रथा रमणीयानि यानानि भवन्ति यस्मिँस्तम् (अग्नि= पावकम्) ३ २६ १ **रथिरः**=रथादियुक्त (इन्द्र =राजा) ३ ३१ २० प्रशस्ता रथा विद्यन्ते यस्य स (मनुष्य) ३ १ १७ ['रथिन्' इत्युपपदे रमु क्रीडायाम् (भ्वा०) धातोर् कर्त्तरि ड। अन्यत्र रथप्राति० प्रशसाया भूम्न्यर्थे वा मत्वर्थे 'मेधारथाभ्यामिरन्निरचौ' अ० ५ २ १०६ वा०सूत्रेण इरन्]

रथीतमम् बहवो रथा रमणाधिकरणा पृथिवी-सूर्यादयो लोका विद्यन्ते यस्मिन् स रथीश्वर सोऽतिशयितस्तम्। रथा प्रशस्ता रमणविजयहेतवो विमानादयो विद्यन्ते यस्य सोऽतिशयित शूरस्तम् (इन्द्रम्=परमात्मान वीरपुरुष वा) प्र०—'रथिन ईद्वक्तव्य' अ० ८ २ १७. इत्यत्र पठितेनाऽनेन वार्त्तिकेनेकारादेश १ ११ १ अतिशयेन प्रशस्तरथयुक्तम् (इन्द्र=परमैश्वर्यम्) १२ ५६ अतिशयेन रथी यस्तम् (इन्द्र=सभेशम्) १५ ६१ प्रशस्ता रथा सुखहेतव पदार्था विद्यन्ते यस्मिन् सोऽतिशयितस्तम् (इन्द्र= परमात्मानम्) १७ ६१ **रथीतमः**=अतिशयेन रथयुक्त (इन्द्र =सूर्येणेव राजा) ६ ५६ २ बहवो रथा विद्यन्ते यस्य सोऽतिशयित (राजा) ६ ४५ १५ [रथप्राति० मत्वर्थे 'छन्दसीवनिपौ' अ० ५ २ १०६ वा०सूत्रेण ईकारप्रत्यये रथी। ततोऽतिशायने तमप्। अथवा रथिन्प्राति० अतिशायने तमप्-प्रत्यये घसज्ञके परे 'ईद्रथिन' अ० ८ २ १७ वा० सूत्रेण रथिन ईकारादेश]

रथीतमा प्रशसितरथयुक्तौ (अश्विना=अध्यापकोपदेशकौ) १ १८८ २, प्रशस्ता रथा विद्यन्ते ययो सकाशात्तावतिशयितौ (अश्विनौ=अग्निजले) १ २२ २ [रथीतममिति व्याख्यातम्। ततो द्विवचनस्याकारादेशश्छान्दस]

रथीतरः अतिशयेन रथयुक्तो योद्धा (इन्द्र =सेनेश) १ ८४ ६ [रथीप्राति० अतिशायने तरप्। रथी=रथप्राति० मत्वर्थे 'छन्दसीवनिपौ वक्तव्याविं' ति ईकार]

रथीरिव प्रशसितो रथवान् यथा ५ ६१ १७ यथा सारथिस्तथा ३३ ४ प्रशस्तरथादियुक्त सेनेश इव ४ १५ २ यथा शत्रुभि सह बहुरथादिसेनाङ्गवान् योद्धा युध्यति तथा भा०—महारथिवत् १३.३७ [रथी-इवपदयो समास। रथी =रथप्राति० मत्वर्थे 'छन्दसीवनिपौ वक्तव्यौ' इति वा० सूत्रेण ईकार]

रथीव बहवो रथा विद्यन्ते यस्य तद्वत् (सारथि) ५.८३ ३ [रथी-इवपदयो समास। रथी=रथप्राति० मत्वर्थ ईप्रत्यय]

रथेचित्रः रथे रमणीये चित्राण्याश्चर्यरूपाणि चिह्नानि यस्य स (ग्रामणी) १५ १६ [रथ-चित्रपदयो समासे सप्तम्या अलुक्]

रथेशुभम् यो रथे शुम्भते तम् (शर्धं=बलम्) ५ ५६ ६ रमते गच्छति येन तस्मिन् विमानादियाने शोभनम् (शर्ध =बलम्) १.३७ १ [रथे सप्तम्यन्तोपपदे शुभ दीप्तौ (भ्वा०) शुभ शोभार्थे (तुदा०) धातोर्वा इगुपधलक्षण कर्त्तरि क। घञर्थे को वा भावे]

(विदुषो जनान्) प्र०—अत्र रमवानोरमुन् प्रत्यय. ततो मतुप्, तत इयमुनि 'विन्मतो०' इति मतुल्लोप 'टे' इति टिलोप. 'छान्दसो वर्णलोपो वा' इतीकारलोप. १ १२०.४.]

रम रमस्व प्र०—अत्राऽऽत्मनेपदे व्यत्ययेन परस्मैपदम् ६ ८ **रमताम्**=क्रीडतु २२ १६ **रमते**=क्रीडते २ ३८ २ **रमध्वम्**=रमण कुर्वन्तु प्र०—अत्र व्यत्यय. ३ २१. क्रीडध्वम् ३ ३३ ५ **रमस्व**=क्रीडस्व १३ ३५ रमता रमयतु वा ४ २२ **रमेथाम्**=अ०—अनुतिष्ठत ५ १७ [रमु क्रीडायाम् (भ्वा०) धातोर्लोट्। व्यत्ययेन परस्मैपदम्। अन्यत्र यथा प्राप्तात्मनेपदे लोट्]

रमय क्रीडयाऽऽनन्दय ५ ५२ १३. **रमणातु**=रमयतु प्र०—अत्राऽन्तर्गतो ण्यर्थो विकरणव्यत्ययश्च ४ २१ [रमु क्रीडायाम् (भ्वा०) धातोर्णिजन्तात्लोट्। अन्यत्र रमतेर्लोट्। विकरणव्यत्ययेन श्ना]

रम्भिणीव यथाऽऽरम्भिका गृहकार्येषु चतुरा स्त्री १ १६८ ३ [रभ राभस्ये (भ्वा०) धातोस्ताच्छील्ये णिन्यन्तात् ङीपि रम्भिणीति रूपम्। 'रभेरशब्लिटो.' अ० ७ १.६३ सूत्रेण नुम्। रम्भिणी-इवपदयो. समास]

रम्भी आरम्भी (पुरुषार्थी जन) २ १५ ६ [रभ राभस्ये (भ्वा०) धातोस्ताच्छील्ये णिनि। नुमागम]

रयिदौ श्रीप्रदौ (सभासेनेशौ) ३ ५४ १६ [रयि-इत्युपपदे दुदाञ् दाने (जु०) धातो क.]

रयिन्तमः अतिशयेन धनाढ्य (प्रजाजन.) ६ ४४ १. [रयिप्राप्ति० अतिशायने तमप्। नुडागमश्छान्दस]

रयिपतिः धनस्वामी (अग्नि=पावकवद्विद्वज्जन.) २ ६ ४. धनरक्षक (सोम=पदार्थसमूह) २ ४० ६ धनाना पालयिता (अग्नि=भौतिक) १.६० ४ श्रीशः (वेदविज्जन.) १.७२ १ **रयिपते**=धनस्वामिन् (इन्द्र=राजश्रीश्वर वा) ६ ३१ १. [रयि-पति-पदयो. समास]

रयिभिः चक्रवर्त्तिराज्यक्रियादिभि १ ६४.१० **रयिम्**=द्रव्यम् २ १५ ५ विद्याराज्यश्रियम् १ ६२ ८ चक्रवर्त्तिराज्यसिद्ध धनम् १ ३४ १२ ऐश्वर्यम १६ ६४ विद्यानुवर्णाद्युत्तम धनम् १ १ ३ प्रशस्तद्रव्यसमूहम् १ ७६.८ सम्पत्तिम् १५ ५६ धर्म-मोक्ष-विद्या-चक्रवर्त्तिराज्याऽऽरोग्यादिसिद्ध धनम् वे० भा० मं० १.१ ३. धर्मश्रियम् २० ५८ विद्यादि तथा सुवर्णादि धन को आर्याभि० १ ३, ऋ० १.१.१ ३. **रयिः**=निधिसमूह १ ७३ १ विद्यार्थी १८ १० द्रव्यरूप (अग्नि=अध्यापक) २.१ १२ द्रव्यसमूह १ ६६ १. **रयीणाम्**=राज्यश्रियादिधनानाम् १.६८.४. परमोत्तमाना चक्रवर्त्तिराज्यादिधनानाम् ३.१३. वर्त्तमाना पृथिव्यादिकार्यद्रव्याणाम् १ ६६.७. विद्याचक्रवर्त्तिराज्योत्पन्नश्रियाम् १० २०. धनैश्वर्यो के सं० वि० ६,१०.१२१ १०. [रयि=उदकनाम निघ० १ १२. धननाम निघ० २ १०. रयिरिति धननाम रातेर्दानकर्मण. नि० ४.१७. रयिरिति मनुष्या (उपासते) श० १०.५२.२०. वीर्यं वै रयि श० १३.४ २.१३ पुष्टं वै रयिः श० २.३.४.१३. पशवो वै रयि तै० १ ४ ४ ६ एष वै रयिर्वैश्वानर. श० १०.६.१.५ रयिं सोमो रयिपतिर्ददातु तै० २.८.१.६]

रयिमान् प्रशस्ता रययो धनानि विद्यन्ते यस्मिन् स (अग्नि.=भौतिक. पावक) प्र०—अत्र प्रशंसार्थे मतुप् 'रयिरिति धननामसु पठितम्' निघ० २.१०, ३ ४०. विद्याविज्ञानधनयुक्त (अग्नि.=उपदेशको विद्वज्जन.) १२ ५६ [रयि प्राप्ति० प्रशंसाया मतुप्]

रयिमिव यथोत्तमा श्रियम् १ ६० १ [रयिम्-इव पदयो समास.]

रयिवतः बहुधनवत (जनान्) ६ ६८ ५ **रयिवः**=प्रशस्ता रययो विद्यन्ते यस्य तत्सम्बुद्धौ (सेनेश) प्र०—अत्र 'छन्दसीर' इति मस्य व १८ ७४ बहुधनयुक्त (विद्वान्राजन्) ६ ५ ७. श्रीमन् (जिज्ञासो) १ १२६ ७ [रयिप्राप्ति० मतुप् प्रशंसायामर्थे भूम्न्यर्थे वा। 'छन्दसीर' इति मतुपो मस्य वकार। 'रयिव' प्रयोगे सम्बुद्धौ मतुवसो रु सम्बुद्धौ छन्दसि' अ० ८ ३.१. सूत्रेण रुत्वम्]

रयिवित् द्रव्यवेत्ता (विद्वज्जन) ३ ७.३ पदार्थविद्यायुक्त (अलंविद्यो जन) २ १ ३ [रयि इत्युपपदे विद ज्ञाने (अदा०) धातो क्विप्]

रयिवृधः ये रयिं वर्धयन्ति ते (स्वपत्यानि=सुसन्ताना.) २७ २३ [रयि इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

रयिषाच ये रयिणा सह समवयन्ति ते (मनुष्या) १.१८० ६. [रयि इत्युपपदे षच समवाये (भ्वा०) धातो 'कर्मण्यण्' इत्यण्]

रयिषाट् यो रयिं द्रव्य सहते स (देव=जीवात्मा) १ ५८ ३ ['रयि' इत्युपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह' इति ण्वि]

रयिस्थानः रायस्तिष्ठन्ति यस्मिन् स (इन्द्र=सेनेश.) ६ ४७ ६ [रयि-स्थानपदयो समास। स्थानम्=ष्ठा गतिनिवृत्तौ (भ्वा०) धातोरधिकरणे ल्युट्]

शपो लुक् १.६१.११ रमन्ताम् ७.३९ ३ **रन्ते**=रमते ७ ३६ ३ [रमु क्रीडायाम् (भ्वा०) धातोर्लेट्। शपो लुक्। अन्यत्र लोट् लट् च। रन्त=अरमन्त नि० । १२ ४३]

रन्तयः रंतु रमन्ते ते (वायव) ७ १८ १० **रन्ति**=रमणम् २२ १९ **रन्ते**=हे रमणीये (पत्नि) ८ ४३ [रमु क्रीटायाम् (भ्वा०) धातो' क्तिच्। 'न क्तिनि दीर्घश्च' अ० ६ ४.३९ सूत्रेण दीर्घस्यानुनासिकलोपस्य च निषेध। क्तिनि वा छान्दसो दीर्घानुनासिकलोपयोर्निषेध]

रन्धय निवारय ३.५३ १० ताडय ६ ५३ ७ हिंसय ६ १९ १२ हिन्धि १ १३२.४ संराधय प० वि०, समूलेन विनाशय, मूलसहित नष्ट कर दीजिये आर्याभि० १ १४, **रन्धयत्**=संराध्नोति २ १९ ६ **रन्धयस्व**=ताडयस्व ३ ३० १६. **रन्धयः**=हिंसय ६.४३ १ **रन्धि**=नाशय ४ २२ ९ **रन्धीः**=संराध्नुहि, प्र०—अत्राडभाव. १.१७४ २ हिंस्या ४.१६ १३ [रध हिंसासंराध्यो (दिवा०) धातोर्णिजन्तात्लोट्। 'रधिजभोरचि' अ० ७ १ ६१ सूत्रेण नुम्। अन्यत्र लड् लुट् लोट् च। रन्धय=रध्यति। नि० ६ ३२]

रन्धयन् हिंसन् (विद्वान् राजा) १ ५० १३ सेनया सामादिभिर्वा हिंसयन् (इन्द्र =सभाभेनाशालान्यायाधीश) १.५१ ९ [रध हिंसासंराध्यो. (दिवा०) धातोर्णिजन्ताच्छतृ। 'रधिजभोरचि' नि नुम्]

रन्धिम् वशीकरणम् ७ १८ १८ [रध हिंसासंराध्यो (दिवा०) धातोरौणा० इन्]

रपत् व्यक्त वदेत् १ १७४ ७ [रप व्यक्तायां वाचि (भ्वा०) धातोर्लेट्]

रपसा पापेन ७.५० १ अपराधेन ७ ५० २ **रपः**=वाणेन्द्रियचाञ्चल्यजन्यमपराधम् ३५ ११ पापफलमिव रोगान्य दुःखम् १२.८४. **रपांसि**=हिंसनानि ६ ३१.३ व्यक्तोपदेशप्रकाशकानि शोभनानि वचनानि १.६९.४ पापानि दुःखप्रदानि १.३४ ११ [रप =रपो रिप्रमिति पापनामनी भवत नि० ४ २१]

रप्शते विशेषेण राजते ४ ४५ १

रप्शद्भूधभिः व्यक्तशब्दघर्षं २ ३४ ५ [रप्शत्-ऊधन्-पदयो समास। रप्शत्=रप व्यक्तायां वाचि (भ्वा०) धातो शतृ। पपो शस्य न लोपश्छान्दसत्वात्। ऊधन्=ऊध उदकनाम भवति उपोत्तदकमिति वा। स्नेहानुप्रदानात्सामान्याद् वाभिरभूप ऊधो नि० ६ १९]

रप्सुदा ये रभ् रप दम्भे (मही=द्यावापृथिव्यौ) ३३ १९ सुरूपप्रदे (पृथिवीसूर्यौ) ३३ ३१. [रूपपदे दुदाञ् दाने (जु०) धातो. क. । ततो द्विवचनस्याकारादेश.]

रभध्वम् प्रारम्भं कुरुत ३५.१० युद्धारम्भं कुरुत १७ ३८. **रभन्ते**=प्रवर्तयन्ति ३ २९ १३ **रभस्व**=आरम्भं कुरु २७ ५ **रभामहे**=आरम्भं कुर्याम ६ ५७ ५ **रभे**=आरम्भं कुर्वे ४ ९ **रभेमहि**=आरम्भं कुर्वीमहि १ ५३ ४. शत्रुभिस्सह युध्येमहि आरम्भं कुर्याम १ ५३ ५. [रभ राभस्ये (भ्वा०) धातोर्लोट्। अन्यत्र लट्, लिट् च]

रभसम् वेगम् ६ ६१ १. वेगवन्तम् (वायुम्) ११.२३ वेगवन्तम् (अग्निम्) २.१० ४ **रभसः**=वेगम् प्र०—अत्र द्वितीयार्थे प्रथमा २१ ३८ **रभसाय**=वेगयुक्ताय (कर्तव्य—विज्ञानाय) १ १६६.१ [रभ राभस्ये (भ्वा०) धातो 'अत्यविचमि०' उ० ३ ११७ सूत्रेणासन्। व्यचिष्ठमन्नं रभस इत्यवकाशवन्तमन्नैरन्नाद दीप्यमानमित्येतत् श० ६ ३ ३ १९]

रभः महान् (शिशु) १ १४५ ३ [रभस - महन्नाम निघ० ३ ३ रभ राभस्ये (भ्वा०) धातोरौणा० असुन्]

रभसा रोगरहितानि (वपूंषि=रूपवन्ति शरीराणि ३.१ ८ [रभसमिति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

रभसानः वेगवान् (राजा) ६ ३ ८ [रभ राभस्ये (भ्वा०) धातोर्बाहु० औणा० असानच्]

रभसासः वेगवन्त (क्षुरा =धर्म्यशब्दा) १ १६६ १० [रभसमिति व्याख्यातम्। ततो जसोऽसुक्]

रभसाः वेगयुक्ता (सुनाम =सुशिक्षिता भृत्या) १ ८२ ६ [रभसमिति व्याख्यातम्। ततो जस्]

रभस्वतः कार्यारम्भं कुर्वत आलस्यरहितान् पुरुषार्थिन (मनुष्यान्) ९ १ ६ [रभस्प्राप्ति० मनुवन्नाद् द्वितीयाबहुवचनम्]

रभिष्ठाः अतिशयेनाऽरब्धार (मनुष्या) ५ ५८ ५ [रभ राभस्ये (भ्वा०) धातो तृजन्तादतिशायन इष्ठन्। इष्ठन्-प्रत्यये तृचो लोप]

रभीयस इव अतिशयेनाऽरब्धस्येव २१ ४६ [रभीयस -इवपदयोर्लोप । रभीयस =रभ राभस्ये (भ्वा०) +तृच्+ईयसुन्+टस्]

रभोदाम् रभसो वेगयुक्तस्यस्य दातारम् (इन्द्र=राज्य पतिम्) ६ २० ५ [रभस उपपदे दुदाञ् दाने (जु०) धातो कर्तरि क्विप्]

रम्यम् सौधादिगेन रभस्विन सता श्रोतुरुपागतेन

ये रश्मयस्ते विश्वे देवा श० ४ ३ १ २६ एते वै विश्वे देवा रश्मय श० २ ३ १ ७ एते वै रश्मयो विश्वे देवा श० १२ ४ ४ ६ तस्य (सूर्यस्य) ये रश्मयस्ते सुकृत श० १ ६ ३ १० रश्मय एव हिंकार जै० उ० १ ३३ ६ रश्मयो वाव होत्रा गो० उ० ६ ६ रश्मयो वै दिवाकीर्त्यानि (सामानि) तै० १ २ ४ २ रश्मयो वा एत आदित्यस्य यद् दिवाकीर्त्यानि ता० ४ ६ १३ तस्य (सूर्यस्य) ये रश्मयस्ते ते देवा मरीचिपा श० ४ १ १ १५ मासा वै रश्मयो मरुतो रश्मय ता० १४.१२ ६ ये ते मारुता (पुरोडाशा) रश्मयस्ते श० ६ ३ १ २५ अन्न रश्मि श० ८ ५ ३ ३ प्राणा रश्मय तै० ३ २ ५ २ एते वा ऽउत्पवितारो यत् सूर्यस्य रश्मय श० १ १ ३ ६ एते वै पवितारो यत्सूर्यरय रश्मय श० ३ १ ३ २२ तद् यदेकैकस्य रश्मेर्द्वौ द्वौ वर्णौ भवत गो० उ० ६ ६ (सविता) रश्मिभिर्वर्षं (ममदधात्) गो० पू० १ ३६]

रश्मीरिव यथा किरणान् तया १ १४१ ११. [रश्मी -इवपदयो समास]

रश्मीवतीम् प्रशस्तविद्याप्रकाशयुक्ताम् (स्त्रीम्) १५ ६३ [रश्मिप्राति०प्रशसायामर्थे मतुवन्तान् ङीप्]

रश्मेव किरणवद् रज्जुवद् वा ६ ६७ १ [रश्मा-इव-पदयो समास । रश्मा=रश्मिप्राति० 'सुपा सुलुक्०' सूत्रेण डादेश]

रसम् आनन्दम् १६ ८३ विद्याऽऽनन्दम् १६ ७६ सारभूतम् १६ ७५ सारम् ६ ३ विद्यौषधिफलम् १.७१ ५ म्वादिद्रुमोपध्यादिभ्यो निष्पन्न सारम् १ १०५ २ **रसस्य**=भुक्ताऽन्नत उत्पन्नस्य शरीरवर्द्धकस्य १ ३७ ५ **रसः**=सर्वद्रव्यसार १८ ६ आनन्दवर्धक स्नेहरूप (भा०—होमादिना शुद्धजलम्) ३६ १५ दुग्ध-घृतादि ऋ० भू० १०४, अथर्व० १२ ५ १० मधुरादि ३६ ४ वीर्य धातु ६ ३ **रसात्**=जिह्वाविषयात् ३१ १७ **रसानाम्**=मधुरादीनाम् १ १८७ ५ **रसाय**=रसभूताय विज्ञानानन्दप्रापणाय २ ३१ **रसाः**=स्वाद्वन्नानि षड्विधा १ १८७ ४ **रसेन**=स्वाभाविकेन रसगुणेन सह १ २३.२३. सारेणाऽऽर्द्रेणाऽऽनन्दकारकेण १ २१ [रस =वाङ्नाम निघ० १ ११ उदकनाम निघ० १ १२ अन्ननाम निघ० २ ७ रस आस्वादनस्नेहनयो (चुरा०) धातोरच् । घञर्थे को वा । रसो वै मधु श० ६ ४ ३ २ अपो देवा मधुमतीरगृह्णन्नित्यपो देवा रसवतीरगृह्णन्नित्येवैतदाह (मधु=रस) श० ५ ३ ४ ३ स्वधायै त्वेति रसाय त्वेत्येवैतदाह (स्वधा=रस) श० ५ ४ ३ ७ रसो वा आप श० ३ ३ ३ १८]

रसवत् बहुरसयुक्तम् (पय =दुग्धम्) ५ ४४ १३ [रसप्राति० भूम्न्यर्थे मतुप्]

रसवान् महौषधिप्रशस्तरसप्रचुर (ओषधिसार) ६ ४७ १ [रसप्राति० प्रशसायामर्थे मतुप्]

रसा रसाऽऽनन्दप्रदा जना प्र०—अत्र 'सुपा सुलुक्०' इति डादेश ३३ २१ [रसप्राति० जस स्थाने डादेश-श्छान्दस]

रसा रसादिगुणयुक्ता (मही=वाग् भूमिर्वा) ५ ४१.१५ पृथिवी ५ ५३ ६ **रसाम्**=प्रशस्त रस जल विद्यते यस्या ताम् (नदीम्) प्र०—रस इत्युदकनाम निघ० १ १२. अर्शादित्वान्मत्वर्थीयोऽच्प्रत्यय १ ११२ १२. [रसप्राति० मत्वर्थेऽर्शादित्वादच् । तत स्त्रिया टाप् । रसा-नदी रसते. शब्दकर्मण नि० ११ २५]

रसाशिरः यो रसानश्नाति स (सूर्य) ३ ४८ १ [रसोपपदे अश भोजने (क्रया०) धातो 'अशेर्नित्' उ० १ ५२ सूत्रेण किरच्]

रसिनः प्रशस्तो रसो विद्यते यस्मिँस्तस्य (पदार्थस्य) १६ ३५ [रसप्राति० प्रशसायामर्थे इनि]

रहसूरिव या रह एकान्ते सूते सा (जननी) २ २६ १. [रहसू -इवपदयो समास । रहसू =रहम्-उपपदे पूङ् प्राणिगर्भविमोचने (अदा०) धातो क्विप् । पूर्वपदस्य सकारस्य लोपश्छान्दस]

रहूगणाः रहवोऽधर्मत्यागिनो गणा सेविता यैस्ते (विद्वासो जना) १ ७८ ५ [रहु-गणपदयो समास । पूर्वपदस्य दीर्घ सहितायाम् । रहु =रह त्यागे (भ्वा०) धातोर् उ]

रंसु रमणीयम् (अम्बम्=उदकम्) २ ४५ [रमु क्रीडायाम् (भ्वा०) धातोर्बाहु० श्रीणा० सु प्रत्यय । रमु धातोर्वा विच् । ततो रम्प्राति० सप्तमी । रमु रमणीयेषु नि० ६ १७]

रंसुजिह्वः रमणीयवाक् (अग्नि =राजा) ४ १.८ [रसु-जिह्वपदयो समास]

रँहमाणः गच्छन् (भौतिकोऽग्नि) २२ १८ [रहि गतौ (भ्वा०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

रंहयन्तः गमयन्त (मरुत =वायव) १ ८५ ५ [रहि गतौ (भ्वा०) धातोर्णिजन्ताच्छतृ]

रह्यः गमयितु योग्य (रथ) २ १८ १. [रहि गतौ

रयीयन् आत्मनो रयिमिच्छन् (राजा) ३.६२ २. [रयिशब्दाद् आत्मन इच्छायामर्थे क्यजन्ताच्छतृ]

रय्या धनेन १२ १० विद्याश्रिया १२.७ प्राश्रीपिकया (धारया=सस्कृतया वाचा) १२.४१ **रय्यै**=लक्ष्म्यै १४ २२ श्रियै ९ २२ [रयिप्राति० तृतीया। अन्यत्र चतुर्थी]

ररक्ष रक्षेत् १ १४७ ३ पालय ४ ४.१३ [रक्ष पालने (भ्वा०) धातोर्लिट्]

ररते राति ददाति ५ ७७ ४ **रराथाम्**=दद्यातम् प्र०—अत्र रा-धातोर्लोटि 'बहुल छन्दसि' इति शप श्लु व्यत्ययेनात्मनेपदञ्च १.११७ २३. **रराथे**=रातम् ६.७२ ५ **ररिम**=दद्याम ३ ३५.१ रमेमहि २ ५ ७ दद्म प्र०—अत्र रा दाने लिट् १८ ७५ **ररिषे**=प्रयच्छसि २ १ ५ **ररीथाः**=दद्या ६ ४४ ११ **ररीध्वम्**=दत्त ५ ८३ ६ **ररे**=दद्याम् ७ ३९.६ ददामि ७ ५९ ५ [रा दाने (अदा०) धातोर्लट्। 'बहुल छन्दसी' ति शप श्लु। व्यत्ययेनात्मनेपदञ्च। अन्यत्र लिट्]

ररप्शे अतिरिणक्ति ६ १८ १२. स्तूयते प्र०—अत्र रभ-धातोर्लिटि सस्य श ४ २० ५ [रभ राभस्ये (भ्वा०) धातोर्लिटि थास्। तस्य स्थाने 'से' इत्यादेश। तस्य सस्य शकारो वर्णव्यत्ययेन। 'अत एकहल्मध्ये०' इत्येत्वमभ्यासलोपश्च छान्दसत्वान्न भवति]

रराटम् परिभापित जगत् ५ २१ **रराटे**=ललाटे २४ १]

रराणता रममाणेन मनसा १ १७१ १]

रराणः विद्या ददत् सन् (देव =विद्वज्जन) ७ २ ९ रममाण (विद्वान् जन) ३ ४ ९ दाता (वैद्य) ५ ४१ ८ ददन् (इन्द्र =ऐश्वर्यधर्त्ता सज्जन) ६ २३ ७ दाता सन् (अग्नि =विद्वज्जन) ३ १ २२ भृश दाता (अग्नि = विद्वान्) ४ २ १० **रराणाः**=ददमाना (ऋभव =मेधाविजना) ४ ३६ ८ [रा दाने (अदा०) धातो शानच्। व्यत्ययेनात्मनेपदम्। 'बहुल छन्दसी' ति शप श्लु। लिट कानज्वा। रराण रातिरभ्यस्त नि० २ १२]

रराणा दातारौ (अश्विनौ=सभासेनेशौ) १ १७७ २४ [रा दाने (अदा०)+लिट कानच्। ततो द्विवचनस्याकारादेश]

रराणा सुष्ठु-दात्री (सुलक्षणा विदुषी स्त्री) २ ३२.५ ['रराणा' इति व्याख्यातम्। तत. स्त्रिया टाप्]

रराद विलिखति वर्षयति ७ ४९ १ [रद विलेखने (भ्वा०) धातोर्लिट्]

ररिवान् दाता (विद्वान् पुरुष) १.१३८.४ [रा दाने (अदा०) धातोर्लिट क्वसु]

रवथः महाशब्दकारी (वज्र =शस्त्राऽस्त्रसमूह) १ १०० १३ [रु शब्दे (अदा०) धातो 'शीङ् शपिरुगमि०' उ० ३ ११३. सूत्रेण अथ प्रत्यय.]

रवम् शब्दम् ३ ३१.६ **रवः**=ध्वनि १ ९४ १० **रवेण**=विद्युत शब्देन १ ६२ ४ स्तुतिसमूहेन १ ७१ २ [रु शब्दे (अदा०) धातो 'ऋदोरव्' इत्यप्]

रशनया रश्मिना २१ ४६ **रशना**=व्याप्नुवती (रज्जु) २५ ३७ व्यापिका (रज्जु) १ १६२ ८ **रशनाम्**=स्नेहिका क्रियाम् १.१६३ २ रशनावत् किरणगतिम् २९ १३ अङ्गुलिम् २८ ३३ व्यापिका रज्जुमिव २२ २. **रशनाः**=रज्जव २९ १६ आस्वादनीया (गोप =रक्षका जना) १ १६३ ५ [अशूङ् व्याप्तौ (स्वा०) धातो 'अशेरश् च' उ० २ ७५ सूत्रेण युच् धातोरशादेशश्च। स्त्रिया टाप्। रशना अङ्गुलिनाम निघ० २ ५ ऊर्ग् वै रशना तै० स० ६ ३ ४ ५ ओषधयो रशना काठ० ३४ १५]

रश्मयः रज्जव किरणा वा २९ ४२ **रश्मये**=शोधनाय ३८ ६ **रश्मिना**=किरणसमूहेन १५ ६ **रश्मिभिः**=प्रकाशकैर्गुणैः किरणैर्वा १ ३१ अन्त प्रकाशकैर्गुणै १ ३१ प्रकाशैर्गमनागमनै ४ ४ सूर्यकिरणै सह १ १९ ८ **रश्मिम्**=प्रकाशम् ५ ७ ३ सूर्यप्रकाशम् ४ २२ ८ **रश्मिः**=येनाऽश्नाति स (व्यवहार) प्र०—अत्र 'अश भोजने' धातोर्बाहुलकान् मि प्रत्ययो रशादेशश्च उ० ४ ४६, १८ १९ किरणो दीप्ति ३३ ७४ प्रकाशक प्रकाशमयो वा (सूर्य =जगदीश्वरो विद्वान् जीवो वा) २ ४६ ज्योति १ ३५ ७ **रश्मीन्**=विद्याविज्ञाननेजासि १ १०९ ३ अश्वनियमनार्था रज्जू १० २२ **रश्मे**=रश्मिवद्वर्त्तमान (विद्वज्जन) ५ ६९ ५ [अशूङ् व्याप्तौ (स्वा०) धातो 'अश्नोतेरश् च' उ० ४ ४६ सूत्रेण मि प्रत्ययो रशादेशश्च। अश भोजने (क्र्या०) धातोर्वा बाहु० औणा० मि रशादेशश्च। रश्मय रश्मिनाम निघ० १ ५ रश्मि = यमनात् नि० २ १५ अथ य कपाले रसो लिप्त आसीत्ते रश्मयोऽभवन् श० ६ १ २ ३ युक्ता ह्यस्य (इन्द्रस्य) हरय शता दशेति। सहस्र ह्यैत आदित्यस्य रश्मय जै० उ० १ ४४ ५ अभीशवो वै रश्मय श० ५ ४ ३ १४ रश्मयो ह्यस्य (सूर्यस्य) विश्वे देवा श० ३ ९ २ ६ तस्य (सूर्यस्य)

सुराध्यत्' अ० ४ १.१३७. सूत्रेणापत्ये यत्। 'राज्ञोऽपत्ये जातिग्रहणम्' अ० ४ १ १३७ वा०सूत्रेण जाती यत्। 'राजेरन्य' उ० ३ १०० सूत्रेणान्य प्रत्ययो वा। चतुरक्षर प्रजापतिश्चतुरक्षरो राजन्य. श० ५ १.५.१४. तरमाद् बाहुवीर्यौ (राजन्य) बाहुभ्या हि सृष्ट ता० ६ १ ८ क्षत्र राजन्य ऐ० ८ ६ श० १३ १ ५ ३ क्षत्रस्य वा ऽएतद्रूप यद्राजन्य श० १३ १.५ ३ ओज क्षत्र वीर्य राजन्य। ऐ० ८ २ वृषा वै राजन्य ता० ६ १० ६. युद्ध वै राजन्यस्य वीर्यम् श० १३ १ ५.६ युद्ध वै राजन्यस्य तै० ३ ६.१४.४. तस्माद् राजन्यस्य पञ्चदश स्तोमस्त्रिष्टुप् छन्द इन्द्रो देवता ग्रीष्म ऋतु ता० ६ १ ८ त्रिष्टुप् छन्दा वै राजन्य. तै० १ १ ६ ६ आनुष्टुभो राजन्य तै० १ ८.८.२ ता० १८ ८ १४ ऐन्द्रो वै राजन्य· तै० ३ ८ २३ २. ऐन्द्रो राजन्य ता० १५ ४ ८ औदुम्बरेण राजन्य अभिषिञ्चति तै० १ ७ ८ ७. पार्थरश्म राजन्याय ब्रह्मसाम कुर्वीत ता० १३ ४ १८ तस्मादपि (दीक्षित) राजन्य वा वैश्य वा ब्राह्मण इत्येव ब्रूयात् ब्रह्मणो हि जायते यो यज्ञाज् जायते श० ३ २ १ ४०]

राजपुत्रा राजा पुत्रो यस्या सा (अदिति·=मातेव) २ २७ ७ [राजन्-पुत्रपदयो समास]

राजयातै प्रकाशमान हो स० वि० १८३, अथर्व० ६ १० ६८ १ [राजृ दीप्तौ (भ्वा०) धातोर्णिजन्ताल् लेट्]

राजस्वः राजवीरप्रसविका (अध्यापिका परिचारिका अध्येत्र्यश्च स्त्रिय) १० ६ राजजनिका. (अप = जलानि प्राणान् वा) १० १ [राजसूप्राति० प्रथमाबहुवचनम्। राजसू =राजोपपदे षूङ् प्राणिगर्भविमोचने (अदा०) धातो कर्त्तरि क्विप्]

राजाना देदीप्यमानावध्यापकोपदेशकौ २ ३६ ६ प्रकाशमानौ सभासेनेशौ १ १३६ ४ विद्यादिशुभगुणौ प्रकाशमानौ राजप्रजाजनौ ३ ३८ ६ राजमानौ (सभासेनेशौ, राजामात्यौ) ५ ६२ ६ [राजन्प्राति० द्विवचनस्याकारादेशश्छान्दस]

राजासन्द्यै राजान सीदन्ति यस्या तस्यै (वेद्यै = यज्ञस्थल्यै) १६ १६ [राजासन्दीप्राति० चतुर्थी। राजासन्दी=राजन्-आसन्दीपदयो समास]

राजेव यथा सभाध्यक्ष १ ६७ १ प्रकाशमानो नृप इव ६ ४.४ [राजा-इवपदयो समास]

राज्ञी राजमाना (स्त्री) १४ १३ राजमाना प्रधाना भा०—उत्तमा (स्त्री) १५ १० [राजन्प्राति० स्त्रिया ङीप्]

राट् यो राजते स (राजा) १ १२१ ३ या राजते सा (नीति·) १८.२८. प्रकाशमाना (स्त्री) १४ २२ राजमाना (स्त्री) १४.२१. [राजृ दीप्तौ (भ्वा०) धातो 'सत्सूद्विषद्रुह०' अ० ३.२ ६१ सूत्रेण क्विप्]

राततमा अतिशयेन दातव्यानि (ब्रह्माणि धनानि अन्नानि वा) १ ६१ १ [राततमप्राति० शेर्लोपश्छन्दसि। राततम =रा दाने (अदा०)+क्त+अतिशायने तमप्]

रातम् दत्तम् (औषधम्) २५ ३४ [रा दाने (अदा०) धातो क्त]

रातहविषे दत्तदानव्याय (जनाय=सत्पुरुषाय) २ ३४ ८ [रात-हविष्पदयो समास]

रातहव्यस्य दत्तदानव्यस्य (विदुषो जनस्य) ५.६६ ३

रातहव्यः=प्रदत्तहवि (राजा) १ ११८ ११ रातानि दत्तानि हव्यानि येन स (सत्पति.=सभाध्यक्षो जन) १.५४ ७ रात गृहीतु योग्य हव्य दत्त येन स (अग्नि = विद्युत्) ४ ७ ७ [रात-हव्यपदयो समास। रातम्=रा दाने (अदा०) धातो क्त। हव्यम्=हु दानादानयो (जु०) धातोर्यत्]

रातहव्या रात दत्त हव्य गृहीतु योग्य वस्तु याभ्या तौ (इन्द्रावरुणा=विद्युज्जले) ७ ३५ १ दातव्यदानौ (इन्द्राविष्णू=वायुसूर्यौ) ६ ६६ ६ रात दत्त हव्यमादातव्य सुख याभ्यान्ते (इन्द्रावरुणा=विद्युज्जले) ३६ ११ [रात-हव्यमिति व्याख्यातम्। ततो द्विवचनस्याकारादेश.]

रातहव्याम् रातानि हव्यानि दातव्यानि दानानि यया ताम् (मही=वाचम्) ५ ४३ ६ [रात-हव्यपदयो समासे स्त्रिया टाप्]

राता दत्तानि (हवीषि=अन्नादीनि) ३ ३५ ७ [रातप्राति० शेर्लोपश्छन्दसि। रातम्=रा दाने (अदा०)+क्त]

रातानि दत्तानि (ऐश्वर्याणि) १ १३१ १ [रातप्राति० नपु० प्रथमाबहुवचनम्]

रातिनी बहवो राता दातारो विद्यन्ते यस्या सा (घृताची=रात्रि) ४ ६ ३ **रातिनीम्**=रातानि दत्तानि विद्यन्ते यस्या ताम् (घृताची=रात्रिम्) ३ १६ २ [रातप्राति० भूम्न्यर्थ इनि। तत स्त्रिया ङीप्। रातम्=रा दाने (अदा०) धातो क्त]

रातिम् दातारम् (वह्निम्) १ ६०.१ विद्यादान-

(भ्वा०) धातोर्ण्यत्]

रह्या गमनीयानि (उत्तमस्थानानि) ४.१३ [रहि गतौ (भ्वा०) धातोर्ण्यत्। तत शेर्लोपश्छन्दसि]

रंह्यै गत्यै अ०—युद्धभूमिषु गत्यै यथार्थतया युद्धकर्मणि प्रवृत्त्यै ६१८. [रहि गतौ (भ्वा०) धातो 'इक् कृष्यादिभ्य' इति वा० सूत्रेण इक्। ततश्चतुर्थी। रहिः=गति नि० १०.२९]

राका राति ददाति सुख या सा (सरस्वती=वाक्) प्र०—राकेति पदनाम निघ० ५.५, ५४२.१२ पौर्णमासीवद्वर्त्तमाना (विदुषी स्त्री) २३२८ **राकाम्**=पूर्णप्रकाशयुक्तेन चन्द्रेण युक्ता रात्रीम् २३२४ **राके**=सुखप्रदे रात्रिरिव (विदुषि स्त्रि) २३२.५ [रा दाने (अदा०) धातो 'कृदाधारार्चिकलिभ्य क' उ० ३४० सूत्रेण क। तत. स्त्रिया टाप्। राका पदनाम निघ० ५५ अनुमती राकेति देवपत्न्याविति नैरुक्ता, पौर्णमास्याविति याज्ञिका, या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राकेति विज्ञायते नि० ११ ३०. राका रातेर्दानकर्मण नि० ११३० योत्तरा (पौर्णमासी) सा राका ऐ० ७११. प० ४६ गो० उ० ११० योपा सा राका ऐ० ३४८ या राका सा त्रिष्टुप् ऐ० ३४७]

राजति प्रकाशते ११४३४ प्रकाशयति प्र०—अत्राऽन्तर्भावितो ण्यर्थ १३१२ **राजथः**=प्रकाशेते ५३८३ प्रकाशेथे ५६३२ **राजसि**=प्रकाशयसि ११४४६ प्रकाशसे ११८८१ **राजामि**=प्रकाशे ४४२.२ [राजृ दीप्तौ (भ्वा०) धातोर्नट्। राजति ऐश्वर्यकर्मा निघ० २२१]

राजन् प्रकाशमान (राजपुरुष) १२९६ सभापते ६२२ विद्याविनयाभ्या प्रकाशमान (नृप) ६४६६ सत्यप्रकाशक (राजपुरुष) २२७१७ सर्वाधिपते (परमेश्वर विद्वन् वा) १९१४ सब ओर से प्रकाशयुक्त (सन्यासिन्) स० वि० १९५, ९११३४ **राजनि**=राजसभायाम् ११०८७ **राजभ्यः**=न्यायप्रकाशकेभ्य सभासद्भ्य २२७१२ न्यायाधीशेभ्य ११३९७ नृपेभ्य ३४५४. **राजसु**=क्षत्रियेषु राजपुत्रेषु १८४८ राजाओ मे स० प्र० १८३, अथर्व० ६१०९८१ **राजा**=यो राजते प्रकाशते स (वरुण=जलसमूह सूर्यलोको वा) प्र०—अत्र 'कनिन्युवृषितक्षि०' उ० ११५६ अनेन कनिन्प्रत्यय १२४७ शरीरात्ममनोभिस्तेजस्वी (नृप) २१४ सर्वत्र विद्याधर्मसुशिक्षाप्रकाशक (अधिष्ठाता) १०.१८. प्रशस्तगुणकर्मस्वभावै प्रकाशमान (सभेश्वरो गृहपतिर्वा) ८.२३ सर्वप्रकाशक (जगदीश्वर) ४५०७. अधिष्ठाता (परमात्मा) २३३ सर्वाध्यक्षो विद्याध्यक्षो रोगनाशकगुणप्रकाशको वा (परमेश्वर ओपधिराजो वा) १९१५ न्यायविनयाभ्या प्रकाशमान (परमात्मा) ७४९४ सर्वेषा न्यायकर्त्ता (परमेश्वर) ६१५१३ देदीप्यमान (प्रेरको जन) १९७२ प्रकाशमानो राजन्य १२.९८. न्यायविनयाभ्या राजमान (नृप) ११७४१ विराजमान (ईश्वर) स० वि० ५, २३३ न्यायाधीश सर्वाधिपतिरीश्वर प्रकाशमानो विद्युदग्नि. १९८१ **राजानम्**=राजानमिव सूर्यम् ६८४ प्राण जीव वा १२३.१४ **राजान**=क्षात्रधर्मयुक्ता वीरा १२८० **राजानौ**=प्रकाशमानौ सूर्याचन्द्रमसाविव सभासेनेशौ ६६२९ **राज्ञः**=सर्वस्य जगतोऽधिपतेर्विद्याप्रकाशवतो वा (परमेश्वरस्य विदुषो वा) १९१३ **राज्ञा**=प्रधानेन १२९६ **राज्ञाम्**=धार्मिकाणा राजाधिराजाना मध्ये २७५ **राज्ञे**=न्यायविनयविद्यागुणैर्देदीप्यमानाय (राजपुरुषाय) १५३१० [राजृ दीप्तौ (भ्वा०) धातो 'कनिन् युवृषितक्षि०' उ० ११५६ सूत्रेण कनिन्। राजा राजते नि० २३ स राजसूयेनेष्ट्वा राजेति नामाधत्त गो० पू० ५८ राजा वै राजसूयेनेष्ट्वा भवति श० ५११११२ राज्ञ एव राजसूयम् श० ५११११२ यो वै राजा ब्राह्मणादवलीयानमित्रेभ्यो वै स बलीयान् भवति श० ५४४१५ तस्माद्राजा बाहुबली भावुक श० १३२२.५ तस्माद् राजोरुबली भावुक श० १३२२८ राजानो वै राष्ट्रभृतस्ते हि राष्ट्राणि बिभ्रति श० ९४११ नाऽराजकस्य युद्धमस्ति तै० १.५९१ तद् यथा महाराज पुरस्तात् सेनानीकानि प्रत्युह्याभय पन्थानमन्वियात् कौ० ५५ राजा महिमा तै० ३९१०१ श० १३२.११२. तस्माद् राजा दण्डच श० ५४४७ एतद्ध वै सजन यद् राजा जै० २.१८३. यद् राजा करोति तद् विट् करोति मै० ११०१३]

राजन्तम् प्रकाशमानम् (जगदीश्वर भौतिकमग्नि वा) ३२३ [राजृ दीप्तौ (भ्वा०) धातो शतृ]

राजन्ती प्रकाशमाने (रोदसी=सूर्यभूमी) ६७०२ [राजृ दीप्तौ (भ्वा०) धातो शत्रन्तान् ङीप्। ततो द्विवचनस्य पूर्वसवर्णदीर्घ]

राजन्यः राजपुत्र वीर २२२२ क्षत्रिय (राजपुत्र) स० प्र० ११४, ३१११ भा०—योऽधिकवीर्यो बाहुवत् कार्यसाधक स क्षत्रिय ३१११ [राजन्प्राति० 'राजश्व-

कार्यरूपस्य धनस्य प्र०—अत्र शेषत्वात्कर्मणि षष्ठी १.८१ ६ समृद्धस्य (राय =धनस्य) ७ २८ ५ **राधसा**=राध्नुवन्ति संसिद्धि प्राप्नुवन्ति येन तेन (चन्द्रेण=सुवर्णेन) १ १३५ ४ **राधसे**=राध्नुवन्ति संसेधयन्ति सुखानि येन तस्मै धनाय १ १७ ७ संसिद्धिकराय धनाय ३ ४१ ६ संसिद्धाय धनाय १ ८१ ८ धनैश्वर्याय ४ २४ १ **राधः**=द्रव्यम् ५ ३६ १ राध्नुवन्ति सुखानि येन तद् विद्यासुवर्णादिधनम् १ १० ७ संसिद्धिकर धनम् १ १२१ ५ विद्या-राज्यसिद्ध धनम् १ ५७ १ सुखसाधन धनम् १५ ३४ **राधांसि**=समृद्धिकराणि धनानि ७ १५ ११ **राधोभिः**=धनैः ६ ६० ३ [राध संसिद्धौ (स्वा०) धातोरौणा० असुन्। राध = धननाम निघ० २ १० राधसा धनेन नि० ११.२४]

राधसो राधसः धनस्य धनस्य ६ २७ ३ [राधस पदस्य वीप्साया द्वित्वम्]

राधोगूर्त्ताः धनवर्द्धिन्य एव (पत्नी =विद्वत्त्रिय) ६ ३४ [राधस्-गूर्त्तापदयो समास। गूर्त्ता=प्राति० स्त्रिया टाप्। गूर्त्त =गुर्वी उद्यमने (भ्वा०) धातो क्त]

राधोदेयाय धन दातु योग्याय व्यवहाराय ४ ५१.३. [राधस्-देयपदयो समास। देयम् दा+यत्]

राध्यताम् संसेध्यताम् १ ५ सम्यक् सिद्ध क्रियताम् ऋ० भू० ६६, १ ५ सम्यक् सिद्ध करे आर्याभि० २ ४७, १ ५ [राध संसिद्धौ (स्वा०) धातो कर्मणि लोट्]

राध्यम् राद्धु संसाद्धु योग्यम् (कर्म्म) १.११६ ११ [राध संसिद्धौ (स्वा०) धातोर्ण्यत्]

राध्यः संगोधितु योग्य (यज्ञ =ब्रह्मचर्याग्य) १ १५६.१. [राध संसिद्धौ (स्वा०) धातोर्ण्यत्]

राध्या सुखानि साधयितुमर्हाणि (वस्तूनि) २ २४ १० [राध्यमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

राध्यानि संसाधनीयानि (द्रव्याणि) ४ ११ ३ [राध संसिद्धौ (स्वा०) धातोर्ण्यत्। तत प्रथमाबहु० रूपम्]

राध्यासम् संसाधयेयम् ३७ ३ सम्यक् सिद्धो भवेयम् २२ ४ [राध संसिद्धौ (स्वा०) धातोर्लिङ्]

रान्द्रचा रान्द्रचाणि रन्तु योग्यानि (आचरणानि) ६ २३ ६ [रान्द्रचप्राति० शेर्लोपश्छन्दसि। रान्द्रचम्=रमु क्रीडायाम् (भ्वा०) धातोर्बाहु० औणा० द्रचण्]

रामयत् राम रमण कारयितृ (शव) १ ५६ ३ [रमु क्रीडायाम् (भ्वा०) धातोर्णिजन्ताच्छतृ]

रामयः आनन्देन क्रीडय प्र०—अत्र 'अन्येषामपि०' इति दीर्घ १ १२१ १३ **रामयन्ति**=रमयन्ति ७ ५६ १६ [रमु क्रीडायाम् (भ्वा०) धातोर्णिजन्ताल्लोट्। 'वा छन्दसी' ति सिपो हिर्न भवति। अन्यत्र लट्]

रामीः आरामप्रदा रात्री २ ३४ १२ [रमु क्रीडायाम् (भ्वा०) धातोर्निरूपपदादण्यण्। तत स्त्रिया ङीप्]

राम्याणाम् रात्रीणाम् ७.६ २ रमणीयानाम् (विद्यावाचा जनानाम्) ३ ३४ ३. रमयन्ति आनन्दयन्ति तेषाम् (विदुषा जनानाम्) ३३.२६ **राम्यासु**=रात्रिषु ६ ६५ १ **राम्याः**=रात्री २ २ ८ [राम्या रात्रिनाम निघ० १ ७]

राय रासु धनेषु साधो (गृहस्थजन) ७ ५५ ३ [रा-प्राति० साध्वर्थे यत्। तत सम्बुद्धौ रूपम्। रा=रा दाने (अदा०) धातोर्घञ्। क्विप् कर्मणि वा]

रायतः शब्दयत (दुष्टान् जनान्) १ १८२ ४ [रै शब्दे (भ्वा०) धातो शतृ]

रायसि रा इवाचरसि ७ ५५ ४ शब्दयसि ७ ५५ ३ [रै शब्दे (भ्वा०) धातोर्लट्। राप्राति० वा क्यजन्तात्लट्]

रायस्कामः रायो धनस्य काम इच्छा यस्य स (विद्वान् जन) यो धनानि कामयते स (प्रजाजन) ७ ३२ ३ धनमीप्सु. (विद्वज्जन) १ ७८.२ [राय =कामपदयो समासे षष्ठ्या अलुक्]

रायस्पोषदे यो रायो विद्याधनसमूहस्य योष पुष्टिं ददाति तस्मै (हवन-कर्मणे) ५ १ धनस्य पुष्टिप्रदाय (सभापतये राज्ञे) प्र०—अत्र 'सुपा सुलुक्०' इति ङे स्थाने 'शे' इत्यादेश ६ ३२ [रायस्-पोषपदयो समासे षष्ठ्या अलुक्। पोषद =पोषोपपदे डुदाञ् दाने (जु०) धातो क। चतुर्थ्या एकवचनस्य स्थाने 'सुपा सुलुक्०' इति शे आदेश]

रायस्पोषम् उत्तमाना धनाना भोगम् अ०—बहुशुभगुणै पोषम् ३ २० **रायस्पोषः**=या बहुगुणभोगेन पुष्टय अ०—बहुगुणसमूहयुक्ता पदार्था ३ २० **रायस्पोषाय**=विज्ञानादिधनस्य पुष्टये १३ १ रायो विद्यासुवर्णादिधनस्य पोषाय पुष्यन्ति यस्मिँस्तस्मै ३.६३ **रायस्पोषेण**=चक्रवर्तिराज्यलक्ष्म्या ऋ० भू० २६८, अथर्व० १६ ७ ७ [रायस्पोषपदयो समासे षष्ठ्या अलुक्। राय =रैप्राति० षष्ठ्या एकवचनम्। भूमा वै रायस्पोष श० ३ ५ २ १२]

रायस्पोषवनि रायो धनस्य पोषो दृढता तस्या संविभाजिनम् (सभाध्यक्षम्) ६ ३ यथा रायो धनसमूहस्य पोष पुष्टिं वनन्ति सेवन्ते यस्मात्तथा (परमविद्वांसम्) ५ २७ [रायस्-पोष-वनिपदाना समास। पूर्वपदस्य षष्ठ्या अलुक्। वनि =वन संभक्तौ (भ्वा० धातो 'छन्दसि वनसनरक्षिमथाम्' अ० ३.२ २७ सूत्रेण इन्]

क्रियाम् २ १ १६ धनम् १ १६९४ **रातौ**=सुपात्रेभ्यो दाने ७ १.२५ [रा दाने [अदा०) धातो. स्त्रिया 'मन्त्रे वृषेषपच०' अ० ३ ३ ९६ सूत्रेण क्तिन्, स चोदात्त । राति =दत्ति । नि० १२ १० इहैव रातय. सन्त्विती हैव नो धनानि सन्त्वित्येवैतदाह (रातय.=धनानि) श० १४.२ २ २६]

रातिः विद्यादानम् प्र०—अत्र 'मन्त्रे वृषेषपचमन-विदभूवीरा उदात्त' अ० ३ ३ ९६ अनेन भावे क्तिन् स चाऽन्तोदात्त. १ ८९ २. दानक्रिया ३ ३० ७ विद्यादिदानम् २५ १५. दत्ति १ ११७ १ सर्वेभ्य सुखदायक (गृहपति = गृहस्थो जन) ८.१७. या राति ददाति सा (स्त्री) १ १२२ ७ वेगादीना दानम् १ ३४ १

रातिषाचम् दानसम्बन्धिनम् (वाज=विज्ञानम्) ७ ३६.८ **रातिषाचः**=ये रातिं पचन्ते सम्वब्नन्ति ते (विद्वासो राजपुरुषा) ७ ३४ २२ या रातिं दान सचन्ते ता (आप =जलानि) ७ ३४ २३. ये रातिं विद्यादिदान सचन्ते ते (राजान) ७ ३५.११ दानकर्त्तार (आप्ता जना) ७ ४० ६ दान सेवमाना (विद्यार्थिजना) २ १ १३ दानस्य दातु (विद्वज्जनस्य) ७ ३८ ५ [राति इत्युपपदे पच समवाये (भ्वा०) धातो 'कर्मण्यण्' इत्यण्]

रात्रि रात्रि प्र०—अत्र लिङ्ग-व्यत्यय ३४ ३२ [रा दाने (अदा०) धातो 'राशदिभ्या त्रिप्' उ० ४ ६७ सूत्रेण त्रिप् । लिङ्गव्यत्ययेन नपुसकम्]

रात्रिः रात्रिम् प्र०—अत्र विभक्तिव्यत्यय ३८ १६ रात्रिवद्वर्त्तमान' प्रलय' २३ ५४ [रात्रिरिति व्याख्यातम्]

रोहणम् आरोहन्ति येन तत् (भा०—विद्याधनम्) १.५२.६ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो करणे ल्युट्]

रोहम् प्रादुर्भावम् १३ ५१ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्घञ्। स्वर्गो वै लोको रोह श० ७.५.२.३६]

रोहय सन्तानो से वद्धा स० वि० १७० वेदार्षे अथर्व० १४ २.३७ **रोहयत्**=उपरि स्थापितवान् १.७ ३ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्णिजन्ताल्लोट्। अन्यत्र लड् अटोऽभाव]

रोहांसि आरोहणानि ६ ७१ ५ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोरौणा० असुन्]

रोहिणीषु रोहणशीलासु (ओषधीषु) १ ६२ ६ **रोहिण्यः**=आरोढुमर्हा (व्यवय) २४ ५ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो. 'रुहेश्च' उ० २ ५५ सूत्रेण इनन् जातिवाचकत्वात् स्त्रिया डीप्। अथवा रुहधातोस्ताच्छील्ये णिनि । तत स्त्रिया डीप्। रोहिणी (नक्षत्रम्) सा (विराट्) तत ऊर्ध्वारोहत्। सो रोहिण्यभवत्। तद्रोहिण्यै रोहिणीत्वम् तै० १ १ १० ६ विराट् सृष्टा प्रजापते । ऊर्ध्वारोहद्रोहिणी । योनिरग्ने प्रतिष्ठिति तै० १ २ १ २७ प्रजापती रोहिण्यामग्निमसृजत त देवा रोहिण्यामादधत ततो वै ते सर्वान् रोहानरोहन् तद्रोहिण्यै रोहिणीत्वम् तै० १ १ २ २ ता अस्य (प्रजापते) प्रजा सृष्टा रुकरूपा उपलब्धास्तस्यू रोहिण्य इवैव तद्वै रोहिण्यै रोहिणीत्वम् श० २ १ २ ६ या (प्रजापतेर्दुहिता) रोहित् सा रोहिणी (अभूत्) ऐ० ३ ३३ प्रजापते रोहिणी तै० १ ५ १ १ रोहिणी देव्युदगात् पुरस्तात्" प्रजापतिं हविषा वर्धयन्ती तै० ३ १ १ २ इन्द्रस्य रोहिणी तै० १ ५ १ ४ आत्मा वै प्रजा पशवो रोहिणी श० ११.१.१ ७ यद् ब्राह्मण (ब्राह्मणनक्षत्रम्) एव रोहिणी। तस्मादेव तै० २ ७ ६ ४]

'नामन्मीमन्व्योमन्०' उ० ४ १५१ सूत्रेण मनिन्-प्रत्ययान्तो निपात्यते । लोम लुनातेर्वा लीयतेर्वा नि० ३ ५ लोमानि हृदये (श्रितानि) तै० ३.१० ८ ८ छन्दांसि वै लोमानि श० ६ ४ १ ६ ओषधिवनस्पतयो मे लोमसु श्रिता तै० ३ १० ८ ७ लोमैव हिंकार जै० उ० १ ३६.६ भरद्वाजस्य लोम (साम) भवति ता० १३ ११ ११ तदु (लोम-साम) दीर्घमित्याहु ता० १३ ११ १२ पशवो वै लोम (साम) ता० १३ ११ ११]

लोमशसक्थौ लोमानि विद्यन्ते यस्य तल्लोमश सक्थि ययोस्तौ (पशू) २४.१. [लोमश-सक्थिपदयो. समास । लोमश =लोमन्प्राति० मत्वर्थे 'लोमादिपामादि०' इति शः]

लोहम् सुवर्णम् प्र०—लोहमिति सुवर्णनाम निघ० १ २, १८ १३ [लोहम्=हिरण्यनाम निघ० १ २ रजतेन लोहम् (सन्दध्यात्) गो० पू० १ ४४ लोहेन सीसम् (सन्दध्यात्) गो० पू० १ १४ दिशो वै लोहमय्य (सूच्य) श० १३ २ १० ३]

लोहिताय रक्ताय हृदयस्थाय लोहितपिण्डाय ३९.१०

लोहितेन=शुद्धेन रक्तेन भा०—रुधिरेण ३९.९ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो 'रुहेरश्च लो वा' उ० ३.९४. सूत्रेण इतन् । रेफस्य च लकारादेश]

लोहिताहिः लोहितश्चासावहिश्च २४ ३१ [लोहित-अहिपदयो समास]

लोहितोर्णी लोहिता ऊर्णा यस्या सा (भा०—सूर्यगुणा पशू) २४ ४ [लोहिता-ऊर्णापदयो समासे मत्वर्थे 'छन्दसीवनिपौ' इति वा०सूत्रेण ईकार]

वक्तवे वक्तव्याय ७ ३१.५. [वच परिभाषणे (अदा०) धातोस्तुमर्थे तवेन्]

वक्तवानाम् वक्तु समुचिताना वाक्यानाम् ३ २६ ९. **वक्तवानि**=वक्तु योग्यानि (वचनानि) ६.९ २ [वच परिभाषणे (अदा०) धातोर्वाहु० औणा० त्वन्]

वक्मनि उपदेशे १ १३२.२ [वच परिभाषणे (अदा०) धातोर्वाहु० औणा० मनिन्]

वक्मराजसत्याः वक्मेषु वक्तृषु राजसु सत्यप्रतिपादका (महाविद्वज्जना) ६ ५१ १० [वक्मराज-सत्य-पदयो समास । वक्मराज =वक्मन्-राजन्पदयो समासे समासान्तट्टच् । वक्मन् इति व्याख्यातम्]

वक्म्यः वक्तु योग्य (सत्यो महिमा) १ १६७ ७.]

वक्वरी प्रशसिते (द्यावापृथिव्यौ) १.१४४ ६ [वच परिभाषणे (अदा०) धातोरौणा० वनिप् । बहुलवचनात् कुत्वम् । 'वनो र चे' ति ङीप् रेफश्च । द्विवचनस्य पूर्वसवर्ण-दीर्घश्छान्दस.]

वक्वरी वचन-शक्तिमती (कन्या) ६.२२.५. [वच परिभाषणे (अदा०) धातोर्वनिप् । ततः स्त्रिया 'वनो र चे' ति ङीप् रेफश्च]

वक्वा वक्ता (विद्वज्जन) १ १४१ ७ [वच परि-भाषणे (अदा०) धातोर्वाहु० औणा० वनिप् । बहुलवचनात् कुत्वम्]

वक्वाः वक्रा. (ध्वस्रा =ध्वसिका सेना) ४ १९ ७. [वच परिभाषणे (अदा०) धातोर्वाहु० औणा० वन्]

वक्षणा वहनेन ५.५२.१५. [वह प्रापणे (भ्वा०) धातोर्ल्युट् सुडागमश्छान्दसः । 'सुपा सुलुक्०' इति टास्थाने डादेश]

वक्षणानि प्रापकाणि (आचरणानि) ६ २३ ६ [वह प्रापणे (भ्वा०) धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट् । सुडागमश्छान्दस]

वक्षणाभ्यः वोढ्रीभ्यो नदीभ्य १ १३४ ४ वहमाना-भ्य. (नदीभ्य) १ १३४ ४ **वक्षणाः**=नदी २५ २८ वहन्ति जलानि यास्ता. (नद्य) १ ३२ १ [वक्षणा = नदीनाम निघ० १ १३ वक्षणप्राति० स्त्रिया टाप् । वक्ष-णम्=वह प्रापणे (भ्वा०) धातो कर्त्तरि 'कृत्यल्युटो बहुलमि' ति ल्युट् । सुडागमश्च छान्दस]

वक्षणेस्थाः या वाहने तिष्ठन्ति ता (रश्मय) ५ १९ ५. [वक्षणोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क । ततष्टाप् स्त्रियाम्]

वक्षत् वहेत् प्रापयेत् ६ २२ ७ प्रापयति २८ १६ **वक्षतः**=वहत प्र०—अत्र लिङर्थे लेट् १ १६ २ **वक्षति**= प्राप्ता भवतु १ १२९ ८ उच्यात् १.१२९ ८ प्राप्नोति प्रापयति वा १ १४ ९ **वक्षन्**=वहन्तु प्रापयन्तु १ १०४ २ **वक्षः**=प्राप्नुहि ५ ३३ २ **वक्षि**=वह ६ १५ १८. वहसि प्रापयसि ५ ४ ४ कामयसे प्राप्नोषि वा १७.८८ वदसि ३ १ १ प्रापय ३ ७ ९ आवह ५ ४३ १० उपदिशति १७ ८. **वक्ष्व**=प्रापय, वह ८ २६ [वह प्रापणे (भ्वा०) धातोर्लेटि सिपि च रूपम् । अन्यत्र लोटि विकरणव्यत्ययेन सिपि च रूपम् । वक्षि=वह नि० ८ ९]

वक्षथः रोष ७ ३३ ८ **वक्षथेन**=रोषेण ४ ५ १. [वक्ष रोषे (भ्वा०) धातोर्वाहु० औणा० अथ प्रत्यय]

वक्षस्सु उरस्सु १ १६६ १० हृदयदेशेषु ७ ५६ १३.

लयः लीयन्ते यस्मिन् स (विषयो विद्यादिगुणो वा) १८७ [लीङ् श्लेषणे (दिवा०) धातो 'एरच्' इत्यच्]

ललामगुम् येन न्यायेनेप्सा गच्छन्ति प्राप्नुवन्ति तम् अ०—न्यायम्, भा०—प्राप्तव्य सुखम् २३२९. [ललामोपपदे गम्लृ गतौ (भ्वा०) धातो 'डुप्रकरणे मितद्वादिभ्य उपसख्यानम्' अ० ३२१८ वा०सूत्रेण डु । ललाम = लल ईप्सायाम् (चुरा०) धातोर्वाहु० औणा० आमन्]

ललामीः शिरोवदुपरिभाग प्रशस्तो यस्या सा (अग्नेर्ज्वाला) ११००१६ ['ललाम इति पूर्वपदे व्याख्यातम् । तत प्रशसाया मत्वर्थे 'छन्दसीवनिपौ' इति वा०सूत्रेण ई प्रत्यय]

लाङ्गलम् सीरापश्चाद्भागे दार्ढ्याय सयोज्य काष्ठम् १२.७१ हलाऽवयव ४५७.४ [लगि गत्यर्थे (भ्वा०) धातो 'लङ्गेर्वृद्धिश्च' उ० १ १०८ सूत्रेण कल' प्रत्ययो वृद्धिश्च । लाङ्गल लङ्गतेर्लाङ्गूलवद्वा । लाङ्गल लगतेर्लङ्गतेर्लम्बतेर्वा नि० ६२६]

लाजाः प्रफुल्लिता व्रीहय १९१३ लाजै =प्रफुल्लितैरन्नै २१३२ भर्जितै (अन्नै) २१४२ [लाज भर्जने (भ्वा०) धातोर्घञ् । लाजा-लाजते नि० ६९. लाजा =आदित्याना वा एतद्रूप यल्लाजा' तै० ३८१४.४ नक्षत्राणा वा ऽएतद्रूप यल्लाजा श० १३२१५]

लाजीन् स्वस्वकक्षाया चलितान् (लोकान्) २३.८ [लजति गतिकर्मा (निघ० २१४) धातोर्वाहु० औणा० इण्प्रत्यये लाजि]

लिप्यते लिप्यमान होता है स० वि० १४५, ४०.२ [लिप उपदेहे (तुदा०) धातो कर्मणि लट्]

लेखीः लिखे ५४३ [लिख अक्षर विन्यासे (तुदा०) धातोर्लुङ् । अटोऽभावश्च]

लोकम् दृश्यमान भुवनसमूहम् १९३.६ द्रष्टव्यसुख लोक वा ६७३२ सर्वस्य द्रष्टारम् (ईश्वरम्) २०२६ दर्शनीयम् (भा०—विद्याप्रकाशम्) २३४३ द्रष्टु योग्यम् (राज्यम्) २३०६ द्रष्टव्यमानन्दम् भा०—ब्रह्म १८.५२ दर्शनसुखसङ्घात मोक्षपद वा १८५८ दर्शनमभ्युदय वा ६४७८ कर्मानुकूल सुखदु खप्रापकम् (लोकलोकान्तरम्) ३५२ सम्प्रेक्षितव्यम् (भा०—समावर्त्तनानन्तर स्वयवर (विवाहम्) १२.५४ आर्षं दर्शनम् १२४५ जीवात्मानम् ३४५५ द्रष्टव्य जन्मान्तरे लोकान्तर वा ७२०२ देखने योग्य वानप्रस्थाश्रम को स० वि० १८९, अथर्व० ९५१ **लोकः**=निवासस्थानम् ३३७११ लोक्यते सर्वैर्जनैर्लोकयति सर्वान् वा (ईश्वर) ऋ० भू० १६२, सभा दर्शन वा १९.४५ लोकनीय पुत्रपत्यादिसम्बन्धसुखकरो गृहाश्रम ८२६ राष्ट्र राज्यस्थानम् ६६. दर्शनीय (यम =परमेश्वर) ३५१ मनुष्यलोक अथर्व० १२५३, स० वि० १७५, **लोकात्**=स्थानादस्मद्दर्शनाद्वा २.३० **लोकान्**=द्रष्टव्यान् सृष्टिस्थान् भूगोलान् ३२१२ दर्शनीयान् (भूगोलान्) ९.३२. सर्वान् प्राणिन ऋ० भू० २३५, अथर्व० ११३५४ **लोकाय**=दर्शनाय सङ्घाताय वा ३०१३. **लोकाः**=न्यायदृष्ट्या समीक्षणीया (विद्वासो जना.) ६.१. **लोके**=द्रष्टव्ये स्थाने १५५० विज्ञातव्ये (देशे) १५११. दर्शने ३२९८ ससारे ३२१ द्रष्टव्य अपने स्वरूप मे स० वि० १९६, ९११३७ ज्ञान से देखने योग्य (ईश्वर) मे स० वि० १९६, ९११३७ **लोकेभ्यः**=सहतेभ्य (स्थानेभ्य) ३०१२ [लोकृ दर्शने (भ्वा०) धातोर्घञ् । छन्दासि वै सर्वे लोका जै० १३३२ त्रयो वाव लोका । मनुष्यलोक पितृलोको देवलोक इति श० १४४३२४. इमे वै लोका (पृथिवी, अन्तरिक्षम्, द्यौ) देवास्साध्या मै० ३७१० इमे वै लोका विश्वा सद्मानि श० ६७३.१० इमे वै लोका विष्णोर्विक्रमण विष्णोर्विक्रान्त विष्णो. क्रान्तम् श० ५४२६ इमे वै लोकास्सतनय. ऐ० ४१९ इमे वै लोका सरिरम् तै० ३.३१२ श० ७५२३४. इमे वै लोका सर्पास्ते हानेन सर्वेण सर्पन्ति यदिद किं च ७४१२५]

लोकसनि लोकान् सनति सम्भजति येन तत् (अपत्यम्) १९४८ [लोकोपपदे पण सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' अ० ३२२७ सूत्रेण इनि]

लोधम् लोब्धारम् (दुर्जनम्) प्र०—अत्र वर्णव्यत्ययेन भस्य ध ३५३२३ [लुभ विमोहने (तुदा०) धातो पचादिलक्षणोऽच् । भस्य धश्छान्दस]

लोपामुद्रा लोप एव आमुद्रा समन्तात्प्रत्ययकारिणी यस्या सा (स्त्री) ११७९.४ [लोप-आमुद्रापदयो समास]

लोपाशः वनचरपशुविशेष २४३६ [अर्यम्णो लोपाश काठ० ४७११]

लोप्याय लोपेषु छेदनेषु साधवे (पुरुषाय) १६४५ [लोप-प्राति० 'तत्र साधु ' इत्यर्थे यत् । लोप =लुप्लृ छेदने (तुदा०) धातोर्घञ्]

लोम अनुकूल वचनम् २३३६ **लोमभ्यः**=त्वगुपरिस्थेभ्यो वालेभ्य ३९१० नखादिभ्य ३९१०. **लोमानि**=रोमाणि १९८१, [लूञ् छेदने (क्रया०) धातो

धातो कर्मणि ज्ञानजन्तात् टाप् स्त्रियाम्। सम्प्रसारणाऽभावश्छान्दस]

वज्रदक्षिणम् वज्रा अविद्याच्छेदका दक्षिणा यस्मात्तम् (अध्यापकम्) ११०११ [वज्रा-दक्षिणापदयो समास]

वज्रबाहुम् वज्रा शस्त्राणि बाह्वोर्यस्य तम् (इन्द्र=सेनापतिम्) १७३८ वज्रवद्भुजम् (इन्द्र=शत्रुविदारक राजानम्) २०५४ शस्त्राऽस्त्रभुजम् (राजपुरुषम्) ४३६४ वज्र प्राणो बल बाहुर्यस्य तम् (राजानम्) ऋ० भू० २२४, अथर्व० ६१०६७३ **वज्रबाहुः**=वज्रमिव दृढौ बाहू यस्य स (इन्द्र=राजा) २०४८ वज्रो बाहौ यस्य स (इन्द्र=सूर्य) २०३६ वज्र शस्त्रसमूहो बाहौ यस्य स (इन्द्र=सभासेनापति) १३२१५ बाहुवत् किरणबल (इन्द्र=सूर्य) २१२१३ शस्त्रहस्त (राजा) ४२६४ बाहुरिव वज्र किरणसमूहो यस्य स (इन्द्र=सूर्यलोक) २१२१२ शस्त्रपाणि (राजपुरुष) ७१८१२ शस्त्रभुज (इन्द्र=राजा) ३३३६ **वज्रबाहू**=वज्रौ बलवीर्यौ बाहू ययोस्तौ (इन्द्राग्नी=अध्वेत्रध्यापकौ) ११०६७ **वज्रबाहो**=वज्रवदौपध बाहौ यस्य तत्सम्बुद्धौ (सद्वैद्य) २३३३ [वज्र-बाहुपदयो समास। वज्र इति व्याख्यास्यते]

वज्रभृत् यो वज्र शस्त्रास्त्र बिभर्त्ति स (इन्द्र=सेनाद्यधिपति) ११००१२ जो अच्छेद्य अर्थात् दुष्टो के छेदक सामर्थ्य से सर्वशिष्टहितकारक, दुष्टविनाशक न्याय को धारण कर रहा है वह (ईश्वर) आर्याभि० १३४, ऋ० १७१०१२ [वज्रोपपदे डुभृञ् धारणपोषणयो (जु०) धातो कर्त्तरि क्विप्]

वज्रम् शस्त्राऽस्त्रम् ४२२३ विद्युद्रूपम् ४२०६ छेदक शस्त्रम् २१६३ तापसमूह किरणसमूह वा १८४११ किरणस्वरूपम् ४१६७ शस्त्रसमूहम् १६११२ शस्त्रमिवाऽज्ञानच्छेदकमुपदेशकम् १५५५ स्वकिरणजन्य विद्युतम् ऋ० भू० २७३, ४२०६ तीव्र शस्त्रम् ११३०४ प्रकाशसमूहम् १५२७ मेघम् १५२८ दुष्टाना वज्रमिव दण्डप्रदम् (परमेश्वरम्) ११३१३ शत्रूणा बलच्छेदकमाग्नेयादिशस्त्रास्त्रसमूहम् १८३ कुलिशमिव (रथ=यानम्) २६५३ शस्त्रविशेषम् ६१७१० प्रहारम् ६४७२७ आज्ञापनम् १६३२ **वज्रस्य**=शस्त्रप्रहारस्य ५३२७ **वज्रः**=किरणनिपात २११११० किरणसमूह १८०.३ प्रहार शब्दो वा ६४७.२८ किरण इव शस्त्रसमूह ३३०६ विज्ञापक (राजा) १०२१ प्रापक. (राजा) १०२८ ऊर्ममसमूह १५७२. वज्र इव शत्रुच्छेदक (वीरसेनापति) ६५ **वज्रात्**=विद्युत्पातशब्दात् २११६ विद्युत्प्रहारात् ६.१७६ **वज्रेण**=शस्त्रास्त्रविद्याबलेन ८५३. तीव्रेण तेजसा १८०.५. प्रापणेन १८०१३ शस्त्रेणोपदेशेन ११३०७ विज्ञानेन २१५३ किरणाग्नेयेन वज्रेण २१५.६ शस्त्रसमूहेन तेजोवेगेन वा १.६११० गतिमता तेजसा १३३१३. [वज गतौ (भ्वा०) धातो 'ऋज्रेन्द्राग्रवज्रविप्र०' उ० २२८ सूत्रेण रन्। वज्र=वर्जयतीति सत नि० ३११ वृजी वर्जने (भ्वा०, रुधा०, चुरा०) धातोर्वा 'ऋज्रेन्द्राग्र०' सूत्रेण रन्-प्रत्ययान्तो निपात्यते। वज्रो वा ऽग्निः श० ३५.४२ वज्रो वै परशु श० ३६४.१० वज्र शास श० ३८१५ निवृद्वै वज्र कौ० ३२ वज्रो वा ऽआप. श० ११११७. तै० ३२४२ पञ्चदश (स्तोम.) वै वज्र. श० १३५.७ कौ० ७२ प० ३४. तै० २२७२ ता० २४२ वज्रो वै भान्त (यजु० १४२३.) वज्र पञ्चदश श० ८४१.१०. वज्रो वै स्फ्य तै० १७१०५ श० १.२५२० वज्रो वै शर. श० ३१३.१३. वज्रो यूप श० ३६४१६ वज्रो वा एष यद् यूप कौ० १०१. ऐ० २.१ प० ४.४ वज्रो वै यूपशकल श० ३८१५ वज्रो वै रथ तै० १३६१ श० ५१४३ वज्रो वै विकंकत श० ५२४१८ वज्रो वै पशव श० ६४४६ वज्रो वा ऽअश्व श० ४३४२७ वज्रो वै चक्रम् तै० १४४१०. वज्रो वै ग्रावा श० ११५६७ वज्रो वा ऽआज्यम् श० १४४४ वज्रो वै त्रिष्टुप् श० ७४२२४ वज्र एव वाक् ऐ० २२१ वाग्घि वज्र ऐ० ४१ वज्रो वै वषट्कार ऐ० ३८ कौ० ३५ श० १३३.१४ गो० उ० ३१५ वज्रो वा एष यद् वषट्कार ऐ० ३६ वज्रो वै हिंकार कौ० ३२ वज्रो वै महानाम्न्य (ऋच) प० ३११ वज्रो वै सामिधेन्य कौ० ३२ वज्रो वै वैश्वानरीयम् (सूक्तम्) ऐ० ३१४ वज्रो वै यौधाजयम् (साम) ता० ७५१२ शाक्वरो वज्र तै० २१५११ वज्रा वा ऽउपसद. श० १०२५२. वज्रो वै त्रिणव (स्तोभ) ता० ३१.२. आनुष्टुभो वा एष वज्रो यत् षोडशी (शस्त्रम्) कौ० १७१ वज्रो वा एष यत्षोडशी ऐ० ४१ वज्र षोडशी प० ३११. वज्रो वै षोडशी गो० उ० २१३ ता० १२१३१४ सवत्सरो वज्र श० ३.६४१६ सवत्सरो हि वज्र श० ३४.४१५ वीर्यं वज्र श० १३.५७ वीर्यं वै वज्र श० ७३.११६ वज्रो वा ऽओज श० ८४.१२०. अष्टाश्रिर्वै वज्र ऐ० २१ पुरो गुरुरिव हि वज्र ता०

हृदयेषु १ ६४.४ **वक्षः**=वक्षस्थलम् १ ९२.४. प्राप्त **वक्षांसि**=उरांसि १ १२३.१० [वच परिभाषणे (अदा०) धातो 'पचिवचिभ्या सुट् च' उ० ४.२२०. सूत्रेणासुन् सुट् च। वक्षो भासोऽभ्यूढमिदमपीतरद् वक्ष एतस्मादेवाभ्यूढं काये नि० ४.१६]

वक्षः प्राप्त वस्तु प्र०—वक्ष इति पदनामसु पठितम् निघ० ४ २, १.१२४.४. [वह प्रापणे (भ्वा०) धातोरौणा० स । लिङ्गव्यत्यय]

वक्ष्यः वोढ्रय (रश्मय) ५ १९ ५.

वक्ष्यन्तीव यथा वदिष्यन्ती विदुषी स्त्री तथा २९ ४० यथा कथयिष्यन्ती विदुषी स्त्री ६ ७५ ३ [वक्ष्यन्ती-इव-पदयो समास । वक्ष्यन्ती=वह प्रापणे (भ्वा०) धातोर्लृट. शतृप्रत्यये स्यविकरणे च रूपम्। तत स्त्रियां ङीप्]

वग्नुना वाण्या १.८४ ३. अ०—वेदवाचा ८ ३३ [वच परिभाषणे (अदा०) धातो 'वचेर्गश्च' उ० ३ ३३ सूत्रेण नु । गश्चान्तादेश । वग्नु वाङ्नाम निघ० १ ११]

वङ्कुतरा अतिशयेन कुटिलौ (अ०—शत्रूदासीनौ मनुष्यौ) १.५१.११ [वङ्कुप्राति० अतिशायने तरप्। ततो द्विवचनस्याकारादेश]

वङ्कुम् दुष्टशत्रून् प्रति कुटिलम् (सभाध्यक्षम्) १ ११४ ४ **वङ्कुः**=धनेच्छु (वणिक्=व्यापारी) ५ ४५ ६ **वङ्कू**=कुटिलौ शत्रूदासीनौ १.५१.११ [वकि कौटिल्ये (भ्वा०) धातोर्वाहु० औणा० उ]

वङ्क्रीः कुटिला गती २५ ४१ [वकि कौटिल्ये (भ्वा०) धातो 'वङ्क्रयादयश्च' उ० ४.६६ सूत्रेण क्रिन्]

वङ्गृदस्य यो वङ्गून् वक्रान् विषादीन् पदार्थान् व्यवहारान् ददात्युपदिशति वा तस्य दुष्टस्य १ ५३ ८ [वङ्गृ इत्युपपदे डुदान् दाने (जु०) धातो क । वङ्गृ=वगि गतौ (भ्वा०) धातोर्वाहु० औणा० ऋ]

वचसम् सर्वे स्तुत्या परिभाषित मनुष्यम् १ ११२ २ [वचस्प्राति० मत्वर्थेऽर्शआदित्वादच्]

वचसः वचनात् ५ १२ ४ वचनस्य ४.५ ८ **वचसा**=परिभाषणीयौ (वायुविद्युतौ) ६ ६२ ५ भाषणेन २ १८ ३ वेदोक्तन्यायोपदेशकवचनेन ९ ५ **वचसे**=गृहाश्रमवान्व्यवहाराय ८ ५ **वचः**=उपदेशकारक वेदवचनम् १ ५७ ४ विद्या-शिक्षा-सत्यप्रापक वचनम् १ ५४ ३ परिभाषणम् (वचनम्) ५ ८ वचसा प्र०—अत्र 'सुपा सुलुक्०' इति टालोप २.३१ ५. विद्यायुक्त स्तुतिसम्पादक वचनम् १ २६.१० **वचोभिः**=स्तुतिवाक्यैः १.१८७ ११. [वच परिभाषणे (अदा०) धातोरौणा० असुन्। वचः वचनानि नि० २ २७]

वचस्यते परिभाष्यते सर्वतः स्तूयते १.५५.४. [वचस्-शब्दाद् आचारे क्यङ्]

वचस्यया अतिशयितया प्रशसया ४ ३६ ६ **वचस्या**=वचसा वचनेन प्र०—अत्र 'सुपा सुलुक्०' इति सूत्रेण विभक्तेर्यादेश ३ ४ ४२ वचसि भवा (विभूति=ऐश्वर्यम्) ६ २१ १ वचनै सुसाध्या (जुह्वा=ग्रहणसाधनया क्रियया) २ १० ६. **वचस्याम्**=वचसि उदके भवाम् (क्रियाम्) २ ३५.१. [वचस्-शब्दादाचारे क्यङ्। तत 'अ-प्रत्ययाद्' इत्यप्रत्यये स्त्रिया टाप्। अन्यत्र वचस्प्राति० भवार्थे यत्। ततष्टाप्। वचस्या वचनेन नि० १२ १८]

वचस्यवे आत्मनो वच शास्त्रोपदेशमिच्छवे (जनाय) १.५१ १३ आत्मनो वच इच्छवे (विप्राय=मेधाविजनाय) १ १८२ ३ **वचस्युभिः**=आत्मनो वचनमिच्छुभि (जनै) ५ १४ ६ **वचस्युवम्**=आत्मनो वच इच्छन्तम् (शिल्पिनम्) २.१६ ७ [वचस्-पदादात्मन इच्छाया क्यजन्तात् 'क्याच्छन्दसि' सूत्रेण ताच्छील्य उ]

वचस्या वचसि साधूनि (प्रवचनानि) ६ ४९ ८. [वचस्प्राति० साध्वर्थे यत्। तत शेर्लोपश्छन्दसि]

वचोयुजा वचोभिर्युक्तौ (हरी=गमनधारणगुणौ) १ २० २ वाणीर्योजयितो (इन्द्रयो =वायुसूर्ययो.) प्र०—अत्र 'सुपा सुलुक्०' इति षष्ठीद्विवचनस्याऽऽकारादेश १ ७ २ यौ वचसा युङ्क्तस्तौ (हरी=अश्वौ) ६ २० ९ [वचम्-उपपदे युजिर् योगे (रुधा०) धातो कर्त्तरि क्विप्। ततो द्विवचनस्याकारादेशश्छान्दस]

वचोविदः विदितवेदितव्या (विद्वासो जना) १ ९१ ११. शास्त्रवित् (विद्वान् लोग) आर्याभि० १ ३६, ऋ० १.६ २१ ११ ['वचस्' उपपदे विद ज्ञाने (अदा०) धातो. कर्त्तरि क्विप्]

वच्यते उच्यते १ १४२ ४ **वच्यन्ताम्**=उच्यन्ताम् ३ ६ ३ **वच्यन्ते**=स्तुवन्ति प्र०—अत्र व्यत्ययेन श्यँश्च १ १८४ ३ उच्येरन् प्र०—'सम्प्रसारणाच्च' इत्यत्र 'वाच्छन्दसि' इत्यनुवृत्ते पूर्वरूपाऽभावाद्यणादेश १ ४६ ३. [वच परिभाषणे (अदा०) धातो कर्मणि लट्। अन्यत्र लोट्। 'वा छन्दसी' ति नियमेन पूर्वरूपाऽभावे यणादेश]

वच्यमाना उच्यमाना प्र०—अत्र 'वाच्छन्दसि' इति सम्प्रसारणाऽभाव ३ ३९ १ [वच परिभाषणे (अदा०)

जनाय) १६ २१ [वञ्चु प्रलम्भने (चुरा०) धातोर्णिचोऽभावे शत्रन्ताच्चतुर्थी]

वटूरिणा वेष्टितेन (पदा=पादेन) प्र०—अत्र वट वेष्टने इति धातोर्बाहुलकादौणादिक ऊरि प्रत्यय १.१३३ २ [वट वेष्टने (भ्वा०) धातोर्बाहु० औणा० ऊरि]

वणिक् व्यापारी, वैश्य ५ ४५ ६ **वणिजे**=व्यवहर्त्तुं शीलाय (मेधाविपुत्राय) १ ११२ ११ [वणिक्=पण्या नेनेक्ति नि० २ १७]

वतन्तः वनन्त सम्भजन्त (जना) प्र०—अत्र वर्णव्यत्ययेन नस्य त ७ ६० ६ [वन सम्भक्तौ (भ्वा०) धातो शतृ। वर्णव्यत्ययेन धातोर्नस्य त]

वतेम सम्भजेम ७ ३ १० [वन सम्भक्तौ (भ्वा०) धातोर्लिङ्। वर्णव्यत्ययेन धातोर्नस्य त]

वत्सतर्य्यः अतिशयेन वत्सा अल्पवयस. (गाव) २४ ५ ह्रस्वा वत्सा यासा ता (गाव) २४ १४ [वत्सप्राति० तनुत्वे द्योत्ये 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' अ० ५ ३ ९१ सूत्रेण ष्टरच्। तत स्त्रिया ङीप्]

वत्सम् वसन्ति भूतानि यस्मिँस्त ससार, वदन्ति सततमिति वत्सो बालस्त वा ३३ ५ महत्तत्त्वादिकम् ३ ५५ ४ जात ससारम् १ ९५ १ प्रसूत मनुष्यादिक ससारम् १ ११६४ १७ वत्सवद्वर्त्तमानोऽहोरात्र १ १४६ ३ सुखेषु निवासयन्त व्यक्तवाच प्रसिद्ध वेदचतुष्टयम् प्र०—अत्र 'वृतॄ०' उ० ३ ६१ इति सूत्रेणास्य सिद्धि १ ७२.२ वत्सवत्पालनीयम् (भा०—पृथिवीम्यपदार्थम्) ३ ५५ १३. स्वाऽपत्यम् १ ३८ ८ **वत्सस्य**=यो वदति तस्य (स्तोतु) ७ ४० **वत्सः**=स्वव्याप्त्या सर्वाऽऽच्छादक (कवि.=काल) १ ९५ ४. **वत्साय**=सन्तानाय १ १११.१ **वत्से**=अपत्ये १ ११६४ ५ **वत्सेन**=बालेन १.११० ८ वत्सवद्वर्त्तमानेन (कुमारेण=अकृतविवाहजनेन) २८ १३ [वद व्यक्तायां वाचि (भ्वा०) वस निवासे (अदा०) धातोर्वा 'वृतॄवदिवचि०' उ० सूत्रेण स। वत्सा वै दैव्या अध्वर्य्यव श० १ ८ १ २७ मन एव वत्स श० ११ ३ १ १ अयमेव वत्सो योऽय (वायु) पवते श० १२ ४ १ ११ अग्निर्ह वै ब्रह्मणो वत्स जै० उ० २ १३ १ वत्सा उ वै यज्ञपतिं वर्धन्ति यस्य ह्येते भूयिष्ठा भवन्ति स हि यज्ञपतिर्वर्धते श० १ ८ १ २८]

वत्समिव यथा गोर्वत्सम् ३ ३३ ३ [वत्सम्-इवपदयो समास]

वत्सरः वर्ष २७ ४५ **वत्सराय**=सामान्याय (सवत्सराय) ३०.१५. [वस निवासे (भ्वा०) धातो 'वसेश्च' उ० ३ ७१ सूत्रेण सरन्]

वत्सास. सद्यो जाता वत्सा. ७ ५६.१६ [वत्समिति व्याख्यातम्। ततो जसोऽमुक्]

वद सत्यमुपदिश ९ २८. वद वादय वा प्र०—अत्र पक्षेऽन्तर्गतो ण्यर्थ १ २८ ५ **वदत्**=वदेत् १ ११९ ९. बोला करो स० वि० १४१, अथर्व० ३ ३० ३. **वदत**=अध्यापयतोपदिशत वा ९.११ **वदतम्**=उपदिशत ५ १७ **वदति**=उपदिशति १ १३५.७ **वदन्ति**=उच्चारयन्ति १ १६४.४५ **वदः**=वदे २३ २५ **वदाति**=वदेत् ६ ९ २. **वदान्**=वदेयु १ ३७ ३ **वदामि**=उपदिशामि १ १०५ ७ **वदेम**=उपदिशेम ३४ ५८. अध्यापयेम २.३९ ८ [वद व्यक्तायां वाचि (भ्वा०) धातोर्लोट्। अन्यत्र लेट् लट् लिङ् च। वदनि गतिकर्मा निघ० २ १४. यद्वै वदति शसतीति वै तदाहु श० १ ८ २ १२]

वदन् उपदिशन् (इन्द्र=ऐश्वर्यवान्नर) ५ ३१.१२ उपदेश करता हुआ (सन्यासी) म० वि० १९५, ९.११३.४. **वदन्तः**=उच्चरन्त (शिल्पिन) १ १६१ ९ कहते हुए (गृहस्थादि मनुष्यो) स० वि० १४२, अथर्व० ३ ३०.५ [वद व्यक्तायां वाचि (भ्वा०) धातो शतृ]

वदामसि वदेम १६ ४ वदाम १ ८७ ५ [वद व्यक्तायां वाचि (भ्वा०) धातोर्लट्। 'इदन्तो मसि' रिति मस इदन्तता]

वद्या सत्यहितोपदेष्ट्री (अग्नि=विद्वज्जन) ६.१३ ६ यो वदति स. (अग्नि=ईश्वर) ६ ४ ४ [वद व्यक्तायां वाचि (भ्वा०) धातोर् मनिन्। इटोऽभावश्छान्दस]

वधत्रैः वधै ४ २८ ४. [हन हिंसागत्यो (अदा०) धातो 'अमिनक्षियजिवधिपतिभ्योऽत्रन्' उ० ३ १०५. सूत्रेणात्रन्। हन स्थाने वधादेशश्च निपात्यते]

वधनम् हननम् १ ५.१० ताडनम् २ ३०.३. [हन हिंसागत्यो (अदा०) धातोर्ल्युट्। 'बहुल सज्ञाछन्दसोरिति वक्तव्यम्' अ० २ ४ ५४ वा०सूत्रेण हन्तेर्वधादेश]

वधः वधम् प्र०—अत्र हन्तेर्बाहुलकादौणादिकेऽमुनि वधादेश १.३२ ९ नाश २ २१ ४ घ्नन्ति यस्मिन् स (राजव्यवहार.) ५ ३२ ३ वध्यन्ते शत्रवो यस्मात्तच्छस्त्रम् २.१९ ७ वज्र इव प्र०—वध इति वज्रनामसु पठितम् निघ० २ २०, १.१०१ ४ वध-साधनम् ४ २२ ९ हन्ति येन स (दण्ड) ७ ५६ १७ **वधाय**=विनाशाय ९ ३८

८.५.२ दक्षिणत उद्यामं हि वज्र श० ८.५.१.३. वज्रेणैवैतद्रक्षांसि नाष्ट्रा अपहन्ति श० ७.४.१.२४]

वज्रवाहः शस्त्राऽस्त्रविद्यावोढार (राज्यकर्माधिकारिजना) ६.४४.१६ [वज्रोपपदे वह प्रापणे (भ्वा०) धातो 'वहश्चे' ति ण्वि]

वज्रहस्त शस्त्राऽस्त्रपाणे (इन्द्र=शिल्पिजन) ६.४६.२ वज्रतुल्यानि शस्त्राणि हस्तयोर्यस्य तत्सम्बुद्धौ [इन्द्र=सभेश राजन्) १०.२२ शस्त्रास्त्रवाहो (राजन्) ५.३३.३. **वज्रहस्तम्**=शस्त्रास्त्रपाणिम् (इन्द्र=हृद्य पतिम्) ६.२२.५ **वज्रहस्तः**=किरणपाणि (इन्द्र = सूर्य) २.१६.२ वज्रा किरणा हस्ता यस्य स (सूर्य) २.१२.१३. वज्राणि शस्त्रास्त्राणि हस्ते यस्य स (देव = विद्वान् राजा) २८.३ वज्रो हस्तयोर्यस्य स (राजा) २६.१० शस्त्राऽस्त्रशासनपाणि (इन्द्र =सभेश) १.१७३.१० [वज्र-हस्तपदयो समास । वज्र इति व्याख्यातम्]

वज्रहस्ता वज्रहस्तौ वज्र विद्यारूप वीर्य हस्त इव ययोस्तौ (इन्द्राग्नी=उपदेश्योपदेष्टारौ) प्र०—वज्रो वै वीर्यम् श० ७.४.२.२४ अत्र 'सुपा सुलुक्०' इत्याकारादेश १.१०.६.८ [वज्र-हस्तपदयो समासे कृते द्विवचनस्याकारश्छान्दस]

वज्रासः शस्त्रकलासमूहा १.८०.८. [वज्रप्राति० जसोऽसुक्]

वज्रिन् वज्र सर्वदुःखनाशनो बहुविधो दृढो बोधो यस्याऽस्तीति तत्सम्बुद्धौ (सभाध्यक्ष) १.३०.१२ वज्रोऽविद्यानिवारक प्रशस्तो बोधो यस्य तत्सम्बुद्धौ (सभासेनाध्यक्ष) प्र०—अत्र वजेर्गत्यर्थाद् ज्ञानार्थे औणादिको रन्, तत प्रशसाया मतुबर्थे इनि १.३०.११ शस्त्रास्त्रभृत् (इन्द्र=राजन्) ६.२२.१० बहुशस्त्रास्त्रयुक्त (राजन्) ५.४०.३ शस्त्रास्त्रसम्पन्न (सभाध्यक्ष) १.६३.७ प्रशस्तो वज्र शस्त्रसमूहो विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) १.६३.५ प्रशसितशस्त्रास्त्र (राजन्) ४.१६.१ शस्त्रास्त्रधारिन् (राजन्) १.५७.६ शस्त्राऽस्त्रविन् (राजन्) ५.३६.५ प्रशस्तवज्रवन् (राजन्) ५.३२.२ **वज्रिणम्**=किरणवन्त जलवन्त वा (इन्द्र=सूर्य वायु वा) प्र०—वज्रो वै भान्त श० ८.२.४.१० अनेन प्रकाशरूपा किरणा गृह्यन्ते । वज्रो वा आप श० ७.४.२.४१, १.७.५ **वज्रिणः**=वज्र बहुविध शस्त्र विद्यते यस्य तस्य (राज्ञ) ३.४३.१ वज्रोऽस्त्र प्रशस्त वीर्यमस्यास्तीति तस्य (इन्द्रस्य=ईश्वरस्य) प्र०—अत्र भूमार्थे प्रशसार्थे च मतुप् वीर्यं वै वज्र । श० ७.४.२.१४, १.७.७. वर्तिन. (सर्वसभाध्यक्षस्य) ४०.८ **वज्रिणे**=धनुर्वेदविदे (इन्द्राय=राज्ञे) ३.५३.१३ वज्रो न्यायान्यो दण्डोऽस्यास्तीति तस्मै (इन्द्राय=ईश्वराय) प्र०—वज्रो वै दण्ड श० ३.१.५.३२, १.८.५ **वज्री**=प्रशस्तशस्त्राऽस्त्रयुक्त (वीरसेनेश) ५.३२.४ प्रशस्तशस्त्रविद्याशिक्षित (इन्द्र = सेनाधीश) २०.४६ वज्र प्रकाश प्राणो वाऽस्यास्तीति (सूर्य) ऋ० भू० २८३, १.३२.१. वज्रो दण्ड शासनार्थो यस्य स (इन्द्र =ईश्वर) १.१३०.३ वज्रा प्राप्तिच्छेदनहेतवो बहव शस्त्रसमूहा किरणा वा विद्यन्ते यस्य स (इन्द्र =सेनापति सूर्यो वा) प्र०—अत्र भूम्यर्थे इनि १.११.४ प्रशस्तो वज्र शत्रुच्छेदक शस्त्रसमूहो विद्यते यस्य स (इन्द्र =राजा) १.५२.५ वज्र सवत्सरस्तापो वाऽस्यास्तीति स (इन्द्र =सूर्यलोक) प्र०—सवत्सरो हि वज्र श० ३.३.५.१५, १.७.२ शस्त्रवाहु (राजकर्मचारी) ६.१८.६ प्रशस्तशस्त्रविद्याशिक्षक (सेनाधीश) २०.४६ सर्वपदार्थविच्छेदक किरणवानिव शत्रुच्छेदी (सेनापति) १.३२.१ [वज्र इति व्याख्यातम् । तत प्रशसाया भूम्न्यर्थे वा मत्वर्थे इनि । अश्वेन च रथेन च वज्री (इन्द्र) तै० स० ४.४.८.६]

वज्रिणा प्रशस्तशस्त्राऽस्त्रयुक्तौ (इन्द्राग्नी=वायुविद्युतौ) ६.५६.३ [वज्रप्राति० प्रशसायाम् इनन्ताद् द्विवचनस्याकारादेश]

वज्रिवः प्रशस्ता वज्रयो विज्ञानयुक्ता नीतयो विद्यन्तेऽस्य तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) प्र०—वज धातोरौणादिक इ' प्रत्ययो रडागमश्च ततो मतुप् च १.१२१.१४ प्रशस्तैशस्त्रास्त्रप्रयोगकुशल (इन्द्र=राजन्) ६.४५.१८ प्रशस्तशस्त्रास्त्रयुक्त (राजन्) ६.३८.४ [वज गतौ (भ्वा०) धातोर् इ 'प्रत्ययो रट् च । ततो वज्रिप्राति० प्रशसाया मतुवन्तात् सम्बुद्धौ 'मतुवसो रु०' इति रुत्वे रूपम्। वज्रिन्प्राति० वा 'छन्दसीवनिपौ च वक्तव्यौ' इति मत्वर्थे नानुकृष्टो व]

वञ्चति प्रलम्भने २३.२२ वञ्चिता भवति २३.२३ [वञ्चु गतौ (भ्वा०) धातोर्नन्द् । वञ्चु प्रलम्भने (तुदा०) धातोर्वा रट् । णिचोऽभाव वञ्चति गतिकर्मा निघ० २.१४]

वञ्चते छलेन परपदार्थानां हर्त्रे भा०—वञ्चते (प्रजाजनाय) १६.२१ कापट्येन वर्तमानाय (अधार्मिक-

वनधितिः वनाना धृति. १.१२१ ७ [वन-धितिपदयो समास । धिनि =दधाते. स्त्रिया क्तिन्]

वनपम् जङ्गल-रक्षकम् (पुरुषम्) ३० १६. [वनोपपदे पा रक्षणे (अदा०) धातो. कर्त्तरि क]

वनम् सम्भजनीय कारणवनम् १७ २० जङ्गलम् ५ ७८ ८ **वनस्य**=वननीयस्य समारम्य १.२४ ७ **वनानाम्**=सम्भजनीयाना पदार्थाना रश्मीना वा १ ७० २. **वनानि**=वनन्ति सम्भजन्ति सुखानि यैस्तानि ३ ५१ ५ भजनीयानि (दिनानि) १ १७१ ३ सूर्यकिरणानिव वनानि ७ ७ २ अरण्यानि १.६५ ४ **वने**=एकान्ते १ ५५ ४ **वनेषु**=सम्यग् विभाजकेषु किरणेषु १ ७०.५. वननीयेषु जङ्गलेषु ४ ७ १ रश्मिषु वृक्षसमूहेषु वा, प्र०—वनमिति रश्मिनामसु पठितम् निघ० १ ५, ४ ३१. [वन शब्दे (भ्वा०) वन सम्भक्तौ (भ्वा०) वनु याचने (तना०) धातोर्वा घञर्थे क । वनम् रश्मिनाम निघ० १.५ उदकनाम निघ० १ १२ वन वनोति. नि० ८.३ वनानाम्=रश्मीनाम् नि० १३ ७२]

वनर्गुः वनगामी (मृगः) ८ प्र०—अत्र वनोपपदादृजुधातोरौणादिक उ-प्रत्ययो बाहुलकात् कुत्वं च १.१४५.५. [वनोपपदे ऋज गतिस्थानार्जनोपार्जनेषु (भ्वा०) धातोर्बाहु० औणा० उ । बहुलवचनादेव च कुत्वम् । अथवा वनोपपदे गम्लृ गतौ (भ्वा०) धातोर्मितद्वादित्वाट् डु । रुडागमश्छान्दस । वनर्गु स्थेननाम निघं० ३ २४. वनर्गू वनगामिनौ नि० ३ १४]

वनर्पदः ये वनेषु रश्मिषु सीदन्ति ते (वायव = पवना) प्र०—अत्र 'बाच्छन्दसि' इति रुडागम ३३ १. ये वने सीदन्ति ते (वय =पक्षिण) २ ३१ १ [वनोपपदे पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्] रुडागमश्छान्दस]

वनवत् किरणवत् २ २६ १ वनेन जङ्गलेन तुल्यम् (रयिं=श्रियम्) २ २५ २ [वनप्राति० तुल्यार्थे वति । वनमिति रश्मिनाम निघ० १ ५]

वनवत् याचते ६ ३३ १ सम्भजते ५ ३७ २ सेवयसि ५ ३ ५ सम्भजसे ५ ३७ २ सविभाजयेत ५ ४४ ७ **वनवसे**=सम्भज ६ १६ १८ [वनु याचने (तना०) धातोर्नेटि अटागमे च रूपम् । अथवा 'व्यत्ययो बहुलम्' इति ट्टिविकरणता उ, शप च]

वनसदे यो वनेषु सीदति तस्मै भा०—अरण्यस्थाय (विद्वज्जनाय) १७ १२ [वनोपपदे पद्लृ विशरणगत्यवसादनेषु (भ्वा०) कर्त्तरि क्विप्]

वनस्पतयः वनस्य किरणसमूहस्येव न्यायस्य पालका (इन्द्रा =राजान) प्र०—वनमिति रश्मिनाम निघ० १ ५, ६.१२ अश्वत्थादय १४ ३१ वटादय ३६ १७ वनाना जङ्गलाना पालका (इन्द्रा =राजान) ६ १२ **वनस्पतये**= वनाना पालकायाऽश्वत्थप्रभृतये १० २३ **वनस्पतिम्**= वनाना पालकम् (प्रजादु खध्वसका मनुष्या) २१ ४० वनाना किरणाना पालक स्वामिन सूर्यम् २८ १० **वनस्पतिः**= सम्भक्तस्य पदार्थसमूहस्य जङ्गलस्य वा पालक श्रेष्ठतमो वा (परमेश्वर ओषधिराजो वा) १ ६१ ६ वनाना पालयिताऽग्निसज्ञक (ब्रह्म, सूर्य) ४ ११ अश्वत्थादि १३.२६. वनस्य वृक्षसमूहस्य पति पालक (आज्ञप्तः पुरुष.) २०.४५ रश्मिपालक (सूर्य) २१ ५६ वनस्य किरणसमूहस्य पालक सूर्य २८ २३ पिप्पलादि २१ ५८ वनाना मध्ये रक्षणीयो वटादिवृक्षसमूहो मेघो वा १ ६० ८ **वनस्पती**=काष्ठमयौ (भा०—मुसलोखलौ) १ २८.८. **वनस्पतीन्**=वटाश्वत्थादीन् ० ५.४२.१६ **वनस्पतीनाम्**=पिप्पल्यादीनाम् ६ ३६ **वनस्पते**=किरणाना रक्षक सूर्य इव वनादीना पालक विद्वन् राजन् २६ ५२ यो वनाना वृक्षौषध्यादिसमूहानामधिकवृष्टिहेतुत्वेन पालयिताऽस्ति सोऽपुष्पफलवान् (अ०—वनस्पति), प्र०—अपुष्पा फलवन्तो ये ते वनस्पतय स्मृता मनु० १ ४७, १ १३ ११ वनस्य सम्भजनीयस्य शास्त्रस्य पालक (जिज्ञासु-विद्वन्) २७.२१ वननीयस्य धनस्य रक्षक (पुरुषार्थिजन) ३ ८ ३ वनस्य रश्मिसमूहस्य पालक सूर्यस्तद्वद्वर्त्तमान (विद्वज्जन) ३ ८ १ वनाना विद्याप्रकाशकाना पति पालयिता तत्सम्बुद्धौ (अ०—विद्वज्जन) ४ १० [वन-पतिपदयो समासे 'पारस्करप्रभृतीनि च सज्ञायाम्' अ० ६ १ १५७ सूत्रेण सुडागम वनस्पति पदनाम निघ० ५ २ वनस्पति =वनाना पाता वा पालयिता वा नि० ८ ३ अग्निर्वै वनस्पति कौ० १० ६ प्राणो वनस्पति कौ० १२ ७ प्राणो वै वनस्पति ऐ० २ ४ स (वनस्पति) उ वै पयोभाजन कौ० १० ६ वनस्पतयो वै द्रु तै० १ ३.६ १ यदुग्रो देव ओषधयो वनस्पतयस्तेन कौ० ६ ५. भोज्य वा एतद् वनस्पतीना (यदुदुम्बर) ऐ० ७ ३२ अथो एव एते वनस्पतयो यदुदुम्बर श० ७ ५ १ १५ तेजो ह वा एतद् वनस्पतीना यद् बाह्या शकलम् तस्माद् यदा बाह्या शकलमपतक्ष्णुवन्त्यथ शुष्यन्ति श० ३ ७ १ ८ वनस्पतयो हि यज्ञिया, नहि मनुष्या यजेरन् यद् वनस्पतयो न स्यु श० ३ २ २ ६ सोमो वै वनस्पति मै० १ १० ६ श० ३ ८.३ ३३ वायुर्गोपा वै वनस्पतय मै० ३ ६ ४ ओषधयो

वधै =गोहिंस्राणा मारणोपायै १ १२१ ६. [हन हिंसागत्यो (अदा०) धातोरौणा०अमुन्-प्रत्यये बहुलवचनाद् वधादेश अथवा=हनधातो 'हनश्च वध.' अ० ३.३ ७६ सूत्रेणाप् वधादेशश्च वध बलनाम निघ० २ ६ वज्रनाम निघं० २ २०]

वधर्यन्तीम् भूमिम् १ १६१.६ [वृधु वृद्धौ (भ्वा० धातोर्णिजन्ताच्छत्रन्तात् स्त्रिया ङीप्]

वधस्नैः यानि वधेन स्नापयन्ति शस्त्राणि तै. १ १६५ ६. वधेन शोधकैर्भृत्यैर्न्यायाधीशै ७ ६ ५ ये वधेन स्नान्ति पवित्रा भवन्ति तै (क्षुध्वैर्मनुष्यै.) ५ ४१.१३. [वधोपपदे प्णा शौचे (अदा०) धातो क]

वधिषः हन्या ६ १७ १. **वधिष्टम्**=हन्यातम् ४ ४. **वधीत्**=हन्ति ४.१७ ३ नाशयतु, प्र०—अत्र लोडर्थे लुडन्तर्गतो ण्यर्थश्च १ ३८ ६ हन्यात् २ ४२.२ **वधीम्**=हन्मि १ १६५ ८ **वधीः**=हिन्धि प्र०—अत्र लोडर्थे लुङडभावश्च १ ३३ ४ हन्या ६ ३३ ३ हसि ४ ३०.८. हिंस्या १६ १५ दूरे प्रक्षिप प० वि० । नष्ट करी आर्याभि० १ १६, ऋ० १ ८ ६ ७ वध कर आर्याभि० १ ४६, ऋ० १ ७ १६ ८ वियोजय प० वि० । हिंसा अर्थात् ताडना कर स० प्र० ४३६, १६ १५ हिंसय प० वि० । **वधेत्**=हन्यात् १० ८ **वध्यासम्**=हन्याम् १ २६ [हन हिंसागत्यो. (अदा०) धातोर्लुङ् 'लुङि च' इति हन्तेर्वधादेश । अन्यत्र लिङ्]

वधूमन्तः प्रशस्ता वध्वो विद्यन्ते येषान्ते (योद्धृजना) ६ २७ ८ प्रशस्ता वध्व स्त्रियो विद्यन्ते येषु ते (रथास = यानानि) १ १२६ ३ [वधू-प्राति० प्रशसाया मत्वर्थे मतुप्]

वधूमन्ता प्रशस्ते वध्वौ विद्येते ययोस्तौ (रथौ) ७ १८ २२ [वधूप्राति० प्रशसाया मतुप् । ततो द्विवचनस्याकारादेश]

वधूमिव स्त्री के समान स० वि० १६६, अथर्व० ६ २ ३ २४ [वधूम्-इवपदयो. समास.]

वधूयुरिव यथाऽऽत्मनो वधूमिच्छु (जन) ३ ५२ ३ पतिरिव ४ ३२ १६ आत्मनो वधूमिच्छन्निव (स्त्रीकाम पतिरिव) ३ ६२ ८ [वधूयु-इवपदयो समास । वधूयु = वधूपपदादात्मन इच्छाया क्यजन्ताद् उ]

वधूयुः वधू की कामना करने वाला पति स० वि० १३७, अथर्व० १४ १ ६ [वधूपपदादात्मन इच्छाया क्यजन्तात् 'क्याच्छन्दसी' ति सूत्रेण उ]

वधूः भार्य्या ५.३७ ३ स्त्री स० वि० १०५, ५.३७.३. **वध्वः**=युवत्य स्त्रिय. ५ ४७.६ [वह प्रापणे (भ्वा०) धातो. 'वहेर्धश्च' उ० १.८३ सूत्रेण ऊ । वध्व. नदीनाम निघं० १ १३]

वध्यमाने ताड्यमाने (दुर्जने) ४ ४२ ८ [हन हिंसागत्यो (अदा०) धातो कर्मणि शानच्। वधादेशश्छान्दस]

वध्रिमत्याः वर्धिकाया विद्याया १.११७ २८ वध्रय प्रशस्ता वृद्धयो विद्यन्ते यस्यास्तस्या सन्त्रिय प्र०—अत्र वृधु-धातोरौणादिको रिक्-प्रत्ययो बाहुलकाद् रेफलोप. १ ११६.१३ बह्वो वध्रयो वर्धनानि विद्यन्ते यस्या तस्या भूमेरन्तरिक्षस्य वा ६ ६२ ७ [वध्रिप्राति० प्रशसाया (मत्वर्थे) मतुप् । तत षष्ठी । वध्रि =वृधु वृद्धौ (भ्वा०) धातोर्बाहु० औणा० रिक् रेफलोपश्च]

वध्रिवाचः वध्रयो वर्धिका वाचो येषान्ते (विद्वज्जना) ७ १८ ६ [वध्रि-वाच्पदयो. समास]

वध्रिः वध्यते स वध्रि निर्वीर्यो नपुसक इव प्र०—अत्र वन्ध-धातोर्बाहुलकादौणादिक क्रिन्-प्रत्यय. १ ३२ ७ **वध्रीन्**=वृद्धान् वृषभान् २.२५ ३ [वन्ध वन्धने (क्र्या०) वृधु वृद्धौ (भ्वा०) धातोर्णा० रिक् । वृधुधातो रेफलोपश्च]

वध्र्यश्वाय वध्रयो वर्द्धिका अश्वा यस्य तस्मै (जनाय) ६ ६१.१ [वध्रि-अश्वपदयो. समास । वध्रिरिति व्याख्यात वध्रिमत्या पदे]

वनतम् यौ सम्यक् वाणीसेविनौ स्त, प्र०—अत्र व्यत्यय १ ३ २ **वनते**=सम्भजमानाय (राये=धनप्राप्तये) ३ १६ १ [वन सम्भक्तौ (भ्वा०) धातो शतृ । अमि नुमोऽभावश्छान्दस]

वनतम् सम्भजत १.६३ ६. **वनताम्**=सम्भजताम् २५.४५. सेवताम् १ १६२ २ **वनते**=सम्भजति ६.१५ ६ सम्भजसि ५.४१ १७ **वनथः**=समेवेथाम् ४ ४४ २. सविभजथ ७ २ ७. सम्भजेथाम् १.४६ १४ **वनन्ति**=सेवन्ते ६ ६ ३ **वनसे**=सम्भजसि १ १४० ११ **वनाति**=सम्भजेत् ७ १५ ४ **वनामहे**=सम्भजामहे प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १.१५ ८ याचामहे २६.१८ सम्भजाम ५ ७ ३ **वनेम**=विभज्य दद्याम, सम्भजेम १ १२६ ७ सविभागेनानुतिष्ठेम १ ७० १ [वन सम्भक्तौ (भ्वा०) धातोर्लोट्। अन्यत्र लट् लिङ् च। वनु याचने (तना०) धातोर्वा रूपम्। विकरणव्यत्ययेन शप्]

वनदः प्रशसितार (विद्वासो जना) २ ४.५]

वनेराट् या वने सेवनीये किरणे वा राजते सा (दीप्ति) ६ १२ ३ [वनोपपदे राजृ दीप्तौ (भ्वा०) धातोः क्विप्। सप्तम्या अलुक्]

वनेव रश्मय इव, प्र०—वनमिति रश्मिनाम निघ० १ ५, १ १२७ ४ यथा वनानि तथा १ १२७ ३ [वन-इव-पदयो समास]

वने वने जङ्गले जङ्गले अग्नाविव जीवे जीवे ५.११ ६ रश्मौ रश्मौ पदार्थे पदार्थे वा १५ २८ [वने-पदस्य वीप्साया द्वित्वम्]

वन्त सम्भजत, प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् १ १३६ १०. [वन सम्भक्तौ (भ्वा०) धातोर्लोट्। शपो लुक् 'बहुल छन्दसि' सूत्रेण]

वन्तारः सम्भाजका. (प्रजाजना) ७ ८ ३ विभाजका (राय =धनानि) ३ ३० १८ [वन सम्भक्तौ (भ्वा०) धातो कर्त्तरि तृच्। इटोऽभावश्छान्दस]

वन्दते कामयते ४ ५० ७ स्तौति तद्गुणान् प्रकाशयति ३ ४६ **वन्दस्व**=कामय १ ३८ १५ **वन्दामहे**=कामयामहे ४ ५७.६ **वन्दे**=प्रशसामि सत्करोमि वा ५ २८ ४ नमस्करोमि ७ ६ १ स्तौमि २.३५ १२ अभिवादये १ ४७ २ स्तुवे १२ ४२ [वदि अभिवादन-स्तुत्यो (भ्वा०) धातोर्लट्। अन्यत्र लोट् चापि। वन्दते अर्चतिकर्मा निघ० ३ १४]

वन्दयध्यै अभिवन्दितु स्तोतुम् १ ६१.५ वन्दितुम्, प्र०—अत्र 'तुमर्थे सेसेनसे०' इति कध्यै प्रत्यय १ २७ १ [वदि अभिवादनस्तुत्यो (भ्वा०) धातोर्णिजन्तात् तुमर्थे कध्यै प्रत्यय]

वन्दनम् स्तुत्य यानम् १ ११८ ६ वन्दनीयम् (विप्र=मेधाविजनम्) १ ११६.७ गुणकीर्त्तनम् १ ११२ ५ **वन्दनः**=स्तोतुमर्हः. (विद्वज्जन) १ ११६.६ **वन्दनानि**=अभिवादनानि स्तवनानि वा ३ ४३ ४ **वन्दनाय**=अभित सत्काराऽर्हायाऽपत्याय प्रशसार्यै वा १ ११६ ११ स्तवनाय १ ११७ ५ [वदि अभिवादनस्तुत्यो (भ्वा०) धातोर्ल्युट्]

वन्दनश्रुत् येन वायुना वन्दन स्तवन शृणोति श्रावयति वा तत्सम्बुद्धौ (इन्द्र=सभाद्यध्यक्ष) १ ५५ ७ [वन्दनोपपदे श्रु श्रवणे (भ्वा०) धातो क्विप्]

वन्दना वन्दनानि स्तुत्यानि कर्म्माणि ७ २१ ५ [वन्दनमिति व्याख्यातम्। ततश्शेर्लोपश्छन्दसि]

वन्दनेष्ठाः स्तवने तिष्ठति य (इन्द्र =मित्र) १ १७३ ६ [वन्दनोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्विप्। सप्तम्या अलुक्]

वन्दमानम् स्तूयमानम् (अध्यापकम्), प्र०—अत्र कर्मणि शानच् २.३३ १२. **वन्दमानः**=स्तुवन्नभिगायन् (मनुष्यः) १ २४.११. [वदि अभिवादनस्तुत्यो (भ्वा०) धातो शानच्]

वन्दारु वन्दनशीलम् (स्वभावम्) ४ ४३ १. प्रशसनीय धर्म्यम् (वच) ५ १ १२ प्रशसनीययज्ञम् १५ २५. [वदि अभिवादनस्तुत्यो (भ्वा०) धातो. 'शृवन्द्योरारु' अ० ३ २ १७३ सूत्रेण ताच्छील्ये आरु.]

वन्दारुः अभिवादनशील. (अध्यापको जन) १२ ४२. [पूर्वपदे व्याख्यातम्। वन्दारुष्टे तन्व वन्देऽग्नऽइति वन्दिता तेऽह तन्व वन्देऽग्नऽइत्येतत् श० ६ ८ २ ६]

वन्दितारम् स्तावकम् (सज्जनम्) २ ३४ १५ [वदि अभिवादनस्तुत्यो. (भ्वा०) धातो कर्त्तरि तृच्]

वन्दिषीमहि नमस्कुर्म १ ८२ ३ नमेम स्तुवीमहि ३.५२ [वदि अभिवादनस्तुत्यो (भ्वा०) धातोर्लिङ्]

वन्द्य अभिवदितु प्रशसितु योग्य (सभाध्यक्ष) १ ७६.७ वन्दितु स्तोतु योग्य (राजन्नीश्वर वा) ३४ १३ **वन्द्यः**=स्तोतुमर्हः (अग्नि =विद्वज्जन) २.७४ पूजनीय (परमेश्वर) ऋ० भू० २२२, अथर्व० ६.१०.६८ १ प्रशसनीय (सविता=परमात्मा) ४ ५४ १ नमस्कर्त्तुं योग्य, भा०—मान्य (सप्ति =शिल्पिजन) २६ ३ सत्करणीय (सभापति राजा) स० प्र० १८३, अथर्व० ६ १० ६८ १ नमस्करणीय, भा०—धर्मात्मा सन् सर्वत्र सत्कृत (अग्नि =पावकवत्पवित्रो विद्वान्) २६ २८ [वदि अभिवादनस्तुत्यो (भ्वा०) धातोर्ण्यत्। वन्द्य =वन्दितव्य नि० ८ ८]

वन्द्यासः वन्दितु कामयितुमर्हा (गाव =धेनव) १ १६८ २ स्तोतव्या सत्कर्त्तव्याश्च (मरुत =मनुष्या) १ ६० ४ [वन्द्य इति व्याख्यातम्। ततो जसोऽसुक्]

वन्द्येभिः वन्दितु स्तोतु योग्यै (शूषै =बलै.) ५ ४१ ७ कामना के योग्यो (विद्यायुक्त सन्तानो) से स० वि० १०५, ५ ४१ ७ [वन्द्यमिति व्याख्यातम्। 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

वन्धुरः वन्धनविशेषा, प्र०—अत्र 'सुपा सुलुक्०' इति जस स्थाने सु १ ३४ ६ **वन्धुरे**=प्रेमबन्धने ६ ४७ ६ दृढबन्धनयुक्ते (रथे) १ १३६ ४ **वन्धुरेषु**=यन्त्राणा बन्धनेषु १ ६४ ६ [बन्ध बन्धने (क्रया०) धातो.

वै वनस्पतय. काठ० २६ ३ चराचरा हि वनस्पतय मै० २ ३ २ वनस्पतयो वाला तै० स० ७ ५ २५ १.]

वना सम्भक्तानि वस्तूनि १ ५४ १. सम्भजनीयानि (सुखानि) ६ ६.३ अरण्यानि किरणान् वा १ ६६ १ जङ्गलानि ५ ५७ ३ वनानि याचनीयानि (ज्ञानानि) ३ ६.२ जलानि १ ६४ ७ [वनमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि। वना वनानि नि० ४ १५.]

वनाः किरणा ६ ४८ ५ [वनमिति रश्मिनाम निघ० १ ५ लिङ्गव्यत्यय]

वनिता याचक (जन) ३ १३ ३. [वनु याचने (तना०) धातो कर्त्तरि तृच्]

वनिनम् वनानि किरणा विद्यन्ते यस्मिँस्तत् (किरणसयुक्त मेघम्) ६ ८.५ वन वहूदक विद्यते यस्मिँस्तम् (रथ=यानम्), प्र०—वनमित्युदकनाम निघं० १.१२, १ ११६ १ सम्भक्तारम् (मारुत गणम्) १ ६४.१२ **वनिनः**=रश्मिमत (सूर्यस्य) १ १८०.३ वनसम्बन्धो विद्यते येषान्ते (गृहस्था जना.) ७ ४३ १ वनस्य सविभागस्य रश्मीना वा प्रशस्त सम्बन्धो विद्यते यस्य तस्य (विदुष शिल्पिजनस्य), प्र०—अत्र सम्बन्धार्थे इनि १ ६४ १० याच्ञावन्त (सज्जना) ३ ४० ७ वनानि सन्ति येषु ते वृक्षा ७ ३५ ५ किरणवन्त (विद्युदादय पदार्था) ७ ३४ २५ वनानि वहव किरणा विद्यन्ते येषु तान् (धर्मप्रकाशकानाचारान्) ७ ४ ५ वहुकिरणयुक्ता वनस्था वृक्षादय ७ ५६ २५ वनसम्बन्धिन (वया =पक्षिण) ६ १३ १ वनानि जलानि १ १४० २ वनानि प्रशस्तविद्यारश्मयो विद्यन्ते येषान्ते (अध्यापका जना) १ १३६ १० प्रशस्ता रश्मयो वनानि वा येषा येषु वा तान् (प्राणान्) १ ५८ ४ वन रश्मिसम्बन्धो विद्यते येषा ते वायव, प्र०—अत्र सम्बन्धार्थे इनि १ ३६ ३ [वनप्राति० सम्बन्धार्थे भूम्न्यर्थे प्रशसायामर्थे वा मत्वर्थ इनि। वनमिति व्याख्यातम्]

वनिषीष्ट याचेत १ १२७ ७ [वनु याचने (तना०) धातोराशिषि लिङ्]

वनिष्ठः अतिशयेन वनिता सविभाजक (इन्द्र = राजा) ७ १८ १ [वन सम्भक्तौ (भ्वा०) धातो कर्त्तरि तृजन्ताद् अतिशायन इष्ठन्-प्रत्यये तृचो लोप]

वनिष्ठुना याचनेन २५ ७ आन्त्रविशेषेण ३६ ८

वनिष्ठुः=सम्भाजी (भा०—वीर्यवान् पुरुष), प्र०—अत्र वन सम्भक्तौ इत्यरमादौणादिक इष्ठुप् प्रत्यय १६ ८७ आन्त्रविशेष, प्र०—अत्र 'सुपा सुलुक्०' इत्यम स्थाने सुरादेश ३६ ६ [वनु याचने (तना०) वन सभक्तौ (भ्वा०) धातोर्वा औणा० इष्ठुप् वाहुलकात्]

वनीयान् अतिशयेन विभाजक. (सज्जन) ५ ७७ २. [वन सम्भक्तौ (भ्वा०) धातोस्तृजन्तादतिशायन ईयसुन्। तृचो लोप। वनीयान् वनयितृतम नि० १२.७]

वनुथः याचेथाम् २ ३० ६ कामयेथे ७ १७ **वनुयाम**=सम्भजेम १ १३२ १ याचेमहि ५ ३ ६ इच्छेम याचेम १ ७३ ६ **वनुषे**=याचसे ४ ४४ ३ **वनुष्यात्**=याचेत ६ ५ ४ **वनुष्व**=प्रयच्छ १ १६६ १. **वनोति**=याचते, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ १३३ ७. **वनोषि**=याचसे सम्भजसि वा १ ३१ १३ [वनु याचने (तना०) धातोर्लट्। व्यत्ययेन परस्मैपदम्। अन्यत्र लिड् लोट् च। वनोति कान्तिकर्मा निघ० २ ६]

वनुषः याचमानस्य (पाखण्डिजनस्य) ७ २५ ३ याचका (विप्रा =मेधाविजना) ३ २७ ११ सविभाजकस्य (विदुषो जनस्य) १ १५० ३ सेवमानस्य (मर्त्यस्य=मनुष्यस्य) ४ २२ ६ सेवनीयान् (सज्जनान्) ६ ६ ६ सविभाजकान् (गुप्तचरान् जनान्) ६ २५ ३ **वनुषाम्**=राज्यस्य, याचकाना शत्रूणा जनानाम् ६ ६८ ६ [वनु याचने (तना०) वन सम्भक्तौ (भ्वा०) धातोर्वा वाहु० औणा० उसि]

वनुष्यतः याचमानान् (मनुष्यान्) ६ १५ १२ हिंसन्तम् (अग्नि=विद्युतम्), प्र०—अत्र विभक्तिव्यत्यय वनुष्यतिर्हन्तिकर्मेति निरुक्ते २ २५ १ हिसत (दुर्जनात्) २ २६ १ सम्भक्तान् (जनान्) १ १३१ १ क्रुध्यत (उत्तमजनस्य), प्र०—वनुष्यतीति क्रुध्यतिकर्मा निघ० २ १२, ७ ५६ १६ **वनुष्यताम्**=क्रुध्यता वाधमानाना वा (दुष्टाना शत्रूणाम्) ६ ६२ १० **वनुष्यन्**=सेवयन् (विद्वान् राजा) ६ ६ ६ [वनु याचने (तना०) वन सम्भक्तौ (भ्वा०) धातोर्वा शतृ। 'व्यत्ययेन उ-स्य-विकरणौ परस्मैपदञ्च। वनुष्यति क्रुध्यतिकर्मा निघ० २ १२ वनुष्यति पदनाम निघ० ४ २ वनुष्यतिर्हन्तिकर्मानवगतसस्कारो भवति नि० ५ २]

वनून् अधर्मसेविन (जनान्) ४ ३० ५ [वन सम्भक्तौ (भ्वा०) धातोर्वाहु० औणा० उ। ततो द्वितीयावहु० रूपम्]

वनेजाः किरणसमुदाये जायते स (विद्वान् जन) ६ ३ ३. [वनोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड। सप्तम्या अलुक्। वनमिति रश्मिनाम निघ० १ ५]

गत्यर्थे (भ्वा०) धातोरच्]

वम्रम् रोगनिवृत्तये वमनकर्त्तारम् (सद्वैद्यम्) १.११२.१५ **वम्रः**=उद्गिरकस्त्यक्ता (धार्मिको जन) १.५१.६. [टुवम उद्गिरणे (भ्वा०) धातोर्वाहु० औणा० रक्]

वम्रीभि उद्गीर्णाभि (वर्षाभि) ४.१६.६. **वम्र्यः**=अल्पवयस्यः (देव्य=स्त्रिय) ३७.४ [वम्रमिति व्याख्यातम्। तत स्त्रिया ङीप् छान्दस। वम्र्यो वमनात् नि० ३.२० वम्रीभिरुपजिह्विका इति सीमिकानाम् नि० ३.२०]

वय इव यथा पक्षिणस्तथा १.८७.२. [वयस्-इवपदयो समास]

वयतः प्राप्नुवत (विद्यार्थिजनस्य) २.२८.५. **वयन्तः**=व्याप्नुवन्त (वसिष्ठा=विद्वज्जना) ७.३३.६ [वय गतौ (भ्वा०) धातो शतृ। व्यत्ययेन परस्मैपदम्]

वयति सन्तनोति १६.८२ विस्तृणाति १६.८३ **वयन्ति**=व्याप्नुवन्ति ६.६.२. निर्मिमते १६.८०. [वेञ् तन्तुसन्ताने (भ्वा०) धातोर्लट्। अथवा वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लट् 'बहुलं छन्दसी' ति शपो न लुक्]

वयन्ती गच्छन्ती (पृथिवी) २.३८.४ [वय गतौ (भ्वा०) धातो शत्रन्तान् ङीप्। व्यत्ययेन परस्मैपदम्]

वयसा व्याप्त्या १८.५१.जीवनेन ११.२३ कमनीयेन (जीवनेन) २.१०.४ **वयः**=प्रजननात्मकम् (अश्व=महत्तत्त्वम्) २३.५३ कमनीय जीवन विज्ञान वा ६.४५.२ यो वेति गच्छति स पक्षी २३.११ कामम् २.४.६. आयु १.१११.२ कमनीय धनम् ४.१७.१८ प्रदीपक तेज ५.१६.१ अवस्थात्रये सुखभोग जीवनम्, चिरञ्जीवसुख वा ७.४७ प्रजनन प्रापण वा १४.१० तृप्तिम् २१.१४ येन व्येति व्याप्नोति तत् (तर्पणम्) २१.१५ गमनम् २८.२८. विद्या कामयमाना, प्राप्तविद्या वा (राजप्रजाजना) १.१२७.८ व्यापिन (पदार्था) ४.४३.६ पक्षिण इव गायत्र्यादीनि छन्दासि २.१६ ज्ञानिन (जना) १.१०३.७ पराक्रमम्, कमनीय कर्म, विविधव्यवहारव्यापी (छन्द=स्वाधीन्यम्), सुखप्रापकम् (छन्द), कमिता (छन्द) बलवान् (पुरुष), प्रजनक (छन्द=स्वाधीन पुरुष), न्यायविनयपराक्रमव्याप्तम् (छन्द=विद्याधर्मशमादिकर्म), बलिष्ठ (पुरुष) १४.६ बलम्, इच्छाम्, कामनाम् १४.१० व्याप्तिशीला (अश्वास=वेगादयो गुणा) ५.७५.६ शत्रुबलव्यापकम् (शूप=बलम्) २८.४१ व्याप्तव्यम् (चिरञ्जीवनम्) २१.२१ आयुर्वर्धकम् (भा०—वासन्तिक सुखम्) २१.२३. प्राप्तव्य वस्तु २१.१६. कालविज्ञानम् २१.२५. प्राणधारणम् २८.३७. कमिता (जना) १.१३६.२. **वयांसि**=कमनीयान्यन्नानि ३.३.७ **वयोभिः**=व्यापकैर्गुणैः १२.२५. यावज्जीवनैः १२.१ [वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (अदा०) धातोरौणा० असुन्। वय.=अन्ननाम निघ० २.७ वयो वेवेष्टुवचनम् नि० ४.३. वय=अन्नम् नि० ६.४. एतद्वै वयसामोजिष्ठ बलिष्ठ यच्छ्येन श० ३.३.४.१५ स (श्येन) हि वयसामोजिष्ठ ता० १३.१०.१४ श्येनो वै वयसा क्षेपिष्ठ. प० ३.८. पशवो वै वयांसि श० ६.३.३.७ निर्ऋतेर्वा एतन्मुख यद्वयांसि यच्छकुनय. ऐ० २.१५ देवाननु वयाम्योषधयो वनस्पतय श० १.५.२.४ प्राणो वै वय ऐ० १.२८ पृथु तिरश्चा वयसा बृहन्तम् (यजु० ११.२३) इति पृथुर्वाऽएष (अग्नि) तिर्यङ् वयसो बृहन्धूमेन (वय=धूम) श० ६.३.३.१६ धूमो वाऽअस्य (अग्ने) श्वो वय श० ७.३.१.२६. दिव्य सुपर्ण वयसा बृहन्तम् (यजु० १८.५१.) इति दिव्यो वाऽएष (अग्नि) सुपर्णो वयसो बृहन्धूमेन (वय.=धूम) श० ६.४.४.३. अथ यदश्रु सक्षरितमामीत्तानि वयास्यभवन् श० ६.१.२.२ तार्क्ष्यो वै पश्यत राजेत्याह तस्य वयासि विश श० १३.४.३.१३ उरस एवास्य (इन्द्रस्य) हृदयात्त्विपिरस्रवत् स श्येनोऽपाष्ठिहाभवद् वयसा राजा श० १२.७.१.६]

वयस्कृत् यद्वयस्करोति तज्जीवनसाधनम् १५.५ यो वयो वृद्धावस्थापर्यन्त विद्यासुखयुक्तमायु करोति स (सभाध्यक्ष) १.३१.१० **वयस्कृतम्**=यो वय करोति तम् (जगदीश्वर भौतिकमग्नि वा) ३.१८ [वयस् इति व्याख्यातम्। तदुपपदे डुकृञ् करणे (तना०) धातो कर्त्तरि क्विप्]

वयस्वन्तः प्रशस्तं वयो जीवन विद्यते यस्य तस्य राय=धनस्य) ५.५४.१३ प्रशस्त वयो जीवन विद्यते यस्मिँस्तस्य (राय=धनस्य) २.२४.१५ प्रशस्त पूर्णमायु विद्यते येषान्ते (जना), प्र०—अत्र प्रशसार्थे मतुप् ३.१८. **वयस्वते**=बहुजीवन विद्यते यस्य तस्मै (इन्द्राय=सेनापतये) ७.२२. [वयस्प्राप्ति० मतुप्। तत प्रथमाबहुवचनम्]

वया इव यथा विस्तीर्णा शाखा. २.५.४ **वयामिव**=यथा वृक्षस्य सुदृढा विस्तीर्णा शाखाम् ६.५७.५. [वयस्-इवपदयो समास]

'मद्गुरादयश्च' उ० १४१ सूत्रेण उरच्। वर्णव्यत्ययेन वस्य वकार]

वन्धुरायुः वन्धुरमायुर्यस्य स. (सज्जन) ४४४.१. [वन्धुर-आयुपदयो समास]

वन्धुरेष्ठाः यो वन्धुरे वन्धने तिष्ठति सः (रथ) ३.४३.१ [वन्धुरोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो. क्विप्]

वन्याय वने जङ्गले भवाय (पुरुषाय) १६.३४ [वनप्राति० भवार्थे यत्]

वन्वन् याचन्ते ७४८३ **वन्वन्तु**=याचन्ताम् ७२१९ [वनु याचने (तना०) धातोर्लेड्। अटोऽभाव.। अन्यत्र लोट्]

वन्वन् सम्भजन् (जन.) ६१२४ धर्म्म सेवमान (विद्वत्सन्तान) १९५३. सम्भजमान (सूर्य=प्रजापालक) ११२१९ **वन्वते**=सत्याऽसत्ययोर्विभाजकाय (इन्द्राय=सभासेनेशाय) २२१२ **वन्वन्तः**=विभजन्त (दुर्जना) ६१६२७ [वन सम्भक्तौ (भ्वा०) धातोः शतृ। विकरण-व्यत्ययेन उ]

वन्वानः सम्भजमान (सज्जन) ३८२ याचमान (राजा) ५२९८ **वन्वानाः**=याचमाना (सज्जना) १०४ [वनु याचने (तना०) धातो शानच्]

वप निक्षिप १६९ **वपतु**=स्थापयतु ३५५ **वपते**=वीजानि सन्तनुते ११६४४४ **वपन्त**=वपन्ति ७५६३ **वपन्ति**=वोते हैं स० वि० १३९, अथर्व० १४२३८ **वपन्तु**=छिन्दन्तु १६५२ विस्तारयन्तु २३३११ **वप**=सन्तनुहि ४१६१३. **वपामि**=विस्तारयामि १२१ [डुवप् वीजसन्ताने (भ्वा०) धातो-र्लोट्। अन्यत्र लट् चापि]

वपन्ता वपन्तौ (अश्विना=सभासेनाधीशौ) १११७२१ [डुवप् वीजसन्ताने (भ्वा०) धातो शतृ। ततो द्विवचनस्या-कारादेश वपन्ता निवपन्तौ नि० ६२६]

वपस् यो वपति क्षेत्राणि कृषीवल इव विद्यादिशुभान् गुणास्तम् (अहिंसक जनम्) ३०७. [डुवप् वीजसन्ताने (भ्वा०) धातो कर्त्तरि पचाद्यच्]

वपाम् वपन्ति यस्या भूमौ ताम् ३५२० वपनम् १२१०३ **वपायाः**=वर्द्धिकाया रीत्या २१.४१ वीज-तन्तुसन्तानिकाया क्रियाया वीजवर्द्धिकाया क्रियाया वा २१४१ **वपाः**=वपन्ति याभि क्रियाभिस्ता. २१३१. [डुवप् वीजसन्ताने (भ्वा०) धातोर्घञर्थे क। तत स्त्रिया टाप्। शुक्ला वपा ऐ० २१४ आत्मा वपा कौ० १०.५ यजमानदेवत्या वै वपा तै० ३.९१०.१. हुत्वा वपामेवाग्रे ऽभिधारयति श० ३८.२.२४ प्रात पशुमालभन्ते तस्य वपया प्रचरन्ति ता० ५१०९]

वपावन्तम् विद्याबीज विस्तारयन्तम् (विद्यार्थिजनम्) ५४३७ वहूनि वपनाधिकरणानि विद्यन्ते यस्मिँस्तम् (अग्नि=विद्यादिरूपम्) ६१३ **वपावान्**=वपन्ति यया क्रियया सा वपा सा प्रशस्ता विद्यते यस्य स (विद्वज्जन) २०३७ [वपेति व्याख्यातम् तत प्रशंसायामर्थे भूम्न्यर्थे वा मतुवन्ताद् द्वितीयैकवचनम्]

वपुर्भिः स्वाऽऽकृत्यादिभि शरीरै १६२८ **वपुषः**=सुरूपस्य १११८५ **वपुषाम्**=रूपवता शरीराणाम् ४७९ **वपुषे**=शरीरधारणपोषणाऽग्निरूपप्रकाशाय १६४.४ रूपाय ११४८१ शरीरहिताय ३०१४ **वपुः**=सुरूप शरीरम् ६४४८ शरीरमुदक वा १९८३ **वपूंषि**=रूपवन्ति शरीराणि ३१८ रूपाणि ४२३९ [डुवप् वीजसन्ताने (भ्वा०) धातो 'अर्त्तिपृवपियजि०' उ० २११७ सूत्रेण उसि। वपु उदकनाम निघ० ११२ रूपनाम निघ० ३७ वपुर्हि पशव ऐ० ५६]

वपुषाय वपूषि रूपाणि विद्यन्ते यस्मिँस्तस्मै व्यव-हारार्थं, प्र०—अत्र 'अर्श आदिभ्योऽच्' इति वेद्यम् ३२१५. [वपुष्प्राति० मत्वर्थे 'अर्श आदिभ्योऽच्' इत्यच्]

वपुष्टरा अतिशयेन रूपलावण्ययुक्तौ (स्त्रीपुरुषौ) २३७ [वपुष्प्राति० अतिशायने तरप्। ततो द्विवचन-स्याकारश्छान्दसः]

वपुष्यन् आत्मनो वपू रूपमिच्छन् (विद्वज्जन) ३१४ [वपुष्पदादात्मन इच्छाया क्यजन्ताच्छतृ]

वपुष्यः वपुष्पु रूपेषु भव (अग्नि=राजा) ४१८ वपुषि सुन्दरे रूपे भव (अतिथि) ५१९ वपुष्पु साधु (अग्नि=विद्वज्जन) ४११२ [वपुष् इति व्याख्यातम्। ततो भवार्थे साध्वर्थे वा यत्]

वपुष्या वपुषि भवानि (सुरूपाणि यानानि) ११८३२ [वपुष्य इति व्याख्यातम्। ततश्चैलोप-श्छन्दसि]

वपुष्ये वपुषि रूपे भवे (भूमिसूर्यौ) ११६०२ [वपुष्प्राति० भवार्थे यत्। ततो द्विवचने रूपम्]

वप्ससः सुरूपस्य (विद्वज्जनस्य) ११८१८ [वप्स=रूपनाम निघ० ३७]

वभ्रः उद्गलितोदान (प्राणवायु) ११७४ [वभ्र

काय (जनाय) २.१३ १२. प्राप्तव्याय सुखाय ४ १६ ६.

वय्येव पदसाविका नलिकेव २ ३ ६ [वय्या-इवपदयो. समास]

वरत् वृणुयात् ६ ४५ २४. **वरते**=स्वीकरोति ४ ४२ ६ **वरथः**=स्वीकुरुथ ५ ३१ ६ **वरन्त**=वारयन्ति ३ ३२ ६ वृण्वन्तु, प्र०—अत्र विकरणव्यत्ययेन शप् १ १२१ १५ निवारयन्ति ४ ६ ६. वरयन्ति २ २४ ५. स्वीकुर्युं १ १४० १३ **वरन्ते**=स्वीकुर्वन्ति ४ ३२ ८ **वराते**=वृणुयाताम् ५ ३२ ६ वृणुते १ ६५ ३ [वृञ् वरणे (स्वा०) धातोर्लेट्। व्यत्ययेन शप्। अन्यत्र लट् लङ् चापि वरन्ते=वारयन्ति नि० १० २६]

वरत्राः रज्जय ४ ५७ ४. [वृञ् वरणे (स्वा०) धातो. 'वृञश्चित्' उ० ३ १०७ सूत्रेणात्रन्]

वरम् अतिश्रेष्ठम् (सूरि=युद्धविद्याकुशल जनम्) १.११६ ३. परमोत्तम विज्ञानधनम् १ ४ ४ वरणीय बन्धुसमुदायम् २ ५ ५ रत्नादिकम् १ १४० १३ **वराय**=स्वीकरणाय १ १४३ ५ श्रैष्ठ्याय १ ७६ १ श्रेष्ठत्वाय ७ ५६.२ [वृञ् वरणे (स्वा०) धातोरच्। अथवा वृणोतेः 'ग्रहवृदृनिश्चिगमश्च' अ० ३ ३ ५८ सूत्रेण घञोपवादोऽप्। वरो वरयितव्यो भवति नि० १ ७ वर इव वै स्वर्गो लोक जै० २ ६६ वरो न प्रतिगृह्य तै० स० ७ १ ६ ५ सर्वं वै वर श० २.२.१ ४]

वरशिखस्य वरा श्रेष्ठा शिखा यस्य तस्य (सूर्य इव राज्ञ) ६ २७ ४ वरा शिखा यस्य तद्वत् मेघस्य ६ २७.५ [वरा-शिखापदयो समास]

वरसत् यो वरेषूत्तमेषु पदार्थेषु सीदति स (परमेश्वर) १० २४ यो वरेषु श्रेष्ठेषु सीदति स (जीवात्मा) ४ ४० ५. य उत्तमेषु विद्वत्सु सीदति स (ईश्वरो जीवो वा) १२ १४ [वरोपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्। एष (सूर्य) वै वरस्मद् वर वा एतत् सद्मना यस्मिन्नेष आसन्नस्तपति ऐ० ४ २०]

वरस्या अतिशयेन वरौ (भा०—स्त्रीपुरुषौ) ५ ७३ २. [वरपदाद् इच्छायामर्थे क्यच्प्रत्ययान्तात् कर्त्तर्यच्। ततो द्विवचनस्याकार। क्यचि च 'सुग् वक्तव्य' अ० ७ १ ५१ वा०सूत्रेण सुगागम]

वरस्याम् स्वीकर्त्तव्या प्रशसाम् ६ ४६ ११ [वरस्येनि पूर्वपदे व्याख्यातम्। तत स्त्रियाम्। 'अ प्रत्ययादि' त्यकार। ततष्टाप्]

वरा श्रेष्ठ तुल्य गुण कर्म स्वभाव वाले (स्त्रीपुरुष) स० वि० १३७, अथर्व० १४.१ ६ श्रेष्ठौ श्रोतृश्रावको ५ ४४.१२. [वरप्राति० 'सुपा सुलुक्०' इति द्विवचनस्याकारादेश]

वरा इव यथा प्रशस्तविद्याधर्मकर्मस्वभावा (विद्वासो जना.) १.८३.२ वरैस्तुल्या (मनुष्या) ५ ६०.४ [वरा-इवपदयो. समास]

वराहम् मेघम् १ ६१.७. [वराहो मेघो भवति वराहार, 'वरमाहारमाहार्षी' इति च ब्राह्मणम् नि० ५ ४ अग्निरसोऽपि वराहा उच्यन्ते नि० ५ ४ वराह मेघनाम निघ० १ १०. पशूना वा एष मन्युर्यद् वराह तै० १.७ ६ ४ ता (पृथिवी प्रजापति) वराहो भूत्वाऽहरत् तै० स० ७ १. ५ १ अग्नौ ह वै देवा घृतकुम्भ प्रवेशयाचक्रुस्तत्तो वराह समभूव श० ५ ४ ३ १६ आण्टाभ्या वराहौ (अजायेताम्) जै० २.२६७]

वराहून् वराणा धर्म्याणा व्यवहाराणा धार्मिकाणा जनानाञ्च हन्तार दस्यु शत्रुम् १ १२१ ११. **वराहून्**=वरमाह्वयत शब्दायमानान् (रयान्) १ ८८ ५ [वरोपपदे हन हिंसागत्यो. (अदा०) धातो 'हुश्रकरणे मितद्वादिभ्य उपसख्यानम्' अ० ३ २ १८० वा०सूत्रेण दु। वरोपपदे ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्वा दु। अथाप्येते माध्यमिका देवगणा वराहव उच्यन्ते नि० ५ ४]

वरांसि वरणीयानि धर्म्याणि कर्माणि ४ २१ ८ वराणि (कर्म्माणि) १ १६० २ उत्तमानि वस्तूनि ६ ६२.१. [वृञ् वरणे (स्वा०) धातोरसुन्। वरम्प्राति० प्रथमाबहुवचने रूपम्]

वरिमता बहुस्थूलत्वेन सह १ १०८ २ [उरु बहुनाम निघ० ३ १ ततो भाव इमनिच्-प्रत्यये वरादेशे च छान्दस रूपम्]

वरिमन् बहुगुणयुक्त (विद्वज्जन) ४ ५४-४ अतिशयेन श्रेष्ठे (सुम्ने=सुखे) ६ ६३ ११ बहुशीलसत्ययुक्तम् (व्रत=स्वीकृतक्षमादिगुणम्) ३ ५६ ३ **वरिमा**=वरस्य श्रेष्ठस्य भाव. १८.४ **वरिम्णा**=श्रेष्ठगुणसमूहेन ३ ५ बहोर्भावेन १५ ११ अतिशयेनोरुबहुस्तेन व्यापकत्वेन १३ २. महापुरुषार्थेन १५ १० [उरु बहुनाम (निघ० ३ १) उरुप्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' अ० ५ १ १२२. सूत्रेणेमनिच्। ततश्च 'प्रियस्थिर०' इत्यादिना वर्-आदेश]

वरिवस्यन् सेवमान (इन्द्र.=विद्वान् राजा) ६ २०.११ **वरिवस्यन्तः**=परिचरन्त (मरुत=उत्तम-

वयाकिनम् व्यापिनम् (विद्वज्जनम्) ५ ४४ ५ [वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्वाहु० औणा० आकिन् प्रत्यय]

वयाम् वयसामवस्थावता प्राणिनाम्, प्र०—अत्राऽऽमि टिलोपश्छान्दस ३४ ४८ व्यापिका मुखनीतिम् १५ २४ शाखाम् ५ १ १ **वयाः**=शाखा २ ३५ प्रापक (रुद्र = शूरवीरजन) ७ ४०.५ पक्षिण ६ १३ १ [वयस् इति व्याख्यातम् । तत आमि टिलोपश्छान्दस. । वया. शाखा वेतेर्वातायना भवन्ति नि० १ ४]

वयावन्तम् बहुपदार्थयुक्तम् (क्षय=गृहम्) ६ २ ५

वयिष्यन् व्यय करिष्यन् (वसिष्ठ =पूर्णविद्वज्जन) ७ ३३ १२ [वय गतौ (भ्वा०) धातोर्लृट शतृ । व्यत्ययेन परस्मैपदम्]

वयुनम् कर्म्म प्रज्ञान वा ५ ४८ २ प्रज्ञाम् ३ ३ ४ **वयुनानि**=विज्ञानानि, भा०—विद्या २९ ५१ ज्ञानानि ६ ७५ १४ प्रशस्तानि कर्माणि प्रज्ञाश्च ५ ३६. प्रज्ञान और उत्तम कर्म स० वि० ७, ४० १६ **वयुनेषु**=पृथिवीमारभ्य परमेश्वरपर्यन्ताना विज्ञानेषु ६ ७ ५ प्रज्ञापनेषु २ ३४ ४ [अज गतिक्षेपणयो (भ्वा०) धातो 'अर्जियमिशीङ्भ्यश्च' उ० ३ ६१ सूत्रेण उनन् । 'अजेर्व्यघञपो ' अ० २ ४ ५६ सूत्रेणाजेर्वीत्ययमादेश । वयुनम्=प्रशस्यनाम निघ० ३ ८ प्रज्ञानाम निघ० ३ ९ पदनाम निघ० ४ २. वयुन वेते कान्तिर्वा प्रज्ञा वा नि० ५ १५ वयुनानि प्रज्ञानानि नि० ८ २०]

वयुनवत् प्रज्ञावत् ६ २१ ३ [वयुनमिति व्याख्यातम् । ततो मतुप्]

वयुनशः प्रज्ञानेन ६ ५२ १२ [वयुनप्राति० 'वह्वल्पार्थाच्छस्०' अ० ५ ४ ४२ सूत्रेण शस्]

वयुना प्रज्ञानानि कर्माणि वा १ १६२ १८ वयुनानि प्रशस्यानि कमनीयानि वा कर्म्माणि १ ९२ ६ [वयुनप्राति० शेलोपश्छन्दसि]

वयुनावत् प्रज्ञानवत् ४ ५१ १ [वयुनप्राति० मतुप् । सहिताया दीर्घ । वयुनावत् प्रज्ञानवत् नि० ५ १५]

वयुनावित् यो वयुनानि प्रज्ञानानि वेत्ति स , भा०—सर्वज्ञ. (अ०—जगदीश्वर) ३७ २ यो वयुनानि प्रशस्तानि कर्म्माणि वेत्ति स '(योगिजन), प्र०—वयुनमिति प्रशस्यनामसु पठितम् निघ० ३ ८ अत्र 'अन्येषामपि दृश्यते' इति दीर्घ ५ १४ सर्वेषा जीवाना शुभाऽशुभानि यानि प्रज्ञानानि प्रजाश्च तानि यो वेद स (परमेश्वर) ऋ० भू० १५६ [वयुनोपपदे विद ज्ञाने (अदा०) धातो कर्त्तरि क्विप् । 'अन्येषामपि दृश्यते' इति दीर्घ । वयुनाविदित्येप (प्रजापति) हीद वयुनमविन्दत् श० ६ ३ १.१६]

वयोधसम् चिरायुर्धारकम् (इन्द्र=राजानम्) २८.३१. चिरञ्जीविनम् (इन्द्रम्) २८.४२ प्राणधारिणम् (इन्द्र=जीवम्) २८ ३९ आयुषो धर्त्तारम् (इन्द्रम्) २८.४५ वहुवयो धारकम् (इन्द्र=राजानम्) २८ ४४ जीवनधारकम् (इन्द्रम्) २८ ४१ कमनीयसुखधारकम् (इन्द्र=परमैश्वर्यम्) २८ ३० वयोवर्धकम् (इन्द्र=सूर्यम्) २८ ३५ कमनीयाना विद्यावोधादीना धातारम् (इन्द्र=विद्वज्जनम्) २८ २८ कामनाधारकम् (इन्द्र=परमैश्वर्यम्) २८ २९ त्रय कर्मोपासनाज्ञानानि वत्सा इव यस्य तम् (जीवस्वरूपम्) २८ २७ **वयोधसा**=वयो जीवन दधाति येन तेन (आधीतेन=अध्ययनेन) १५ ७ **वयोधाः**=यो वय प्रजनन दधाति स (मनुष्य) २ ३ ९ यो वय कमनीयमायुर्दधाति स (वैद्य) ५ ४३ १३ अ०—जितेन्द्रियत्वेन जीवनवर्धयिता (अग्नि = पावक इव सेनापति) १५ ५२ यो वयो जीवन कमनीय वस्तु दधाति स (इन्द्र =ईश्वर) ४ १७.१७ य कमनीयानि वयासि जीवनधनादीनि दधाति स (अग्नि =विद्युदिव राजा) ४ ३ १० [वयस् इति व्याख्यातम् । तदुपपदे डुधाञ् धारणपोषणयो (जु०) धातो 'वयसि धाञ ' उ० ४ २२९ सूत्रेण असि । वयोधा इति श्रोत्रम् तै० स० ५ ३ ६ २]

वयोनाधैः वयासि विज्ञानानि नह्यन्ति यैर्विद्वद्भि, वेदादिशास्त्रप्रज्ञापनप्रवन्धकै (देवै =विद्वद्भि), वयासि जीवनादीनि गायत्र्यादिछन्दासि वा नह्यन्ति यै प्राणैस्तै, पूर्णविद्याविज्ञानप्रचारप्रवन्धकै (देवै), ये वय कामयमान जीवन नह्यन्ति तै (देवै) १४ ७ [वयस् इति व्याख्यातम् । तदुपपदे णह वन्धने (दिवा०) धातो 'कर्मण्यण्' इत्यण् 'नहो ध ' इति हस्य ध]

वयोवयः कमनीय जीवन जीवनम् ५ १५.४ [वयस्पदस्य वीप्सायां द्विर्वचनम्]

वयोवृधः ये वयसा वर्धन्ते, वयो वर्धयन्ति वा (विद्वज्जना) ५ ५४ २ [वयस् इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

वयोवृधा ये वय कमनीय जीवन वर्धयन्ते (रात्रिदिने) ५ ५ ६ [वयस् इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप् । ततो द्विवचनस्याकारश्छान्दसम्]

वय्यम् यो वयते जानाति तम् (विद्वज्जनम्), प्र०—अत्र वयवातोर्वाहुलकादौणादिको यत्प्रत्यय १ ५४ ६ ज्ञातारम् (विद्वास जनम्) १ ११२ ६ **वय्याय**=तन्तुसन्तान-

विसर्जनम् यजमानेन होतृभिश्च हविपस्त्यागो मौन वा ११५ [वि+सृज विसर्गे (तुदा०) धातोर्भावे ल्युट्]

विसर्पत विशेषेण गच्छत १२४५ **विसर्पति**= विविधतया गच्छति, भा०—सर्प इव गच्छति २३५६ [वि+सृप्लृ गतौ (भ्वा०) धातोर्लोट् । अन्यत्र लट्]

विसर्माणम् यो विसृजति तम् (वित्त=धन भोग वा) ५४२९ [वि+सृप्लृ गतौ (भ्वा०) धातो कर्त्तरि मनिन्]

विसस्रे विशेषेण सरति गच्छति ७३६१ विविध-तया प्रकाशयति ऋ० भू० ३१७, ऋ० १०७१४. [वि+ सृ गतौ (भ्वा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम् । विसस्रे विवृणुते नि० ११९]

विसात् विभजति ५४५२ [वि+पण सम्भक्तौ (भ्वा०) धातोर्लेडि छान्दस रूपम्]

विसारे विशेषेण स्थिरत्वे १७९१ [वि+सृ गतौ (भ्वा०) धातो 'सृ स्थिरे' अ० ३३१७ सूत्रेण घञ्]

विसीमतः विशेषेण सीमातो मर्य्यादात, भा०— सुनियमेन स्वकक्षाया, प्र०—अत्राऽऽह यास्क अपि वा सीमेत्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्मणि सीम्न सीमत सीमातो मर्यादात सीमा मर्यादा विषीव्यति देशा-विति नि० १७, १३३ [वि-सीमन्पदयो समासे पञ्च-म्यन्तात् तसि । सीमत सर्वत नि० १७ सीमिति परि-ग्रहार्थीयो वा पदपूरणो वा नि० १७ अपि वा सीमेत्येतद् अनर्थकमुपबन्धमाददीत पञ्चमीकर्मणिम्-सीम्न सीमत सीमातो मर्यादात । सीमा मर्यादा विसीव्यति देशाविति नि० १७]

विसृज विसर्जय ३८१७ निष्पादय १३९० **विसृ-जति**=विविधतया सृजति १४८६ [वि+सृज विसर्गे (तुदा०) धातोर्लोट् । अन्यत्र लट्]

विसृजद्भ्यः शत्रूणामुपरि शस्त्रादिक त्यजद्भ्य (राजजनेभ्य) १६२३ [वि+सृज विसर्गे (तुदा०) धातो शतृ]

विसृजानः उत्पादयन् (सविता=जगदीश्वर) ७३८२ [वि+सृज विसर्गे (तुदा०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

विसृतः ये विशेषेण सरन्ति तान् (सिन्धून्=नदी.)

वीणावादम् वाद्यविशेषम् ३०.१९. [वीणा-वाद-पदयो समास । वीणा=वी गतिव्याप्त्यादिषु (अदा०) धातो 'रास्नासास्ना०' उ० ३.१५ सूत्रेण न-प्रत्ययान्तो निपात्यते । तत स्त्रिया टाप्]

वीत विविधतया प्राप्नुत १२.४५ **वीतम्**=व्याप्नुत १ ९३ ७ प्राप्नुत व्याप्नुत वा ६ ६० १५. **वीताम्**=व्याप्नुताम् २८ १४ प्राप्नुताम् २८ ७ **वीयः**=व्याप्नुथ १ १५१ ३ कामयेथाम् १ १५१ ७ **वीहि**=प्राप्नुहि कामय वा ६ ५० २ व्याप्नुहि १४. [वी गतिव्याप्ति-प्रजनकान्त्यसनखादनेषु (अदा०) धातोर्लोट् वीय प्रयोगे लडपि]

वीततमानि अतिशयेन व्याप्तु समर्थानि (उत्तम-हवीषि) ७ १ १८ [वीतप्राति० अतिशायने तमप् । वीतम्=वी गतिव्याप्तिप्रजनादिषु (अदा०) धातो क्त]

वीतपृष्ठः वीत व्याप्त पृष्ठ यस्य सः (अ०—यज्ञ) २५.३० वीता व्याप्ता पृष्ठा विद्यासिद्धान्ता येन स· (विद्वज्जन) १ १६२ ७ **वीतपृष्ठाः**=वीत व्याप्त पृष्ठ पृथिव्यादितत्त्व यैस्ते (विद्युदादयोऽश्वा) १ १८१ २ विविधानीतानि विदितानि पृष्ठानि प्रच्छन्नानि याभिस्ता (पूर्णविद्या-सुशिक्षायुक्ता बालिका) १९ ४४ वीतानि व्याप्तानि लोकलोकान्तराणा पृष्ठानि यैस्ते (हरित=किरणाः) ५.४५ १० [वीत-पृष्ठपदयो समास । वीतम्—वी गतिव्याप्त्यादिषु (अदा०) धातो क्त । अथवा वि+इण् गतौ (अदा०) धातो क्त. । पृष्ठम्=पृषु सेचने (भ्वा०) धातो 'तिथपृष्ठगूथयूथप्रोथा' उ० २ १२ सूत्रेण थक्-प्रत्ययान्तो निपात्यते]

वीतपृष्ठा वीते व्याप्तिशीले पृष्ठे ययोस्तौ (अश्वौ) ३.३५ ५ [वीतपृष्ठमिति व्याख्यातम् । ततो द्विवचनस्या-कारादेश]

वीतम् प्राप्तम् (अश्वम्) २५.३७. गमनशीलम् (हविः) १७ ५७ व्याप्तिशीलम् (अग्निम्) १ १६२ १५ व्याप्तम् (अग्नि=विद्युदाख्यम्) ४ ७ ६ [वी गतिव्याप्ति-प्रजनादिषु (अदा०) धातो क्त । वीतम् अश्नीतम् नि० ४ १९]

वीतये विज्ञानादिप्राप्तये ५ ५१ ५ ज्ञानाय भोगाय वा, प्र०—वी गति-व्याप्ति-प्रजनकान्त्यसनखादनेषु इत्य-स्मात् 'मन्त्रे वृषेष-पच-मन-विद-भू-वी-रा उदात्त' अनेन क्तिन्—प्रत्यय उदात्तत्व च १ ५ ५. विद्यादिशुभगुणव्याप्तये ६ १६ १०. विज्ञानाय १.७४.४. धर्मप्रवेशाय, आनन्द-प्राप्तये १.१३५ ४. कामनायै १.१३५ ३ [वी गतिव्याप्ति-प्रजनकान्त्यसनखादनेषु (भ्वा०) धातो 'मन्त्रे वृषेष०' सूत्रेण क्तिन् । वीतये पानाय नि० ५ १८ वीहि (यजु० ११ ४६) अग्नऽआयाहि वीतयऽइत्यवितवऽइत्येतत् श० ६ ४.४ ९]

वीतहव्यम् प्राप्तप्राप्तव्यम् (सत्पुरुषम्) ७ १९ ३ **वीतहव्ये**=वीत व्याप्त हव्य ग्रहीतव्य वस्तु येन तस्मिन् (व्यवहारे) ६.१५.२ [वीत-हव्यपदयो समास । वीतम्=वी गतिव्याप्त्यादिषु (अदा०) +क्त. । हव्यम्=हु दाना-दानयो. (जु०) धातोर्यत्]

वीता वीतानि प्राप्तानि (वृजिना=बलानि) ४ २ ११ [वीतप्राति० शेर्लोपश्छन्दसि । वीतमिति व्याख्यातम्]

वीतिहोत्रम् वीतयो विज्ञापिता होत्राख्या यज्ञा येनेश्वरेण त यद्वा वीतय प्राप्तिहेतवो होत्राख्या यज्ञक्रिया भवन्ति यस्मात्त परमेश्वर भौतिक वा (अग्निम्), प्र०—वी गतिव्याप्ति०' इत्यस्य रूपम् २ ४ गृहीतेश्वरव्याप्ति (जगत्) २ ३८ १. वीतेर्व्याप्तेर्होत्र ग्रहण यस्मात्तम् (विद्वज्जनम्) ५.२६ ३ **वीतिहोत्रः**=वीताना शुभगुण-व्याप्ताना विद्याना होत्र स्वीकरण यस्य स. (अग्नि.=विद्वज्जन) ३ २४ २ प्राप्ताऽप्राप्तविज्ञान (ऋत्विग्जन) १ ८४ १८. **वीतिहोत्राः**=वीति. सर्वत प्रकाशितो होत्रो यज्ञो येषा ते (देवा=कामयमाना विद्वास) १७.७८. [वीति-होत्रपदयो समास । वीति=वी गतिव्याप्ति-प्रजनादिषु (अदा०) धातो 'मन्त्रे वृषेषपच०' सूत्रेण क्तिन् । होत्रम्=हु दानादानयो (जु०) धातोरौणा० ष्ट्रन् । होत्रा यज्ञनाम निघ० ३ १७. वाङ्नाम निघ० १ ११]

वीती कामनया ६ १६.४६ वीत्या व्याप्त्या ६ ६ १. [वीतिप्राति० 'सुपा सुलुक्०' सूत्रेण टा-स्थाने पूर्वसवर्ण-दीर्घ । वीतिपद व्याख्यातम्]

वीध्र्याय विविधेषु ईक्षेषु दीपनेषु भवाय (भृत्याय), प्र०—अत्र विपूर्वकादिन्धिधातोरौणादिको रक् प्रत्यय १६.३८ [वीध्रप्राति० भवार्थे यत् । वीध्रम्=वि+इन्धी दीप्तौ (रुधा०) धातो. 'वाविन्धे' उ० २ २६ सूत्रेण रक् प्रत्यय]

वीनुहि विशेषतया व्याप्नुहि ६ १० ७ **वीनोषि**=प्रेरयसि ६ ५ ३ **वीनोति**=विशेषेण प्राप्नोति, प्र०—इन्वतीति गतिकर्मा निघ० २ १८, ६ ४ ३ [वि+इन्वति गतिकर्मा (निघ० २ १८) व्याप्तिकर्मा निघ० २ १८ ततो लोट्, अन्यत्र लट्। अथवा-वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लोट्लटौ। विकरणव्यत्ययेन श्नु.]

[वि+डुधाञ् धारणपोषणयो (जु०)+क्त। 'दधातेर्हि' रितिधातोर्ह्यादेश]

विहुत्मतीनाम् जुह्वति स्वीकुर्वन्ति याभिस्ता विहुतो, विहुतो मतयो यासु तासाम् (विशा=प्रजानाम्) १ १३४ ६ [विहुत्मतिपदयो समास। विहुत्=वि+हु दानादानयो (जु०) धातो क्विप् करणे]

विहोत्राः विविधतया ये जुह्वत्याददति वा ते (विप्रा.=मेधाविजना) ५ १४ [वि+हु दानादानयो (जु०) धातोर्वाहु० औणा० ष्ट्रन्। अथवा वि-होत्रापदयो समास। होत्रा वाङ्नाम निघ० १ ११ यज्ञनाम निघ० ३ १७]

विह्रुतः विशेषेण कुटिलान् (अ०—सर्पान्) २५ ७ [वि+ह्रुङ् कौटिल्ये (भ्वा०) धातो क्तप्रत्यये पृषोदरादिना रूपम्]

विह्वयन्ते विशेषतया स्पर्द्धन्ते ४ २४ ३ विशेषेण प्रशंसेयु ४ ३६ ५ विह्वयामहे=विविधैः शब्दैः स्तुम १ ३६ १३ विशेषेण स्पर्द्धामहे ११ ४२ **विह्वयेते**=विस्पर्द्धेते २ १२ ८ [वि+ह्वेञ् स्पर्द्धायां शब्दे च (भ्वा०) धातोर्लट्]

विंशतिम् एतत्सख्याताम् (सेनाम्) ७ १८ ११ विंशती=चत्वारिंशत् (गतय) २७ ३३ [विंशति द्विदशतः नि० ३ १० प्रजापतेर्विस्रस्तादाप आयस्तास्वितास्वविशद् यदविशत् तस्माद् विंशतिः श० ७ ५ २ ४४ द्वौ दशतौ परिमाणमस्य सघस्येति विग्रहे 'पक्तिविंशति०' अ० ५ १ ५९ सूत्रेण द्वयोर्दशतोर्विन्भाव शतिच् प्रत्ययश्च निपात्यते]

वीक्षिताय विशेषेण कृतदर्शनाय (जीवाय) २२ ८ [वि+ईक्ष दर्शने (भ्वा०) धातो क्त]

वीडयस्व दृढान् कारय ६ ४७ २६ प्रेरयस्व ३ ५३ १९ वलयस्व ६ ४७ ३० स्तुहि २ ३७ ३ **वीडयेथाम्**=दृढबलौ भवेताम् ६ ३५ [वीडयस्व सस्तम्भम्व नि० ९ १२ वीडयति व्रीडयतिश्च सम्तम्भकर्माणौ नि० ५ १६ वीडयस्व=दृढीभव नि० ८ ३]

वीडवे प्रशसनीयाय बलाय ६ २४ ८ **वीडुः**=प्रशसित (इन्द्र=ऐश्वर्यवान् जन) ३ ५३ १७ **वीडोः**=बलवन् प्रशसितस्वभाव (आचार्य) ३ ५३ १९ **वीडोः**=बलवत (अमुन्वत=यज्ञकर्त्तुर्विरोधिजनस्य) ११ १४ **वीडौ**=प्रशसनीये बले ३ ३१ ५ [वीडु बलनाम निघ० २ ९ वि+ईड स्तुतौ (चुरा०) धातोर्वाहु० औणा० उ]

वीडितः विविधैर्गुणैः स्तुत (इन्द्र.=राजा) २ २१ ४ [वि+ईड स्तुतौ (चुरा०) धातो क्त]

वीडिता स्तुतानि (कर्म्माणि) ६ २२ ६ प्रशसितानि (वस्तूनि) २ २४ ३ [वीडित इति व्याख्यातम्। ततो शेर्लोपश्छन्दसि]

वीडु दृढ बलम् १ ६ ५ **वीडूनि**=दृढानि बलकारीणि (आयुधा=अस्त्रशस्त्राणि), प्र०—अत्र ईषा अक्षादित्वात् प्रकृतिभाव १ ३९ २ अत्यन्त दृढानि प्रशसितानि च (शस्त्रास्त्राणि) ऋ० भू० १५१, [वीळु बलनाम निघ० २ ९]

वीडुजम्भम् वीडु बलवज्जम्भो मुखमिव ज्वाला यस्य तम् (अग्निम्) ३ २९ १३ [वीडु-जम्भपदयो समास]

वीडुद्वेषाः दृढद्वेषा (दुष्टाचारिजना) २ २४ १३ [वीडु-द्वेषपदयो समास। द्वेष=द्विष अप्रीतौ (अदा०) धातोर्घञ्]

वीडुपत्मभिः बलेन पतनशीलैः (जूतिभि=युद्धक्रियाभि) १ ११६ २ [वीडु-पत्मन्पदयो समास। पत्मन्=पत्लृ गतौ (भ्वा०) धातोर्मनिन्]

वीडुपविभिः दृढचक्रैः (रथेभि) ५ ५८ ६ [वीडु-पविपदयो समास। पवि वज्रनाम निघ० २ २०]

वीडुपाणिभिः वीडूनि दृढानि बलानि पाणयो ग्रहणसाधनव्यवहारयोर्येषा तैः (अ०-पवनैः) प्र०—वीड्वीति बलनाम निघ० २ ९, १ ३८ ११ **वीडुपाणिः**=वीडु बल पाणयो यस्य सः (तनय=पुत्र) ७ १ १४. [वीडु-पाणिपदयो समास]

वीडुहर्षिणः बलेन बहु हर्षो विद्यते यस्य तस्य (कुपुरुषस्य) २ २३ ११ [वीडु-हर्षिन्पदयो समास। हर्षिन्=हर्षप्राप्ति० भूम्न्यर्थ इनि]

वीड्वङ्गम् वीडूनि बलयुक्तानि दृढानि अङ्गानि यस्य तम् (अश्वं=विद्युतम्) १ ११८ ९ **वीड्वङ्गः**=वीडूनि दृढानि बलिष्ठान्यङ्गानि यस्य सः (अर्वा=विज्ञानयुक्त पुत्र) ११ ४४ प्रशसिताङ्ग (वनस्पति=वनादिपालको विद्वान् राजा) २९ २२ [वीडु-अङ्गपदयो समास। वीडु बलनाम निघ० २ ९ वीड्वङ्ग दृढाङ्ग नि० ९ १२]

वीड्वी बलवती (स्त्री), प्र०—वीड्वीति बलनाम निघ० २ ९, ६ ३५ **वीड्वीः**=विशेषेण स्तोतुं योग्या (द्वारः=द्वाराणि) २८ १३ [वीडु बलनाम निघ० २ ९ ततो 'वोतो गुणवचनात्' सूत्रेण ङित्त्वया ङीप्। अथवा वि+ईड स्तुतौ (चुरा०) धातोर्वाहु० औणा० विन्]

वीरवत्तमम् वीरा विद्वास. शूराश्च विद्यन्ते यस्मिन् तदतिशयित वीरवत्तमम् (रयिं=विद्यामुवर्णाद्युत्तम-धनम्) १ १ ३ विद्या, शौर्य, धैर्य, चातुर्य, बल, पराक्रम, दृढाङ्गता, धर्मात्मता और न्याययुक्त अत्यन्त वीर-पुरुष को आर्याभि० १ ३, ऋ० १ १ १ ३. प्रतिदिन बुद्धि बलवीर्यशौर्यधैर्यादिगुणयुक्ता. पुत्रबन्धुमित्रभृत्यादयो वीरा भवन्ति यस्मिन् धने तत् वे० भा० न० । [वीरवत्-प्राति० अतिशायने तमप् । वीरवत्=वीरप्राति० भूम्न्यर्थे प्रशसाया वा मतुप्]

वीरवन्तम् प्रशस्ता वीरा विद्यन्ते यस्मिँस्तम् (रयिम्) १.६४ १५ बहुवीराऽऽढ्यम् (धनम्) ५ ४ ११ वीरा भवन्ति यस्मात्तम् (रयिं=श्रियम्) २ ११ १३ **वीरवन्तः**= वीरपुत्रा (जना) ४ ५० ६ [वीरप्राति० प्रशसायामर्थे मतुप् । ततो द्वितीयैकवचनम्]

वीरवाहः ये वीरान् वहन्ति प्रापयन्ति ते (देवा = विद्वास) ७ ४२ २ [वीरोपपदे वह प्रापणे (भ्वा०) धातो 'वहश्च' अ० ३ २ ६४ सूत्रेण ण्वि]

वीरशुष्मया वीराणा योद्धृणा शुष्माणि बलानि यस्या तया सेनया सह १ ५३ ५ [वीर-शुष्मपदयो समासात् स्त्रिया टाप् । शुष्मम् बलनाम निघ० २ ९.]

वीरसूः वीरसन्तानोत्पादिका (स्त्री) ऋ० भू० २१४, शूरवीर पुत्रो को जनने वाली (स्त्री) स० प्र० १५२, अथर्व० १४ २ १८ [वीरोपपदे पूङ् प्राणिगर्भविमोचने (अदा०) धातो 'सत्सूद्विष०' अ० ३ २ ६१ सूत्रेण क्विप्]

वीरहणम् यो वीरान् हन्ति तम् (जनम्) ३० ५ [वीरोपपदे हन हिंसागत्यो (अदा०) धातो क्विप्]

वीरा विक्रान्तकर्माणौ (अध्यापकाऽध्येतारौ) २ ३९ १ [वीरप्राति० द्विवचनस्याकारादेशश्छान्दस]

वीरासः व्याप्तविद्याबला (मर्यास =मनुष्या) ५ ६१ ४ शूरवीरा (जना) ६ ७ ३ [वीरप्राति० प्रथमाबहुवचने जसोऽसुगागम]

वीरिटे अन्तरिक्षे ३३ ४४ [वीरिट तैटीकिरन्तरिक्ष-मेवमाह पूर्वं वयतेरुत्तरमिरतेर्वयासीरयन्त्यस्मिन् भासि वा नि० ५ २७ वीरिटम् अन्तरिक्ष भियो वा भासो वा तति नि० ५ २७]

वीरुत्सु सत्तारचनाविशेषेण निरुद्धेषु कार्यकारण-द्रव्येषु, प्र०—वीरुध इति पदनाम निघ० ४ ३, १ ६७ ५.

वीरुधः प्रतिविरूता लताः १.१४१.४. ओषधय. २.३५.८. सोमादीन् (ओषधी) १२ ७७ वृक्षप्रभृतय (ओषधय) १२ ९४ गुल्मविशेषा १८ १४ वनस्थान् वृक्षान् १२.३३. **वीरुधाम्**=लतावृक्षादीना मध्ये २ १ १४ [वि+रुधिर् आवरणे (रुधा०) धातो क्विप् । रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्वा क्विप् । उपसर्गस्य दीर्घत्व धातोर्हकारस्य धकारश्च । वीरुध ओषधयो भवन्ति विरोहणात् नि० ६ ३ वीरुध पदनाम निघ० ४ ३]

वीरेभिः वीरं (पुरुषं) १९ ५३ [वीरप्राति० 'बहुल-च्छन्दसी' ति भिस ऐसादेशो न भवति]

वीर्यकृतः यो वीर्यं करोति तस्य (इन्द्रस्य= परमैश्वर्यस्य) १० २५ [वीर्योपपदे डुकृञ् करणे (तना०) धातो कर्तरि क्विप् । ह्रस्वस्य तुगागम]

वीर्यम् पृथिव्यादिलोकाना बलम् १ ९३ ४ पराक्रम बल वा १ ५७ ५. सर्वाङ्ग-स्फूर्त्ति १९ ९ अनन्तपराक्रम-वान् (परमात्मा) १९ ९ सामर्थ्य को म० वि० १९५, ९ ११३.१ वीरस्य कर्म्म पराक्रम वा २ ८ शरीरबलकर घृतादि २० ५८ वीरेषु साधु (भा०—बलारोग्यम्) २१ ३१ विद्याधर्माभ्या सुष्ठ्वात्मबलम् १.१२९ ७ **वीर्यस्य**= वीरकर्म्मण, प्र०—अत्र 'अधिगर्थदयेशा कर्मणि' अ० २ ३ ५२. इति कर्मणि षष्ठी ३४ २३ वीरस्य कर्मण ३ ४६ १ **वीर्याणि**=आकर्षणप्रकाशयुक्तादिवत्कर्माणि १ ३२ १ पराक्रमयुक्तानि कर्म्माणि १ १०८ ५ वीरेषु साधूनि बलानि ३ ३० ३. **वीर्याय**=योगबलाय १९ ९० पराक्रमसम्पादनाय १ ६१ १४ वीर्यवृद्धये ३० ११ **वीर्यैः**=पराक्रमविज्ञानादिभि २ २२ ३ [वीरप्राति० भवार्थे साध्वर्थे हितार्थे वा यत् । वीर्याय वीरकर्मणे नि० १० १९. वीर्यं विष्णु तै० १ ७ २ २ वीर्यं वा इन्द्र ता० ९ ७ ५ ८ गो० उ० ६ ७ वीर्यं वा अग्नि तै० १ ७ २ २ गो० उ० ६ ७ वीर्यं षोडशी ता० २१ २ २ ७ इन्द्रिय वीर्यं षोडशी ता० २१ ५ ६ इन्द्रिय वै वीर्यं वाजिनम् ऐ० १ १३ वीर्यं त्रिष्टुप् श० ७ ४ २ २४ तिष्ठन्वै वीर्यवत्तर श० ६ ६ २ १]

वीर्या वीर्ययुक्तानि सैन्यानि ५ २९ १३ विद्यादि-वीर्याणि १ ८० १५ बलपराक्रमयुक्तानि कर्माणि ४ ३२ १० वीरेषु शत्रुप्रक्षेपकेषु विद्वत्सु साधूनि (वस्तूनि) २ १६ २ वीरेभ्यो हितानि धनानि २ ३०.१० पराक्रमयुक्तानि कर्म्माणि २ २१ ३ [वीर्यमिति व्याख्यातम् । ततश्शेलोप-श्छन्दसि]

वीव पक्षीव ७ ५५ २. [वि-इवपदयो. समास.]

वीयते विशेषेण गच्छति ५ १८ ३ [वि+वी गति-व्याप्त्यादिषु (अदा०) धातोर्लट्। अथवा वी धातावीकार-प्रश्लेष। व्यत्ययेन यगात्मनेपदञ्च]

वीर शुभगुणेषु व्यापनशील (विद्वज्जन) २ २६ २ शौर्यादिगुणोपेत (इन्द्र=विद्वज्जन) ६ २१ ६ अजति वेद्य जानानि प्रक्षिपति विनाशयति सर्वाणि दुःखानि वा यस्तत्सम्बुद्धौ (विद्वन् सभासेनाध्यक्ष), प्र०—अत्र 'स्फायि-तञ्चिवञ्चि०' उ० २ १२ अनेनाजेरक्प्रत्यय १ ३० ५ **वीरम्**=पूर्णशरीरात्मबलप्रदम् (यज्ञ=पठनपाठन-श्रवणोपदेशास्यम् १ ४० ३ उत्तम-सन्तानम् २ ३२ ४ प्राप्तविज्ञानादिगुणम् (राध=धनम्) २७ २७ शत्रूणां हन्तार युद्धकुशल निर्भयम् (राजानम्) ऋ० भू० २८४, बलवन्तम् (पुरुषम्) २० ४० शत्रुबलानि व्याप्नुवन्तम् (राजाऽध्यापकोपदेशकजन) विक्रान्त जनम् ४ २३ वीरवन्तम् (जनम्) ६ ५० ६ दोग्धारम् (राजपुरुषम्) ७ ३४ ६ सर्वदुःखप्रक्षेप्तारम् (यज्ञम्) ३७ ७ **वीरः**=अजति व्याप्नोति शत्रुबलानि यः (वायु परमेश्वर, सोम-लतादिसमूहरसो वा) १ १८ ४ अजति सकलविद्या प्राप्नोति सः (मनुष्य) २ ३ ६ विद्यमानबल (पुरुषार्थि-जन) ३ ५५ २० विज्ञानवान् शत्रूणां प्रक्षेप्ता (जन) २२.२२ विद्यया प्राप्तशरीरात्मबल (विद्यार्थी राजपुरुषो वा) ४ २३ २ व्याप्तविद्याशौर्यादिगुण (पुत्रः) ४.२४ १ शत्रूणां सेनाबल व्याप्तुं शील (सेनापति) १ ८१ २. शुभगुणकर्मस्वभावव्यापक (इन्द्र=सूर्य इव राजा) ७ २० २. निर्भय (राजा) ७ ३२ ६ बलिष्ठ (इन्द्र=राजपुरुष) ४ २५ ६ शत्रूणां दारिता (इन्द्र=सेनापति) १७ ३६ **वीराः**=क्षात्रधर्मयुक्ता (जना) ३ ५५ २१ प्राप्तविज्ञाना (जना) ७ १ १५ **वीरेषु**=सुभटेषु (वीर-जनेषु) २ २४ १५ **वीरैः**=प्रशस्तबलैः (जनैः) २६ ६ शौर्य-धैर्य-विद्या-शत्रुनिवारण-प्रजापालनकुशलैः (जनैः) ३ ३७ [अज गतिक्षेपणयोः (भ्वा०) धातोः 'स्फायितञ्चि०' उ० २ १२ सूत्रेण रक्। 'अजेर्व्यघञपोः' सूत्रेण धातोर्वी-आदेश। अथवा वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्वाहुः श्रौणा० रक्। वीरो वीरयत्यमित्रान् वेतेर्वा स्याद् गतिकर्मणो वीरयतेर्वा निः १ ७ अथवा वीर विक्रान्तौ (चुरा०) धातोः कर्त्तर्यच्। पुत्रो वै वीर श० ३ ३१ १२ अत्ता हि वीर श० ४ २१ ६ प्राणा वै दशवीरा (यजु० १६ ४८) श० १२ ८ १ २२]

वीरतमः वेति स्वबलेन शत्रुबल व्याप्नोति सोऽति-शयित (अग्नि=पावक इव सेनापतिः) १५ ५२ **वीरतमाय**=अत्युत्तमाय वीराय (राज्ञे) ३ ५२ ८ [वीरप्राति० अतिशायने तमप्]

वीरतमा अतिशयेन वीरौ (होतृ-यजमानौ), प्र०—अत्राऽऽकारादेशः ८ ५९ [वीरप्राति० अतिशायने तमप्। ततो द्विवचनन्याकारादेशः]

वीरताम् वीरस्य भावम् ७ १२ [वीरप्राति० भावे तल्। ततष्टाप् स्त्रियाम्]

वीरपत्नी वीरः पतिर्यस्याः सा (कन्या=विदुषी पत्नी) ६ ४९ ७ [वीर-पतिपदयो समासे स्त्रियां ङीप् नकारादेशश्च]

वीरपस्त्यः वीराः पस्त्ये गृहे यस्य सः (तनय=जन) ५ ५० ४ [वीर-पस्त्यपदयो समासः। पस्त्यं गृहनाम निघ० ३ ४]

वीरपेशाः वीराणां पेशो रूपमिव रूपं येषान्ते (मनुष्याः) ४ ११ ३ [वीर-पेशपदयो समासः। पेशः रूपनाम निघ० ३ ७]

वीरयध्वम् विक्रमयध्वम् १७ ३८ **वीरयस्व**=आरब्धस्य कर्मणः समाप्तिमाचर ११ ६८ [वीर विक्रान्तौ (चुरा०) धातोर्लोट्]

वीरया वीरयुक्तया (सेनया) ३३ ७० [वीरप्राति० स्त्रियां टाप्]

वीरवक्षणम् वीराणां वहनम् (वयुन=कर्म प्रतापः वा) ५ ४८ २ [वीर-वक्षणपदयो समासः। वक्षणम्=वह प्रापणे (भ्वा०) धातोर्ल्युट्। सुगागमश्छान्दसः। अथवा वक्ष रोषे (भ्वा०) धातोर्ल्युट्]

वीरवत् प्रशस्तवीरसदृशमन्नादिपदार्थमयं यज्ञम्, प्र०—अत्राऽर्श आदित्वादच् ८ ६३ बहवो वीरा विद्यन्ते यस्मिन् विज्ञाने तत् १ १९० ८ वीरा विद्यन्ते यस्मिँस्तत् (यश=कीर्त्तिम्) ५ ७९ ६ प्रशस्तवीरकारकम् (श्रव=अन्न श्रवणं वा) ४ ३६ ८ वीरैस्तुल्यम् (सुदेवम्=शोभन विद्वज्जनम्) २८ १२ शूरवीरतुल्या (स्त्रियः) ६ ६५ ३ वीरैर्युक्तम् (राज्यम्) २० ५४ [वीरप्राति० प्रशसाया मतुप्]

वीरवतीम् प्रशस्ता वीरा विद्यन्ते यस्यां ताम् (इष=सत्क्रियाम्), प्र०—अत्र प्रशसाया मतुप् १ १२ ११. **वीरवतीः**=बहवो वीरा सन्ति यासु ताः (उषासः=प्रभाताः) ३४ ४०. [वीरप्राति० प्रशसायामर्थे मतुवन्तात् ङीप्]

१ २७ १३. [वृजी वर्जने (अदा०) धातोर्लुडि छान्दस रूपम्]

वृङ्क्त त्यजत १ १७२ ३ [वृजी वर्जने (रुधा०) धातोर्लोट्]

वृङ्धि वर्जय १३ ४१ वर्धय ६ ७५ १२ वर्चय २६ ४६ [वृजी वर्जने (रुधा०) धातोर्लोट्]

वृचयाम् छेदन-भेदन-प्रकाराम् (अर्भाम्=शिल्पक्रिया वाच वा) १ ५१ १३ [ओव्रश्चू छेदने (तुदा०) धातोश्छान्दस रूपम्]

वृचीवतः वृचिरविद्याछेदन प्रशस्त यस्य तस्य (विद्वज्जनस्य) ६ २७ ५ छेदनवत (शिल्पिजनस्य) ६ २७ ७ **वृचीवन्तः** रोगाच्छादितवन्त (वीरा राजपुरुषा) ६ २७ ६ [वृचिप्राति० प्रशसाया मतुप्। वृचि=ओव्रश्चू छेदने (तुदा०) धातोरौणा० इन् किच्च]

वृजध्यै वर्जितुम् ३ ३१.१७ [वृजी वर्जने (अदा०) धातोस्तुमर्थेऽध्यैप्रत्यय]

वृजनम् वर्जन्ति दु खानि येन तद् बलम् ३४ ४८. शरीरात्मबलम् १ १८४ ६ सन्मार्गम् १ १७३.१३ गमनम् १ १८०.१० वर्जनीय बलम् ६ ११ ६ दु खत्यागम् १ १७६ ६. सद्गतिम् १ १७७ ५ धर्म्यं मार्गम् १ १७४ १० शत्रुनिकन्दन बलम् १ १६८.१० व्रजन्ति येन यस्मिन् वा (बलम्) ६ ३५ ५ योगबलम् ७ १२ **वृजनस्य**=दु ख-वर्जितस्य व्यवहारस्य १ १०१ ११ बलस्य पराक्रमस्य १ ६१ २१ **वृजनाः**=वृजन्ति येषु यैस्सह वा ते (नौकादय) ७ ३२.२७ **वृजने**=वर्जन्ति दु खानि येन बलेन तस्मिन् १ ५१ १५ अनित्ये कार्ये जगति २ २४ ११ वर्जन्ति दु खानि जना यत्र तस्मिन् व्यवहारे १ १०१ ८ वृजते शत्रून् येन तस्मिन् (आजौ=सङ्ग्रामे) १ ६३ ३ [वृजी वर्जने (अदा०) धातो 'कृपृवृजिमन्दि०' उ० २ ८१ सूत्रेण क्यु। वृजन बलनाम निघ० २ ६]

वृजना वृजन्ति यैस्तानि (यानानि) ५ ५४ १२ [वृजनमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

वृजनीषु वर्जनीयासु कक्षासु १ १६४ ६ [वृजी वर्जने (अदा०) 'कृपृवृजि०' उ० २ ८१ सूत्रेण क्यु। स्त्रिया ङीप् छान्दस]

वृजिनम् वर्जनीयम् (स्तेन=चोरम्) ६ ५१ १३. **वृजिनानि**=धनानि बलानि वा ५ १२ ५ बाधकानि (बलानि) ६ ५२ २ [वृजी वर्जने (अदा०) धातो 'वृजे किच्च' उ० २ ४७ सूत्रेण इनच्। वृजिनानि=वर्जनीयानि नि० १० ४१]

वृजिनवर्त्तनिम् वृजिनस्य बलस्य वर्त्तनिर्मार्गो यस्य तम् (नर=मनुष्यम्), प्र०—अत्र 'सह सुपा' इति समास १.३१ ६ [वृजिन-वर्त्तनिपदयो समास]

वृजिना वृजिनानि बलानि ४ २ ११ वर्जितव्यानि पापानि २ २७ ३ [वृजिनमिति व्याख्यातम्। ततश्शेर्लोपश्छन्दसि]

वृजिनान् पापान् ३ ३४.६ **वृजिनाः**=पापाऽऽचारा वर्जनीया (चौरा) ५ ३ ११. [वृजी वर्जने (अदा०) धातो 'वृजे किच्च' उ० २ ४७ सूत्रेण इनच्]

वृज्यते त्यज्यते १ ८३.६ **वृज्याम्**=त्यजेयम् २ २७ ५ **वृज्याः**=वृणक्तु ६ २८ ७ [वृजी वर्जने (अदा०) धातो कर्मणि लट्। अन्यत्र लिङ्]

वृज्याः वर्जनीया पीडा २ ३३ १४ [वृजी वर्जने (अदा०) धातो 'ऋदुपधाच्च०' अ० ३ १ ११०. सूत्रेण क्यप्। ततष्टाप्]

वृञ्जते त्यजन्ति ७ २४ **वृञ्जन्ति**=त्यजन्ति, प्र०—अत्र व्यत्ययेन परस्मैपदम् ६ ३६ २ **वृञ्जे**=वृञ्जते, प्र०—अत्र 'लोपस्त आत्मनेपदेषु' इति तलोपो व्यत्ययेनाऽऽत्मनेपदञ्च १ १४२ ५ त्यजामि ६ ११ ५ छिनद्मि १ ११६ १ [वृजी वर्जने (रुधा०) धातोर्लट्। व्यत्ययेनात्मनेपदम्]

वृणक् वृणक्ति ७ १८ १२ छिनत्ति ६ १८ ८ **वृणक्ति**=छिनत्ति ३ २६ ६ सम्भजति ४ ७ १० वर्जयति, प्र०—अत्राऽन्तर्गतो ण्यर्थ ४ २६ दूरीकरोतु ६ ५१ १६ त्यजति १ १२४ ६ **वृणक्तु**=पृथक्करोतु १६ ५० परित्यजतु १६ १२ छिन्नो भवतु १३ ४५ **वृणक्षि**=त्यजसि १ ५४ ५ [वृजी वर्जने (रुधा०) धातोर्लट्। अडभाव-श्छान्दस। अन्यत्र लोट्। वृणक्ति वधकर्मा निघ० २ १६]

वृणते स्वीकुर्वन्ति ६ १७ ८. सम्भजन्ति १ १४१ ६ सम्भजन्ते १ ५८ ७ **वृणीत**=स्वीकुर्यात् ४ ८ वृणीते, प्र०—अत्र लडर्थे लङ् १ १३ **वृणीते**=स्वीकुरुते ४ २५ ३ **वृणीध्वम्**=स्वीकुरुत ५ २८ ६ **वृणीमहि**=सभरेमहि १ १३६ १ **वृणीमहे**=स्वीकुर्महे १ १२१ **वृणीष्व**=स्वीकुर्य्या ४ ३१ ११ **वृणे**=स्वीकरोमि ३ १२ ३ शुभगुणैराच्छादयामि ३ ३७ ६. प्राप्नुयाम् ३ १२ ५ **वृण्वते**=सम्भजन्ते १ ५४ स्वीकुर्वन्ति ७.३२.१६ **वृण्वे**=स्वीकुर्य्याम् ४.२१ ८. [वृञ् वरणे

विरिति शकुनिनाम वेनेर्गतिकर्मण निं० २ ६]

वी: व्यापक (विद्वज्जन) १ ४३ ६. [वी गति-व्याप्तिप्रजनादिषु (अदा०) धातो क्विप्]

वुरीत वृणुयात्, प्र०—अत्र व्यत्ययेनात्मनेपद 'बहुल छन्दसि' इति शपो लुक्, लिङ्-प्रयोगोऽयम् २२ २१ वृणीयात् ४ ८ स्वीकुर्यात् ११ ६७ [वृञ वरणे (क्रया०) धातो-र्लिङि छान्दस रूपम्]

वृकतातिः वृको वज्र एव २ ३४ ६ [वृकप्राति० स्वार्थे तातिल् छान्दस । वृक वज्रनाम निघ० २ २०]

वृकतिः वृकवच्छवुर्हिसक (शत्रुजन) ४ ४१ ४. [वृकप्राति० प्रशसायामर्थे 'वृकज्येष्ठाभ्याम्०' अ० ५ ४ ४१ सूत्रेण तिल्]

वृकद्वरसः वृकस्य मेघस्य द्वाराणि २ ३० ४ [वृक-द्वरस्पदयो समास । वृक पदनाम निघ० ४ २.]

वृकम् अजादीना हन्तारम् (पशुविशेषम्) १६ १० विद्युतम् १ १०५ ११ स्तेनम् ७ ३८ ७ चोरम् ६ १६ **वृकस्य**=वृक इव वर्त्तमानस्य चोरस्य २ २६ ६ व्याघ्रस्य ३३ ५१ वन्यस्य पशुन १ ११७ १६ यो वृश्चति छिनत्ति तस्य (पशुविशेषस्य) १६ ६२ **वृकः**=स्तेनो व्याघ १ १०५ ७ चित्रक २४ ३३ वृकवदुत्कोचकश्चोर २ २८.१० वज्र २१ ३८ यथा चन्द्रमा शान्तगुणस्तथा १ १०५ १८ **वृकेन**=छेदकेन शस्त्राऽस्त्रादिना १ ११७ २१ [वृञ् वरणे (स्वा०) धातो 'सृवृभूशुपिमुपिभ्य कक्' उ० ३ ४१ सूत्रेण कक्। वृक वज्रनाम निघ० २ २० स्तेन-नाम निघ० ३ २४ पदनाम निघ० ४ २ वृकश्चन्द्रमा भवति विवृतज्योतिष्को वा विकृतज्योतिष्को वा विक्रान्त-ज्योतिष्को वा। आदित्योऽपि वृक उच्यते यदा वृङ्क्ते। श्वापि वृक उच्यते। विकर्त्तनात् नि० ५.२०-२१ वृको लागल भवति विकर्त्तनात् नि० ६ २६ अथ यत् कर्णा-भ्यामद्रवत् ततो वृक समभवत् श० ५ ५ ४ १० मूत्रा-देवास्यौजोऽस्रवत्। स वृकोऽभवद् आरण्याणा पशूना जूति श० १२ ७ १ ८]

वृकीः स्तेनस्त्री, प्र०—अत्र 'सुपा सुलुक्०' इति सो स्थाने सु १ ११७ १८ [वृद्धवाशिन्यपि वृक्युच्यते नि० ५ २१ वृकप्राति० स्त्रिया ङीप्। जातिवाचित्वात्]

वृक्कः रोगादिवर्जयिता (ईश्वर) १ १८७ १० **वृक्काभ्याम्**=याभ्या वर्जन्ति ताभ्याम् (क्रियाभ्याम्) २५ ८ [वृजी वर्जने (अदा०) धातोर्बाहु० श्रीणा० क्नन् स च कित्]

वृक्णास. छिन्नाऽविद्या (ऋत्विज) ३.८ ७ [ओव्रश्चू छेदने (तुदा०) धातो क्त। 'ओदितश्चे' ति निष्ठानत्वम्। 'ग्रहिज्या०' इत्यादिना सम्प्रसारणम्। ततो जसोऽसुक्]

वृक्तबर्हिषः वृक्त वर्जित बर्हिर्यैस्ते (विद्वज्जना) ३३ ५८ वृक्त छेदित धूमेन बर्हिरन्तरिक्ष यैस्ते ऋत्विज ३ २ ५ शिल्पफलनिष्पादिन ऋत्विज १ ३ ३ वृक्त विदीर्णीकृत हुतपदार्थैरन्तरिक्ष यैस्त ऋत्विज ५ ३५ ६ वृक्त छेदित बर्हिरुदक येन तस्य (विद्युत इवाऽध्यापकस्य), प्र०—बर्हिरित्युदकनाम निघ० १ १२, ६ ६८ १ श्रोत्रिया ऋत्विज इव सर्वविद्यासु कुशला ५ २३ ३ वृक्त वर्जित बर्हिर्यस्मिन् तस्य (निवासस्य) ५ ६ २ [वृक्त-बर्हिष्पदयो समास। वृक्तम्=वृजी वर्जने (अदा०) धातो क्त। बर्हिष्—बर्हि अन्तरिक्षनाम निघ० १ ३ उदकनाम निघ० १ १२ पदनाम निघ० ५ २ वृक्तबर्हिष ऋत्विङ्नाम निघ० ३ १८]

वृक्ये वृकेषु स्तेनेषु भवे व्यवहारे ६ ५१ ६ वृकस्य स्तेनस्य स्त्रियै स्तेन्यै १ ११६ १६ [वृकप्राति० भवार्थे यत्। वृकीप्राति० वा चतुर्थी। आटोऽभावश्छान्दस]

वृक्षकेशा वृक्षा केशा इव येषा शैलाना ते ५ ४१ ११ [वृक्ष-केशपदयो समास]

वृक्षम् यो वृश्च्यते छिद्यते त कार्यकारणाख्य वा (जगत्) १ १६४ २० वृश्चनीय जल स्थल वा २ ३६ १ वटादिकम् ५ ५४ ६ अनादिमूलरूप कारण और शाखा-रूप कार्ययुक्त (जगत्) स० प्र० २८३, १ १६४ २० **वृक्षस्य**=छेद्यस्य (तरो) ६ ५७ ५ व्रश्चितु छेत्तु योग्यस्य ससाराख्यस्य राज्यस्य २३ २४ **वृक्षः**=यो वृश्च्यते छिद्यते स ससार १७ २० **वृक्षे**=व्रश्चनीये छेदनीये शत्रुसैन्ये १६ ५१ **वृक्षेभ्यः**=ये शत्रून् वृश्चन्ति छिन्दन्ति तेभ्य (जनेभ्य) पादपेभ्यो वा १६ ४० **वृक्षान्**=छेत्तुमर्हान् (वटादिकान्) ५ ८३ २ [ओव्रश्चू छेदने (तुदा०) धातो 'स्नुव्रश्चिकृत्युपिभ्य कित्' उ० ३ ६६ सूत्रेण स प्रत्यय। कित्त्वाद् गुणो न भवति। वृक्ष व्रश्चनात्। वृत्वा क्षा तिष्ठतीति वा नि० २ ६ श्रीर्वै वृक्षस्याग्रम् तै० ३ ६ ७ ४]

वृक्षि वर्जयेयम्, प्र०—अत्र वृजी वर्जने, इत्यस्मा-ल्लिङर्थे लुङ् 'छन्दस्युभयथा' इति सार्वधातुकाश्रयणादिण न। समीक्षा—वृजीत्यस्य सिद्धे सति सायणाचार्येण ओव्रश्चू इत्यस्य इत्यय मत्वा प्रमादादेवोक्तमिति

रक्। वृत्र मेघनाम निघ० १ १० वृत्र धननाम निघ० २ १० वृत्रो वृणोतेर्वा वर्त्ततेर्वा वर्धतेर्वा। यदवृणोत्तद् वृत्रस्य वृत्रत्वमिति विज्ञायते। यदवर्त्तत तद् वृत्रस्य वृत्रत्वमिति विज्ञायते। यदवर्धत तद् वृत्रस्य वृत्रत्वमिति विज्ञायते नि० २.१७ तत्को वृत्र ? मेघ इति नैरुक्ता। त्वाष्ट्रोऽसुर इत्यैतिहासिका नि० २ १६ वृत्रो ह वाऽइद सर्व वृत्वा शिश्ये। यदिदमन्तरेण द्यावापृथिवी स यदिद सर्व वृत्वा शिश्ये तस्माद् वृत्रो नाम श० १ १ ३ ४ स यद् वर्त्तमान समभवत् तस्माद् वृत्र श० १ ६ ३ ६ तथैवैतद् यजमान पौर्णमासेनैव वृत्र पाप्मान हत्वापहतपाप्मैतत् कर्मारभते श० ६ २.२ १६ पाप्मा वै वृत्र श० ११ १ ५ ७ (यजु० ११ ३३) वृत्रहण पुरन्दरमिति पाप्मा वै वृत्र पाप्महन पुरन्दरमित्येतत् श० ६ ४ २ ३. इन्द्रो वै वृत्रहा कौ ४ ३ वृत्रशङ्कु दक्षिणतोऽघस्यैवानत्ययाय श० १३ ८ ४ १. (यजु० १० ८) त्वयाय वृत्र वधेदिति त्वयाय द्विषन्त भ्रातृव्य वधेदित्येवैतदाह श० ५ ३ ५ २८ यदिमा प्रजा अशनमिच्छन्तेऽस्माऽएवैतद् वृत्रायोदराय वलिं हरन्ति श० १ ६ ३.१७ (इन्द्र) त (वृत्र) द्वेधान्वभिनत्तरय यत् सौम्य न्यक्तमान त चन्द्रमस चकाराथ यदस्या सूर्यमास तेनेमा प्रजा. उदरेणाविध्यत श० १ ६ ३ १७ वृत्रो वै सोम आसीत् श० ३ ४ ३ १३ अयैष एव वृत्रो यच्चन्द्रमा श० १ ६ ४ १३ महनाम्नीभिर्वा इन्द्रो वृत्रमहन् कौ० २३ २ (इन्द्र.) एताभि (अद्भि) ह्येनम् (वृत्रम्) अहन् श० १ १ ३ ८ वृत्रतुर (यजु० ६ ३४) इति वृत्र ह्येता (आप) अघ्नन् श० ३ ६ ४ १६ आपो ह वै वृत्र जघ्नुस्तेनैवैतद् वीर्येणाप स्यन्दन्ते श० ३ ६ ४ १४. महाहविषा ह वै देवा वृत्र जघ्नु श० २ ५.४ १ एतैर्वै (साकमेधै) देवा वृत्रमघ्नन्नेतैर्वेव व्यजयन्त येयमेषा विजितिस्ताम् श० २ ५ ३ १ (वृत्रस्य वधसमये) महान् घोष आसीत् ता० १३ ४ १ तस्य (वृत्रस्य) एतच्छरीर यद् गिरयो यदश्मान श० ३.४ ३ १३ वृत्रस्य ह्येष कनीनक (यदाञ्जनम्) श० ३ १ ३ १५ मरुतो हवै सातपना मध्यन्दिने वृत्र सन्तेपु. स, सतप्तोऽजन्नेव प्राणान् परिदीर्णः शिश्ये श० २ ५ ३ ३ मरुतो ह वै क्रीडिनो वृत्र हनिष्यन्तमिन्द्रमागत तमभित परिचिक्रीडुर्महयन्त श० २ ५ ३ २० स यो हैवमेत वृत्रमन्नाद वेदान्नादो हैव भवति श० १.६ ३ १७ वार्त्रघ्न वै पौर्णमास (हवि) इन्द्रो ह्येतेन वृत्रमहन्नथैतदेव वृत्रहत्य यदामावास्य (हवि) वृत्रं ह्यस्माऽएतज्जघ्नुपऽआप्यायनमकुर्वन् श० १.६.४ १२.]

वृत्रहणम् यो वृत्र मेघ सूर्य इव शत्रून् हन्ति तम् (वीरपुरुषम्) ६ १७ ११ येन वृत्र हन्ति तम् (वज्रम्) ६ २० ६ शत्रूणा हन्तारम् (इन्द्र=शालाध्यक्षम्) प्र०—अत्र 'हन्तेरत्पूर्वस्य' अ० ८ ४ २२ इति णत्वम् १ १०६ ६ **वृत्रहणौ**=वृत्रस्य मेघस्य हन्तारौ (इन्द्राग्नी=वायुसवितारौ) १ १०८ ३ **वृत्रहन्**=मेघहन्ता सूर्य इव शत्रुहन्त सेनापते १७ ४२ यो वृत्र धन हन्ति प्राप्नोति तत्सम्बुद्धौ (राजन्) ३.४० ८ प्राप्तधन (राजन्) ४ ३२ ११ **वृत्रहभिः**=यैं कर्मभिर्वृत्र हतस्तै ६ ६० ३ **वृत्रहा**=यो वृत्र मेघ हन्ति स (इन्द्र=वायु), प्र०—अत्र 'ब्रह्मभ्रूणवृत्रेषु क्विप्' अ० ३ २ ८७ अनेन हनधातो क्विप् १ १६ ८ यो दुःखप्रदान् शत्रून् मेघदोषान्वा हन्ति स (परमेश्वर ओषधिराजो वा) १.६१ ५ मेघहन्ता सूर्य इवाऽविद्याऽन्धकारनाशक ईश्वर १ ७४ ३. तत्तत्पापफलदानेन यो वृत्रान् धर्माऽवरकान् हन्ति स (इन्द्र=परमेश्वर सभाध्यक्षो वा) १ १००.२ यो वृत्र मेघ हन्ति स सूर्य २० ७५. मेघ का नाश करने वाला (सूर्य) स० वि० १६५, ६ ११३ १ [वृत्रमिति व्याख्यातम्। तदुपपदे हन हिंसागत्यो (अदा०) धातो 'ब्रह्मभ्रूणवृत्रेषु क्विप्' अ० ३ २ ८७ सूत्रेण क्विप्। वृत्रहणम्=मेघहनम् नि० ७ २३]

वृत्रहणा वृत्र दुष्टमसुरप्रकृति हन्तारौ सभासेनेशौ ३ १२ ४ यौ वृत्र मेघ हतस्तौ (विद्युतौ=राजाऽमात्यौ) ६ ६० ३. [वृत्रहणमिति व्याख्यातम्। ततो द्विवचनस्याकारादेशश्छान्दस]

वृत्रहत्याय मेघस्य हननाय ५.२६ ७ सङ्ग्रामाय ६ १८ ६ **वृत्रहत्ये**=वृत्रस्य हत्या हननमिव शत्रुहनन यस्मिन्त्सङ्ग्रामे तस्मिन् ४ १६ १ महासङ्ग्रामे ४ २४.२ वृत्रस्य शत्रुसमूहस्य मेघस्य वा हत्या हनन येन तस्मिन् सङ्ग्रामे १.१०६ ५. [वृत्रोपपदे हन हिंसागत्यो (अदा०) धातो 'हनस्त च' अ० ३.१ १०८ सूत्रेण क्यप् तकारश्चान्तादेश]

वृत्रहत्ये वृत्रस्य दुष्टस्य हत्ये हननाय ३३.५० [वृत्रोपपदे हन हिंसागत्यो (अदा०) धातो 'हनस्त च' सूत्रेण क्यप्]

वृत्रहथानाम् वृत्रा मेघा इव वर्त्तमाना शत्रवो हथा हता यैस्तेषाम् (पुरुषार्थियजनानाम्) ३ १६ १ [वृत्र-हथपदयो समास। हथ=हन हिंसागत्यो (अदा०) धातो 'हनिकुषि०' उ० २ २ सूत्रेण क्थन्]

वृत्रहन्तम यो वृत्र धन हन्ति प्राप्नोति सोऽतिशयित-

(क्रया०) धातोर्लट्। अन्यत्र लिड् लोट् च। वृण्वते प्रयोगे वृञ् वरणे (स्वा०) धातोर्लट्]

वृणानः स्तूयमान (सोम=उत्पन्न पदार्थसमूह) १ १०८ ६ **वृणानाः**=स्वीकुर्वाणा (प्रजापुरुषा) ७ १८ १२ [वृञ् वरणे (क्रया०) धातो शानच्]

वृतञ्चयः यो वर्त्तते त चिनोति स (शमादिशुभकर्माचारिजन) २ २१ ३ [वृतोपपदे चिञ् चयने (स्वा०) धातो खश्छान्दस। वृतम्=वृतु वर्त्तने (भ्वा०) धातोर्वाहु० औणा० क]

वृतम् स्वीकृतम् (क्षोद=उदकम्) ६ १७.१२ स्वीकर्त्तव्यम् (अश=सेवाविभागम्) १ १०२.४. **वृताः**=कृतस्वीकारा (नर=नायका जना) ४ ४२ ५ [वृञ् वरणे (स्वा०) धातो क्त। वृतम् धननाम निघ० २ १०]

वृतया आवरकया क्रियया ५ ४८ २ [वृतप्राति० स्त्रिया टाप्। वृतम् इति व्याख्यातम्। वृञ् आवरणे (चुरा०) धातो क्त]

वृता या वर्त्तते तया (शचिष्ठया=अतिशयितया क्रियया) २७ ३९ संयुक्तया (शचिष्ठया) ४ ३१ १ वर्त्तमानया (शचिष्ठया=प्रज्ञया) ३६ ४ [वृतु वर्त्तने (भ्वा०) धातोर्वाहु० औणा० क। तत स्त्रिया टाप्]

वृतासः स्वीकृता (सूर्यवज्जना) ७ ३३ ५ [वृतमिति व्याख्यातम्। ततो जसोऽसुक्]

वृतेव वर्त्तन्ते यस्मिँस्तेन मार्गेण ६ १ ३. [वृत+इवपदयो समास]

वृतौ सवृतावाच्छादने ५ ३७ ५ [वृञ् आवरणे (चुरा०) धातो क्त]

वृत्तम् सर्वतो दृढम् (चक्रम्) ४ ३१ ४ [वृतु वर्त्तने (भ्वा०) धातो क्त। 'रोरव्ययने वृत्तम्' अ० ७ २ २६ सूत्रेण वाऽध्ययने रोर्लुक् इडभावश्च निपात्यते]

वृत्रखादः यो वृत्र मेघ खादति किरणो वायुर्वा ३ ४५ २ यो वृत्र खादति स्थिरीकरोति (राजा) ३ ५१ ९ [वृत्रोपपदे खादृ भक्षणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण् वृत्र मेघनाम निघ० १ १०]

वृत्रघ्ना वृत्र मेघ हन्ति यस्तेन सूर्येणेव (पराक्रमेण) १ १७५ ५ **वृत्रघ्ने**=य सूर्यो वृत्र मेघ हन्ति तद्वद्वर्त्तमानाय (सज्जनाय) ३ ३१ १४ [वृत्रोपपदे हन हिंसागत्यो (अदा०) धातोर् मूलविभुजादित्वात् क। टक् वा 'कृतो बहुल वे' ति वार्तिकेन। या रोहिणी (गौ) सा वार्त्रघ्नी यामिद राजा सग्राम जित्वोदाकुरुते श० ३ ३.१ १४ वार्त्रघ्न वै धनु श० ५ ३ ५ २७]

वृत्रघ्नी मेघहन्त्री विद्युदिव (सरस्वती=वाणी) ६ ६१ ७ [वृत्रोपपदे हन्ते कर्त्तरि टक्। तत स्त्रिया ङीप्]

वृत्रतरम् अतिशयेनाऽऽवरकम् (वृत्र=मेघम्) १ ३२ ५ अत्यन्तबलवन्तम् (वृत्रम्=मेघम्) ऋ० भू० ३०३ १ ३२ ५ [वृत्रप्राति० अतिशायने तरप्]

वृत्रतुरम् यो वृत्र मेघ घन वा त्वरयति तम् (इन्द्र=सूर्यम्) ४ ४२ ८ वृत्रानिव शत्रूंस्तुर्वति हिनस्ति येन तम् (श्रेष्ठ विजयम्) ६ २० १ **वृत्रतुरः**=वृत्र मेघ तूर्वति यास्ता विद्युत इव ६ ३४ [वृत्रोपपदे तुर्वी हिंसार्थे (भ्वा०) धातो क्विप्। ञित्वर सम्भ्रमे (भ्वा०) धातोर्वा क्विप्। (यजु० ६ ३४) वृत्रतुर इति वृत्र ह्येता (आप) अघ्नन् श० ३ ९ ४ १४]

वृत्रतुरा यौ वृत्राणा मेघवदुन्नताना शत्रूणा तुरौ हिंसकौ (सभासेनेशौ) ६ ६८ २ [वृत्रतुरमिति व्याख्यानम्। ततो द्विवचनस्याकारादेश]

वृत्रतूर्ये वृत्रस्य मेघस्य तूर्यो वधस्तस्मिन्, प्र०—वृत्र इति मेघनामसु पठितम् निघ० १ १० तूरी गतित्वरणहिंसनयो इत्यस्मात् कर्मणि ण्यत् वृत्रतूर्य इति सङ्ग्रामनाम निघ० २ १७, १ १३ शत्रुवधे २ २६ २ वृत्रस्य मेघस्य तूर्य हनन यत्र तद्वद्वर्त्तमाने सङ्ग्रामे ६ १३ १ मेघस्य हिंसने ६ ६१ ५ वृत्रस्य तूर्ये शीघ्रवेगे १ १३ **वृत्रतूर्येषु**=वृत्राणा शत्रूणा मेघावयवाना वा तूर्येषु हिंसनकर्मसु सङ्ग्रामेषु १ १०६ २ [वृत्र-तूर्यपदयो समास। वृत्रमिति व्याख्यास्यते। तूर्यम्=तूरी गतित्वरणहिंसनयो (दिवा०) धातोर्ण्यत्। वृत्रतूर्ये सग्रामनाम निघ० २ १७]

वृत्रपुत्रा वृत्र पुत्र इव यस्या सा (सू=माता) १ ३२ ९ [वृत्र-पुत्रपदयो समास]

वृत्रम् मेघमिव न्यायाऽऽवरक शत्रुम् १० ८ मेघमिवाऽविद्याम् ४ १८ ११ प्रकाशाऽऽवरक मेघमिव धर्माऽऽवरकम् (दुष्ट शत्रुम्) ३३ २६ आच्छादकम् (अहिं=मेघम्) ६ २० २ जल स्वीकुर्वन्त प्रजासुख स्वीकुर्वन्त वा (मेघ शत्रु वा) १ ८० २ धनम् ७ ४८ २ वरणीयम् (धनम्) १ १८७ १ **वृत्राणाम्**=धर्माऽऽवरकाणाम् (दुर्जनानाम्) ६ २६ ८ वृत्रवत् मुखावरकाणा शत्रूणा मेघाना वा १ ४८ **वृत्राणि**=आवरका घना इव शत्रुसैन्यानि ३ ३०.२२ प्रेमास्पदवस्तूनि ३ ५० ५ वृत्रसम्बन्धिभूतानि जलानि १ ८४ १३ शत्रूणामावरकाणि कर्माणि १ ५३ ६ [वृतु वर्त्तने (भ्वा०) धातो 'स्फायितञि०' उ० २ १३ सूत्रेण

वर्धकस्य (राय =धनस्य राज्यस्य वा) ७ ३० १ **वृधे**= वृद्धये ४ २३ २ वर्धनाय ४ २ १८ वृद्धि वा रक्षा के लिए आर्याभि० १ १०, ऋ० १ ६ १५ ५ [वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

वृधसानः यो वृधान् वर्द्धकान् विभजति सः (अग्नि = राजा) ४ ३ ६ वर्धमान (तोद =व्यथनम्) ६ १२ ३ [वृधमिति व्याख्यातम्। तदुपपदे पण् सम्भक्तौ (भ्वा०) धातो 'कर्मण्यण्' इत्यण्। अथवा वर्धतेर्वा 'ऋञिवृधिमन्दि०' उ० २ ८७ सूत्रेण असानच्]

वृधसानासु वर्धमानासु प्रजासु २ २ ५ [वृधसान इति व्याख्यातम्। ततष्टाप् स्त्रियाम्]

वृधसे वर्धितुम् ५ ६४ ५ [वृधु वृद्धौ (भ्वा०) धातोस्तुमर्थे कसेन्]

वृधस्नू यौ वृधान् प्रस्रवतस्तौ (वाय्वग्नी) ४ २ ३ [वृधोपपदे ष्णु प्रस्रवणे (अदा०) धातो क्विप्]

वृधातः वर्द्धेताम्, प्र०—अत्र, लेटि विकरणव्यत्ययेन श परस्मैपदञ्च २० ४२ [वृधु वृद्धौ (भ्वा०) धातोर्लेट्। व्यत्ययेन श परस्मैपदञ्च]

वृधानः वर्द्धमानो वर्धयिता वा (कालो विद्युदग्निर्वा) १.९५.११ वृद्ध कुर्वन् (जगदीश्वर) १७ २१ वर्द्धमान (घृतयोनि =अग्नि), प्र०—अत्र 'बहुल छन्दसि' इति शानचि शपो लुक् ३५ १७ [वृधु वृद्धौ (भ्वा०) धातो शानच्। 'बहुल छन्दसी' ति शपो लुक्]

वृधासः सुखवर्द्धका (विश्वेदेवा =विद्वज्जना) १ ८६ २ वर्धमाना वर्द्धयितारो वा (मरुत =विद्वांसो जना) ११७१ २ [वृधप्राति० जसोऽसुक्। वृध =वृधु वृद्धौ (भ्वा०) धातोर्वाहु० औणा० क]

वृधि उद्घाटयोद्घाटयति वा, प्र०—अत्र वृञ् धातो प्रयोग 'बहुल छन्दसि' अ० २ ४.७३ अनेन श्नोर्लुक् 'श्रुशृणुपृकृवृभ्यश्छन्दसि' अ० ६ ४ १०२ अनेन हेर्धि १ ७ ६ दूरी कुरु ७ १७ २ वर्धय ४ ३१ १३ वृणु वृणोति वा, प्र०—अत्र पक्षान्तरे सूर्यस्य प्रत्यक्षत्वात् प्रथमार्थे मध्यम १.१० ७ [वृञ् वरणे (स्वा०) धातोर्लोट्। 'बहुल छन्दसी' ति शपो लुकि श्नोरपि लुक्। हेर्धिरादेशश्छान्दस]

वृश्च छिन्धि १ ५१ ७ **वृश्चत्**=छिनत्ति १ ६१ १० **वृश्चति**=छिनत्ति ३ ५३ २२ **वृश्चन्ति**=छिन्दन्ति ६ २.९ **वृश्चसि**=छिनत्सि १ १३० ४ **वृश्चः**=छिन्धि ४ १७ ७ [ओव्रश्चू छेदने (तुदा०) धातोर्लोट्। 'ग्रहिज्या०' इति सम्प्रसारणम्। अन्यत्र लड् लट् च। वृश्चति वधकर्मा निघ० २ १९ वृश्चति दानकर्मा निघ० ३ २०]

वृश्चद्वनम् वृश्चन् छिन्दद्वन यस्मिन् तत् (रोगरहितमपत्यम्) ६ ६१ १ [वृश्चद्-वनपदयो समासः। वृश्चत्= ओव्रश्चू छेदने (तुदा०) धातो. शतृ]

वृश्चिक यो वृश्चति छिनत्त्यङ्गानि तत्सम्बुद्धौ (प्राणिन्) १.१९१ १६ [ओव्रश्चू छेदने (तुदा०) धातो 'वृश्चिकृपो किकन्' उ० २ ४० सूत्रेण किकन्]

वृषकर्मन् वृषस्य मेघस्य कर्माणीव कर्माणि यस्य तत्सम्बुद्धौ (इन्द्र=सभेश) १.१३० १० वृषस्य श्रेष्ठस्येव कर्माणि यस्य तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) १ ६३.४ [वृष-कर्मन्पदयो समास। वृष =वृषु सेचने (भ्वा०) धातोरिगुपधलक्षण क]

वृषक्रतुः वृषा बलवती क्रतु प्रज्ञा यस्य स (इन्द्र = वीरपुरुषो राजा) ६ ४५.१६ **वृषक्रतो**=वृषाणा बलवता प्रज्ञाकर्माणीव प्रज्ञाकर्माणि यस्य तत्सम्बुद्धौ (राजन्) ५.३६ ५ [वृषा-क्रतुपदयो समास.। क्रतु प्रज्ञानाम निघ० ३ ९]

वृषखादयः ये वृषान् रसवर्षकान् पदार्थान् खादयन्ति ते (नर =नायका जना) १ ६४ १० [वृष-खादिपदयो समास। खाद भक्षणे (भ्वा०) धातो 'इक् कृष्यादिभ्य' इतीक्। अन्तर्भावितण्यर्थ]

वृषजूतिः वृषस्येव जूतिर्वेगो यस्य स (इन्द्र =राजा) ५.३५ ३ [वृष-जूतिपदयो समास। जूति =जु इति सोत्रो धातु। तत 'ऊतियूति०' सूत्रेण क्तिन् दीर्घश्च]

वृषणम् यो वर्षति जल स वृषा तम् (मेघम्), प्र०—अत्र 'कनिन्युवृषि०' उ० १ १५६. इति कनिन् प्रत्यय 'वा षपूर्वस्य निगमे' अ० ६.४.९ इति विकल्पाद् दीर्घाऽभाव १ १६.१. वर्षयितारम् (अग्नि=सूर्याख्यम्) ११ ४६ विद्यावृष्टिकर्तारम् (अध्यापकम्) १ १०११ बलकरम् सोम=सोमलताद्योषधिरसम्) २ १६ ५ वृष्टिकर यज्ञम् ३४.१४ वलिष्ठम् (इन्द्र=शत्रुविदारक राजानम्) २० ५४ सुखवर्षकम् (रथ=विमानादियानम्) ५ ७५ १ सेचकम् (इन्द्र=परमेश्वरम्) १.१३१ ३. वीर्याधारम् २५ ७ अग्निजलवर्षणयुक्त यानसमूहम् १ ८५ ७ शत्रुसेनाया उपरि शस्त्राऽस्त्रवर्षानिमित्तम् (अश्व=विद्युतम्) १ ११८ ९ शत्रूणा शक्तित्ववन्धकम् (रथम्) १ ८२ ४. शत्रुसामर्थ्यप्रतिवन्धकम् (शुष्म=वलम्) ६ १९ ८ दृढम् (रथम्) १ १७७ ३ वीर्यवन्तम् (पतिम्) १ १७९ ४.

स्तत्सम्बुद्धौ (राजन्) ५ ३५ ६. अतिशयेन शत्रुविनाशक (राजन्) ५ ४० २ **वृत्रहन्तमम्**=यो वृत्र मेघ हन्ति तमतिशयित सूर्यमिव (साम) २० ३० [वृत्रहन् इति व्याख्यातम् । ततोऽतिशायने तमप्]

वृत्रहन्तमा अतिशयेन वृत्राणामावरकाणा पापिना हन्तारौ (अ०—सभासेनाध्यक्षौ) ३३ ७६ [वृत्रहन्तम इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

वृत्रहम् शत्रुनाशकम् (शव =वलम्), धनप्रापकम् (शव) ६ ४८ २१ [वृत्रोपपदे हन हिंसागत्यो (अदा०) धातो कर्त्तरि डश्छान्दस]

वृत्रा वृत्राणि मेघाऽवयवान् ४ १७ १९ मेघावयव-रूपाणि धनानि ३ ३० ४ [वृत्रमिति व्याख्यातम् । ततो द्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश]

वृत्वाय स्वीकृत्य, प्र०—अत्र 'क्त्वो यक्' इति यगागम ११ १९ [वृञ् वरणे (स्वा०) धातो क्त्वा । क्त्वो यक्' अ० ७ १ ४७ सूत्रेण यगागम]

वृत्वी आवृत्य १ ५२ ६ [वृञ् आवरणे (चु०) धातो क्त्वा । 'स्नात्व्यादयश्च' अ० ७ १ ४९ सूत्रेण क्त्व ईकारान्तादेश]

वृथक् पृथक्, प्र०—अत्र वर्णव्यत्यय ३३ २ [पृथक् इति स्वरादिपु पाठादव्ययम् । पकारस्य वकारो व्यत्ययेन]

वृथा व्यर्थम् १ ५८ ४ मिथ्या १ १४० ५ निष्प्रयोजनाय १ १३० ५ [वृञ् वरणे (स्वा०) धातो था प्रत्ययश्छान्दस । अव्ययमेतत्]

वृथाषाट् यो वृथाऽनायासेन सहते स (इन्द्र = सभाध्यक्ष) १ ६३ ४ [वृथोपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह' अ० ३ २ ६३ सूत्रेण ण्वि]

वृद्धम् प्रभूत बहुरूप धनादिकम् १८ ४ वयोविद्याभ्यामधिकम् (राजाऽमात्यम्) ७ १८ १२ भुक्ताऽऽयुष्क विद्यया महान्त वा (इन्द्र=परमेश्वरम्) ३ ३२ ७ विद्यावयोभ्या ज्येष्ठम् (अ०—आत्मानम्) ३ १ १४ सर्वेभ्यो विस्तीर्णम् (राजानम्) ४ १९ १ **वृद्धस्य**=ज्ञानादिगुणै श्रेष्ठस्य (सज्जनस्य) १ ५१ ९ **वृद्धः**=ज्ञानादिसर्वगुण-ग्रहणेन सर्वोपकारकरणे च श्रेष्ठ (इन्द्र =विद्वज्जन) १ ५ ६ स्थविर (इन्द्र =राजा) ६ ४४ ३ [वृधु वृद्धौ (भ्वा०) धातो क्त]

वृद्धमहाः वृद्धै पूजित (इन्द्र =राजा) ६ ३७ ५ वृद्धा महान्ता सहाया यस्य स (राजा) ६ २० ३ [वृद्ध-महस्पदयो. समास । मह महन्नाम निघ० ३.३]

वृद्धयः वर्ध्यन्ते यास्ता (प्रशसा) १ १० १२ वृद्ध्यन्ते यास्ग) गिर =स्तुतिवाचः) ५ २९ [वृधु वृद्धौ (भ्वा०) धातो स्त्रिया क्तिन्]

वृद्धवयाः वृद्ध वयो जीवन यस्य स (राजा) २ २७ १३ [वृद्ध-वयस्पदयो समास । वय अन्ननाम निघ० २ ७]

वृद्धशवसः वृद्ध शवो वल येपा तत्सम्बुद्धौ (विद्वज्जना) ५ ८७ ६ [वृद्ध-शवस्पदयो. समास । शव उदकनाम (निघ० १ १२) वलनाम (निघ० २ ९) धननाम (निघ० २ १०]

वृद्धशोचिषः वृद्धा शोचिर्दीप्तिर्यस्य स (मित्र) ५ १६ ३ [वृद्धा-शोचिष्पदयो समास । शोचि ज्वलतोनाम निघ० १ १७]

वृद्धश्रवाः वृद्ध श्रव श्रवणमन्न वा सृष्टौ यस्य स (इन्द्र =परमेश्वर) १ ८९ ६ वृद्ध श्रव सर्वशास्त्रश्रवण यस्य स (इन्द्र =सेनाधीश) १० ९ [वृद्ध-श्रवस्पदयो समास । श्रव अन्ननाम निघ० २ ७ धननाम निघ० २ १० वृद्धोपपदाद्वा श्रु श्रवणे (भ्वा०) धातो 'गतिकारकोपपदयो पूर्वपदप्रकृतिस्वरत्वञ्च' उ० ४ २२७ सूत्रेणाऽसुन्]

वृद्धसेना. वृद्धा-प्रौढा सेना येषान्ते (देवा = विद्वज्जना) १ १८६ ८ [वृद्धा-सेनापदयो समास]

वृद्धायुम् आत्मनो वृद्धमिच्छतीति तम् (इन्द्रम्= ईश्वरम्) १ १० १२ वृद्ध इवाऽऽचरन्तम् (ईश्वर सभाध्यक्ष वा), प्र०—अत्र 'क्याच्छन्दसि' इत्यु ५ २९ [वृद्धपदाद् इच्छायामर्थे क्यजन्ताद्, आचारेऽर्थे वा क्यडन्नात् 'क्याच्छन्दसि' सूत्रेण उ]

वृद्धिः वर्द्धन्ते यया सत्क्रियया सा १८ ४ **वृद्ध्या**= वर्द्धनेन २३ १३ [वृधु वृद्धौ (भ्वा०) धातो स्त्रिया क्तिन्]

वृधन्तम् वर्धमान वर्धयन्त वा (सूनु=पुत्रम्) ६ ६६ ११ **वृधन्तः**=वर्धमाना (मरुत =जगद्धितैषिणो जना) ६ ४९ ११ [वृधु वृद्धौ (भ्वा०) धातो शतृप्रत्यय । 'बहुल छन्दसी' ति शपो लुक् । व्यत्ययेन परस्मैपदञ्च]

वृधम् वर्द्धक व्यवहारम् ३ १६ २ वर्धनम् १ १६७ ५ **वृधः**=वृद्धिकर (राजा) ६ ४८ २ वर्धक (राजा) ७ ३२ २५ [वृधु वृद्धौ (भ्वा०) धातोर्वाहु० औणा० क]

वृधः ये युद्धे वर्द्धन्ते तान् (वीरजनान्) १ ८१ २

'अयन्मयादीनि छन्दसि' १४२०. इत्यनेन मनजया नलोपाऽभाव. 'उभयसंज्ञान्यपि छन्दसि दृश्यन्ते' इति पदसंज्ञाऽऽश्रयणात् टिलोपाऽभाव १.१०१० **वृषन्तमस्य**=अतिशयेन बलिष्ठस्य (राज.) ५३५३. अतिशयेनोत्तमाना कामानामभिवर्षयितुस्तव (इन्द्रस्य=ईश्वरस्य) १.१०.१०. **वृषन्तमः**=अतिशयेन सुखवर्षक (इन्द्र=परमेश्वर. सभाध्यक्षो वा) १ १०० २. अतिशयेन वृष्टिकर्त्ता (इन्द्र=विद्युत्) ६.५७४ [वृषन् इति व्याख्यातम् । ततोऽतिशायने तमप् । तस्य 'तरप्तमपौ घ.' इति घसंज्ञाया 'नाद् घस्य अ० ८.२.१७. सूत्रेण नुट्]

वृषन्विन् बलिष्ठाना धारकम् (चतुरश्रि=सेनाम्) ४२२२ [वृषन् इत्युपपदे बिभृञ् धारणपोषणयो (जु०) धातोः 'कृतो बहुलम्' इति कर्त्तरि किं । वृषन्वि. मेघनाम निघ० १.१०.]

वृषपर्वा वृषाणि समर्थानि पर्वाणि पालनानि यस्य स. (ऋभु=मेधाव्याप्तजन) ३ ३६ २ [वृष-पर्वन्पदयोः समास. । पर्वन्=पॄ पालनपूरणयो (जु०) धातो 'स्नामदिपद्यर्ति० उ० ४.११३ सूत्रेण वनिप्]

वृषपाणयः वृषस्येव पाणिर्व्यवहारो येषान्ते (अश्वा=तुरङ्गा बलूचादयो वा) ६ ७५ ७. रक्षका वृषा बलिष्ठा वृषभादय उत्तमा प्राणिन पाणिवद् येषान्ते (राजपुरुषा) २६ ४४ [वृष-पाणिपदयो समास । पाणि.=पण् व्यवहारे स्तुतौ च (भ्वा०) धातो 'इगुपजादिभ्य.' इतीण्]

वृषपाणासः वर्षन्ति यैस्तानि वृषाणि पानानि येषान्ते (उद्भिद=ओषधय) १.१३६६ [वृषपानपदयो समासे जनो ऽसुन्। पानम्=पा पाने (भ्वा०) धातोर्ल्युट्]

वृषपाणेषु ये वर्षन्ति पोषयन्ति ते वृषाः सोमादय. पदार्थास्तेषा पानेषु १.५१ १२. [वृष-पानपदयो समास । 'वा भावकरणयो.' अ० ८.४ १०. सूत्रेण णत्वम्]

वृषप्रभर्मा यो वर्षणशील मेघं प्रबिभर्त्ति स. (सूर्य) ५.३२.४. [वृषोपपदे प्रोपपूर्वाद् बिभृञ् धारणपोषणयो (जु०) धातोर्मनिन्]

वृषभ श्रेष्ठ (सज्जन) २.३.११. उपदेशवर्षक (विद्वज्जन) १.१६५ ७. प्राप्तशरीरात्मबल (अग्ने=विद्वज्जन) ३ १५ ३ यो वर्षति तत्सम्बुद्धौ (जन) १७.८८. रोगनिवारणेन बलप्रद (रुद्र=वैद्य) २.३३.१५ परशक्तिदुर्बलत्वेन बलिष्ठ (राजन्) १.१७७ ३ **वृषभम्**=अत्युत्तमम् (बृहस्पति=राजानम्) ३.६२.६. प्रशस्तम् (विद्वांसम्) ३.४.३ सर्वाभीष्टवर्षकम् (इन्द्र=परमेश्वरम्) १ ६.४ सर्वोत्कृष्ट बलिष्ठम् (इन्द्र=राजानम्) २८४. वृषभ इव बलिष्ठम् (राजानम्) ४ १८ १०. सर्वलोकसुखकम् (सूर्यम्) १.१६० ३. **वृषभस्य**=वर्षकस्य सूर्यस्य ४ १.११. यज्ञादिद्वारा वृष्टिकरस्य (विद्वज्जनस्य) १.१४१.२ सुखाभिवर्षकस्य सभापतेः ८.४६ पुष्टिकरस्य (सोमस्य=रसस्य) २.१६.६ **वृषभः**=यो वृषान् वृष्टिनिमित्तानि भाति स. (सूर्यः) १.५४.२. जलवद् वर्षयति यन्त्रसमूहम् १ ३३ १० बलीवर्द इव (मेघ.) ५.८३ १. अनन्तबल (परमात्मा) ३.५६ ३. दुष्टसामर्थ्य-हन्ता (अलविद्यो जन) २.१.३ सुखाना वर्षणात् (परमात्म-बोधो धर्मव्यवहारो वा) ४५८.३. मेघशक्तिनिरोधक. (इन्द्र=सूर्यलोक) २ १२ १२. शरीरात्मबलैश्वर्ययुक्त (इन्द्र=सेनापति) ७ ३८ सुखानामभिवर्षक (अ०=यज्ञ शब्दो वा) १७ ६१ अत्यन्त कर्त्ता (इन्द्र.=राजा) ६.४४.२१. अतीव बलवान् (राजा) १ १७७ १. विद्वच्छिरोमणि. (अध्यापक.) १ १६० ८ यो वर्षति सुखानि स (जगदीश्वर) १.३१.५. [वृषु सेचने (भ्वा०) धातो 'ऋषिवृषिभ्या कित्' उ० ३.१२३ सूत्रेणाभच् कित्च । वृषभ पदनाम निघ० ५.३. वृषभ वर्षितारम् नि० ४ ८. वृषभ. प्रजां वर्षतीति वातिवृहति रेत इति वा तद् वृषकर्मा वर्षणाद् वृषभ. नि० ६ २२. वृषभ इति । एष (आदित्य) ह्येवाऽऽभ्यः प्रजाभ्यः वृषभः जै० उ० १.२६.८ स एष (आदित्य) सप्तरश्मिर्वृषभस्तुविष्मान् (ऋ० २ १२.१२. जै० उ० १.२८.२]

वृषभान्नाय वृषभमन्नं यस्मात्तस्मै (सूर्याय) २.१६.५ [वृषभ-अन्नपदयो समास.]

वृषभासः वर्षका (अध्वर्य=मेघा.) २ १६ ५. परशक्तिबन्धका (अश्वा) १.१७७.२. [वृषभप्राति०-जसोऽसुक् । वृषभ इति व्याख्यातम्]

वृषभेव बलिष्ठवृषभवत् (राजपुरुषः) ६.४६.४. [वृषभ-इवपदयोः समास]

वृषमणः वृषेषु शूरवीरेषु मनो विज्ञानं यस्य तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) १.६३.४. वृषस्य बलयुक्तस्य मन इव मनो यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) ४.२२.६. **वृषमणाः**=वृषे वीर्यसेचने मनो यस्य स (कुमार) १ १६७ ७ [वृष-मनस्पदयो. समास.]

वृषमन्यवः वृषस्य मन्युरिव मन्युर्येषान्ते (जना.) १ १२१.२. [वृष-मन्युपदयो समासः]

वृषरथः बलिष्ठा वृषभा रथे यस्य स (राजा)

वृषणः=वृष्टिकरा (पर्वतास =मेघा) ३ ५४.२० वीर्य सीचने मे समर्थ पूर्ण-युवावस्थायुक्त पुरुप-गण स० प्र० ११०, १ १७६ १. बलवन्त (शिल्पिजना) १ १०६ ३ वर्षन्ति ये तत्सम्बुद्धौ (सभाद्यध्यक्षादय) १ ८५ १२ प्रवला युवान (अत्या =अश्वा) १ १७७ २. **वृषणे**=वीर्यसेचनसमर्थाय प्राप्तचत्वारिंशद्वर्षाय ब्रह्मचारिणे ३ ५७ ३ **वृषन्**=वर्षति सुखानि तत्सम्बुद्धौ वर्षयति जल स वा (इन्द्र=परमेश्वर सूर्यो वा) १ ७ ६ शक्तिमन् (न्यायाधीश राजन्) २३ २१ तेजस्विन् (इन्द्र=नृप) ६.३३ १ **वृषभ्याम्**=बलयुक्ताभ्याम् (हरिभ्या=हस्ताभ्याम् ५ ३६ ५ **वृषा**=रसादिपूर्ण (राजा) १ १७७ ३ परशक्तिवन्धक (इन्द्र =विद्वज्जन) २ १६ ४ वेगवान् (रथ = यानम्) २ १६ ६ वृष्टिहेतु (विद्युद्रूपोऽग्नि) ३ ६१ ७ शुभगुणवर्षणकर्त्ता (इन्द्र =ईश्वर सूर्यो वा) १.७ ८ सत्योपदेशवर्षक समर्थ (अध्यापक उपदेशको वा) १.५५ ४ कृषिकर्मकुशल (वृषभ) १ १७६ २ वीर्यकारी (अग्नि.) ३ २ ११ वर्षक सूर्य इव वीर्यसेचक (पति) ६ १६ १५ उत्तम गुणो और पदार्थों की वृष्टि करने वाला (ईश्वर) आर्याभि० १ ५२, ऋ० २ ८ १२ २ **वृषणौ**=वलिष्ठौ राजाऽमात्यौ ७ ६० ६ [वृषु सेचने (भ्वा०) धातो. 'कनिन् युवृषि०' उ० १ १५६ सूत्रेण कनिन् । वृषा वर्षिता नि० ११ ४७. वृषा (यजु० ३८ २२) एष वै वृषा हरिर्य एष (सूर्य) तपति श० १४ ३ १ २६ इन्द्रो वै वृषा ता० ६.४ ३ इन्द्रो वृषा श० १ ४ १ ३३ समग्निरिध्यते वृषा श० १ ४ १ २६ योषा वै वेदिर्वृषाग्नि श० १ २ ५ १५ वृषा हि मन श० १ ४ ४ ३ योषा वै स्रग्वृषा स्रुव श० १ ३ १ ६ वृषा हि स्रव श० १ ४ ४ ३ वृषा वै राजन्य ता० ६ १० ६ (हे ऽश्व त्व) वृषासि ता० १ ७ १ श्राण्डाभ्या हि वृषा पिन्वते श० १४ ३ १ २२ पश्चाद्वै परीत्य वृषा योषामधिद्रवति तस्या रेत सिञ्चति श० २ ४ ४ २३ वृषा हिङ्कार गो० पू० ३ २३]

वृषणा विद्यावर्षयितारौ (अध्यापकोपदेशकौ) १ १५१ ३ वृषवद् वलिष्ठौ (हरी=अश्वौ) ८ ३४ वरौ (अध्वर्यू=विद्वज्जनौ) २ १६ ५ सुवलौ (अश्विनौ= दम्पती) १ १७७ १५ पोषकौ (इन्द्राग्नी=वायुसवितारौ) १ १४८ २ वृष्टिकरौ वायुविद्युतौ ३ ४३ ४ यौ वर्षयतो दुष्टाना शक्ति वन्धयतस्तौ (अध्यापकोपदेशकौ) १ १५१ २ वलिष्ठावश्वौ १ १७७ १ [वृषन् इति व्याख्यातम् । ततो द्विवचनस्याकारादेश । 'वा पपूर्वस्य निगमे' अ० ६ ४ ६ सूत्रेण विकल्पाद् दीर्घाऽभाव । वृषोपपदे णह बन्धने (दिवा०) धातोर्डश्छान्दस]

वृषणश्वस्य वृषणो वृष्टि-हेतवो यानगमयितारो वा ऽश्वा यस्य तस्य (शिल्पक्रियामिच्छुजनस्य), प्र०—अत्र 'वृषण्वस्वश्वयोश्च' अ० १ ४ १८ अनेन वार्त्तिकेन भसज्ञाकरणान्नलोपो न णत्व च भवति १ ५१ १३ [वृषन्-अश्वपदयो समास । 'वृषण्वस्वश्वयोश्च' अ० १ ४,१८. वा०सूत्रेण भत्वान्नलोपो न भवति णत्व च भवति]

वृषण्वन्तम् वेगवन्तम् (रथम्) १ १०० १६ [वृषन् प्राति० मतुप् । 'अनो नुट्' अ० ८ २ १६ सूत्रेण मतोर्नुडागम]

वृषण्वसू वृष्ण वर्षयित्रीणा वासयितारौ (वह्निवायू) २.४१ ८ यौ वृष्णौ वलिष्ठौ देहौ वासयतस्तौ (स्त्रीपुरुषौ) ५ ७५ ६ वृषाणो विद्याक्रियावलयुक्ता वसवो वासकर्त्तारो मनुष्या ययोस्तौ (हरी=जलाग्न्याख्यौ) १ १११ १ वर्षकौ वसन्तौ च (सूर्यवायू इव शिल्पिनौ) ११ १३ यौ वृष्णो वलिष्ठान् वीरान् वासयतस्तौ (राजराजोपदेशकौ) ४ ५० १० [वृषन्-वसुपदयो समास । 'वृषण्वस्वश्वयो ' अ० १ ४ १८ वा०सूत्रेण भत्वान्नलोपो न भवति]

वृषण्वान् अन्ययानाना वेगशक्तिवन्धयिता (रथ = यानम्) १ १८२.१ वृष्टिहेतु (वात) १ १२२ ३ वलवान् (योधीयान् नर) १ १७३ ५ **वृषण्वन्तम्**=वेगवन्तम् (रथ=विमानादियानसमूहम्) १ १०० १६ [वृषन्प्राप्ति० मतुप् । 'अनो नुट्' अ० ८ २ १६ सूत्रेण नुडागम]

वृषत्वा सुखवर्षकाणा भावस्तानि (तत्त्वानि), प्र०—अत्र 'शेश्छन्दसि वहुलम्' इति शिलोप १ ५४ २ **वृषत्वेभिः**=विद्यासुखवर्षणै. १ ६१ २ [वृपप्राति० भावे त्व । तत शेर्लोपश्छन्दसि]

वृषदंशः मार्जाल २४ ३१.

वृषधूतस्य वृषै सेचनैर्यो धूतो विलोडितस्तस्य (ओषधे) ३ ३६ २. वृषा वलिष्ठा पदार्था धूता. कम्पिता येन तस्य (मित्रस्य) ३ ४३ ७ [वृष-धूतपदयो समास । धूतः=धूञ् कम्पने (क्रया०) धातो क्त]

वृषन् वृष इवाऽऽचरन् (इन्द्र=ऐश्वर्यमिच्छुकजन) ५.४० १ आनन्द वर्षयन् (विद्वज्जन) १ १३१ ५ [वृषप्राति० आचारे क्विवन्ताच्छतृ । अथवा वृषु सेचने (भ्वा०) धातो शतृ 'वहुल छन्दसी' ति शपो लुक्]

वृषन्तमम् सर्वानभीष्टान् कामान् वर्षतीति वृषा सोऽतिशयितस्तम् (इन्द्र=परमेश्वरम्), प्र०—कनिन्युवृषि०' उ० १ १५४ अनेन वृषधातो कनिन्प्रत्यय

सेचने (भ्वा०) धातो 'सुवृषिभ्या कित्' उ० ४४६ सूत्रेण नि]

वृष्णिः वर्षति, सुखानि वर्षयति वा (अ०—सूर्यकिरणसमूह), प्र०—'सुवृषिभ्या कित्' उ० ४५१. अनेन वृषधातोर्नि प्रत्यय स च कित् १ १० २ सुखसेचक. (पुरुष) १४.६ [पूर्वपदे व्याख्यातम्]

वृष्णोः वृष्टिकर्त्तु (सूर्यस्य) ऋ० भू० १४७, २३ ६२ [वृषु सेचने (भ्वा०) धातोर्बाहु० औणा० नु किच्च]

वृष्ण्यम् वृष्णो वीर्यवत कर्म १२ ११२ शत्रुसामर्थ्यप्रतिबन्धकेभ्यो हितम् (क्षत्रम्) १.५४.८ वृषसु वीर्यवत्सु भवम् (शरीरात्मपोषणम्), प्र०—वृषन्-शब्दात् 'भवे छन्दसि' इति यत् 'वा छन्दसि' इति प्रकृतिभावनिषेध पक्षेऽल्लोप १ ६१ १६ वृषसु भव साधु वा (जगत्) ६ ८ ३ वृषा समर्थस्तस्येमम् (शत्र =बलमुदक वा) ३३ ६७ वृषसु हित बलम् ६ ४६ ८ **वृष्ण्यानि**=दुष्टशक्तिनिरोधकानि (पौस्यानि वचनानि) ६ ३६ ३ पुरुषार्थयुक्तानि कर्म्माणि १ १०८ ५ वीर्याणि १२ ११३ बलिष्ठानि (स्वसैन्यानि) ६ २५ ३ बलेषु साधूनि (सैन्यानि) ४ २१ २ बलकराणि (अपासि=कर्म्माणि) ४ १६ १० वीर्यप्रापकानि (पयासि=जलान्यन्नानि वा) १ ६१ १८ [वृषन् इति व्याख्यातम् । ततो भवार्थे, हितार्थे 'तस्येदम्' इत्यर्थे, साध्वर्थे वा यत् । 'वाछन्दसि' इति प्रकृतिभावस्य विकल्पेनाल्लोप पक्षे भवति । वृष्ण्यम् (यजु० २.११२) रेतो वै वृष्ण्यम् श० ७.३ १ ४६]

वृष्ण्या वृषभ्यो वीरेभ्यो हितानि बलानि १.५१ ७ सुखसेचन-समर्थानि (कर्म्माणि) १ ५३ ६ [वृष्ण्यमिति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

वृष्ण्या वृष्णा वर्षकारणा शस्त्रवृष्टये हितया सेनया १ १०२ ४ [वृष्ण्यमिति व्याख्यातम् । ततष्टा-स्थाने डादेशश्छान्दस]

वृष्ण्यवतः वृष्ण्यानि वर्षित योग्यानि अभ्राणि विद्यन्ते येषु तान् (वायून्) ५ ८३ २ **वृष्ण्यवान्**=बलादिबहुप्रियायुक्त (परमेश्वर) ६ २२ १ [वृष्ण्यप्राति० भूम्न्यर्थे मतुप् । वृष्ण्यमिति व्याख्यातम् । वृष्ण्यावत वर्षकर्मवत नि० १० ११]

वृष्ण्येभिः वृषसु भवै किरणै , प्र०—'वाच्छन्दसि सर्वे विधयो भवन्ति' इति प्रकृतिभावाऽभावेऽल्लोप १ १०० १ वृषेषु बलिष्ठेषु भवैर्गुणै (पराक्रमै) ३ ४६.२ [वृष्ण्यमिति व्याख्यातम् । ततो 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

वृह उच्छिन्धि ६ ४५ ६. वर्धस्व ३ ३० १७ पृथक्कुरु ६ ४४ ११ **वृहतम्**=छेदयतम् ६ ७४ २ **वृहथः**=वर्धयेथाम् २ ३० ६. **वृहः**=उच्छेदये ६ ४८ १७ [वृह वृद्धौ (भ्वा०) धातोर्लोट् । अन्यत्र लट् लङ् च । वृहू उद्यमने (तुदा०) धातोर्वा लोट्]

वृहतात् छिन्द्यात् ४.१६ १२. वर्धयन्तु १.१७४ ५ [वृह वृद्धौ (भ्वा०) वृहू उद्यमने (तुदा०) धातोर्वा लोटि 'तुह्योस्तातङ्०' इति तातङ्]

वेट् यो न्यायासने विशति स (न्यायाधीश), प्र०—अत्र विशधातो 'अन्येभ्योऽपि दृश्यते' इति विच्प्रत्यय १७ १२ अधिष्ठाता (सभेश) १७ १२ [विश प्रवेशने (तुदा०) धातो कर्त्तरि 'अन्येभ्योऽपि दृश्यन्ते' इति विच्]

व्रेट् सत्क्रियया १८ २६. सदा ऋ० भू० १५४, १८ २६. आज्ञा का पालन आर्याभि० २ १३, १८ २६

वेतसवे व्याप्तैश्वर्य्ये ६ २६ ४ [वेत-सवपदयो समास. । वेत =वी गतिव्याप्त्यादिषु (अदा०) धातोर्बाहु० औणा० क्त. । बहुलवचनादेव गुणश्च सव =षु प्रसवैश्वर्ययो (अदा०) धातो 'ऋदोरप्' इत्यप्]

वेतसः कमनीय (विद्वज्जन) ४ ५८ ५ **वेतसे**=पदार्थविस्तारे १७ ६ [वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (अदा०) धातोर्वाहु० औणा० असच् तुडागमश्च]

वेतसः वेगवत्य , भा०—सम विषम चलन्त्य. (सरित =नद्य), प्र०—अत्र वीधातोर्वाहुलकादौणादिकस्तसि प्रत्यय १३ ३८ [वी गतिव्याप्त्यादिषु (अदा०) धातोर्वाहु० औणा० तसि । वेतस तस्माद् वेतसो वनस्पतीनामनुपजीवनीयतमो यातयामा हि स श० ६ १ २.२४ ता (आप) प्रजापतिमब्रुवन् । यद् वै न कमभूदवाक्तदगादिति सोऽब्रवीदेष व एतस्य वनस्पतिर्वेत्त्विति वेत्तु सवेत्तु सोऽह वै त वेतस इत्याचक्षते परोऽक्षम् श० ६ १ २ २२ अप्सुयोनिर्वै वेतस श० १२ ८ ३ १५ अप्सुजा वेतस श० १३ २ २ १६ अप्सुजो वेतस तै० ३ ८ ४ ३.]

वेतसुम् व्यापनशीलम् (इभ=हस्तिनम्) ६ २० ८. [वी गतिव्याप्तिप्रजनादिषु (अदा०)धातोर्वाहु० औणा० असच् तुडागमश्च । वर्णव्यत्ययेनाकारस्योकारादेश । अथवा वाहु० औणा० तसु]

वेति कामयते ५ ३४ ४ अस्तमेति ३४ २५ प्रजनयति, प्र०—अत्राऽन्तर्गतो ण्यर्थ १.३५ ६ नश्यति ५ ६१ १८

५.३६ ५. [वृष-रथपदयो समास]

वृषरथासः वृषा शक्तिवन्धका रथा रमणसाधनानि येषान्ते (अत्या =अश्वा) १ १७७ २ वृषा वलयुक्ता रथा सेनाङ्गानि येषान्ते (राजपुरुषा) ६ ४४ १६ [वृष-रथ-पदयो समासे जसोऽसुक्]

वृषरश्मयः रश्मय इव विजयसुखवर्षकास्तेजस्विन. (राजपुरुषा) ६ ४४ १६ [रश्मि-वृषपदयो समासे वृषस्य पूर्वनिपातश्छान्दस]

वृषव्रातासः वृषा शस्त्राऽस्त्रवर्षयितारो व्रातासो मनुष्या येषान्ते (सभाद्यध्यक्षादय) १ ८५ ४ [वृष-व्रात-पदयो समास । व्राता मनुष्यनाम निघ० २ ३]

वृषशुष्मम् वृषणा वलिना वलम् (वाज=विज्ञानम्) ४ ३६ ८ [वृषन्-शुष्मपदयो समास । शुष्मम् वलनाम निघ० २ ६]

वृषसेनः वृषा वलयुक्ता सेना यस्य स (राजा) १० २. [वृषा-सेनापदयो समास]

वृषस्व वृष इव वलिष्ठो भव ३ ३२ २. सिच्वस्व १ १०४ ६ **वृषेथाम्**=वर्षत, प्र०—अत्र व्यत्ययेन श प्रत्यय आत्मनेपदञ्च १.१०८ ३ वलिष्ठौ भवेथाम् ६ ६८ ११ [वृषु सेचने (भ्वा०) धातोर्लोट्। व्यत्ययेन श, आत्मनेपदञ्च]

वृषायते वृष इवाऽऽचरति १.५५ २ **वृषायध्वम्**=आनन्दसेक्तारो वृषा इवाऽऽचरत, प्र०—'कर्तुं क्यङ् सलोपश्च' अ० ३ १.११ अनेन क्यङ्प्रत्यय २ ३१ **वृषायन्ते**=वृष इवाचरन्ति ३ ७ ६ **वृषायसे**=वृष इवाऽऽचरसि १ ५८ ४ **वृषायिषत**=विद्याधर्मशिक्षया हर्षकारका भवत, प्र०—अत्र लोडर्थे लुङ् २ ३१. [वृषपदाद् आचारेऽर्थे क्यङ्। ततो धातुसञ्ज्ञाया लट्। अन्यत्र लोट् लुङ् चापि]

वृषायमाणः वलिष्ठ सन् (शूर =शत्रुहिंसको जन) २० ४६ वृष वल कुर्वाण (राजपुरुष) ३ ५२ ५ वृष इवाचरन् (इन्द्र =सूर्यलोक) १.३२ ३ [वृषप्रातिo आचारेऽर्थे क्यङन्ताच्छानच्]

वृषायुधः ये वृषेण वीर्यवता शूरवीरेण सह युध्यन्ते ते (मनुष्या =मानवा), प्र०—वृषोपपदे 'क्विप् च' इति क्विप् 'अन्येषामपि०' इति दीर्घ १ ३३.६ [वृषोपपदे युध सम्प्रहारे (दिवा०) धातो कर्त्तरि क्विप्। पूर्वपदस्य च दीर्घ]

व्रजम् व्रजन्ति जानन्ति जना येन त सत्सङ्गम्, व्रजन्ति विद्वासो यस्मिन् सन्मार्गे तम् १ २९ व्रजन्ति गच्छन्ति प्राप्नुवन्त्यापो यस्माद् यस्मिन् वा त व्रज मेघम् १ २५ निवासस्थानम् १ ९२ ४ गोस्थानम् १२ ८४ व्रजन्ति यस्मिन्तम् (गोष्ठम्) ६ ४५ २४ यो व्रजति तम् (अद्रि=मेघम्) ४ ११ ५ प्राप्त देशम् १ १५६ ४ ज्ञातव्यम् (जनम्) १ १३२ ४ अधर्ममार्गम् १ १३२ ४ समूह ज्ञान वा १ १० ७ गोष्ठानम् २ ३८ ८ शस्त्राऽस्त्रम् ४ २० ८ **व्रजस्य**=व्रजितु गन्तु योग्यस्य (गव्यस्य) १ १३१ ३ व्रजन्ति घना यस्मिँस्तस्य मेघस्य ६ १० ३ **व्रज.**=यो व्रजति गच्छति स (इन्द्र=विद्वज्जन) ३ ३० १० **व्रजे**=गवा स्थित्यधिकरणे ५ ३४ ५ [व्रज गतौ (भ्वा०) धातो 'गोचरसचर०' अ० ३ ३ ११९ सूत्रेण करणाधिकरणयोर्घ । व्रज मेघनाम निघ० १ १० व्रज=व्रजत्यन्तरिक्षे नि० ६ २]

व्रजश्रितः व्रजान् गवादिस्थित्यर्थान् देशान् श्रियन्ति निवासयन्ति ते (राजपुरुषा) १० ४ [व्रजोपपदे श्रिञ् सेवायाम् (भ्वा०) धातो क्त]

व्रजा वेगान् ५ ६ ७ [व्रज गतौ (भ्वा०) धातोर्घञर्थे क । तत 'सुपा सुलुक्०' इति शस आकारादेश]

व्रजिनीः वर्जनक्रिया ५ ४५ १ [व्रज गतौ (भ्वा०) धातोर्वाहु० औणा० इनि तत स्त्रिया ङीप्]

व्रजेव व्रजन्ति यया गत्या तद्वत् ५ ६४ १ [व्रजा-इव-पदयो समास]

व्रतपते व्रत नियत यन्न्याय कर्म्म तत्पतिस्तत्सम्बुद्धौ (अग्ने=सत्यस्वरूपेश्वर) २ २८ सत्यपते (परमेश्वर) ऋ० भू० ९९, १५ सत्यभाषणादीना व्रताना कर्मणा

शकुन्ते=शक्तिमन् (सदुपदेशक जन) २४२ ३ [शक्लृ शक्तौ (स्वा०) धातो 'शकेरुनोन्तोन्त्युनय.' उ० ३४६ सूत्रेण उन्ति]

शकुन्तिका अल्पा पक्षिणीव निर्बला, भा०—क्षीणा (प्रजा) २३ २२ कपिञ्जली १ १६१ ११ [शकुन्तिप्रातिप० अल्पार्थे क, तत स्त्रिया टाप् । शकुन्तिरिति पूर्वपदे व्याख्यातम्]

शकुलाविव ह्रस्वौ मत्स्याविव २३ २८ [शकुली-इवपदयो समास । शकुल =शक्नोति तरितुमिति विग्रहे शक्लृ शक्तौ (स्वा०) धातोर् 'मद्गुरादयश्च' उ० १४१ सूत्रेण उरच् । प्रत्ययरेफस्य लत्वम्]

शकृत् विष्ठेव १ १६१ १० **शक्ना**=शकृता दुर्गन्धादिनिवारणसामर्थ्येन घृमादिना ३७ ६ [शक्लृ शक्तौ (स्वा०) धातो 'शकेर्ऋतिन्' उ० ४ ५८ सूत्रेण ऋतिन् । शक्ना' प्रयोगे शकृत्प्रातिप० तृतीयैकवचने 'पद्दन्नोमास्०' अ० ६ १ ६३ सूत्रेण शकन् आदेश]

शक्तम् समर्थम् (क्षत्र=राज्य धन वा) ५ ६८.३ [शक्लृ शक्तौ (स्वा०) धातो क्त]

शक्तिम् तीक्ष्णाग्राम् २ ३६ ७ **शक्ति** =सामर्थ्यम् ४ २२ ८ समर्थता १ ८३ ३ **शक्तीः**=सामर्थ्यानि ३ ३१ १४ **शक्त्या**=पाकविद्यासामर्थ्येन ११ ५७ योगवलोन्नत्या ऋ० भू० १५६, ११ ३ [शक्लृ शक्तौ (स्वा०) धातो स्त्रिया क्तिन् । शक्ति कर्मनाम निघ० २ १]

शक्तिवन्तः सामर्थ्ययुक्ता (पितर =पालनक्षमा राजपुरुषा), प्र०—अत्र 'छन्दसीर' इति वत्वम् २६ ४६. प्रशस्ता बह्वी शक्ति सामर्थ्य विद्यते येषान्ते (राजपुरुषा) ६ ७५ ६ [शक्तिप्रातिप० भूम्न्यर्थे मतुप् । 'छन्दसीर' इति मतोर्मस्य वकार । शक्तिभि कर्मभि नि० ७ २८]

शक्ती आत्मसामर्थ्येन, प्र०—अत्र 'सुपा सुलुक्०' इति तृतीयैकवचनस्य पूर्वसवर्णादेश १ ३१ १८ [शक्लृ शक्तौ (स्वा०) धातो स्त्रिया क्तिन् । तत सुपा सुलुक्०' इति पूर्वसवर्णदीर्घादेश]

शक्तीवः शक्तिर्बहुविध सामर्थ्य विद्यते यस्य तत्सम्बुद्धौ (राजन्) ५ ३१ ६ [शक्तिप्रातिप० भूम्न्यर्थे मतुप् । 'छन्दसीर' अ० ८ २ १४ सूत्रेण मतोर्मस्य वकार । शक्तिवत्प्रातिप० सम्बुद्धौ 'मतुवसो०' अ० ८ ३ १ सूत्रेण रुत्वम् । पूर्वस्य दीर्घ सहितायाम्]

शक्म शक्यं कर्म्म २ ३८ ४ **शक्मना**=कर्मणा २२ १८ [शक्लृ शक्तौ (स्वा०) धातो 'असिशकिभ्या छन्दसि' ४ १४७ सूत्रेण मनिन् । शक्म कर्मनाम निघ० २ १.]

शक्र शक्नोति सर्वं व्यवहार कर्त्तुं तत्सम्बुद्धौ (इन्द्र=सभापते) १.१०४ ८, शक्तिमन् (इन्द्र) ६ ३५ ५ समर्थ (पुत्र), आर्याभि० १ ४६, ऋ० १ ७ १६ ८ **शक्रम्**=शक्तिमन्तम् (राजानम्) ऋ० भू० २२०, २० ५०. सद्य सर्वजगत्कर्त्ताऽनन्तवीर्यवान् (ईश्वर) प० वि० । आयुक्तारम् (इन्द्र=राजानम्) २० ५०. **शक्रः**=समर्थ शक्तिमान् कृपायमाण सन् (जगदीश्वर) १ १० ५ दातु समर्थ (इन्द्र =परमात्मा) १ १० ६ [शक्लृ शक्तौ (स्वा०) धातो 'स्फायितञि०' उ० २ १३ सूत्रेण रक्]

शक्रा शक्तिनिमित्ता (माता) ५ ४१ १५ [शक्रप्राति० स्त्रिया टाप् । शक्र =शक्लृ शक्तौ (स्वा०) धातोरौणा० रक्]

शक्रा शक्तिमन्तौ (अग्निवायू) २ ३६ ३ [शक्र इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शक्वने शक्तिमद्वीरसैन्यप्राप्तये ५ ५ [शक्लृ शक्तौ (स्वा०) धातोर्मत्वर्थे 'छन्दसीवनिपौ' इति वा०सूत्रेण वनिप्]

शक्वरयः शक्तय १८ २२ **शक्वरीषु**=शक्तिमतीषु सेनासु ७ ३३ ४ **शक्वरी**=शक्तिनिमित्ता गा २१ २७ शक्तिमत्य (राजपुरुषाणा स्त्रिय) १० ४ [शक्लृ शक्तौ (स्वा०) धातोर्मत्वर्थे 'छन्दसीवनिपौ' इति वनिप् । तत स्त्रिया 'वनो र च' सूत्रेण ङीप् रेफश्चान्तादेश । 'शक्वरय' प्रयोगे छान्दसो ह्रस्व । शक्वरी बाहुनाम निघ० २ ४ गोनाम निघ० २ ११ शक्वर्य ऋच शक्नोति । तद् यद् आभिर्वृत्रमशकद् हन्तु तच्छक्वरीणा शक्वरीत्वमिति विज्ञायते नि० १ ८ शक्लृ धातोर्वा 'स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप्' उ० ४ ११३ सूत्रेण वनिप् । शक्वर्य (ऋच) यदिमाँल्लोकान् प्रजापति सृष्ट्वेद सर्वमशक्नोद् यदिद किं च तच्छक्वर्योऽभवँस्तच्छक्वरीणा शक्वरीत्वम् ऐ० ५ ७ इन्द्र प्रजापतिमुपाधावद् वृत्र हनानीति तस्मा एतच्छन्दोभ्य इन्द्रिय वीर्यं निर्माय प्रायच्छदेतेन शक्नुहीति तच्छक्वरीणा शक्वरीत्वम् ता० १३ ४ १ एताभिर्वा इन्द्रो वृत्रमशकद् हन्तु तद् यदाभिर्वृत्रमशकद् हन्तु तस्माच्छक्वर्य कौ० २३ २. एताभि (भूरिग्भि शक्वरीभि) वा इन्द्रो वृत्रमहन् क्षिप्र वा एताभि पाप्मान हन्ति क्षिप्र वसीयान् भवति ता० १२ १३ २३ पशव शक्वर्य ता० १३ १ ३ पशवो वै

व्रातासः व्रतेषु सत्याचारेषु भवा (विद्वांसो जना) १ १६३ ८ मनुष्या २९ १९ वेगवन्ति यानानि ऋ० भू० १९६, ऋ० १ ६ ९ ४ [व्रातप्राति० जसोऽसुक्। व्रात = व्रतप्राति० भवार्थेऽण्। व्राता मनुष्यनाम निघ २ ३ विपम इव वै व्रात ता० १७ १ ५ ११]

व्रात्यम् असंस्कृतम् (दुष्टजनम्) ३० ८ [व्रातात् समूहात् च्यवतीति विग्रहे व्रातप्राति० यत्। सावित्रीपतिता व्रात्या इति स्मृति]

व्रात्यः महोत्तमगुणविशिष्ट सेवनीयोऽतिथि ऋ० भू० २७१ [व्रातप्राति० 'तत्र साधु' रिति यत्]

व्राधतः अतिवृद्धान् शत्रून् १ १०० ९ विरोधिन (जनान्) १ १२२ १० [व्राधत् महन्नाम निघ० ३ ३]

व्राधन्त वर्धन्ते ५ ६ ७ [वृधु वृद्धौ (भ्वा०) धातोर्लट्। पृपोदरादिना ऋकारस्य रेफोऽकारस्य चाऽऽकारादेश]

व्राधन्तम् व्याधमिव प्रजाहिंसकम् (शत्रुम्) ४ ३२ ३

व्राधन्तः=वर्धमाना, (जना) प्र०—अत्र पृपोदरादिना पूर्वस्याऽऽकारादेशो व्यत्ययेन परस्मैपदञ्च १ १३५ ९ [वृधु वृद्धौ (भ्वा०) धातो शतृ। व्यत्ययेन परस्मैपदम्। पृपोदरादिना रूपम्। व्राधत् महन्नाम निघ० ३ ३]

व्राधन्तमः अतिशयेन वर्द्धमान (विद्वज्जन) १ १५० ३ [व्राधन् महन्नाम (निघ० ३ ३) ततोऽतिशायने तमप्। अथवा व्राधम् महन्नाम निघ० ३ ३ ततोऽतिशायने तमप्। नुडागमश्छान्दस]

व्राम् वरीतुमर्हाम् (मेना=वाचम्), प्र०—वृञ् धातोर्घञर्थे क १ १२१ २ **व्राः**=या वृणोति सा (उषा) १ १२४ ८ ये व्रजन्ति ते (पञ्चा=धनसम्पन्ना जना), प्र०—अत्र व्रजधातोर्बाहुलकादौणादिको ड प्रत्यय व्रा इति पदनाम निघ० ४ २, १ १२६ ५, या व्रियन्ते ता (वाणी) ४ १ १६ [वृञ् वरणे (स्वा०) धातोर्घञर्थे क। व्रज गतौ (भ्वा०) धातोर्वा बाहु० औणा० ड। व्रा व्रात्या नि० ५ ३]

व्रिशः प्रजा, प्र०—अत्र वर्णव्यत्ययेन वस्य स्थाने व्र १ १४४ ५ [विश मनुष्यनाम निघ० २ ३ वकारस्य व्रादेशो वर्णव्यत्ययेन। व्रिश अङ्गुलिनाम निघ० २ ५]

व्रीहयः तण्डुला १८ १२ [व्री वरणे (क्र्या०) धातोर्बाहु० औणा० हि। व्रीहय शक्वर्य जै० १ ३३३]

व्रेशीनाम् दिव्यानामपामिव निर्मलविद्या सुशीलव्याप्तानाम् (अ०—पत्नीनाम्), प्र०—एता वै दैवीरापस्तद्याश्चैव दैवीरापो याश्चेमा मानुष्यस्ताभिरेवास्मिन्नैतदुभयीभी रस दधाति श० ११ ५ ९ ८, ८ ४८

शकत् शक्नोति, प्र०—अत्र लडर्थे लुङडभावश्च १ १० ६ **शकः**=समन्ताच्छक्नुहि ७ २० ९ **शकेम**=समर्थयेम २ ५ १ शक्नुयाम, प्र०—अत्र विकरणव्यत्ययेन श ३ २७ ३ **शकेयम्**=शक्नुयाम ४ ४ यथा समर्थो भवेयम् १ ५ **शक्नवाम**=समर्था भवेम १ २७ १३ [शक्लृ शक्तौ (स्वा०) धातोर्लुङ्। 'अडभावश्छान्दस। लृदित्त्वादङ्। अन्यत्र लिङ् लेट् च। 'लिङाशिष्यङ्' अ० ३ १ ८६ सूत्रेण लिङ्यङ्]

शकपिण्डैः शक्ते सङ्घातै २५ ७ [शक-पिण्डपदयो समास। शक =शक्लृ शक्तौ (स्वा०) धातोर्घञर्थे क। शक उदकनाम निघ० १ १२]

शकमयम् शक्तिमयम् (धूमम्) १ १६४ ४३ [शकप्राति०—'तत्प्रकृतवचने मयट्' अ० ५ ४ २१ सूत्रेण मयट्]

शका शक शक्तिमान् (पशुविशेष), प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश २४ ३२ [शक्लृ शक्तौ (स्वा०) धातोर्घञर्थे क। तत 'सुपा सुलुक्०' इति सोराकारादेश]

शकुनः पक्षी ४ २६ ६ शक्तिमान् (विद्वान् सभेश) १८ ५३ [शक्लृ शक्तौ (स्वा०) धातो 'शकेरुनोन्तोन्त्युनय' उ० ३ ४९ सूत्रेण उन प्रत्यय]

शकुनिसादेन येन शकुनीन् सादयन्ति तेन (व्यवहारेण) २५ ३ [शकुन्युपपदे पदॢ विशरणगत्यवसादनेषु (भ्वा०) धातोर्णिजन्तात् 'कृतो बहुल वे' ति वार्तिकेन करणे मूलविभुजादित्वात् क]

शकुनिः पक्षी २४ ४० **शकुने**=पक्षिवच्छक्तिमन् (वेदपाठिजन) २ ४३ २ शकुनिवद्वर्त्तमान (उपदेशक जन) २ ४२ १ वक्तृत्वशक्तियुक्त उपदेशक जन) २ ४३ २ सर्वशक्तिमन्नीश्वर आर्याभि० १ ५२, ऋ० २ ८ १२ २ [शक्लृ शक्तौ (स्वा०) धातो 'शकेरुनोन्तोन्त्युनय' उ० ३ ४९ सूत्रेण उनि। शकुनि शक्नोत्युन्नेतुमात्मान, शक्नोति नदितुम् इति वा, शक्नोनि तकिनुमिति वा, सर्वत शकरोऽस्त्विति वा शक्नोतेर्वा नि० ९ ३]

शकुन्तकः निर्बल पक्षीव (अध्वर्यु=राजा) २३ २३ [शकुन्तप्राति० अल्पार्थे ह्रस्वार्थे वा क। शकुन्त =शक्लृ शक्तौ (स्वा०) धातो शकेरुनोन्तोन्त्युनय' उ० ३ ४९ सूत्रेण उन्त]

शकुन्तयः शक्तिमन्त (वय=पक्षिण) २ ४३ १

सभाद्यध्यक्षाय) १ ५४ २ **शचीवः**=शची प्रशस्ता वाक्प्रज्ञा कर्म वा विद्यतेऽस्मिन् तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) १ ६२ १२ शची बहुविध कर्म बह्वी प्रज्ञा वा विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=न्यायाधीश), प्र०—शचीति प्रज्ञानामसु पठितम् निघ० ३ ६ कर्मनामसु च निघ० २ १ अत्र 'छन्दसीर' इति मतुपो मस्य व 'मतुवसो रु०' अ० ८ ३ १ इति रुत्वञ्च १ २६ २ **शचीवान्**=बहुप्रजावान् (राजा) ४ २२ २ [शचीति व्याख्यातम् । तत प्रशसायामर्थे मतुप् । 'छन्दसीर' इति वत्व मतोर्मस्य । शचीव कर्मवन् नि० ५ ११]

शचीवसू शची प्रज्ञा वासयितारौ (अध्यापकोपदेशकौ) १ १३८ ५ [शची-वसुपदयो समास । शचीति व्याख्यातम्]

शण्डः शमादिसहित (योगिजन) ७ १३ शमाऽन्वित, भा०—शमादिगुणप्रसक्त पुरुष ७ १२ [शमु उपशमने (दिवा०) धातोर्बाहु० औणा० ड]

शण्डिकानाम् शत्रूणा तस्याऽवयवभूतानाम् २ ३० ८

शतक्रतुम् असङ्ख्यप्रज्ञ बहुकर्माण वा (राजानम्) २१ ३६ अनेककर्मप्रज्ञायुक्तम् (इन्द्र=सेनेशम्) १ ५१ २ अमितप्रज्ञम् (इन्द्र=राजानम्) ३ ५१ २ **शतक्रतुः**=शतमसङ्ख्याता क्रतव प्रज्ञा कर्माणि वा यस्य स (सेनापति) ३३ ६६ अतुलप्रज्ञ (विद्वज्जन) २० ७५ **शतक्रतो**=शतान्यसङ्ख्याता क्रतव कर्माणि यस्य शूरवीरस्य सूर्यलोकस्य वा तत्सम्बुद्धौ, प्र०—शतमिति बहुनाम निघ० ३ १ क्रतुरिति कर्मनाम निघ० २ १, १ ४८ शत बहूनि कर्माणि प्रज्ञानानि वा यस्य तत्सम्बुद्धौ (इन्द्र=परमेश्वर) १ १० १ शतेष्वसख्यातेषु वस्तुषु क्रतु. प्रज्ञा यस्य तत्सम्बुद्धौ (इन्द्र), प्र०—क्रतुरिति प्रज्ञानाम निघ० ३ ६, १ ४ ६ असङ्ख्यप्रज्ञोत्तमकर्मन्वा (इन्द्र=रक्षक राजन्) ६ ४१ ५ शतविधप्रज्ञाकर्मयुक्त सभेश राजन् १ ३० १५ अमितबुद्धे (इन्द्र=राजन्) ३ ३७ ६ बहुप्रज्ञान (इन्द्र=राजन्) ३ ३७ ३ असङ्ख्यातोत्तमप्रज्ञ बहूत्तमकर्मन्वा न्यायाध्यक्ष १ १०५ ८ हे अनन्तक्रियेश्वर आर्याभि० १ ३५, ऋ० १ ३१ ६ शतमसख्यातानि क्रतव कर्माण्यनन्ता प्रज्ञा वा यस्य तत्सम्बुद्धौ सर्वकामप्रदेश्वर १ १६ ६ [शतक्रतुपदयो समास । शत दशदशत नि० ३ १० शतम् बहुनाम निघ० ३ १ क्रतु कर्मनाम निघ० २ १ प्रज्ञानाम निघ० ३ ६ शतक्रतु इन्द्र आसीत् सीरपति शतक्रतु तै० २ ४ ८ ७]

शतग्विनम् शतग्वोऽसङ्ख्याता गावो विद्यन्ते यस्मिँस्तम् (रयिं=धनम्) ४ ४६ ४ शतानि गावो विद्यन्ते यस्मिँस्तम् (रयिम्) १ ५६ ५ [शतगुप्राति० भूम्न्यर्थे इनि । शतगु=शत-गोपदयो समास]

शततमम् अतिशयेनाऽसङ्ख्यातम् (वेद्य=सर्वहितपदार्थम्) ४ २६ ३ [शतप्राति० अतिशायने तमप् । शतम् बहुनाम निघ० ३ १]

शततमा अतिशयेन शतानि (अब्दलानि) ७ १६ ५ [शततमम् इति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शततेजाः शतानि बहूनि तेजासि यस्मिन्त्स सूर्य, प्र०—शतमिति बहुनाम निघ० ३ १ १ २४ [शत-तेजस् पदयो समास]

शतदायम् असङ्ख्यदायभागिनम् (जनम्) २ ३२ ४ [शत-दायपदयो समास । दाय=डुदाञ् दाने (जु०) धातो 'ददातिदधात्योर्विभाषा' अ० ३ १ १३६ सूत्रेण ण । आतो युगागम]

शतदान्नि असङ्ख्यदाने (राज्यपालनाख्ये व्यवहारे) ५ २७ ६ [शतोपपदे डुदाञ् दाने (जु०) धातो 'कृनो बहुल वे' नि भावे वनिप्]

शतदुरेषु शतावरेषु मेघाऽवयवेषु घनेषु १ ५१ ३

शतद्वसुम् शतान्यसङ्ख्यातानि वसूनि यस्मिँस्तम् (रथ=यानम्), प्र०—अत्र पृषोदरादित्वात् पूर्वपदस्य तुगागम १ ११६ १ [शत-वसुपदयो समास । पूर्वपदस्य तुगागमश्छान्दस]

शतधन्यम् असङ्ख्ये धने साधुम् (सोमम्=ओषधिसारम्) ४ १८ ३ [शत-धनयो समासात् साध्वर्थे यत्]

शतधन्वने धनुर्विद्याद्यसङ्ख्यशास्त्रविद्याशिक्षकाय (विद्वज्जनाय) १६ २६ [शत-धन्वन्पदयो समास । धन्वन् धनुषि नि० ६ १८ धन्वान्तरिक्ष धन्वन्त्यस्मादाप नि० ५ ५]

शतधारम् शत बहुविधमसङ्ख्यात विश्व धरतीति तम्, अ०—शतधा (वसो=यज्ञ), प्र०—शतमिति बहुनाम निघ० ३ १, १ ३ शतधा धारा सुशिक्षिता वाग् यस्य तम् (विपश्चित=विद्वज्जनम्) ३ २६ ६ शतमसङ्ख्याता दुग्धधारा यस्मात्तम् (गवादिक वीर्यसेचक वृषभ वा) १३ ४६ **शतधारः**=शतशो धारा वाचो यस्य स (वीर्यवान् पुरुष) १६ ८७ **शतधारेण**=बहुविद्याधारकेण परमेश्वरेण वेदेन वा १ ३ [शतोपपदे धृञ् धारणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण् । अथवा शतधारापदयो समास ।

शक्वर्य ता० १३ ४ १३ पशवो वै शक्वरी तै० १ ७ ५ ४ पशव शक्वरी ता० १९ ७ ६ श्री शक्वर्य ता० १३ २ २ शाक्वरो वज्र तै० २ १ ५ ११ वज्र शक्वर्य ता० १२ १३ १४ रथन्तरमेतत् परोक्ष यच्छक्वर्य ता० १३ २ ८ ब्रह्म शक्वर्य ता० १६ ५ १८ सप्तपदा वै तेपा (छन्दसा) परार्ध्या शक्वरी श० ३ ९ २ १७ सप्तपदा शक्वरी तै० २ १ ५ ११ ता० १९ ७ ६ स (प्रजापति) शक्वरीरसृजत तदपाड्घोषोऽन्वसृज्यत ता० ७ ८ १२ व्रीहय =शक्वर्य जै० १ १३३ आपो वै शक्वर्य जै० ३ ९२]

शग्धि दातु शक्नुहि, प्र०—अत्र 'वाच्छन्दसि' इति विकरणलुक् २ २ १२ देहि ४ २१ १०. समर्थो भव ५ १७ ५ सुखदानाय समर्थोऽसि, प्र०—अत्र 'बहुल छन्दसि' इति श्नोर्लुक् १ ४२ ९ [शक्लृ शक्तौ (स्वा०) धातोर्लोट्। 'बहुल छन्दसि' सूत्रेण शपो लुकि तत्स्थानभूतस्य श्नोरपि लुक्]

शग्मम् सुखम्, भा०—चक्रवर्त्तिराज्यादिकमैहिक सुखम् ३ ४३ सासारिकमाभ्युदयिकम् (सुखम्) ऋ० भू० २४०, ३ ४३ [शग्मम् सुखनाम निघ० ३ ६ शग्म कर्मनाम निघ० २ १]

शग्मः शग्म सुख विद्यते यस्य स (सोम =ऐश्वर्यसमूह) प्र०—अत्र 'अर्श आदिभ्योऽच्' इत्ययेन मत्वर्थीयोऽच्प्रत्यय ६ ४४ २ **शग्मैः**=सुखप्रापकै (विद्वज्जनै) १ १४३ ८ [शग्मम् सुखनाम (निघ० ३ ६)। ततो मत्वर्थे 'अर्श आदिभ्योऽच्' इति सूत्रेणाच्]

शग्मया सुखरूपया (गातुमत्या=प्रशस्तवाग्भूमियुक्तया सभया) ७ ५४ ३ **शग्माम्**=सुखरूपाम् (तनू = शरीरम्) ४ २ सुखमयीम् (वाच=वाणीम्) ५ ४३ ११ [शग्मम् सुखनाम निघ० ३ ६ तत स्त्रिया टाप्]

शग्मानि सुखकारकाणि (इन्द्रियादीनि अष्टविंशानि) ऋ० भू० १६०, अथर्व० १९ १ ८ २ [शग्मम् सुखनाम निघ० ३ ६ ततो नपुंसके प्रथमाबहुवचनम्]

शग्मासः बहुसुखयुक्ता (पुत्रा) ७ ६० ५ [शग्म-प्राति० जसोऽसुक्। शग्म =शग्मम् सुखनाम निघ० ३ ६ ततो मत्वर्थेऽच्]

शग्म्येन शग्मेषु सुखेषु भवेन (मनसा=अन्त करणेन) ३ ३१ १ [शग्ममिति व्याख्यातम्। ततो भवार्थे यत्। शग्म्यम् सुखनाम निघ० ३ ६]

शङ्कराय य सर्वेषा सुख करोति तस्मै (परमेश्वराय) सेनाधीशाय वा) १६ ४१ कल्याणकारकाय (ईश्वराय) प० वि० [शम् इत्युपपदे डुकृञ् करणे (तना०) धातो 'कृजो हेतुताच्छील्यानुलोम्येषु' अ० ३ २ २० सूत्रेण ताच्छील्ये ट। शम् सुखनाम निघ० ३ ६]

शङ्कवः कीला १ १६४ ४८ यन्त्रकला ऋ० भू० १९८ [शकि शङ्कायाम् (भ्वा०) धातो 'खरुशङ्कुपीयु०' उ० १ ३६ सूत्रेण कु-प्रत्ययान्तो निपात्यते। शङ्कु (साम) तद् (शकुसाम) उ सीदन्तीयमित्याहु ता० ११ १० १२ शकु भवत्यह्नो धृत्यै यद्वा अधृत शकुना तद् दाधार ता० ११ १० ११]

शङ्खध्मम् य शङ्खान् धमति तम् (पुरुषम्) ३० १९ [शखोपपदे ध्मा शब्दाग्निसयोगयो (भ्वा०) धातो क। शख =शमु उपशमने (दिवा०) धातो 'शमे ख' उ० १ १०२ सूत्रेण ख]

शङ्खयः श सुख गमयति स (राजा शिष्यो वा) २ १ ६ [शम् इत्युपपदे गम्लृ गतौ (भ्वा०) धातोर्वाहु० औणा० डि प्रत्यय। अन्तर्भावितो ण्यर्थ]

शङ्खवे श सुख गच्छति प्राप्नोति तस्मै (जनाय) १६ ४० [शम् इत्युपपदे गम्लृ गतौ (भ्वा०) धातो 'मितद्वादिभ्य उपसख्यानम्, अ० ३ २ १८० वा०सूत्रेण कर्त्तरि ड्]

शचिष्ठया अतिशयितया क्रियया २७ ३९ अतिशयेन श्रेष्ठया वाचा प्रज्ञया कर्मणा वा ४ ३१ १ अतिशयेन शची प्रज्ञा तया वृता वर्त्तमानया (युक्त्या) ३६ ४ [शचीति व्याख्यास्यते। ततोऽतिशायन इष्ठन्। तत स्त्रिया टाप्]

शचिष्ठः अतिशयेन प्राज्ञ (विद्वज्जन) ४ २० ९ [शचीप्राति० अतिशायन इष्ठन्]

शचीनाम् वाणीना सत्कर्म्मणा वा १ १७ ४ प्रज्ञाना वाचा वा ४ ४३ ३ **शचीभिः**=कर्मभि प्रज्ञाभिर्वा २७ ९ **शच्या**=प्रज्ञया प्रजया वा ६ १७ ६ [शच व्यक्तायां वाचि (भ्वा०) धातोरौणा० इन्। तत स्त्रिया 'कृदिकारादक्तिन' इति ङीप्। शची वाङ्नाम निघ० १ ११ कर्मनाम निघ० २.१ प्रज्ञानाम निघ० ३ ९ शचीभि =कर्मभि नि० १२ २७]

शचीपतिम् वेदवाच पालकम् (इन्द्र=शालाध्यक्षम्) १ १०६ ६ **शचीपतिः**=प्रजापतिर्वाक्पतिर्वा (इन्द्र = राजा) ४ ३० १७ **शचीपते**=प्रजास्वामिन् (उत्तमराजन्) ६ ४५ ९ वाच प्रज्ञाया पालक (राजन्) ४ ३१.७ [शची-पतिपदयो समास। शचीति व्याख्यातम्]

शचीवते प्रशस्ता प्रज्ञा विद्यते यस्य तस्मै (शक्राय=

शतविचक्षणाः शतसंख्याडस्या विचक्षणा गुणा यासु ता (ओषधी=सोमाद्या) १२ ६२ [शत-विचक्षणपदयो समास। विचक्षण=वि+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्युच्। 'असनयोश्च प्रतिषेध' इति ख्याञ् न भवति]

शतव्रजा अपरिमितगतय (धारा) ४ ५८ ५ शतसंख्याता व्रजा मार्गा यासा ता, भा०—अनेकमार्गा (वाच) १७ ६३ [शत-व्रजपदयो समास। व्रज=व्रज गतौ (भ्वा०) धातो 'गोचरसञ्चर०' इति घ]

शतशारदाय शत शरदो जीवनाय ३४ ५२ शत वर्ष पर्यन्त जीवन के लिए स० वि० १४०, अथर्व० १४ २ ७५ [शत-शारदपदयो समास। शारदम्=शरच्छब्दाद् भवार्थेऽण्]

शतसाः य शतानि सनति विभजति स (सभेशो राजा) ७ ८ ६. [शतोपपदे षण सम्भक्तौ (भ्वा०) धातो 'जनसनखन०' अ० ३ २ ६७ सूत्रेण विट्। 'विड्वनोरनुनासिकस्यात' इत्याकारादेश। शतसा शतसानिनी नि० १० २६]

शतसेयाय शतादिसङ् यापरिमितधनावसानाय ३.१८ ३ [शत-सेयपदयो समास। सेयम्=षोऽन्त-कर्मणि (दिवा०) धातोर्यत्]

शतस्वी शतमसङ्ख्य स्व धन विद्यते यस्य स (विप्र=मेधाविजन) ७ ५८ ४ [शत-स्वपदयो समासान् मत्वर्थ इनि]

शतहिमा शत हिमानि यस्या आयुषि सा (इडा=शास्त्रपारङ्गता वाणी) २ १ ११ **शतहिमाः**=यावच्छत वर्षाणि तावत् ६ ४ ८ शत हिमानि येषान्ते (सुवीरा जना) ६ १२ ६ शतवर्षजीविन (वीरपुरुषा) ६ १७ १५ शत हिमानि यासु समासु ता १ ७३ ६ शत हिमा हेमन्तर्त्तवो गच्छन्ति येषु सवत्सरेषु ते ऋ० भू० २४७, अथर्व० १६ ७ ४ [शत-हिमपदयो समासे स्त्रिया टाप्। हिमम्=हन हिमागत्यो (अदा०) धातो 'हन्तेर्हि च' उ० १ १४७ सूत्रेण मक्। धातोश्च हिर देश]

शता शतान्यसङ्ख्यातानि वस्तूनि १ १२६ ६ [शत-प्राति० शेर्लोपश्छन्दसि]

शताऽऽत्मा शतेष्वसङ्ख्यातेषु पदार्थेष्वात्मा विज्ञान यस्य स (विद्वज्जन) १ १४६ ३ [शत-आत्मनूपदयो समास। आत्मन्=आत्माऽनतेर्वाप्तेर्वा, अपि वाप्त इव स्याद् यावद् व्याप्तिभूत इति नि० ३ १५]

शतानीकाय शतान्यनीकानि सैनिकानि यस्य तस्मै (राज्ञे) ३४ ५२ [शत-अनीकपदयो समास। अनीकम्=अन प्राणने (अदा०) धातो 'अनिहृपिभ्या किच्च' उ० ४ १७ इति सूत्रेण ईकन्]

शतायुषम् शतवर्षजीविनम् (मनुष्यम्) ६ २.५ शतवर्षपरिमितजीवनम् (तनयम्) १३ ४१ **शतायुषा**=शत वर्षाणि यस्मिन्नायुषि तेन १६ ३० [शत-आयुष्-पदयो समास]

शतारित्राम् शतसङ्ख्याकान्यरित्राणि जलपरिमाण-ग्रहणार्थानि स्तम्भनानि वा यस्या ताम् (नावम्) १ ११६ ५ शतान्यरित्राणि लोहमयानि समुद्रस्थलान्तरिक्ष-मध्येस्तम्भनार्थानि गाधग्रहणार्थानि च भवन्ति यस्या ताम् (नावम्) ऋ० भू० १३३, १ ११६ ५ [शत-अरित्रपदयो समास। अरित्रम्=ऋ गतिप्रापणयो (भ्वा०) धातो करणे कारके 'अर्तिलूधू०' अ० ३ २ १८४ सूत्रेण इत्र प्रत्यय]

शतावयम् शतान्यवयवा यस्मिँस्तम् (पशुम्) ५ ६१ ५ [शत-अवयवपदयो समास। वलोपश्छान्दस]

शताश्रिम् य शतान्याश्रयति तम् (वज्रम्) ६ १७ १० [शतोपपदे आङ्पूर्वात् श्रिञ् सेवायाम् (भ्वा०) धातो कर्त्तरि क्विप्]

शतिनम् शतशो विद्यायुक्तम् (वाज=बोधम्) १ १२४ १३ अपरिमितमसङ्ख्यम्. (पदार्थविज्ञानम्) २ २ ६ शतधा योद्धृसेनासहितम् (वाज=सङ्ग्रामम्) ६ ८ ६ **शतिनः**=प्रशस्तगुणै सह शतधा वर्त्तमानस्य (वाजस्य=अन्नस्य) १५ २१ शतमसङ्ख्यात वल येषामस्ति ते (मरुत=व्याप्तविद्या जना) ७ ५७ ७ शतमसङ्ख्याता प्रशसिता विद्याकर्माणि वा विद्यन्ते येषा ते (विद्वासो मनुष्या), प्र०—अत्र प्रशसाऽर्थे इनि १ ३१ १० [शतम् बहुनाम निघ० ३ १ ततो भूम्न्यर्थे प्रशसाया वा मत्वर्थ इनि]

शतिनीभिः शतानि बहवो वीरा विद्यन्ते यासु सेनासु ताभि १ १३५ १ प्रशस्तसङ्ख्यातसेनाङ्गयुक्ताभि चमूभि १ १३५ ३ शतसंख्याता प्रशस्ता गतयो यासु क्रियासु ताभि १ ५६ ७ शत बहूनि कर्माणि विद्यन्ते यासु ताभि (गतिभि) २७ २८ [शतप्राति० भूम्न्यर्थे मत्वर्थ इनि। तत स्त्रिया डीप्]

शतेषुधे शतमसख्या शस्त्रास्त्रप्रकाशा यस्य तत्सम्बुद्धौ (अ०—सेनाध्यक्ष) १६ १३ [शत-इषुधिपदयो समास। इषुधि=इषूपपदे दधाते 'कर्मण्यधिकरणे चे' ति कि]

धारा वाङ्नाम निघ० १ ११]

शतनीथम् शतं प्राप्तव्यम् (आजि=सङ्ग्रामम्) १ १७६ ३ **शतनीथः**=शतानि नीथानि यस्य स (इन्द्र=सेनाद्यधिपति) १ १०० १२ सैकडो असङ्ख्यात पदार्थों की प्राप्ति कराने वाला (ईश्वर) आर्याभि० १ ३४, ऋ० १ ७ १० १२ [शत-नीथपदयो समासः। नीथ=णीञ् प्रापणे (भ्वा०) धातो 'हनिकुषिनीरमि०' उ० २ २ सूत्रेण थन्]

शतपद्भिः शतैर्गमनशीलै पादवेगै (रथै) १ ११६ ४ शतेनाऽसङ्ख्यातेन वेगेन पद्भ्या यथा गच्छेत् तादृशैरत्यन्त-वेगवद्भि (यानै) ऋ० भू० १६०, १ ११६ ४. [शत-पादपदयो समासे 'पद्दन्नोमास्०' अ० ६ १ ६३ सूत्रेण पदादेश]

शतपयाः शतानि पयासि दुग्धादीनि वस्तूनि यस्य स (अ०—यजमान) १७ ५६ [शत-पयस्पदयो समास]

शतपर्वणा शतान्यसङ्ख्यातानि पर्वाण्यलङ्कर्माणि वा यस्मात्तेन (वज्रेण) १ ८० ६ शतस्याऽसङ्ख्यातस्य जीवजातस्य पर्व पालन यस्मात्तेन (वज्रेण) ३३ ६६ [शत-पर्वन्पदयो समास। पर्वन्=पॄ पालनपूरणयो. (जु०) धातो 'स्तामदिपद्यर्त्तिपृशकिभ्यो वनिप्' उ० ४ ११३ सूत्रेण वनिप्]

शतपवित्राः शतैरुपायैर्ये शुद्धा (देवी=विदुष्य स्त्रिय) ७ ४७ ३ [शत-पवित्रपदयो समास। शतपवित्रा बहूदका नि० ५ ६]

शतभुजिः शतमसङ्ख्याता भुजय पालनानि यस्या सा (मही=राज्ञी) ७ १५ १४ **शतभुजिभिः**=शतम-सङ्ख्य सुख भोक्तु शील येषा तै (पूर्भि=नगरै) १ १६६ ८ [शत-भुजिपदयो समास। भुजि=भुज पालनाभ्यवहारयो (रुधा०) धातो 'इक् कृष्यादिभ्य' इति इक्]

शतम् शतसङ्ख्याकान् (हिमा=वर्षाणि) १ ६४ १४ शतवार्षिकम्, भा०—यदा शतवार्षिकमायुर्व्यतीत तदा शरी-राणा जराऽवस्था भवेत् २५ २२ असङ्ख्याता (प्राणा) १७ ७१ शतादधिकानि वा (हिमा=हेमन्तर्त्तव) २ २७ सी (माल) ग० वि० १२१, अथर्व० १४ १ ५२ असङ्ख्यम् (राध=धनम्) ४ ३१ ६ अनेकानि (धामानि=मर्मस्था-नानि) १२ ७५ भा०-शतश (आवृत=क्रिया) १२ ८ **शतस्य**=अनेकेषाम् (यक्ष्माणा=महारोगाणाम्) १२ ६७ **शतानि**=बहूनि (आशून्=अश्वान्) ४ २६ ४ **शतैः**=शतसङ्ख्याकैरसङ्ख्यैर्वा (वधै=हननै) ६ २० ४ [शतम् बहुनाम निघ० ३ १। एषा वाव यज्ञस्य मात्रा यच्छतम् ता० २० १५ १२]

शतमन्युः शतधा मन्यु क्रोधो यस्य स (इन्द्र=सेनापति) १७ ३६ [शत-मन्युपदयो समास। मन्यु क्रोधनाम निघ० २ १३.]

शतमानम् शतमसङ्ख्य मान यस्य तत् (आयु=जीवनम्) १६ ६३ [शत-मानपदयो समास। मानम्=माङ् माने शब्दे च (जु०) धातोर्ल्युट्]

शतमूतिः शतमसङ्ख्याता ऊतयो रक्षणादिका-क्रिया यस्य स (सेनापति), प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति सुपो लुगभाव १ १०२ ६. शतमसङ्ख्याता, ऊतयो रक्षा यस्मात् स (इन्द्र=राजा) १ १३० ८ **शतमूते**=असङ्ख्यरक्षाकर्त्त (इन्द्र=शूरवीर राजन्) ७ २१ ८ [शत-ऊतिपदयो समास। ऊति=अव रक्षणा-दिषु (भ्वा०) धातोः स्त्रियाम् 'ऊतियूतिजूति०' इति क्तिन् उदात्तश्च]

शतमूर्द्धन् शतेष्वसङ्ख्यातेषु मूर्द्धा मस्तक यस्य तत्सम्बुद्धौ (अ०—अग्ने=योगिराज) १७ ७१ [शत-मूर्द्धन्पदयो समास। मूर्द्धन्=मूर्धा मूर्त्तमस्मिन् धीयते नि० ७ २७]

शतयातुः य शतं सह याति स (वीरसैनिक) ७ १८ २१ [शतोपपदे या प्रापणे (अदा०) धातो 'कमि-मनि०' उ० १ ७३ सूत्रेण तु]

शतरुद्रियाणाम् शतानां रुद्राणा दुष्टरोदकानाम् (अवत्तानाम्=उदारचेतोजनानाम्) २१ ४५ बहूना मध्ये विद्वदधिष्ठातृणाम् (जनानाम्) २१ ४४ शत रुद्रा शतरुद्रा, शतरुद्रा देवता येषा तेषाम् (अग्निष्वात्ताना=गृहीताऽग्नि-जनानाम्) २१ ४३ [शत-रुद्रपदयो समासे 'सान्य देवते' त्यर्थे 'शतरुद्राच्छश्च घश्च' अ० ४ २ २८ वा० सूत्रेण छ। अहोरात्रे (सवत्सरस्य) शतरुद्रीयम् नै० ३ ११ १० ३]

शतवन् शतानि वलानि विद्यन्ते यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) ६ ४७ ६ [शतप्राति० मतुप्]

शतवल्शः शतानि वल्शा अङ्कुरा यस्य स (वशादि-वृक्षविशेष) ३ ८ ११ यथा बहुङ्कुरो वृक्षस्तथा ५ ४३ [शत-वल्शपदयो समास]

शतवल्शा शतमसङ्ख्याता वल्शा अङ्कुरा यस्या सा (ओषधी) १२ १०० [शतवल्श इति व्याख्यातम्। तत स्त्रिया टाप्]

कारिणी (स्त्री) १२.९२. सुखकारी, आरोग्यसुखद, शान्तिप्रद, ऐश्वर्यसौन्यप्रद, विद्याव्याप्तिप्रद (ईश्वरो विद्वज्जनो वा) १.९० ९ सुखकारक, सुखस्वरूप, सुखप्रचारक, सकल ऐश्वर्यदायक, विद्याप्रद, कल्याणकारक (परमात्मा) म० प्र० १९, ३६ ९ सुखरूपम् (राज्यम्) ७ ६ २ सुखकारिणौ, सुखकर्त्तारौ (सोमारुद्रौ=राजवैद्यौ) ६ ७४ १ सुखकारकौ (इन्द्राग्नी=विद्युत्पावकौ) ७ ३५ १ [शम् सुखनाम निघ० ३ ६ शम् सुखम् नि० ११.३०]

शमम् शाम्यन्ति येन तम् (शान्तिव्यवहारम्) १ ३३ १५ **शमस्य**=शाम्यन्ति येन तस्य शान्तियुक्तस्य मनुष्यस्य १ ३२ १५ [शमु उपशमने (दिवा०) धातोर्घञ् 'नोदात्तोपदेशस्य मान्तस्य०' अ० ७ ३ ३४ इति वृद्धिनिषेध]

शमाये शममिवाचरामि ३ ११ [शममिति व्याख्यातम्। आचारेऽर्थे क्यङन्ताल्लट्]

शमि कर्म्माणि ३ ५५ ३ कर्म्मणि, प्र०—अत्र वर्णव्यत्ययेन ह्रस्व 'सुपा सुलुक्०' इति सुलोप २ ३१ ६ **शमी**=उत्तम कर्म्म ४.२२ ८ [शमी कर्मनाम निघ० २ १ शमी=कर्माणि नि० ११ १६ शमी (वृक्ष) प्रजापतिरग्निमसृजत सो ऽबिभेत्प्र मा धक्ष्यतीति त शम्याागमयत्। तच्छम्यै शमीत्वम् तै० १ १ ३ ११ तद् यदेत शम्याागमयँस्तस्माच्छमी श० ९ २ ३ ३७ शमीमय (शकु) उत्तरत, श मेऽसदिति श० १३ ८ ४ १. श वै प्रजापति प्रजाभ्य शमीपलाशैरगुप्त श० २.५ २ १२ यया ते सृष्टस्याग्ने हेतिमशमयत्प्रजापति तामिमामप्रदाहाय शमी शान्त्यै हराम्यहम् तै० १ २ १ ९]

शमितम् उपशान्तम् (हवि) १७ ५७ [शमु उपशमने (दिवा०) धातोर्णिजन्तात् क्त। 'निष्ठाया सेटि' सूत्रेण णेर्लोप]

शमिता यज्ञ २० ४५ यज्ञस्य कर्त्ता (यजमान) २३ ३९ उपशमादिगुणयुक्त (गृहाश्रमी जन) १७ ५७ उपशमक (विद्वज्जन) २ ३१० शान्तिप्रद, भा०—सर्वरोगप्रणाशक (सविता=सूर्य) २१ २१ यजसम्बन्धी (अग्नि=पावक) २७ २१ शान्तिकर (देव=मेघ) २९ ३५ **शमितारम्**=शान्तिकरम् (वनस्पतिं=किरणपालक सूर्यम्) २८ ३३ यजमानम् २८ १०. **शमितारः**=अध्ययनाऽध्यापनाद्ये यज्ञे शमादिगुणाना प्रापका (भा०—ब्राह्मणा, क्षत्रिया, वैश्या) २३ ४० सज्जनताऽऽलस्य निष्पादिनः (विद्वानो जना) १ १९२ १० **शमितुः**=शमाऽनुष्ठातु (जनस्य) १.१९२ ९ [शमु उपशमने (दिवा०) धातो कर्त्तरि तृच्। शमिता अध्रिगुश्चापापश्च। उभौ देवाना शमितारौ तै० ३ ६ ६ ४ मृत्युस्तदभवद्धाता शमितोग्रो विशा पति तै० ३ १२ ९ ६ मृत्यु शमिता ता० २५ १८ ४]

शमितारा शान्त्या यज्ञकर्मकर्त्तारौ (बाहू) ५.४३ ४ [शमु उपशमने (दिवा०)+तृच्। ततो द्विवचनस्याकारादेश]

शमितेव यथा यज्ञमय (यजमान) ५ ८५.१ [शमिता-इवपदयो समास]

शमी उत्तम कर्म्म ४.२२ ८ कर्माणि १ ११० ४ **शमीभिः**=क्रियाभि ४ १७ १८ श्रेष्ठै कर्म्मभि ४.३३ ४ **शमीम्**=कर्म्म ५ ४२ १० **शम्या**=शान्तियुक्तक्रियया १ ८३ ४ [शमी कर्मनाम निघ० २ १ शमी कर्माणि नि० ११ १६]

शमीष्व दु खनिवृत्तये सुखसम्पादनार्थं कुरुष्व, प्र०—शमु उपशमे इत्यस्माद् 'बहुल छन्दसि' इति श्यनो लुक् 'तुरुस्तुशम्यम ' सार्वधातुके अ० ७ ३ ९५. इतीडागमः। समीक्षा—महीधरेणाऽत्र शपो लुगित्यशुद्ध व्याख्यातम् १ १५ [शमु उपशमने (दिवा०) धातोर्लोट्। श्यनो लुक् छन्दसि। 'तुरुस्तु०' इतीडागम]

शम्बरम् श सुख वृणोति यस्मात्त मेघम् ४ ३० १४ बलम् १ ५१ ६ शङ्करम् (दास=सेवकम्) ६ २६ ५. अधर्मसम्बन्धिनम् (शत्रुम्), प्र०—अत्र शम्बधातोरौणादिकोऽरन् प्रत्यय १ १०१.२ श सुख वृणोति येन त मेघमिव शत्रुम् १ ५४ ४ **शम्बरस्य**=मेघस्य बलवत शत्रोर्वा, प्र०—शम्बर इति मेघनाम निघ० १ १० बलनाममु च निघ० २ ९, १ १०३ ८ **शम्बराणि**=शम्बरस्य मेघस्य सम्बन्धीनि अश्राणि २ २४ २ [शम्बर मेघनाम निघ० १ १० शम्बरम् उदकनाम निघ० १ १२ बलनाम निघ० २ ९ शम् सुखनाम निघ० ३ ६ शम्-वरणदयो समास। वर=वृञ् वरणे (स्वा०) धातो 'ग्रहवृदृनिश्चिगमश्च' अ० ३ ३ ५८ सूत्रेणाप्। वकारस्य बकारो वर्णव्यत्ययेन। शम्ब सवन्धने (चुरा०) धातोर्वा बाहु० औणा० रन्। शम्बर मेघम् नि० ७ २३]

शम्बरहत्ये शम्बरस्य बलस्य हत्या हनन यस्मिन् युद्धादिव्यवहारे तस्मिन् १ ११२ १४. [शम्बर-हत्या-पदयो समास। हत्या=हन हिंसागत्यो (अदा०) धातोर्भावे 'हनस्त च' अ० ३ १.१०८ सूत्रेण क्यप्]

शम्भवाय श सुख भावयति तस्मै परमेश्वराय

शतोतिम् शतान्यूतयो येन तम् (रथ=किरणम्) ६ ६३ ५ [शत-ऊतिपदयो समास । ऊति =अव रक्षण-गत्यादिषु (भ्वा०) धातो स्त्रियाम् 'ऊतियूति०' इति क्तिन् । स चोदात्त]

शत्रवः अमित्रा (जना) १ ५ ४ **शत्रुम्**=विरोधिनम् (जनम्) १ १२६ ४ शातयितारम् (दुर्जनम्) २ २३ ११ वैरिणम् (दुर्जनम्) २ ३० ३ **शत्रून्**=सत्य-न्यायविरोधे प्रवर्त्तमानान् (कुपुरुषान्) ७ ३७ धर्मविरोधिन (असज्जनान्) ६ ४४ १७ अरीन् १३ १३ दुष्टकर्मकर्त्तॄन् (जनान्) ३ ३० ६ अस्माक शातकान् सुख-विच्छेदकान् (जनान्) २ ३० ८ मेघाऽवयवान् १ ३३ १३ [शद्लृ शातने (भ्वा०) धातो 'रु-शातिभ्या क्रुन्' उ० ४ १०३ सूत्रेण क्रुन् । शत्रु =शमयिता शातयिता वा नि० २ १६]

शत्रिम् दुःखविच्छेदकम् (केतु=प्रज्ञाम्) ५ ३४ ६. [शद्लृ शातने (भ्वा०) धातो 'राशदिभ्या त्रिप्' उ० ४ ६७ सूत्रेण त्रिप्]

शत्रुतूर्याय शत्रूणा हिंसनाय ६.२२.१० [शत्रु-तूर्य-पदयो समास । तूर्यम्=तूरी गतित्वरणहिंसनयो (दिवा०) धातोर्ण्यत्]

शत्रूयतः आत्मन शत्रुमाचरत (पुरुषस्य) १२ ५ **शत्रूयताम्**=शत्रूणामिवाचरताम् (सैनिकानाम्) ५ ४ ५ शत्रुत्वमिच्छताम् (जनानाम्) ३३ १२ **शत्रूयन्तम्**=शत्रून् कामयमानम् (राजद्रोहिजनम्) ७ २० ३ [शत्रु-पदादाचारेऽर्थे, आत्मन इच्छायामर्थे वा क्यच्]

शन्तमम् अतिशयित सुखम् १ ४३ १ **शन्तमानि**=अतिशयेन कल्याणकराणि (वचासि) ६ ३२ १ अतिशयेन सुखकराणि (आचरणानि) ६ २३ ६ [शम् सुखनाम निघ० ३ ६ ततोऽतिशायने तमप्]

शन्तमया अतिशयेन सुखप्रापिकया, भा०—धर्म्यया (नीत्या) १६ २ **शन्तमा**=अतिशयेन सुखप्रापिका (प्रज्ञा) १ ७६ १. अतिशयेन सुखकरी (गी =वाक्) ५ ४२ १ अतिशयेन कल्याणकारिणी (गी) ५ ४३ ८. [शन्तमम् इति व्याख्यातम् । तत स्त्रिया टाप्]

शन्तमः अतिशयेन सुखकारी (जन) १ १३६ ४ अतिशयेनाऽऽनन्दप्रद (विद्वज्जन) १ ७७ २ श सुखमतिशयित यस्मिन्त्स (स्तोम) प्र०—शमिति सुखनाम निघ० ३ ६, १ १६ ७ **शन्तमेन**=अतिशयित श सुख तेन (अवसा=रक्षाद्येन) १६ ५५ अत्यन्तसुखरूपेण कर्म्मणा १३ १६. अतिशयसुखेन १५ ६४. अतिशयेन सुखकारकेण (विज्ञानेन) १४ १२ [शम् सुखनाम निघ० ३ ६ ततोऽतिशायने तमप् । ततो मत्वर्थ अर्श आदित्वाद् अच्]

शन्तमा अतिशयेन शङ्कराणि (शर्माणि), सुखकराणि (औषधानि) ३ १३ ४, २ ३३.१३ [शन्तमम् इति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शन्तमेभिः अतिशयेन सुखकारकै. (भेषजेभि = औषधै) २ ३३ २ [शन्तममिति व्याख्यातम् । ततो भिस ऐसादेशो न भवति छन्दसि]

शन्तातौ श सुखस्य कर्त्तारौ (अश्विना=सभासेनेशौ), प्र०—अत्र 'शिवशमरिष्टस्य करे' अ० ४.४ १४३ इति तातिल्-प्रत्यय १ ११२ २० [शम् सुखनाम निघ० ३ ६ तत करोत्यर्थे 'शिवशमरिष्टस्य करे' सूत्रेण तातिल्]

शपथ्यात् शपथे भवात् कर्मण १२ ६० [शपथ-प्राति० भवार्थे यत् । शपथ =शप आक्रोशे (दिवा०) धातो 'शीङ्शपिरुगमि०' उ० ३ ११३ सूत्रेण अथ]

शपन्तम् आक्रोशन्तम् (मनुष्यम्) १ ४१ ८ [शप आक्रोशे (भ्वा०) धातो शतृ]

शपामहे उपालम्भामहे २० १८ शपामहे ६ २२ [शप आक्रोशे (भ्वा०) धातोर्लट्]

शफच्युतः शफेषु गवादिखुरचिह्नेषु च्युत पतित आसिक्तो य स (रेणु =धूलि) १ ३३ १४ [शफ-च्युत-पदयो समास]

शफवत् शफा विद्यन्ते यस्मिन् पदे तत् ३ ३६ ६ शफेन तुल्यम् ५ ८३ ५ [शफप्राति० मतुप् । शफप्राति० वा तुल्यार्थे वति]

शफात् खुरात्, श फणति प्रापयतीति शफो वेगस्तस्माद्वा, प्र०—अत्र 'अन्येभ्योऽपि दृश्यते' इति ड, पृषोदरादित्वान्मलोपश्च १ ११७ ६ खुरादिव जलसेकस्थानात् १ ११६ ७ **शफानाम्**=श फणन्ति तेषाम् (वेगानाम्) १ १६३.५ [शम् उपपदे फण गतौ (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यते' इति ड । पृषोदरादिना पूर्वस्य मलोप]

शफाविव यथा खुरौ परस्परेण सम्बद्धौ २ ३६ ३. [शफौ-इव-पदयो समास]

शबलाः किञ्चिच्छ्वेता (पश्वादय) २४ १० [शप आक्रोशे (भ्वा० दिवा०) धातो 'शमेर्बश्च' उ० १ १०५. सूत्रेण कल बकारश्चान्तादेश]

शम् कल्याणकारक ज्ञानम् ८ २६ रोगनिवारणम् ८ २६ सुख कल्याण वा ५ ७४ ६ सुखकर (भग = ऐश्वर्य्यम्) ७ ३५ २ सुखकरम् (वच) ५ ११ ५ कल्याण-

दिपु) ३.५५.४ [शीड् स्वप्ने (अदा०) धातो 'सज्ञाया समजनिषदनिपत०' अ० ३ ३ ९९ सूत्रेण क्यप्। तत स्त्रिया टाप्। 'अयड् यि क्ङिती' ति अयड्। यलोपश्छान्दस। शीड् स्वप्ने (अदा०) धातो 'एरच्' इत्यच्। ततष्टाप्]

शयुत्रा यौ शयून् शयानान् त्रायतस्तौ (अश्विनौ=शिल्पिजनौ) १ ११७ १२ [शयुत्रप्राति० द्विवचनस्याकारादेश शयुत्र =शयूपपदे त्रैङ् पालने (भ्वा०) धातोर्ड। शयुरिति व्याख्यातम्]

शयुत्रा शयनस्थानम् ऋ० भू० २१०, ऋ० ७ ८ १८ २ [शयुत्रा शयने नि० ३ १५]

शये शयन कुर्याम् ४ ३० ११ [शीड् स्वप्ने (अदा०) धातोर्लटि उत्तमैकवचनम्]

शये शेते, प्र०—अत्र 'लोपस्त आत्मनेपदेषु' अ० ७ १ ४१ इति तलोप १ ३२ ९ गर्भाशय मे ठहरता है अथर्व० ९ ३ ६ स० वि० २०४, [शीड् स्वप्ने (अदा०) धातोर्लट्। 'लोपस्त आत्मनेप्रदेषु' इति तलोप शये आशेते नि० ११ ४८]

शरणम् आश्रयितु योग्यम् (छर्दि गृहम्) ६ ४६ ९ आश्रयम् २ ३ ८ **शरणे**=शरणागतपालने कर्म्मणि ७ १९ ८ गृहे १ १५० १ **शरणैः**=दु खादीना हिसनै ३.६२ ३ [शरणम् गृहनाम निघ० ३ ४ शरणा शरणम् नि० ५ २२]

शरणा शरणो शत्रूणा हिंसकौ (बाहू=भुजौ) ६ ४७ ८. [शरणप्राति० द्विवचनस्याकारादेश। शरण = शृ हिंसायाम् (क्रचा०) धातोर्बाहु० औणा० युच्]

शरणिम् अविद्यादिदोषहिंसिका विद्याम्, प्र०—अत्र शृधातोर्बाहुलकादौणादिकोऽणि प्रत्यय १ ३१ १६ [शृ हिंसायाम् (क्रचा०) धातोर्बाहु० औणा० अनि]

शरत् शृणाति येन सा (ऋतु) १३ ५७ शरद्वतु १० १३ अर्द्धरात्र ३१ १४ **शरदः**=शरद्वत्वन्तान् सवत्सरान् १ ७२ ३ शरदाद्यृतून् २ ४७ १७ शरद्वतूपलक्षितान् सवत्सरान् १ ८९ ९ शरद्वत २ २७ १० शत वर्षाणि ३ ३६ १० शत वर्ष पर्यन्त स० वि० १२१, अथर्व० १४ १ ४२ **शरदे**=शरदतौ सुखाय २४ ११ **शरद्भिः**=शरदादिभि ऋतुभि १ ८६ ६ [शृ हिंसायाम् (क्रचा०) धातो 'शृदृभसोऽदि उ० ११३० सूत्रेणादि। शरद =शरच्छना अम्यामोपधयो भवन्ति शीर्णा आप इति वा नि० ४ २५ शरद् वै वर्हिरिति हि शरद् वर्हिर्या इमा ओपधयो ग्रीष्महेमन्ताभ्या नित्यक्ता भवन्ति ता वर्षा वर्धन्ते ता शरदि वर्हिषो रूप प्रस्तीर्णा शेरे तस्माच्छरद् वर्हि श० १ ५ ३ १२ वर्हिर्यजति शरदमेव शरदि हि वर्हिष्ठा ओपधयो भवन्ति कौ० ३ ४ शरदि ह खलु वै भूयिष्ठा ओपधय पच्यन्ते जै० उ० १ ३५.५ तस्माच्छरदमोषधयो ऽभिसपच्यन्ते ता० २१ १५ ३ स्वधा वै शरद् श० १३ ८ १ ४ शरत् प्रतिहार प० ३ १ (प्रजापति) शरदम् प्रतिहारम् (अकरोत्) जै० उ० ११२ ७ शरद् वै वैश्यस्यर्त्तु तै० ११ २ ७ शरद्वा अस्य (रुद्रस्य) अम्बिका स्वसा तै० १ ६ १० ४ शरदुत्तर पक्ष (सवत्सरस्य) तै० ३ ११ १० ४ शरत्पुच्छम् (सवत्सरस्य) तै० ३ ११ १० ३ यद् विद्योतते तच्छरद (रूपम्) श० २ २ ३ ८ पड्भिर्मैत्रावरुणै (पशुभि) शरदि (यजते) श० १३ ५ ४ २८ वर्षा शरदौ सारस्वताभ्याम् (अवरुन्धे) श० १२ ८ २ ३४ शरद्ब्रह्मा तस्माद् यदा सस्य पच्यते ब्रह्मण्वत्य प्रजा इत्याहु श० ११ २ ७ ३२ शरदेव सर्वम् गो० पू० ५ १५. अन्न वै शरद् मै० १ ६ ९]

शरद्वान् शरदो या ऋतवस्ता विद्यन्ते यस्मिन् स (वृषभ =सूर्य) १ १८१ ६ [शरद्प्राति० मतुप्]

शरभम् शल्यकम्, अ०—शल्यकीम् १३ ५१ [शृ हिंसायाम् (क्रचा०) धातो 'कृशृशलिकलिगर्दिम्योऽभच्' ३ १२२ सूत्रेणाभच्]

शरवे हिसनाय ६ २७.६ दुष्टाना हिसकाय (सेनापतये) ४ ३ ७ **शरुः**=दुष्टाना हिंसका ऋष्टि १ १७२ २ हिंसक (सैनिकजन) १ १८६ ९ [शृ हिसायाम् (क्रचा०) धातो 'शृस्वृस्निहित्रपि०' उ० ११० सूत्रेण उ]

शरव्यायै शराणा निर्माणाय ३० ७ शरवीषु कुशलायै (स्त्रियै) २४ ४० **शरव्ये**=ये शरान् व्यापुनवन्ति तत्र साध्वि (सेने) ६ ७५ १६ शरेषु बाणेषु साध्वी स्त्री तत्सम्बुद्धौ (सेनानीपत्नि) १७ ४५ [शरवीप्राति० 'तत्र साधु' रित्यर्थे कुशलार्थे वा यत्। तत स्त्रिया टाप् शरवी =शरोपपदे वी गतिव्याप्त्यादिषु (अदा०) धातो क्विप् शरुप्राति० वा कुशलार्थे छान्दसो यत्। ततष्टाप् स्त्रियाम्]

शरसि तडागे ३९ ५ [शरस्प्राति०, सप्तमी। सरस्-शृ हिंसायाम् (क्रचा०) धातोरौणा० असुन्। सरस्प्राति० वा सप्तमी। वर्णव्यत्ययेन सकारस्य शकार]

शरसे हिंसकाय (पुरुषाय) ३८ १५ [शृ हिसायाम् (क्रचा०) धातोरौणा० असुन्]

शरस्य हिंसकस्य (दुष्टजनस्य) सकाशात् १ ११६ २२ [शृ हिसायाम् (क्रचा०) धातो पचाद्यच् कर्त्तरि]

सेनाधीशाय वा, प्र०—अत्राऽन्तर्भावितो ण्यर्थ १६ ४१ सुखस्वरूपाय (परमेश्वराय) प० वि०, १६ ४१ कल्याणस्वरूप, कल्याणकर, मोक्षसुखस्वरूप, मोक्षसुख के करने वाले (ईश्वर) के लिए आर्याभि० २ २६, १६ ४१ [शम् इत्युपपदे भू सत्तायाम् (भ्वा०) धातो कर्त्तरि पचाद्यच्। अन्तर्भावितो ण्यर्थ]

शम्भविष्ठः योऽतिशयेन श भावयति स (जन) ५ ४२.७. सुखस्य भावयितृतम (विद्वज्जन) १ १७१ ३ अतिशयेन कल्याणकारक (परमेश्वर) ४ ४३ २ [शम्भविष्ठपदयो समास। भविष्ठ+भू सत्तायाम् (भ्वा०) धातोम्तृजन्तादतिशायन इष्ठन्। अन्तर्भावितो ण्यर्थ]

शम्भविष्ठा अतिशयेन सुख भावुकौ (जलाग्नी) २.३६ ५ अतिशयेन सुखस्य भावयितारौ (अश्विना+स्त्रीपुरुषौ) ५ ७६ २ [शम्भविष्ठ इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

शम्भु य श सुख भावयति स (पति स्वामीश्वरो राजा वा) ७ ३५ १० सुखसम्पादकम् (क्षोद=जलम्) १ ६५ ३ [शम्-उपपदे भू सत्तायाम् (भ्वा०) धातो 'मितद्वादिभ्य उपसख्यानम्' अ० ३ २ १८० वा०सूत्रेण डु। शम्भु सुखभू नि० ५ ३]

शम्भुवः ये श सुख भावयन्ति ते (आदित्या देवा) १ १०६ २ सुख भवति यस्मात्तस्य (विदुष), प्र०—अत्र 'कृतो बहुलम्०' इत्यपादाने क्विप् १ १०५ ३ [शम् उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्]

शम्भुवा यौ श सुख सम्भावयतस्तौ (स्त्रीपुरुषौ) २ ४१ १६. यौ सुख भावयतस्तौ (इन्द्राग्नी=सभासेनेशौ) ६ ६० ७. [शम्भूरिति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

शम्भू श सुख भावुकौ (राजामात्यौ) ४ ४७ ७ [शम्भुरिति व्याख्यातम्। ततो द्विवचने रूपम्]

शम्भूः य श सुख भावयति स, श कल्याण भावयति स (विद्वज्जन) १८ ४५ सुख भावुक (छन्द=आनन्दकरोऽनुभव) १५ ४ सुखकर्त्ता (वरानना स्त्री) स० वि० १३८, अथर्व० १४ २ २६ [शम् उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्। अन्तर्भावितो ण्यर्थ]

शम्यति शाम्यति शम प्रापयति, प्र०—अत्र 'वाच्छन्दसि' इति दीर्घत्वाऽभाव २३ ३६ **शम्यन्तु**=भा०—शान्त्या जितेन्द्रियत्व प्रापयन्तु २३ ३५ अ०—शम प्रापयन्तु २३ ३४ आनन्दन्तु २३ ३७ [शमु उपशमने (दिवा०) धातोर्लट्। अन्यत्र लोट्। 'शमामष्टानाम्०' इति दीर्घत्व न भवति छान्दसत्वात्]

शम्यन्तः शान्ति प्रापयन्त (मरुत=मनुष्या.) २३ ४१ [शमु उपशमने (दिवा०) धातो शत्रन्ताज्जस्। दीर्घत्वाऽभावश्छान्दस]

शम्यन्तीः दुष्टस्वभाव निवारयन्त्य (मातर) २३ ४२ शम प्राप्नुवती प्रापयन्त्यो वा (स्त्रिय) २३ ३७ [शमु उपशमने (दिवा०) धातो शत्रन्तान् ङीप्। दीर्घत्वाऽभावश्छान्दस]

शम्याः शम्या कर्मणि भवा (आप=जलानि) ३ ३३ १३ [शमी कर्मनाम निघ० २ १ ततो भवार्थे यत्। ततष्टाप्। जिह्वैव शम्या श० १ २ १ १७]

शयते शेते, प्र०—अत्र 'बहुल छन्दसि' इति शपो लुङ् न १ ३२ ५ **शयथे**=शयन करोति ६ १७ ६ [शीङ् स्वप्ने (अदा०) धातोर्लट्। 'बहुल छन्दसी' ति शपो लुग् न भवति। शयथे प्रयोगे तकारस्य थकारो वर्णव्यत्ययेन]

शयथाय शयनाय ६ १८ ८ 'शीङ्शपि०' उ० ३ ११३ सूत्रेण [शीङ् शये (अदा०) धातोर् अथ प्रत्यय]

शयध्यै शयितुम् ६ ६२.३. [शीङ् स्वप्ने (अदा०) धातोस्तुमर्थेऽध्यैप्रत्यय]

शयवे शयानाय (जसुरये=हिंसकाय जनाय) १ ११६ २२ सुखेन शयनशीलाय (मनवे=राज्ञे) १ ११२ १६ **शयुम्**=य शेते तम् (पुत्रम्) ४ १८ १२ **शयुः**=योऽभिव्याप्य शेते (वरुण=परमात्मा) ३ ५५ ६ य प्रलये सर्वाणि भूतानि शाययति स (ईश्वर) [शीङ् स्वप्ने (अदा०) धातो 'भृमृशीङ्तृचरि०' उ० १ ७ सूत्रेण उ]

शयाण्यकः पक्षिविशेष २४ ३३ [शीङ् स्वप्ने (अदा०) धातोर्वाहु० औणा० अण्डन्। अकारस्याकारश्छान्दस]

शयानम् कृतशयनमिव वर्त्तमानम् (अहि=मेघम्) २ १२ ११ शयानमिवाचरन्तम् (मेघम्) ५ ३२ २ **शयानाय**=यो शेते तस्मै (जनाय) २२ ७ **शयानेभ्यः**=प्राप्तनिद्रेभ्य (राजपुरुषेभ्य) १६ २३ [शीङ् स्वप्ने (अदा०) धातो शानच्। अथवा शयानप्राति० वा आचारे क्विप्]

शयाना यौ शयाते तौ (पितरा=पितरौ) ४ ३३ ३. [शयानमिति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

शयासु शेरते यासु विद्युदादय पदार्थास्तासु (प्रकृत्या-

शर्यातम् शरो हिंसकान् प्राप्तम् (सेनाध्यक्षम्) १ ११२ १७ [शर्-यातपदयो समास । शर्=शृ हिंसायाम् (क्र्या०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति विट् । यातम्=या प्रापणे (अदा०) धातो कर्त्तरि क्त]

शर्याभिः गतिभि ७ १७ **शर्याम्**=वायुताडनाऽऽख्या क्रियाम् १ १४८ ४ [शृ हिंसायाम् (क्र्या०) धातोर्यत् तत. स्त्रिया टाप् । औणा० वा यत् । शर्या अङ्गुलिनाम निघ० २ ५ शर्या अङ्गुलयो भवन्ति । सृजन्ति कर्माणि । शर्या इषव शरमय्य नि० ५ ४]

शर्यैः हिंसतु ताडितुमर्हैर्यन्त्रै १ ११६ १० पुन पुनर्हननप्रेरणगुणै ऋ० भू० १६६, ऋ० १.८.२१.१०, [शृ हिंसायाम् (क्र्या०) धातोर्यत्]

शर्वम् विज्ञातारम् (परमेश्वरम्) ३६ ८ **शर्वस्य**=सुखप्रापकस्य (जनस्य) ३६ ६ **शर्वाय**=दुष्टाना हिंसकाय (राजपुरुषाय) १६ २८ **शर्वाः**=हिंसका (जना) १६ ५७ [शृ हिंसायाम् (क्र्या०) धातोर्वाहु० औणा० वन् प्रत्यय]

शर्वरीः रात्री ५ ५२ ३ [शृ हिंसायाम् (क्र्या०) धातो 'कृगृशृ०' उ० २ १२१ सूत्रेण ष्वरच् । पित्त्वान् ङीप् स्त्रियाम् । शर्वरी रात्रिनाम निघ० १ ७]

शर्वा शासनवज्रेण २ १२ १० [शृ हिंसायाम् (क्र्या०) धातो. कर्त्तरि वनिप् । 'सुपा सुलुक्०' सूत्रेण टास्थाने सु]

शर्वा सर्वदु खहिंसक (सभाद्यध्यक्ष) १ १०० १८ [पूर्वपदे व्याख्यातम्]

शर्वा शर्वाणि हिंसनानि ४ २८ ३ [शर्वन् इति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शर्वाः हिंसका १६ ५७ [शृ हिंसायाम् (क्र्या०) धातोर्वाहु० औणा० वन् । यच्छर्वोऽग्निस्तेन कौ० ६ ३ अग्निर्वै स देवस्तस्यैतानि नामानि । शर्व इति यथा प्राच्या आचक्षते भव इति यथा वाहीका, पशूना पती रुद्रोऽग्निरिति श० १ ७ ३ ८ आपो वै शर्व, अद्भ्यो हीद सर्व जायते श० ६ १ ३ ११ एतान्यष्टौ (रुद्र, शर्व, पशुपति, उग्र, अशनि, भव, महान्देव, ईशान) अग्निरूपाणि । कुमारो नवम श० ६ १ ३ १८]

शल्मलिः वृक्षविशेष २३ १३ **शल्मली**=शल्मलिवृक्षादौ ७ ५० ३ [शल्मलि सुशरो भवति शरवान् वा नि० १२ ८ शल्मलिर्वनस्पतीना वर्षिष्ठ वर्धते श० १३ २ ७ ४]

शल्यकः कण्टकपक्षयुक्त श्वावत् (पशु) २४ ३५. [शल्यप्राति० सज्ञाया कन् । शल्य =शल्न चलनसवरणयो. (भ्वा०) धातो 'सानसिवर्णसि०' उ० ४.१०७ सूत्रेण यत् निपात्यते । शल्यक तस्या (गायत्र्या) अनु विसृज्य कृशानु सोमपाल सव्यस्य पदो नखमच्छिदत् तच्छल्यकोऽभवत् तस्मात् स नखमिव ऐ० ३ २६]

शल्यानाम् शस्त्राणाम् १६ १३ [पूर्वपदे व्याख्यातम्]

शवसः अनन्तबलस्य प्रमितबलस्य वा १ ११ २. बलस्य सैन्यस्य ६.४४.४ बलवन्त (सूरय =विद्वज्जना) ४ ३४.६ **शवसा**=विद्यासुशिक्षाबलेन १ ११० ७. शरीरात्मबलेन १.१०० १४ बलेन परिचरणेन वा, प्र०—शवतीति परिचरणकर्मा निघ० ३ ५ अस्मादसुनि कृति रूपसिद्धि ५ ११ ५ बलयुक्तेन सैन्येन १ १०० १२ **शवसे**=सैन्यबलाय १ ५७ १ **शवः**=बलमुदक वा ३३ ६७ बलहेतुम् (रसमन्न वा) ६ ४३ ४ गमनम् ५ ५८ ७ **शवोभिः**=सेनाद्यैर्बलै १ १३० ४ [शव गतौ (भ्वा०) शवति गतिकर्मा निघ० २ १४ परिचरणकर्मा निघ० ३ ५ तत औणा० असुन् । शव उदकनाम निघ० १ १२ धननाम निघ० २ १० बलनाम निघ० २ ६ शवसा बलेन नि० १० २६ शवसो महतो बलस्य । नि० १२ २१ (यजु० १२ १०६) बल वै शव श० ७ ३ १.२६]

शवलाः किञ्चिच्छ्वेता (पशव) २४ १० [शप आक्रोशे (भ्वा०) धातो 'शमेर्वश्च' उ० १ १०५ सूत्रेण कल । वकारश्चान्तादेश]

शवसान बलयुक्त (इन्द्र=सभाध्यक्ष) १ ६२ १३ **शवसानम्**=बलवन्तम् (इन्द्र=राजानम्) ६ ३७ ३ **शवसानाय**=विज्ञानाय ३४ १६ ज्ञानवते (सभाद्यध्यक्षाय) १ ६२ २ ज्ञानबलयुक्ताय(सभाद्यध्यक्षाय)१ ६२ १ ब्रह्मचर्यसुशिक्षाभ्या शरीरात्मबलयुक्ताय (पुरुषाय) ३४ १७ [शवस् बलनाम निघ० २ ६ ततस्तत्करोति इत्यर्थे क्विप् । तत क्विबन्तात् शवस्धातो शानच् । शवसानम् अभिबलायमानम् नि० १० ३ शव गतौ (भ्वा०) धातोर्वा 'छन्दस्य शानच् शुजृभ्याम्' उ० २ ८६ सूत्रेणासानच्]

शवसावन् बलयुक्त (सभापते) १ ६२ ११ [शवस् बलनाम निघ० २ ६ ततो मतुप्-प्रत्यये छान्दस रूपम्]

शवसिन् बहुविध शवो बल विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) ७ २८ २ [शवस् बलनाम निघ० २ ६. ततो मत्वर्थ इनि]

शवस्यानि शव सु धनेषु साधूनि वीरसैन्यानि

शरासः वेणुदण्डसदृशा अन्तश्छिद्रास्तृणविशेषस्था (दर्भास =कुशा) १ १६१ ३ [शरप्राति० जसोऽसुक्। शृ हिंसायाम् (क्रया०) धातो 'ऋदोरवि' त्यप्। कर्त्तरि वाऽच्। शर शृणाते नि० ५ ४]

शरिरस्य अन्तरिक्षस्य १३ ४६ [शृ हिंसायाम् (क्रया०) धातोर्वाहु० औणा० इरच्]

शरीतोः शरीतु दुष्टस्वभाव हिंसितु शक्नोति य (इन्द्र =ऐश्वर्यवान् राजा) ३ ५३ १७ [शृ हिंसायाम् (क्रया०) धातो. 'कृतो बहुल वा' इति कर्त्तरि तोसुन्। इटो दीर्घश्च छान्दस]

शरीरम् शीर्यते हिंस्यते यत्तत् (वपु) १ ३२ १० **शरीराणि**=आश्रयान् ३५ ५. देहा १८.३ [शृ हिंसायाम् (क्रया०) धातो 'कृशृपृकटि०' उ० ४ ३० सूत्रेण ईरन्। शरीर शृणाते शम्नातेर्वा नि० २ १६ शरीरे आदित्ये नि० १२ ३७ अथ यत्सर्वमस्मिन्नश्रयन्त तस्मादु शरीरम् श० ६ १ १ ४ अशरीर वै रेतोऽशरीरा वपा यद्वै लोहित यन्मास तच्छरीरम् ऐ० २ १४ शरीर हृदये (श्रितम्) तै० ३ १० ८ ७]

शर्ध प्रशंसितबलयुक्त (विद्वज्जन) ५.२८ ३. दुष्टगुण-शत्रुनाशक बलम्, प्र०—अत्र 'सुपा सुलुक्०' इति सोर्लुक् ३३ १२ **शर्धम्**=बलयुक्तम् (धाम=स्थानम्) १ १२२ १२. बलहेतुम् (रेत) ३३ ११. बलिनम् (युवानम्) १ ७१ ८ **शर्धः**=शरीराऽऽत्मबलम् ७ ४४ ५ सैन्यम् १७ ४१ [शर्ध बलनाम निघ० २ ६ शृधु प्रसहने (चुरा०) धातो पचाद्यच्]

शर्धत् उत्सहेत् ७ २१ ५ [शर्धत्=उत्सहताम् नि० ४ १६ शृधु प्रसहने (चुरा०) धातोर्लेट्]

शर्धतः बलवत (दुर्जनस्य) २ २३ १२ **शर्धताम्**=बल कुर्वताम्, (वीरजनानाम्), प्र०—बलवाचिशर्धशब्दात् करोत्यर्थे क्विप् तत शतृ १५ ४०. **शर्धते**=य शर्द्धं करोति तस्मै (दुर्जनाय) २ १२.१० बलाय ६ २४ ८ **शर्धन्तम्**=बल कुर्वन्तम् (दुष्कर्म) ७ १८ ५ **शर्धन्तः**=बलयन्त (अर्य =अरयश्शत्रव) ७ ३४ १८ [शर्ध बलनाम निघ० २ ६. तत करोत्यर्थे क्विवन्ताच्छतृ]

शर्धनीतिः शर्द्धस्य बलस्य नीतिर्नयन प्रापण यस्य स (सभेश) ३३ २६ बलस्य सैन्यस्य नीतिर्नायक (सेनापति), प्र०—अत्र नीतौ कर्त्तरि क्तिच् ३ ३४ ३ [शर्ध-नीतिपदयो समास। शर्ध बलनाम निघ० २ ६ नीति =णीञ् प्रापणे (भ्वा०) धातो स्त्रिया क्तिन्। कर्त्तरि क्तिज् वा]

शर्धमानः सहमान (विद्वज्जन) २० ३८ [शृधु प्रसहने (चुरा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

शर्धस्तरः अतिशयेन बलवान् (शूरवीरो जन) १ १२२ १० [शर्ध बलनाम निघ० २ ६ ततोऽतिशायने तरप्]

शर्ध्यम् शर्द्धेषु बलेषु भवम् (रथ=यानम्) १ ११६ ५ [शर्ध बलनाम निघ० २ ६ ततो भवार्थे यत्]

शर्म शृण्वन्ति दुःखानि यस्मिन् तद् गृहम् २६ १०. सर्वदुःखरहित सुखम्, शृणाति हिनस्ति दुःखानि यत्तत् (सुखम्) १ १७ ८ सुख निवास वा १ ४६ १५ गृहस्वरूप सुखकारक वा (यानम्) १ ३४ ६ श्रेष्ठ शरण सुख वा ३४ २८. सुखसाधक गृहम् १७ ४८. सुखहेतु, अ०—सुखद (यज्ञ) १ १६ **शर्मणा**=विग्रहेण ७.५१ १ गृहसम्बन्धि-सुखेन १ २२ ११ **शर्मणि**=नित्यसुखे, अ०—खल्वाज्ञा-पालनाख्ये व्यवहारे १ ४ ६ आश्रये ३३ १७ [शृ हिंसायाम् (क्रया०) धातो 'सर्वधातुभ्यो मनिन्' उ० ४ १४५ सूत्रेण मनिन्। शर्म गृहनाम निघ० ३ ४ सुखनाम निघ० ३ ६ शर्म शरणम् नि० ६ १६ चर्म वाऽएतत् कृष्णस्य (मृगस्य) तन्मानुष शर्म देवत्रा श० ३.२ १ ८ (ऋ० ३ १३ ४) वाग्वै शर्म ऐ० २ ४० (ऋ० ३ १३ ४) अग्निर्वै शर्माण्यन्ना-द्यानि यच्छति ऐ० २ ४१]

शर्म शर्माणि सुखानि १.८५ १२ गृहाणि ६ ४६ १२ [शर्मन् इति व्याख्यातम्। ततो जस 'सुपा सुलुग्०' इति लुक्]

शर्मन् न्यायगृहे, प्र०—अत्र 'सुपा सुलुक्०' अ० ७ १ ३६. इति डेर्लुक् 'न डि-सम्बुद्ध्यो' अ० ८ २ ८ इति नलोपाभाव ७ ३५ [शर्मन् इति व्याख्यातम्। तत 'सुपा सुलुग्०' इति डेर्लुक्]

शर्मसदः ये शर्मणि सुखे सीदन्ति ते (वीरजना) १ ७३.३ ये गृहे सीदन्ति ते (वीरा =क्षात्रधर्मयुक्ता जना) ३ ५५ २१ [शर्मन् इत्युपपदे पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्। शर्मन्निति व्याख्यातम्]

शर्यणावति शर्यणोऽन्तरिक्षदेशस्तस्याऽदूरभवे (स्थाने) १ ८४ १४ हिंसनीय पदार्थों से युक्त भूमितल मे स० वि० १६५, ६ ११३ १ [शर्यणप्राति० अदूरभवार्थे मतुप् छान्दस। पूर्वस्य च दीर्घ]

शर्यहा हन्तव्यहन्ता (तिग्मशृङ्ग =सूर्य) ६ १६ ३६ [शर्योपपदे हन हिंसागत्यो. (अदा०) धातो क्विप्। शर्यम्=शृ हिंसायाम् (क्रया०) धातोर्यत्]

शश्रमाणः भृश श्रम कुर्वन् (बलाध्यक्षो न्यायाधीश) ४ १२ २ [श्रमु तपसि खेदे च (दिवा०) धातोर्यङ्लुगन्ताच्छानच्। व्यत्ययेनात्मनेपदम्]

शश्रमाणा तपोऽन्विता (विदुषी स्त्री) १ १७९.१ [शश्रमाण इति व्याख्यातम्। तत स्त्रिया ङीप्]

शश्वच्चै परिष्वङ्गाय ३ ३३.१० [शश्वच्चै परिष्वजनाय नि० २.२७]

शश्वच्छश्वत् व्यापक व्यापक वस्तु ३ ३६ १. [शश्वत्पदस्य वीप्साया द्वित्वम्। शश्वदिति निपातश्चादिषु पठ्यते]

शश्वत् निरन्तरम् ६ २१ ८. अनादिरूपम् (क=सुखसम्पादक ज्ञानम्) १ ४७ १० अनादिस्वरूपत्वाज्जगत्कारणात् १ ३० १६ **शश्वतः**=निरन्तरान् (पथिकान्) ५ ५२ २ सनातन जगत्कारण का स० प्र० २३८, १० ४८ १ सनातनविद्यायुक्तान् (विद्वज्जनान्) १ १३५ ७ अनादिभूतस्य (प्रजाजनस्य) ७ १९.१ अनादिस्वरूपान् पदार्थान् २ १२ १०. अनादिस्वरूपस्य परमेश्वरस्य सम्बन्धात् १ ७२ १ **शश्वता**=सनातनेन गुणेन १९ ४ **शश्वन्तम्**=अनादिभूत वेदविद्याविषयम् ६ ६१ १ **शश्वन्तः**=निरन्तर वर्त्तमाना (वाजा=विज्ञानवन्तो जना) १७ ७६ अनादिभूता जीवा ५ १४ ३ अनादिभूता. प्रवाहेण्यनित्या पृथिव्यादय ७ १ ३ निरन्तरा (शत्रव) ७ १८ १८ [शश्वन्तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ वा नि० १३ ३७ शश्वत् बहुनाम निघ० ३ १. शश्प्राति० मतुप्। शश्=शश प्लुतगतौ (भ्वा०) धातो क्विप्]

शश्वतः निरन्तरो व्याप्त धर्म ५ १२.४

शश्वतीनाम् अनादिभूताना घटिकानाम् १ ११३ १५ सनातनीनामुपसा प्रकृतीना वा १ १२४ २ प्रवाहरूपेणानादीनाम् (उषसाम्) १ ११३ ८ अनादिभूताना प्रकृतिजीवाख्याना प्रजानाम् ३ ५६ ३ **शश्वतीः**=सनातन्य (प्रजा) ३ ९ ४ अविनश्वरा (इष=प्रजा) ६ २९ अनादिस्वरूपा (प्रजा) १ २७ ७ [शश्वत्प्राति० स्त्रिया ङीप्]

शश्वत्तमम् अतिशयेनाऽनादिभूतम् (सोमम्=ऐश्वर्ययोगम्) ३ ३५ ६ अनादिस्वरूपमनुत्पन्न कारणम् २ ८ १ अतिशयितमनादिरूप वेदबोधम् १२ ५१ सदैव वर्त्तमानम् (विज्ञानम्) ३ ७ ११ [शश्वत्प्राति० अतिशायने तमप्। शश्वत्तमा शाश्वतिकतमा नि० ४ १६]

शश्वत्तमा याऽतिशयेन सनातनी (उषा) १ १२४ ४ [शश्वत्तममिति व्याख्यातम्। तत स्त्रिया टाप्]

शश्वधा शश्वदेव ३ ३३ ७

शश्वन्ता सनातनौ (जडचेतनौ) १ १६४ ३८ [शश्वन्तौ शश्वद्गामिनौ नि० १३ १७ द्विवचनस्याकारश्छान्दस]

शश्वान् शीघ्रगतिमान् (विद्वज्जन), प्र०—शश प्लुतगतौ इति धातो क्विवन्तान्मतुप् २.३८ ६ [शश प्लुतगतौ (भ्वा०) धातो क्विप्-प्रत्यये शश् इति रूपम्। ततो मतुप्]

शष्पाणि आहृत्य सशोध्य ग्राह्याणि धान्यानि १९ १३ **शष्पैः**=हिसकै (जनै), प्र०—अत्रौणादिको बाहुलकात् कर्त्तरि प २१ ४२ हिंसनै २१ २९ दीर्घर्लोमभि १९ ८१ [शप हिंसायामर्थे (भ्वा०) धातो खष्पशिल्पशष्प०' उ० ३ २८ सूत्रेण प्रत्ययान्तो निपात्यते]

शष्पिञ्जराय पङ्डुत्प्लुत पिञ्जर बन्धन येन तस्मै (सेनाधीशाय) १६ १७ **शष्पिञ्जराः**=पण्डिढसक पिञ्जरो वर्णो येषान्ते (सर्पादय) १६ ५८ [शष् पिञ्जरपदयो समास। शष्=शश प्लुतगतौ (भ्वा०) शप हिंसायामर्थे (भ्वा०) धातोर्वा क्विप्। पिञ्जर=पिजि वर्णे (अदा०) धातोर् बाहु० औणा० अर]

शष्प्याय शष्पेषु तृणादिषु साधवे (पुरुषाय) १६ ४२ [शष्पप्राति० साध्वर्थे यत्। शष्पमिति व्याख्यातम्]

शसनम् हिसन ताडनम् १ १६३ १२ शसन्ति हिंसन्ति यस्मिँस्तद् युद्धम् २९ २३ [शसु हिंसायाम् (भ्वा०) धातोरधिकरणे ल्युट्]

शसा प्रशसया ५ ४१ १८ [शसु प्रशसायाम् (भ्वा०) धातो सम्पदादित्वात् क्विप्। ततस्तृतीयैकवचनम्]

शस्त प्रशसत ४ ३७ ८ छिन्त २५ ४१ ताडयत हिस्त १ १६२ १८ [शसु स्तुतौ (भ्वा०) धातोर्लोट्। 'बहुल छन्दसी' ति शपो लुक्। अथवा शसु हिंसायाम् (भ्वा०) धातोर्लोट्। शपो लुक्]

शस्तम् प्रशसनीयम् (श=सुखम्) ५ ४७ ७ प्रशसितम् (बर्हि=उत्तमस्थानम्) ३ ५३ ३ स्तुत्य कर्म ३३ २४ **शस्ते**=प्रशसिते (उक्थे=वक्तव्ये) ४ २० १० [शसु स्तुतौ (भ्वा०) धातो क्त]

शस्तिम् प्रशसाम् ४ ३ ३ [शसु स्तुतौ (भ्वा०) धातो स्त्रिया क्तिन्]

१.१००५ [शवस् धननाम निघ० २१ तत साध्वर्थे यत्]

शविष्ठ बहु शवो बल विद्यते यस्य स शवस्वान् सोऽतिशयितस्तत्सम्बुद्धौ (सभापते), प्र०—अत्र शवशब्दाद् भूम्यर्थे मतुप् तत इष्ठन् 'विन्मतोर्लुक्' अ० ५३६५ इति मतुपो लुक् 'टे' अ० ६४१५५ अनेन टिलोप ६.३७ अतिशयेन बलवत्, प्राप्तविद्य (विद्वज्जन) ११२७१. **शविष्ठाः**=अतिशयेन बलवन्त (अ०—राजपुरुषा) १०४ [शवस् बलनाम निघ० २६ ततो मतुवन्तादतिशायन इष्ठन्। 'विन्मतोर्लुक्' अ० ५३६५ इति मतुपो लुक्]

शविष्ठा अतिशयेन नित्यबलसाधकौ (होतृयजमानौ) ८५६ अतिशयेन बलवन्तौ (सभासेनेशौ) ६६८२ [शविष्ठ इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

शवीरया वेगवत्या (धिया=क्रियया प्रज्ञया वा), प्र०—शव गतौ इत्यस्माद्धातो रन्-प्रत्यये टापि च शवीरेति सिद्धम् १३२ देशान्तरप्रापिकया गत्या, प्र०—शु गतौ इत्यस्माद्धातोर्वाहुलकादौणादिक ईरन्प्रत्यय १३०१७ [शव गतौ (भ्वा०) धातोर्वाहु० औणा० ईरन्। तत. स्त्रिया टाप्]

शशमते शाम्येत् ६२४१ **शशमे**=शाम्यति निरुपद्रवो भवति, प्र०—अत्र एत्वाऽभ्यासलोपाऽभावश्छान्दस ३३८७ प्रशसामि, प्र०—शशमान इति अर्चतिकर्मा निघ० ३१४, ६१६ [शमु उपशमने (दिवा०) धातोर्लेट्। विकरणव्यत्ययेन शप्। द्वित्व छान्दसम्। अन्यत्र लिट्। 'अत एकहल्मध्ये०' इति प्राप्तावेत्वाऽभ्यासलोपौ न भवतश्छान्दसत्वात्। शशमान इति अर्चतिकर्मा निघ० ३१४]

शशमानम् अन्यायमुल्लङ्घमानम् (सज्जनम्) २२०३ अधर्ममुल्लङ्घमानम् (सत्पुरुषम्) २१२१४ **शशमानस्य**=विज्ञातव्यस्य (विद्वज्जनस्य), प्र०—अत्र 'अधिगर्थ०' इति शेषत्वविवक्षाया षष्ठी १८६८ प्रशसितस्य (यज्यो=सत्यव्यवहारस्य) ४२३२ दुःखमुल्लङ्घत (मेधाविजनस्य) ११४२२ **शशमानः**=प्रशसन् (देव=विद्वज्जन) ४२३४ प्लवमान (मनुष्य) ४२१० प्राप्तप्रशस सन् (पुरुष) ४५१७ स्तोतुमर्हः (भग=धनसमूह) १२४४ वर्द्धमान (वनस्पति) २०.६५ **शशमानाय**=विज्ञानवते (मनुष्याय) १८५१२. अधर्ममाप्लुत्य धर्म प्राप्नुवते (जनाय) ११४११० सर्वेषा दुःखानामुल्लङ्घकाय (वाघते=मेधाविजनाय) ४२१३ प्रशसिताय (विदुषे जनाय) ४३१८ **शशमानाः**=अविद्या उल्लङ्घमाना (नर=नायका जना) ५.२६१२ **शशमानेभ्यः**=प्रशसमानेभ्य (नृभ्य=मनुष्येभ्य) ४४१३ **शशमानेषु**=भोगाभ्यासोल्लङ्घमानेषु ३१८४ [शश प्लुतगतौ (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपदम्। शशमान इति अर्चतिकर्मा निघ० ३१४ शशमान शसमान नि० ६८]

शशमानासः शत्रुबलस्योल्लङ्घका (सेनाऽमात्यादिजना) ४१६१५ [शशमानमिति व्याख्यातम्। ततो जसोऽसुक्]

शशयम् खशय मेघम्, प्र०—अत्र वर्णव्यत्ययेन खस्य श ३५७२ **शशयः**=शेते यस्मिन् स (स्तन=दुग्धाधारमङ्गम्) ३८५ शयान इव (स्तन=शुद्धो व्यवहार·) ११६४४६ **शशयाः**=कुमारी अवस्था को उल्लङ्घन करने वाली (युवतय=स्त्रिया) स० प्र० ११०, ३५५.१६ शयाना इव (धेनव=वाच) ३५५१६ [खोपपदे शीङ् स्वप्ने (अदा०) धातो 'अधिकरणे शेते' अ० ३२.१४ सूत्रेणाऽच्। वर्णव्यत्ययेन खस्य शकार·। अन्यत्र शीङ् स्वप्ने (अदा०) धातो 'एरच्' इत्यच्। 'वा छन्दसी' ति धातोर्द्वित्वम्। अथवा शश प्लुतगतौ (भ्वा०) धातोर्वाऽच्। द्वित्व छान्दसम्]

शशयानः कृतशयन (कुमार) ५७८६ [शीङ् स्वप्ने (अदा०) धातोर्लिट कानच्। 'वा छन्दसी' ति गुण। शशयाना शिश्याना नि० ६६]

शशः पशुविशेष इव वायु २३५६ [शश प्लुतगतौ (भ्वा०) धातो पचाद्यच्]

शशाधि शिक्षय ७१२० **शशास**=शाधि २२६५ **शशासुः**=शासति ४२१२ अनुशासतु ३१.२ [शासु अनुशिष्टौ(अदा०) धातोर्लोट्। द्वित्व छान्दसम्। अन्यत्र लिट् शशा=उत्प्लवस्व १८०१ [शश प्लुतगतौ (भ्वा०) धातोर्लङ्। अटोऽभाव]

शशीयसी अतिशयेन दुःख प्लावयन्ती (स्त्री) ५६१६ [शश प्लुतगतौ (भ्वा०) धातो कर्त्तरि तृजन्तात् 'तुश्छन्दसि' अ० ५३५६ सूत्रेणातिशायन ईयसुन्। तत स्त्रिया ङीप्। तृचो लोप]

शशीयांसम् धर्ममुत्प्लवमानम् (शत्रुजनम्) ४३२३ [शश प्लुतगतौ (भ्वा०) धातोस्तृजन्तादतिशायन ईयसुन्। तृचो लोप]

(भ्वा०) धातो कर्त्तरि तृच् 'तृनृतृची असिक्षदादिभ्य.' उ० २ ६४ सूत्रेण]

शंस्तिभिः प्रशसाभि' १ १८६ ३ [शसु स्तुती (भ्वा०) धातो स्त्रिया क्तिन्। नलोपाऽभावश्छान्दस। औणा० वा ति]

शंस्य शसितु सर्वथा स्तोतुमर्ह (अ०—जगदीश्वर) ३ ३७ **शस्यम्**=स्तुत्य समिद्विकरम् (कर्म) १ ११६.११. प्रशसनीयम् (कर्म) १ ११७ ६ स्तोतु योग्यम् (वच.) ५ ३६ ५ शसितु योग्यम् (उक्थ=स्तोत्रम्) १.१० ५. [शसु स्तुती (भ्वा०) धातो 'शसिदुहिगुहिभ्यो वेति वक्तव्यम्' अ० ३.१ १०६ वा० सूत्रेण क्यपो विकल्पेन ण्यत्]

शंस्या प्रशसनीये कर्मणी १ ८ १० [शस्यम् इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

शाकाः शक्तिमत्य (गाव) ६ २४ ४. [शाकप्राति० मत्वर्थे अर्श-आदित्वादच्। ततष्टाप् स्त्रियाम्। शाक=शक्नृ शक्तौ (स्वा०) धातोर्घञ्। अथवा शो तनूकरणे (दिवा०) धातोर्वाहु० औणा० कन्]

शाकिनम् शक्तिमन्तम् (इन्द्र=राजानम्) ३ ५१ २. **शाकिने**=प्रशस्ता शाका शक्तिगुणयुक्ता गुणा विद्यन्ते यस्मिंस्तस्मै (शक्राय=सभाद्यध्यक्षाय) १ ५४.२ शक्तिमते (वीरपुरुषाय) ६ ४५ २२ **शाकी**=अवश्य शक्तु शील. भा०—बहुबलसामर्थ्य (गृहस्थ) १७ ८५ प्रशस्त शाक शक्तिर्विद्यते यस्य स (सभाध्यक्ष) १ ५१ ८ परमशक्ति-युक्त, शक्ति देने वाला (ईश्वर) आर्याभि० १ १४ [शाक-प्राति० प्रशसायामर्थे भूम्न्यर्थे वा इन्। अथवा शाकीप्राति० मत्वर्थे 'शाकीपलाद्यदद्द्वा ह्रस्वत्व च' अ० ५ २ १००, वा० सूत्रेण न प्रत्ययो ह्रस्वत्व च। शाकी=शाकप्राति० स्त्रिया गौरादित्वान् ङीप्। शाकमिति व्याख्यातम्]

शाके शक्तिनिमित्ते (धर्मे) ५ १५ २ **शाकैः**=शक्तिविशेषै ६ १६ ४ शक्तिभि ४ १७ ११ [पूर्वपदे व्याख्यातम्]

शाक्वररैवते शाक्वरश्च रैवतश्च ते १० १४ शक्त्यै-श्वर्यप्रतिपादिके (सामनी=एतदुक्ते कर्मणी) १५ १४ शक्तिधनप्रतिपादिके (पदार्थसमूहे) १३ ५८ [शाक्वर-रैवतपदयो समास। शाक्वर=शक्वरप्राति० भवार्थेऽण्। शक्वर=शक्नृ शक्तौ (स्वा०) धातोर्वाहु० औणा० वरट्। छान्दसो वा वरच्। रैवतम्=रैप्राति० मतुवन्ताद् 'तस्येदम्' इत्यर्थेऽण्]

शाक्वराय शक्तिजाय (यन्त्रशिल्पविज्जनाय) २६ ६०. शक्तिजननाय ५ ५ [शक्वरप्राति० भवार्थेऽण्। शक्वर=शक्नृ शक्तौ (स्वा०) धातोर्वाहु० औणा० वरट्। वरच् छान्दसो वा]

शाखा. याः शेऽन्तरिक्षे शेरते ता ७ ४३ १ वृक्षा-ऽवयवा' १ ८ ८. [शाखा अगुलिनाम निघ० २ ५ शाखा स्वशया शक्नोतेर्वा नि० १ ४]

शाचीन् व्यक्तान् (लोकान्) २३ ८ [शच व्यक्तायां वाचि (भ्वा०) धातो 'इगजादिभ्य' अ० ३.३ १०८ वा० सूत्रेण इण्]

शाण्डः य श्यति तनूकरोति तथाऽयम् (विद्वज्जन.), प्र०—अत्र शो तनूकरणे इत्यस्मादौणादिकोऽडच् प्रत्यय ६ ६३ ६

शातवनेये शतान्यसङ्ख्यातानि वनय सम्भक्तयो येषान्ते शतवनयस्तैर्निर्वृत्ते (जगति) १ ५६ ७ [शत-वनिपदयो समासे निर्वृत्तेऽर्थे ढञ्]

शादम् शीयते छिनत्ति यस्मिंस्त शादम् २५ १ [शद्लृ शातने (भ्वा०) धातोर्घञ्। शो तनूकरणे (दिवा०) धातोर्वा 'शाशपिभ्या ददनौ' उ० ४ ६७ सूत्रेण द]

शाधि शिक्षस्व २ २८ ६ नाट्य प० वि०। [शासु अनुशिष्टौ (अदा०) धातोर्लोट्। 'शा हौ' इति शादेश]

शान्तमया अतिशयेन सुखप्रापिकया (तन्वा=देहेन विस्तृतोपदेशनीत्या वा) १६ २. [शम् सुखनाम निघ० ३ ६ ततोऽतिशायने तमबन्तान् स्त्रिया टाप्। वर्णव्यत्य-येनाकारस्याकार]

शान्तमेन अतिशयेन सुखकारकेण (विज्ञानेन) १४ १२ अतिशयसुखेन १५ ६४ अत्यन्तसुखरूपेण कर्मणा १३ १६ [शम् सुखनाम निघ० ३.६ ततोऽतिशायने तमप्। अकारस्याकारो वर्णव्यत्ययेन]

शान्तिः शान्तिकरम् (अन्तरिक्षम्=आकाशम्) ३६ १७ दुष्टक्रोधादि उपद्रव रहित (जन) आर्याभि० २ २५, ३६.१७ शान्त निरुपद्रव सुखकारक (द्युलोकादि) आर्याभि० २ २५, ३६ १७ आध्यात्मिक शरीर मे ज्वरादि पीडा से होने वाले, आधिभौतिक शत्रु, सर्प, चौरादिको से होने वाले, आधिदैविक मन, इन्द्रिय, अग्नि, वायु, अतिवृष्टि, अनावृष्टि, अतिशीत, अत्युष्णतादि से होने वाले सन्ताप की निवृत्ति आर्याभि० २ १, त० ब्रा० १० १ **शान्त्यै**=सुखाय, भा०— विज्ञानधर्मपुरुषार्थैरैहिकपारमार्थिकसुखससाधनाय ३ ४३ निरुपद्रवता के लिए स० वि० १४७, ३ ४३

शस्तोक्थस्य शस्तानि प्रशसितानि उक्थानि ऋक्सूक्तानि येन तस्य (वीरगृहपते) ८ १२ [शस्त-उक्थ-पदया समास । शस्तम्=शसु स्तुतौ (भ्वा०)+क्त । उक्थम्=वच परिभाषणे (अदा०) पातृतुदिवचि०' उ० २.७ धातो थक्]

शस्त्राणाम् शसन्ति यैस्तेषाम् १६ २५ [शसु स्तुतौ (भ्वा०) धातोर्बाहु० औणा० क्त्र । शस्त्र तद् यदेनच्छ्यति तस्माच्छस्त्र नाम श० ४ ३ २ ३ विट् शस्त्रम् ष० १ ४ प्रजा शस्त्रम् श० ५ २ २ २० वाग् हि शस्त्रम् ऐ० ३ ४४]

शस्मन् स्तोतुमर्हे (प्रयामनि=प्रयाणे) १.११६ २ [शसु स्तुतौ (भ्वा०) धातोर्मनिन्। किच्च बहुलवचनात्। डेर्लुक् च छन्दसि]

शस्यते स्तूयते १ ८६ ४ उच्चार्यते ३ ६२ ७ प्रशसितो भवति १ ५३ १ **शस्यन्ते**=स्तूयन्ते ७ ५६ २३. **शस्यसे**=स्तूयसे ६.५ ६ [शसु स्तुतौ (भ्वा०) धातो कर्मणि लट्]

शस्यमानम् प्रशसित सत् (नाम=पदार्थाना सज्ञा) १७ ६० प्रशसितव्यम् (स्तोम=यज्ञ) ४ ४ १५ प्रशसनीयम् (सिद्धान्तम्) ४ ५८.२ **शस्यमाने**=प्रशसनीये (उक्थे=वचने) ६ २३ १. [शसु स्तुतौ (भ्वा०) धातो कर्मणि शानच्]

शस्यमानः स्तूयमान (सज्जनो राजा) ७ ८ ३ [शसु स्तुतौ (भ्वा०) धातो कर्मणि शानच्]

शस्यमाना स्तवनीया (तनू=शरीरम्) ६ २४.७ [शसु स्तुतौ (भ्वा०) धातो कर्मणि शानजन्तात् स्त्रिया टाप्]

शस्यमानासः प्रशसिता (स्तोमास=स्तुतय) ६ ६६ ३ [शस्यमान इति व्याख्यातम्। ततो जसोऽसुक्]

शंयुना सुखमयेन (व्यवहारेण) १६ २६ **शंयोः**=सुखस्य ऋ० भू० ३०८, ३६ १२ कल्याणवत साधनात् कर्मण सुखवतो वा, सुखात्, प्र०—अत्र 'कशभ्या वभयुस्तितुतयस अ० ५ २ १३८ इति शमो युस्प्रत्यय ३ ४३ श लौकिक पारमार्थिक सुख यस्मिँस्तस्य (मोक्षस्य) १ ४३ ४ भा०—सुखाऽमृतस्य ३६ १२ [शम् सुखनाम निघ० ३ ६ ततो मत्वर्थे 'कशभ्या वभयुस्तितुतयस' अ० ५ २ १३८ सूत्रेण युस् प्रत्यय। शयु सुखयु नि० ४ २१]

शंस स्तुहि ४ ३ ३ अनुशाधि १ ३७ ५ प्रशस ७.३१ २ **शसत्**=शसेत् ६ २३ ५ **शंसत**=प्रशसत ४ ३५. स्तुवीत तद्गुणान् प्रकाशयत, प्र०—अत्राऽन्तर्गतो ण्यर्थ १ २१.२ **शंसन्ति**=प्रशसन्ति ५ ७७ १ स्तुवन्ति ३ ३ ८ **शंसन्तु**=सुखकारका भवन्तु १ ५ ७ **शंससि**=स्तौषि २ ४३ २ **शंसा**=प्रशसे ४ ४ १४ **शंसाति**=प्रशसेत् ४ ६ ११ **शंसामः**=स्तुम १ ६० ५ **शंसामि**=प्रशसामि ४ ३२ २२ **शंसाव**=प्रशसेव, ३ ५३ ३ **शंसि**=स्तौषि २ ४ ८ **शंसिषम्**=प्रशसेयम् ६ ४८ १६ **शंसिषः**=प्रशसे १ ८४ १६ प्रशस, प्र०—लोड्मध्यमैकवचनप्रयोग ६ ३७ **शंसे**=प्रशस ७ ३१ २ [शसु स्तुतौ (भ्वा०) धातोर्लोट्। अन्यत्र लेट्, लट् चापि]

शंसते प्रशसकाय (जनाय) ५ ४२ ७ **शंसन्**=प्रशसन् (पुरुष) ४ ५१ ७ **शंसन्तम्**=प्रशसा कुर्वन्तम् (सज्जनम्) २ १२ १४ **शंसन्तः**=स्तुवन्त (व्रतपा=विद्वास) ३ ४ ७ उपदिशन्त (सज्जना) ६ २६ ४ [शसु स्तुतौ (भ्वा०) धातो शतृ]

शंसन्तीम् गुण-कीर्त्तन करने वाली वधू स० वि० १३७, अथर्व० १४ १ ६ [शसु स्तुतौ (भ्वा०) धातो शत्रन्तात् ङीप्]

शंसम् प्रशसनम् ७ ३४ १२ प्रशसाम् ३ १८ २ प्रशस्तम् (व्यवहारम्) १ १२२ ५ शसन्ति येन तम् (अग्निम्) ५ ३ ४ स्तुतिम् १ १८२ ४ प्रशसितम् (मर्त्त=मनुष्यम्) १ १४१ ६ प्रशसनीयम् (सवितार=परमात्मानम्) ५ ४६ ३ शसन्ति येन तं स्तुतिसमूहम् १ २७ ३ शसन्ति येन शास्त्रबोधेन तम् १ ३३ ७ प्रशसकम् (सज्जनम्) ७ ५६ १६ **शंसः**=शसन्ति स्तुवन्ति यस्मिन् स ३ ३० शसन्ति यत्र स १ १८ ३ स्तुत्य (विद्वज्जन) २ २६ १ शस्यते य स (विद्वान् जन) १ ६४ ८ अनुशासन प्रशसा वा ७ ३५ २ स्तुति २ ३४ ६ **शंसाः**=प्रशसा ७ २५ ३ [शसु स्तुतौ (भ्वा०) धातोर्घञर्थे क]

शंसय प्रकृष्टगुणवत कुरु १ २६ २ प्रशसायुक्तान् कुरु १ २६ ४ प्रशस्तान् कुरु १ २६ १ प्रकृष्टज्ञानवत कुरु १ २६ ३ सत्याननपराधान् सम्पादय १ २६ ५ प्रशसय १ २६ ६, सुखिन सम्पादय १ २६ ७ [शसु (भ्वा०) धातोर्णिजन्ताल्लोट्]

शंसा प्रशसितौ (मातापितरौ) १ १८५ ६ [शसु स्तुतौ (भ्वा०) धातोर्घञ्। ततो द्विवचनस्याकारादेश]

शंस्ता प्रशसक (अध्वर्यु=अहिंसायज्ञमिच्छुर्जन) २५ २८ प्रशसित (विद्वज्जन) १ १६२ ५ [शसु स्तुतौ

शास्महे=इच्छाम १ ३० १० **शास्व**=शिक्ष २१.६१. **शास्सि**=उपदिशसि १ ३१ १४. [शासु अनुशिष्टौ (अदा०) धातोर्लट्। अन्यत्र लोट् लट् लङ् च। अथवा आङ शासु इच्छायाम् (अदा०) धातोर्लटि शास्ते, शास्महे इत्येते रूपे। शासत् प्रशास्ति नि० ३ ४]

शासत् शासन कुर्वन् (सभाध्यक्ष) १.५१.८. [शासु अनुशिष्टौ (अदा०) धातो. शतृ]

शासनम् शसन्ति हिंसन्ति यस्मिँस्तद्युद्धम् २९ २३ **शासने**=शिक्षायामाज्ञाया वा ३ ७ ५ [शासु अनुशिष्टौ (अदा०) धातोरधिकरणे ल्युट् भावे वा। अथवा शसु हिंसायाम् (भ्वा०) धातोरधिकरणे ल्युट्। दीर्घश्छान्दस]

शासनीम् शास्ति सर्वान् विद्याधर्माचरणशीलान् यया सत्यनीत्या ताम्। मभी०—अत्राऽपि सायणाचार्येण मनो पुत्री गृहीता तदप्यशुद्धमेव १ ३१ ११. [शासु अनुशिष्टौ (अदा०) धातोर्ल्युडन्तात् स्त्रिया टीप्]

शासम् शासितारम् (इन्द्र=सम्राजम्) ७ ३६ शास्ति येन त न्यायम् १ ५४.७ शासनम् १ ६८ ५ पक्षपात विहाय शासनकर्त्तारम् (इन्द्रम्) ६.१९.११. **शासा**=शासनेन ७ ४८ ३ **शासाम्**=शासनकर्त्रीणाम् (राज्य-शासकानाम्) २ २३ १२ [शासु अनुशिष्टौ (अदा०) धातो कर्त्तरि क्विप्। घञर्थे को वा। वज्र शास. श० ३ ८.१ ५ अंसि वै शास इत्याचक्षते श० ३ ८.१ ४]

शासुरिव यथा पूर्णविद्ययाऽध्यापकस्य सकाशात् १ ११६.१३ [शासु-इवपदयो समास। शासु =शासु अनुशिष्टौ (अदा०) धातोर्वाहु० औणा० ऋ]

शासुः न्यायेन प्रजाया प्रशासितु (राज्ञ) १ ६० २ [शासु अनुशिष्टौ (अदा०) धातोर्वाहु० औणा० ऋ]

शासुः शासनकर्त्तोपदष्टा (मनुष्य) १ ७३ १ [शासु अनुशिष्टौ (अदा०) धातोर्वाहु० औणा० उ]

शास्य शासितु योग्य (दुष्टजन) १ १८९ ७ [शासु अनुशिष्टौ (अदा०) धातोर्ण्यत्]

शिक्वभिः कीलकवन्धनादिभि १ १४१.८. **सेचनैः** प्र०—शीङ्पूर्वातो क्वनिपि 'वाच्छन्दसि' इत्याद्यचो ह्रस्वत्वम् २ ३५ ४ वीर्यादि मे स० वि० १०४, २ ३५.४ **शिक्वसः**=प्रकाशमानस्य (विद्वज्जनस्य) ६ २ ९ शक्तिमन्त (रुद्रा =वायव) ५ ५४ ४ [शीङ् सेचने (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप्। धातोर्ह्रस्वत्व छान्दसम्]

शिक्ष अनुशास्ति २ ११ २१. सर्वा विद्या ग्राहय १.२७.५. उपदिश २.१७.९ **शिक्षतम्**=विद्यापादान कारयतम् १ १०९ ७ सुशिक्षया विद्या ग्राह्यतम् १ ३४ ४ **शिक्षति**=विद्या गृह्णाति ग्राहयति वा, प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ५९ २. **शिक्षतु**=विद्यामुपाददातु १ ८१.६ **शिक्षते**=विद्या ग्राहयति १ २८ ३ **शिक्षन्ति**=शिक्षा प्रददति १ १७३.१०. **शिक्षसि**=विद्या ददासि १ ८१ २ **शिक्षात्**=साध्वी शिक्षा कुर्यात् १ ६८ १ **शिक्षाः**=शिक्षस्व, प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ४३ ५ **शिक्षेयम्**=सुशिक्षा कुर्याम् ७ ३२.१९. [शिक्ष विद्योपादाने (भ्वा०) धातोर्लेट्। व्यत्ययेन परस्मैपदम्। अन्यत्र लट्, लेट् लङ्, लिङ् च। शिक्षति दानकर्मा नि० ३.२० शिक्ष देहि नि० १.७]

शिक्षन् विद्योपार्जन कारयन् (इन्द्र =राजा) ७ १९ २ विद्या ददन् (विद्वज्जन) ६ २७ ५. विद्यामुपादापयन् (इन्द्र =अध्यापकजन) १ १३२ ४ विद्याग्रहण कारयन् (विद्वान्) ७.२० ७ [शिक्ष विद्योपादाने (भ्वा०) धातो शतृ। व्यत्ययेन परस्मैपदम्]

शिक्षा विद्याग्रहणसाधिका (सत्क्रिया) २.१५ १० शासनम् ७.२७ २ [शिक्ष विद्योपादाने (भ्वा०) धातो 'अ प्रत्ययात्' अ० ३ ३ १०२ सूत्रेण स्त्रियामकार। ततष्टाप्]

शिक्षानरः य. शिक्षा नृणाति प्राप्नोति स शिक्षाया नर. (इन्द्र =विद्वज्जन) १ ५३ २ विद्योपादानेन नेता (इन्द्र =राजा) ४ २० ८ [शिक्षा-नरपदयो समास]

शिक्षिते विद्वद्भिरुपदिष्टे (उपासानक्ता रात्रिदिने) २८ १६ कृतशिक्षे सत्यौ (उपासानक्ता) २८ १५ [शिक्ष विद्योपादाने (भ्वा०) धातो. क्त। तत स्त्रिया टाप्]

शिक्षितौ विज्ञापितौ (देवा=वायुवह्नी) २८ १७ [शिक्ष विद्योपादाने (भ्वा०) धातो क्त.]

शिक्षोः शिक्षकस्य (पूर्णविद्याप्रकाशवत पुरुषस्य) ३ १९ ३ [शिक्ष विद्योपादाने (भ्वा०) धातोर्वाहु० औणा० उ]

शिग्रवः अव्यक्तशब्दकर्त्तार (राजादयो जना), प्र०—अत्र शिजिधातोरौणादिको रुक्-प्रत्यय ७ १८ १९ [शिजि अव्यक्ते शब्दे (अदा०) धातोर्वाहु० औणा० रुक्]

शिङ्क्ते अव्यक्त शब्द करोति ६ ७५ ३ [शिजि अव्यक्ते शब्दे (अदा०) धातोर्लट्। विकरणव्यत्ययेन श्नम्। शिङ्क्ते शब्दायते नि० २ ९.]

[शमु उपशमने (दिवा०) धातो स्त्रिया क्विन्। 'अनुनासिकस्य क्विझलो क्ङिति' सूत्रेणोपधाया दीर्घः। शान्तिराप श० १ २ २ ११]

शापम् शपन्त्याक्रुश्यन्ति येन तम् (निन्दितवचनम्) ७ १८ ५ [शप् आक्रोशे (भ्वा०) धातोर्घञ्। शाप नैन शसम्। नाभिचरितमागच्छति य एव वेद तै० ३ १२ ५.१]

शावल्याम् शबलस्य कर्बुर-वर्णस्य सुताम् (दोषिनी वैश्याम्) ३० २० [शबलप्राति० 'तस्येदम्' इत्यणन्तात् स्त्रिया ङीप्]

शाम्बरम् शम्बरे मेघे भवम् (वसु=जलाख्य द्रव्यम्) ६.४७ २२ **शाम्बरे**=शम्बरस्याऽस्य सङ्ग्रामस्तस्मिन् ३ ४७ ४. [शम्बरप्राति० भवार्थेऽण्। शम्बरम् मेघनाम निघ० १ १०]

शारदी शरदो व्याख्यात्री (अनुष्टुप्) १३.५७ **शारदीः**=शरदृतुसम्बन्धिनी (पुरः=शत्रुनगर्यः) १.१७४ २. शरदि भवा (दासी=सेविका) ६ २० १० शरद इमा (अपः=जलानि) १ १३१ ४ [शरद्प्राति० व्याख्यानार्थे तस्येदमर्थे भवार्थे वाऽण्णन्तान् ङीप् स्त्रियाम्]

शारदेन शरदि भवेन (ऋतुना) २१ २६ **शारदौ**=शरदि भवौ (आश्विनकार्त्तिकौ) १४ १६ [शरद्प्राति० भवार्थेऽण्। शरद् इति व्याख्यानम्]

शारि हिंस्यात् ६.५४.७ हिंस्या २ २८.५ [शॄ हिंसायाम् (क्रया०) धातो कर्मणि लुङ्। अटोऽभावश्छान्दस]

शारिः शुकी २४ ३३ [शॄ हिंसायाम् (क्रया०) धातो 'श्र' शकुनौ' उ० ४ १२८ सूत्रेण उ]

शारोः शराणामिमा गती १ ११२.१६ [शॄ हिंसायाम् (क्रया०) धातो 'ऋदोरप्' इत्यप्-प्रत्यये शर। तत तस्येदमर्थेऽणन्तात् स्त्रिया ङीप्]

शार्गः शारङ्गश्चातक प्र०—अत्र 'छान्दसो वर्णलोपो वा, इति ङलोप २४ ३३ [शॄ हिंसायाम् (क्रया०) धातो 'गण् शकुनौ' उ० १.१२७ सूत्रेण गण्प्रत्यये गुडागमे गण्-प्रत्ययस्य णित्त्वाद् वृद्धौ न शार्ङ्ग। 'छान्दसो वर्णलोपो वा' इति ङकारलोप]

शार्दूलः व्याघ्रविशेष २४ ३३ **शार्दूलाय**=महामृगाय २४ ३० [शॄ हिंसायाम् (क्रया०) धातो 'गर्जिशिञ्जादिभ्य ऊरोलच्' उ० ४ ६० सूत्रेण ऊलच्। बहुवचनाद् धातोर्दीर्घ ह्रस्वश्च]

शार्यातस्य यो वीरसमूह शान्तु हिंसितुं योग्यान् समन्तान्निरन्तरमतति व्याप्नोति तस्य (वीरपुरुषस्य) १ ५१.१२ **शार्याते**=य शरीरे हिंसकान् याति प्राप्नोति तस्याऽस्मिन् व्यवहारे ३ ५१ ७ शार्याभिरङ्गुलिभिर्हितानि कर्माणि शार्याणि, तान्यनति व्याप्नोति स शार्यातस्तस्मिन् (पुरुषार्थे) प्र०—शर्या इत्यङ्गुलिनामसु पठितम् निघ० २ ५, ७ ३५ [शार्योपपदे अत सातत्यगमने (भ्वा०) धातो 'कर्मण्यण्' इत्यण्। शार्यम्—शॄ हिंसायाम् (क्रया०) धातोर्ण्यत् अथवा शार्यम्=शर्या अङ्गुलिनाम निघ० २ ५ ततो निर्वृत्तार्थेऽण्]

शाला शाला को स० वि० १६७, अथर्व० ९ २ ३.१९ **शाले**=हे शालागृह स० वि० १६८, अथर्व० ९ २ ३ २२

शाशदानः अतिशयेन शीयते खण्डयति छिनत्ति य स (इन्द्रः=सूर्यः) १ ३३ १३ [शदॢ शातने (भ्वा०) धातोर्यङ्लुगन्ताच्छानच्। व्यत्ययेनात्मनेपदम्]

शाशदाना छेदकी (सभासेनापत्नी) १ ११९ २ [शाशदान इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

शाशदाना अतीव सुन्दरी (विदुषी स्त्री) १.१२४.६ व्यवहारेष्वतितीक्ष्णमाचरन्ती (देवी=विदुषी स्त्री) १.१२३ १० [शाशदान इति व्याख्यातम्। तत स्त्रिया टाप्]

शाशदुः दुष्टान् छिन्यु २ २० ४ [शदॢ शातने (भ्वा०) धातोर्यङ्लुगन्तात् लिट्]

शाशद्रे शातये १.१४१.९ [शदॢ शातने (भ्वा०) धातोर्यङ्लुगन्तात् लिट्। 'इरयो रे' इति रे-आदेश। व्यत्ययेनात्मनेपदम्]

शाश्वतीभ्यः सनातनीभ्योऽनादिस्वरूपाभ्य स्वस्वरूपेणोत्पत्तिविनाशरहिताभ्य (समाभ्य=प्रजाभ्य) ४० ८ सर्वदैकरसमानाभ्य (प्रजाभ्य) ५० वि०। नित्याभ्य (समाभ्य=प्रजाभ्य) ४० ८ ऋ० भू० ३२०, [शश्वत् प्राति० भवार्थेऽण्णन्तात् स्त्रिया ङीप्]

शाश्वसद्भिः अतिशयेन प्राणवद्भिरन्तरै (पदार्थै) १ ३० १६ [श्वस प्राणने (अदा०) धातोर्यङ्लुगन्ताच्छतृ]

शासत् शिष्यात् ३ ३१ १ विद्याशिक्षाभ्यासादि ५० वि०। यथायोग्य शासन (उपनिषातन) इत्ने आर्याभि० १ १४, ऋ० १ ८१ १० शासतु=उपदिशतु २३.४० **शासते** आशा कुर्वन्ति ३३ ३८ उपदिशति १.१६५.४ **शासः**=शिष्या १ १३१ ४ **शास्ति** विशेषेणोपदिशति २३ ३९. **शास्ते**=उपदिशति २१ २

गुणोभिते (हनू=मुखनासिके) ५ ३६ २ [शिप्रे हनू नासिके वा नि० ६ १७]

शिफायाः नद्या, प्र० अत्र शिल् निशाने धातोरीणादिक फक्-प्रत्यय १ १०४ ३ [शिल् निशाने (भ्वा०) धातोर्बाहु० श्रीणा० फक्। तत स्त्रियां टाप्]

शिमीवतः प्रशस्तकर्मयुक्तान् (मयोभून्=सुखीकरान्) १ ८४ १६. **शिमीवान्** प्रशस्तानि कर्माणि भवन्ति यस्य सकाशात् (वज्र=शस्त्रास्त्रसमूह.) प्र०—अत्र 'छन्दसीर' इति मतुपो मकारस्य वत्वम् 'शिमीति कर्मनाम' निघ० २ १, १ १०० १३ प्रशस्तकर्मयुक्त (शिल्पविद्याविज्जन) २ २५ ३ प्रशस्तकर्मवान् (जन) ५ ५६ ३ [शिमी कर्मनाम निघ० २.१ तत प्रशंसायामर्थे मतुप्। 'छन्दसीर' इति मतुपो मकारस्य वत्वम्। शिमीति कर्मनाम। शमयतेर्वा शक्नोतेर्वा नि० ५ १२ शिमीवन्त कर्मवन्त नि० १३ ३६]

शिम्बलम् शल्मलीपुष्प पश्य वा ३ ५३.२२

शिम्या सुकर्मयुक्तया (क्रियया) १ ११५.३. कर्मणा १ ११५ १ [शिमी कर्मनाम निघ० २.१]

शिम्युम् आत्मन' शिमि कर्म कामयमानम् (दुष्टजनम्) ७ १८ ५ **शिम्यून्**=शान्तान् प्राणिन १ १०० १८ [शिमी कर्मनाम निघ० २ १ तत उत्क्रामार्थे क्यजन्तात् 'क्याच्छन्दसि' इत्यु]

शिरः यच्छीयते तदुत्तमाङ्गम् १ १६३ ६ शृणाति हिनस्ति दुःखानि येन तत् (उत्तमाङ्गम्) १२ ४ मूर्द्धेव (विद्वान्) ३७ ८. घनाऽऽकारमुपरिभागम् १६ ७१ शिरोवद्वर्त्तमान घनम् ५ ३० ८ मस्तकम् ६ २० ६ दूराच्छिर इव लक्ष्यमाणम् (आत्मानम्) २६.१७ शिरोवन्मुख्य वचनम् ६ ५६ ६ उत्तमगुणम् ३७ ५ [श्रिञ् सेवायाम् (भ्वा०) धातो 'श्रयते स्वाङ्गे शिर किच्च' उ० ४ १६४ सूत्रेणासुन् शिरादेशश्च। अपि वा शिर आदित्यो भवति यदनुशेते सर्वाणि भूतानि मध्ये नैषा तिष्ठति। इदमपीतरच्छिर एतस्मादेव समाश्रितान्येतद् इन्द्रियाणि भवन्ति नि० ४ १३ यच्छिय समुदौहस्तस्माच्छिरस्तस्मिन्नेतस्मिन् प्राणा अश्रयन्त तस्मादेवैतच्छिर श० ६ १ १ ४ शिरो वै प्राणाना योनि श० ७ ५ १ २२ प्राणोऽग्नि शीर्षम् कौ० ८ १ गायत्री छन्दोऽग्निर्देवता शिर श० १० ३ २ १ गायत्र हि शिर श० ८ ६ २ ६ शिरस्यूवतम् जै० उ० ३ ४ त्रिधातु हि शिर इति। तै० ३ २.७.११. त्रिवृद्धि शिर. श० ८.४ ४ ४. त्रिवृद् लोक शिरो लोग स्वर्गस्य ता० ५.१.३ शिर एवास्य त्रिवृत्। तस्मात् त्रिभिर्न भवति स्वर्गस्यैवमभिलोक. श० १२ २.४.६ त्रिवृत लोक शिरो भवति स्वर्गस्यैवमभिलोकम् गो० पू० ५.३ शिरो वा अग्रे सम्भवत सम्भवति चतुर्दा विहित वै शिर. प्राणश्चक्षु. श्रोत्र वाग् ता० २२ ६ ४ शिरो वै प्राण जायमानस्य जायते श० ८ २ ४ १८ शीर्षतो वाऽग्रे जायमानो जायते श० ३.४ १.१६ यस्माच्छीर्षण्येवाग्रे पवित्रो भवति श० ११ ४.१.६. त्रिवृत्तान हि शिर श० १०.५ ४.१२ तस्मादष्टाक्षरात् पुरुषस्य शिर नै० ३ २७ ४ प्रादेशमात्रमिव हि शिर श० ८ ५ १.२३ मध्ये समहीतमिव हि शिर श० १४ १.२ १७ तस्माच्छिरो उद्धानि मेखलानि नानुमेखलानि न कुण्डलानुकुण्डलानि ता० ५ १ ६ अर्वाग् त्रिवृत्तमस ऊर्ध्वंयुग्न. । इद वच्छिर श० १४ ५ २.५ शिर एतद् यज्ञस्य यदुपा श० ६ ५.३.८ शिर एव षष्ठी चिति श० ८ ७ ४ २१ श्रीर्वै (=उत्कृष्टवस्तु) वै शिर श० १ ४ ५ ५]

शिरिणायाम् हिंसितायाम् (पृथिव्याम्) २ १०.३. [शिरिणा रात्रिनाम निघ० १ ७ शॄ हिंसायाम् (क्रया०) धातोर्बाहु० श्रीणा० इनच् किच्च। ततष्टाप् स्त्रियाम्]

शिल्पः नानारूप (पशु) २६.५८ [शिल्पम् रूपनाम निघ० ३ ७]

शिल्पाः सुरूपा शिल्पकार्यसाधिका (विश्वदेवदेवताकास्त्र्यच) २४.५ **शिल्पे**=नानाप्रसिद्धक्रियया सिद्धे (विद्ये) ४.६ [शिल्पम् कर्मनाम निघ० २ १ रूपनाम निघ० ३ ७. शील समाधौ (भ्वा०) धातो 'सर्वशिल्प०' उ० ३ २८ सूत्रेण प-प्रत्ययान्तो निपात्यते। निपातनादेव धातोर्ह्रस्वादेश]

शिवतमः अतिशयेन सुखकारी (रस=आनन्द) ११ ५१ अतिशयेन मङ्गलकारी (अग्नि=जीव) १२ ३६ **शिवतमाः**=अतिशयेन शिवा कल्याणकारक कर्म कुर्वन्त कारयन्तश्च (सखाय) १ ५३ ११ [शिवप्रादि० अतिशायने तमप्। शिवम् सुखनाम निघ० ३ ६ शीङ् स्वप्ने (अदा०) धातो 'सर्वनिघृष्व०' उ० १ १५३ सूत्रेण वन्-प्रत्ययान्तो निपात्यते। धातोर्ह्रस्वत्व निपातनात्]

शिवतमाम् अतिशय कल्याण करने वाली स्त्री को ग० वि० १३६, अथर्व० १४ २ ३८ **शिवतमाः**=अतिशयेन सुखकरा (दिश) ३५ ६ [शिवप्रादि० अतिशायने तमप्।

शिङ्क्षीनि ज्ञात प्राप्तु योग्यानि (वस्तूनि), प्र०—अत्र स्रगिधातो पृषोदरादिनाऽभीष्टरूपसिद्धि ३६८

शिताम् तीक्ष्णधाराम् (अग्निं=विद्युतम्) १.५४.४. [शिल् निशाने (स्वा०) धातो क्तान्तात् स्त्रिया टाप्]

शितामतः तीक्ष्णस्वभावात् २१४४ शितम्तीक्ष्ण आमोऽपरिपक्व यस्मिँस्तस्मात् (अङ्गादङ्गात्=प्रत्यङ्गात्) २१४३ तीक्ष्णत्वेनोच्छिन्नरोगात् २१४५ [शित-आमपदयो समास । तत तसि । दो शिताम भवति । दोर्द्रवते । योनि शितामेति शाकपूणि विपितो भवति । श्यामतो यकृत्त इति तैटीकि । श्याम श्यायते यकृद् यथाकथा च कृत्यते । शितिमासतो मेदस्त इति गालव नि० ४३]

शितिकक्षः शिती श्वेतौ कक्षौ पार्श्वौ यस्य स (पशु पक्षी वा) २४४ [शिति-कक्षपदयो समास]

शितिकण्ठाय शितिम्तीक्ष्णीभूत कृष्णो वा कण्ठो यस्य तस्मै (पक्षिणे) १६२८ **शितिकण्ठाः**=शिति श्वेत कण्ठो येषान्ते (शर्वा=हिंसका जीवा) १६५७ शितयस्तीक्ष्णा श्वेता वा कण्ठा येषान्ते (रुद्रा=जीवा वायवो वा) १६५६ [शिति-कण्ठपदयो समास । शिति=शो तनूकरणे (दिवा०) धातो क्तिच् औणादिक । शिल् निशाने (स्वा०) धातोर्वा क्तिन्। शिति श्यते नि० ४३]

शितिपादः शितय शुक्ला पादा अशा येषा किरणाना ते १३५५ [शिति-पादपदयो समास । समासान्तलोप]

शितिपृष्ठस्य शिति (सूक्ष्म) पृष्ठ प्रज्ञो यस्य तस्य (वह्ने) ३७१ **शितिपृष्ठः**=शितिम्तनूकरण पृष्ठ यस्य स (पशु) २४७ कृष्णपृष्ठ (पशु) २६५८ **शितिपृष्ठानाम्**=शितयस्तीक्ष्णा गतय पृष्ठे येषा तेषाम् (पशूनाम्) २८१६ [शिति-पृष्ठपदयो समास]

शितिबाहुः शितयो बाह्वोर्यस्य स (पशु) २४२ शिती तनूकर्त्तारौ बाहू इव बल यस्य स (पशु) २४७ [शिति-बाहुपदयो समास]

शितिभ्रुवः शितिश्श्वेता भ्रूर्भ्रुकुटिर्यासा ता पक्षिण्य २४६ [शिति-भ्रूपदयो समास]

शितिरन्ध्रः शिति श्वेतता रन्ध्रे यस्य स (पशु) २४२ [शिति-रन्ध्रपदयो समास]

शिथिरा शिथिलौ स्थौ (बाहू=भुजौ) ७४५२ [अन्य विमोचनप्रतिहर्षयो (क्रया०) धातो 'अजिरशिशिरशिथिल०' उ० १५३. सूत्रेण किरच् निपात्यते। धातोरुपधाया इत्व रेफस्य लोप निपातनात्। ततो द्विवचनस्याकारश्छान्दस.]

शिथिराम् शिथिलाम् (पदार्थविद्याम्) ६.५८२ [पूर्वपदे शिथिर इति व्याख्यातम्। तत स्त्रिया टाप्]

शिपिविष्टः शिपिषु पदार्थेषु प्रविष्ट (विष्णु=धनञ्जय) ८५५ **शिपिविष्टाय**=शिपिष्वाक्रोशत्सु प्राणिषु व्याप्त्या प्रविष्टाय (विष्णवे=परमेश्वराय) २२२० शिपिषु पशुषु पालकत्वेन विष्टाय प्रविष्टाय वैश्यप्रभृतये १६२९ [शिपि-विष्टपदयो समास । शिपिविष्टो विष्णुरिति विष्णोर्द्वे नामनी भवत नि० ५८. शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति नि० ५८ यज्ञो वै विष्णु शिपिविष्ट ता० ९७१० एषा वै प्रजापते पशुष्ठा तनूर्यच्छिपिविष्ट ता० १८२२६ यमुपैत्सीत् तमपाराप्सीत् तच्छिपितमिव यज्ञाय भवति तस्माच्छिपिविष्टायेति श० १११४४]

शिप्रवान् शिप्रे सुन्दरे हनुनासिके विद्येते यस्य स (इन्द्र=राजा) ६१७२ [शिप्रप्राति० प्रशसायामर्थे मतुप्। शिप्रे हनू नासिके वा नि० ६१७]

शिप्राः उष्णिप ५५४११ [शिप्रे हनू नासिके वा नि० ६१७]

शिप्रिणीनाम् शिप्रे ऐहिकपारमार्थिकव्यवहारज्ञाने विद्येते यासा ता विदुष्य स्त्रियस्तासाम्, प्र०—शिप्रे इति पदनाम निघ० ४३ अनेनात्र ज्ञानार्थो गृह्यते १३०११ [शिप्रे इति पदनाम (निघ० ४.३) ततो मत्वर्थ इनि। तत स्त्रिया ङीप्। तत षष्ठा]

शिप्रिणे उत्तमहनुनासिकाय (वीर-पुरुषाय) ६४४१४ **शिप्रिन्**=शोभनहनुनासिक (इन्द्र=आप्तविद्वन्) ३३६१० सुमुख (राजन्) ७२५३ शिप्रे प्राप्तुमर्हे प्रशस्ते व्यावहारिकपारमार्थिके सुखे विद्येते यस्य सभापते तत्सम्बुद्धौ, प्र०—अत्र प्रशसार्थ इनि शिप्रे इति पदनाम निघ० ४१, ३३६१० **शिप्री**=जवूणामाक्रोशक (सेनापति) १८१४ [शिप्रे हनू नासिके वा नि० ६१७। तत प्रशसायामर्थ इनिप्रत्ययान्ताच् चतुर्थी]

शिप्रे हनुनासिके, हनुप्रभृत्यङ्गानि, प्र०—शिप्रे इत्युपलक्षणमन्येषाञ्च नि० ६१७, ८३९ मुखावयवाविव ३३२१ सर्वमुखप्रापिके द्यावापृथिव्यौ ११०११०.

शिशाः=शिक्षय ६ १८ १३ **शिशीत**=तीक्ष्णीकरोति ६ ३ ५ तीक्ष्णीकुरुत ६ १६ ४२ **शिशीतम्**=तीक्ष्णीकुर्यानाम् २ ३६ ७ तीक्ष्णबुद्धियुक्तान् कुरुतम् १ १२२.३ **शिशीते**=तनूकरोति ५ ६ ५ तेजते ५ २ ६ कृश करोति, प्र०—शो तनूकरणे इत्यस्माल्लटि विकरणव्यत्ययेन श्यन स्थाने श्लुरात्मनेपद 'बहुल छन्दसि' इत्यभ्यासस्येत्वम् 'ई हल्यघो' अ० ६ ४ ११३ इत्यनभ्यासस्येकारादेश १ ३६ १६. **शिशीहि**=तीक्ष्णान् सम्पादय ३ २४.५ तीक्ष्णप्रज्ञान् कुरु ७ १८ २ सुखेन शयन कुरु, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ४२ ६ शिनु, प्र०—अत्र 'बहुल छन्दसि' इति श्लु 'अन्येषामपि०' इति दीर्घश्च १ ८१ ७ तीव्रोद्योगिन कुरु ७ १६ ६ [शो तनूकरणे (दिवा०) धातोर्लट्। विकरणव्यत्ययेन श्लु। 'बहुल छन्दसी' त्यभ्यासस्येत्वम्। अन्यत्र लोट् चापि। 'शिशाधि' इत्यादौ शासु अनुशिष्टौ (अदा०) धातोर्लोट्। शप श्लुश्छन्दसि। शिशीहि=शिशीतिर्दानकर्मा निघ० ५ २३]

शिशानः तनूकर्त्ता (वृषभ=बलीवर्द) १७ ३३ [शो तनूकरणे (दिवा०) धातोर्लिट कानच्। अभ्यासस्येत्व छान्दसम्]

शिशिराय शिशिरर्त्तौ व्यवहारसाधनाय २४ ११ शिशिराय ऋतवे २४ २० [शश प्लुतगतौ (भ्वा०) धातो 'अजिरशिशिर०' उ० १ ५३ सूत्रेण किरच् निपात्यते। शिशिर शृणाते शम्नातेर्वा नि० १ १० षड्भिरैन्द्रावार्हस्पत्यै (पशुभि) शिशिरे यजते श० १३ ५ ४ २८]

शिशीते उदके १ ५५ १

शिशीमसि शत्रून् सूक्ष्मान् जीर्णान् कुर्म्म, प्र०—अत्र शो तनूकरणे इत्यस्माल्लटि श्यन स्थाने व्यत्ययेन श्लु 'छन्दस्युभयथा' इति श्लोरार्धधातुकत्वादाकारादेश १.१०२ १० [शो तनूकरणे (दिवा०) धातोर्लट्। व्यत्ययेन श्यन श्लु। छन्दसि श्लोरार्धधातुकत्वादाकारादेश। 'इदन्तो मसि' इति मस इदन्तता]

शिशुमती प्रशस्ता शिशवो विद्यन्ते यस्या सा (अश्वा=वडवा) २१ ३३ शिशुमती=प्रशस्ता बालका विद्यन्ते यासा ता (स्त्रिय) १ १४० १० [शिशुरिति व्याख्यातम्। ततो मतुवन्तात् स्त्रिया ङीप्]

शिशुमारः बालहन्ता (पक्षिणी) २४ ३० **शिशुमारान्**=ये स्वशिशून् मारयन्ति तान् (जलचरजन्तून्) २४ २१ [शिशूपपदे मृङ् प्राणत्यागे (तुदा०) धातो 'कर्मण्यण्' इत्यण्]

शिश्नथत् हिंसति, प्र०—श्नथतीति हिंसाकर्मा निघ० २ १६, २ २० ५ प्रलयं करोति ६ ४ ३ शिथिलीकरोति ४.३० १० **शिश्नथे**=श्नथनि हिनस्ति, प्र०—अत्र व्यत्ययेनात्मनेपदम् ३ ३१ १३ [श्नथनि वधकर्मा निघ० २ १६ ततो लेट्। द्वित्वमभ्यासस्येत्व च छान्दसम्]

शिश्नदेवाः=अब्रह्मचर्या कामिनो ये शिश्नेन दीव्यन्ति क्रीडन्ति ते (लम्पटा कामातुरा जना) ७ २१ ५ [शिश्नोपपदे दिवु क्रीडाविजिगीषादिषु० (दिवा०) धातो 'कर्मण्यण्' इत्यण्। शिश्नदेवा अब्रह्मचर्या। शिश्न श्नथते शिश्ना=अस्त्रीणानि सूत्राणि नि० ४ ६]

शिश्ना अशुद्धानि सूत्राणि १ १०५ ८ [शिश्न पूर्वपदे व्याख्यातम्। तत शेर्लोपश्छन्दसि। शिश्न वै शोचिष्केश (ऋ० ३ २७ ४) शिश्न हीद शिश्निन भूयिष्ठ शोचयति श० १.४.३ ६ वृत्तमिव हि शिश्नम् श० ७ ५.१ ३८. योनिरुलूखलम्·····शिश्न मुसलम् श० ७ ५.१ ३८]

शिश्रथः शिथिलीकुरु वियोजय ४ १२ ८ विज्ञानदानेन शिथिलानि करोतु १ २४.१४ प्रयतस्व हिन्धि वा ५ ८५ ७ श्रथ्नाति ४ ३२.२२ **शिश्रथत्**=श्रथयेत्, प्र०—अत्राऽडभाव १ १२८ ६ [श्रथि शैथिल्ये (भ्वा०) श्रन्थ विमोचनप्रतिहर्षयो (क्रया०) श्रथ प्रयत्ने (चुरा०) धातोर्वा लेटि लडि वा छान्दसानि रूपाणि]

शिश्रियाणम् श्रयन्तम् (अग्निम्) १५ २८ व्याप्तम् (परमेश्वरम्) ५ ११ ६ विविधाश्रयम् १ ३२ २ [श्रिञ् सेवायाम् (भ्वा०) धातो शानच्। 'बहुल छन्दसी' ति शप श्लु]

शिश्रियाणाम् मेघाऽवयवाना मध्ये स्थिता विद्युतम् १७ १ [शिश्रियाणमिति व्याख्यातम्। तत स्त्रिया टाप्]

शिश्रिये समाश्रये ६ २४ श्रयति ५ ४४ १३. **शिश्रीत**=श्रयेत १ १४६.२ [श्रिञ् सेवायाम् (भ्वा०) धातोर्लट्। विकरणव्यत्ययेन श्लु। अन्यत्र लिड्, शप श्लुश्च]

शिश्वः शासनीया (अध्यक्षप्रजाभृत्या) १ १२२ १५ **शिश्वा**=शिशुना वत्सादिना १ ६५ ५ **शिश्वे**=वत्साय २ ३४ ८ [शिशुरिति व्याख्यातम्। 'जसादिषु छन्दसि वेति वक्तव्यम्' अ० ७ ३ १०६ वा०सूत्रेण गुणादिनामभावे यणादेशे च रूपाणि]

शिषः शिष्ट त्यजेत् १७ ४५ शिष्ट त्यज ६ ७५.१६ [शिष असर्वोपयोगे (चुरा०) धातोर्लङ्। व्यत्ययेन श]

तत. स्त्रिया टाप् । शिवम् सुखनाम निघ० ३ ६]

शिवतराय अतिशयेन मङ्गलस्वरूपाय (भा०—सर्वमङ्गलप्रदाय परमेश्वराय) १६ ४१ अत्यन्त कल्याणस्वरूप और कल्याणकारक (परमेश्वर) के लिए आर्याभि० २ २६, १६ ४१ [शिवप्राति० अतिशायने तरप् । शिवम् सुखनाम निघ० ३ ६]

शिवम् कल्याणम्, भा०=पारमार्थिक सुखम्, प्र०—शिव शग्म चेति सुखनामसु पठितम् निघ० ३ ६, ३ ४३ कल्याणकारकम् (यज्ञ=गृहाश्रमाख्य शुभाचरणम्) १७ ६ सुखकरम् (अन्तरिक्षम्) ३५ ६ मङ्गलकारिणम् (अग्नि=विद्युतम्) ११ ४७ निश्श्रेयस सुखम् ऋ० भू० २४०, ३ ४३. मोक्ष-सुख को आर्याभि० २ ४६, ३ ४३ **शिवः**=कल्याणकारी (अग्नि =वेदविदव्यापकोपदेशक) २५ ४७ मङ्गलस्वरूपो ज्ञाननयो विज्ञानप्रद (रुद्र =उपदेशको जन) ३ ६३ मङ्गलमयो जीवाना मङ्गलकारी (अग्नि =सर्वाभिरक्षकेश्वर) १ ३१ १ न्यायकारी (सभापति) १७ ११ मङ्गलाचारी (अग्नि =शत्रुविदारको राजा) १२ १७ सुखप्रद (रुद्र =सेनाध्यक्ष) ३ ६१ **शिवेन**=सर्वसुखनिमित्तेन (मनसा=अन्त करणेन) २ २४ [शिवम् सुखनाम निघ० ३ ६ (यजु० १२ १७) शिव शिव इति शमयत्येवैनम् (अग्निम्) एतद् हिंसायै तथो हैप (अग्नि) इमाल्लोकाञ्छान्तो न हिनस्ति (शिव =रुद्र =शान्तोऽग्नि) श० ६ ७ ३ १५ श्यति पापमिति विग्रहे शो तनूकरणे (दिवा०) धातोर्बाहु० औणा० वन् । पृपोदरादिना रूपसिद्धि । शिवु कत्याणे (बहुलमेतन्निदर्शनम् इति धातुप्वपठिता अपि धातवो गृह्यन्ते) धातोरौणा० क । कर्त्तरि वा इगुपधलक्षण क । स (परमात्मा) ब्रह्मा स शिव सेन्द्र सोऽक्षर परम स्वराट् तै० आ० १० ११ २]

शिवसङ्कल्पम् शिव कल्याणकारी धर्मविषय सङ्कल्प इच्छा यस्य तत् (मन =सङ्कल्पविकल्पात्मकम्) ३४ १ धर्मेष्टम् (मन =मननविचारात्मकम्) ३४ २. शिवे कल्याणकरे परमात्मनि सङ्कल्प इच्छाऽस्य तत् (मन =सर्वकर्मसाधनम्) ३४.३ शिवो मोक्षरूपसङ्कल्पो यस्य तत् (मन =योगयुक्त चित्तम्) ३४ ४ शिव कल्याणकरो वेदादिसत्यशास्त्रप्रचारसङ्कल्पो यस्मिँस्तत् (भा०—मन =विद्याधर्माचरणेन पवित्रम्) ३४ ५ मङ्गलनियमेष्टम् (भा०—मन =यज्जित सिद्धिप्रदम्) ३४ ६ कल्याणप्रिय सत्यार्थप्रकाशकञ्च (मन) ऋ० भू० १०७, ३४ १ कल्याणेष्टधर्मशुभगुणप्रियम् (मन) ऋ० भू० १५२, ३४ १ अपने और दूसरो के लिए कल्याण की इच्छा करने वाला, धर्म, कल्याण का सङ्कल्प करने वाला, शुद्ध गुणो की इच्छा करके दुष्ट गुणो से पृथक् रहने वाला, योग-विज्ञान से युक्त होकर अविद्यादि क्लेशो से वियुक्त, अविद्या का अभाव करके विद्याप्रिय, अधर्माचरण से रोक कर इन्द्रियो को धर्म-पथ मे सदा चलाने वाला (मन =मन) ३४ १ ६ स० प्र० २४६-४७. [शिव-सकल्पपदयो समास । शिवम् सुखनाम निघ० ३ ६ सकल्प =सम्+कृपू सामर्थ्ये (भ्वा०) धातोर्घञ् । 'कृपो रो ल ' इति लत्वम्]

शिवा मङ्गलप्रदा (पृथिवी) १ २७ प्रियदर्शना, सुखप्रदा, कल्याणकारिणी च (तनू धर्मनीति) १६ ४६ **शिवाम्**=मङ्गलमयीम् (जरा=वृद्धावस्थाम्) ५ १४१ १७ कल्याणकारिकाम् (तनू =शरीरम्) ४ २ **शिवे**=मङ्गलकारिण्ये (द्यावापृथिवी=सूर्यभूमी) ६ ७५ १० कल्याणसाधिके (क्रिये), प्र०—सर्वनिघृष्व० उ० १ १५१ इत्यय सिद्ध २ १६ [शिव इति व्याख्यातम् । ततष्टाप् स्त्रियाम्]

शिवानि मङ्गलमयानि (सख्यु कर्माणि) १.१०८ ५ [शिव इति व्याख्यातम्]

शिवासः मङ्गलाचरणा (सखाय) ५ १२ ५ [शिव इति व्याख्यातम् । ततो जसोऽसुक्]

शिवेभिः सुखकारकैर्मङ्गलविधायकै (पायुभि =रक्षणै) ६ ७१ ३ [शिवप्राति० 'बहुल छन्दसी' ति भिस ऐस् न भवति]

शिशवे पुत्राय ४ १८ ८ **शिशुम्**=शासनीय कुमार बालकम् ७ १६ वत्सम् १ १८६ ७ बालकमिव वर्त्तमान जगत् १७ ७० **शिशुः**=अविद्यादिदोषाणा तनूकर्त्ता (विद्वज्जन) १ १४५ ३ य श्यति तनूकरोति स (अग्नि.=सूर्यरूप) २२ १६. **शिश्वः**=शासनीया (वर्णा आश्रमा अध्यक्षप्रजाभृत्याश्च) १ १२२ १५ [शो तनूकरणे (दिवा०) धातो 'श कित् सनूवच्च' उ० १ २० सूत्रेण उं । सन्वद्भावेन द्वित्वादिकम् । शिशु शमनीयो भवति । शिशीतेर्वा स्याद् दानकर्मण । चिरलब्धो गर्भो भवति नि० १०.३६ अय वाव शिशुर्योऽय मध्यम प्राण श० १४ ५ २ २]

शिशाति तीक्ष्णीकरोति ७ १८ ११ **शिशातु**=क्षयतु, प्र०—अत्र शो तनूकरणे इत्यस्मात् श्यन स्थाने 'बहुल छन्दसि' इति श्लु, तत 'श्नो इति द्वित्वम् १ १११ ५ **शिशाधि**=सम्यक्तया शिक्षय ६ १५ १६.

वीर्यवन् (अग्ने=वह्निरिव राजन्) ७.१८. आशुकर्त्त (अग्ने=विद्वन्) ६४८७ **शुक्रम्**=वीर्यकरमुदकम् २१ ३४ वीर्यम् ३ ६ ३ शीघ्र सुखकरम् (सोम=महौषधिरसम्) १९ ७९ शुद्ध शुद्धिहेतुर्वा (ब्रह्म यज्ञो वा) १ २१. पराक्रमप्रदम् (इन्द्रिय=धनम्) १९ ७८ शुद्धिकरम् (इन्द्रिय=चित्तम्) १९ ७७ पवित्राम् (इन्द्रिय=दिव्या वाचम्) १९ ७३ आशु कार्यकरम् (इन्द्रियम्) १९ ७२ वीर्यवत् (भा०—विदुषा जुष्ट शरीरात्मबलम्) १९.७९ सर्वजगत्कर्तृ शुद्धम् (ब्रह्म) प० वि०। वीर्यवन्तम् (पतिम्) ८ ४८ आशुकारित्वाच्छुद्धभावाच्च (ब्रह्म) ३२ १ क्षिप्र कार्यकरम् (वर्ण=स्वीकारम्) ३ ३४ ५ अनन्त सामर्थ्यम् (ब्रह्म) ऋ० भू० १४०, ऋ० ६ १ ६.५ **शुक्रस्य**=शोधकस्य योगस्य ७ १३ शोपकस्योदकस्य २ ४० ३. शुद्धिकरस्य (वचस=वचनस्य) २ ९ ४ शुद्धस्य धर्मस्य ८ ४९ **शुक्रः**=आशुकारी (अग्नि=विद्युत्) ६ १६ ३४ वीर्यवान् (योगिजन) ७ १३ पवित्र पवित्रकारको वा (विद्वानुपदेशक) ४ २४ शीघ्रकर्त्ता शुद्धस्वरूपो वा (अ०—ईश्वर) १७ ८० भास्वर (भानु=सूर्य) ११ ५४ य आशु पासु-वर्षा-तीव्रतापाभ्यामन्तरिक्ष मलिन करोति स ज्येष्ठ (मास) १४ ६ तेजस्वी (सूर्य) १ ४३ ५ वीर्यसमूह ८.५७ वायु १८ ५० शुद्धस्वभाव (विद्वज्जन) ४ ४७ १ पावक सूर्य आशुकारी बालश्च ३३ ५ शुद्ध पवित्रो बलिष्ठो वा जन ६ ४ ३ [शुक्रम् उदकनाम निघ० १ १२ ईशुचिर् पूतीभावे (दिवा०) धातो 'ऋज्रेन्द्राग्रवज्र०' उ० २.२८ सूत्रेण रन्। शुक्र शोचतेर्ज्वलतिकर्मण नि० ८ ११ (यजु० १८ ५०) असौ वा आदित्य शुक्र श० ९ ४ २.२१ ता० १५ ५ ९ एप वै शुक्रो य एप (आदित्य) तपति श० ४.३ १ २६ एप वै शुक्रो य एप (आदित्य) तपत्येप उऽएव बृहन् श० ४ ५ ९ ६ तद्वाऽएप एव शुक्रो य एप (आदित्य) तपति तद् यदेप तपति तेनैप शुक्र श० ४ २ १ १ तत्र ह्यादित्य शुक्रश्चरति गो० पू० २ ९ अस्य (अग्ने) एवैतानि (घर्म, अर्क, शुक्र, ज्योति, सूर्य) नामानि श० ९ ४.२.२५ अत्ता वै शुक्र (ग्रह.) श० ५ ४ ४ २० अत्तैव शुक्र आद्यो मन्थी (ग्रह) श० ४ २ १ ३ शुक्र सोमः ता० ६ ६ ९ एती (शुक्रश्च शुचिश्च) एव ग्रैष्मौ (मासौ) स यदेतयोर्बलिष्ठ तपति तेनो हैतो शुक्रश्च शुचिश्च श० ४.३.१ १५ ज्योति शुक्रमसौ (आदित्य) ऐ० ७ १२ शुक्र हिरण्यम् तै० १ ७ ६ ३ ज्योतिर्वै शुक्र हिरण्यम् ऐ० ७ १२ शुक्र ह्येतच्छुक्रेण क्रीणाति यत् सोम हिरण्येन श० ३ ३ ३ ६ (यजु० १ ३१) तेजोऽसि शुक्रमस्यमृतमसि (आज्य) श० १ ३ १ २८. शुक्रा ह्याप. तै० १ ७ ६ ३ सत्य वै शुक्रम् श० ३ ९ ३ २५]

शुक्रज्योतिः शुक्र शुद्ध ज्योतिर्यस्य स (अ०—ईश्वर) १७.८० शुक्र शुद्धाचरण ज्योति प्रकाशो यस्य स (विद्वान् राजा) १२ १५ [शुक्र-ज्योतिप्पदयो समास]

शुक्रदुघस्य आशु पूर्त्तिकर्त्र्या (धेनो=वाच) ६ ३५ ५ [शुक्रोपपदे दुह प्रपूरणे (अदा०) धातो 'दुह कव् घश्च' अ० ३ २ ७० सूत्रेण कप् घश्चादेश]

शुक्रपाः शुक्र योगवीर्य योगबल वा पान्ति ते (देवा=योगिजना) ७ १२ **शुक्रपेभ्यः**=शुक्र वीर्य रक्षन्ति तेभ्य (देवेभ्य=विद्वद्भ्य) ६ २७ [शुक्रोपपदे पा रक्षणे (अदा०) धातो. क]

शुक्रपिशम् शुक्र भास्वर, पिश तद्विपरीत कृष्णञ्च (भा०—विलक्षणस्वरूपमहोरात्रम्) २९ ३१ [शुक्र-पेशपदयो समास। एकारस्येकारश्छान्दस। पेश रूपनाम निघ० ३ ७ शुक्रपिश शुक्रपेशस श्रियम्। शुक्र शोचतेर्ज्वलतिकर्मण। पेश इति रूपनाम, पिंशतेर्विपिशित भवति नि० ८ ११.]

शुक्रवर्चाः शुक्रस्य सूर्यस्य प्रकाश इव वर्चो न्यायाचरण यस्य स. (पुत्र) १२ १०७ [शुक्र-वर्चस्पदयो समास। वर्चस्=वर्च दीप्तौ (भ्वा०) धातोरौणा० असुन्]

शुक्रवर्णम् शुद्धस्वरूपम् (रथम्) १ १४० १ [शुक्र-वर्णपदयो समास]

शुक्रवर्णाम् शुद्धस्वरूपाम् (धिय=प्रज्ञाम्) १ १४३ ७ [शुक्र-वर्णपदयो समासे स्त्रिया टाप्]

शुक्रवासाः शुक्राणि शुद्वानि वासासि यस्या सा शुद्धवीर्या वा (उषा) १ ११३.७ [शुक्र-वासस्पदयो समास]

शुक्रशोचिषम् शुक्रमाशुकर शोचिस्तेजो यस्मिँस्तम् (अग्नि=विद्युदादिस्वरूपम्) २ २ ३ **शुक्रशोचिषा**=शुक्रस्य शोधकस्य सूर्यस्य शोचिर्दीपन तेनेव ७.१३ **शुक्रशोचिषे**=शुक्रेण वीर्येण शोचिर्दीप्तिर्यस्य तस्मै (देवाय=विदुषे यतये) ७ १४ १ **शुक्रशोचिः**=शुद्धतेजस्क (अग्नि=राजा सेनेशो वा) ७ १५ १० [शुक्र-शोचिष्पदयो समास। शोचि ज्वलतोनाम निघ० १ १७ शुक्र इति व्याख्यातम्]

शुक्रसद्मनाम् शुद्धस्थानानाम् ६ ४७ ५ [शुक्र-सद्मन्पदयो समास। सद्मन्=गृहनाम निघ० ३ ४]

शिष्टम् शिष्यते यस्तम् (सोमम्=उत्तमौषध्यभिषवम्) १ २८ ६ [शिष प्रसर्वोपयोगे (चुरा०) धातो क्त]

शिशपायाम् एतत्काष्ठे वृक्षविशेषे ३.५३ १६ [शिवोपपदे पा रक्षणे (अदा०) धातो क-प्रत्यये टापि च पृषोदरादिना रूपसिद्धि]

शिशुमारः शिशून् धर्मोल्लङ्घिन शत्रून् मारयति येन स (रथ=रमणीयो यानादि) १ ११६ १८ [शिशूपपदे मृङ् प्राणत्यागे (तुदा०) धातो 'कर्मण्यण्' इत्यण्। शिशु शिशुपदेन विज्ञेयम्। शिशु शसनीयो भवति नि० १०.३६.]

शीकायते य शीक सेचन करोति तस्मै (मेघाय) २२ २६ [शीकशब्दादाचारेऽर्थे क्यजन्ताच्छतृ। शीक=शीकृ सेचने (भ्वा०) धातोर्घञर्थे क]

शीघ्रम् तूर्णम् २२ २६.

शीघ्रयाय शीघ्रगतौ साधवे (जनाय) १६ ३१. [शीघ्रप्रातिप० साध्वर्थे यत्]

शीनम् सङ्कुचितम् (घृतम्) २५ ६ [श्यैङ् गतौ धातो क्तप्रत्यये 'द्रवमूर्त्तिस्पर्शयो श्य' अ० ६ १ २४ सूत्रेण सम्प्रसारणम् 'श्योऽस्पर्शे' इति निष्ठानत्वम्]

शीभम् क्षिप्रम् ३ ३३ १२ [शीभम् क्षिप्रनाम निघ० २ १५]

शीभ्याय शीभेषु क्षिप्रकारिषु भवाय (जनाय), प्र०—शीभ इति क्षिप्रनाम निघ० २ १५, १६ ३१ [शीभम् क्षिप्रनाम निघ० २ १५ ततो भवार्थे यत्]

शीरम् वि द्युद्रूपेण सर्वत्र शयानम् (वह्निम् ३ ६ ८ [शीङ् स्वप्ने (अदा०) धातो 'स्फायितञ्जि०' उ० २ १३ सूत्रेण रक्। शीरम् अनुशयिनमिति वा शिनमिति वा नि० ४.१४]

शीर्यते हिंस्यते १ १६४ १३ [शॄ हिंसायाम् (क्रया०) धातो कर्मणि लट्]

शीर्षणि शिरसि २ १६ २ **शीर्षसु**=शिरस्सु ५ ५४ १ मस्तकेषु ५ ५७ ६ **शीर्षाणि**=शिरासि ७ १८ १६ **शीर्षे**=शिरसी प्रायणीयोदयनीये नित्य कार्यञ्च शब्दात्मानौ वा १७ ६१ शिरसी इव (अभ्युदयनि श्रेयसे) ४ ५८ ३ **शीर्ष्णः**=शिर इवोत्तमसामर्थ्यात् ३१.१३. शिरस १ १६४ ७ शिरोवदुत्तमसामर्थ्यात् प्रकाशमयात् ऋ० भू० १२७, ३१ १३ **शीर्ष्णा**=शिरोवत् कर्मणा १ ११६ १२ **शीर्ष्णे**=उत्तमाङ्गाय (मखाय यज्ञाय) ३७ ३ उत्तमव्यवहाराय (मखाय=गृहस्थकार्यसङ्गतिकरणाय) ३७.८ उत्तमगुणप्रचारकाय (मखाय=शिल्पयज्ञविधानाय) ३७ ६ शिरोवत्सर्वोपरिवर्त्तमानाय (मखाय) ३७ ८ उत्तमसुखप्रदाय (मखाय) ३७ ७ सर्वोत्कर्षाय ३७ ८ शिर सम्बन्धिने वचसे (मखाय) ३७ ६. उत्तमत्वाय (मखाय) ३७ ५ [शिरस्प्रातिप० सप्तम्या विभक्तौ 'शीर्षश्छन्दसि' अ० ६ १.६०. सूत्रेण शीर्षन् इत्यादेश]

शीर्षण्या शिरसि भवा (रज्जु) २५ ३१ या शीर्ष्णि साधु सा (रज्जु) १ १६२ ८. [शिरस्प्रातिप० भवार्थे साध्वर्थे वा यत्प्रत्यये 'ये च तद्धिते' अ० ६ १ ६१ सूत्रेण शीर्षन्नादेश]

शीर्षन् शिरसि १६ ६२ [शिरस्प्रातिप० सप्तम्येकवचनस्य 'सुपा सुलुक्०' सूत्रेण लुक्। शिरस शीर्षन्नादेशश्च]

शीर्षा शीर्षाणि १ १३३ २ शिरासि ६ ६२.१०. [शिरस् शब्दस्य जसि शीर्षन्नादेश। शेर्लोपश्छन्दसि]

शीर्ष्णा शीर्ष्णा शिरसा शिरसा १.१३२.२ [शीर्ष्णापदस्य वीप्साया द्वित्वम्। शीर्ष्णा=शिरस शीर्षन्नादेशष्टा-विभक्तौ परत]

शीर्ष्णे शीर्ष्णे शिरोवदुत्तमायोत्तमाय सुखाय ७ १८ २४. [शीर्ष्णेपदस्य वीप्साया द्वित्वम्। शीर्ष्णे=शिरसश्चतुर्थ्येकवचने शीर्षन्नादेश]

शीलाय जितेन्द्रियत्वादिशीलिने (पुरुषाय) ३० १४ [शील समाधौ (भ्वा०) धातोरिगुपधलक्षण क]

शुक् शोचन्ति विचारयन्ति यया सा प्रदीप्तिः, सूर्यरश्मेव प्रदीप्तिर्वा ३८ १८ शोक, प्र०—अत्र भावे क्विप् १३ ४७ **शुचा**=होमसाधनेन ३ ४१ **शुचे**=पवित्राय (व्यवहाराय) ३६ ११. [शुच शोके (भ्वा०) धातो सम्पदादित्वात् क्विप्। शोचति ज्वलतिकर्मा निघ० १ १६]

शुकवभ्रुः शुकस्येव वभ्रुर्वर्णो यस्य स (पशु) २४ २ [शुक-वभ्रुपदयो समास। शुक=शुभ दीप्तौ (भ्वा०) धातो 'शुकवल्कोल्का' उ० ३ ४२ सूत्रेण कक्-प्रत्ययान्तो निपात्यते। वभ्रु=भृञ् भरणे (भ्वा०) धातो 'कुभ्रञ्च' उ० १ २२. सूत्रेण कु प्रत्ययो द्वित्वञ्च]

शुकरूपाः शुकस्येव रूपमिव रूप येषान्ते (पशव) २४.७ [शुक-रूपपदयो समास]

शुकः शुद्धिकृत् पक्षिविशेष २४ ३३ **शुकेषु**=शुकवत् कृतेषु कर्मसु १ ५० १२ [शुभ दीप्तौ (भ्वा०) धातो 'शुकवल्कोल्का' उ० ३ ४२. सूत्रेण कक्-प्रत्ययान्तो निपात्यते। याम शुक हरितमालभते गो० उ० २ १]

शुक्र शक्तिमन् (विद्वज्जन) ५ २१ ४ आशुकारिन्

पालक (योगिजन) ७ ७ [शुचि इत्युपपदे पा रक्षणे (अदा०) धातो क्विप्]

शुचिपेशसम् पवित्ररूपाम् (धियम्) १ १४४ १ [शुचि-पेशस्पदयो समास । पेशस् रूपनाम निघ० ३ ७]

शुचिप्रतीकम् पवित्रप्रतीतिकरम् (विद्वज्जनम्) १ १४३ ६ [शुचि-प्रतीकपदयो समास । प्रतीकम् प्रत्यक्तम् नि० ७ ३१]

शुचिभ्राजाः शुचय पवित्रा भ्राजा प्रकाशा यासान्ता (कुमारिका) १ ७६ १ [शुचि-भ्राजपदयो समास । भ्राज.=भ्राजृ दीप्तौ (भ्वा०) धातोर्घञ्]

शुचिवर्णम् पवित्रस्वरूपमतिसुन्दर वा (कुमारम्) ५ २ ३ [शुचि-वर्णपदयो समास]

शुचिव्रतः पवित्रधर्माचरणशील (जन) २१ १३ [शुचि-व्रतपदयो समास]

शुचिव्रता पवित्रकर्म्माणौ (मित्रावरुणा=अध्यापकोपदेशकौ) ३ ६२ १७ पवित्रशीलौ (अध्यापकोपदेशकौ) १ १८२ १ शुचि पवित्रकर व्रत शील ययोस्तौ (अश्विनौ=सूर्याचन्द्रमसौ) १ १५ ११ [शुचि-व्रतपदयो समास । ततो द्विवचनस्याकारश्छान्दस । व्रतम् कर्मनाम निघ० २ १]

शुचिव्रते पवित्रकर्मयुक्ते (रोदसी=सूर्यभूमी) ६.७० २ [शुचि-व्रतपदयो समास । व्रतम् कर्मनाम निघ० २ १]

शुचिषत् य शुचिषु पवित्रेषु पदार्थेषु सीदति स (परमेश्वर) १० २४ पवित्रेषु व्यवहारेषु वर्त्तमान (ब्रह्म जीवो वा) १२ १४ य पवित्रेषु विद्वत्सु रा (हस=विवेकी जन) १६.७४ [शुचि इत्युपपदे पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्]

शुचिष्मः दीप्तिमन् (अग्ने=विद्वज्जन) ६ ६ ४ [शुचिष्प्राति० मतुप्। 'मतुवसो रु०' अ० ८ ३ १ इति रुत्वम्]

शुची पवित्रे (द्यावापृथिवी) ४ ५६ ५ [शुचिरिति व्याख्यातम् । ततो प्रथमाद्विवचनम्]

शुची शुचीनि पवित्राणि (धर्माचरणानि) ७ ५६ १२ [शुचिरिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

शुचीनि पवित्राणि (भेषजा=रोगनिवारकौषधानि) २ ३३.१३ [शुचिप्राति० प्रथमाबहुवचनम्]

शुण्ठाकर्णः शुण्ठौ शुष्कौ कर्णौ यस्य स (पशु पक्षी वा) २४ ४ [शुण्ठ-कर्णपदयो समास । शुठि शोषणे (भ्वा०) धातोर्घञ् पूर्वपदस्य सहिताया दीर्घ]

शुतुद्री शु शीघ्र तुदति व्यथयति सा (नदी) ३ ३३ १. [शु क्षिप्रनाम निघ० २ १५ शू इत्युपपदे तुद व्यथने (तुदा०) धातो छान्दसष्टक्। तत स्त्रिया डीप्। रुटागमश्च छान्दस.। शुतुद्री शुद्राविणी क्षिप्रद्राविण्याशुतुन्नेव द्रवतीति वा नि० ६ २६]

शुद्धम् अविद्यादिदोषरहितत्वात् सदा पवित्रम् (ब्रह्म) ४० ८ अविद्यादिदोषेभ्य. सर्वदा पृथग् वर्त्तमानम् (ब्रह्म) ऋ० भू० ३६, ४० ८ अविद्यादि दोष, जन्म-मरण, हर्ष-शोक, क्षुधा-तृषा आदि दोषोपाधियो से रहित सदैव निर्मल (परमात्मा) आर्याभि० २ २, ४० ८ निर्दोषम् (ब्रह्म) ४० ८, ऋ० भू० ३२०, [शुध शौचे (दिवा०) धातो क्त]

शुद्धवालः शुद्धा वाला यस्य स (पशु) २४ ३ [शुद्ध-वालपदयो समास]

शुद्धाः सत्कर्माऽनुष्ठानपूता (देवी=विदुष्य सत्स्त्रिय) ६ १३. निर्मला (अप=जलानि) ६ २८ ७ [शुध शौचे (दिवा०) धातो क्त । तत स्त्रिया टाप्]

शुद्धयतु शुद्धयतु ६ १५ [शुध शौचे (दिवा०) धातोर्लोट्। 'व्यत्ययो बहुलम्' इति द्विविकरणता। तेन श प्रत्यय]

शुनम् ज्ञानवृद्धम् (प्रजास्वामिनम्) ३ ३० २२. वर्धकम् (वीरजनम्) ३.३१ २२ सुखम् १२ ६६. सुखप्रदम् (राजानम्) ३ ३४ ११ [टुओश्वि गतिवृद्धचो (भ्वा०) धातो क्त.। यजादित्वात् सम्प्रसारणम्। 'ओदितश्चे' ति निष्ठानत्वम्। 'हल.' अ० ६.४ २ सूत्रेण प्राप्त दीर्घत्वमपि छान्दसत्वान्न भवति। शुनम् सुखनाम निघ० ३ ६ यद् वै समृद्ध तच्छुनम् श० ७.२ २ ६ या वै देवाना श्रीरासीत् साकमेधैरीजानाना तच्छुनम् श० २.६ ३ २]

शुनहोत्रेषु शुन सुख जुह्वति ददति तेषु (द्रव्येषु) २ १८.६ शुनाना विज्ञानवृद्धाना होत्रेषु दानेषु २.४१.१४ प्राप्तयोगजविद्याद्येषु (सर्वविद्वत्पतिषु) २ ४१ १७ [शुनहोत्रपदयो समास । शुन सुखनाम निघ० ३ ६ शुनमिति व्याख्यातम् । होत्रम्=हु दानादानयो (जु०) धातो. 'हुयामाश्रुभसिभ्यस्त्रन्' उ० ४ १६८ सूत्रेण त्रन्]

शुनः कुक्कुरान् १.१८२ ४ कुक्कुरस्य ४ १८ १३ [श्वन्=टुओश्वि गतिवृद्धचो (भ्वा०) धातो 'श्वनुक्षन्पूषन्०' उ० १ १५६ सूत्रेण कनिन्। श्वन्प्राति० शस्। अन्यत्र ङस्]

शुनःशेपम् सुखस्य प्रापकमिन्द्रियाऽऽरामम् (जनम्) ५ २ ७ शुन शेप.=शुनो विज्ञानवत इव शेपो विद्यास्पर्शो

शुक्रा शुद्धाऽन्त करणा आशुकारिणी (कन्या) ७ ३४.१ शुद्धिकरी (उषा) १ १२३ ६ **शुक्राः**=प्रदीप्ता (उषस =प्रभातवेला) ४ ५१ ६ शुद्धा (किरणा) १ १३५ ३ [शुक्रप्राति० स्त्रिया टाप्। शुक्र इति व्याख्यातम्]

शुक्रा शुद्धानि (शोचीपि=तेजासि) २७ ११ शुक्राणि उदकानि ३ ८ ६ शरीरात्मवीर्याणि ३ १ ८ [शुक्रप्राति० शेर्लोपश्छन्दसि। शुक्र इति व्याख्यातम्]

शुक्रासः शुद्धवीर्या (जना) १ १३४ ५ [शुक्रप्राति० जसोऽसुगागम]

शुक्रेभिः शुद्धैरुदकैर्वीर्यैर्वा २.३५.४ वीर्यवद्भि (अङ्गै) ३ १ ५ [शुक्रप्राति० 'बहुल छन्दसि' सूत्रेण भिस ऐसादेशो न भवति]

शुक्लम् शुद्धम् (पिङ्गाक्ष=पीतवर्णाक्ष जनम्) ३० २१. [ईशुचिर् पूतीभावे (दिवा०) धातो 'ऋज्रेन्द्राग्र०' उ० २ २८ सूत्रेण रन्। 'कपिलकादीना सज्ञाछन्दसोर्वा रो लमापद्यते' अ० ८ २ १८ वा०सूत्रेण लत्वम्। शुक्लम् तद् यच्छुक्ल तद् वाचो रूपमृचोऽग्नेर्मूर्त्यो जै० उ० १.२५ ८]

शुचतः शोकाऽऽतुरस्य (विद्वज्जनस्य) ६ ३ ३ **शुचन्त.**=पवित्राचरण कुर्वन्त, कारयन्त (राजप्रजाजना) ४ २ १७ विद्याविनयाभ्या पवित्रा प्रशसिता (जना) ४ २ १५ [शुच शोके (भ्वा०) धातो शतृ। विकरणव्यत्ययेन श। शुचन्तम् जाज्वल्यमानम् नि० ५ ३]

शुचते पवित्रयति विचारयति वा ४ २३ १ [शुच शोके (भ्वा०) ईशुचिर् पूतीभावे (दिवा०) धातोर्वा लट्। व्यत्ययेनात्मनेपद श-प्रत्ययश्च]

शुचद्रथाः शुचन्त पवित्रा रथा यानानि येषान्ते (राजपुरुषा.) ४ ३७ ४. [शुचद्-रथपदयो समास]

शुचध्यै शोचितु पवित्रीकर्त्तुम् ४ २ १ [शुच शोके (भ्वा०) ईशुचिर् पूतीभावे (दिवा०) धातोर्वा तुमर्थेऽध्यैप्रत्यय]

शुचन्तिम् पवित्रकारकम् (विद्वज्जनम्) १ ११२ ७ [शुच शोके (भ्वा०) ईशुचिर् पूतीभावे (दिवा०) धातोर्वा वाहु० औणा० झिच् किच्च]

शुचमानः पवित्र पवित्रयन् (गुरुवत् जन) ४ २३ ८ [शुच शोके (भ्वा०) ईशुचिर् पूतिभावे (दिवा०) धातोर्वा शानच्। विकरणव्यत्ययेन श। व्यत्ययेनात्मनेपदञ्च। शुचमान दीप्यमान नि० १० ४०.]

शुचयद्भिः पवित्रयद्भि (गुणै) ४ ५६ १. शुचिमाचक्षाणै (देवेभि =विद्वद्भिर्दिव्यैर्गुणैर्वा) ४.५६ २ **शुचयन्तः**=ये शुचीनात्मन इच्छन्ति (देवा =विद्वासो जना) १ १४७ १ [शुचिपदाद् आत्मन इच्छायामर्थे क्यजन्ताच्छतृ। 'तत्करोती' ति वा णिजन्ताच्छतृ]

शुचयः पवित्रकारका (जना) १ १३४ ५ पवित्रा (उषास =प्रभातवाता) १ १३४ ४ पवित्रीभूता (विपश्चितो जना) ३३.८१ **शुचये**=पवित्रकरायाऽऽपाढाय २२ ३१ **शुचिः**=पवित्र पवित्रकारको वा (परमेश्वरो विद्वान्वा) १ ६१ ३ **शुचीनाम्**=पवित्राऽऽचाराणाम् (जनानाम्) ७ ५६ १२. **शुचे**=विद्याविनयाभ्या प्रकाशित (अग्ने=राजन्) ६ ४८ १३ [ईशुचिर् पूतीभावे (दिवा०) धातो 'इगुपधात् कित्' उ० ४ १२० सूत्रेण इन् किच्च। शुचि शोचतेर्ज्वलतिकर्मण। अयमपीतर शुचिरेतस्मादेव। निष्पिक्तमस्मात् पापकमिति नैरुक्ता नि० ६ १ एतौ (शुक्रश्च शुचिश्च) एव ग्रैष्मौ (मासौ) स यदेतयोर्वलिष्ठ तपति तेनो हैतौ शुक्रश्च शुचिश्च श० ४ ३ १ १५. यत् (अग्ने) शुचि (रूपम्) तद्दिवि (न्यधत्त) श० २ २ १ १४ वीर्य वै शुचि यद्वाऽग्रस्य (अग्ने) एतदुज्ज्वलत्येतदस्य वीर्य शुचि श० २ २ १ ८]

शुचाशुचा होमसाधनेन ३ ४ १

शुचि पवित्र शुद्धिकरम् (ऋत=सत्य न्यायम्) ४ २ १६ पवित्र कर्म्म ४ १ १६ [ईशुचिर् पूतीभावे (दिवा०) धातो 'इक् कृष्यादिभ्य' इतीक्। 'इगुपधात् कित्' उ० ४ १२० इति वा इन् किच्च]

शुचिजन्मनः शुचे पवित्राज्जन्म यस्य तस्य (विद्वज्जनस्य) १ १४१ ७ शुचे रवेर्जन्म यस्यास्तस्या (उषस =प्रभातवेलाया) ६ ३६ ३ **शुचिजन्मानः**=पवित्रजन्मवन्त (मरुत =मनुष्या) ७ ५६ १२ [शुचिजन्मन्पदयो समास]

शुचिजिह्वः शुचि पवित्रा जिह्वा यस्मात् स (अग्नि) २ ६ १ शुचि पवित्रा सत्यभाषणेन जिह्वा वाग् यस्य स (भा०—कुलदेशोद्दीपको नर) ११ ३६ [शुचि-जिह्वापदयो समास। जिह्वा जोहुवा नि० ५ २७]

शुचिदन् पवित्रदन्त (पुत्र) ७ ४ २ शुचय पवित्रा दन्ता यस्य स (मेधावी राजा) ५ ७ ७ [शुचि-दन्तपदयो समास। 'छन्दसि च' अ० ५ ४ १४२ सूत्रेण दन्तस्य दतृआदेश]

शुचिपाः शुचि पवित्रता पालयतीति शुचिपा पवित्र-

शुभः कल्याणकरस्य व्यवहारस्य १० ३३ शुम्भमाना (वीरजना) ५ ५४ ११ कल्याणकरस्य कर्मण शुभगुणसमूहस्य वा ५ ७५ ८ यत्कल्याणकारक मनुष्याणा कर्म तस्य, प्र०—अत्र सम्पदादित्वात् क्विप् १ ३४ ६. **शुभा**=शोभनेन (आचरणेन) ७ ५६ ६. शुभगुणकर्मणा १ १६५ १. **शुभे**=कल्याणाय भा०—सुखाय १८ ७६ श्रेष्ठाय व्यवहाराय १ ८८ २ शुभ्यते यस्तस्मै शुभाय विजयाय, प्र०—अत्र कर्मणि क्विप् १ ८७ ३ शुभगुणप्राप्तये १ ११६ ३ शुभाचरणाय ३० ७ उदकाय ५.५७ ३ [शुभ शोभार्थे (तुदा०) धातो सम्पदादित्वात् क्विप्। शुभम् उदकनाम निघ० १ १२]

शुभानैः मङ्गलमयैर्वचनैस्सह, भा०—मृदुवचनै ३३ २७ [शुभ शोभार्थे (तुदा०) धातोर्बाहु० औणा० आनच् स च कित्]

शुभ्र शुद्धाचरण (राजन्) ५ ५४ **शुभ्रम्**=भास्वरम् (शुष्म=बलम्) २ ११ ४. **शुभ्रः**=शुद्ध प्रशसनीय (बलयुक्तो देह) ७ ५६ ८. **भ्राः**=शुद्धाऽऽचारा (देवा=विद्वज्जना) ७ ३६ ३ शुद्धस्वरूपाचारा (पत्नी=भार्या) ५ ४२ १२. श्वेता (पुर=नगराणि) ५ ४१ १२ स्वगुणै शोभमाना (मरुत=वायव) १ १६ ५ शुद्धधर्मा (वीरजना) १ ८५ ३ स्वच्छा (मरुत=वायव) १ १६७ ४ विद्युत २ ११ ३ **शुभ्रे**=शोभमाने सुखे १.५७ ३ शोभायमाने (अध्यापकोपदेशिके) ३ ३३ २ [शुभ शोभार्थे (तुदा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक्। शुभ्रा शोभायमाना नि० १२ ४३]

शुभ्रयामा शुभ्रा शुद्धा यामा दिवसा यया सा (धेनु=वाक्) ३ ५८ १ [शुभ्र-यामपदयो समासे स्त्रिया टाप्]

शुभ्रा श्वेतवर्णा (उषा) ५ ८० ५ [शुभ्र इति व्याख्यातम्। तत स्त्रिया टाप्। शुभ्रे शोभने नि० ६ ३६]

शुभ्रासः श्वेतवर्णा (वायव) २ ३६ २ [शुभ्रप्राति० जसोऽमुगागम]

शुभ्रिषु शुभगुणेषु ५ ३४ ८ शुद्धेषु व्यवहारेषु १.२६ ६ शोभनसुखप्रदेषु (गोष्वश्वेषु) १ २६ १ शोभनेषु विमानादियानेषु तत्साधकतमेषु वा १ २६ २ शुभ्रा प्रशस्ता गुणा विद्यन्ते येषु तेषु (गोष्वश्वेषु) १ २६ ३ शुद्धभावेन धर्मव्यवहारेण गृहीतेषु (गोष्वश्वेषु) १ २६ ५ [शुभ्रप्राति० प्रशसायाम् (मत्वर्थे) इनि]

शुभ्वा सुशोभमान (महाराज) ४ ३८ ६ [शुभ शोभार्थे (तुदा०) धातो कर्त्तरि क्वनिप्]

शुम्भत सर्वत्र यानादिकृत्येषु प्रदीपयत १ २१ २. **शुम्भति**=शोभयति १ २२ ८ **शुम्भते**=सुशोभते, प्र०=अत्र व्यत्ययेनाऽऽत्मनेपदम् १ १४० ६ **शुम्भन्ति**=शुभाचरणयन्ति ५ ३६.५. पवित्रयन्ति ५.२२ ४ विराजन्ते ५ १०.४. **शुम्भन्ते**=शोभन्ते १ ८५ १ **शुम्भस्व**=शोभायुक्तान् कुरु ५ १० [शुम्भ शोभार्थे (तुदा०) धातोर्लोट्। अन्यत्र लट् चापि]

शुम्भन्तः=प्राप्तशोभा (विद्वज्जना) १ १३० ६ [शुम्भ शोभार्थे (तुदा०) धातो शतृ]

शुम्भमाना सुशोभायुक्ता (देवी=विदुषी स्त्री) ६ ६४.२ प्रकाशवन्ती (उषा) १ ६२ १० **शुम्भमानाः**=शोभमाना (तन्व.=शरीराणि) ७ ५६ ११. सुशोभिता (द्वार=गृहद्वाराणि) २६ ५ [शुम्भ शोभार्थे (तुदा०) धातो शानच्। ततष्टाप् स्त्रियाम्। व्यत्ययेनात्मनेपदम्]

शुम्भमानाः शोभायुक्ता (हसास=हसा) ७ ५६ ७. शुभगुणाढ्या सम्पादयन्त (मनुष्या) १ १६५.५ [शुम्भ शोभार्थे (तुदा०) धातो. शानच्। व्यत्ययेनात्मनेपदम्। शुम्भमाना. सुशोभिषमाणा नि० ८ १०]

शुम्भमाने सुशोभिते (दम्पती=भार्यापती) २ ३६ २. [शुम्भ शोभार्थे (तुदा०) धातो शानजन्तात् स्त्रिया टाप्]

शुरुधः य शुरुमन्धकारनाशक तेजो दधाति स सूर्य. ६ ३.३ [शुरूपपदे डुधाञ् धारणपोषणयो (जु०) धातो क]

शुरुधः सद्यो रोधिका (वाच) ६ ४६ ८ या शुरुधो दुःखानि रुन्धन्ति ता (चन्द्राग्रा साधनानि) ३४ ४२ या शु. सद्यो रुन्धन्ति ता स्वसेना, प्र०—शुरुध इति पदनाम निघ० ४ ३, ४ २३ ८. ये सद्यो रुन्धन्ति ते (विद्वज्जना) ७ २३ २ प्राप्तव्यानि सुखानि १ ७२ ७ ये शुरून् हिंसकान् सूर्यकिरणान् दधति धरन्ति ते गो अग्रा अप) १ १६६ ८ [शु इत्युपपदे रुधिर् आवरणे (रुधा०) धातो क्विप्। शु क्षिप्रनाम निघ० २ १५ शुरूपपदे वा दधाते क्विप्। शुरुध आपो भवन्ति। शुच सरुन्धन्ति नि० ६ १६]

शुशुक्वनम् अतिशयेन प्रदीप्तम् (क्षय=निवासम्) १ १३२.३ [शोचति ज्वलतिकर्मा (निघ० १ १६) धातोर्यङ्लुगन्तादौणा० क्वनिप्। ल्युट् प्रत्यये वा वकारोपजन]

शुशुक्वान् विद्याविनयाभ्या प्रकाशित (विद्वान् सद्वैद्य) १ १८६ ४ शोचक (जार=वयोहन्ता सूर्य)

यस्य स (विद्वान् पुरुष) प्र०—शेप· शपते स्पृशतिकर्मण नि० ३ २१, १ २४ १२ [शुन-शेपपदयो समास। 'शेपपुच्छलाङ्गूलेषु शुन सज्ञाया पष्ठ्या अलुग् वक्तव्य' अ० ६ ३ २१ वा०सूत्रेण छन्दस्यसज्ञायामपि पष्ठ्या अलुक्। शुन सुखनाम निघ० ३ ६ श्वन्प्राति० पष्ठ्या एकवचने रूपम्। शुन वायु शु एत्यन्तरिक्षे नि० ६ ३६ शेप शपते स्पृशतिकर्मण नि० ३ २१]

शुनासीरा यथा वायुसूर्यौ, प्र०—शुनासीरौ शुनो वायु सरन्त्यन्तरिक्षे, सीर आदित्य सरणात् नि० ६ ४०, १२ ६६ सुखदस्वामिभृत्यौ, कृपीवलौ ४ ५७ ८ [शुन-सीरपदयो समासे द्विवचनस्याकारश्छान्दस। पूर्वपदस्य 'देवताद्वन्द्वे च' इत्यनङ्। शुनासीरौ=शुनो वायु शु एत्यन्तरिक्षे। सीर आदित्य सरणात् नि० ६ ४० सवत्सरो वै शुनासीर। गो० २ १ २६]

शुनासीरीयाः शुनासीरदेवताका कृपिसाधका (पशव) २४ १६ [शुनासीराव् इति व्याख्यातम्। तत 'सास्य देवता' इत्यर्थे 'द्यावापृथिवीशुनासीर०' अ० ४ २ ३२ सूत्रेण छ]

शुनासीरौ क्षेत्रपतिभृत्यौ ४ ५७ ५ [व्याख्यातम्। शुनासीर्यो द्वादशकपाल पुरोडाशो भवति श० २ ६ ३ ५. शान्तिर्वै भेपज शुनासीरौ कौ० ५ ८. सवत्सरो वै शुनासीर गो० उ० १ २६ अथ यस्माच्छुनासीर्येण यजेत। या वै देवाना श्रीरासीत् साममेधैरीजानाना विजिग्यानाना तच्छुनम्, अथ य सवत्सरस्य प्रजितस्य रस आसीत् तत् सीरम् श० २ ६ ३ २]

शुन्धध्वम् शुन्धन्ति शोधयत वा, प्र०—अत्र व्यत्यय आत्मनेपदञ्च १ १३ पवित्रीकुरुत २६ २४ **शुन्धन्ताम्**=पवित्रीकुरुताम् ५ २६ **शुन्धन्तु**=पवित्रयन्तु २० २० **शुन्धस्व**=शोधय ५ १० **शुन्धामि**=निर्मलीकरोमि पवित्रीकरोमि वा १ १३ [शुन्ध शुद्धौ (भ्वा०) धातोर्लोट्। व्यत्ययेनात्मनेपदम्। अन्यत्र लडपि]

शुन्धयन्तु बाह्यदेश पवित्र कुर्वन्तु ४ २. [शुन्ध शुद्धौ (भ्वा०) धातोर्णिजन्ताल्लोट्]

शुन्ध्युवः पवित्रहेतवो रश्मयोऽश्वा, प्र०—अत्र 'तन्वादीना छन्दसि बहुलमुपसङ्ख्यानम्' अ० ६ ४ ७० अनेन वार्त्तिकेनोवङादेश १ ५० ६ शोधिका (विद्युत) ५ ५२ ६ आदित्यकिरणा' १ १२४ ४ **शुन्ध्यूः**=शुद्ध (भगवान्) ५ ३२ शुद्धस्वरूप और सबका शोधक (ईश्वर) आर्याभि० २ १७, ५ ३२ [शुन्ध शुद्धौ (भ्वा०) धातो 'यजिमनि-शुन्धि०' उ० ३ २० सूत्रेण युच्। शुन्ध्युप्राति० जसि 'तन्वादीना छन्दसि बहुलमुपसख्यानम्' अ० ६.४ ७० वा० सूत्रेणोवङ्। शुन्ध्युरादित्यो भवति शोधनात्। शकुनिरपि शुन्ध्युरुच्यते शोधनादेव। ···आपोऽपि शुन्ध्यव उच्यन्ते शोधनादेव नि० ४ १६]

शुप्तौ शयने कृते सति, प्र०—अत्र वर्णव्यत्ययेन श १ ५१ ५ [क्षिप्वप् शये (अदा०) धातो क्त। 'वचि-स्वपि०' इति किति सम्प्रसारणम्। वर्णव्यत्ययेन सकारस्य शकार]

शुभम्=कल्याणयुक्त सुखम् १ २३.११ कल्याणम् ४ ५१ ६ उदकम् ६ ६२ ४. धर्म्यं व्यवहारम् ५.५५.१. कल्याण सङ्ग्राम वा ५ ५७.२ शुभे=शोभनाय (वपुषे) १ ६४ ४ कल्याणाय ५ ६३ ५ [शुभम् उदकनाम निघ० १ १२ शुभ शोभार्थे (तुदा०) धातोर्घबर्थे क। शुभे प्रयोगे क्विप् कर्मणि]

शुभयद्भिः शुभमाचरद्भि (मरुद्भि=मनुष्यै) ५ ६०.८ [शुभमिति व्याख्यातम्। तत आचारेऽर्थे-क्यजन्ताच्छतृ]

शुभयन्त शुभ इवाऽऽचरन्ति ७ ५६ १६. **शुभयन्ते**=शुभमाचक्षते १ ८५ ३ [शुभप्राति० 'तत्करोति०' इति णिजन्ताल्लड्। अडभावश्छान्दस। अन्यत्र लट्]

शुभस्पती धर्मस्य पालकौ (अश्विनौ=अध्यापकोपदेशकौ) १ १२० ६ कल्याणकरव्यवहारस्य पालकौ (अश्विना=प्राप्तविद्यौ स्त्रीपुरुषौ) ५ ७५ ८ शुभस्य शिल्पकार्यप्रकाशस्य पालकौ (अश्विनौ=जलाग्नी), प्र०—शुभ शुम्भ दीप्तौ इत्येतस्य रूपमिदम् १ ३ १ [शुभ-पतिपदयो समास। सकारोपजनश्छान्दस]

शुभंयावा य शुभ जल याति स (मनुष्यगण) ५ ६१ १३ **शुभंयावानः**=ये शुभ कल्याण यान्ति प्राप्नुवन्ति ते (देवा=विद्वासो जना), प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति द्वितीयाया अलुक् २५ २०. शुभस्य प्रापका (देवा), प्र०—अत्र 'तत्पुरुषे कृति बहुलम्' इति बहुलवचनाद् द्वितीयाया अलुक् १ ८६ ७ [शुभमित्युपपदे या प्रापणे (अदा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप् वनिव् वा। द्वितीयाया अलुक्। शुभम् उदकम् निघ० १ १२]

शुभंये य शुभ याति प्राप्नोति तस्मै (राज्ञे) ४ ३ ६ [शुभमित्युपपदे या प्रापणे (अदा०) धातोर्ड। द्वितीया या अलुक्]

रक्षणाद्या प्रजा) १ ५२ ४ [शुष्ममिति व्याख्यातम् । तत स्त्रिया टाप्]

शुष्मिणम् वहुवलयुक्तम् (सेनापतिम्) ७ २३.५. **शुष्मिणः**=वहु शुष्म वल भवति यस्मात्तस्य (अन्तस्य) ११ ८३ **शुष्मिणे**=शुष्यति वलयति येन व्यवहारेण स वहुविद्यते यस्मिँस्तस्मै (प्रकाशमानाय यशसे) प्र०—अत्र भूम्न्यर्थे इनि १ ३७ ४ **शुष्मिन्**=प्रशसितवलयुक्त (इन्द्र=न्यायाधीश राजन्) ६ २५ १ अनन्तवलवन् पूर्णवलवन् वा (इन्द्र=जगदीश्वर सुवीरजन वा) ३ ४६ **शुष्मिभिः**=वलिष्ठै (वीरपुरुषै) १ १३३ ६ **शुष्मी**=महावलिष्ठ (इन्द्र =राजा) ४ २२ १ वहुवली विद्वज्जन) ७ ४० ३ शुष्म वलिष्ठ सैन्य विद्यते यस्य स (राजा) ५.४० ४ [शुष्ममिति व्याख्यातम् । तत प्रशसायामर्थे भूम्न्यर्थे वा इनि]

शुष्मिणा वलिष्ठौ (राजाऽमात्यौ) ४ ४७.३. [शुष्मिन् इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शुष्मिणी वहु शुष्म वल यस्यामस्ति सा (सुरा=सोमवल्ल्यादिलता) १६ ७ [शुष्मिन् इति व्याख्यातम् । तत स्त्रिया ङीप्]

शुष्मिन्तमम् प्रशसित वहुविध वा वल विद्यते यस्य तमतिशयितम् (राजाध्यक्षम्) ३ ३७ ८. अतिशयेन बलवन्तम् (रयिं=श्रियम्) २ ११ १३ **शुष्मिन्तमः**=अतिशयेन वलवान् (विद्वज्जन) १ १२७ ६. [शुष्मिन्-प्राति० अतिशायने तमप् । 'तरप्तमपौ घ' इति तमपो घसज्ञकत्वान् 'नाद् घस्य' अ० ८ २ १७ सूत्रेण नुट् । शुष्मिन्=शुष्मम् वलनाम निघ० २ ६ ततो मत्वर्थ इनि]

शूकरः सूकर २४ ४० **शूकराय**=क्षिप्रकारिणे (जीवाय) २२ ८ [शूपपदे डुकृञ् करणे (तना०) धातो कर्त्तर्यच् । शू क्षिप्रनाम निघ० २ १५]

शूकृतस्य शीघ्र निष्पादितस्य (विद्युदग्ने) १ १६२ १७ शीघ्र शिक्षितस्य (अश्वस्य), प्र०—श्वेति क्षिप्रनाम निघ० २ १५, २५ ४० **शूकृताय**=क्षिप्र कृताय (जीवाय) २२ ८ क्षिप्रकारिणे (सज्जनाय) २२ ८ [शू-कृतपदयो समास । शू क्षिप्रनाम निघ० २ १५]

शूघनासः आशु गन्त्र्य (नदीप्रवाहा) ४ ५८ ७ क्षिप्रगमना, भा०—तूर्णगामिन (वातप्रमय =तरङ्गा) १७ ६५ [शूघनास क्षिप्रनाम निघ २ १५]

सत्सि समवैषि ६ १६ १० निषीदसि ३ १४ २. आसन्नोऽसि २ ६.८ दोषान् हिनस्मि १ १२ ४ **सद**=सीद ७ ११ १ स्थिरो भव २.३६ ४ **सदत्**=सीदति १.१२८ १ प्राप्नुयात् ३ १३ १ **सदत**=आसीदत ७ ५७ २ उपविशत ७ ५६ ६ **सदतम्**=सीदतम् ५ ७२ १ तिष्ठतम् ४ १६ १० **सदताम्**=निषीदतम् ५ ७२ ३ आसीदेत ७ ४२ ५ गच्छत २६ ३१ **सदन्**=परिषीदन्ति ४ ३ ११ **सदन्तु**=तिष्ठन्तु ३ ४ ८ प्राप्नुवन्तु १ १८६ ८ आसीदन्तु ७ ४३ ३ प्रापयन्तु २६ ३३ अवस्थापयन्ति २ ५ **सदः**=सीद १३ ३७ स्थिरो भव ३३ ४ **सदाम**=प्राप्नुयाम ७ ४ ६ सीदेम ७ १ ११ **सदेम**=सीदेम ६ १ ६ प्राप्नुयाम ६ ७५ ८ [पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लेट्। 'बहुल छन्दसि' सूत्रेण शपो लुकि सीदादेशोऽपि न। अन्यत्र लोट्, लेट्, लङ्, लिङ् च। लोडादिषु सत्यपि शपि 'वा छन्दसी' ति सीदादेशो न भवति। लङ्यडभावश्छान्दस । सदन्तु आसीदन्तु नि० ८ १३]

सदतन सीदत २६ २४ [पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लोट्। सीदादेशश्छान्दसत्वान्न भवति। तस्य तनवादेशश्छान्दस]

सदनम् उत्पत्ति-स्थिति-भङ्गस्य निमित्तकारणम् (ब्रह्म) १ ६६ ७ सीदन्ति यत्र तत् (गृह, मोक्षाख्य स्थानम्) ३.३१ ६ अधिकरणम् (ब्रह्म) १ ११७ १० स्थानम् १ १२६.११ अवस्थितिम् १.१०४ ५ गर्भस्थानम् १२ ३६ रहने का घर स० वि० १६६, अथर्व० ६ २ ३ २७. सीदन्ति गच्छन्ति यत्र तत् (स्थानम्) १७ ८७ **सदनानि**=स्थानान्युदकानि वा १ ५५ ६ भुवनानि १ १८१ ५ सीदन्ति यस्मिँस्तस्मिन् (स्थाने) ७ ३६ ३ **सदनाय**=स्थितिमते (दिवे=कामयमानाय विदुषे) ५ ४७ ७ **सदने**=उत्तमे स्थले ७ २४ १ मण्डले ३ ३४ ७ सीदन्ति यस्मिन्नाकाशे तस्मिन् १ १४८ ३ सभास्थाने ५.४३.१२ सदसि सभायाम् १ १२२ ६ सर्वस्थित्यर्थे जगति ४ ४२ ४ गृहे १४ २ प्राप्तव्ये (सरिरे=वाचि) १३ ५३ अध्ययनस्थाने, भा०—न्यायासने १२ १६ दिवि १३ ५३ स्थातव्ये (प्राणे) गन्तव्ये (समुद्रे=मनसि) १३ ५३ सीदन्ति ययोस्ते (द्यावापृथिवी=भूमिविद्युतौ) ७ ५३ २ [पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोरधिकरणे ल्युट्। सदनम् उदकनाम निघ० १ १२ सदनात् सहस्थानात् नि० ७ २४]

सदना सीदन्ति गच्छन्ति पुरुषार्थेन येषु तानि गृहाणि ८ १८ [सदनमिति व्याख्यातम्। ततश्शेर्लोपश्छन्दसि]

सदनी दुःखविनाशनेन सुखप्रदा (विद्या) १ १८६ ११ [पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्भावे ल्युडन्तात् स्त्रिया डीप्]

सदन्तः निवासयन्त (राजादयो मनुष्या) ४ २१ ६ [पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो शतृ। सीदादेशो न भवति छान्दसत्वात्]

सदन्यम् सदन गृहमर्हति (पितृश्रवण व्यवहारम्) १ ६१ २०. [सदनप्राप्ति० अर्हत्यर्थे यत्। सदनमिति व्याख्यातम्]

सदम् सीदन्ति सुखानि यस्मिँस्त शिल्पव्यवहार, देहादिक वा १ २७ ३ विज्ञान गृह वा १ ८६ १ सीदन्ति विद्वासो यस्मिँस्तत् सत्य वच ६ ६७ ८ प्राप्त वस्तु ४.३ १२ प्राप्तव्यम् (वस्तु) ६ ५० ६ स्थानम् २ ३४.४ ज्ञानस्वरूपम् (रुद्रम्=ईश्वरम्) प० वि०। स्थिर वर्त्तमान ज्ञानमात्रम् १ ११४ ८ शत्रुहिंसकसैन्यम् १ १२२ १० सद्यते विज्ञायते प्राप्यते यस्तम् (हव्य पदार्थम्) ५ ४ सीदन्ति यस्मिन् याने तत् १ ११६ ६ प्राप्त दुःखम् ५ ७७.४ यो न्याये सीदति तम् (सेनापतिम्) १६ १६ अवस्थितम् (वह्निम्) ३ २ १५ सीदन्ति प्राप्नुवन्ति यस्या ताम् (सभाम्) २५ १४ य सीदति तम् (अग्नि=पावक इवेश्वरम्) ७ ११.२ गृहमिव स्थितिपदम् (अग्नि=विद्वज्जनम्)

सधवीर समानस्थाने वर्त्तमान वीरपुरुष (इन्द्र=राजन्) ६ २६ ७ [सह-वीरपदयो समास । हस्य धकारश्छान्दस]

सधस्तुति सह प्रशसितम् (विज्ञानम्) ५.१८.५ [सह-स्तुतिपदयो समास । हस्य धकारश्छान्दस]

सधस्तुतिम् स्तुत्या सह वर्त्तते ताम् (शिल्पक्रियाम्), प्र०—अत्र वर्णव्यत्ययेन हकारस्य धकार १ १७ ९ सह-कीर्त्तिम् ४ ४४ ६ [सह-स्तुतिपदयो. समास । हस्य धश्छान्दस]

सधस्थ समानस्थान (सभ्यजन) १८ ५९ **सधस्थम्**=सहस्थानम् (अ०—गर्भाशयम्) ११ ४८ यत्सह तिष्ठति तत्कारणम् ५.१८ तत्त्वावयवं सहस्थानम् १ १५४ ३ **सधस्थात्**=सहस्थानात्तलात् ११.९. **सधस्थे**=सह तिष्ठति यत्र (दुरोणे=गृहे) ३३ ७२. समान शय्या मे स० प्र० १० ४० २ समानस्थाने मेघमण्डले ६ ५२.१५ अन्तरिक्षे १३ ५३ लोके शरीरे च ऋ० भू० ३०५, १५ ५४ [सहोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क । हकारस्य धकारश्छान्दस । सधस्थे सहस्थाने नि० ३ १५ (यजु० १८ ५९) स्वर्गो वै लोक सधस्थ श० ९ ५ १ ४६ 'सधमादस्थयोश्छन्दसि' अ० ६.३ ९६ सूत्रेण सहस्य सधादेश]

सधस्था सहस्थानानि (जलस्थलान्तरिक्षाणि) ३.५६ ५. समानस्थानानि ३ २० २ [सधस्थ इति व्याख्यातम् । ततश्शेर्लोपश्छन्दसि]

सधस्थानि समानस्थानानि (तविषाणि=बलानि) ३ १२.८ [सधस्थ इति व्याख्यातम् । तत प्रथमावहुवचन नपुसके]

सधिषि समानान् शब्दान् शृणोति येन तस्मिन् श्रोत्रे १३ ५३ [समान-धिष्पदयो समासे समानस्य सादेश । धिष्=धिप शब्दे (जु०) धातो क्विप् करणकारके]

सधिः पोढा (अग्नि =विद्वान् जीव) प्र०—अत्र वर्णव्यत्ययेन हस्य ध, इश्च प्रत्यय १२ ३६ [पह मर्षणे (भ्वा०) धातोर्वाहु० औणा० इ । हस्य धो वर्णव्यत्ययेन]

सधुराः धुरन्धर हुए (हे गृहस्थादिमनुष्यो !) स० वि० १४२, अथर्व० ३ ३० ५ [सह-धुर्पदयो समासे समासान्तोऽकार]

सध्रीः समानस्थाना (आप =जलानि) २ १३ २. **सध्रेः**=सहस्थानस्य (क्षत्रस्य=राष्ट्रस्य) ५ ४४ १०. ['सहस्य सध्रि ' अ० ६ ३ ९५ सूत्रेण 'वा छन्दसि' सहायेनाऽप्रत्ययेऽपि सहशब्दस्य सध्रिरित्यादेशः]

सध्रीचीना सहाऽञ्चन्ती (रात्रि) ३ ५५ १५ [सहोपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृक्०' इति क्विन् । 'अनिदिताम्०' इति नलोपे 'सहस्य सध्रि ' अ० ६ ३ ९५ सूत्रेण सहस्य सध्रिरादेशे 'विभाषाञ्चेरदिक् स्त्रियाम्' अ० ५ ४ ८ सूत्रेण स्वार्थेऽञ्च्यन्तात् ख । खस्य ईन इत्यादेश । तत 'अच ' इत्यकारलोपे 'चौ' इति पूर्वस्य दीर्घे सध्रीचीन इति रूपम् । तत स्त्रिया टाप्]

सध्रीचीना सहाऽञ्चत सङ्गतौ भवत (इन्द्राग्नी=वायुसवितारौ) १.१०८ ३ [सध्रीचीनेति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छान्दस]

सध्रीचीनान् समान लाभाऽलाभ से एक दूसरे के सहायक (गृहस्थ मनुष्यो) को स० वि० १४२, अथर्व० ३ ३० ५ सह वर्त्तमान (गृहस्थ मनुष्यो) को स० वि० १४३, अथर्व० ३ ३० ७ **सध्रीचीनाः**=सहवर्त्तमाना (गुणा) १.१०५ १० सहाऽञ्चन्त (विद्वासो जना) १ १३४ २ **सध्रीचीनेन**=सहाऽञ्चति गच्छति तत्सध्रचड्, सध्रयड् एव सध्रीचीन तेन (मनसा=मनोवद्वेगेन), प्र०—'सहस्य सध्रि ' अ० ६ ३.९५ अनेन सध्र्यादेश 'चौ' अ० ६ ३.१३८ इति दीर्घत्वम् १ ३३.११. सज्ञापकेनाऽनुष्ठापकेन वा (मनसा=अन्त करणेन) ४ २४ ६ [सध्रीचीनेति व्याख्यातम् । तत शसि रूपम्]

सध्रीचीः सहवर्त्तमाना (दिश) ३७ १७ सहैवाऽञ्चन्ती (व्याप्तविद्या जना) ३ ३१ १६ सह गच्छन्ती (विविधा गती) १ १६४ ३१ या सहाऽञ्चन्ति ता (ऊतय =रक्षाद्या क्रिया) ६ ३६ ३ [सहोपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विक्०' इति क्विन् । अनिदिताम्०' इति नलोपे 'सहस्य सध्रि ' इति सध्रिरादेश । तत स्त्रियाम् 'अञ्चतेश्चोपसख्यानम्' इति ङीप् । तत 'अच ' इत्यकारलोपे 'चौ' इति पूर्वस्य दीर्घत्वे सध्रीचीति रूपम् । ततो जस स्थाने पूर्वसवर्णदीर्घ 'सुपा सुलुक्०' इति सूत्रेण]

सध्र्यक् य सध्रि समान स्थान प्राप्नोति स (विद्वज्जन) २ १७ ३ य सहाऽञ्चति स (यजमान) ४ ४७ २ सह सेवमानम् (राध =धनम्) १ ५१ ७ यत्सहाऽञ्चति (पाथ =अन्नमुदक वा) ३ ३१ ६ **सध्रचञ्चः**=सहाऽञ्चन्त (मरुत =मनुष्या) ५ ६० ३ ये सहाऽञ्चन्ति ते (राजभृत्या) ४ ४ १२ [सहोपपदे अञ्चु गतिपूजनयो. (भ्वा०) धातो कर्त्तरि क्विप् । 'सहस्य सध्रि'

[समानोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो. 'त्यदादिषु दृशोऽनालोचने कञ् च' इति कञ्। 'दृग्दृशवतुषु' इति समानस्य सादेश । तत स्त्रिया 'टिड्ढाणञ्०' सूत्रेण ङीप्]

सद्म सीदन्ति यस्मिन् गृहे तत् १ ३८ १० स्थानम् ७ १८ २२ गृहवद्वर्त्तमान शरीर वा १ ७३ १ **सद्मनोः**=सर्वेषा निवासस्थानयो (विद्युदाकाशरूपयो प्रकृत्यो) ३ ५५.२. **सद्मनी**=सर्वेषा निवासाधिकरणे (द्यावापृथिवी) १ १८५.६ **सद्मानि**=प्राप्तव्यानि (वस्तूनि) १ १३९.१० साकाराणि स्थानानि १२ १३ [पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोरधिकरणे मनिन्। सद्म उदकनाम निघ० १ १२ गृहनाम निघ० ३ ४ सग्रामनाम निघ० २ १७]

सद्म सद्मानि स्थानानि १ १७३ ३ उत्तमानि कर्माणि स्थानानि वा ४.१ ८ [सद्मन् इति व्याख्यातम्। तत 'सुपा सुलुक्०' सूत्रेण जसो लुक्]

सद्मन् सीदन्ति यर्मिंन्तस्मिन् गृहे ७ १८ ११ [सद्मन्-प्राति० 'सुपा सुलुक्०' सूत्रेण ङेर्लुक्। सद्मनी द्यावापृथिव्योर्नाम निघ० ३ ३०.]

सद्मबर्हिषः सद्म स्थान बर्हिरुत्तम यासा ता (भा० सरित इव प्रजा) १ ५२ ३ [सद्मन्-बर्हिष्पदयो. समास.। बर्हिष्=अन्तरिक्षनाम निघ० १ ३ उदकनाम निघ० १ १२ पदनाम निघ० ५ २]

सद्मखसम् सीदन्ति यस्मिँस्तत् सद्म जगत्, तन्मख प्राप्त यस्मिन्निति तम् (सदसस्पतिं=परमेश्वरम्) १ १८ ९. [सद्मन्-मखस्पदयो समास । मख. यज्ञनाम निघ० ३ १७ मखस्=मख गत्यर्थे (भ्वा०) धातोरसुन् औणादिक]

सद्मानम् सीदन्ति यस्मिँस्तम् (गोशालम्) १ १७३ १ यस्मिन् सीदति तम् (गृहम्) ६ ५१ १२ [सद्मन् इति व्याख्यातम्। ततो द्वितीयैकवचनम्]

सद्मेव गृहमिव सङ्ग्राममिव १.६७ ५ [सद्म-इव-पदयो समास]

सद्य पूर्ण करके स० वि० ८०, अथर्व० ११.५ ६

सद्य-ऊतयः क्षिप्राणि रक्षणादीनि येषान्ते (मरुत=मनुष्या) ५ ५४ १५ [सद्यस्-ऊतिपदयो समास । सद्यस् इति व्याख्यास्यते। ऊति =अव रक्षणगत्यादिषु (भ्वा०) धातो स्त्रिया क्तिन्]

सद्यः क्षिप्रम् ४ ७ १० शीघ्रमेव, प्र०—'सद्य परुत्परारि०' अ० ५ ३ २२, 'समानेऽहनि इति सद्य ' इति भाष्यवचनात् समानेऽहन्येतस्मिन्नर्थे सद्य इति शब्दो निपातित १ ८ ९ तूर्णम् १ १२२ १४ [अहन्यभिधेये समानस्य सभावो द्यश्च प्रत्ययो निपात्यते 'सद्यः परुत्०' अ० ५ ३ २२ सूत्रेण]

सद्यो अर्थम् शीघ्रगामिपृथिव्यादिद्रव्यम् १ ६० १ [सद्यस्-अर्थपदयो समास]

सद्योवृधम् य सद्यो वर्धयति तम् (परमात्मानम्) ३ ३१ १३ [सद्यस् इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

सधनित्वम् धनिना भावेन सह वर्त्तमान राज्यम् ४ १ ९ [सह-धनित्वपदयो समास । 'वोपसर्जनस्ये' ति सभाव । धनित्वम्=धनिन्प्राति० भावे त्व]

सधन्यः समान धन विद्यते येषान्ते (राजभृत्या') प्र०—अत्र मत्वर्थीय ईप् ४ ४ १४. [समान-धन्यपदयो समासे समानस्य सादेश । धन्य =धनप्राति० यत्]

सधन्यः धन्यै सह वर्त्तमान (सज्जन) ६.५१.३ [सह-धन्यपदयो समास । सह स्थाने सादेश । धन्य = धनप्राति० अर्हत्यर्थे यत्]

सधमात् समानस्थानात् २० ४७ [सहोपपदे मदी हर्षे (दिवा०) धातोश्छान्दसो ण्वि । हस्य धकार']

सधमात् समानस्थानाद् य सह माद्यति ४ २१ १ **सधमादम्**=सहाऽऽनन्दम् ४ २३ २ यत्र सह माद्यन्ति आनन्दन्ति तम् (सुखम्) ७ ३२ १ सह मादयितारम् (ईश्वरम्) १ १८७ १ **सधमादः**=समानस्थाना (प्रजाजना) ७ ४३ ५ या सह माद्यन्ति हृष्यन्ति ता (विदुष्य स्त्रिय) १० ७ महाऽऽनन्दिताः (सद्गुणकर्मस्वभावा मनुष्या) १ १२१ १५ समानस्थानानि ६ ६९.४ सहस्थाना (जना) ५ २०.४ **सधमादेषु**=मुखेन सह वर्त्तमानेषु स्थानेषु १ ५१ ८ महस्थानेषु १९ ४४ उत्कृष्ट स्थानो मे आर्याभि० १ १४, [सहोपपदे मदी हर्षे (दिवा०) धातोश्छान्दसो ण्वि । हकारस्य धकारादेश । सहमादेषु प्रयोगे सहोपपदे मदी हर्षे (दिवा०) धातो 'कर्मण्यण्' इत्यण्। 'सधमादस्थयोश्छन्दसि' सूत्रेण महस्य सधादेश । सधमादम् महमदनम्। नि० ७ ३१ (यजु० १० ७.) अनतिमानिन्य इत्येवैतदाह सधमाद इति श० ५ ३ ५ १९]

सधमाद्यानि सहस्थानेषु साधूनि (सत्या=कर्माणि भावा वा) ४.३ ४ [सधमादिति व्याख्यातम् । तत साध्वर्थे यत्]

सधमाः समानस्थाने मन्यमान (इन्द्र =राजा) ७ १८ ७ [सहोपपदे मन ज्ञाने (दिवा०) धातो क्विप्। नस्याकारादेशश्छान्दस]

(दिवा०) धातो क्विप् । 'बहुल छन्दसि' अ० ७.१ १०३. सूत्रेण ऋकारस्योत्व रपरत्व च । ततो द्विवचनस्याकारादेश]

सनाजुवः सनातनी जूर्वेगो यासा ता (ओषधी.) १.१४१ ५ [सना-जूपदयो समास । सनेति व्याख्यातम् । जू =जु गतौ (सौत्रो धातु) तत 'भ्राजभास०' इति क्विप्]

सनात् सम्भजनात् १ ५१ ६ **सनानि**=सविभाग-युक्तानि वस्तूनि १ ६५ १० कर्मभि सभक्तानि (ऐश्वर्य-धनानि) ३ १ २० [षण सभक्तौ (भ्वा०) धातोर्घञर्थे क । तत पञ्चम्येकवचने रूपम्]

सनात् सर्वदा १ ५५ २ सनातनात् कारणात् १ ६२ ८ सनातन (इन्द्र =जीवात्मा) ७ ३२ २४ नित्यम् ३४.५४ निरन्तरम् २ १६ १ [सनादित्यव्यय स्वरादिपु पाठात् । सनात् चिरम् नि० १२ ३६]

सनाभिः समाना नाभिर्बन्धन यस्य स. (काल) १ १६४ १३. [समाना-नाभिपदयो समासे पूर्वपदस्य ह्रस्वादेशे 'ज्योतिर्जनपदरात्रिनाभि०' अ० ६ ३ ८५ सूत्रेण समानस्य सादेशे रूपम् । सनाभय अगुलिनाम निघ० २ ५ नाभि सन्नहनात् नाभ्या सनद्धा गर्भा जायन्त इत्याहुरेत-स्मादेव ज्ञातीन्त्सनाभय इत्याचक्षते सबन्धव इति च नि० ४ २१]

सनायते सना सनातन इवाचरति १ ६२ १३ [सनेति व्याख्यातम् । तत आचारेऽर्थे क्यङन्ताल्लट्]

सनायुवः सनातनस्य कर्मण. कर्त्तार इवाचरन्त (मतय =विद्वज्जना) १.६२ ११ [सनेति व्याख्यातम् । तत आचारेऽर्थे क्यङ् । तत 'क्याच्छन्दसि' सूत्रेण उ । 'जसादिषु छन्दसि 'वा वचनम्' इति गुणस्य विकल्पेन तदभाव उवङ्]

सनाः भोक्त्र्य (युवतय स्त्रिय) ३ १ ६ [षण सभक्तौ (भ्वा०) धातो पचाद्यच् । ततष्टाप् स्त्रियाम्]

सनिता विभाजक (न्यायाधीशो राजा) २.२३ १३ सविभाजक (इन्द्र =सेनेश) १ १२९ २ सविभक्ता (सेनेश) १ १७५ ३ विभक्ता (जन) ५ ५० ४ ज्ञानस्य सुखस्य विभक्ता (सेनाध्यक्ष) १ २७ ९ **सनितुः**=रक्षणानि यमस्य, भा०—शफाना रक्षणायायसो निर्मितस्य (क्षुरस्य) २९ १६. [षण सभक्तौ (भ्वा०) धातो कर्त्तरि तृच् । सनितु हस्तग्राहस्य नि० ३ ६]

सनिता सभक्तानि (धनानि), प्र०—अत्र वन सन सभक्तौ इति धातोर्बहुलकात्तन् प्रत्यय १ १०० ९ [सनितप्राति० शेर्लोपश्छन्दसि]

सनितौ भोगसविभाग लाभे, प्र०—अत्र 'नितुत्रतथ०' अ० ७.२ ९. इत्यस्य 'अग्रहादीनामिति वक्तव्यम्' इति वार्त्तिकेनेडागम· १ ८ ६ [षण सम्भक्तौ (भ्वा०) धातो-र्बहु० तन्]

सनिपन्त विभजन्ते ५ १२ ४. **सनिपामहे**—सभज्य प्राप्नुयाम ३ ११ ९ [षण सम्भक्तौ (भ्वा०) धातोर्लेटि सिपि च रूपम् । व्यत्ययेनात्मनेपदम्]

सनिष्णत सभजेयु, सभजन्तु वा १ १३१.५. [षण सभक्तौ (भ्वा०) धातोर्लोट् । 'व्यत्ययो बहुलम्' इति द्विविकरणता सिप् श्ना च]

सनिष्यति सभजेत् ५ ३१ ११ **सनिष्यसि**=सभजि-ष्यसि ४ २० ३. [षण सम्भक्तौ (भ्वा०) धातोर्लृट्]

सनिष्यन् सभक्ष्यमाण (यजमान सज्जन) ३ २ ३. **सनिष्यन्तः**=सविभाग करिष्यन्त (सज्जना) ३ २ ४. सेवन करिष्यमाणा (सज्जना) ३ १३ २ [षण सम्भक्तौ (भ्वा०) धातो. 'लृट सद्वा' सूत्रेण लृट स्थाने शतृ]

सनिष्यन्तीनाम् सभजन्तीनाम् (ओषधीना=सोमयवा-दीनाम्) १२.८२ [षण सभक्तौ (भ्वा०) धातोर्लृट शत्रन्तात् स्त्रिया ङीप्]

सनिष्यवः विभाग करिष्यमाणा (नद्य =सरित) ४.५५ ६. सम्भजमाना (जना) १ १३१ २ सविभाग-मिच्छवः (गूर्त्तय =उद्यमयुक्ता कन्या.) १ ५६ २ आत्मन सनिं सविभागमिच्छव (राजपुरुषा), प्र०—सनिशब्दात् क्यचि लालसाया सुक्, नत उ ९ १७ [सनि =षण सभक्तौ (भ्वा०) धातोरीणा० इ । सनिपदाद् आत्मन इच्छायामर्थे क्यजन्तात् 'क्याच्छन्दसि' इत्यु । क्यचि 'सुग्वक्तव्य' अ० ७ १ ५१ वा०सूत्रेण सुगागम]

सनीडाः समाना नीडा बन्धनाधारा गृहविशेषा अग्न्यागारविशेषा वा येषु ते (बन्धुरा =बन्धनविशेषा) १ ३४ ९ समीपस्था (विद्वासो जना) १ १६५ १ समान नीड प्रशसनीय गृह येषान्ते (नर =श्रेष्ठा मनुष्या) ७ ५६ १ समानस्थाना (विश =प्रजाजना) १ ६९ ३ एकेश्वराधि-करणसमानस्थाना (जनय =प्रजा) १ ७१ १ समीपे वर्त्तमाना (अमृता.=विद्वज्जना) १ ६२ १० **सनीडे**= समीपे १ ६२ ७ **सनीडेभिः**=समीपवर्त्तिभि (रुद्रेभि.= वीरजनै) १ १०० ५ [समाननीडपदयो समासे 'समानस्य छन्दसि०' अ० ६.३ ८४ सूत्रेण समानस्य सादेश । नीड = नितराम् इलन्ति स्वपन्ति यत्रेति विग्रहे नि+इल स्वप्न-

रिति सहस्य सधिरित्यादेश]

सध्र्यञ्चा सह प्रशसनीयौ (इन्द्राग्नी=वायुसवितारौ) १ १०८ ३ [सध्र्यक् इति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छान्दस । 'उगिदचा सर्वनामस्थाने०' इति नुम्]

सन् वर्त्तमान (विद्वज्जन) १ ७६.५ भवन् (परमेश्वर सभाध्यक्षो वा) १ १०० ४ [अस् भुवि (अदा०) धातो शतृ]

सनकात् सनातनात्कारणात् ३ २९ १४ **सनकाः**= सनन्ति सेवन्ते परपदार्थान् ये ते (दस्यवो जना), प्र०—अत्र 'क्वुन् शिल्पिसज्ञयोरपूर्वस्यापि' उ० २ ३२, १ ३३ ४ [पण सम्भक्तौ (भ्वा०) धातो 'क्वुन् शिल्पिसज्ञयोरपूर्वस्यापि' उ० २ ३२ इति क्वुन् । सनात्=चिरम् नि० १२ ३६]

सनजा या सनेति सनातनाज्जायते सा (द्विता) १ ६२ ७ सनेन विभागेन जाता (धी =प्रज्ञा) ३ ३९.२ [सनोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड । तत स्त्रिया टाप् । सनेत्यव्यय सदार्थे । अथवा पण सम्भक्तौ (भ्वा०) धातोर्घञर्थे क]

सनत् सनातनम् (अश्वादिपशुम्) ५ ६१ ५ सदा, यथावन्निरन्तर वा १ १०० १८ [सनदिति स्वरादिपाठादव्ययत्वम्]

सनत् सेवेत १ १०० १८. सम्भजेत्, प्र०—लेट्-प्रयोगोऽयम् १ १०० ६ [पण सम्भक्तौ (भ्वा०) धातोर्लेट्]

सनता सनतनानि सनातनानि (रत्ना=रमणीयानि धनानि) ३ ३ १ नतेन सह वर्त्तमानानि (अपासि=कर्माणि) २ ३ ६ [सन् इत्यव्यय स्वरादिषु पाठात् । सन् इत्युपपदे अत सातत्यगमने (भ्वा०) धातोर्घञर्थे क । सनतप्राति० शेर्लोपश्छान्दस । अथवा सह-नतपदयो समासे 'वोपसर्जनस्ये' ति सहस्य सादेश । ततश्शेर्लोपश्छन्दसि]

सनन्तः सेवमाना (मनुष्या) ७.५२.१ [पण सम्भक्तौ (भ्वा०) धातो शतृ]

सनयः सनातना (पृथिव्यादिपदार्था) ३ २० ४ उत्तमा सेवा १ १००.१३ विभक्तय (उपस) ४ ५१ ४ सम्भक्तय (वाजा =व्यवहारा) ३ ३० २१ **सनये**= सविभागाय ४ २० ३ विभागाय ६ २६ ८ राज्यसेवनाय १ ११६ २१. सुखाना सम्भोगाय १ ३० १६ सुखसेवनाय १.११६.१२ **सनिम्**=सेवनीया सत्यासत्ययोर्विभाजिका वाणीम् ५ २७ ४ पापपुण्याना विभागेन फलप्रदातारम् (परमेश्वरम्) १ १८ ६ सत्यासत्यविभाजिका धियम् ६ ६१ ६ सनन्ति सम्भजन्ति सुखानि यस्मिन् व्यवहारे तम् प्र०—अत्र सनधातो 'खनिकष्यजसिवसिवनिसनि०' उ० ४ १४५ इति अधिकरणे इ प्रत्यय १ २७ ४ सम्भजमानाम् (इडा=वाचम्) ३ ७ ११ विभक्ताम् (इडाम्) ३ १ २३ सनन्ति सविभजन्ति सत्यासत्ये यया ताम् (मेधा=प्रज्ञाम्) ३२ १३ विद्यादिशुभगुणदानम् ३ २३.५ याचमानम् (लक्ष्यम्) ३ २२ ५ सम्यग् भजनीय और सेव्य (ईश्वर) को आर्याभि० २ ५२, ३२ ३ सविभागम् ६ ७० ६ सविभाजकम् (सर्वविद्यामन्थनसारम्) ३.५ ११. [षण् सम्भक्तौ (भ्वा०) धातो 'खनिकष्य' उ० सूत्रेण इ । सनये सवनाय नि० ६ २२ सनय पुराणम् नि० ४ १९]

सनरस्य सभज्यमानस्य (पदार्थस्य व्यवहारस्य वा), प्र०—अत्र सनधातोर्बाहुलकादौणादिकोऽरन्-प्रत्यय १ ९६ ८ [पण सम्भक्तौ (भ्वा०) धातोर्बाहु० औणा० अरन्]

सनवथ ओषधिदानेन सेवध्वम्, प्र०—अत्र विकरणद्वयम् १२ ७९ [पण सम्भक्तौ (भ्वा०) धातोर्लेट्। 'व्यत्ययो बहुलम्' इति द्विविकरणता । तेन उ-शप्-विकरणौ]

सनवित्तः य सनातनेन वेगेन वित्तो लब्ध (अध्वा=मार्ग) ७.४२ २ [सन-वित्तपदयो समास । सनेत्यव्यय सदार्थे । वित्त =विद्लृ लाभे (तुदा०) धातो. क्त]

सनश्रुत सत्यासत्यविवेकिना सकाशाच्छ्रुत येन यद्वा सन सत्यासत्यविभाजक वचन श्रुत तत्सम्बुद्धौ (इन्द्र=विद्येश्वर्ययुक्त राजन्) ३ ५२ ४ **सनश्रुतम्**=य सनातनानि शास्त्राणि शृणोति तम् (सन्तानम्) ३ ११ ४ [सन-श्रुतपदयो समास । सन =पण सभक्तौ (भ्वा०) धातोर्घञर्थे क । अथवा सनेत्यव्ययम् सदार्थे । सनोपपदे श्रु श्रवणे (भ्वा०) धातो कर्त्तरि क्विप् । ह्रस्वस्य तुगागमे द्वितीयैकवचने सनश्रुतमिति रूपम्]

सना सनानि प्रसिद्धानि शौर्याणि १ १७४ ८ सनातनानि (पौस्यानि=बलानि) १ १३९ ८ सदा ५ ७५ २ सनातनम् (महदनादिभूत ब्रह्म) ३ ५४ ९. [सदा इति व्याख्यातम् । दस्य नकारो वर्णव्यत्ययेन]

सना ससेविनौ (पितरा=पितरौ) ४ ३३ ३. [पण सभक्तौ (भ्वा०) धातो पचाद्यच् । ततो द्विवचनस्याकार]

सनाजुरा सदा जरावस्थास्थौ (पितरा=पितरौ) ४ ३६ ३ [सना इति व्याख्यातम् । तदुपपदे जॄष् वयोहानौ

(सन्नि—सन्नौ) २६५. [सम् + षद्ऌ विशरणगत्यवसादनेषु (भ्वा०) धातोर्भावे कर्मणि क्तिन्]

सन्तारणः य सम्यक् तारयति तारयन्ति वा (तॄ—णिच्) २५१३ [सम् + तॄ प्लवनसन्तरणयोः (भ्वा०) धातोर्णिजन्तात् 'कृत्यल्युटो बहुलम्' इति ल्युट्]

सन्ति सर्वत्र २२८१ भवन्तु, प्र०—पर० जुहोत्यादि० लट् वा १८६ भवन्ति १११ **सन्तु**—तोऽहं १२१,५ तोये म० प० १६०, सर्वत्र १६.४०.२ [अस् भुवि (अदा०) धातोर्लट्। प्रथम० ब०]

सन्तिष्ठन्त मुख्ये सायणेन लिखिते ४३, मुद्रिते तु २१६. [सम् + स्था गतिनिवृत्तौ (भ्वा०) धातोर्लट्। 'समवपाभ्यः स्थः' इति आत्मनेपदम्]

सन्त्य सन्ति सम्यक्त्वेन ये ते सन्तस्तेषु साधु (वर्गो विद्वज्जन) १४५६ सन्तो सज्जनेषु साधु (मित्र—मैत्रावरुणि) ५११२ सन्तो सत्ये [विद्यमानेषु भव न सन्तोऽसन्तः, प्र०—पर० साधु [सत्+त्य] दीर्घश्च] १११२ सन्ति सम्यक्त्वेन विद्यमानेषु साधु (वर्गो विद्वज्जन) ३२१३ सन्तीति सम्यक्त्वेन सन्तीति सर्वान् त्रियामिन्यासु साधु (विद्वज्जने) १४५५ सन्तो सत्ये [सत्+त्य] सन्तस्सम्बुद्धौ (ऊँ) १३६२ [सन्तिशब्दात् भवार्थे यत् वा यत्। सन्ति सम्यक्त्वेन विद्यन्ते (भ्वा०) धातोः क्विप् (सत्य०) धातोर्वा] ऋ० भा० सौत्रा० टि.]

सन्दक्ष सम्यक्त्वया देहि १२१३ सन्दक्षं प्रकाशं देहि म० वि० १३८, सर्वत्र १४२२१ [सम् + दक्षू वृद्धौ (भ्वा०) धातोर्भावे घञ्]

सन्ददम्वान् सम्यक् ददाति (सन्दित्वा विद्वज्जन) २२६ [सम् + दामृ दाने (भ्वा०) धातोर्लिट् क्वसु। धातोर्हलन्तत्वम्]

सन्ददी सान्त्वा सम्यक् ददन्ती (अनित्यम्) २.३६७ [सम् + दृदाङ् दाने (जु०) धातो 'आदृगम०' सू० ३.२ १७१ सूत्रेण कि। सिद्धदृशायाञ्च द्वित्वम्]

सन्ददीरन् सम्यक् प्रयच्छेयुः ७४८.४ [सम् + दृदाङ् दाने (जु०) धातोर्लिङ्]

सन्ददृश्रे सम्यक् दृश्यते ३८.१०. [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लिट् कर्मणि। 'भावकर्मणोरि' त्यात्मनेपदम्]

सन्ददे सम्यक्त्वया ददामि ४४४५ [सम्+दद दाने (भ्वा०) धातोर्लिट्। उत्तमपु०ए०व० आत्मनेपदम्]

सन्दधानिरे सम्यक् धरन्ति ७.२.१ **सन्दधन्ते** सम्यक्त्वेन योजयति १११ [सम् + धा + धारण-पोषणयोः (जु०) धातोर्लट् + अन्यपुरुषस्य ब० ३.१३ - सम्यक् [सम्] सायणेन्द्रस्य विशेषणमेतत्]

सन्दधातु सम्यक्त्वेन सन्दधातु ३१३ **सन्दधुः** सम्यक् १२१.१, सम्यक्त्वेन वर्धयन्ति ३३-३ सन्दधु ३ ४१ सम्यक् दधति १०१५ [सम् + धा-पुरुष० सायणभाष्यस्य (पु०) धातोर्लट्। सायणभाष्यम्]

सन्दधाम्य सम्यक् धारयामि ७.१.१

सन्दधानि सम्यक्त्वेन सम्बोधयामि १११३१. [सम् + धा-सम्बोधने (जु०) धातोर्लट्]

सन्दधार सम्यक् धरति ३५१२ [सम् + धृञ् धारणे (भ्वा०) धातोर्लिट्। 'धृञो ह्रस्वत्वम्' इति]

सन्दानम् सिन्धुनदीं ३५.८ सर्वतोऽपि खण्डं सन्दानम् (सिन्धुनदी भू) १.१५३.१५ सन्दानं सीरं सन्दानम् (सिन्धु स्यन्दनशीलं) १.१५३.१ सन्दानिनीं ३५.३ सिन्धुं [सम् + दो अवखण्डने (दिवा०) धातोर्भावे ल्युट्। सन्दानं स्यन्दनशीलं सन्तानं]

सन्दायि सम्यक्त्वेन दत्तं १.१३१.१ [सम् + दृदाङ् दाने (जु०) धातोर्भावे कर्मणि क्त-आकारान्तः]

सन्दितम् सम्यक् सम्यक्त्वेन दत्तम् [सम्—सम्-पूर्वात् दाधातोः क्तम्] १.३५.३

सन्दिताय य सम्यक् पोषणं सन्दधाति सन्दधे (जुहोत्या०) ३२.१ [सम् + धा सम्यक्त्वे (जुहोत्या०) धातोर्लट्। 'अभ्यस्ता०' इति सम्प्रसारणम्]

सन्दिदीहि सम्यक् देहि ५४२ [सम् + दिप् दाने (दिवा०) धातोर्लोट्। द्वित्वम् + अकारलोपश्छान्दसः। आत्मनेपदं च। आत्मनेपदार्थमेवात्र सम्यगिति]

सन्दिद्युतत् सम्यक्त्वेन विद्योतते, भा०—सर्वान् प्रकाशयति २८.२ [सम् + द्युत दीप्तौ (भ्वा०) धातोर्लिङ्-न्तात्। 'अतिशये यो मन्त्रभागस्' इत्यनुसारेण मन्त्रभागत्वम्]

सन्दिहः सन्दिह्यन्ते सन्दिग्धा (इन्द्र—सभायेना-शासनाधीना) १.५१.९. [सम् + दिह उपचये (भ्वा०) धातोरिगुपधत्वात् कः]

सन्दीदिहि सम्यक् द्योतय २.१ [सम् + दीङ् दीप्तिदेवनयो (भ्वा०) धातोर्लोट्। अकारोऽत्र परस्मैपदम्।

क्षेपणयो (तुदा०) धातोर्घञर्थे क । लस्य डकारो वर्ण-व्यत्ययेन]

सनुतरः सनातनविद्य (राज्याधिकारिजन) ४ ३८ ४ [सनुत निर्णीतान्तर्हितनाम निघ० ३'२५ सनुतर् स्वरादिषु पाठादव्ययम् । तत अर्श आदित्वान् मत्वर्थेऽच्]

सनुतः सदैव ६ ४७ १३. नैरन्तर्ये २ २९ २ सततम् १ ९२ ११ सनातनात् (कालात्) ५ २ ४ सदा २० ५२ [सनुतर् स्वरादिषु पाठादव्ययम्]

सनुत्यः सनुतेषु नम्रादिगुणै सह वर्त्तमानेषु भव (प्रजारक्षको जन) २ ३० ९ निर्णीतान्तर्हितेषु सिद्धान्तेषु भव साधुर्वा (महाविद्वज्जन), प्र०—सनुतरिति निर्णीतान्त-र्हितनाम निघ० ३ ५, ६ ५ ४ **सनुत्येन**=सत्प्रेरणीयेन (त्यजसा=त्यागेन) ६ ६२ १० [सनुतर् निर्णीतान्तर्हित-नाम निघ० ३ २५ ततो भवार्थे साध्वर्थे वा यत् । रेफस्य लोपश्छान्दस]

सनुत्री विभाजिका (युवति स्त्री) १ १२३ २ [पण सभक्तौ (भ्वा०) धातोर्वाहु० औणा० उत्र । तत स्त्रिया ङीप् छान्दस]

सनुयाम दद्याम, सभजेम, प्र०—अत्र पक्षे विकरण-व्यत्यय १ १०० १९ सभजेमहि १ १०१ ११ याचेम ७.२५ ५ **सनेत्**=सम्यक् सेवयेत्, अ०—ससेवयेत् १ ५ ९ **सनेम**=विभजेम ७ ५२ १ सभजेम १ १८९.८ अन्येभ्यो दद्याम १ १२४ १३ सुखानि भजेम १ १७ ६ [पण सभक्तौ (भ्वा०) धातोर्लिङ् । विकरणव्यत्ययेन उ । अथवा षणु दाने (तना०) धातोर्लिङ्]

सनेन विभक्तेन (वस्तुना) २ २९ ३ [पण सभक्तौ (भ्वा०) धातोर्घञर्थे क]

सनेमि सनातनम्, पुराणम् (श=सुखकारका विद्वास) २१.१० पुरातनम् (दिद्यु=शस्त्राऽस्त्रम्) ७ ५६ ९ सनातनेन नेमिना धर्मेण सह वर्त्तमान राज्यमण्डलम् ९ २५ [सनेमि पुराणनाम निघ० ३ २७ सनेमि क्षिप्रम् निघ० १२ ४४ अथवा सह-नेमिपदयो समास । नेमि वज्रनाम निघ० २ २० णीञ् प्रापणे (भ्वा०) धातो 'नियो मि' उ० ४ ४३ सूत्रेण मि]

सनेमि समानो नेमिर्यस्मिँस्तत् (चक्रम्) १ १६४ १४ [समान-नेमिपदयो समास । नेमिरिति पूर्वपदे व्याख्यातम्]

सनेयम् सभजेयम् १८ ३५ [पण सम्भक्तौ (भ्वा०) धातोर्लिङ्]

सनोति सम्पन्न करोति ४ १७ ९ प्राप्नोति ६ ६० १ विभजति, ददाति ३ २५ २ **सनोतु**=ददातु ६ ५४ ५ [पण संभक्तौ (भ्वा०) धातोर्लट् । विकरणव्यत्ययेन उ । अथवा षणु दाने (तना०) धातोर्लट्]

सन्ततिः सम्यक् विस्तारक. (नियमपालको जन) ५ ७३ ७ [सम्+तनु विस्तारे (तना०) धातोर्वाहु० औणा० इ]

सन्तपन्ति सम्यक् क्लेशयन्ति १ १०५ ८ [सम्+तप सन्तापे (भ्वा०) धातोर्लट्]

सन्तम् वर्त्तमानम् (चतुर्वय व्यवहारम्) १ ११० ३ विद्यमानम् (अग्नि=विद्युदाख्यम्) ४ ७ ६ अभिव्याप्य स्थितम् (राजानम्) ५ ८ २. **सन्तः**=वर्त्तमाना (असुरा = दुष्टा मनुष्या) २ ३० [अस भुवि (अदा०) धातो शतृ । सत्प्राति० द्वितीयैकवचनम् । अन्यत्र जस्]

सन्तरन्तः दु खस्याऽन्त प्राप्नुवन्त (जना) ४ १ [सम्+तॄ प्लवनसन्तरणयो (भ्वा०) धातो शत्रन्ताज्जस्]

सन्तराम् अतितराम् २७ ८ [सन्=अस भुवि (अदा०) धातो शत्रन्तात् सु । सन् सुवन्तादतिशायने तरप् । सन्तरप्राति० आमु-प्रत्ययश्छान्दस. । 'किमेत्तिङ-व्ययघाद्०' इति सूत्रेणाप्राप्तोऽपि 'वा छन्दसि' नियमेनामु]

सन्तरुत्रम् दु खात् सम्यक् तारकम् (रयिं=श्रियम्) ३ १ १९ [सम्+तॄ प्लवनसन्तरणयो (भ्वा०) धातो कर्त्तरि तृचि 'ग्रसितस्कभित०' अ० ७ २ ३४. सूत्रेण उडागम]

सन्तवीत्वत् बहुवल सन् (वाजी=तुरङ्ग) ४ ४०.४ [सम्+तनु विस्तारे (तना०) धातोर्लिङ् । धातोरनुनासिक-लोप, प्रत्ययतकारस्य त्वद् आदेशश्छान्दस । अथवा सम्+तनु विस्तारे (तना०) धातो शतृ । 'बहुल छन्दसि' सूत्रेण श्लौ, अभ्यासस्य वीगागम, धातोश्च अनुभागस्य लोपश्छान्दस]

सन्तः सत्पुरुषा ६ ६६ ४ [अस भुवि (अदा०) धातो शत्रन्ताज् जस् । अथवा पण सम्भक्तौ (भ्वा०) धातोर्वाहु० औणा० तन्]

सन्ता वर्त्तमानौ (इन्द्राग्नी=वाय्वग्नी) १ २१ ४ विद्यमानौ (पितरा=पितरौ) ४ ३६ ३ [अस् भुवि (अदा०) धातो शत्रन्ताद् द्विवचनस्याकारादेश]

सन्ताप्तम् सम्यक् तपे, प्र०—अत्र लिडर्थे लुङ् ५ ३३ सन्ताप युक्त रखो आर्याभि० २ १३, ५ ३३ [सम्+तप सन्तापे (भ्वा०) धातोर्लुङ् । अडभावश्छान्दस]

सन्ताय्यमाने सम्यक् विस्तार्यमाणे पाल्यमाने वा

सन्निनेथ सम्यक् नयसि ७ २८.३ **सन्नेषि**=उत्तमतया नयसि ५ ४२.४ [सम्+णीञ् प्रापणे (भ्वा०) धातोर्लिट्। अन्यत्र लटि शपो लुक्]

सन्नुद सबको प्रसिद्धि से प्रेरणा कीजिए स० वि० १४०, अथर्व० १४ २ ६४ [सम्+णुद प्रेरणे (तुदा०) धातोर्लोट्]

सन्न्या समानान् पदार्थान् नयति यया तया (मेधया=प्रज्ञया) ५ ७ सर्वासा विद्याना सविभागकर्त्र्या (मेधया) १२ ७ **सन्याम्**=सत्य नीयते यया तस्याम् (वाचि=वेदवाण्याम्) ८ ५४ [सम्+णीञ् प्रापणे (भ्वा०) धातो क्विप्। सन्नीप्राति० टा]

सन्यसे सना विभजता मध्ये प्रयत्नाय ३ ३१ १९ [सन्-यस्पदयो समास। सन्=षण सम्भक्तौ (भ्वा०) धातो क्विप्। यस्=यसु प्रयत्ने (दिवा०) धातोर्भावे क्विप्। ततश्चतुर्थी]

सन्वन्तु सभजन्तु १ १२२ १२ [षण सम्भक्तौ (भ्वा०) धातोर्लोट्। विकरणव्यत्ययेन उ]

सपत्नक्षित् सपत्नान् शत्रून् क्षयति यया सा, अ०—सपत्नक्षिता (अनिशिता=क्रियया) १ २९ समी०—अत्र 'कृतो बहुलमि' ति वार्त्तिकेन करणकारके क्विप्। क्षि क्षये इत्यस्य रूपम्। एतदुव्वटमहीधराभ्या क्षिणु हिसायामित्यस्य भ्रान्त्या व्याख्यातम्। सपत्नान् शत्रून् क्षयति येन स (सङ्ग्राम) १ २९ [सपत्नोपपदे क्षि क्षये (भ्वा०) धातो 'कृतो बहुलमि' ति करणे क्विप्। ह्रस्वस्य पिति कृति तुगागम]

सपत्नदम्भनम् य. सपत्नान् दम्भयतीति तम् (जगदीश्वर भौतिकमग्नि वा) ३ १८ [सपत्नोपपदे दम्भु दम्भने (स्वा०) धातो 'कृत्यल्युटो बहुलम्' कर्त्तरि ल्युट्]

सपत्नसाही यया सपत्नान् दोषान् सहन्ते मृष्यन्ति दूरीकुर्वन्ति सा, यया दुष्टानि शीलानि सहन्ते सा, यया शत्रून् सहन्ते सा (अ०—वाक्) ५ १० [सपत्नोपपदे षह मर्षणे (भ्वा०) धातो 'कर्मण्यण्' तत स्त्रिया ङीप्]

सपत्नहा य सपत्नानरीन् हन्ति स (विद्वज्जन) १२ ५ शत्रुदोषहन्ता विद्वज्जन २७ ३ य सपत्नान् शत्रून् मेघाऽवयवान् वा हन्ति स (सूर्य सभाद्यध्यक्षो वा) ५ २४ [सपत्नोपपदे हन हिसागत्यो (अदा०) धातो क्विप्। तत सौ 'सौ च' इति दीर्घ]

सपत्नान् सपत्नीव वर्त्तमानानरीन् १५ १ विरोधे वर्त्तमानान् सम्बन्धिन १५ २ **सपत्नाः**=शत्रव १७ २२ [सह एकार्थे पततीति विग्रहे सहोपपदे पत्लृ गतौ (भ्वा०) धातोर्न प्रत्यय औणादिक। सहस्य सादेश। सपत्नो वा ऽभिमाति (यजु० ९ ३७) श० ३ ९ ४ ९. पाप्मा वै सपत्न श० ८ ५ १.६ इम देवा असपत्न सुवध्वमितीम देवा अभ्रातृव्य सुवध्वमित्येव तदाह श० ५ ४ २ ३]

सपत्नी समाना पत्नी यस्या सा (स्त्री) ३ १ १० [समाना-पत्नीपदयो समासे समानस्य सभाव]

सपत्नी सपत्नी इव वर्त्तमाने (अहोरात्रे) ३ ६ ४ [व्याख्यातम् पूर्वपदे]

सपत्नीरिव यथाऽनेका पत्न्य समानमेक पतिं दु ख-यन्ति तद्वत् १ १० ५ ८ [सपत्नी-इवपदयो समास]

सपन्त आक्रोशन्ति ५ ३ ४ **सपन्ते**=आक्रुश्यन्ति ७.३८ ५. **सपामि**=आक्रुशामि ५ १२ २, **सपेम**=शपथैर्नियमयेम ५ ४३ १२ आक्रुश्याम निन्द्येम ४ ४ ९ आक्रुश्येम ६ १५ १० सम्बन्ध कुर्याम ३७ २० [शप आक्रोशे (भ्वा०) धातोर्लङ्। अटोऽभाव। अन्यत्र लट् लिङ् च। 'शप उपलम्भन इति वक्तव्यम्' इत्यात्मनेपद व्यत्ययेन वा। शस्य सकारो वर्णव्यत्ययेन। षप् समवाये (भ्वा०) धातोर्वा रूपम्]

सपन्तः दुष्टानाक्रोशन्त (सज्जना) २ ११ १२. सम-वयन्त (विद्वासो जना) १ ६८ २ [शप आक्रोशे (भ्वा०) धातो शतृ। अथवा पप समवाये (भ्वा०) धातो शतृ। सपति परिचरणकर्मा निघ० ३ ५ अर्चतिकर्मा निघ० ३ १४]

सपर्य प्रीत्या सम्यक् सेवय, ऋ० भू० २१४ अथर्व० १४ २ १८ सेवन किया कर, स० प्र० १५२ अथर्व० १४ २ १८ **सपर्यत**=सेवध्वम् ५ १४ ५ परिचरत ४ ३५ **सपर्यतः**=सेवेते ६ ४४ ५ **सपर्यति**=सेवते १ १२.८ **सपर्यन्**=परिचरन्ति १ ७० ५ **सपर्यन्ति**=सेवन्ते १ ८४ १२ **सपर्यात्**=सेवेत १ ९३ ८ **सपर्यान्**=परिचरेयु, सेवेरन् १ ७२ ३ **सपर्यामि**=परिचरामि १ ५८ ७ सेवयामि ३ ५४ ३ **सपर्येम**=सेवेमहि २ ६.३ [सपर्यति परिचरणकर्मा निघ० ३ ५ ततो लोट्। अन्यत्र लट् लङ् लेट् लिङ् च। सपर्यत=परिचरत नि० ११ ९]

सपर्यजित् य सपर्यान् सङ्ग्रामान् जयति स (ऋभु=प्रशस्तो विद्वज्जन), प्र०—सपर्य इति सङ्ग्राम-नाम निघ० २ १७, १ १११ ५ [सपर्योपपदे जि जये (भ्वा०) धातो क्विप्। सपर्य सग्रामनाम निघ० २ १७. मस्य पकारो वा]

धातोर् धी-स्थाने दि इत्यादेश पृषोदरादित्वात्]

सन्दृक् सम्यग् दर्शयिता (अग्नि) १ ६६ १ समान-दृष्टि ४ ६ ६ य. सम्यक् पश्यति (अग्नि =विद्वज्जन) ४ १ ६ यथावत् सब के पाप-पुण्यो को देखने वाला (परमात्मा) आर्याभि० २ ४०, १७ २६ **सन्दृशम्**= सम्यग्दर्शनम् ६ १६ ८ **सन्दृशि**=समीचीन दिग्दर्शन यस्मिन् व्यवहारे तस्मिन् ४ २३ सम्यग्-दर्शने समान-दर्शनविषये वा ३६ १९ सादृश्ये ५ ७४ ६. सम्यग् द्रष्टव्ये (वर्णे=शुक्लादिगुणे) २ १ १२ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातो 'त्यदादिषु दृशोऽनालोचने कञ् च' सूत्रेण 'वा छन्दसि' नियमेनालोचनेऽपि क्विन्। सदृक् सद्रष्टा नि० १० २६ सन्दृशि सन्दर्शनाय नि० १० ४०]

सन्दृशे सम्यग् दर्शनाय ३ ३८ १ सम्यग् द्रष्टुम् २ १३ ५ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातोस्तुमर्थे 'दृशे विख्ये च' अ० ३ ४ ११ सूत्रेण के-प्रत्यय]

सन्दृक्षसे सम्यग् दृश्यसे, अ०—सङ्गत्य दृश्यते, दृष्टिपथमागच्छति, प्र०—अत्र लडर्थे लेट् मध्यमैकवचन-प्रयोग 'अनित्यमागमशासनम्' इति वचनप्रामाण्यात् 'सृजि-दृशो०' इत्यम् न भवति १ ६ ७ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लेट्। सिप्विकरण। 'सृजिदृशोर्झल्यम्०' इत्यमागमो न भवति छान्दसत्वात्]

सन्दृष्टिः सम्यक् पश्यन्ति यया सा (विद्या) ६ १६ २५ सम्यग् दृष्टि प्रेक्षणम् ४ १० ५ **सन्दृष्टौ**= सम्यग्दर्शने ६ १ ४ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातो स्त्रिया क्तिन्]

सन्द्युम्नेन श्रेष्ठतया विद्याधर्मादिगुणप्रकाशवता (राया) १ ४८ १६. [सत्-द्युम्नपदयो समास। द्युम्नम् धननाम निघ० २ १०]

सन्द्रवन्ति सम्यग् गच्छन्ति २९ ४८ [सु+द्रु गतौ (भ्वा०) धातोर्लट्]

सन्धमति सम्यक् प्राप्नोति १७ १९ यथायोग्य जन्ममरणादि को प्राप्त करा रहा है आर्याभि० २ ३४, १७ १९. [सम्+धमति गतिकर्मा (निघ० २ १४) धातोर्लट्]

सन्धये परस्त्रीसमागमनाय ३०.९ [सम्+डुधाञ् धारणपोषणयो (जु०) धातो 'उपसर्गे घो कि' अ० ३ ३ ९२ सूत्रेण भावे कि]

सन्धिना सन्धानेन (अन्तरिक्षेण=आकाशेन) १५ ६ [सन्धिरिति व्याख्यातम् पूर्वपदे। सन्धि (स्तोत्रम्) एषा वा उक्थस्य सम्मायद् रात्रि (=सन्धिस्तोत्रम्) त्रीण्युक्थानि, (अग्निरूपा अश्विनाविति) त्रिदेवत्य सन्धि ता० ९ १.२५-२६]

सन्धिष्व सम्यक्तया धर १ ९१.१८ [सम्+डुधाञ् धारणपोषणयो (जु०) धातोः 'सुयितवसुयित०' अ० ७ ४ ४५ सूत्रेण लोटि मध्यमैकवचने दधातेरित्त्वमिडागमो वा प्रत्ययस्य, द्विर्वचनाभावश्च निपात्यते]

सन्धुः सम्यग् धरन्ति १ ७३ ७ [सम्+डुधाञ् धारणपोषणयो (जु०) धातोर्लुङ्। अटोऽभाव]

सन्धूनुहि सम्यक् प्रेरय १ १० ८ [सम्+धूञ् कम्पने (क्र्या०) धातोर्लोट्। विकरणव्यत्ययेन श्नु]

सन्धेहि सम्यक् सयोजय १ ९ ७. [सम्+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्। 'ध्वसोरेद्धावभ्यास-लोपश्च' इत्येकारादेशोऽभ्यासलोपश्च]

सन्नते अनुकूले २६ १ [सम्+णम प्रह्वत्वे शब्दे (भ्वा०) धातो क्त]

सन्नद्धः तत्पर सम्बद्धो वा (वनस्पति =राजा) २९ ५२. सम्यग् बद्ध (जीव) १ १६४ ३७ सम्यक् सज्ज (=राजा) ६ ४७ २६ [सम्+णह बन्धने (दिवा०) धातो क्त]

सन्नद्धा सम्यग् बद्धा (विगवती भूमि) ६ ७५.११ [सम्+णह बन्धने (दिवा०) धातो क्त तत स्त्रिया टाप्]

सन्नमन्त सन्नमन्ति ७ ३१ ९. **सन्नमन्ताम्**= सम्यक् प्राप्नुवन्तु, भा०—सर्वतो वर्द्धन्ताम् ३५ २० [सम्+णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लङ् अडभाव, व्यत्ययेन आत्मनेपदञ्च]

सन्नयथः प्रापयथ ५ ६५ ६ [सम्+णीञ् प्रापणे (भ्वा०) धातोर्लट्]

सन्नयः सम्यक् नयो नीतिर्यस्य स (राजपुरुष) २ २४ ९ [सम्-नयपदयो समास। नय =णीञ् प्रापणे (भ्वा०) धातो 'एरच्' इत्यच्]

सन्नवन्त सस्तुवन्ति ६ ७ २ **सान्नवन्ते**=सम्यक् स्तुवन्ति ६ ७ ४ [सम्+ष्टुञ् स्तुतौ (अदा०) धातोर्लङ्। अडभावश्छान्दस। अन्यत्र लट्। व्यत्ययेनात्मनेपद शप् च]

सन्नशे सम्यक् नश्येत् २३ १५ [सम्+णश अदर्शने (दिवा०) धातोर्लिङ्। त्-लोपश्छान्दस शप् च]

सन्नः अवस्थापित (समुद्र =अन्तरिक्षम्) ८ ५९ [पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्त। 'रदाभ्याम्०' अ० ८ २ ४२ सूत्रेण दकारतकारयोर्नकारो]

ता० २ १० ५ सप्तदश प्रजापति तै० १ ३ ३.२. सप्तदशो वै प्रजापति ऐ० १ १६ कौ० ८ २ श० १ ५ २ १७ गो० उ० १ १६. सप्तदशो वै प्रजापतिर्द्वादश मासा पञ्चर्त्तवो हेमन्तशिशिरयोः समासेन तावान्त्संवत्सर संवत्सरः प्रजापति ऐ० १ १ द्वादश वै मासा संवत्सरस्य पञ्चर्त्तव एष एव प्रजापति सप्तदश श० १ ३.५ १० संवत्सर एव सप्तदशस्यायतन द्वादशमासा पञ्चर्त्तव एतदेव सप्तदशस्यायतनम् ता० १० १.७ सप्तदशो वै संवत्सरो द्वादशमासा पञ्चर्त्तव श० ६ २ २ ८ संवत्सर सप्तदश ता० ६ २ २ तस्माऽएतस्मै सप्तदशाय प्रजापतये एतत् सप्तदशमन्न समस्कुर्वन् य एष सौम्योऽध्वरोऽथ या अन्य ता. षोडश कला एते ते षोडशर्त्विज श० १० ४ १ १६ तद्वै लोमनि द्वे अक्षरे। त्वगिति द्वेऽसृगिति द्वे मेद इति द्वे मासमिति द्वे स्नावेति द्वेऽस्थीनि द्वे मज्जेति द्वे ता षोडश कला अथ य एतदन्तरेण प्राण सञ्चरति स एव सप्तदश प्रजापति श० १० ४ १ १७ अन्न वै सप्तदश । ता० २ ७ ७ सप्तदश ह्यन्नम् श० ८ ४.४ ७ प्रजाति सप्तदश ऐ० ८ ४ त (सप्तदशस्तोम) उ प्रजातिरित्याहु ता० १० १ ६. सप्तदश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ता० १२ ६ १३ विट् सप्तदश ता० १८ १० ६ विट् वै सप्तदश ता० २ ७ ५ विश सप्तदश ऐ० ८ ४ पशवो वै सप्तदश ता० १६ १० ७. तान् (पशून्) विश्वे देवा सप्तदशेन स्तोमेन नाप्नुवन् तै० २ ७ १४ २ सप्तदशो वै पुरुषो दश प्राणाश्चत्वार्यङ्गान्यात्मा पचदशो ग्रीवा षोडश्य शिर सप्तदशम् श० ६ २ २ ६ उर सप्तदश । अष्टावन्ये जत्रवोऽष्टावन्य ऽउर सप्तदशम् श० १२ २ ४ ११ वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुत वैरूपेण विशीजसा तै० २ ६ १६ १-२ गायत्र सप्तदशस्तोम ता० ५ १ १५ उदर वा एष स्तोमाना यत्सप्तदश ता० ४ ५ १५ राष्ट्र सप्तदश तै० १ ८ ८ ५. सप्तदश (स्तोम) एव यश गो० पू० ५ १५ यत् सप्तदशो यदेवास्य (यजमानस्य) मध्यतोऽपूत तत्तेनापहन्ति ता० १७ ५ ६ सर्व सप्तदशो भवति ता० १७ ५ ६]

सप्तदशाक्षरेण निचृदाख्यया गायत्र्या (छन्दसा) ६ ३४ [सप्तदशन्-अक्षरपदयो समास.]

सप्तधा सप्तभि प्रकारै १७ ७६ [सप्तन्प्राति० विधार्थे 'सख्याया विधार्थे धा' अ० ५ ३.४२ सूत्रेण धा]

सप्तधातु सुवर्णादिय सप्त धातवो यस्मिँस्तत् (धनम्) ४ ५ ६ [सप्तन्-धातुपदयो समास । ततो नपुसके प्रथमैकवचने रूपम्]

सप्तधातुः सप्त प्राणादया सारका यस्या सा (वाक्) ६ ६१ १२ [सप्तन्-धातुपदयो समास । तत. प्रथमैकवचनम्]

सप्तनामा सप्तनामानि यस्य स. (अग्नि=वायुरग्निर्वा) १.१६४ २ [सप्तन्-नामन्पदयो समास । सप्तनामा=आदित्य सप्तानां रश्मयो रसानभिसप्तामयन्ति सप्तैनमृषय स्तुवन्तीति वा नि० ४ २७]

सप्तपुत्रम् सप्तविधैस्तर्त्तव्यं तीर्थम् (सूयम्) १.१६४.१. [सप्तन्-पुत्रपदयो समास । सप्तपुत्रम्=सप्तसपुत्र सर्पणपुर्वमिति वा नि० ४.२६.]

सप्तमातृभिः सप्तार्चयो पृथिव्यग्निसूर्यवायुविद्युदन्नाऽऽकाशा मातरो जनका यासा ताभि (निर्ऋतिभिर्युभिरनुभिश्च) १ ३४.८ [सप्तन्-मातृपदयो समास]

सप्तमी सप्तानां पूरणी (क्रिया) २५ ४ [सप्तन्-प्राति० पूरणार्थे ङट्। तत 'नान्तादसख्यादेर्मट्' इति मडागम । तत स्त्रिया ङीप्]

सप्तय. सयुक्ता शीघ्र गमिनोऽश्विवायुजलादयो ऽश्वा १ ८५ ६. वाय्वादयोऽश्वा येषान्ते (अध्वरश्रिय=नक्षत्रनक्षिराज्यलक्ष्मी) १ ४७ ८ **सप्तिम्**=अश्वम् १२ ४७ **सप्तिः**=मूर्त्तद्रव्यसम्बन्धी (अग्नि=सूर्यरूप.) २२ १६ **सप्ती**=सप्त सर्पन्ती (हरी=हरणशीलावश्वौ), प्र०—अत्र 'वाच्छन्दसि' इति गुणे पूर्वे रेफलोप ३ ३५.२ **सप्ते**=अश्व इव पुरुषार्थिन् (प्र०—शिल्पविज्जन) २६ ३ अश्व इव वेगकारक (विद्वज्जन) २६ २. [सप्ति=अश्वनाम निघ० १ १४ सप्ते सरणस्य नि० ६.२ सृप गतौ (भ्वा०) धातोर्वाहु० औणा० ति । रेफस्य लोपश्छान्दस । सप्ति (हेऽश्व त्व) सप्तिरसि ता० १ ७ १ सप्ति =आशु सप्तिरित्याह। अश्व एव जव दधाति। तस्मात् पुरा शुरश्वो ऽजायत तै० ३ ८ १३ २ सप्ति=वायु सप्ति तै० १ ३ ६ ४]

सप्तरश्मिम् सप्तसु छन्दस्सु लोकेषु वा रश्मयो यस्य तम् (अग्नि=विद्वास जनम्) १ ४६ १ सप्तविधा विद्यारश्मयो यस्मिँस्तम् (रथ=सूर्यलोकम्) ६ ४४ २४ **सप्तरश्मिः**=सप्तविधा रश्मय किरणा यस्य स (रथ=सूर्य) २ १८ १ सप्तविधकिरण (बृहस्पति=सूर्य) ४ ५० ४ [सप्तन्-रश्मिपदयो समास । रश्मिरश्मि स एष (आदित्य) सप्तरश्मिर्बृहस्पतिर्विष्णुर्जै० उ० १.२८.२ (ऋ० २ १२ १२) यस्सप्तरश्मिरिति सप्त ह्येव

सपर्यन् सेवमान (विद्वज्जन) ३.३१ १. **सपर्यन्तः**=परिचरन्त (विद्वांसो जना) ५.२१ ३ [सपर्यति परिचरणकर्मा निघ० ३ ५ तत शतृप्रत्यय । सपर्यन् पूजयन् नि० ३.४ सपर्यत परिचरत नि० ११ ६]

सपर्यवः सेवका (देवा'=विद्वज्जना) ३ ५ २ सत्य सेवमाना (विद्यार्थिजना) ७ २ ४. आत्मन सपर्यामिच्छव (सज्जना) २ ६.३.. **सपर्यू**=सेवकौ (जनौ) ३ ५० २ [सपर्याशब्दाद् आत्मन इच्छायामर्थे क्यच् । तत 'क्याच्छन्दसि' इति उ]

सपर्येण्यः सेवितुमर्ह (अग्नि =पावक) ६ १ ६ [सपर्यति परिचरणकर्मा निघ० ३ ५ तत कृत्यार्थे केन्य]

सपित्वम् समानश्च तत्पित्व प्रापण वा विज्ञान च तत्, प्र०—अत्र पि गतौ इत्यस्माद्धातोरौणादिकस्त्वन् प्रत्यय १ १०६ ७ [समान-पित्वपदयो समास । 'समानस्य छन्दसि०' सूत्रेण समानस्य सभाव । पित्वम्=पि गतौ (तुदा०) धातोर्वाहु० औणा० त्वन्]

सपीतिम् पानेन सह वर्त्तमानम् (सध्वि=समानभोजनम्) २८ १६. **सपीतिः**=समाना पीति पान यस्या सा (सध्वि) १८ ६ [सह-पीतिपदयो समासे सहस्य सभाव. । समाना पीतिपदयो समासे वा समानस्य सभाव - पीति'=पा पाने (भ्वा०) धातो स्त्रिया भावे क्तिन् 'स्थागापापचो भावे' सूत्रेण । 'घुमास्थागापाजहातिसा हलि' इतीत्त्वम् । सपीतिम्=सहपीतिम् नि० ६ ४३]

सप्त सप्तसख्याकान् (सिन्धून्) १ ३५ ८ सप्तविधा किरणा १ ५०.८ षडृतवो वायुश्च सप्तम (पितर =पालका) ४.४२ ८ सप्तत्वविशिष्टा गणना १८ २४ सप्तसङ्ख्याका (पत्नीयजमानाभ्या सहिता विप्रा =मेधाविजना) ३ ७ ७. सप्तछन्दोऽन्विता (पुर = शत्रुनगर्य) १.१७४.२ गायत्र्यादीनि सप्त छन्दोऽन्विता (वाणी.=वेदवाच) १ १६४ २४ पृथिवीजलाग्निवायुविराट्-परमाणु-प्रकृत्यारव्यै सप्तभि (धामभि =पदार्थै) प्र०—अत्र 'सुपा सुलुक्०' इति विभक्तेर्लुक् १ २२ १६. सप्तसख्याकानि गायत्र्यादीनि छन्दासि १७ ७६ सप्ततत्त्वाङ्गमिश्रितस्य भावा सप्तधा १ १०५ ६ साङ्गोपाङ्गाँश्चतुरो वेदान् त्रीन् क्रियाकौशल-विज्ञानपुरुषार्थान् १ ७२ ६ सप्तविधे (रोदसी=द्यावापृथिव्यौ) ७ १८ २४ **सप्तभिः**=नाग-कूर्म-कृकल देवदत्त-धनञ्जयेच्छाप्रयत्नै १४ २८ [सप्त सृष्टा सख्या, सप्तादित्य रश्मय इति वदन्ति नि० ४.२६]

सप्त ऋषयः पञ्च मुख्य-प्राणा महत्तत्त्वमहङ्कारश्चेति १४ २८ **सप्त ऋषीन्**=सप्तप्राणादीन् (प्राणाद्य पञ्च, सूत्रात्मा धनञ्जयश्चेति) १७ २६ [सप्तन्-ऋषिपदयो समास । सप्त ऋषय रश्मिनाम निघ० १ ५ पदनाम निघ० ५ ६ सप्त ऋषय =रश्मय आदित्ये सप्त । नि० १२ ३७ पड् इन्द्रियाणि विद्या सप्तमी नि० १२ ३७]

सप्तचक्रम् सप्त चक्राणि यस्मिँस्तम् (रथ=रमणीय यानम्) २ ४० ३ **सप्तचक्रे**=सप्तविधानि चक्राणि भ्रमणपरिधयो यस्मिँस्तस्मिन् (सूर्ये) १ १६४ १२. [सप्तन्-चक्रपदयो समास.]

सप्तजिह्वाः काल्यादय सप्त जिह्वा इव ज्वाला येषा ते (वह्नय =वोढार' पावका) ३ ६ २ [सप्तन्-जिह्वापदयो समास]

सप्तथम् सप्तमम् (महत्तत्त्वम्) १.१६४.१५ [सप्तन्प्राति० पूरणार्थे डट्प्रत्यये 'थट् च छन्दसि' अ० ५ २ ५० सूत्रेण थडागम । सप्तथम्=सप्तम नि० १३ ३२]

सप्तथी सप्तमी (सरस्वती=उत्तमा वाणी), प्र०—अत्र 'वाच्छन्दसि' इति मस्य स्थाने थ ७ ३६ ६ [सप्तन्प्राति० पूरणार्थे उट् प्रत्यये 'थट् च छन्दसि' सूत्रेण थडागम । तत स्त्रिया ङीप्]

सप्तदश सप्ताधिका दश (सख्या) १८ २४ **सप्तदशभिः**=दश पाद्या अङ्गुलयश्चत्वार्यूर्वष्ठीवानि, द्वे प्रतिष्ठे यदर्वाङ् नाभेस्तत्सप्तदश तै १४ २६. [सप्तन्-दशन्पदयो समास]

सप्तदशम् चत्वारो वर्णाश्चत्वार आश्रमा श्रवणमनन-निदिध्यासनानि कर्माणि, अलब्धस्य लिप्सा, लब्धस्य प्रयत्नेन रक्षण, रक्षितस्य वृद्धिर्वृद्धस्य सन्मार्गे सर्वोपकारके सत्कर्मणि व्ययकरणमेष चतुर्विध पुरुषार्थो, मोक्षाऽनुष्ठानञ्चेति सप्तदशम् (स्तोम=अतिप्रशसनीय व्यवहारम्) ६ ३४ **सप्तदशः**=सप्तदशाना पूरण (स्तोम =स्तावको मित्रस्य भाग) १४ २४. सप्तदशविध (धरुण.=धारणगुण) १४ २३ सप्तदशाना पूरक (विज्ञानम्) १३ ५६ पञ्च कर्मेन्द्रियाणि, पञ्च विषया, पञ्च महाभूतानि, कार्य, कारणञ्चेति सप्तदशाना पूरक (स्तोम =स्तुतिसमूह) १० १२ [सप्तन् दशन्-पदयो समासात् पूरणार्थे 'तस्य पूरणे डट्' अ० ५ २ ४८ सूत्रेण डट् । सप्तदश (स्तोम) प्रजापतिर्वै सप्तदश । गो० उ० २ १३ तै० १ ५.१०.६.

१.१४२.५ विस्तृतविज्ञानेन सहिता, समानप्रख्याति (श्रीमज्जन) ६.१५.३ सदृक्षनि. विस्तृते पदार्थे सह वर्त्तते तत् (सर्म=गृहम्) १.२२.१५ सप्रख्याति (राजा) ७.३१.६ सप्रतिष्टि (विद्वज्जन), प्रमा विस्तारम् युक्तम् (मनुष्याम्) १.१२६.३ [सप्र=सह प्रतिष्ठानम्]

सप्तरासः सप्तवार (भा०—विवक्षणा सप्तपूर्णा) १.१६८.६ [सप्तन्प्रातिप० जसोऽसुक्। सप्तन्=सप्तानां गतिकर्मा (निघ० ३.१४) तत्र ऑणा० सप्तन् प्रत्ययः]

सबन्धवः समाना बन्धवो येषान्ते (सप्त=समाना जना) ५.५६.५ सबन्धुः यथा समाना बन्धवो यस्य मित्रस्य स (जन) ५.२३. सबन्धू समानौ बन्धू इव वर्त्तमानौ (स्त्रीपुरुषौ) ३.१.१० समाना बन्धुस्थानादुत्तमान (यस्या=रात्रिर्नि) ५.४७.५ [समानबन्धुपदयो समान। 'समानस्य छन्दसि०' सूत्रेण समानस्य सादेश]

सबर्दुघा सर्वान् कामान् पपूरयन्ती (वाक्) ३.५५.१६. सर्वान् कामान् पूरयन्ती (धेनु=वाणी) १.१३४.८. सबर्दुघाम्=सर्वकामनापपूरयित्रीम् (धेनुम्) ६.४८.११ वर्त्तति येन ज्ञानेन तद्वत्, समान वर्तमानं प्रपूरयति या ताम् (धेनुम्=उपदेशश्रवणतत्परां वाचम्), प्र०—सप्त वर्त्त गतौ इत्यस्माद्धातो 'वृतो वहुलम्०' इति करणे क्विप्, छान्दसो सकारलोप 'समानस्य छन्दस्य०' इति समानस्य सकारादेश, तत 'दुह कप् च' अ० ३.२.७०. इति कुप्रत्ययो हृस्य स्थाने धादेशश्च १.२०.३ सबर्दुघायाः=समान सुख विभर्त्ति येन दुग्धेन तत्समानवद् दोग्धि या तस्याः (उत्तियाया=गो), प्र०—सप्त समानोपपदाद् भृञ्धातोर्विच् वर्णव्यत्ययेन भस्य ब १.१२१.५. सबर्दुघा=सब प्रकार के उत्तम व्यवहारों को पूर्ण करने वाली (युवतय=स्त्रियः) म० प्र० ११०, ३.५५.१६ सबर्दुघे सवः पालकस्य दुग्धादेरिव रसस्य प्रपूरिके (अहोरात्रे) ३.६.४. [सबर् उपपदे दुह प्रपूरणे (अदा०) धातो 'दुहः कप् घश्च' अ० ३.२.७० सूत्रेण कप्। घकारश्चान्तादेशः। तत स्त्रियां टाप्। सबर्=समान-वर्पदयो समासे समानस्य सादेशः। वर्=वर्व गतौ (भ्वा०) धातो करणे क्विप्। वलोपश्छान्दस। दुभृञ् धारणपोषणयो (जु०) धातोर्वा क्विप्। भस्य बकारो वर्णव्यत्ययेन]

सबाधस. बाधेन सह वर्त्तमाना (सूरय=पण्डिता जना) ५.१०.६ [सह-बाधस्पदयो समासे सहस्य सादेश]

सबाधः बाधेन सह वर्त्तमान (शत्रुसैन्य) ३.५१.४. सबाधम्- बाधया सह वर्त्तमानम् (शत्रु-सैन्यम्) ७.७.२ सबाधाः=बाधेन सह वर्त्तमाना बाधया सह ये वर्त्तन्ते (जना) ८.२१.६ ये पदार्थान् गौरवाभावेन (सावः) १.५४.८ [सह-बाधपदयो समाने 'बाधायाश्चलम्' सूत्रेण सहस्य सादेशः। बाधृ लोडने (भ्वा०) धातोर्घञ्। सावः=सु+अवः। अवस् शब्दो निघ० २.७.]

सबाधस् समानेषु (रा. सैन्येषु), प्र०—सह सह समानो बाधोपेतेषु स. प्रत्यय १.८.८ [सह समानाय (भ्वा०) बाधोपेता० सादेश]

सभरसः समानभरणोपेता (मनुष्या) १.८४. समानभरणोपेताया (सभायाः) ४.४१.७. [समान-भरण-पदयो समाने समानस्य सादेशः। भरणं=दुभृञ् धारणपोषणयो (जु०) धातोरप्]

सभरा. समान विभर्त्ति सभरा, प्र०—सह समान भरन्त्यस्यां सा सेना (प्र०—पुष्टा) १.८१. समानभरणोपेता (सभा) १.७८ सभाधिपुरुषपुष्टा. (सेनेव सा), प्र० म० ४.४६ १.६८ [समान-भरन्-पदयो समाने समानस्य सादेशः छन्दसि। भरं=दुभृञ् धारणपोषणयो (जु०) धातोरप् वर्णव्यत्ययेन]

सभाचरम् स सभायां चरति सभाचरम् (सभासदम्) ८.६. [सभोपपदे चर गतौ (भ्वा०) धातो 'सर्वत्र' इति टः]

सभापतिवयः सभाया पालकस्य सदृश्य १६.२४ [सभा-पतिपदयो समासे]

सभाम्य. या सभासदित्यनेन यत् प्रत्यये सभ्य सभाम्य स्त्रीरूप १६.२४. सभायाम्=विद्वत्सभोपविष्टायाम् ३.४७ सभासु सभासदित्यादि प्रकाशमानासु (सभासु) ६.२८.६ [सभ-आपदयो समासे। भा=भा दीप्तौ (अदा०) धातोर्डः। ततष्टाप् स्त्रियाम्]

सभावती सभासम्बन्धिनी (वाक्=वाणी) १.१६७.३. [सभाप्रातिप० समर्थे मतुबन्तात् स्त्रियां ङीप्]

सभावान् प्रशस्ता सभा विद्यते यस्य स (अग्नि=विद्वज्जन) ४.२.५. [सभाप्रातिप० प्रशंसायामर्थे मतुप्]

सभासदः सभासद् विद्वान् लोग म० प्र० १८२, अथर्व० १२.७.५५.६ [सभोपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्]

सभासाहेन सभा का भार उठाने और उसकी उन्नति करने वाले (सिपजन) के द्वारा यं० वि०। [सभोपपदे षह मर्षणे (भ्वा०) धातोः 'कर्मण्यण्' इत्यण्]

आदित्यस्य रश्मय (सप्तरश्मि=इन्द्र=आदित्य) जै० उ० १.२६ ८]

सप्तवध्रये पञ्च ज्ञानेन्द्रियाणि मनो बुद्धिश्च सप्त हता यस्य तस्मै (जनाय) ५ ७८ ६ **सप्तवध्रिम्**=हत-सप्तेन्द्रियम् (भा०—अन्त करणादविद्याम्) ५ ७८ ५ [सप्तन् वध्रिपदयो समास. । वध्रि=हन हिंसागत्यो (अदा०) धातोरिन् । रेफागमश्छान्दस धातोर्वधादेशश्च]

सप्तविंशतिः सप्ताऽधिका विंशति (सख्या) १८.२४ एतत्सख्याका (गन्धर्वा=वायव इन्द्रियाणि च), भा०— प्राणापानव्यानोदानसमान-नाग-कूर्म-कृकल-देवदत्त-धनञ्जया दश, जीवो, द्वादश मन, तत्सहचरितानि श्रोत्रादीनि दशेन्द्रियाणि, पञ्चसूक्ष्मभूतानि च मिलित्वा सप्तविंशति ६.७. **सप्तविंशत्या**=आरण्यपशुगुणै १४ ३० [सप्तन्-विंशतिपदयो समास]

सप्तशिवासु सप्तविधासु कल्याणकारिणिषु (मातृषु) १ १४१.२ [सप्तन्-शिवापदयो समास । शिवा=शिव-प्राति० स्त्रिया टाप्]

सप्तशीर्षाणम् सप्तविधानि शिरासि किरणा यस्मिँस्तम् (अग्निम्) ३ ५ ५ [सप्त-शिरस्पदयो समास । 'शीर्षश्छन्दसि' सूत्रेण शिरस शीर्षन् आदेश]

सप्तस्वसा सप्तार्थात् पञ्च प्राणा मनो बुद्धिश्च स्वसेव यस्या सा (सरस्वती=सत्या वाणी) ६ ६१ १० [सप्तन्-स्वसृपदयो समास । सप्तस्वसा=सप्तस्वसारम् नि० १० ५]

सप्तहोता सप्त प्राणा होतार आदातारो यस्य स. (अग्नि) ३ २६.१४ (अग्निष्टोम (यज्ञ) ३४ ४ [सप्तन्-होतृपदयो समास । होतृ=हु दानादानयो (जु०) धातो कर्त्तरि तृच् । सप्तहोता=सप्तास्मै रश्मयो रसानभिसन्ना-मयन्ति, सप्तैनमृषय स्तुवन्तीति वा नि० ११ २३ तस्मै (ब्रह्मणे) सप्तम हुत प्रत्यशृणोत् । स सप्तहूतोऽभवत् । सप्तहूतो ह वै नामैष । त वा एत सप्तहूत सन्तम् । सप्त-होतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवा तै० २ ३ ११ २ इन्द्रिय वै सप्तहोता तै० २ २ ८ २ इन्द्र सप्तहोता तै० २ ३ ११ इन्द्र सप्तहोत्रा तै० २ २ ८.५ सौम्योऽवर सप्तहोतु (निदानम्) तै० २ २ ११ ६ अर्यमा सप्तहोतृणा होता तै० २ ३ ५ ६.]

सप्ताक्षरेण दैव्या जगत्या (छन्दसा) ६ ३२ [सप्तन्-अक्षरपदयो समास]

सप्ताश्वः सप्तविधा अश्वा आशुगामिन किरणा यस्य स (सूर्य) ५.४५.६. [सप्तन्-अश्वपदयो समास]

सप्तास्यः सप्त किरणा आस्यानि यस्य स (बृह-स्पति=सूर्य) ४ ५० ४ **सप्तास्ये**=सप्त प्राणा आस्ये यस्य तस्मिन् (पत्यौ) ४ ५१ ४ [सप्तन्-आस्यपदयो समास]

सप्तिमिव यथा वेगवानश्व १.६१ ५ [सप्तिम्-इव-पदयो समास]

सप्ती इव यथा युग्मावश्वौ ६ ५६ ३ [सप्ती-इव-पदयो समास । सप्ती=सप्तिप्राति० प्रथमाद्विवचनम् । सप्तिरिति व्याख्यातम्]

सप्रथसम् प्रख्यातेन सह वर्त्तमानम् (अग्नि=पावकम्) २२.३. **सप्रथाः**=प्रथसा विस्तृतेन जगता सह वर्त्तमान (मित्र=जगदीश्वर) ३ ५६ ७ प्रसिद्धकीर्त्ति (विद्वान् जन) ५ १३ ४ सप्रख्याति (विद्वज्जन) १ १५६ १. मुकीर्त्तिप्रख्यातियुक्त (अग्नि=विद्वज्जन) ३८ १७ विस्तीर्णसुख (विद्वज्जन ईश्वरो वा) ३८ २० विस्तरेण सह वर्त्तमान (विद्वान् परमेश्वरो वा) ३८ २० विस्तारेण सह वर्त्तमाना (स्त्री) ३६.१३ प्रथसा प्रख्यया सह वर्त्तमान (विद्वज्जन) १८ ५४ विस्तीर्णेन प्रगसनेन सह वर्त्तमाना (गृहिणी) ३५ २१ सर्वसामर्थ्य से विस्तीर्ण (ईश्वर) आर्याभि० २ ४१, ३८ २० [सह-प्रथस्पदयो समासः । 'वोपर्सजनस्य' सूत्रेण सहस्य सादेश । सप्रथा सर्वत पृथु नि० ६ ७ प्रथस् प्रथ प्रख्याने (भ्वा०) धातोर् औणा० असुन्]

सप्रथस्तमम् य प्रथोभिर्विस्तृतैराकाशादिभि महाऽभि-व्याप्तो वर्त्तते सोऽतिशयितस्तम् (सदसस्पतिं=परमेश्वरम्) १.१८ ६ य प्रथसा विद्याविस्तरेण सह वर्त्तते सोऽतिशयितस्तम् (बहुश्रुत सज्जनम्) १ ४५ ७ अतिशयेन विस्तारयुक्त व्यवहारम्) १ ७५ १ प्रथसा विस्तरेण सह वर्त्तमान ,सप्रथारतमतिशयितम् (अग्नि=विद्वाम जनम्) १२ १११. **सप्रथस्तमः**=अतिशयेन विस्तृतमुखकारक (सखा=मित्रजन) १२ ११४ **सप्रथस्तमे**=अतिविस्तार-युक्ते (अवसि=रक्षणादौ कर्मणि) ५ ६५ ५ अतिशयितै प्रथोभि सुविस्तृतै श्रेष्ठैर्गुणकर्मस्वभावैस्सह वर्त्तमाने (शर्मन्=सुखे) १ ६४ १३ [सप्रथस् इति व्याख्यातम् । ततोऽतिशायने तमप्]

सप्रथः प्रख्यात्या सह वर्त्तमान (अग्नि=सद्गृहस्थ-जन) ६.१६ ३३ सत्कीर्त्या प्रख्यात (महाराज) ६ ६८ ६ प्रख्यातगुणै सह वर्त्तमानम् (शर्म=गृहम्)

सम्यक् स्वेच्छया गृह्णामि १ ६४ १ [सम्+अञ्जू व्यक्ति-म्रक्षणकान्तिगतिषु । (रुधा०) धातोर्लट् । विकरणव्यत्ययेन शप् । अन्यत्र लङ्, लोट्, लेट् लट् च । लेटि लटि च व्यत्ययेनात्मनेपदम् । समञ्जन्ति समश्नुवन्ति नि० ६ ३५]

समञ्जन् सम्यक् प्रकटीभवन् (भौतिकोऽग्नि) २६ २ सम्यक् प्रकटयन् (शमिता=यजमान) २८ १० सम्यक् मिश्रीकुर्वन् (विद्वज्जन) २६ ३५ सम्यग्रक्षन् (अग्नि=विद्वान् राजा) १२ ३३ सम्पृचान (शमिता=यज्ञ) २० ४५ सम्यग् व्यक्तीकुर्वन् (विद्वज्जन) २० ३७ सम्यक् प्रकाशयन् (सविता=सूर्य) १२ ६. [सम्+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातो शतृ]

समत्ति सम्यक्तया भक्षयति ७ ४ २ [सम्+अद भक्षणे (अदा०) धातोर्लट्]

समत्सु युद्धेषु १ ५ ४ सङ्ग्रामेषु २६ ५० धार्मिकाऽधार्मिकविरोधाख्येषु युद्धेषु ३ ४३ ८ धर्म्यसङ्ग्रामेषु ३ ४८ ५ **समदः**=सङ्ग्रामान् ६ ७५ २ **समदाम्**=सह मदेन हर्षेण वर्त्तन्ते यत्र युद्धेषु तेषाम् २६ ३८ मदैस्सह वर्त्तन्ते येषु तेषा सङ्ग्रामाणाम् ६ ७५ १ [समत्सु सग्रामनाम निघ० २ १७ समदो वात्ते, सम्मदो वा मदते नि० ६ १७]

समदनस्य मदन हर्षण यस्मिन्नस्ति तेन सहितस्य (भा०—सैनापत्याधिकारस्य) १ १०० ६ [सह-मदनपदयो समासे सहस्य सादेश । मदनम्=मदी हर्षे (दिवा०) धातोर्ल्युट् । तत अर्श-आदित्वादच्]

समदः मदेन सह वर्त्तमाना (शत्रूणा सेना) २६ ३६ [सह-मदपदयो समासे सहस्य सादेश । वचनव्यत्यय]

समद्यौत् सम्यग् द्योतयति ३ ५ २ [सम्+द्युत दीप्तौ (भ्वा०) धातोर्लुङि । च्लेर्लुक्]

समद्वा यो मदेन सह वर्त्तमानान् वनति सम्भजति स (इन्द्र=राजा) ७ २० ३ य सम्यगत्ति स्वादु भुङ्क्ते स (राजकर्मचारी जन) ६ १८ २ [सम्+अद् भक्षणे (अदा०) धातो कर्त्तरि वनिप् । अथवा समद इत्युपपदे वन सम्भक्तौ (भ्वा०) धातो कर्त्तरि विच् । 'विड्वनोरनुनासिकस्यात्' इत्याकारान्तादेश । पूर्वपदस्यान्त्यलोपश्छान्दस]

समधत्त सम्यग् धरत १ १ ६५ ६ **समधात्**=समादधाति १६ ६३ **समधातम्**=भा०—सगृह्णीतम् २० ६६ [सम्+डुधाञ् धारणपोषणयो (जु०) धातोर्लङ् । मध्यमबहुवचनम् । अन्यत्र लुङ् । 'गातिस्थाघु०' इति सिचो लुक्]

समनक्तु सम्यक् कामयताम् २० ४४ उत्तम सुख को प्राप्त कर म० वि० १३४, १० ८५ ४३. [सम्+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातोर्लोट्]

समनगा इव समनमवधारित स्थान गच्छन्तीव (उषा) १ १२४ ८ [समगा-इवपदयो समान । गमनगा इति व्याख्यास्यते]

समनगाः य समन सङ्ग्राम गच्छति स (नरोत्तम) ७.६ ४ [समनोपपदे गम्लृ गतौ (भ्वा०) धातोर्ड । वचनव्यत्यय । समनम् सग्रामनाम निघ० २ १७]

समनम् समीचीन सङ्ग्रामम् १ ४८ ६ [समनम् सग्रामनाम निघ० २ १७ समननाद्वा सम्माननाद्वा नि० ७ १७]

समनमन्त एकीभावेन नमन्तु १७ २४ सनमन्ते, प्र०—अत्र लडर्थे लङ् ८ ४६ [सम+णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लङ् । व्यत्ययेनात्मनेपदम्]

समनसः समान मन स्वान्त यासा ता (विश=प्रजा) ७ २५. समानविज्ञाना (नर=नायका जना) २७ २३. [समान-मनस्पदयो. समासे समानस्य सादेश-श्छान्दस]

समनसः समान मनो येभ्यस्ते (जना) १४ २७ मनसा सह वर्त्तमाना (अग्नय=पावका) १४ ६ समान मनो विज्ञान येषान्ते (पितर=प्रजापालका जना) १६ ४५ समानमनोनिमित्ता (अग्नय) १५ ५७ सज्ञाना समानमनस (विद्वज्जना) ७ ४३ २ समाने धर्मे मनो येषान्ते (जीवा) १६ ४६ समान सहकारि साधन मनो येषान्ते (देवा=श्रोत्रादीनीन्द्रियाणि) ६ ६ ५ **समनसौ**=समानविचारौ (स्त्रीपुरुषौ) १२ ६० [समान-मनस्पदयो समासे समानस्य सादेश । सह-मनस्पदयोर्वा समास । सहस्य सादेशश्छान्दस]

समनसा समानेन मनसा विचारेण सह वर्त्तमानौ (अश्विनौ=अग्निजले) १ ६२ १६ समान मनो विज्ञान ययोस्तौ (अश्विनौ=सभाध्यक्षसेनेशौ) १ ११६ १६ समानमनस्कौ दृढप्रीतौ (स्त्रीपुरुषौ) [अत्रे] ५ ८० [समान-मनस्पदयो समासे समानस्य सादेश । ततो [illegible] वचनस्याकारादेश]

समना सङ्ग्रामे, प्र०—अत्र विभक्तेराकारादेश ६ ४ १ समाना (देवी=विदुष्य स्त्रिय), प्र०—अत्र 'सुपा सुलुक्०' इति जसो लुक् ४ ५१ ८ सदृशी (कन्या)

सभास्थाणुम् सभाया स्थितम् (पुरुषम्) ३० १८ [सभा-स्थाणुपदयो समास । स्थाणुम्=ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'स्थो णु' उ० ३ ३७ सूत्रेण णु]

सभृतयः समाना भर्त्तारो यासा ता (युवतय स्त्रिय) ६ ६७ ७ [समान-भृतिपदयो समासे समानस्य सादेश । भृति =डुभृञ् धारणपोषणयो (जु०) धातोर्वाहु० औणा० ति किच्च]

